दीप्यकश्चाजमोदा च शुकनाशां सहिंगुकं॥ एतानि समभागानि गणायषोड्विंशतिः॥ एषां क्काथो निपीतः स्याद्वातश्लेष्मज्वरापहः॥
हंति वातं तथा शीतप्रस्वेदमतिवेपथुं॥ प्रलापं चातितंद्रां च रोमहर्षो रुचिस्तथा॥ महावाते पतंत्रे च शून्यत्वे सर्वगात्रजे॥ पिप्पल्यादि मह
क्काथो ज्वरे सर्वत्र पूज्यते॥ महापिप्पल्यादि॥ पिप्पलीभिः शृतं तोयं मनभिष्यंदि दीपनं॥ वातश्लेष्मज्वरं हंति सेवितं प्लीहनाशनं॥ पिप्प
ल्यादि॥ गुडूचीनिम्बधान्याकचंदनं कटुरोहिणी॥ गुडूच्यादिरयं क्काथः पाचनो दीपनस्मृतः॥ तृष्णादाहारुचिछर्दिपित्तश्लेष्म
ज्वरापहं॥ गुडूच्यादि॥ अमृताकटुकारिष्टपटोलघनचंदनं॥ नागरेन्द्रयवं चैतदमृताह्वकमीरितं॥ कथितं सकणापीतं पित्त
श्लेष्मज्वरापहं॥ हृल्लासारोचकछर्दितृष्णादाहनिवारणं॥ अमृताष्टकं॥ कंटकार्यमृताभार्गीविश्वेन्द्रयववासकं॥ भूनिम्बचंद
नं मुस्तं पटोलकटुरोहिणी॥ पिपाच्च पाययेत् क्काथं पित्तश्लेष्मज्वरापहं॥ दाहतृष्णारुचिछर्दिकाशशूलनिवारणं॥ कंटकार्यादि
॥ नागरोशीरविल्वाब्दधान्यमोचरसांवुभिः॥ कृतः क्काथो भवेदाहीपित्तश्लेष्मज्वरापह॥ नागरादि॥ शालिपर्णीपृश्निपर्णीबृहतीद्वय
गोक्षुरैः॥ विल्वाग्निमंथश्योनाककाश्मीरीपाटलायुतैः॥ दशमूलइति ख्यातं क्कथितं तज्जलं पिबेत्॥ पिप्पलीचूर्णसंयुक्तं वातश्ले
ष्मापहं परं॥ सन्निपातज्वरहरं सूतिकादोषनाशनं॥ शोषशैत्यभ्रमस्वेदकाशश्वासविकारनुत्॥ हृत्कंठग्रहपार्श्वार्त्तितंद्रामस्तकशूल

युत॥ दशमूल्यादि॥ अभयाग्रस्तधान्याकरक्तचन्दनपद्मकैः॥ वत्सकेन्द्रयवोशीरगुडूचीकृतमालकैः॥ पाठानागरतिक्ताभिः पिप्पली
चूर्णयुक्शृतं॥ पिबेत्त्रिदोषज्वरजित्पिपासादाहकाशनुत्॥ प्रलापश्वासतन्द्राघ्नं दीपनं पाचनं परं॥ विराम्मूत्रानिलविष्टंभवमिशो
षारुचिच्छिदं॥ अभयादि॥ केरातकटुकामुस्ताधान्येंद्रयवनागरैः॥ दशमूलमहादारुगजपिप्पलिकायुतैः॥ कृतेकषायः पार्श्वा
र्त्तिसन्निपातज्वरं हरेत्॥ काशश्वासावमीहिक्कातंद्राहृद्ग्रहनाशनं॥ अष्टादशांगः॥ दशमूलकषायस्तु सपोष्करकरान्वितः॥ स
न्निपातज्वरे देयं श्वासकाशसमन्वितः॥ द्वादशांगः॥ चिरज्वरे वातकफोल्वणे वा त्रिदोषजे वा दशमूलमिश्रः॥ किराततिक्तादिग
णः प्रयोज्यः शुद्ध्यर्थिनो वा त्रिवृता विमिश्रः॥ किराततिक्तकोमुस्तंगुडूचीविश्वभेषजं॥ किरातादिगणो ह्येष चातुर्भद्रक इत्यपि॥
॥ चतुर्दशांगः॥ तत्र तु हन्यं वमूलश्च सहितः॥ रास्नादिकं टशतपर्वमहौषधानां भार्गीसपौष्करघनामरदारुधान्यं॥ क्वाथो हितः स
कलमारुतजे ज्वरेषु स्यात्संनिपातजनितेषु दारुणेषु॥ रास्नादि॥ लघुपंचमूलं काथत्रयोजं॥ परुषकाणि त्रिफलादेवदारुसकट्
फलैः॥ चंदनं पद्मकं चैव तथा कटुकरोहिणी॥ पक्षिपरीशृतं चैभिरुषितं शीतलं जलं॥ पित्तोत्तरे नराणामेतत्सन्निपाते चिकित्सितं
॥ किराततिक्तकं मुस्तं गुडूची विश्वभेषजं॥ पाठोदीच्यमृणालं च शृतं पित्ताधिके पिबेत्॥ किरातसप्तकं॥ मुस्तपर्पटकोशीरदेवदारु
महौषधं॥ त्रिफला धन्वयासश्च नीलिकंपिल्लकं त्रिवृत्॥ किराततिक्तकं पाठा बला कटुकरोहिणी॥ पिप्पलीमुस्तकं चैव मुस्ताद्यो गराउच्यो

॥अष्टादशांगमुदकं सन्निपातज्वरापहं॥ पित्तोत्तरं सन्निपाते हितमुक्तं मनीषिभिः॥ मन्यस्तंभे उरोघाते हृत्स्तंभे शिरोगदे॥ अष्टादशां-
गः॥ बृहत्यौ पौष्करं भार्गी शठी शृंगी दुरालभा॥ वत्सकस्य च बीजानि पटोलं कटुरोहिणी॥ बृहत्यादिगणः शस्तः सन्निपाते कफोत्तरे॥
श्वासादिषु च सर्वेषु हितः सोपद्रवेषु च॥ बृहत्यादिः॥ मतगरवरतिक्तारेवताभोदतिक्तानलदन्तीगंधाभारतीहारहूराः॥ मल-
यजदशमूलीशंखपुष्प्यः सयक्ताप्रलपनमपहन्तु पानतो नातिहृतान्॥ मतगरादि॥ रोहिषधन्वयवासकवासापर्पटगेध्मलताकटु-
काभिः॥ शार्करयासममेषकषायः क्षतजष्ठीवनडदितकषायः॥ रोहिषादि॥ पद्मकचंदनपर्पटमुस्ताजातिवरारुणचंदनवारि॥
क्लीतकनिम्बयुतं परिपक्वं वारि भवेदिह शोणितहारि॥ पद्मकादिः॥ मधूकमधूकपरिषकयाथच्चन्दनपद्मकदारुसनाथ॥ श्रीप-
र्णीफलशीतकषायः सशितइहस्याद्स्रजयाय॥ मधूकादि॥ शृंगीभार्गीभयाजाजीकरणभूनिम्बपर्पटैः॥ देवदारुवचाकुष्ठमांसीक-
ट्फलनागरैः॥ मुस्ताधान्यकतिक्तेंडयवपाठाहरेणुभिः॥ हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकैः॥ विशालारग्वधारिष्टशठीवा-
कुचिकाफलैः॥ विडंगरजनीदार्वीयवानीद्वयसंयुतैः॥ समांसैर्विहितः क्वाथहिंगार्द्रकसमन्वितः॥ अभिन्यासज्वरं घोरं हंति तंद्रावत-
त्सरणात्॥ प्रमोहं कर्णशूलं च सन्निपातस्त्रयोदश॥ हिक्काश्वासं च कासं च तथा सर्वानुपद्रवान्॥ शृंग्यादि॥ पर्पटं कट्फलं कुष्ठमुशीरं चं-
दनं जलं॥ नागरं मुस्तकं शृंगी पिप्पल्यषा शृंतं हितं॥ तृष्णादाहाग्निमांद्येषु पित्तश्लेष्मोल्वणे ज्वरे॥ पर्पटादि नागरं धान्यकं भार्गीपद्मकं र

॥सात्म्यद॰॥
॥६॥

क्तं चंदनं। पटोलः पिचुमंदश्च त्रिफला मधुकं बला॥ शर्करा कटुका मुस्ता गजाह्वा व्याधिघातकाः॥ किराततिक्तममृतादशमूलीनिदिग्धिका॥
योगराजो निहंत्येष सन्निपातत्रिकोल्वणं॥ सन्निपातसमुत्थानमृत्युमप्यागतं जयेत्॥ योगराजः॥ क्षुद्रानागरपुष्कराम्रतलताब्राह्मीवचासु
व्रताभार्गीवासकयासतोयमुरसाक्वाथो जयेज्जिह्वकं॥ क्षुद्रादि॥ विश्वावर्मविभावरीपुनर्नवरीवत्सादनीवारिदः॥ व्याघ्रीनिंबपटोलपुष्क
रजटारुग्दारुभिर्वा कृतः॥ विश्वादि॥ ॥भास्वन्मूलं जीरकं व्योषभार्गीव्याघ्रीशुंठीपुष्करं गोजलेन॥ सिद्धं सद्यः शीतगात्रत्रिमोह
श्वासश्लेष्मोद्गारकाशान्निहंति॥ अर्कादि॥ शठी सुरतरुश्च मांस्थविरदारुरास्नासमा सनागरसधाविताऽपि वशतावरीसंयुताः॥ म
स्तुज्वलनपाचितासहपुरेणासंधिग्रहव्यथाप्रहतवेतसेशिशिरसेवनं मा कृथा॥ शठ्यादि॥ वचाकवचकटुरामृताभंगरासुराह्वघन
नागरातरुणादारुरास्नापुराः॥ कृषानरुणाभीरुभिसह भवंति संधिग्रहव्यथोरुजडिमक्लमभ्रमशापक्षघातदुहः॥ वचादि॥ कट्फलत्रि
फलादारुचंदनं सपरूषकं॥ कटुकापद्मकोशीरविपचेत्कार्षिकं जले॥ तत्संनिपातदाहघ्नं पानमात्रेणापूजितं॥ दीर्घकालप्रसक्तानां ज्वराणा
ममृतोपमं॥ कट्फलादिपानकः॥ सुरैरंडपाराणावाराणादारुच्छिवारास्नाभीरुकचूरतिक्ता॥ वासाविश्वापंचमूलीपुगाघ्राह्वन्यान्या
लंभसक्थिग्रहार्त्ती॥ सुरसादि॥ मंजीकामरदारुममृणसकलामुस्तामलकोमृतापथ्यारेवतरामसेनकरजोराजीफलैः संयुताः॥ हत्युश्चि
त्तरुजोथदद्रुरदलाद्राक्षापटोलीपयःपथ्यापर्पटराजवृक्षकटुकाशंबूकपथ्वीमृता॥ मंजीकादि॥ भार्गीजयापौष्करकंठकारीकटुत्रिके

॥राम॰॥
॥६॥

ग्राघनकुंडलीभिः ॥ कुलीरशृंगीकटुकारसाभिः कृतः कषायो किल कर्णिकघ्नः ॥ भार्ग्यादि ॥ फलत्रिकत्रायषरामुस्तकट्वीकलिंगकृष्णा
ननसर्वरीभिः ॥ क्वाथ कृतः कंतनिकंटकाङ्ककटीरवः कंजरयाश्रयदत् ॥ फलत्रिकादि ॥ किरातकटुकाकरणाकुटजकंटकारीशठी
कलिंदुकिलिमाभयाकटुककट्फलांभोधरैः ॥ विषामलकपुष्करानलकुलीरशृंगीवृषेमहौषधसुरैवरयं जयतिकंटकाङ्गगणाः ॥ किरा
तादि ॥ कट्फलीवुदभार्गिमिधान्यरोहिषपर्पटैः ॥ वचाहरीतकीशृंगीदेवदारुमहौषधैः ॥ क्वाथः काशज्वरं हंति श्वासश्लेष्मगलग्रहान्
॥ कट्फलादि ॥ क्षुद्राधान्यकशुंठीभिगुडूचीमुस्तपद्मकैः ॥ रक्तचंदनभूनिंबपटोलवृषपौष्करैः ॥ कटुकेन्द्रयवोरिष्टभार्गीपर्पटकैः समैः
॥ क्वाथं प्रातः निषेवेत सर्वशीतज्वरछिदं ॥ वृहत्क्षुद्रादि ॥ शुंठीवराहुशीरैश्च विवेन्तोयं सुसाधितं ॥ दाहशीतज्वरहरं पाचनं भिषजांम
तं ॥ शुंठ्यादि ॥ निंवपत्रे कृते क्वाथं मधुफाणितमिश्रितं ॥ दाहशीतज्वरान्तेश्च वीषाज्वरमथो हति ॥ निंबादि ॥ चातुर्जातककर्पूरकंकोलाग
रुडंकुमं ॥ लवंगसहितं चैव सर्वगंधकषायकः ॥ सर्वगंधः ॥ कालिंगकपटोलस्यपत्रं कटुकरोहिणी ॥ पटोलसारिवामुस्तपाठाकटुकरोहि
णी ॥ निंवः पटोलत्रिफलामृद्वीकामुस्तवत्सकैः ॥ किरातनिक्तममृतावंदनं विश्वभेषजं ॥ गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापना ॥ कषा
याः शमयत्याशु पंचपंचाधिकं ज्वरं ॥ संततं सततान्येद्युष्कं तृतीयकचतुर्थकं ॥ महाबलामूलमहौषधाभ्यां क्वाथो निहंत्याद्विषमज्वरं हि
॥ शीतं सकंपं परिदाहयुक्तं विनाशयेद्धि त्रिदिनप्रयोगात् ॥ मुस्तामलकगुडूचीविश्वौषधकंटकारिकाक्वाथः ॥ पीतः सकणाचूर्णासमधुविष

मज्वरंहंति ॥ मुस्ताक्षुद्रामृताशुंठीधात्रीक्वाथसमाक्षिकः ॥ पिप्पलीचूर्णसंयुक्तोविषमज्वरनाशनः ॥ मुस्तादि ॥ पटोलत्रिफलानिंबद्रा
क्षासंपाकवासकैः ॥ क्वाथःसितामधुयुतोजयेदेकाहिकंज्वरं ॥ पटोलादि ॥ ॥ गुडूचीधान्यमुस्ताभिश्चंदनोशीरनागरैः ॥ कृतंक्वाथंपिबेन्
क्षौद्रसितायुक्तंज्वरातुरः ॥ तृतीयज्वरनाशायतृष्णादाहनिवारणं ॥ गुडूच्यादि ॥ देवदारुशिवावासाशालिपर्णीमहौषधैः ॥ धातृयुक्तै
शृतंशीतंदद्यान्मधुसितायुतं ॥ चातुर्थिकेज्वरेश्वासेकासेमंदानलेतथा ॥ देवदार्व्यादि ॥ त्रायंतीकटुकानंतासारिवाभिःशृतंजलं ॥ सं
ततारव्येज्वरेपेयंवातादीनांनिवृत्तये ॥ पटोलाकटृषातिक्तासारिवाभिःशृतंजलं ॥ संततादि ॥ पटोलेन्द्रयवानंतापथ्यारिष्टामृतांजलं
॥ क्वथितंतज्जलंपीतंज्वरंसंततकंजयेत् ॥ द्राक्षापटोलनिंबाब्दशक्राह्वत्रिफलाशृतं ॥ जलंजंतुःपिबेच्छीघ्रमन्येद्युष्कप्रशांतये ॥ शि
वामुस्तामृताक्वाथश्चातुर्थकहरःपरः ॥ विषमज्वरः ॥ निदिग्धिकानागरकामृतानांक्वाथंपिबेन्मिश्रितपिप्पलीकं ॥ जीर्णज्वरारोचकका
शशूलश्वासाग्निमांद्यार्दितपीनसेषु ॥ निदिग्धिकादि ॥ पिप्पलीचूर्णसंयुक्तःक्वाथश्छिन्नोद्भवोद्भवः ॥ जीर्णज्वरकफध्वंसीपंचमूलीकृ
तोथवा ॥ द्राक्षापत्राशटीशृंगीमधुकंरक्तचंदनं ॥ नागरंकटुकापाठाभूनिंबसदुरालभा ॥ उशीरपद्मकंधान्यंवालकंकंटकारिका ॥ पुष्क
रंपिचुमंदंचदशाष्टांगमिदंशुभं ॥ जीर्णज्वरारुचिश्वासकासश्वयथुनाशनं ॥ द्राक्षाद्यष्टादशांगः ॥ द्राक्षाटरूषोबृहतीहरिद्राधात्रा
भयावीरणकृतःकषायां ॥ क्षौद्रेणमिश्रोविनिहंतिनूनंरक्तोद्भवंशूलयुतंज्वरंच ॥ द्राक्षादि ॥ मासंचपिप्पलीक्वाथंहंतिमेदोगतंज्वरं ॥ पटोलयु

स्तामृतवह्निवासकं सनागरं धान्यकिराततिक्तकं ॥ कषायमेषांमधुनापिबेन्नरः निवारयेद्दुर्जलदोषमुत्वरां ॥ पटोलादि ॥ अरुचिमनलमां
द्यं पीनसश्वासकाशानुदरगुदकदोषानाशुहन्यादशेषान् ॥ जनयतितनुकांतिविह्निनेत्रप्रसादं पलपरिमितशुंठीक्षोदसिद्धः कषायः
शुंठी ॥ सिंहीव्याघ्रीताम्रमूलीपटोलीशृंगीनस्रापुष्करंरोहिणीच ॥ शांकंशंव्याशैलमन्याश्ववीजं श्वासंहन्यात्संनिपातेदशांगः ॥ सिंह्या
दि ॥ भार्गीनिंबघनाभयामृतलताभूनिंबवासाविषात्रायंतीकटुकावचात्रिकटुकंश्योनाकशक्रद्रुमैः ॥ क्वाथोयंखलुसंनिपातनि
वहात्द्वात्रिंशतापाचतोदुर्जेयानिजनेजसाविजयतेसर्पान्गरुत्मानिव ॥ किंचश्वासबलासकासजठरहृद्रोगहिक्कामरुन्म
त्यास्नभगलामयार्दितमलाविष्टंभवध्मानपि ॥ द्वात्रिंशकः ॥ किराततिक्तकंतिक्तामुस्तापर्पटकामृता ॥ निःक्वाथ्यपीतानिनिघ्नं
तिपुनरावर्त्तकज्वरं ॥ इतिज्वराधिकारः ॥ ॥ अथातिसारः ॥ धान्याउभ्यांशृतंतोयंतृष्णादाहातिसारिणे ॥ ह्रीवेरंशृंगवेरा
भ्यांमुस्तपर्पटकेनवा ॥ उशीरोदीच्यशृतंशीतंप्रदातव्यंपिपासवे ॥ पथ्यादारुवचामुस्तैर्नागरातिविषाचितैः ॥ आमातीसारनाशाय
क्वाथमेभिःपिबेन्नरः ॥ पथ्यादि ॥ वत्सकातिविषाबिल्वमुस्तवालकजंशृतं ॥ अतीसारंजयेत्सामंचीरजंरक्तशूलजित् ॥ वत्सका
दिः ॥ ॥ धन्यबालकबिल्वाब्दनागरैःपाचितंजलं ॥ आमशूलंविबंधघ्नंपाचनंनित्यसेवितं ॥ धान्यपंचक ॥ पित्तेधान्यावत्
कंतुशुंठीत्यागाद्ददंतिहि ॥ रक्तेपिपित्तसाधर्म्याद्भिन्नंधान्यचतुष्टयं ॥ धान्यचतुष्क ॥ कंचटकैंवूदाडिमशृंगाटकपत्रबिल्वबहिं
ज

ष्टं ॥ जलधरनागरं सहितं गामपि वेगवाहिनीं रुध्यात् ॥ गंगाधर ॥ ह्रीवेरं धातकीलोध्रं पाठालज्जालुवत्सकैः ॥ धान्यकानिविषामुस्तै
गुडूचीविल्वनागरैः ॥ कृतः कषायः शमयेदतीसारं चिरोत्थितं ॥ अरोचकामशूलास्रज्वरघ्नः पाचनः स्मृतः ॥ ह्रीवेरादि ॥ वचाचातिवि
षा कृतः ॥ कषायो हंत्यतीसारं सामं पित्तसमुद्भवं ॥ विल्वादि ॥ वच्यातिविषाकुष्टं वालं विल्वं सनागरं ॥ वत्सकत्वक्फलेपथ्याहृद्दि
श्लेष्मातिसारनुत् ॥ वच्यादिः ॥ कृमिशत्रुवचाविल्वपेशीधान्याककट्फलं ॥ एषां क्वाथं भिषग्दद्यादतीसारं वलासजे ॥ विडंगादि
॥ ॥ मुस्तासातिविषामुस्तं वालविल्वं सनागरं ॥ वत्सकत्वक्फलं पथ्या वातश्लेष्मातिसारनुत् ॥ मुस्तादि ॥ कुटजातिविषामुस्तं हरि
द्रापर्णिनीद्वयं ॥ सक्षौद्रसार्करं शस्तं पित्तश्लेष्मातिसारिणां ॥ कुटजादिः ॥ पंचमूलीवलाविल्वगुडूचीविल्वनागरैः ॥ पाठाभूनिंब
वर्हिष्ठकुटजत्वक्फलैः शृतं ॥ सर्वजं हंत्यतीसारं चापि तथावसिं ॥ सशूलोपद्रवं श्वासं काशं चापि सदुस्तरं ॥ पंचमूलादि ॥ वत्सकत्
रुत्वगार्द्रदाडिमसंभवत्वच ॥ त्वग्युगलं पलमाने विपचेदृंगगसंमिते तोये ॥ अष्टमभागे शेषे क्वाथमधुनापिवेत् पुरुषः ॥ रक्तातिसार
सारमुल्वणमतिशयेन नियतं ॥ वत्सकादि ॥ ॥ कुटजातिविषामुस्तं वालकं लोध्रचंदनं ॥ धातकीदाडिमं पाठा क्वाथमेषां समा
क्षिकं ॥ पिवेद्रक्तातिसारेषु दाहशूलामसंयुते ॥ कुटजातिकषायोयं सर्वातीसारनाशनं ॥ कुटजादि ॥ ॥ पाठांतरे त्वतिविषारहितं
च ॥ ह्रीवेरातिविषामुस्तं विल्वधान्यकवत्सकं ॥ पिवेत्कृतं विवंधघ्नं सशूलं दोषपाचनं ॥ संशोणितमतीसारं सज्वरं वाथविज्वरं ॥ ॥

ह्रीवेरादि ॥ वत्सकातिविषाशुंठीविल्वंहिंगुयवांबुदं ॥ चित्रकेणाशृतक्काथसद्य आमातिसारजित् ॥ वत्सकादि ॥ ॥ विल्वचूतास्थि
निर्यूहपीतसक्षौद्रशर्करा: ॥ निहन्याच्छर्द्यतीसारंवैश्वानलंवाहुतिं ॥ विल्वादि ॥ ॥ पटोलयवधान्याकक्काथपेयंसुशीतलं ॥ शर्करा
मधुसंयुक्तंछर्द्यतीसारनाशनं ॥ पटोलादि ॥ जंब्वाम्रपल्लवोशीरवटशुंगावरोहजः ॥ रसः क्काथोधवाचूर्णंक्षौद्रेणासहयोजितं ॥ छर्दि
ज्वरमतीसारंमूर्छांतृस्नांचदुर्जया ॥ नियच्छत्यविसस्रक्तंच्युतिवानेकहेतुना ॥ जंब्वादि ॥ ॥ विडंगातिविषामुस्तदारुपाठाकलिंगकां ॥
मरिचेनसमायुक्तंशोफातीसारनाशनं ॥ विडंगादि ॥ धातकीविल्वलोध्राणिवालकगजपिप्पली ॥ एभिः कृतंशृतंशीतंशिशुभ्य
क्षौद्रसंयुतं ॥ प्रदद्याद्वलेहोवासर्वातीसारनाशनं ॥ धातक्यादि ॥ पटोलयष्टीमधुकक्काथेनशिशिरेणाहि ॥ गुदप्रक्षालनंकार्यं
तेनैवगुडसेवनं ॥ पटोलादि ॥ इत्यतीसार: ॥ अथज्वरातीसार: ॥ वत्सादनीवत्सकवारिवाहविश्वंभरानिववि षासविश्वा ॥ ज्व
रातिसारंज्वरितंजयंतिविश्वामृतावत्सकवारिवाहा ॥ वत्सादन्यादि ॥ पाठामृतापर्पटमुस्तविल्वाकिराततिक्तेन्द्रयवाविपाच्याः
॥ पिवंहरत्येवहठेनसर्वंज्वरातिसारानपिदुर्निवारान् ॥ पाठादि: ॥ गुडूचीधान्यकोशीरशुंठीवालकपद्मकैः ॥ विल्वप्रतिवि
षापाठारक्तचंदनवत्सकैः ॥ किरातमुस्तेन्द्रयवैक्कथितंशिशिरंपिवेत् ॥ सक्षौद्रंरक्तपित्तघ्नंज्वरातीसारनाशनं ॥ गुडूच्यादि
॥ [illegible] ॥ नागरंकुटजोमुस्तममृतातिविषातथा ॥ एभिःपिवेत्कृतंक्काथंज्वरातीसारनाशनं ॥ नागरादि ॥ उशीरंवालकमु

स्तं धान्यकं विल्वमेव च ॥ समंगाधातकीलोध्रं विश्वंदीपनपाचनं ॥ हंत्यारोचकपिछामं विवंधंसातिवेदनं ॥ सशोणितमतीसारं मज्व
रं वाथविज्वरं ॥ उशीरादि ॥ उत्पलं दाडिमं त्वक् च पद्मकेशरमेव च ॥ पिवेत्तण्डुलतोयेन ज्वरातीसारनाशनं ॥ उत्पलादि ॥ ॥
पृश्निपर्णीवलाविल्वधनिकानागरोत्पलैः ॥ ज्वरातिसारे पेयं वा पिवेत्साम्लाशृतां नरः ॥ उत्पलषट्कं ॥ कणाकरिकणालाजा
क्काथो मधुसिताप्लुतः ॥ क्काथः सर्वज्वरहरः सर्वातीसारनाशनः ॥ कणादि ॥ विल्ववालकभूनिम्वगुडूचीधान्यनागरैः ॥ कुटजाग्र
तः क्काथो ज्वरातीसारशूलजित् ॥ विल्वादि ॥ दशमूलीकषायेन विश्वामक्षसमां पिवेत् ॥ ज्वरे चैवातिसारे वसामेषाग्रहणीगदे ॥ ॥
दशमूली ॥ इति ज्वरातीसाराधिकारः ॥ अथ ग्रहणी ॥ ज्वरे शालिपर्णीवलाविल्वधासशुंठीकृतः शृतः ॥ आध्मानशूलसहितां वा
तजां ग्रहणीं जयेत् ॥ शालिपर्ण्यादि ॥ दारुनागरनिशासवासकं कुंडलीमगधजाशटीघना ॥ रास्नाभार्गीसरलाहयेक्षं रं पाचनं भ
वति वातिके ग्रहे ॥ गुडूच्यतिविषाशुंठीमुस्तैः क्काथकृतो जयेत् ॥ आमात्नां ग्रहणीं ग्राही पाचनदीपनं ॥ चातुर्भद्रं ॥ ॥ नलवेरा
कुशानां च काशेक्षुराणां च मूलकं ॥ निःक्काथ्य वहितं पानं पाचनं पैत्तिके ग्रहे ॥ नलादि ॥ पाठावत्सकवीजानि चित्रकं विश्वभेषजं
॥ पिवेत्रिः क्काथाचूर्णानि सहैवोष्णेन वारिणा ॥ पित्तश्लेष्माभिभूतानां ग्रहणीं शूलनुद्विजं ॥ पाठादि ॥ इति ग्रहणी ॥ ॥
अथार्शः ॥ चंदनकिराततिक्तकधन्वयवासाः सनागराः क्कथिताः ॥ रक्ताशंशाप्रशमनश्रेष्ठो जठराग्निविवर्द्धनः ॥ विल्वनागरयो

क्काथो हन्याछर्दिविसूचिकां ॥ विल्वनागरकैर्दार्व्यायुक्तः सदधिकोग्ररो : ॥ इत्यग्निमांद्यः ॥ ॥ अथ कृमि : ॥ विडंगमूलतपानी
यविडंगेनावधूलितं ॥ पानं कृमिहरं दुष्टं कृमिजांश्च गदान्हरेत् ॥ त्रिफलादेवदारुश्च मुस्तामूषककर्णिकां ॥ शिग्रुरेतैः कृतः क्का
थः पिप्पली चूर्णसंयुतः ॥ विडंगचूर्णयुक्तश्च रेचनं क्रिमिरोगहा : ॥ इति कृम्यधिकारः ॥ अथ पांडु : ॥ पुनर्नवाभयानिंबदार्वीति
क्तापटोलकैः ॥ गुडूचीनागरयुतैः क्काथो गोमूत्रसंयुतः ॥ पाण्डुकाशोदरश्वासशूलसर्वांगशोथहा ॥ पुनर्नवादि ॥ त्रिफलाकटु
कयुक्तानिंबभूनिम्बमेघन हृदमनलताह्वा चेतकीनागरस्य ॥ क्वथितमपि विधेयः सारमेतन्नु सिङ्गमनकलहसेवायोऽथपां
डुनिहन्यात् ॥ त्रिफलादि ॥ ॥ इति पांड्वधिकार : ॥ अथ क्काथ ॥ फलत्रिकामृतातिक्तानिम्बकैरातवत्सकैः ॥ जयेन्मधुयुतः ॥
क्काथ : कामलापांडुतां तथा ॥ फलत्रिकादि ॥ त्रिफलावृषभूनिम्बतिम्बतिक्तामृताकृतः ॥ क्काथो मधुसितायुक्ता कामलापांडुरोगजि
त् ॥ द्वितीयत्रिफलादि ॥ इति कामलाधिकारः ॥ अथ रक्तपित्त : ॥ वासाक्षक्षामया क्काथः पीतः सक्षौद्रशर्करः ॥ निहन्ति रक्तपित्ता
त्तं श्वासकाशामृदुस्वरात् ॥ रक्तपित्तं क्षयं काशं श्लेष्मपित्तज्वरं क्षयं ॥ केवलो वासकक्काथपीतो क्षौद्रेण नाशयेत् ॥ वासादि ॥ ॥
जलं खर्जूरमृद्वीकामधुकैः सपरूषकैः ॥ शृतं शीतं प्रयोक्तव्यं तर्पणार्थं सशर्करं ॥ ह्रीवेरचंदनोशीरमुस्तपर्पटकैः शृतं ॥ केवलं शृ
तशीतं वा दद्यात्तोयं पिपासवे ॥ शतावरीबलारास्नाकाश्मर्यं सपरूषकं ॥ पाचयेद्रक्तपित्तघ्नं सद्यःशूलहरं परं ॥ उत्पलं कुमुदं पद्म

कल्हारंलोहितोत्पलं ॥ पंचोपलाशंपित्तास्रविषछर्दिहरोगराः ॥ एलामसंगासहशाल्मलीनांहरीतकीमागधिकासमांसा ॥ क्काथो
हितिक्षौद्रसितायुतोपयातिप्रवाहंविनिवारयेच्च ॥ एलादि ॥ इतिरक्तपित्ताधिकारः ॥ अथक्षयः ॥ गुडूचीशृंगवेरंचयवानीक्कथि
तंजलं ॥ क्कथितंमरिचंचैवरात्रौपानंरसक्षये ॥ गुडूच्यादि ॥ इतिक्षयाधिकारः ॥ अथकासः ॥ वासाक्षुद्रामृताक्काथः क्षौद्रेणाज्वर
नाशहा ॥ कासघ्नपिप्पलीचूर्णयुक्तःक्षुद्रामृतोद्भवः ॥ क्षुद्राकुलत्थवासाभिर्नागरेणचसाधितं ॥ क्काथः पौष्करचूर्णाढ्यः श्वासका
सौनिवारयेत् ॥ बलाद्वयबृहतीवासाद्राक्षाभिःक्काथितंजलं ॥ पित्तकासहितंपेयंशर्करामधुयोजितं ॥ बलादि ॥ पुष्करंकट्
फलंभार्गीविश्वापिप्पलिसाधितं ॥ पिबेत्क्काथंकफोद्रेकेकासेश्वासेचहृद्ग्रहे ॥ पुष्करादि ॥ कंटकारीयुगंद्राक्षावासाकर्चूरवाल
कैः ॥ नागरेणचपिप्पल्याक्कथितंसलिलंपिबेत् ॥ शर्करामधुसंयुक्तंपित्तकासहरःपरः ॥ कंटकार्यादि ॥ पिप्पलिकट्फलशुंठीशृंगी
भार्गीनथौषधं ॥ कारवीकंटकारीचसिंदुवारोयवानिका ॥ चित्रकोवासकश्चैषांकषायोविधिवत्कृतं ॥ कफकासविनाशायपिबेत्कु
ष्मारजोयुतं ॥ पिप्पल्यादि ॥ कट्फलंकतृणंभार्गीमुस्तंधान्यंवचाभया ॥ शुंठीपर्पटकंशृंगीसुराह्वाचजलेशृतं ॥ मधुहिंगुयुतंपेयंका
सवातकफात्मिते ॥ कंठरोगेषुशूलेषुहिक्काश्वासज्वरेषुच ॥ कट्फलादि ॥ सिंहास्यामृतासिंहिनांक्काथंमधुसमायुतं ॥ पिबेत्सपित्तेकफ
जेश्वासेकासेज्वरेक्षये ॥ इतिकासाधिकारः ॥ ॥ अथश्वासः ॥ दशमूलस्यवाक्काथःपौष्करेणावचूर्णितं ॥ श्वासकासप्रशमनंपार्श्व

कंट्फलादि

मूलनिवारणं ॥ शृंगीमहौषधकणाघनपौष्कराणांचूर्णंशठीमरिचयोश्चसिताविमिश्रं ॥ क्काथेनपीतममृतावृषपंचमूलीश्वास
त्राहेनविनिहंतिहिघोररूपं ॥ भङ्गानतकमधुपर्णीपथ्यानागरदशमूलनागरःक्काथ ॥ तमकेप्रधमनेशस्तश्वासेचकफमारुतजे ॥
पथ्याकायमथवापिवेद्रसंमार्कवंमधुना ॥ तमकेपुष्करजंवासनागरंक्षारमेकंवा ॥ इतिश्वासाधिकारः ॥ ॥ अथछर्दि ॥ विल्वस्य
त्वोगडूच्यावाक्काथक्षौद्रेणसंयुतः ॥ जयेत्त्रिदोषजांछर्दिंपर्पटपित्तजांतथा ॥ पटोलयवधान्याकक्काथपेयःसुशीतलः ॥ शर्करा
मधुसंयुक्तंछर्दीतीसारनाशनं ॥ पद्मकामृतनिंबानांधान्यचंदनयोपिबेत् ॥ गुडूचीत्रिफलानिंबपटोलैःक्कथितंजलं ॥ पिबेन्मधुयु
तंतेनछर्दिनश्यतिपित्तजा ॥ इतिछर्द्यधिकारः ॥ अथतृष्णा ॥ उष्मापर्पटकोदिच्यमुस्तवालकोशीरचंदनैः ॥ शृतंशीतंजलंदद्यात्तृ
ड्दाहज्वरशांतये ॥ षडंगपानं ॥ मृद्वीकाक्षीरखर्जूरचंदनैःपालिकैःशृतं ॥ जलारुकेपादशेषंपित्ततृष्णाधिकेपिबेत् ॥ उत्पलंचं
दनंलाजाउशीरंक्कथितंजलं ॥ सितामधुसमायुक्तंपित्ततृष्णानिवारणं ॥ विल्वारुकीधातकिपंचमूलंदर्भेषुसिद्धंकफसंज्ञकाघ्नं ॥
आमोद्भवांविल्वगायुतानांजयेत्कषायैरथदीपनानि ॥ इतितृष्णाधिकारः ॥ ॥ अथमूर्छा ॥ द्राक्षासितादाडिमलाजवंतिकल्हार
नीलोत्पलपद्मवंति ॥ पिबेत्कषायाणिचशीतलानिपित्तज्वरेयानिचपाययंति ॥ क्षौद्रामृतापौष्करनागराणिभार्गीशिवाभ्यांक्कथितं
निपानात् ॥ पिबेदुरालभाक्काथंसघृतंभ्रमशांतये ॥ पथ्याक्काथेनसंसिद्धंघृतंधात्रीरसेनवा ॥ इतिमूर्छाधिकारः ॥ अथदाह ॥ पाठी

पर्प्पटकोशीरनीरदनीरदनीरजैः ॥ मरालमिशिधान्याकपद्मकामलकैः कृतः ॥ अर्द्धशिष्टः सितायुक्तः पीतः क्षौद्रसमन्वितः ॥ क्वाथो वा
पोहयेद्दाहं तृष्णासृग्ज्वरमोल्वणां ॥ चंदनादि ॥ इति दाहाधिकारः ॥ अथ वात ॥ हिंगुपोष्करचूर्णाख्यो दशमूलीशृतो जयेत् ॥ गृध्रसी
केवलः क्वाथो शेफालिपत्रजस्तथा ॥ रास्नामृतामहादारुनागरैरंडजं शृतं ॥ सप्रधानुगते वाते सामे सर्वांगगे पिबेत् ॥ अन्यच्च ॥ रास्ना
पुनर्नवा शुंठी गडूच्यैरंडजं शृतं ॥ रास्नापंचकः ॥ रास्नागोक्षुरकैरंडदेवदारुपुनर्नवा ॥ गडूच्यारग्वधश्चैव क्वाथमेषां विपाचयेत् ॥
शुंठीचूर्णसमायुक्तं पिबेज्जंघाकटिग्रहे ॥ पार्श्वपृष्ठोरुपीडायामामवाते सुदुस्तरे ॥ रास्नासप्तक ॥ रास्नाद्विगुणभागस्यादेकभागस्त
तोपरे ॥ धन्वयासवलैरंडदेवदारुशठीवचा ॥ वासको नागरं पथ्या चव्या मुस्ता पुनर्नवा ॥ गडूची वृद्धदारुश्च शतपुष्पा च गोक्षुरः ॥
अश्वगंधा प्रतिविषा कृतमाला शतावरी ॥ कृष्णासहचरश्चैव धान्यकं बृहतीद्वयं ॥ एभिः कृतं पिबेत् क्वाथं शुंठीचूर्णेन संयुतं ॥ कृष्णा
चूर्णेन वा योगराजगुग्गुलुना तथा ॥ अजमोदादिना वापि तैलेनैरंडजेन वा ॥ सर्वांगकंपे कुब्जत्वे पक्षाघातेऽपवाहुके ॥ गृध्रस्या
मामवाते व श्लीपदे चापतानके ॥ अंत्रवृद्धौ तथाध्माने जंघाजानुगदार्दिते ॥ शुक्रामये मेदरोगे वंध्यायोन्यामयेषु च ॥ महारास्नादि
रख्यातो ब्रह्मणा गर्भकारणं ॥ रास्नात्रिगुणमंतेति पाठः ॥ महारास्नादि ॥ रास्नागडूचीमेरंडदेवाह्वमभयाशठी ॥ वत्सा चारग्वधः शुं
ठी शतपुष्पा पुनर्नवा ॥ पंचमूली विषा मुंडी सैरेयक दुरालभाः ॥ यवानीपौष्करं मूलं वाजिगंधा प्रसारिणी ॥ गोक्षुरश्चारुरूषश्चहपु

पाह्वदारुकं॥शतावरी समंगा च गुग्गलुं गिरिजं तथा॥समभागैरिमैः सर्वैः कषायमुपकल्पयेत्॥पिवेत्सर्वगते वाते सामे संध्यस्थिमज्ज
गे॥गंडूषेनेन कर्णाक्षिजिह्वास्तंभहरः परः॥वातरोगेषु सर्वेषु कंपशोफप्रतानके॥मन्यास्तंभे च हृद्रोगे पक्षाघातेऽपतंत्रके॥अर्दिताक्षेप
के कुब्जे हनुग्रहशिरोग्रहे॥गृध्रस्यां जानुशूले च गुल्मशूले कटिग्रहे॥सामे चैव निरामे च सप्तधातुगतेऽनिले॥आढ्यमेनाढ्यते चैव वातरक्ते वि
शेषतः॥एष द्वात्रिंशकः क्वाथः कृष्णात्रेयेण पूजितः॥द्वात्रिंशकादि॥वलामूलशृतं तोयं सैंधवेन समन्वितं॥वक्त्रशोषकरे वा
ते मन्यास्तंभे च शस्यते॥वलादि॥एरंडवीजपूरस्य गोक्षुरो बृहतीद्वयं॥अश्मभेदस्तथा विल्वमेतन्मूलैः कृतः शृतः॥एरंड
तैलहिंग्वाढ्यः यवक्षारससैंधवः॥स्तनस्कंधकटीमेढ्रहृदयोत्थव्यथां जयेत्॥एरंडसप्तकं॥सिंहास्यदंतीकृतमालकानां
पिवेत्कषायं रुवुतैलमिश्रः योगः ध्रसीनष्टगतिः प्रभूतः स शीघ्रगस्याङ्घ्रिकमत्र चित्रं॥माषात्मगुप्ता वातारि वाट्यालकज
टाशृतं॥हिंगुसैन्धवसंयुक्तः पक्षाघातं विनाशयेत्॥माषादि॥पूतीकपथ्याशटिपोष्कराणि विल्वामृतादारुकनागराणि॥
उग्रामृतामागधिकाविडंगानि क्वाथस्त्वयः सामसमीरणघ्नः॥पूतिकादि॥ ॥मन्याहनुश्रवणलोचननासिकास्यभ्रूशंखदंत
गलतालुशिरोविकारान्॥कृच्छ्राणि हंति दशमूलकषायपीतः क्वाथेन वासहफलत्रयसंभवेन॥दशमूलस्य निर्यूहहिंगुपुष्करचू
र्णितं॥शमयेत्परिपीतस्तु फिंफिरणी वातसंज्ञकं॥इति वातरोगाधिकारः॥ ॥अथाम्लपित्तः॥वासामृतापर्पटकं निंवभूनिंवमार्क

व: ॥ त्रिफलाकलिङ्गैः क्वाथः सक्षौद्रश्चाम्लपित्तहा ॥ सिंहास्यामृतभण्टाकीक्वाथं पीत्वा समाक्षिकं ॥ अम्लपित्तं जयेज्जंतुकासश्वासज्वरानपि
॥ त्रिकटुचित्रकं धान्यं शतपुष्पा च मूलकं ॥ चव्यसिंधवदे जीरे लवंगैलासवल्कलं ॥ एतानि समभागानि द्विगुणं वासुवीजकं ॥ अष्टभा
गावशेषं च क्वाथं वा चूर्णकं तथा ॥ वातपित्ताम्लपित्तं च शूलगुल्मं विनाशयेत् ॥ वासुवीजादि ॥ छिन्नोद्भवानिंबपटोलपत्रं क्षौद्रान्वि
तं पीतमनेकरूपं ॥ सुदारुणं हंति तदम्लपित्तं यथा शनिस्सालतरुं प्रवृद्धः ॥ अमृतानागरसुस्तकिरातसमभागसाधितं तोयं दाहरागकम
पिमम्लपित्तं हरसंधुक्षयत्यग्निं ॥ पटोलयवधान्याकपिप्पलीमूलकानि च ॥ एषां क्षौद्रयुतः क्वाथं पित्तश्लेष्महरः परः ॥ चित्रकैरंडमू
लानि यवासश्च यवासकाः ॥ जलेन क्वथितं पीतं कोष्ठदाहज्वरापहं ॥ गुडूची त्रिफलारिष्टपटोलैः क्वथितं पिवेत् ॥ क्षौद्रयुक्तानि हंत्या
शुच्छर्दिपित्ताम्लसंभवं ॥ इत्यम्लपित्ताधिकारः ॥ अथ वातरक्तः ॥ वत्सादनीकृतक्वाथः पीतो गुग्गुलुमिश्रितः ॥ अवश्यं नाशयेदे
तत्समीरशोणितं ॥ मंजिष्ठात्रिफलातिक्तावचादारुनिशामृता ॥ निंबश्चैभिः पचेन्नीरं क्वाथोयं नवकार्षिकं ॥ वातरक्तं तथा कुष्ठं
पामानं रक्तमंडलं ॥ कंडूविसर्पविस्फोटं पानादेवव्यपोहति ॥ पंचरक्तिकमाषेणाकर्षोत्र दशमाषिकं ॥ अंजिरादि ॥ वासागुडूचीचतु
रंडतैलेन पिवेत्कषाय ॥ क्रमेण सर्वांगमप्यशेषं जयेदसृग्वातभवं विकारं ॥ पित्तोत्तरे तु काश्मर्यद्राक्षारग्वधचंदनैः ॥ मधुकं क्षीर
काकोलीयुक्तैः क्वाथं सुशीतलं ॥ शर्करामधुसंयुक्तं वातरक्ते पिवेन्नरः ॥ पटोलत्रिफलाभीरुगुडूचीकटुरोहिणी ॥ क्वाथः पित्ताधिके शस्त

शार्करामधुरायुतः ॥ ~~पटोलादि~~ ॥ त्रिवृद्विदारीक्षुरकामृतानां क्वाथोनिलास्रहा ॥ अमृतानागरं धान्यकर्षत्रितयेन पाचनं सिद्धं ॥ ज्वरवातिव
सरक्तवातं सामं कुष्ठान्यशेषाणि ॥ पटोलकटुकाभीरुत्रिफलासनसाधितः ॥ क्वाथं पीत्वा जयेत्तु सदाहं वातशोणितं ॥ प~~टोलादि~~
॥ ॥ सिंहास्यपंचमूलाब्धिन्नरुहैरंडगोक्षुरः ॥ क्वाथएरंडतैलरामठः सैन्धवचूर्णान्वितः पीतः ॥ शमयति वातरक्तं तथाम
वातं कटीशूलं ॥ मूत्रपुरीषविबंधघ्न घ्नकोरंडकंटुवीरंगंधर्वहस्तवृषभोक्षुरकामृतानां मूलं बलेक्षुरकयोश्च पचेत्तु धीमा
न् ॥ वातास्रगाश्रविनिहंति चिरं प्ररूढं माज्जानुगं स्फुटितमूर्द्ध्वगतं तु धीमान् ॥ गुडूचीवाकुचीचक्रमर्दश्चपिचुमंदकः हरीतकी
हरिद्रा च धात्रीवासाशतावरी ॥ वालंनागबलायष्टीमधुकक्षुरकेपिच ॥ पटोलं च तथाशीरं मंजिष्ठारक्तचंदनं ॥ गुड्व्यादिर
यं क्वाथो वातरक्तांतकारकं ॥ कुष्ठानां नाशनं श्रेष्ठं कंडुमंडलखंडनं ॥ वातिकान् श्लेष्मवातान् सर्वान् विकारान् नाशु नाशयेत् ॥ ~~गुडूच्यादि~~
कोकिलाख्यामृतानां क्वाथं पिबेत्कोष्णयथाबलं ॥ पथ्यभोजी त्रिसप्ताहान्मुच्यते वातशोणितात् ॥ अमृतैरंडवासानां क्वाथमेरंडतैलयुक्
॥ पीतः सर्वांगसंचारि वातरक्तं जयेद्ध्रुवं ॥ ~~अमृतादि~~ ॥ ~~इति वातरक्ताधिकारः~~ ॥ ~~अथामवातः~~ ॥ पिप्पलिपिप्पलीमूलं चव्यचित्रक
नागरं ॥ क्वथितं वारि तत्पेयमामवातविनाशनं ॥ देवदारुवचामुस्तं नागरातिविषाभया ॥ ~~अन्यच्च~~ ॥ शठीशुंठ्यभयोग्रादेवाअ
तिविषामृता ॥ कषायमामवातस्य पाचनं रूक्षभोजिनं ॥ कटिशूले पिबेत्तैलमेरंडफलसंभवं ॥ महौषधं गुडूच्याश्च क्वाथं मागधि

॥सात्मद॥
॥१२॥

कायुतं॥ ॥इत्यामवाताधिकारः॥ ॥अथ शूलः॥ नागरैरंडयोः क्वाथः शर्कराक्षौद्रसंयुतः॥ हिंगुसौवर्चलोपेतो वातशूलनिवारणः॥ त्रि
फलारग्वधः क्वाथः शर्कराक्षौद्रसंयुतः॥ रक्तपित्तहरो दाहपित्तशूलनिवारणः॥ बृहत्यौ गोक्षुरैरंडकुशकाशेक्षुवालिकाः॥ पीत्वापि
त्तभवं शूलं सद्यो हन्यात्सुदारुणं॥ एरंडमूलं द्विपलं जले शृतशिशिते पिबेत्॥ तत्क्वाथे यावशूकाख्यः पार्श्वहृत्कफशूलहा॥ व्याघ्री सिं
हीफलमश्मशूलं शिलोद्भिदं गोक्षुरकं च तुल्यं॥ एरंडमूलं द्विगुणं च पक्त्वा पिबेद्यवक्षारयुतं कषायं॥ हृत्कुक्षिपार्श्वत्रिकगं निहन्यात्कु
लं नराणां कफजं प्रवृद्धं॥ पटोलारिष्टपत्राणि त्रिफलासंयुतानि च॥ क्वाथो मधुयुतो पेयो शूलपित्तसमीरजे॥ पटोलत्रिफलाकुष्ठैः शृतं त
क्षौद्रयुतं पिबेत्॥ पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये॥ दशमूलकृतः क्वाथः सयवक्षारसैंधवैः॥ हृद्रोगगुल्मशूलानि कासंश्वा
सं च नाशयेत्॥ इति शूलाधिकारः॥ ॥अथ गुल्मः॥ पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलांबुना॥ पंचमूलीशृतं तोयं पुराणं वारुणी
रसं॥ कफगुल्मी पिबेत्काले जीर्णं माध्वीकमेव च॥ द्राक्षाभयायवक्षारशिलाजतुसमं समं॥ पंचमूलीकषायेन पित्तानिलं च गुल्मजित्
॥ इति गुल्माधिकारः॥ ॥अथ हृद्रोगः॥ दशमूलकषायं तु लवणक्षारयोजितः॥ कासश्वासं च हृद्रोगगुल्मशूलं च नाशयेत्॥ द्रा
क्षापरूषकं शुंठीकृतः क्वाथः सितायुतः॥ वातपित्ताधिका हन्याद्धृद्रोगं दाहशूलकौ॥ वीजपूरजटाकदीपक्कं मधुयष्टिका॥ अभया
नागरः क्वाथसाराम्ललवणैर्युतः॥ सविश्वचूर्णं हृद्रोगं हन्याद्वातसपित्तजं॥ इति हृद्रोगाधिकारः॥ ॥अथ मूत्रकृच्छ्रं॥ हरीतकी

॥राम॥
॥१२॥

शालेभाम्रातमालकगोक्षुरैः ॥ पाषाणभेदसहितैःक्वाथोमाक्षिकसंयुतः ॥ विवंधेमूत्रकृच्छ्रेचसदाहेसरुजेहितः ॥ हरीतक्यादि ॥ ॥
त्रिकंटकारग्वधदर्भकाशयवासधात्रीगिरिभेदपथ्या ॥ निघ्नंतिपीतामधुनाश्मरीवसमीपमृत्योरपिमूत्रकृच्छ्रं ॥ त्रिकंटकादि ॥
समूलगोक्षुरक्वाथःसितामाक्षिकसंयुतः ॥ नाशयेन्मूत्रकृच्छ्राणितथैवोष्णसमीरणां ॥ कुशकाशशरादर्भइक्षुश्चेतितृणोद्भ
वं ॥ पित्तकृच्छ्रहरंपंचमूलंवस्तिविशोधनं ॥ सर्वोरुवीजंमधुकंचदार्वीछिपंचमूलीकथितःकषायः ॥ पेयस्तथातंदुलतोययुक्तः
सवातपित्तोद्भवमूत्रकृच्छ्रे ॥ आरग्वधफलनगरंडुरालभाधान्यकंशतावर्यः ॥ पाषाणभेदपथ्येक्वाथोयंमूत्रकृच्छ्रेस्यात् ॥ हृद
त्तीधावनीयावायष्टीमधुकंलिंगकः ॥ पाचनीयोग्रहत्यादिकृच्छ्रेदोषत्रयापहः ॥ क्वाथोगोक्षुरवीजस्ययवक्षारयुतःसदा ॥ मूत्रकृ
च्छ्रेशकृज्जन्यपीतशीघ्रंनियच्छति ॥ वालकोशीरयष्टीकंकृष्टधानीयकंमधु ॥ क्षीरेणक्वाथयेद्वीजंमूत्रकृच्छ्ररुजापहं ॥ धान्यकं
काकजंघावक्वाथयित्वाजलंपिवेत् ॥ मूत्रावरोधेकष्टेषिमूत्रभेदनमुत्तमः ॥ त्रिकंटकैरंडशतावरीणासिद्धंपयोवातृणपंचमूले ॥ गुडप्र
गाढंसघृतंपयोवारोगेषुकृच्छ्रादिषुशस्तमेतत् ॥ एरंडमूलपाषाणभेदोगोक्षुरमृत्तिका ॥ एलाकासकपिप्पल्योमधुकेनसमन्विताः ॥ ए
षांक्वाथंपिवेज्जंतुशिलाजतुसमन्वितं ॥ मूत्रासादाश्मरीकृच्छ्रंत्र्यहाद्धंतिनसंशयः ॥ फलत्रिकंसमगुडंक्वाथक्षीरेणसंयुतं ॥ पानंमूत्रनि
रोधेषुविड्विघातोद्भवेषुच ॥ पाटलीटिंडुकोनिवोनिशागोक्षुरकेनथा ॥ एलात्वक्पत्रकक्वाथोगुडत्रिफलयायुतः ॥ वस्तिकुंडलकंह

तिपथ्यातुशेषतो भवेत् ॥ इति मूत्रकृच्छ्राधिकारः ॥ ॥अथाश्मरि॥ वेल्लंतरो वृक्षवंदाकाशः सहचरद्वयं ॥ कुशद्वयं नलो गुंद्रा ब्वकतु-
ष्याग्निमंथकः ॥ मूर्वा पाषाणभेदश्च श्योनाको गोक्षुरस्तथा ॥ अपामार्गश्च कमलं ब्राह्मी वैतिगरोत्तवरः ॥ वीरतर्वादिरित्युक्तः शर्करा-
श्मरिकृच्छ्रहा ॥ मूत्राघातवायुरोगान्नाशयेन्निखिलानपि ॥ वीरतर्वादि ॥ श्वदंष्ट्याग्निमंथपाषाणशिग्रुवीरणगोक्षुरैः ॥ अभयार-
ग्वधफलैः क्वाथं कृत्वा विचक्षणः ॥ रामठक्षारलवणचूर्णं दत्वा पिबेन्नरः ॥ अश्मरीमूत्रकृच्छ्रघ्नं दीपनं पाचनं परं ॥ हन्यात्को-
ष्ठाश्रितं वातं कट्यूरुगुदमेढ्रजं ॥ श्वदंष्ट्रादि ॥ ॥ वरुणस्य त्वचं श्रेष्ठां शुंठीगोक्षुरसंयुतं ॥ यवक्षारं गुडं दत्वा क्वाथयित्वा पि-
वेद्धितं ॥ अश्मरीं वातजां हंति चिरकालानुबंधिनीं ॥ कुशकाशसरेगुंडेति ॥ वरुणात्वक्कषायस्तु पीतो गुडसमन्वितः ॥ अश्मरीं
पातयत्याशु वस्तिशूलं च नाशयेत् ॥ क्वाथो वरुणमूलस्य तस्य कल्केन संयुतः ॥ शिग्रुमूलस्य च क्वाथः कदुष्णश्चाश्मरीं हरेत् ॥ इत्य-
श्मर्यधिकारः ॥ अथ प्रमेह ॥ वरादार्व्यब्ददारूणां क्वाथः सक्षौद्रमेहहा ॥ वासकत्रिफलादार्वीमुस्ताबीजकजस्तथा ॥ फलत्रिका-
ब्ददार्वीणां विशालाया भृतां पिबेत् ॥ निशाकल्कयुतं सर्वप्रमेहानां निवृत्तये ॥ मुस्ताहरीतकीलोध्रकट्फलेन कृतं शृतं ॥ पीतं मधु-
युतं हंति प्रमेहकफहेतुकं ॥ पटोलनिंबामलकामृतानां पिबेत्कषायं मधुना समेतं ॥ उशीरलोध्रार्जुनचंदनानां तथा पिबेत् पित्तनि-
मित्तमेही ॥ लोध्राब्दकट्फलशिवा क्वाथः सजलमेहहृत् ॥ पारिजातजटाया वा कषायो गुडसंयुतः ॥ धवार्जुनश्चंदनश्च शालह्व-

समस्तथैवच ॥ एतत्क्वाथेनिहंत्याशुजलमेहंसुदारुणं ॥ धन्वयासोर्ज्जुनौपाठाविडंगानांकषायकः ॥ इक्षुमेहंनिहंत्याशुसगुडं
वाजयाशृतं ॥ उमेहारिद्रेतगरंविडंगंवजलेशृतं ॥ सक्षौद्रंवपिबेत्क्वाथंसगुडंवाजयाशृतं ॥ अर्ज्जुनोदीप्यकंकुष्टंविशालानांशृ
तंपिबेत् ॥ सक्षौद्रंवासुरामेहंनिंबक्वाथःगुडान्वितः ॥ दार्वीविडंगखदिरधवःक्वाथसमाक्षिकः ॥ पिष्टमेहेथवापथ्याकृतःक्वा
थोगुडान्वितः ॥ चंदनागुरुकुष्टाख्यसुरदारुकषायकः ॥ मधुनासंयुतंपीतंशुक्रमेहांतकोभवेत् ॥ दूर्वामूर्वासमंगाचमूलेचकु
शकाशयोः ॥ दंतीशाल्मलिनिर्यूहःशुक्रमेहंहरेत्सहात् ॥ दार्व्यग्निमंथत्रिफलापाठाक्वाथसमाक्षिकः ॥ शिकतामेहहाचाथ
सगुडंचित्रकेशृतं ॥ वचमूर्वीकंटकारीक्वाथःक्षौद्रसमन्वितः ॥ शीतमेहहरंत्याशुकफवातविनाशनः ॥ वचाभयाछिन्नरु
हावालकानांशृतंपिबेत् ॥ क्षौद्रयुक्तंशनैर्मेहेसगुडंखदिरंशृतं ॥ नखंशिवासप्तपर्णीचित्रकानांशृतंहितं ॥ लालामेहेतुसक्षौ
द्रीपनेपावनेपरं ॥ उशीरंचंदनंलोध्रंमर्ज्जवक्वाथयेत्समं ॥ मधुयुक्तंप्रदातव्यक्षारमेहप्रशांतये ॥ धात्रीपटोलनिंबानांकषायं
चामृतासमं ॥ सक्षौद्रंपाययेज्ज्ञात्वासर्वमेहापनुत्तये ॥ लोध्रार्ज्जुनमुशीरंचचंदनानांशृतंपिबेत् ॥ सक्षौद्रकालमेहार्त्तोथोवाहेम
वतीघनं ॥ उशीरामलकंक्वाथसक्षौद्रकालमेहहृत् ॥ लोध्रवालकसंयुक्तंचंदनंधातकीतथा ॥ कषायक्षौद्रसंयुक्तहारिद्रेत्वनु
पाययेत् ॥ पटोलनिंबामलकंगुडूचीनांकषायकः ॥ सक्षौद्रंपाययेद्वेषोमेहेहारिद्रसंज्ञके ॥ अश्वत्थाचतुरंगुल्यान्यग्रोधादेःफलत्रि

कान्॥ सर्जिगिरन्तसारोत्थ क्वाथः पंचसमाक्षिकाः॥ नीलहरिद्रफेणारग्वक्षारमंजिष्ठका ह्वयां॥ मेहान्हन्युक्रमादेते सक्षौद्रो रक्तमेह
नुत्॥ मुस्ताभयारात्रिजहृक्षक्वाथो मधुसमन्वितः॥ अथवाधातकीत्वोध्रकृतकालीयकशृतं॥ सक्षौद्रं हरते नृणां मंजिष्ठामेहमुत्क
टं॥ अग्निमंथकषायं तु वसामेही पिबेन्नरः॥ टंकारिकापाटलिका क्वाथो वातरोद्भृतं॥ क्वाथः काश्मर्यखर्जूरतिंदुकास्थ्याम्रतां
कृतः॥ छिन्नावह्निकषायेण पाठाकुटजरामठे॥ त्रिकाकुहवसंपूर्णसर्पिमेहो पिबेन्नरः॥ पाठाशिरीषदुःस्पर्शास्त्रीतिंदुककिं
शुकं॥ कपित्थस्यभिषक्क्वाथं हस्तिमेहे प्रयोजयेत्॥ वटार्जुनकदंबानां क्वाथे शिंशपिकान्नरः॥ भावयेत्पारिभद्रबदरीशिंशपा
दिभिः॥ ॥इति प्रमेहाधिकारः॥ ॥अथोदरः॥ वचाचित्रकविश्वाह्वसाधितोदेवदारुणा॥ क्वाथश्चिह्नचूर्णयुतो गोमूत्रे चोद
रं जयेत्॥ पुनर्नवामृतादारुपथ्यानागरसाधितः॥ गोमूत्रगुग्गुलुयुतः क्वाथः शोथोदरापहः॥ पथ्यारोहितक क्वाथ यवक्षार
कणायुतं॥ पिबेत्स्रातयकृत्प्लीहगुल्मोदरनिवृत्तये॥ एरंडतैलं दशमूलमिश्रं गोमूत्रयुक्तं त्रिफलारसो वा॥ निहंति वातोदरशोथ
शूलान् क्वाथः समूत्रो दशमूलमिश्रः॥ पुनर्नवादारुनिशासतिक्तापटोलपथ्यापिचुमंददारु॥ सनागराच्छिन्नरुहेति सर्वैः कृत
कषायो विधिनाविधिज्ञैः॥ गोमूत्रसगुग्गुलनावयुक्तः पीतः प्रभाते नियतं नराणां सर्वांगशोथोदरपार्श्वशूलश्वासान्वितं पांडुगदं नि
हंति॥ पुनर्नवादि॥ इत्युदराधिकारः॥ अथ शोथः॥ पथ्यानिशाभार्ग्यमृतानि दार्वीपुनर्नवादारुमहौषधश्च॥ क्वाथं प्रपीयोदर

पाणिपादशरवाश्रितं हन्त्यचिरेण शोथं ॥ पथ्यादि ॥ शुंठी पुनर्नवैरंडभवमूलं जलं वातिकश्वयथौ सस्तं पानाहारपरिग्रहे:॥
क्षीराशिनपित्तकृतं तु शोथं त्रिवृत्कटुकी त्रिफलाकषायं ॥ पिवेत्स वां मूत्रविमिश्रितं वा फलत्रिचूर्णं अथवाक्षमात्रं ॥ पटोलत्रिफ
लारिष्टदार्वीक्वाथः सगुग्गुलुः ॥ हंति पित्तकृतं शोथं तृष्णाज्वरसमन्वितं ॥ फलत्रिकोद्भवः क्वाथो गोमूत्रेणैव साधितं ॥ वात
श्लेष्मभवं शोथहन्याद्दषरासंभवं ॥ भूनिंबविश्वकल्कैः पेयः पुनर्नवाक्वाथः ॥ अपहरति नियतमाशोथं सर्वांगगं नराणां ॥ शि
लाह्वयं वा त्रिफलारसेन हन्ति त्रिदोषश्वयथुं प्रसह्य: ॥ इति शोथाधिकारः ॥ ॥ अथ वृद्धिः ॥ त्रिकटुत्रिफलाक्वाथं सक्षारं लव
णं पिवेत् ॥ विरेचनमिदं श्रेष्ठं कफवृद्धिविनाशनं ॥ रास्नायष्ट्यामृतैरंडवलारग्वधगोक्षुरैः ॥ पटोलेन वृषेणापि विधिना विहि
तं शृतं ॥ रुबुतैलेन संयुक्तमंत्रवृद्धिं व्यपोहति ॥ इति वृद्ध्याधिकार ॥ ॥ अथ गंडमाला ॥ कांचनारत्वचः क्वाथः शुंठीचूर्णेन ना
शयेत् ॥ गंडमालां तथा क्वाथः क्षौद्रेण वरुणत्वच ॥ माक्षिकाढ्यः सकृत्पीतः क्वाथो वरुणमूलजः ॥ गंडमालां हरत्याशु चिरका
लानुबंधिनी ॥ इति गंडमालाधिकारः ॥ अथ श्लीपदः ॥ शाखोटवल्कलक्वाथं गोमूत्रेण युतं पिवेत् ॥ श्लीपदानां विनाशा
य मेदोदोषःनिवृत्तये ॥ देवदारुगुडूचीवानागरं भद्रदारु च ॥ श्वेतसर्षपतैलेन श्लीपदानां निवृत्तये ॥ इति श्लीपदाधिकारः ॥
अथ विद्रधिः ॥ पुनर्नवावरुणयोः क्वाथोंतर्विद्रधिं जयेत् ॥ तथा शिग्रुभवः क्वाथमपक्वं मध्यविद्रधौ ॥ ऊषकादिरजोयुक्तं पिवे

॥सात्म्यद॥
॥१६॥

समधुहेतवे ॥ सपथा ॥ वरुणोवकपुष्पश्चविल्वाणमार्गचित्रकाः ॥ अग्निमंथद्वयंशिग्रुद्वयंबृहतीद्वयं ॥ सैरेयकत्रयंमूर्वामेषशृंगीकि
रातकः ॥ अजशृंगीचविंबीचकरंजश्चशतावरी ॥ वरुणादिगणः क्वाथःकफमेदोहरस्मृतः ॥ हंतिगुल्मंशिरःशूलंतथाभ्यंतरविद्र
धीन् ॥ वरुणादि ॥ ॥ क्वाथःशिग्रुवराम्भस्थोहिंगुसैन्धवचूर्णितैः ॥ संयुक्तपाययेत्कांस्येविद्रधीरोगपीडितं ॥ शोभांजनकनिर्यू
होहिंगुसैन्धवसंयुतः ॥ अचिराद्विद्रधिंहंतिप्रातःप्रातर्निषेवितः ॥ वरुणस्यत्वचःक्वाथोहिंगुसैन्धवसंयुतः ॥ सशिलाजतुकाशी
समसाध्यंविद्रधिंजयेत् ॥ पुनर्नवादारुविल्वदशमूलभयासमा ॥ गुग्गुलेरंडतैलंवापिवेन्मारुतविद्रधौ ॥ पिवेद्वात्रिफलाक्वाथं
त्रिवृत्कल्केनसंयुतं ॥ त्रिफलाशिग्रुवरुणदशमूलांभसापिवेत् ॥ कृष्णजाजीविशालावध्यामार्गवफलंतथा ॥ पीत्वाह्येतेनिहं
न्याश्चविद्रधीकोष्ठसंभवः ॥ श्वेतवर्षाभुमूलंचमूलंवरुणकस्यच ॥ जलेनक्वथितंपीतमंतर्विद्रधिजीत्वरं ॥ सोभांजनकनिर्यू
होहिंगुसैन्धवसाधितं ॥ हंत्यंतर्विद्रधीशीघ्रप्रातःप्रातर्निषेवितः ॥ इतिविद्रध्यधिकारः ॥ ॥ अथव्रणः ॥ वातिकेदशमूलानांक्षी
रीणांपैत्तिकेव्रणे ॥ आरग्वधादेकफजेकषायःशोधनेहितः ॥ अश्वत्थोवेतसप्लक्षवटोडुंवरजंमृतं ॥ व्रणशोथोपदंशानांना
शनंक्षालनस्मृतं ॥ एकंवाशारिवामूलंसर्वव्रणविशोधनं ॥ इतिव्रणाधिकारः ॥ ॥ अथभगंदरः ॥ खदिरत्रिफलाक्वाथोमहि
षीघृतसंयुतः ॥ विडंगचूर्णयुक्तश्चभगंदरविनाशनः ॥ इतिभगंदराधिकारः ॥ अथोपदंशः ॥ पटोलनिंवत्रिफलाकिरातख

॥राम॥
॥१६॥

दिरैः समैः ॥ क्वाथः पीतो जयेत्सर्वानुपदंशान्सगुग्गुलुः ॥ उपदंशेषु सर्वेषु व्रणाः प्रक्षालने हिता ॥ त्रिफलाया कषायेन भृंगराजरसे
न च ॥ इत्युपदंशाधिकारः ॥ अथ शूकदोषः ॥ गुग्गुलुं पाययेच्चापि त्रिफलाक्वाथसंयुतः ॥ शूकदोषेषु सर्वेषु विषघ्नीं च क्रियां चरेत्
॥ इति शूकदोषाधिकारः ॥ अथ कुष्टः ॥ मंजिष्ठा वाकुची चक्रमर्दश्च पिचुमंदकं ॥ हरीतकी हरिद्रा च धात्री वासा शतावरी ॥ बला
नागबला यष्टीमधुकं क्षुरकोपि च ॥ पटोलं परतोशीरं गुडूची रक्तचंदने ॥ मंजिष्ठादिरयं क्वाथः कुष्टानां नाशनः परः ॥ वातरक्तस्य
संहंती दद्रुमंडलखंडनः ॥ मध्यममंजिष्ठादि ॥ ॥ मंजिष्ठाकुटजामृता घनवचा शुंठी हरिद्राद्वयं ॥ क्षुद्रारिष्टपटोलकुष्टकटु
का भार्गी विडंगाग्निकं ॥ मूर्वादारुकलिंगभृंगमगधात्रायंति पाठावरी गायत्री त्रिफलाकिरातकमहानिंबास्तनारग्वधं ॥ श्यामाव
ल्गुजं चंदनं वरुणाकं दंतीकशाखोटकं वासापर्पटसारिवाअग्निविषानंताविशालाजलं ॥ मंजिष्ठादिरयं कषायविधिना नित्यं प्रमात्
यः पिबेत् त्वग्दोषा ह्यचिरेण यांति विलयं कुष्टानि चाष्टादश ॥ नाशं गच्छति वातरक्तमखिलं नश्यंति रक्तामया वीसर्पस्तु विशून्यतान
यनजारोगाप्रशाम्यंति च ॥ बृहन्मंजिष्ठादि ॥ क्वाथो वल्गुजचूर्णाख्यो धात्रखदिरसारयो ॥ जयेत्तु शीलतो नित्यं श्वित्रं पथ्याशिनां नृणां
॥ अथ वल्गुजादि ॥ निंबैरंडविडंगनागरवचामूर्वाहरिद्राद्वयं त्रायंती त्रिफलापटोलदहनं द्राक्षामृताभार्गिभिः ॥ काकोदुंबरिका
करंजखदिरैः शाकोटशप्तच्छदैः व्याघ्रीसिंहिशिरीषवेतसकरणाभूनिंबशक्राह्वयैः ॥ प्रपुन्नाटकवाकुचीकृशजटामातंगकर्णोत्पलैः

पाठापर्पटकेन्द्रवारुशिविषादंतीनृहृच्चंदनैः॥मंजिष्ठामभयावासकडुकाराजद्रुमग्रंथिकैस्तुल्यांशैःसुरभीजलेनपिबतांसिद्धंक
षायंनराः॥दद्रुंदुंवरपुंडरीककटिभक्ष्यामयापापजानश्यंतिद्रुतमेवदारुणतराप्रोड्डीयमानानला॥अन्येचापिमहागदास्तु
जगताःकिंवावह्नेनचज्वालादग्धस्तृतनकांचनसमात्यगानिरोहंतिच॥महानिंबादि॥ ॥मंजिष्ठारिष्टवासात्रिफलदह
नकंद्वेहरिद्रेगुडूचीभूनिंबरक्तसारं – – विरकडुकावाकुचीव्याधिघातं॥पूर्वादंतीविशालाकृमिरिपुजटिलात्रायमाणासपा
ठाश्यामापत्रपटोलौसमरिचमगधैःसाधितोयंकषायःपीतोहन्यात्समस्तान्सकलहतनुगतानकुजातानिचकारात्कंडूविस्फोटका
दीन्त्वलसकिटिभकाश्वित्रपामादिदोषान्॥महामंजिष्ठादिश्यामामुस्तारखदिरसारशिरीषशिग्रुशैलेयसर्जसुरसासुरसिं
दुवारैः॥श्वेताकरंजकरिकर्णीवचाविशालाभल्लातवेतसवराहृषसप्तपर्णैः॥काकादनीफलककेतुकर्कोटकारीकंडूकरी
करटजकेशरकर्णिकारैः॥कर्कोटकार्ककरवीरकदंववनिवजंवूनिशानिशकेशरसारिवैश्च॥गंधोपलानलशिलाजतुकंदराजीरा
जीवकेशरशटीप्रपुन्नाटचूर्णैः॥अष्टावशेषितजलंसुरभीजलेनक्वाथंविधायपिवतहृयतेन्द्रियस्य॥सर्वांगसादपरिपाटनभेदतोद
दाहप्रणास्फुटनसुप्तिविवर्णभावे॥वैपादिकांडुदविदीर्णविशीर्णकर्णघ्राणांघ्रिपाणिघनवर्वरघोरनादी॥गंभीरपाकक्रथित
कृमिजातिपूतिपूयास्रपिस्रसतुगंधि – – – दिग्धं॥दुर्वारदारुणमसुंडवरकुष्ठशोथःस्वल्पैर्दिनैःप्रशमनंसमुपैतिचोग्रं॥कोन्याहयन्तु

हिनरोचिरिवाननश्रीः प्रोत्फुल्लपंकजरुचिः स्मरवन्नरश्च जायेत सुंदरतनुप्रवरैरदग्धः प्रव्यथितस्तरुणीलोचनवासभूमिः ॥ महाउ
दयमार्त्रराजः ॥ शुंठीनिंबकिराततिक्तककणापाठाहरिद्राद्वयं त्रायंतीत्रिफलामृतासकटुकीवासाववावाकुची ॥ मंजिष्ठातिविषा
दुरालभमहानिंबाग्निषड्ग्रंथिका व्याघ्री प्रागजविर्भिंठासकुटजाभार्गीसमस्तायवा ॥ मूर्वावैवपटोलपत्रसहितं रक्तं तथा चन्दनं श्यामापर्प
टसारिवा कृमिहरा गायत्रिकासंयुता गोमूत्रेण महाकषायमरुणोद्भूतौ पिवेद्यपुमान्नस्पीष्टादशधातथैवमविरात्कुष्ठान्यथोवाखिराा ॥ म
हाखंद्यादि ॥ ॥ त्रिफलानिंवपटोलमंजिष्ठारोहिणीवचा ॥ रजनी एष कषायो भ्यष्टोनिहंतिपित्तरंकफकुष्टं ॥ नवककषाय ॥ इति कुष्टा
धिकारः ॥ ॥ अथ विसर्प ॥ भूनिंबसा— कटुकापटोलफलत्रयंचंदननिंबसिद्धः ॥ विसर्पदाहज्वरशोथकंडूविस्फोटतृष्णावमिहृत्कषायवि
स्फोटनाशयत्यात्रसरणाग्निमित्रज्ञान ॥ द्राक्षाकाश्मर्यखर्जूरपटोलारिष्टवासकैः ॥ कटुकालाजदुस्पर्शैः पैत्तिके ससितं घृतं ॥ भूनिंबसव
वावासात्रिफलेन्द्रसवत्सकैः ॥ पिचुमंदपटोलाभ्यां कफजे मधुयुक् शृतं ॥ किराततिक्तकारिष्टंयष्ट्याह्वांवुदवासकैः ॥ पटोलपर्पटोशीर
त्रिफलाकोटजान्वितैः ॥ क्वथितेत्वादशांगंतु सर्वविस्फोटनाशनः ॥ छिन्नपटोलभूनिंववासकारिष्टपर्पटैः ॥ खदिराब्दयुतैः क्वाथो हं
तिविस्फोटकज्वरं ॥ इति विस्फोटाधिकारः ॥ अथ मसूरिः ॥ द्वेपंचमूल्यौ रास्ना च धात्र्युशीरं दुरालभा ॥ सामृतं धान्यकं मुस्तं जयेद्वात
मसूरिकां ॥ निंबपर्पटकापाठापटोलं चंदनद्वयं ॥ उशीरं कटुका धात्री तथा वासा दुरालभा ॥ एषां पानं शृतं शीतं उत्तमं शर्करान्वितं ॥ मसू

यं पित्तजायां तु प्रयोक्तव्यं विजानता ॥ पटोलकुंडलीमुस्तवृषधान्ययवासकैः ॥ भूनिंबनिंबकटुकापर्पटैश्च शृतं जलं ॥ मसूरिशमयेदापा
पक्वांश्चैव विशोधयेत् ॥ नातः परतरं किंचिद्विस्फोटज्वरशांतये ॥ पटोलादि ॥ खदिरत्रिफलावासागडूचीकृतवेतसं ॥ शिरोषोनिंबप
त्रं च चंदनं सप्तपर्णकं ॥ पटोलेद्विनिशांमुस्तं धन्वयासश्च पर्पटं ॥ कषायं पाययेदेव्याकुलत्थादिविनाशनं ॥ मसूरिकाघ्नं वै सर्पकंडू
रोगविनाशनं ॥ कृष्णत्वादिरायं ॥ पटोलमूलारुरातंदुलीयं पिबेद्धरिद्रामलककल्कसंयुतं ॥ मसूरिविस्फोटविसर्पशांतये तदेव रो
मां निवमिज्वरापहं ॥ पटोलादि ॥ वासामृतकभूनिंबत्रिफलेन्द्रियवासकं ॥ पटोलारिष्टकं चापि क्वाथयित्वा समाक्षिकं ॥ पिबेन्नत्र
शाम्यंति मसूर्यकफसंभवाः ॥ निंबपर्पटकाः पाठापटोलकटुरोहिणी ॥ चंदनेद्वे उशीरं च धात्रीवासादुरालभा ॥ एषनिंबादिकक्वा
थः पीतः शर्करयान्वितः ॥ मसूरि सर्वजा हंति ज्वरः विसर्पसंयुतः ॥ उत्थीतां प्रविशेयाव तां पुनर्वीह्यतो नयेत् ॥ कांचनारत्वचः
क्वाथस्ताप्यचूर्णावचूर्णिा धात्रीफलं समधुकं क्वाथीतं मधुसंयुतं ॥ मुखे कंठे प्ररोजाते गंडूषार्थं प्रशस्यते ॥ अक्षोशोकं प्रशंसं
ति गवेधु — — कांवुना ॥ खदिरत्रिफलानिंबपटोलामृतवासकाः ॥ अष्टकेयं जयेत्कुष्टं कंडूविस्फोटकानि च ॥ विसर्पमाना
किटिभं शीतपित्तमसूरिका ॥ खदिराष्टकं ॥ मंजिष्ठाचंदनं भार्गीपटोलः पर्पटोवृषा ॥ निंबश्च सप्तपर्णश्च एषां क्वाथं वयः पिबेत् ॥
यत्नतस्तस्य शाम्यंति कुष्ठकोलत्थकोद्रवाः ॥ उपसर्गेषु सर्वेषु रुक्षसर्वविधिर्हितः ॥ मंजिष्ठादि ॥ इति मसूरिकाधिकारः ॥ अथमुखरो

गः ॥ कण्ठरोगेष्वसृङ्मोक्षस्तीवैनस्यादिकर्मच ॥ क्वाथंपिबेच्चदार्वीत्वङ्निंबतार्क्ष्यकलिंगकं ॥ हरीतकीकषायोवाहितमाक्षिकसंयुतः ॥ जातीपत्रमृताद्राक्षासदार्वीफलत्रिकैः ॥ क्वाथः क्षौद्रयुतः पीतोगंडूषोमुखपाकनुत् ॥ पटोलनिंबजंबाम्रमालतीनिवपल्लवैः ॥ पंचवल्कलजक्वाथः श्रेष्ठस्यान्मुखधावने ॥ सप्तछदोशीरपटोलमुस्तहरीतकीतिक्तकरोहिणीभिः ॥ यष्ट्याह्वराजद्रुमचंदनैश्च क्वाथंपिबेत्पाकहरंमुखस्य ॥ मालटीपर्पटारिष्टधराकर्णीवृषाशनैः ॥ करंजावीजसमङ्गाह्वखदिरैः साधितंजलं ॥ कवलेपानतस्याभ्यो सर्वान्हंतिमुखामयान् ॥ विसर्पकुष्ठशोथाश्चलेपः प्रोक्तोव्रणास्तथा ॥ पटोलशुंठीत्रिफलाविशालात्रायंतितिक्तोहिनिशामृतानां ॥ पीतः कषायोमधुनानिहंतिमुखामयान् ॥ विसर्पकुष्ठशोथाश्चलेपः प्रोक्तोव्रणास्तथा ॥ पटोलशुंठीत्रिफलाविशालात्रायंतितिक्तोहिनिशामृतानां ॥ पीतः कषायोमधुनानिहंतिमुखेस्थितान्श्चास्यगदानिशेषात् ॥ दार्वीगुडूचीसुमनःप्रवालाद्राक्षायवाग्रत्रिफलाकषायः ॥ क्षौद्रेणयुक्तः कवलोग्रहोयंमुखस्यपाकंशमयत्युर्णं ॥ क्वथितात्रिफलाक्वाथामृड्रीकाजातिपल्लवाः ॥ निशिवाभक्षणीयावात्रिफलामुखपाकहा ॥ वचामतिविषापाठारास्नाकटुकरोहिणी ॥ निःक्वाथ्यपिचुमंदंचकवलंतत्रयोजयेत् ॥ द्राक्षापरूषकंक्वाथहितश्चकवलग्रहे ॥ क्वाथंपिबेच्चदार्वीत्वक्निंबतार्क्ष्यकलिंगजं ॥ हरीतकीकषायोवाहितोमाक्षिकसंयुतः ॥ कटुकातिविषादारुपाठामुस्तकलिंगकं ॥ गोमूत्रक्वथितापीताकंठरोगविनाशनं ॥ जातीपत्रमृताद्राक्षायासदार्वीफलत्रिकैः ॥ क्वाथ

क्षौद्रयुतः पीतोगंडूषोमुखपाकनुत् ॥ पटोलनिंबजंब्वाम्रमालतीनवपल्लवाः ॥ पंचपल्लवकः श्रेष्ठः कषायोमुखधावने ॥ पंचपल्लवकषायोवा
त्रिफलाक्वाथएववा ॥ मुखपाकेषुसक्षौद्रप्रयोज्योमुखधावने ॥ इतिमुखरोगाधिकारः ॥ ॥अथनासारोगः ॥ त्रिकटुपुष्कररजनीरा
स्नामृतदारुगंधानां ॥ क्वाथशिरोर्तिजालंनानापीतंनिवारयति ॥ कट्फलंपौष्करंशृंगीव्योषंयासस्वकारवी ॥ एषांचूर्णकषायंवाद
द्यादार्द्रकजैरसैः ॥ पीनसेस्वरभेदेचनाशास्रावेहलीमके ॥ सन्निपातेकफेवातेश्वासेकाशेचशस्यते ॥ नागरादिश्चहितः ॥
इतिनासारोगाधिकारः ॥ ॥अथनेत्ररोगः ॥ बिल्वादिपंचमूलेनबृहद्दैरंडशिग्रुभिः ॥ क्वाथआश्च्योतनेकोष्णोवाताभिष्यंदना
शनः ॥ त्रिफलाश्च्योतनंनेत्रेसर्वाभिष्यंदनाशनः ॥ वासाविश्वामृतादार्वीरक्तचंदनचित्रकैः ॥ भूनिंबनिंबकटुकापटोलत्रिफलां
बुदैः ॥ यवकालिंगकूटजैः क्वाथःसर्वाक्षिशोथहा ॥ वेश्वर्यपीनसंश्वासंनाशयेदुरसःक्षयात् ॥ वासादि ॥ अमृतात्रिफलाक्वाथः
पिप्पलीचूर्णसंयुतः ॥ सक्षौद्रः शीतलोवितंसर्वनेत्रव्यथांजयेत् ॥ अमृतादि ॥ विभीतकशिवाधात्रीपटोलारिष्टवासकैः ॥ क्वाथो
गुग्गुलुनापेयः शोथशूलाक्षिरोगनुत् ॥ पित्तंवसव्रणांशुक्रंरोगादिवप्रणाशयेत् ॥ एतैनैवघृतंपक्वंरोगारतांस्तांजयेद्ध्रुवं । ॥षडंगः
॥आरग्वधाभयानिंबधात्रीमुस्ताक्षकलकैः ॥ अष्टभागावशिष्टंचक्वाथःपेयोहितार्थिना ॥ रक्तस्रावंकफंहंतिवक्षुष्यवासकादि
कं ॥ वासादि ॥ वासानिंबवरापटोलकूटजत्वङ्मुस्तापित्तामृताभूनिंवेन्द्रयवाग्निचंदननिशायुग्माब्दशुंठीयवैः ॥ क्वाथःकालि

तश्चपित्तकफजान्सर्वान्विकाराञ्जयेत् ॥ पावंरागस्रुतंतथानयनयोः शोथंचहंतिक्षणात् ॥ वासादि ॥ वासाघनंनिंबपटोलपत्रंतिक्तामृतावंदनवत्सकंच ॥ कलिंगदार्वीदहनंचशुंठीभूनिंबधात्रीविजयाविभीतक ॥ पीतैसमस्तैः क्वथितः कषायोधिमंथमुख्यान्यखिलाक्षिरोगान् ॥ निहंत्ययंपित्तकफामयांश्चवासादिकोयंमुनिभिः प्रदिष्टं ॥ हस्ववासादि ॥ पटोलवासकारिष्टगुडूचीत्रिफलाघनं ॥ पंचमूलीसयष्ट्याह्वंचंदनंविश्वभेषजं ॥ पटोलादिगणः प्रोक्तःसर्वनेत्ररुजापहः ॥ वातपित्तकफोत्थांश्चनिहन्यात्सान्निपातिकान् ॥ काचंकंडुंस्रुतिंशोथंतिमिरपटलंतथा ॥ पटोलादि ॥ तथायवक्वाथः ॥ समाष्टभागंपिवेदिनेपूर्वदिनंकषायं। तैमीर्यकंहृपटलार्बुदंचशुक्रंतथामार्ज्जनकंव्रणंच ॥ ददातिरोमंसरुजंसशोथंपिल्लंचकाचंचतथाव्रणंच ॥ वातोद्भवंपित्तभवंकफोत्थकंनिहंतिसर्वान्नयनामयांश्च ॥ वासामृतायवावाद्वीपटोलत्रिफलादले ॥ मतिमान्पाययेत्क्वाथंसर्वाभिष्यंदनाशनं ॥ पथ्यात्रिस्रोविभीतक्याषट्धात्र्याद्वादशैवतु ॥ प्रस्थार्द्धंसलिलंदत्वाअष्टभागावशेषितं ॥ पीत्वाभिष्यंदसस्रावंरोगंचतिमिरंजयेत् ॥ सरंभदाहशूलास्रनाशनंदृक्प्रसादनं ॥ इतिनेत्ररोगाधिकारः ॥ ॥ अथशिरोरोगः ॥ पथ्याक्षधात्रीभूनिंबनिशावासामृतायुतैः ॥ कृतःक्वाथःषडंगोयंसगुडःशीर्षशूलकाः ॥ भ्रूशंखकर्णशूलानितथार्द्धशिरसोरुजं ॥ सूर्यावर्त्तंशंखकंचदंतजातंचतद्रुजं ॥ नक्तांध्यंपटलंशुक्रंचक्षुपीडांव्यपोहति ॥ पथ्यादि ॥ त्रिकटुपुष्कररजनीरास्नासुरदारुगंधानां ॥ क्वाथःशिरोर्त्तिजालनाशापीतनिवारयति ॥ ॥

कटुत्रिकादि॥पथ्याक्षधात्रीरजनीगुडूचीभूनिंबनिंबैः सगुडः कषाय॥ भूशंखकर्णाक्षिशिरोर्द्धशूलं निहंति मासानिहितः क्षणेन
॥अन्यपथ्यादि॥ इतिशिरोरोगाधिकारः॥अथस्त्रीरोगः॥अशोकवल्कलं क्वाथं शृतं दुग्धं सुशीतलं॥यथाबलं पीतप्रातस्तीव्रासृग्
दरशांतये॥दार्वीरसांजनवृषाब्दकिराતविल्वभल्लातकैरवकृतो मधुना कषायः॥ पीतो जयेत्यतिवलं प्रदरं सशूलं पीतासितारु
णाविलोहितनीलशुक्लं॥ह्रीवेरारलुरक्तचंदनबलाधान्याकवत्सादनीमुस्तोशीरयवासपर्पटविषाक्वाथं पिवेद्गर्भिणी॥ नाना
दोषयुतातिसारकगदैरक्तस्रुतौ वा ज्वरे योगोयं मुनिभिः पुरा निगदितः सूत्यामयेषूत्तमः॥ह्रीवेरादि॥अमृता नागरसहचरभ
ड्रोत्कटपंचमूलजलदलशृतं॥मधुसंयुक्तं निवारयति सज्वरांतकं॥सहचरपुष्करवेतसमूलं वैकंकनंदारुकुलत्थमूलं॥
जलमत्रसैंधववह्निगुप्तं सशोघोघोरसूतिकाशूलहरं परं॥दशमूलाकृतः क्वाथः सद्यः सूतिरुजापहः॥ इतिस्त्रीरोगाधिकारः
॥ ॥अथबालरोगः॥हरिद्राद्वययष्ट्याह्वसिंहीशक्रयवैः कृतं॥शिरोज्वरातिसारघ्नः कषायस्तन्यदोषजित्॥विल्वपुष्पाणि
च धातकीनां जलं सलोध्रं गजपिप्पली च॥क्वाथावलेहौ मधुना विमिश्रौ बालेषु योज्यावतिसारितेषु॥समंगातिविषालोध्रसा
रिवाभिः शृतं जलं॥दुर्द्धरेपि शिशोर्देयमतिसारे समाक्षिकं॥नागरातिविषामुस्तं बालकेंद्रयवैः शृतं॥कुमारं पाययेत्प्रातः स
र्वातिसारनाशनं॥विल्वशक्रांबुमोचाब्दसिद्धमाजं पयः पिवेत्॥सामामरक्तांग्रहणीं पीतं हन्यात्त्रिरात्रतः॥इतिबालरोगाधि
ले

कार:॥ अथसंशोधनगणसंग्रहंव्याख्यास्यामः॥ मदनमधुकलंवानिंवविंवीविशालात्रपुषकुटजवासादेवदालीकृमिघ्नं॥ विडुलदहन
चित्राकोशवत्यौकरंजकणालवणवचैलासर्षपाछर्दनानि॥ निकुंभकुंभत्रिफलागवाक्षीस्नुकशंखिनीनीलिनितिल्वकानि॥ शम्या
ककंपिल्लकहेमदुग्धादुग्धंचमूत्रंचविरेचनानि॥ मदनकुटजकुष्ठदेवदालीमधुकवचादशमूलदारुरास्ना॥ यवमिसिकृतवे
धनंकुलत्थामधुलवणंत्रिवृतानिरूहणानि॥ वेल्लापामार्गव्योषदार्वीसुरालावीजंशैरीषंवार्हतंशैग्रवंच॥ सारोमाधूकः सैन्ध
वंतार्क्ष्यशैलंत्रुट्यौपृथ्वीकाशोधयंत्युत्तमांगं॥ भद्रदारुनतंकुष्ठंदशमूलंवलाद्वयं॥ वायुंवीरतरादिश्चविदार्यादिश्चनाशये
त्॥ दूर्वानंतानिंववासात्मगुप्तागुंद्राभीरुशीतपाकीप्रियंगुः॥ न्यग्रोधादिः पद्मकादिः स्थिरेद्वेपद्मंधान्यंसारिवादिश्चपित्तः
॥आरग्वधादिरर्कादिर्मुष्काद्यो ऽसनादिकाः॥ सुरसादिःसमुस्तादिर्वत्सकादिर्वलासजित्॥ जीवंतिकाकोल्यौद्वेमेदेमुद्गमा
षपर्णौच॥ ऋषभकजीवकमधुकंचेतिगणोजीवनियाख्यः॥ विदारिपंचांगुलवृश्चिकालीवृश्चीवदेवाह्वयसूर्य्यपर्णीकंडूक
रीजीवनह्रस्वसंज्ञेद्वेपंचकेगोपसुतात्रिपादी॥ विदार्यादिरयंहृद्योवृंहणोवातपित्तहा॥ शोषगुल्मांगमर्द्दोर्द्ध्वश्वासकासहरोग
णः॥ सारिवोशीरकाश्मर्यमधूकशिशिरद्वयं॥ यष्टीपरूषकंहंतिदाहपित्तास्रतृड्ज्वरं॥ पद्मकपुंड्रौवृद्धितुगर्द्ध्यःशृंग्यमृतादश
जीवनसंज्ञा॥ स्तन्यकराघ्नंतीसमीरणपित्तंप्रीणनजीवनवृंहणवृष्या॥ परूषकंवराद्राक्षाकट्फलंकतकात्फलं॥ राजाह्वंदाडि

मंशार्करामूत्रामयवातजित्॥अंजनंफलिनीमांसीपद्मोत्पलरसांजनं॥शैलोमधुकनागाह्वविषांतर्दाहपित्तजित्॥पटोलकटुरोहिणीचंदनम
धुस्रवगुडूचीपाठान्वितं॥निहंतिकफपित्तकुष्ठज्वरान्विषंवमिमरोचकंकामलां॥गुडूचीपद्मकारिष्टधान्यकंरक्तचंदनं॥पित्तश्लेष्मज्वरछ
र्दिदाहतृष्णाघ्नमग्निकृत्॥आरग्वधेन्द्रयवपाटलिकाकतिक्तानिंबामृतामधुरसास्रुववृक्षपाठा॥भूनिंबसैर्यकपटोलकरंजयुग्मसप्तछ
दाग्निसुखवीफलवाणघोंटा॥आरग्वधादिर्जयतिछर्दिकुष्ठविषज्वरान्॥कफकंडूप्रमेहंवदुष्टव्रणविशोधनं॥असनतिनिशभूर्जश्वेतवा
हप्रकीर्याखदिरकदरभंडीशिंशिपामेषशृंग्य॥त्रिहिमजलपलाशाजोगकःशाकशालौधवक्रमुककलिंगछाकपर्णाश्वकर्णाःअस
नादिर्विजयतेश्वित्रकुष्ठकफक्रिमीन्॥पांडुरोगंप्रमेहंचमेदोदोषनिवर्हणां॥वरुणसैर्यकयुग्मशतावरीदहनमोरटविल्वविषाणिकाः॥द्वि
बृहतीद्विकरेजयाद्वयंबहलपल्लवदर्भरुजोकराः॥वरुणादिकफंमेदोमंदाग्नित्वंनियछति॥आढ्यंवातंशिरःशूलंगुल्मप्रांतसविद्रविः॥ऊ
षकंतुथकंहिंगुकासीसद्वयसैंधवं॥सशिलाजतुकृच्छ्राश्मगुल्ममेदकफापहः॥वेल्वंतरारणिकधूकवृषाश्मभेदगोकंटकोत्कटसहा
चरवाणकासा॥वृक्षादनीनलकुशद्वयगुछगुंद्राभल्लूकमोरटकुरंटकरंजपार्थाः॥वर्गोवीरतराद्योयंहंतिवातकृतान्गदान्॥अश्मरीश
र्करामूत्रकृच्छ्राघातरुजापहः॥लोध्रशावरलोध्रपलाशाःजिंगिरीशल्लकट्फलयुक्ता॥कुत्सितावकदलीगतशोकाःशैलवालुपरि
वेलवमोच॥एषलोध्रादिकोनाममेदकफहरोगणाः॥योनिदोषहरस्तंभीवर्ण्योविषविनाशनः॥अर्कालर्कौनागदंतीविशल्याभार्गी

रास्नावृश्चिकालीप्रकीर्याः॥ प्रत्यक्पुष्पीपीततैलादकीर्याश्वेतायुग्मंतापसानांचवृक्षः अयमर्कादिकोवर्गः कफमेदोविषापहः॥ कृमि
कुष्ठप्रशमनोविशेषाद्व्रणशोधनः॥ सुरसयुगफणिज्जकालमालाविडंगंषरबुसवृषकर्णीकट्फलंकासमर्दः॥ क्षवकसुरसिभार्गीकार्मु
काकाकमाचीकुलहलविषमुष्टीभूस्तृणंभूतकेशी॥ सुरसादिर्गणः श्लेष्ममेदःकृमिनिषूदनः॥ प्रतिश्यायारुचिश्वासकासघ्नोव्रणशोधनः
॥ मुष्कक्स्नुक्वराद्वीपिपलाशधवशिंशपाः॥ गुल्ममेहाश्मरीपांडुमेदोर्शकफपित्तजित्॥ वत्सकमूर्वाभार्गीकटुकामरिचंघुणप्रियाचगं
डीर॥ एलापाठाजाजीकट्वंगफलाजमोदसिद्धार्थःवचा॥ जीरकहिंगुविडंगंपशुगंधापंचकोलकंहंति॥ चलकफमेदपीनसगुल्मज्वरशू
लदुर्नाम्नः॥ वचाजलददेवाह्वनागरातिविषाभयाः॥ हरिद्राद्वययष्ट्याह्वकलशीकुटजोद्भवाः॥ वचाहरिद्रादिगणावामातीसारपाचनौ॥
मेदःकफाढ्यपवनस्तन्यदोषनिबर्हणौ॥ प्रियंगुपुष्पांजनयुग्मपद्मापद्माद्रजोयोजनवल्यनंताः॥ सारद्रुमोमोचरसःसमंगापुंनाग— — —
शीतंमदनीयहेतुः॥ अंबष्ठामधुकनमस्करीनंदीवृक्षपलाशकच्छुराः॥ लोध्रंधातकीबिल्वपेशीकट्वंगःकमलोद्भवंरजः॥ गणौप्रियंग्वंब
ष्ठादिपक्वातीसारनाशनौ॥ संधानीयौहितौपित्तेव्रणानामपिरोपणौ॥ मुस्तावचाग्निद्विनिशाद्वितिक्ताभल्लातपाठात्रिफलाविषाख्याः॥ कु
ष्ठंत्रुटीहेमवतीचयोनीस्तन्यामयघ्नामलपाचनाश्च॥ न्यग्रोधपिप्पलसदाफललोध्रयुग्मंजंब्वाद्वयार्जुनकपीतनसोमवल्काः॥ प्लक्षाम्रवं
जुलपियालपलाशनंदीकोलीकदंबविरलामधुकंमधूकं॥ न्यग्रोधादिर्गणोव्रण्यःसंग्राहीभग्नसाधनः॥ मेदःपित्तास्रतृड्दाहयोनिरो

॥सात्म्यद॥
॥२२॥

षनिवर्हणाः॥ एलायुग्मतुरुष्कंकुष्टफलिनीमांसीजलध्यामकंस्पृक्काचोरकचोचपत्रतगरस्थौणेयजाजीरसाः॥ शुक्तिर्व्याघ्रनखोमराह्वम
गरुश्रीवासकंकुंकुमंचंडागुग्गुलुदेवधूपखपुरांपुंनागनागाह्वयं॥ एलादिकोवातकफौविषंचविनियछति॥ वर्णप्रसादनःकंडूपिठ
काकोठनाशनः॥ श्यामादंतीद्रवंतीक्रमुककुटरणाशंखिनीचर्मशाह्वास्वर्णक्षीरीगवाक्षीशिखरिरजनकःछिन्नरोहाकरंजः॥ वस्तां
त्रीव्याधिघातोवहलवहुरसस्तीक्ष्णवृक्षात्फलानिश्यामाद्योहंतिगुल्मंविषमरुचिकफौहृद्रुजंमूत्रकृछ्रं॥ त्रयस्त्रिंशदितिप्रोक्तावर्गा
तेषुत्वलाभतः॥ युंज्यात्तद्विधमन्यच्चद्रव्यंजह्यादयौगिकः॥ एतेवर्गादोषदूष्याद्यपेक्ष्याकल्कःक्वाथःस्नेहलेहादियुक्ताः॥ पानेनस्ये
न्वासनेन्तर्वहिर्वालेपाभ्यंगेघ्नंतिरोगान्सुकृच्छ्रान्॥ नीलशठेनु॥ ॥काकोल्लीद्वयमृद्धिवृद्धिमधुकंमेदाद्वयंपद्मकंशृंगीजीवकरो
वनाम्नतलताद्वेमुद्गमाषछदेः॥ जीवंतीवसजीवकासपरुषेस्यान्मुराडूका— व्रितकाकोल्यादिरुदीरितोयमुनिभिःपित्तापहस्सर्पणाः
॥ ॥अथप्रमथ्याः॥ प्रमथ्याप्रोच्यतेद्रव्यात्पलात्कल्कीकृतान्मता॥ तोयेष्टगुणितेतस्याःपानमाहुःपलद्वयं॥ सयथा॥ मुस्तकेन्द्रय
वैःसिद्धाप्रमथ्याद्विपलोन्मिता॥ सुशीतमधुसंयुक्तारक्तातिसारनाशिनि॥ ॥अथयवागू॥ साध्यंचतुःपलंद्रव्यंचतुःषष्टिपलेंवुनि
॥ तत्क्वाथेनार्द्धशिष्टेनयवागूसाधयेद्धितं॥ सयथा॥ आम्रांम्रातकजंवूत्वक्कषायेविपचेद्बुधः॥ यवागूशालिभिर्युक्तातांभुक्ताग्रहणींज
येत्॥ ॥अथयूषः॥ कल्कद्रव्यपलंशुंठीपिप्पलीचार्द्धकार्षिकां॥ वारिप्रस्थेनविपचेत्सद्वोयूषउच्यते॥ सयथा॥ कुलत्थयवकोलैश्चमुद्गैर्मू

॥राम॥
॥२२॥

लकजैः शृतं ॥ शुंठीधान्याकषड्ग्रंथ्यूषश्लेष्मानिलापहः ॥ सप्तषष्टिक इत्येष संनिपातज्वरंजयेत् ॥ आमवातहरं कंठ्यं हृद्वक्त्राणां
विशोधनं ॥ सप्तषष्टिकयूषः ॥ अथ पानादिकल्पना ॥ मुस्तं द्रव्यपलं साध्यं चतुःषष्टिपले जले ॥ अर्द्धशिष्टं च तद्देयं पाने भक्तादिसंनि
धौ ॥ मस्तथा ॥ उशीरपर्पटोदीच्यमुस्तनागरचंदनैः ॥ जलं शृतं हिमं पेयं पिपासाज्वरनाशनं ॥ ॥ अथोष्णोदकः ॥ अष्टमेनांशशेषे
ण चतुर्थेनार्द्धकेन वा ॥ अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत् ॥ श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनं ॥ काशश्वासज्वरहरं पी
तमुष्णोदकं निशि ॥ अथ क्षीरपाकविधिः ॥ क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणं ॥ क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत् ॥ सयथा
॥ हृश्वीवविल्ववर्षाभू पयसोदकमेव च ॥ क्षीरावशेषतत्पेयं सर्वज्वरहरं परं ॥ पुनर्नवादि ॥ क्षीरपाकस्य विधिना पंचमूलं शृतं पयः
॥ ज्वरं हंति न संदेहः पिप्पल्या वापि शृतया ॥ पंचमूलं ॥ साधितं विल्वपेशीभिर्मूलैनैरंडकस्य च ॥ सद्यो हंति पयः पीतं ज्वरं सपरिकीर्त्तितं
॥ विल्वक्षीरं ॥ ॥ अथान्नप्रक्रिया ॥ अथान्नप्रक्रियात्रैव प्रोच्यते नातिविस्तरात् ॥ यवागूः षड्गुणा जले सिद्धा स्यात्कृशरा घना ॥ तंडुलैमाष
मुद्गैर्वा तिलैर्वा साधिता हिता ॥ यवागूर्ग्राहिणी वल्या तर्पणी वातनाशिनी ॥ अथ यवागू ॥ यवागूः षड्गुणे तोये संसिद्धा घनसिक्थिका ॥ पृथक्
द्रवैस्तु विरलैः संयुक्ता ज्वरिणो हिता ॥ यवागूर्दीपनी लघ्वी तृष्णाघ्नी वस्तिशोधिनी ॥ श्रमानिलहरी पथ्या ज्वरे चैवातिसारिके ॥ ॥
अथ विलेपी ॥ चतुर्गुणे तु संसिद्धा विलेपी घनसिक्थिका ॥ पृथक्द्रवेण रहिता ख्याता शिथिलभक्तिका ॥ विलेपी दीपनी लघ्वी तृष्णाघ्नी

वस्तिशोधिनी ॥ श्रमानीलहरीपथ्याज्वरेचैवातिसारके ॥ अथपेयायूषो ॥ द्रवाधिकांस्वल्पसिक्थावतुर्दशगुणोजले ॥ सिद्धापेयाबुधै-
र्ज्ञेयायूषःकिंचिद्घनःस्मृतः ॥ पेयालघुतराग्नेयाग्राहिणीधातुपुष्टिदा ॥ यूषोवल्यस्मृतःकठ्योलघुःपाकेकफापहः ॥ प्रकारांतरं ॥
कल्कद्रव्यपलंशुंठीपिप्पलीचार्द्धकार्षिकी ॥ वारिप्रस्थेनविपचेत्तद्वैयूषउच्यते ॥ यूषोवल्योलघुःपाकेरुच्यःकंठ्यःकफापहः ॥
अथभक्तः ॥ जलेचतुर्दशपलेतंडुलानांचतुःपलं ॥ विपचेत्स्रावयेन्मंडंसभक्तोमधुरोलघुः ॥ अथमंडः ॥ नीरेचतुर्दशगु-
णेसिद्धोमंडस्त्वसिक्थकः ॥ शुंठीसैन्धवसंयुक्तःपाचनंदीपनःस्मृतः ॥ अष्टमंडः ॥ धान्यत्रिकटुसिंधूत्थयुक्तस्तक्रेणयोजि-
तः ॥ भृष्टहिंगुश्चतैलाभ्यांसमंडोष्टगुणास्मृतः ॥ दीपनःप्राणदोवस्तिशोधनोरक्तवर्द्धनः ॥ ज्वरजित्सर्वदोषघ्नोमंडोष्टगुणउ-
ते ॥ अन्यच्च ॥ सतंडुलानांप्रसृतिद्वयंचशुक्रस्यवृद्धिंबलवर्द्धनंच ॥ ज्वरापहारिकफवातहंतापित्तंजयेदष्टगुणोहिमंडः ॥
अथवाट्यमंडः ॥ सुकंडितैस्तथाभृष्टैर्वाट्यमंडोयवैर्भवेत् ॥ कफपित्तहरःकठ्योरक्तपित्तप्रसादनः ॥ ॥अथलाजमंडः ॥
जालेवीतंडुलैर्भृष्टैर्लाजमंडःप्रकीर्तितः ॥ श्लेष्मपित्तहरोग्राहिपिपासाज्वरजित्स्मृतः ॥ अथफांट ॥ क्षुण्णेद्रव्येपलेसम्यक्ज-
लमष्टमंविनिक्षिपेत् ॥ मृत्पात्रेकुडवोन्मानंततस्तुश्रावयेत्पटात् ॥ यस्माच्चूर्णाद्रवःफांटस्तन्मानंद्विपलोन्मितं ॥ मधुश्वेतागु-
डादीस्तुक्काथवत्तत्रनिःक्षिपेत् ॥ सपयथा ॥ मधूकपुष्पमधुकंचंदनंसपरुषकं ॥ मृणालंकमलंलोध्रंगंभारीनागकेशरं ॥ त्रि

फलासारिवाद्राक्षालाजान्कोष्णजले क्षिपेत् ॥ सितामधुयुतो पेयः फांटो वासोहिमो पिवा ॥ वातपित्तज्वरहरं दाहं तृष्णामूर्छामतिभ्रमान् ॥ रक्तपित्तमदं हन्यात्तत्रकार्या विचारणा ॥ मधूकपुष्पादिफांटः ॥ आम्रजंबूकिसलयैः वटशुंगाप्ररोहकैः ॥ उशीरेण कृतः फांटः सक्षौद्रज्वरनाशनं ॥ पिपासाछर्दतीसारामूर्छा जयति दुस्तरान् ॥ आम्रादि ॥ ॥ मधूकपुष्पगंभारिचंदनोशीरधान्यकैः ॥ द्राक्षायाच कृतः फांटः सितशर्करयायुतः ॥ तृष्णापित्तहरः प्रोक्तो दाहमूर्छाभ्रमां जयेत् ॥ लघुमधूकपुष्पादि ॥ ॥ अथ मंथः ॥ मंथोपि फांटभेदः स्यात्तेन वात्रैव कथ्यते ॥ जले चतुःपले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ॥ मृत्पात्रे मंथयेत्सम्यक्तस्माच्च द्विपलं पिबेत् ॥ सयथा ॥ खर्जूरदाडिमद्राक्षातिंतिडीकाम्लिकापलैः ॥ सपरूषैः कृतो मंथः सर्वमद्यविकारजित् ॥ खर्जूरादिमंथः ॥ ॥ क्षौद्रयुक्तामसूराणां सक्तवो दाडिमांभसा ॥ मथितावारयंत्याशु छर्दिं दोषत्रयोद्भवां ॥ मसूरादि ॥ ॥ साविते शीतनीरेण सघृतैर्यवसक्तुभिः ॥ नातिसांद्रद्रवो मंथः स्यात्दाहास्रपित्तहा ॥ सक्तुमंथः ॥ ॥ अथ हिमः ॥ क्षुण्णद्रव्यपले सम्यक्षड्भिर्नीरपलैःप्लुतं ॥ निशोषितं हिमस्तस्यात्तथा शीतः कषायकः ॥ तत्मानं फांटवज्ज्ञेयं सर्वत्रैषविनिश्चयं ॥ सयथा ॥ आम्रजंबूत्थककुभंचूर्णीकृत्य जले क्षिपेत् ॥ हिमतस्य पिवे प्रातः सक्षौद्रं रक्तपित्तजित् ॥ आम्रादिहिमः ॥ मरिचं मधुयष्टीकं काकोडुंबरिका तथा ॥ नीलोत्पलं हिमस्तद्वत्स्याछर्दिनिवारणः ॥ मरिचादि ॥ नीलोत्पलवलाद्राक्षामधूकं मधुकं तथा ॥ उशीरं पद्मकं चैव काश्मरी

वपरूषकं ॥ एतच्छीतः कषायः स्याद्वातपित्तज्वराञ्जयेत् ॥ सप्रलापभ्रमं छर्दिमोहतृष्णानिवारणः ॥ नीलोत्पलादि ॥ अमृता
याहिमः पेयो जीर्णज्वरः हरस्मृतः ॥ वासायाश्चहिमः कासरक्तपित्तज्वराञ्जयेत् ॥ अमृतादि ॥ प्रातः सशर्करः पेयहिमो धान्याकसं
भवः ॥ अंतर्दाहं तथातृष्णां जयेत्स्रोतोविशोधनः ॥ धान्यकः ॥ धान्याकधात्रीवासानां द्राक्षापर्पटयोहिमः ॥ रक्तपित्तं ज्वरं दाहं
तृष्णाशोषं च नाशयेत् ॥ धान्यादि ॥ वासागुडूचीसंजाता हिमक्षौद्रकणान्विता ॥ त्रिघस्रसेवनाद्धंति ज्वरान्सर्वान्न संशयः ॥
वासादि ॥ ॥ इति श्रीवैद्यविश्वनाथकृते सान्यदर्पणे स्वरसः पुटपाककषायफांटहिमकल्पनाध्यायः प्रथमः ॥ १ ॥
अथकल्कः ॥ द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ॥ प्रक्षिप्य वापकल्कास्तेतन्मानं कर्षसंमितं ॥ कल्के मधुघृतं तैलं देयं द्वि
गुणमात्रया ॥ सितां गुडं समं दद्याद्द्रवान्देयाच्चतुर्गुणान् ॥ सयथा ॥ तत्रादौ ज्वरः ॥ अनंतावालकं मुस्तं नागरं कटुरोहिणी ॥ पिबेत्
सुखांबुना कल्कं पाययेदक्षसंमितं ॥ कल्कोयमल्पकालेन हन्यात्सर्वज्वरांस्तथा ॥ विदध्यात्कोष्णसंशुद्धिं दीपयेच्च हुताशनं ॥
॥ सारिवादिकल्कं ॥ ॥ त्रिवृध्या पंचवृध्या वा सप्तवृध्याथवा कणा ॥ पिबेत्पिष्ट्वा दशदिनं तांस्तथैवापकर्षयेत् ॥ एवं विंशदि
नैः सिद्धं पिप्पलीवर्द्धमानकं ॥ अनेन पांडुवातास्रकासश्वासारुचिज्वरान् ॥ उदरार्शःक्षयश्लेष्मवातान्नश्यंत्युरोग्रहा ॥ पिप्पलीव
र्द्धमानं ॥ सशर्करामक्षमात्रां कटुकां चोष्णवारिणा ॥ पीत्वा ज्वरं जयत्याशु पित्तश्लेष्मसमुद्भवं ॥ इति ज्वराधिकारः ॥ अथातिसारः

समंगाधातकीपुष्पं विल्वसौवर्चलं विडं ॥ सक्षौद्रं दाडिमं चैव कल्कं तण्डुलवारिणा ॥ पीतं पित्तातिसारघ्नं शूलं चाशु नियच्छति
॥ सक्षौद्रातिविषा पिष्टा वत्सकस्य फलत्वच ॥ तंदुलोदकसंयुक्तं पेयं पित्तातिसारनुत् ॥ वदरीमूलकल्कं तु तिलकल्कसथैवच ॥
मधुक्षीरयुतोपीतो रक्तातिसारनाशनं ॥ अंकोलमूलकल्कश्च सक्षौद्रतंदुलांवुना ॥ अतीसारहरः प्रोक्तास्तथा विषहरः स्मृतः ॥
हरीतकी सातिविषा हिंगुसौवर्चलान्वितः ॥ सैन्धवं चापि संपिष्ट्वा पाययेदुष्णवारिणा ॥ आमातीसारयोगोयं पाचयित्वा चिकि
त्सति ॥ आमातीसारयोगेन यद्यतेन शाम्यति ॥ ततं योगशतेनापि चिकित्सति चिकित्सकः ॥ हरीतक्यादि ॥ पीत्वा शतावरीकल्कं
पयसा क्षीरभुंजयेत् ॥ रक्तातिसारं पीत्वा वातयासिद्धंशृतेनरः ॥ पीतं मधुसितायुक्तं चंदनं तंदुलांवुना ॥ रक्तातिसारजिद्रक्तपित्तत
दाहमेहनुत् ॥ इत्यतीसाराधिकारः ॥ ॥ अथग्रहणी ॥ श्रीफलशलाटुकल्को नागरचूर्णेन मिश्रितः सगुडः ॥ ग्रहणीगदमत्यु
ग्रं तक्रंभुंजीत शीलोतो जयति ॥ पीतो मसूरयूषेण कल्कं शुंठीशटालुजः ॥ जयेत्संग्रहणीं तक्रैराहवृत्तीभवः ॥ व्याघ्रीग्रंथिकसुर
सा शुंठी दाडिमरजनी ॥ घनचित्रकजं कल्कं पीत्वा हन्यात्कफात्मिकाग्रहणी ॥ इतिग्रहण्याधिकारः ॥ अथार्शः ॥ अपामार्गस्य वीजा
नां कल्कस्तंदुलवारिणा ॥ पीतो रक्तार्शसां नाशंकरस्तेनास्ति संशयः ॥ नवनीततिलैः कल्को जेता रक्तार्शसां मतः ॥ नवनीतसिताना
गकेशरैश्चापि तद्विधः ॥ इत्यर्शोधिकारः ॥ ॥ अथाग्निमांद्यः ॥ पथ्यासैंधवशुंठीभिः कल्को दीपनपाचनः ॥ इत्यग्निमांद्य

धिकारः॥ अथक्रिमिः॥ विडङ्गमलाशवीजानिपारसीययवानिका॥ कंपिल्लकविडंगश्चगुडश्चसममभागिकः॥ तक्रेणाकल्कमेतेषांपिबेत्क्रिमिगणाप
हं॥ इतिक्रिम्याधिकारः॥ ॥अथकामलाधिकारः॥ गुडूचीपत्रकल्कंवापिबेत्तक्रेणकामली॥ इतिकामलाधिकारः॥ ॥अथरक्तपित्तः॥
कल्कंमधूकत्रिफलार्जुनानांनिशिस्थितंलोहमयेषुपात्रे॥ सार्ज्जंविलेह्यानुपिबेत्सुशीतंसशर्करंछागपयःक्षधार्त्तः॥ इतिरक्तपित्ताधिका
रः॥ अथक्षयः॥ उरोमत्वाक्षतंलाक्षापयसामधुसंयुतः॥ सद्यएवपिबेत्कल्कंपयसावासशर्करा॥ कूष्मांडकरसेपिष्टंलाक्षाकर्षद्वयंपिबेत्
॥ रक्तक्षयमुरोघातंक्षयरोगंचनाशयेत्॥ इतिक्षयाधिकारः॥ अथश्वासः॥ रंभाकंदशिरीषाणांकुसुमंपिप्पलीयुतं॥ पिष्टंतंडुलतोयेन
पीत्वाश्वासंव्यपोहति॥ इतिश्वासाधिकारः॥ अथारुचौ॥ कुष्टसौवर्चलाजाजीशर्करामरिचंविडं॥ धान्येलापद्मकोशीरपिप्पलीचंद
नोत्पलैः॥ लोध्रंतेजोवतीपथ्यात्र्यूषणंसयवाग्रजं॥ आर्द्रदाडिमनिर्यासश्चजाजीशर्करायुतः॥ सतैलमाक्षिकांस्त्वेतेचत्वारःकवलग्रहा
त् चतुरोरोचकान्हन्युर्वाताद्येकजसर्वजान्॥ इत्यरुच्यधिकारः॥ अथछर्द्दिः॥ चंदनंचमृणालंचवालकंतगरंवृषं॥ सतंडुलोद
कक्षौद्रकल्कपीतोवमिंजयेत्॥ चंदनस्याक्षमात्रेणासंयोज्यमूलकीरसं॥ पिबेन्माक्षिकसंयुक्तंछर्द्दिस्तेननिवार्यते॥ इतिछर्द्यधि
कारः॥ ॥अथोन्मादः॥ कुष्माण्डवीजमज्जाकल्कपीतोनिवारयत्याशु॥ उन्मादरोगमुग्रंमधुनादिवसत्रयेणैव॥ इत्युन्मादाधि
कारः॥ अथवातव्याधौ॥ पिष्ट्वासुसूक्ष्मंलशुनस्यकंदंघृतेनलिह्याद्घृतभोजनाशी॥ तेनप्रयांतीतिहिवातरोगासंस्कारहीनापुरू

षादिवार्थान्॥ महानिंवजटाकल्को गृध्रशीनाशनः स्मृतः॥ शुद्धकल्को रसोनस्य तिलतैलेन मिश्रितः॥ वातरोगाञ्जयेत्तीव्रान् विषम
ज्वरनाशनः॥ इतिवातव्याध्याधिकारः॥ ॥अथामवातः॥ पक्वकंदरसोनस्य गुटिकानिस्तुषीकृता॥ पाटयित्वा वमध्यस्थं दूरिकु
र्यात्तदंतरं॥ तदुग्रगंधनाशाय रात्रौ तक्रे विनिक्षिपेत्॥ सोवर्च्चलंयवानीच भर्जितंहिंगुसैंधवं॥ कटुत्रिकंजीरकंच समभागानि चू
र्णयेत्॥ एकीकृत्य ततः सर्वकल्कं कर्षप्रमाणतः॥ खादेदग्निवलापेक्षी ऋतुदोषाद्यपेक्षया॥ अनुपानं ततः कुर्यादेरंडशृतम
न्वहं॥ सर्वांगिकांगदेवातमर्दितंचापतंत्रके॥ अपस्मारं तथोन्मादं मन्त्रस्तंभंच गृध्रसी॥ उरःपृष्ठकटिपार्श्वकुक्षिपीडां कृमीञ्जयेत्॥
अजीर्णमातपंरोषमतिनीरं पयोगुडं॥ रसोनमश्नन्पुरुषस्त्यजेदेतन्निरंतरं॥ मद्यमम्लंतथामांसंरसंमेवंतनित्यशः॥ रसोनकल्कः
॥ ॥पिप्पलीपिप्पलीमूलं भल्लातकफलानि च॥ एतत्कल्कश्चसक्षौद्रउरुस्तंभनिवारणं॥ इत्यामवाताधिकारः॥ अथशूल॥ वि
ष्णुक्रांताजटाकल्कसिताक्षौद्रघृतैर्युतं॥ परिणामभवंशूलं नाशयेत्सप्तभिर्दिनैः॥ शुंठीतिलगुडैः कल्कंदुग्धेनसहयोजयेत्
परिणामभवंशूलमामवातश्चनश्यति॥ इतिशूलाधिकारः॥ अथगुल्मः॥ शतावरीविल्वत्वग्दारुभार्गीकणोद्भवं॥ कल्कंपीतंजये
गुल्मंतिलक्वाथेनरक्तजं॥ इतिगुल्माधिकारः॥ ॥अथमूत्रकृच्छ्रः॥ निदिग्धिकायाःकल्कंतुक्षुरकोलसमन्वितं॥ तण्डुलवारिणापी
तंमूत्रकृच्छ्ररुजापहं॥ द्राक्षासितावलाकल्कंकृच्छ्रघ्नंमस्तुनायुतं॥ इतिमूत्रकृच्छ्राधिकारः॥ ॥अथमूत्राघातः॥ त्रिफलाकल्कसंयुक्तं

॥सान्मद॥
॥२६॥

लवणंचापिपाययेत्॥ कल्कमेर्वारुबीजानामक्षमात्रंससैन्धवं॥ धान्याम्लयुक्तंपीत्वैवमूत्राघाताद्विमुच्यते॥ इतिमूत्राघाताधिकारः॥ ॥
अथाश्मरी॥ शृंगवेरयवक्षारपथ्याकालीयकल्कवत्॥ दधिमंडेभिनत्युग्रामश्मरीमाशुपातनः॥ इत्यश्मर्यधिकारः॥ अथोदरः॥ वि
डंगचित्रकोदंतीचव्यंव्योषंचतैःपयः॥ कल्कैःकोलसमैःपीत्वाप्रवृद्धमुदरंजयेत्॥ इत्युदराधिकारः॥ अथगलगंडः॥ श्वेतापराजि
तामूलंकल्कप्रातःपिवेन्नरः॥ सर्पिषानियताहारोगलगंडप्रशांतये॥ इतिगलगंडाधिकारः॥ अथश्लीपद॥ पिवेद्वाप्यभयाकल्कं
सूत्रेणान्येनयेनवा॥ देवदारुगुडूचीवानागरंभद्रदारुच॥ पिवेत्सर्षपतैलेनश्लीपदानांनिवृत्तये॥ इतिश्लीपदाधिकारः॥ ॥अथव्रणाः
लेपान्निंवदलैःकल्कोव्रणशोधनरोपणः॥ भक्षणाच्छर्दिकुष्टास्रपित्तश्लेष्मकृमिंजयेत्॥ इतिव्रणाधिकारः॥ ॥अथकुष्टः
पांड्वामयार्शश्वयथुप्रमेहदद्रुत्वग्दोषाग्रणुदेच्चसद्यः॥ सप्तछरिष्टखदिरस्यकल्कसर्वामयानांसमनेसमर्थः॥ सएवविंवासनदेवदा
रुरोहीतकारग्वधसिंसपानां॥ काकोडुंवरिकारिष्टविडंगव्योषवासकं॥ कल्कंपीत्वाजयेत्कुष्टंकुटजत्वक्सितांवुना॥ इतिकुष्टाधिका
रः॥ अथमसूरिका॥ श्वेतचंदनकल्कांबुहितंयोविभवंरसः॥ पिवेन्मसूरिकारंभेनेवंवाकेवलंरसं॥ इतिमसूरिकाधिकारः॥ ॥
अथमुखरोगः वचायवानीसहचित्रकेणसिन्धूत्थविश्वासहसिंदुवारं॥ कल्कंतथोष्णांवुसदंतरोगेमुखामयंसर्वमथोपिसस्यते॥ इतिमुखरोगाधि
कारः॥ अथस्त्रीरोगः॥ पिप्पलीदेवकाष्ठंच आर्द्रकंगजपिप्पली॥ चित्रकंसैंधवंचैवपिप्पलीमूलमेवच॥ वृहतीकंटकारीचतनी

॥राम॥
॥२६॥

यांविल्वपेशिकां ॥ अजमोदा च धान्याकं तथ्यालवगापंचकं ॥ सर्वाण्येतानि तक्रेण कांजिकेन सम्नितेन च ॥ सुखोष्णेन च योज्यानि स्त्रीरोगां रोगस्य शांतये ॥ वातिकान्पैत्तिकांश्चापि श्लैष्मिकांसांनिपातिकान् ॥ सूतिकोपद्रवान्हन्युः सर्वानेतान्न संशयः ॥ येच स्त्रीणांयेतिरोगाः कुचादिषु च ये स्थिताः ॥ भक्षणात्स्वेदनात्तेषु विलयं यांति वेगतः ॥ पिप्पल्यादिकल्कः ॥ ॥ पिप्पली देवदारुं च भद्रमुस्तकमेव च ॥ अगरुं पिप्पलीमूलं श्लक्ष्णां पिष्टं च कारयेत् ॥ तक्रेण सह संयुक्तं पिबेत्कल्कं विचक्षणः ॥ एतेन घृतसंयुक्तं पीतमात्रं न संशयः ॥ वातिकां पैत्तिकांश्चैव श्लैष्मिकां सान्निपातिकान् ॥ सूतिकोपद्रवं हन्ति वृक्षमिन्द्राशनिर्यथा ॥ द्वितीयापिप्पलीकल्कः ॥ ॥ चंदनोशीरयतगमधुकं नीलमुत्पलं ॥ त्रपुसैर्वारुवीजानि धातकीकदलीफलं ॥ लोध्रलाक्षावटापत्रपद्मकं पद्मकेशरं ॥ एतान् कल्कान् मधुयुतान्पाययेत्तंडुलांबुना ॥ त्र्यहात्प्रशमयेदेतद्योषितां पैत्तिकं रजः ॥ रोहितान्मूलकल्कं तु पांडुरेसग्दरे पिवेत् ॥ जलेनामलकीवीजकल्कं समधुशर्करं ॥ कल्कं क्षौद्रेण दातव्यं श्वेतप्रदरनाशनं ॥ तंडुलीयजटाकल्कः सक्षौद्रः सरसांजलं ॥ तंडुलोदकसंपीतो रक्तप्रदरनाशनः ॥ इति स्त्रीरोगाधिकारः ॥ ॥ अथ विष ॥ वंध्याककोटिकामूलं पाटलायाजटा तथा ॥ घृतेन विल्यामूलं वा हंति विषं नाशयेद्विषं ॥ अलाभे सैन्धवकणाशुंठीकल्कत्रिदोषहा ॥ इति विषाधिकारः ॥ ॥ इति श्रीवैद्यविश्वनाथकृते सामान्यरोगकल्ककथनाध्यायो द्वितीयः ॥ २ ॥ अथ चूर्णाधिकारः ॥ तत्क्रमः ॥ ऋषिप्रोक्ता चिकित्सायां क्वाथं तादौ प्रयोजयेत् ॥ तैरशांते ज्वरे दद्या चू

र्णादिगुटिकारसा ॥ नैरग्न्यशांते कुर्वीत स्नेहानि तिभिषक्तते ॥ नकषायप्रशंसंतिनराणांतरुणज्वरे ॥ कषायेनाकुलीभूतादोषाजेतुंसुदुस्तरा
॥ नच्यचंतेनपच्यंतेकषायेस्तंभितामला ॥ तिर्यग्गिमार्गगावाति घोरंकुर्युर्नवज्वरं ॥ वातिकसप्तरात्रेणादशरात्रेणपैत्तिके ॥ श्लेष्मिके
द्वादशाहेनज्वरे युंजीतभेषजं ॥ ~~भेषजमितिक्वाथं~~ ॥ ॥ अत्रग्रंथेक्वाथप्रकारपूर्वमुक्तमपिज्वरे पूर्वंक्वाथोनदेयः ॥ पादशेषकषाय
स्याद्यःषोडशगुणोंभसि ॥ कथितोत्रषडंगादिर्ननिषिद्धोनवज्वरे ॥ मुख्यभेषजसंबंधोनिषिद्धस्तरुणज्वरे ॥ पयःपेयादिसंस्कारे
निर्दोषंतत्रभेषजं ॥ कर्षमात्रमिहद्रव्यंसाधयेत्प्रास्थिकेंभसि ॥ अर्द्धसृतंप्रयोक्तव्यंपानेपेयादिसंविधौ ॥ ॥ ~~तत्रचूर्णानि~~ ॥ अथज्वर
॥ अत्यंतशुष्कंयद्द्रव्यंसुपिष्टंवस्त्रगालितं ॥ तत्स्याच्चूर्णंरजःक्षोदस्तन्मात्राकर्षसंमिता ॥ चूर्णेगुडःसमोदेयःशर्कराद्विगुणाभवे
त् ॥ चूर्णेषुभर्जितंहिंगुदेयंनोत्क्लेदकृद्भवेत् ॥ लिहेच्चूर्णंद्रवैःसर्वैर्घृताद्यैर्द्विगुणोन्मितैः ॥ पिबेच्चतुर्गुणेनैवचूर्णमालोडितंद्रवैः
॥ चूर्णावलेहगुटिकाकल्कानामनुपानकं ॥ वातपित्तकफातंकेत्रिचौकवलमाहरेत् ॥ यथातैलंजलंप्राप्तंक्षणेनैवप्रसर्पति ॥
अनुपानवलादंगेतथासर्पतिभेषजं ॥ द्र- णायावनासम्यक्चूर्णंसर्वंप्लुतंभवेत् ॥ भावनायाप्रमाणंतुचूर्णेप्रोक्तंभिषग्वरैः ॥
तद्यथा ॥ त्रिफलारजनीयुग्मकंटकारियुगंशठी ॥ त्रिकटुग्रंथिकंमूर्वागुडूचीधन्वयासकाः ॥ कटुकापर्पटोमुस्तत्रायमाणंचवाल
कं ॥ निंबंपुष्करमूलंचमधुयष्टीचवत्सकः ॥ जवानीद्वयवोभार्गीसिग्रुवीजंसुराह्वजा ॥ वचात्वक्पद्मकोशीरचंदनातिविषावला ॥ शा

लपर्णीपृष्ठिपर्णीविडंगंतगरंतथा॥चित्रकोदेवकाष्ठंचचव्यंपत्रंपटोलजं॥जीवकर्षभकौचेल्लालवंगंवंशरोचना॥पुंडरीकंच
काकोलीपत्रकंजातिपत्रकं॥तालीशपत्रंचतथासमभागानिचूर्णयेत्॥अर्द्धांशंसर्वचूर्णस्यकैरातंप्रक्षिपेत्सुधी॥एतत्सुदर्श
नंनामचूर्णंदोषत्रयापहं॥ज्वरांश्चनिखिलान्हन्यान्नात्रकार्याविचारणा॥पृथग्द्वंद्वागंतुजांश्चधातुस्थान्विषमांस्तथा॥सन्निपा
तसमुत्थाश्चमानसानपिनाशयेत्॥शीतज्वरैकाहिकादीन्मोहंतंद्राभ्रमंतृषां॥श्वासंकासंचपांडुंचहृद्रोगंहंतिकामलां॥त्रि
कपृष्ठकटिजानुपार्श्वशूलनिवारणं॥शीतांबुनापिबेद्धीमान्सर्वज्वरनिवृत्तये॥सुदर्शनंयथाचक्रंदानवानांविनाशनं॥तद्व
ज्वराणांसर्वेषामिदंचूर्णंप्रणाशनं॥सुदर्शनचूर्णं॥ ॥रोहितमत्स्यपित्तंचशिवलिंगीन्द्रवारुणी॥पटोलपत्रेन्द्रयवप
र्पटोनिंबतिक्तकैः॥भूनिंबकमतृष्णानांचूर्णंज्वालासुदर्शनं॥सर्वज्वरविनाशायखादेन्मासद्वयंजलैः॥देहत्यागस्यदुःखेन
यथाकाशंप्रमुच्यते॥चूर्णभक्षस्तदुःखेनसर्वज्वरपरिच्युतः॥ज्वालासुदर्शनचूर्णं॥ ॥शृंगीकट्फलपंचकोलकशटी
शक्राह्वजीरेनिशातिक्तावल्लीजतिक्तकपर्पटवचालज्जावतीजीवका॥कौंतीयासकलिंगशिग्रुधनिकाश्यामामयंजंतुहाव्याघ्रीयंती
भकणासुरंगभज्जापाठाजमोदाभयं॥हन्याष्टज्वरमेषसर्वजनितंसोपद्रवंदारुणंसैकंद्वादशसन्निपातजनितंप्रायोपसंघंहरेत्॥
शृंग्यादिचूर्णं॥आमलंचित्रकंपथ्याभूमितासैंधवकणा॥चूर्णितोयंगणोज्ञेयसर्वज्वरविनाशनं॥पिप्पलीसैंधवंतथैतिपाठांत

रं॥ ॥आमलक्यादि॥ रास्नामधुकमृद्वीकापिप्पलीकाश्मरीवला॥ त्रायमाणासमृद्वीकाश्रीपर्णीसारीवामृता॥ दुरालभामृताशुंठीस
मुस्तंसमभागिकं॥ मधुनासहलेह्योयंवातज्वरहरःपरं॥ रास्नादि॥ ॥लवंगधान्यकंकुष्ठंअजाजीसमचूर्णयेत्॥ उष्णोदकेनपानंच
वातज्वरहरंपरं॥ स्वल्पलवंगादि॥ तालीशचित्रककटुत्रयंशजातंसपिप्पलीमूलयुतार्द्धकर्ष॥ त्वक्पत्रकेशरत्रुटित्रयमाषजाजीत
चूर्णात्तुल्यगुडभावितसर्पिक्षौद्रं॥ कर्षार्द्धभक्षयतिवातज्वरात्रिमांद्यंसर्वानिलांतकफजनपरिनापितस्य॥ तालिशादि॥ ॥साजाजी।
पिप्पलीमूलंशृंगवेरकणामृता॥ अभयाघनमृद्वीकालेहक्षौद्रेणयोजितं॥ कुक्षिराटोपवैरस्यंक्षुन्नाशोगुरुगात्रता॥ कंपनंखे
दनंचैवमनिलज्वरनाशनं॥ शर्करादाडिमाभ्यांचद्राक्षादाडिमयोस्तथा॥ वैरस्यंधारयेत्कल्कंगंडूषंचयथाहितं॥ अजाआदि
॥पिंडीवत्सकवीजानिचूर्णमुष्णांवुनापिवेत्॥ पित्तज्वरप्रशांत्यंतिवमनंपरमौषधं॥ मदनफलादि॥ ॥विभीतकीत्रायमा
णामुस्तकैरातशर्करा॥ मधुनासहलेह्योयंरक्तपित्तज्वरापहं॥ विभीतक्यादि॥ ॥सितोत्पलगोलजनवंशजातंसवल्कलंचूर्णि
तकेशरंच॥ कायस्थपत्रत्वचशारिवानांदुरालभायामधुनालिहेत्तत्तृष्णासदाहंहरतांसपित्तंधन्वंतरेणापरिपूजितलेहसा
रं॥ सितोत्पलादि॥ तालीसकेशरंद्राक्षापत्रकंचत्वचासह॥ सूक्ष्मेलामधुनापित्तंनाशनंपरमौषधं॥ स्वल्पतालिसादि॥ उत्पलंरो
चनंद्राक्षासूक्ष्मेलापत्रकत्वचं॥ दुरालभासमंचूर्णंशर्करामधुनालिहेत्॥ पित्तज्वरंचतृष्णांचदाहंचैवनियच्छति॥ उत्पलादि॥ त्रि

लवंगत्रिफलाप्रियंगुपिप्पलीघनं ॥ शर्करामधुनालेहं रक्तपित्तज्वरापहं ॥ स्वल्पसूक्ष्मैलादि ॥ एलापत्रसमङ्गीकाशर्करामधुकानि च
॥ नागपुष्पं च तेयोज्यं पाचनं पैत्तिके ज्वरे ॥ एलादिपाचनं ॥ ॥ चंदनंपद्मकराह्वावकटुत्वीशिाह्विजातका ॥ जातीफलसमायुक्तं मधु
मिश्रं च पित्तजित् ॥ स्वल्पचंदनादि ॥ ॥ नागकेशरमधुकंवल्कलंकेशरंसिता ॥ तण्डुलोदकसंयुक्तं पित्तज्वरहरामता ॥ नागकेश
रादिपाचनं ॥ नागकेशरसूक्ष्मैलादुरालभवरांगिका ॥ मधुनासंयुतालीढापित्तज्वरहरामता ॥ नागकेशरादि ॥ त्रिफलापिप्पलीवा
सामाधवीसमचूर्णयेत् ॥ मधुनालेहयेत्पित्तं विषमज्वरनाशनं ॥ त्रिफलादि ॥ पटोलत्रिफलानिंद्राक्षामृतसदूरेयवा ॥ पित्तज्वरेसतृ
ष्णायांप्रशाम्यंतेविनिश्चयं ॥ पटोलादि ॥ फलत्रयंघनंद्राक्षानिवेन्द्रयववत्सकं ॥ त्रुटित्वचंसपटोलंशरंयासंचूर्णयेत् ॥ समशीतंमधु
लीढं पित्तदाहं ज्वरांतकं ॥ ज्येष्ठत्रिफलादि ॥ गुडूचीपद्मलोध्राणांशारिवोत्पलयोस्तथा ॥ शर्करामधुसंयुक्तं शीतपित्तज्वरापहं ॥ ज्येष्ठ
गुडूच्यादि ॥ गुडूचीमुस्तधान्याकंमधुकंकटुरोहिणी ॥ तृष्णामूलाहृविच्छर्दिपित्तज्वरहरोगणः ॥ गुडूच्यादि ॥ ॥ सितोत्पलागो
स्तनवंशजातीसवल्कलेचंदनकेशरंच ॥ कार्यस्थसारोमधुसारिवानांजलंसपद्मंसदुरालभानां ॥ क्षौद्रेणलेह्यंविधिनाप्रयुक्तंनिहं
तितृष्णाज्वरपित्तदाहं ॥ सितोत्पलादि ॥ सूक्ष्मैलामलकीमुस्तचंदनंमधुयष्टिका ॥ ह्रीबेलापिप्पलीकृष्णाधान्यापर्पटकंसिता ॥ शीत
तोयेनसंपिष्टं पित्तजिन्मधुनायुतं ॥ सूक्ष्मैलादि ॥ हरीतकीप्रियंगुश्चपिप्पलीलोध्रमेव च ॥ हरीद्रातेजनीनांचमक्षौद्रंमुखधावनं ॥ ॥

हरीतक्यादि॥ कृष्णा शुंठीत्वक्षारचूर्णं क्षौद्रेणा संलिहेत्॥ एतन्हिरेचनं श्रेष्ठं सर्वश्लेष्मविकारिणां॥ कृष्णादि॥ तुगादुरालभा शुंठी कट्
फलं मधुना सह॥ कफज्वरास्त्रविच्छर्दि नाशयेत्त्रापि नेगदे॥ तुगादि॥ त्वगेलापिप्पलीवासाशर्करा द्विगुणोत्तरा॥ पार्श्वरुक्श्वासकासघ्नं
ज्वरघ्नं वह्निविप्रदं॥ त्वगेलादि॥ तालीसकेशरतुगादलश्रेष्ठजाली एलालवंगमरिचान्यपि चार्द्धकर्षं॥ क्षौद्रेण भावयति लोहमिदं न
राणां श्लेष्माशयामाशुविनिहन्ति ज्वरामयघ्नं॥ तालीसादि॥ तालीसवंशजादारुपिप्पलीमूलमेव च॥ एतच्चूर्णं हितं भक्षेत्श्वासकासाग्निर्बलवा
न्भवेत्॥ तालीसादि॥ ॥शठीमरिचपिप्पल्यो लवंगतालिसं तुगा:॥ केशरं पत्रकं चैलामजाजी त्वक् च चूर्णितं॥ चतुर्गुणं गुडं द
त्वा श्लेष्मज्वरनियच्छति॥ शठ्यादि॥ शृंगी कृष्णा तुगा क्षौद्रं समश्चातिविषास्तथा॥ श्लेष्मज्वरं च शोथघ्नमेतत्स्यात्परमौषधं॥ स्वल्प
शृंग्यादि॥ ॥अजमोदाकणाशृंगीपुष्करातिविषासमा॥ दुरालभायुता क्षौद्रं वातश्लेष्मज्वरारुचौ॥ अजमोदादि॥ ॥भार्गीपुष्क
रमूलं च कट्फलं च सपिप्पली मधुना चूर्णितं लेहं श्लेष्मज्वरहरात्रिवि:॥ भार्ग्यादि॥ कट्फलं पौष्करं शृंगी कृष्णा च मधुना सह॥ का
शश्वासहर: श्रेष्ठलेहयेच्चकफांतकृत्॥ कट्फलादि॥ अजाजीशर्करायुक्ता दाडिमस्य रसेन तु॥ लिह्याच्च मधुना युक्तं कर्त्तव्यं कव
लग्रह:॥ अजाज्यादि॥ यष्टीमधुकचूर्णं वा पिबेदुष्णेन वारिणा॥ वातपित्तज्वरं हन्यादुत्तमं परमौषधं॥ यष्ट्यादि॥ त्रिवृत्सैन्धवशुंठी
नां चूर्णमम्लं पिबेन्नर:॥ वातार्द्दितो विरेकार्थे जांगलानां रसेन वा॥ स्वल्पत्रिवृतादि॥ द्राक्षापत्रकहस्तिनीकटुत्रयं भृंगसयासोदयो

भागोयंवमसंचूर्णमधुनालेहंप्रकुर्यात्सदा ॥ पित्तेवातरुजौज्वरंचविषमेहृत्पांडुदाहांतकोनानाव्याधिनिवर्हणःप्रकथितंश्रीशंभुवक्त्रोद्भवं ॥ द्राक्षावलेहः ॥ क्षौद्रोपकल्पासंयोगंश्वासकाशज्वरापहं ॥ प्लीहानंहंतिहिक्कांचबालानांतुप्रशस्यते ॥ मधुपिप्पली ॥ फलत्रयंकणाश्यामाश्चभद्राक्ष्मालवंतथा ॥ चित्रंतंडुलतोयेनपिवेत्मधुयुतंलिहेत् ॥ वातपित्तनिहंत्याशुकफरक्तज्वरान्जयेत् ॥ फलत्रिकादि ॥ ॥तालीसपिप्पलीमुस्तात्रिफलद्वयंजीरकं ॥ चातुर्जातमुशीरंचमरिचंवंशरोचनं ॥ श्रृंगीधान्यलवंगाश्चशर्करामधुनासह ॥ वातपित्ततृषामूर्छाहिक्काश्वासज्वरापह ॥ तालीसाद्यवलेहः ॥ द्राक्षात्रिजातकंचैवतालीशंवंशरोचनं ॥ ऊषणंचदुरालंभसमभागानिकारयेत् ॥ शर्करामधुनालेहवातपित्तकफांतकः ॥ दाहंहृद्रोगसमन्वितंछर्दितृष्णासमान्वितं ॥ एकाहिकंद्व्याहिकंचत्र्याहिकंचचतुर्थकं ॥ विषमज्वरेषुसर्वेषुनास्तितस्यौषधोपमा ॥ द्राक्षावलेहः ॥ त्रिजातत्र्यूषणंक्षौद्रंजातीफलंचवल्कलं ॥ पुष्कराह्रानिलेहोयंवातपित्तज्वरेहितं ॥ त्रिजातकादि ॥ खर्जूरपिप्पलीविश्वमरिचंचदुरालभा ॥ पत्रकंमक्षिकामेलाकर्षैःसहभक्षयेत् ॥ सितामधुयुतालेहंवातपित्तज्वरापहं ॥ खर्जूरादि ॥ कणालवंगत्रिफलाएलाक्षौद्रयुतालिहेत् ॥ वातपित्तज्वरहरोयोगोवैद्येनजानता ॥ कणादि ॥ एलापत्रत्वचोद्राक्षात्र्यूषणाश्चदुरालभा ॥ श्लक्ष्णचूर्णीकृतंचैवमधुनासहयोजयेत् ॥ वातपित्तज्वरहररक्तनिष्ठीवनंतथा ॥ पार्श्वशूलातिविस्तृष्णालेहमेतत्प्रशस्यते ॥ एलादि ॥ विडंगत्रिफलाश्यामाकृष्णात्वकचघनानुगा ॥ सूक्ष्मेलासमप्रक्तोयंसितातुल्यालिहे

न्मधुः॥ वात्तपित्तज्वरहरो विलयं यान्त्यसंशयः॥ विडंगादि॥ वासकं त्रिफला रास्ना दीर्घवृन्ता पुनर्नवा॥ बलाद्वेति सिता तुल्य मधुभिर्वात
पित्तजित्॥ वासादि॥ शृंगी वचतुरेभागास्तालीसकृष्णयासह॥ त्रिजातकतुल्यभागे वात्तपित्तगदापहं॥ शृंग्यादि॥ द्राक्षा लवंग
त्रिफला एला जाजी युता तथा॥ वात्तपित्त निहंत्याशु योगो वैद्येन ज्ञानता॥ स्वल्पद्राक्षादि॥ सूक्ष्मैलात्वचकट्फलं चमरिचं शृं
गी शठी केशरं पत्रं पुष्करमूलजीरकद्वयं शौंडी सविश्वौषधं॥ चूर्णोयाम धुनावलेह्य कफनं ह्न्यात्सपित्तानिलौ लेहोयं रचि
तेति माधवविषग्भे पूजनीयः सदा॥ सूक्ष्मैलादि॥ खर्जूरत्र्यूषणं द्राक्षा त्रिजातकविभीतकं॥ दुरालभामजाजी च पर्पटो
शीरकेशरं॥ श्यामा प्रियंगुतालीशं लवंगकारवी शिवा॥ जातीफलं वरांगं च वासकानि समायुतं॥ शर्करामधुनालेह्य पि
त्तानिलगदापहं॥ विषमज्वरेषु सर्वेषु सततंवतृतीयकं॥ तंडाकंठास्यशोषश्च हलीहश्वासारुचिवमिं॥ त्रिफलाद्राक्षादि
शांगः॥ ॥मुस्तपर्पटकं शुंठी गुडूची सदुरालभा॥ कफवातारुचिछर्दिदाहश्लेष्मज्वरापहं॥ मुस्तादि॥ शठी तुगा त्वगेला च
पुष्कराह्वाकलिरकं॥ जयंती कट्फलं पत्रं मांसी नीलोत्पलं कणा॥ मधुना सह लेहोयं वात्तश्लेष्मज्वरापहं॥ शृंग्यादि॥ ताली
शकेशरं तुगामरिचं त्रिजाती अक्षार्द्धमात्र धरणानि च कर्षशुंठ्या॥ अक्षार्द्धमात्रकृतपुष्करमूलशृंगी दद्यात्रिजातकयुतं॥ त्रिमि
माषकानां॥ क्षौद्रेणायुक्तमतिमान्भिषजप्रयोगात् हंति त्रयोदशगणाः कफवातजन्मा॥ तालीसादि त्रयोदशांगः॥ जातीफले

लाकटुकत्रयाणां द्वे जातियुक्ते सदुरालभानां ॥ वरांगकं क्षौद्रयुतं वलीढः प्रशांतये वातकफज्वरेषु जातिफलादि ॥ द्राक्षाभयामुस्तल
शुंठि मेला वरांगकं पत्रकपंच भागं ॥ शृंगी शठी विंदुसपुष्कराणां सपिप्पली वार्द्धिशिनाष्टभागाः ॥ प्रलापतंद्रागलतालुशोषैः श्वा
सान्विते वातकफज्वरेषु ॥ महाद्राक्षादि ॥ घनकृष्णाभयाशुंठीपुष्कराह्वा शठीसमा ॥ गुडसर्पिर्युतं ह्येषः पंचागोमधुभिः सह ॥
स्वल्पत्र्यूषणादि ॥ कटुत्रिकं चेन्द्रयवाकायस्थासकटुफलं पुष्करमूलमेतत् ॥ सर्वंशजानाचमाक्षिकानां कफानिलौ वर्जितमे
तदाशु ॥ कट्फलादि ॥ ॥ कट्फलं पुष्करं शृंगी मुस्तकं मरिचं शठी ॥ समैतानेकसंयुक्तं श्लक्ष्णचूर्णानि कारयेत् ॥ आर्द्रक
स्वरसेनैव लिहेत्कफनिवारणं ॥ शूलानिलाहविछर्दिकासश्वासक्षयापहः ॥ कट्फलादि ॥ तालीसपुष्करामूलं शठी शृंगी
तथैव च ॥ तुगात्रिजातकं कृष्णं मधुभिः कफवातहृत् ॥ श्वासकाशप्रशेकं च पार्श्वशूलहृदामयः ॥ उरोविवंधहिक्का च त्रिदोषशम
नं तथा ॥ तालीसादि ॥ तालीसपौष्करं कृष्णा चव्यशुंठीफलत्रयं ॥ कंटकायां शठी रास्ना चित्रकं ग्रंथिकं तथा ॥ तुगां शृंगी मरीचानां
चातुर्जातकसंयुतं ॥ एषावलेहमधुना वातश्लेष्मज्वरापहं ॥ श्वासं हिक्कां तथा तंद्रा मुखशोषत्रिदोषजे ॥ कनेष्ठतालीसादि ॥ ॥
तालीसमरीचाजाजीशृंगीत्रिजातकस्तथा ॥ नागरं पौष्कराह्वा च क्षौद्रेणासहलेहयेत् ॥ निहंति दारुणां दोषवातश्लेष्मज्वरापहं ॥
॥ दशांगतालीसादि ॥ शुंठी कर्कटकप्रकंच्यमरिचाशोठी तथा पौष्करं श्रूवीकंटसकट्फलं च मधुना श्लेष्मानिलार्त्तज्वरान् ॥ हिक्का

॥ सात्मद ॥
॥ ३१ ॥

वामयसन्निपातगलरुक्श्वासेषुकाशेषुबहुन्याहासनिदाघ्नैवत्वरितंवाष्टांगलेहोत्तमः ॥ अष्टांगः ॥ पलमेकाभयाकृष्णालवंगत्रु
टिवंशजा ॥ शृंग्यजाजीसमरिचंप्रत्येकचार्द्धकर्षितं गुडंचाष्टगुणादेयाघ्नतेनकफवातजित् ॥ अभयादि ॥ धान्यनागरभल्लंवता
लीसंत्रिफलातथा ॥ कणामधुयुतंशुंठीबृहतीकंटकारिका ॥ पुष्करंचसमायुक्तंसप्तांगंमधुनासह ॥ वातश्लेष्महरोलेहइत्येष
गणउच्यते ॥ रास्नासप्तांगः ॥ पुष्करेन्द्रयवाकृष्णाशुंठीमरिचवल्कलं ॥ सूक्ष्मेलात्वक्तुगाक्षीरीमाक्षिकेनतुलेहयेत् ॥ वातश्लेष्मवि
नाशायअष्टांगानिविधीयते ॥ पौष्करादिअष्टांगः ॥ ॥ शृंगीभार्गीतुगाकृष्णाकट्फलंपुष्कराह्वयं ॥ षडंगमधुनामिश्रंकफा
निलगदापहं ॥ शृंग्यादिषडंगः ॥ ॥ विश्वैलातिवलातुगाकृष्णावमाक्षिकोद्भवं ॥ लीढानिवारयत्याशुवातश्लेष्मनिषूदनं
॥ विल्वादि ॥ ॥ त्रायंतीकटुकामुस्ताचं-दनोशीरशारिवा ॥ पटोलपत्रंमधुकंपद्मकंवासमवितं ॥ तत्पक्कंमधुनापेयंकफपित्तभवे
ज्वरे ॥ बृहच्चित्रकादि ॥ ॥ अरुणाघनविडंगंपुष्करंयासकृष्णामागधभवत्रिजातंचूर्णंक्षौद्रावलीढं ॥ हरतिचकफपित्तंश्रेष्ठले
होदशांगःश्वसनकसनहिक्कासन्निपातोद्भवोपि ॥ अरुणादिदशांगः ॥ फलत्रयंलवंगैलावरांगश्चूर्णितंमधुः ॥ पित्तश्लेष्मज्वरा
र्तानांषडंगादीनिप्रशस्यते ॥ त्रिफलादिषडंगः ॥ कृष्णामात्रिजातकंमुस्तंविडंगानिविषासमा ॥ पिप्पलीपुष्कराह्वाचदुरालभापुनाम
धुः ॥ दशांगानिप्रशस्तानिकफपित्तनिषूदनं ॥ कृष्णादिदशांगः ॥ दुरालभाकणाशृंगीघनकृष्णामांतथैवच ॥ पुष्कराह्वत्रिजातंच

॥ राम ॥
॥ ३१ ॥

सितातुल्यसमाक्षिकं ॥ पित्तश्लेष्मविकाराणां ज्वरितानां दशांगिकं ॥ दुरालभादिदशांगः ॥ शतावरी त्रुटी वासा त्वच सर्वसमं सिता ॥ मधुना शमयेल्लेहं पित्तश्लेष्मज्वरापहं ॥ शतावर्यादि ॥ त्वगेलापत्रकं कृष्णाकुलीरकट्फलं मधु ॥ पुष्कराह्वा त्रिजातं च पित्तश्लेष्मज्वरं जयेत् ॥ त्वगेलादिदशांगः ॥ वासाधात्रीकणापथ्याकायस्था च दुरालभा ॥ कृष्णाजाजीलवंगादि पुष्करं चोषणं मधु ॥ शृंगी समस्तचूर्णानि पित्तश्लेष्म निहंति च ॥ विषमज्वरेषु गुल्मेषु दशांगानि प्रशस्यते ॥ वासादिदशांगः ॥ द्राक्षाफलत्रिकाकोषं भार्गी यासत्रिजातकः ॥ पौष्करा त्रिवृता शृंगी सैंधवं क्षौद्रसंयुतं ॥ विड्विबंधनिहंत्याशु पित्तश्लेष्मप्रशाम्यति ॥ द्राक्षादिदशांगः ॥ त्रिफलाकटुकादार्वीदुरालभामृताघना ॥ त्रिवृतापिप्पलीश्यामासंयावक्षारसैंधवं ॥ आध्मानानाहविष्टंभभेदीदीपनपाचनं ॥ त्रिफलादि ॥ ॥ द्राक्षाफलत्रयकटुत्रयकंटकारीसपुष्करत्रिजातकसिंधुजन्मः ॥ शृंगीसक्षौद्रमतिमान्लिहताच्चतुल्याविट्भेदपित्तकफमाशुनिमूलयंति ॥ द्राक्षादिपंचदशांगः ॥ ॥ द्राक्षाफलत्रिकामुस्ताश्यामाकुस्तावरांगिकैः ॥ सूक्ष्मैलादलसंचूर्णं शर्करसमधुनासह ॥ श्लेष्मपित्तविकाराणां ज्वरं चाशुनिसूदन ॥ द्राक्षादि ॥ नृगाकृष्णात्रुटिद्राक्षासितावल्कलसंयुतं ॥ श्लैष्मिकं पैत्तिकं ताभ्यां चातुर्भद्रप्रकीर्तितं ॥ चातुर्भद्र ॥ द्राक्षाकणापुष्करशृंगिपथ्यादुरालभावाजिनपिप्पलीनां ॥ क्षौद्रेणलेह ससिताईभागानिहंतिपित्तकफज्वरं च ॥ द्राक्षाद्यष्टांग ॥ लोचनं पिप्पलीमेलाकट्फलं समचूर्णितं ॥ शर्करामधुनालेहः पित्तश्लेष्मज्वरापहं

॥ लोचनादि ॥ कटुत्रयत्वचद्राक्षालोचनंजातियासत्रुटिसहघननागः शर्कराक्षौद्रलीढं ॥ हरन्ति च कफपित्तं श्वासकाशंहरं च ॥
कटुत्रयादि ॥ त्रिकटुकघनवासाकेशरंजातियासंफलत्रयसविडंगंसागराजातिमेला ॥ हिमदलसममसीनं क्षौद्रयुक्तेन लीढं ह-
रति च कफपित्तंकाशहिक्कान्तकारी ॥ त्रिकट्वादिषोडशांगः ॥ त्रिफलात्रिवृतनाशूपामापटोलं धान्यकेशरं ॥ साजाजीपर्पटंमुस्त-
लवंगंचत्रिजातकं ॥ रक्तपित्तज्वरछर्दिहिक्कामूर्छामदभ्रमः ॥ शीतांबुना भवेत्पीतज्वरः पित्तकफामके ॥ अभयादि ॥ ह्रीवेरं
धान्यकं मुस्तं बृहती नागरं तथा ॥ पित्तश्लेष्मज्वरे पेयं तद्धियानकं शुभं ॥ ह्रीवेरादिपंचांगः ॥ त्रिवृतापिप्पलीशुण्ठामालवंगंमा-
लतीफलं ॥ अजाजीद्वयमुस्तैलाकेशरं त्रिफलानि च ॥ वासानिशासमायुक्तं शर्करामधुनालिहेत् ॥ पित्तश्लेष्मज्वरछर्दिभ्र-
ममूर्छातृषारुचिः ॥ त्वग्नेत्रनखहारिद्रंरक्तपित्तविनाशनं ॥ त्रिवृतादि ॥ मुस्तामृताफलत्रिकागजकेशरायावासाकणामधु-
कधान्यकलोध्रशुण्ठामा ॥ वंशोद्भवाभंगडादिच्यत्रुटिसोशीरसितामधुयुतासहभक्षणांच ॥ सर्वाणिपित्तकफनाशनकामलं च
जीर्णज्वरे पुनियतं सततंप्रयोज्यंतत् ॥ मुस्तापर्पटाद्द्व्यांगः ॥ मुस्तपर्पटसंयुक्तमथवासदुरालभा ॥ पेयंपिवेतरेव्याधौकोहं
सर्वप्रशस्यते ॥ त्रिफलापिप्पलीशुण्ठाकेशरं शर्करात्रिवृत् ॥ केरातनिक्तकंपंठावलाकटुकरोहिणी ॥ मधुकंपिप्पलीमूल
मुस्ताद्योगराडुच्यते ॥ संशोधनंप्रशमनंत्रिदोषघ्नोग्निदीपनं ॥ अष्टादशांगमुद्दिष्टमेषसर्वज्वरापहं ॥ पित्तोत्तरेसंनिपातेहि

तं चोक्तं मनीषिभिः॥ मंन्यास्तंभेउरोघाते उरोपार्श्वशिरोग्रहं॥ मुस्ताद्यमृतादशांगः॥ चंदनं मधुकं द्राक्षा उशीरं मुस्तकं तृषं॥ आरग्वधं शृंगवेरं पिप्पलीचासितं तथा॥ मधुनासहलेह्योयं पित्तास्रकफवातहा॥ चंदनादि॥ सागरोभीमनीलांगहिमजोमालतीसुतं॥ हस्तीफलञ्चचोचं सारोचनं गोस्तनातथा॥ मांसीकिंजल्कतोयानां समस्तसमशर्करालवंग१ कर्पूर२ कृष्णागरु३ नालीसपत्र४ जातीफल५ सूक्ष्मैला६ त्वक्७ उशीर८ वंशरोचन९ द्राक्षा१० जटामांसी११ पद्मकेशर१२ वालक१३ मुस्ता१४ समभागचूर्णीकृत्य तत्सर्वसमं सितायोज्या॥ रक्तपित्तहरं चैव पित्तश्लेष्महरं परं॥ कासश्वासनिहरं तृष्णादाहसमन्वितः॥ हृच्छूलं पार्श्वशूलं च विषमज्वरनाशनं॥ चतुर्दशांगलवंगादि॥ ॥ कर्पूरद्राक्षासूक्ष्मैलामधुनातुसमंलिहेत्॥ ज्वरतृष्णानिहंत्याशु हिक्काश्वासगलग्रहान्॥ कर्पूरादि॥ उत्पलंमधुकंद्राक्षा धात्रीमुस्ताप्रियंगुका॥ एलाकृष्णातुगाभृंगशृंगीनालीसपत्रकेः॥ सितामधुयुतोलेहं पित्तश्लेष्मज्वरापहं॥ भ्रममूर्छाश्रमछर्दिरक्तष्ठीविप्रलापकः॥ उत्पलादि चतुर्दशांगः॥ द्राक्षाविभीतकीमुस्तं धात्रीपर्पटकं शिवा॥ सूक्ष्मैलामागधीशृंगी अजाजीकारवीजलं॥ नालीसपत्रं त्वकपत्रं धान्याकं नागकेशरं॥ वासामधुकसारारिगा उशीरं चंदनं तथा॥ शर्करामधुनालेहात् क्षयेत्यातरुत्थितः॥ द्राक्षादिकमिदं नाम्ना सन्निपातज्वरापहं॥ वातपित्तकफेदोषे रक्तपित्ते विशेषतः॥ हिक्काश्वासं तथा छर्दि तृष्णामूर्छामदभ्रमाः॥ भूतोन्मादावेषं हंति तमि

न्यासहरं परं ॥ तृतीयद्राक्षादि ॥ ॥ उशीरं धान्यकं मुस्तं शारिवावालपर्पटं ॥ मधुकं चंदनं पद्मं लोध्रं काश्मर्य वासकं ॥ कर्पूरं गोस्तनीया
सनीलोत्पलसकेशरं ॥ प्रियंगुत्रुटिपटोलं पद्मकेशरं रोहिणी ॥ समस्तान्तुल्यभागानि शर्करामधुना लिहेत् ॥ प्रलापभ्रममूर्छा च छ
र्दि हिक्का तृषापहं ॥ पित्तोत्तरे सन्निपाते हितं सोपद्रवेषु च ॥ उशीरादि ॥ ॥ उशीरं धान्यकं मुस्तं त्रिफला वालपर्पटं ॥ मधुकं चं
दनं पद्मं द्राक्षा कर्पूर वासकं ॥ शृंगाटत्वग्लवंगैलाकृष्णामासूक्ष्मैलकेशरं ॥ शर्करामधुनालेह्यो निहंति विषमज्वरं ॥ पित्तश्लेष्मज्व
रश्वासरक्तपित्तज्वरापहं ॥ संनिपातज्वरं हिक्कावाह्यज्वरविनाशनं ॥ प्रलापभ्रममूर्छा च त्रिछर्दितृष्णामरोचकं ॥ भूतोन्मादाति
सारे च ग्रहपीडानिवारणं ॥ बृहदुशीरादि ॥ हिमोत्पलाचंदनतालिकोशउशीरनागेश्वरमल्लजाती ॥ त्रिजातककुंकुमवंशक्षी
री कृष्णागुरुसूत्पलपद्ममांसी ॥ उदीच्यकिंजल्ककरागासविल्वद्राक्षामधूकसमचूर्णितानि ॥ सशर्करं क्षौद्रयुतं वलेह्यं त्रिदोषपि
त्तं सकफं निहन्यात् ॥ हिमोत्पलादि ॥ ॥ पटोलोशीरधान्याकं ह्रीवेरं मुस्तकेशरं ॥ ग्रन्थ्याम्लवेतहिमजः सशिंविडुसवासकं ॥ म
धीकाचोत्पलेयासं संचूर्णं मधुना लिहेत् ॥ सन्निपातज्वरहरं त्रयोदशांग सश्रुयते ॥ त्रयोदशांगः ॥ ॥ लवंगकं कोल्लमुशीर
वेदनं नतं सपद्मोत्पलपत्रजीरकं कृष्णागुरुं शृंगत्रुटि हिकेशरं करागासविल्वनलदं सहांबुना ॥ कर्पूरजातीकलवंसरोचनं
सिताष्टभागं समसूक्ष्मचूर्णितं ॥ सुरोचनं पाचनमग्निदीपनं वलप्रदं वृष्यत्रिदोषनुत्परं ॥ उरोविवंधं हृदयं गलग्रहं सश्वास

हिक्काज्वरयक्ष्मपीनसं ॥ ग्रहरापतीसारगलग्रहार्श्वदं निहंति गुल्मक्षयजं सकाशं ॥ घृतेन भुंज्यात्कुटिकाप्रकुर्वन्नासलेहकुर्या
न्मधुनाप्रयुक्तं ॥ ज्येष्ठलवंगादि ॥ ॥ त्रिफलारोहिणीनिंवपटोलकटुकत्रयं ॥ पाठागुडूचीवेतागुंसप्तपर्णासवत्सकं ॥ कि
राततिक्तकं मुस्तं वचाशृंगीशठीसमा ॥ कफोत्तरे निहंत्येते पानादग्निं च दीपनं ॥ त्रिफलादि ॥ लवंगश्चंद्रकर्पूरमेलात्वक्प
त्रकेशरं ॥ जातीफलमुशीरं च नागरं कृष्णजीरकं ॥ कृष्णागुरुस्तुगाक्षीरीमांसीनीलोत्पलंकराग ॥ चंदनं तगरं बालकं कोलं
वेति चूर्णयेत् ॥ समभागानि सर्वाणि सर्वेभ्योर्द्धा सिताभवेत् ॥ लवंगादिमिदं चूर्णं राजार्हं वह्निदीपनं ॥ रोचनं तर्पणं वृष्यं
त्रिदोषघ्नं वलप्रदं ॥ हृद्रासकंठरोगाश्च कासं हिक्कां वपीनसं ॥ यक्ष्माणं तमकं श्वासमतीसारमुताक्षतं ॥ प्रमेहारुचिगुल्मा
दीन् ग्रहणीमपि नाशयेत् ॥ महालवंगादि ॥ ॥ कट्फलं पुष्करं शृंगी व्योषानंतावकारवी ॥ सूक्ष्मचूर्णीकृतं चैवमधुना
सहलेहयेत् ॥ एषावलेहिकांहंति संनिपातं सुदारुणं ॥ हिक्काश्वासं च कासं च कराठरोगं नियच्छति ॥ भक्षयेदेतदं हृतांगमार्द्र
कस्वरसेन वा ॥ प्रमोहदारुणांतंद्रांतंडीकाशसमन्वितं ॥ ॥ अह्लेम ॥ एलामुस्तकराणाड्डाक्षात्वचनागविभीतकी ॥ शुंठीपुष्कर
नालीसंविडंगंधवयासकं ॥ शर्करामधुनायुक्तं वातपित्ताधिके ज्वरं ॥ सन्निपातनिहंत्याशु कासहिक्कातृषापहं ॥ एलादि
॥ कलिंगपाठागजपिप्पलीनासनागरं व्याघ्रीद्वयं च चूर्णं ॥ सितासमं माक्षिकसंप्रयुक्तं निहंति पित्तानिलश्लेष्मकं च ॥ ॥

कलिंगादि ॥ चंदनोशीरतालीशंह्रीवेरोत्पलचंदनं ॥ भागवृद्धिकणा चव्यकोलंग्रंथिकनागरं ॥ त्वक्‌पत्रैलाकेशरंचप्राग्भागात्त्वेवसं
स्थितं ॥ चूर्णीकृते सिता देया मरीचे पि चतुर्गुणा ॥ सर्वातंकप्रशांत्यर्थं चूर्णमेतत्प्रयोजयेत् ॥ दीपनं पित्तशमनं बल्यं पुष्टिकरं शुभं
॥ धातुगतं शक्रबलं जड़जिह्वाप्रबोधनं ॥ मध्यमचंदनादि ॥ ॥ लवंगह्रीत्रुटिवंशक्षीरिफलत्रयं मुस्तककणासबिल्वं ॥ जा
तीफलं चंदननागशुंठी मांसी सकुष्टागुरुभृंगपत्रं ॥ सशर्करं क्षौद्रयुतं च लेह्यं समसंनिपाताधिकवातपित्ते ॥ सश्वासमूर्छा हृ
दयग्रहं च जिह्वागतं दोषनिहंति माश्रु ॥ लवंगादि ॥ ॥ गुडूचीबृहतीभार्गीकृष्णानागरयासकं कारवीपोष्करामूलं त्रिसुगं
धिकट्फलं ॥ त्रयोदशांगिकं नाम कीर्तितो हितकारिणी ॥ समचूर्णं मधुनालेहं वातश्लेष्मसु दारुणां ॥ काशःश्वासस्तथाहि
क्का ज्वरसर्वनिवर्त्तनं ॥ गुडूच्यादित्रयोदशांग: ॥ लवंगकर्पूरतमालपत्रं रास्नाउशीरं नतपुष्कराणि ॥ सकेशरं चित्रकमुस्तके
लाफलत्रयं जातिफलं तुगाभि ॥ उडथियं लोहितचंदनानि विश्वोपकुल्या समवैयुतानि ॥ सिताष्टभागं मधुसर्पिलेहं संयोज
येत्तदपि दोषयुतांतकाले ॥ लवंगादि ॥ त्वक्‌पत्रंचैव सूक्ष्मेला नागकेशरमेव च ॥ पिप्पलीमधुकं शुंठीकारवीचदुरालभा ॥ क
ट्‌फलं पुष्करं शृंगी समभागानि चूर्णयेत् ॥ संनिपाते त्रिदोषे च काशे श्वासे गलग्रहे ॥ कण्ठरोगे च हिक्कायां मधुना द्वादशांग
कं ॥ द्वादशांग ॥ पुष्कराह्वाशटीव्योषं त्रायमाणादुरालभा ॥ कटुकं कट्फलं शृंगी वचा भार्गी समंगणां ॥ सूक्ष्मचूर्णीकृतं सर्वं लि

हे त्काशविनाशनं ॥ श्वासहिक्काहरं तंद्रासन्निपातज्वरापहं ॥ द्वादशांगः ॥ त्वगेलापिप्पलीशृंगीकंटकारिदुरालभा ॥ कट्फलत्वकारवी
मुस्तं तालीशं वंशरोचनं ॥ केशरं मधुनालेह द्वादशांगमिदं शुभं ॥ त्रिदोषसन्निपातेषु श्वासेकाशंविनाशनं ॥ ह्रस्वद्वादशांगः ॥ कट्फलं
पुष्करं शृंगी व्योषानंताचकारवी ॥ मुस्तं तालीसत्वकपत्रं सूक्ष्मैलानागकेशरं ॥ एतानि श्लक्ष्णचूर्णानि मधुना सह लेहयेत् ॥ त्रिदोषसं
निपातेषु पार्श्वहृद्बस्तिशूलिषु ॥ काशश्वासज्वरे घोरे हिक्काछर्दिनिवारणं ॥ चतुर्दशांगमिदं योगं वाग्भटेन वयोजितं ॥ चतुर्दशांगः ॥
लवंगत्रिफलाव्योषरास्नाशृंगीतपुष्करं ॥ त्वक्क्षीरागरुकर्पूरकुंकुमेलात्रिजातके ॥ मृगनाभिकिरातं च चंदनं नागकेशरं ॥ समचूर्णमि
दं लेह शर्करामधुसर्पिषा ॥ त्रिदोषश्वासकाशाक्षीछर्दिहिक्कामरोचकं ॥ अपस्मारविषोन्मादग्रहणीशिरशूलजित् ॥ बृहल्लवंगादि
॥ ॥ लवंगत्रिफलाव्योषजातीकोशप्रसारणी ॥ चित्रकातिविषाव्योनाकुलीमुशलीजया ॥ ग्रंथिकं प्रपुन्नाराणि चातुर्जातसिताष्टकं
॥ मधुना लेहये चूर्णं भक्षये प्रातरुत्थितः ॥ वातश्लेष्माधिके दोषे श्वासेकाशेअरोचके ॥ शिरःशूले सन्निपाते दाहतृष्णाविनाशनं ॥
ह्रस्वलवंगादि ॥ शठीपोष्करपिप्पल्याबृहतीकंटकारिका ॥ शुंठीकर्कटकाभार्गीदुरालंभायवानिका ॥ शूलानां हिविवंधघ्नशठ्यादिः क
फवातनुत् ॥ शठ्यादि ॥ लवंगकक्कोलमुशीरचंदनं तुगाचतुर्जातकव्योषमुत्पलं ॥ त्रिजीरकृष्णागरुपद्मकेशरं नतंसबिल्वं नलदं स
हांवुना ॥ कर्पूरजातीफलभृंगराज्ञीसिताष्टभागंकृतश्लक्ष्णचूर्णितं सुरोचनं पाचनमग्निवर्द्धनं बलप्रदं वृष्यत्रिदोषनुत्परं ॥ उरो

॥ सात्म्यद ॥ विबंधं हृद्यंगलग्रहं स्वासहिक्काज्वरयक्ष्मपीनसं ॥ ग्रहण्यतीसारगलग्रहार्शोदं निहंति गुल्मानिषमाश्चकामिनि ॥ घृतेन भुंजेगुटिका
॥ ३५ ॥ प्रकुर्वता सलेहकुर्यान्मधुना प्रयोज्यते ॥ ज्येष्ठलवंगादि ॥ ॥ लवंगजातीफलनागकेशरं नतं समांसी घनं वंशक्षीरिणी ॥ उदी
च्यतालीशयमानिपोष्करं वकुलामतीक्षां हरिवालुकं च ॥ सिताष्टभागं कृतसूक्ष्मचूर्णितं लेहं वकुर्यामधुना प्रकल्पये ॥ त्रिदोषहंता
रुचिकाशपीनसं त्स्वासहिध्माहृद्यंगलग्रहं ॥ मूर्छाप्रलापो भ्रमदाहवेपथुविसर्पगुल्मोदरमग्निवर्द्धनं ॥ प्राणात्ययेरक्तदतीदि
व्यमौषधं प्राप्तेतियक्ष्मा क्षयफलप्रदं शुभं ॥ स्वात्मात्मभवं प्रणशारीरनिश्चितं तथानिदग्धोनिमिर्वचोयथा ॥ मोक्षार्थलवंगादि लवंग
पुष्करं शृंगी जातीफलशतावरी ॥ मागध्यगुरुकृष्णाववर्षाभूरक्तचंदनं ॥ नागकेशरपत्रैलाशर्कराष्टसमं मधु ॥ आतुरं कफपित्ता
नां संनिपातज्वरापहं ॥ लवंगादि ॥ मूर्वावनीलोत्पलकेशरं च पाठासकृष्णा मधुयष्टिका च ॥ द्राक्षासमं जिष्ठुपिशारिवा च फलत्रि ॥ रामः ॥
कं च कुसुमानि तानि ॥ सशर्करं क्षौद्रयुतं पिबेन्नतः सर्वज्वरं हंति समं तदाहं ॥ मूर्वादि ॥ लवंगत्र्यूषणं यष्टिपुष्करं गंधनाकुली ॥ वा ॥ ३५ ॥
कुर्जीताजमोदा च त्रिफला त्रिविषासमं ॥ शर्करामधुनालेहं भक्षये त्प्रातरुत्थितः ॥ काशस्वासारुचित्तृष्णाहृन्याडिक्काप्रकंपनं ॥
त्रिदोषानिप्रलापानि ज्वरातीसाररक्तनुत् ॥ लवंगादि ॥ द्राक्षासभृंगीसहवंशक्षीरीसकेशरं केशरीपत्रकैला ॥ सनागरं चैव वकुला
लभा च सपिप्पलीपुष्करवल्कलं च ॥ सशर्करं क्षौद्रयुता वलीरुगात्रिदोषकोपप्रभवेपि सस्तं ॥ द्राक्षादि ॥ द्राक्षात्रुटिकृष्णाभृंगनीला

त्वल्लकणासिता ॥ भागोत्तरं लेहमिदं तृषागुल्मत्रिदोषहा ॥ द्राक्षादि ॥ द्राक्षागुडकरं शृंगी वल्लवंगं कटुकत्रयं ॥ त्रिफला मधुना लेहो
हंति दोषत्रयं ध्रुवं ॥ द्राक्षादि ॥ द्राक्षाह्विवेदनं घनं तु पटोलयामो धान्योत्पलं हि मदृषोशीरपर्पटानि ॥ एषा वलेह मधुना सह श
र्कराभिः हन्यात्रिदोषज्वरितं सयथाकृतांतः ॥ द्राक्षादि ॥ द्राक्षापत्रकवालपर्पटकणाशृंगी करीकेशरं सूक्ष्मैलात्वचधान्यिरक्षस
भयाचूर्णीकृतं पुष्करं ॥ क्षौद्रं सांतिविषाद्रुरालभसमं लेहं प्रकुर्यात्सदाशस्यं तेकफवातपित्तसरुजे हन्यात्कृतांतो यथा ॥ द्राक्षा
दि ॥ द्राक्षात्रिजातकं चैव तालीसं वंसरोचनं ॥ त्र्यूषणं च दुरालभं समभागानि कारयेत् ॥ शर्करामधुनालेहं वातपित्तकफांतकः
॥ दाहहृच्छ्वासमतृविंछर्दितृष्णासमन्वितं ॥ एकाहिकं द्व्याहिकं च तृतीयकचतुर्थकं ॥ विषमज्वरेषु सर्वेषु नास्ति तस्यौषधं प
रं ॥ द्राक्षादि ॥ द्राक्षाभयाकणाशृंगी कायस्याग्रहरुत्पलः ॥ मधुना सह लेहेन सन्निपाते त्रिदोषजे ॥ मूर्छाप्रलापतंद्राचहिक्का
गृहगलग्रहा ॥ भूतोन्मादमभिन्यासगुल्माहृविप्रशाम्यति ॥ द्राक्षादि ॥ द्राक्षानुगालवंगेलाहिमांबुभंगपुत्पलं ॥ जातीफलं घनं
मांसिवेदनं शीरकेशरं ॥ शर्करातुल्य – भानि चूर्णं क्षौद्रेणयोजितं ॥ एषा वलेहिका श्रेष्ठं हंति दोषत्रयज्वरं ॥ द्राक्षादि ॥ कटुत्रयं
भद्राक्षाशृंगी चैव दुरालभा ॥ तुगाजातीद्वयं चूर्णं सूक्ष्मैलागजकेशरं ॥ कट्फलं चेति वर्गोयं मधुना च त्रिदोषजित् ॥ वासादि ॥ पथ्या
दुरालभाकृष्णाशृंगी द्राक्षा समाक्षिकं ॥ त्रिदोषनाशयेन्याप्रश्वासकाशादिकं क्षणात् ॥ पथ्यादि ॥ कट्फलं पिप्पली शृंगी कंटकारी दु

॥ सात्मद· ॥
॥ ३६ ॥

डुरालभा ॥ त्वगेलाकारवीमुस्तंनातालीशंवंशरोचनं ॥ केशरंमधुनालेहद्दशांगमिदंशुभं ॥ त्रिदोषसन्निपाते च श्वासहिक्कावि
नाशनं ॥ कट्फलादिदशांगः ॥ व्योषकट्फलकानंनापुष्करामूलकारवी ॥ त्रिसुगंधिश्च तालीसंशृंगीमुस्तकरोचनं ॥ पंचदशांगि
कंनाममधुनासहलेहयेत् ॥ त्रिदोषसन्निपाते च पार्श्वशूलंसुदारुणं ॥ वातश्लेष्मज्वरंकाशंहिक्काश्वासमरोचकं ॥ पंचदशांगः ॥
शृंगीकट्फलतालीसंकृष्णामरिचनागरं ॥ कृष्णाजाजीडुरालंभाशठीमुस्तहरीतकी ॥ चातुर्जातकभार्गी च मधुनासहलेहये
त् ॥ षोदशांगिकनामेदंवातश्लेष्मज्वरापहं ॥ त्रिदोषसन्निपाते च काशेश्वासेगलामये ॥ हिक्कार्त्ते डाडरे ध्याने प्रतिश्यायनिवारये
त् ॥ षोडशांगः ॥ ॥ श्यामामहौषधंकृष्णामुस्तातालीसयाछ्रिका ॥ कारवीकट्फलंभार्गीशठीनीलोत्पलानि च ॥ चातुर्जातेन
गाक्षीरीसंचूर्णंमधुनासह ॥ सप्तादशांगिकंनामवातश्लेष्मसुदारुणे ॥ काशश्वासज्वरंहरंत्रिदोषसन्निपातकं ॥ श्यामादिसप्त
दशांगः ॥ ॥ त्वक्पत्रकं च सूक्ष्मेलाकेशरंवंशरोचनं ॥ पाठाशृंगीतालिसभार्गीपुष्करमूलकं ॥ डुरालंभाकृष्णजाजीकर्कटाख्या
सकट्फलं ॥ बृहतीनबृताश्चैव समभागानि कारयेत् ॥ चूर्णितंमधुनालेहंवातश्लेष्माज्वरापहं ॥ त्रिदोषसंनिपाते च काशेश्वा
सेसुदारुणे ॥ अष्टादशांगकंनाममुनिनाभाषितंपुरा ॥ त्वगाद्यष्टादशांगः ॥ ॥ स्थिराद्यवृष्टिपर्णी च देवदारुसनागरं ॥ हरीत
कीकणाधात्रीसूक्ष्मेलाकृष्णजीरकं ॥ वासाद्वयमजाजी च समभागानि चूर्णयेत् ॥ शर्कराद्वयुक्तेनमधुनासहलेहयेत् ॥ विरोत्थि

॥ राम: ॥
॥ ३६ ॥

तं महाघोरं चातुर्थकनिवारणं ॥ स्थिरादि ॥ निंबछदं दशपलं भूषणं च पलत्रयं ॥ त्रिफला त्रिपला योज्या पलं त्रिलवणं भवेत् ॥ क्षारद्वयं
द्विपलं चवानीपलपंचकं ॥ सर्वमेकत्र संचूर्ण्य प्रातः शीतज्वरेणाव ॥ एकाहिकं द्याहिकं च त्र्याहिकं च चतुर्थकं ॥ विषमं च त्रिदोषं ज्वरं
हन्यान्न संशयः ॥ निंबादि ॥ त्रिफला कटुका दार्वी गुडूची भद्रमुस्तकं ॥ सैंधवैः सह लेहोयं विषमज्वरनाशनं ॥ त्रिफलादि ॥ ॥
चंदनोशीरधान्याब्द गुडूची विश्वशर्करामधुना सह लेहोयं निहन्याद्विषमज्वरं ॥ चंदनादि ॥ क्षोद्राभया वा गुडजीरकानि चूर्णी
कृतं वा गुडपिप्पली वा ॥ वातज्वरं नेष्ठ च मंदवह्नौ प्रयुज्यतेयं विषमज्वरेषु ॥ क्षौद्रादि ॥ दुरालभामृताद्राक्षाकटुकाबृहतीद्वयं
॥ त्रिफलावासकं दार्वी सैंधवं भद्रमुस्तकं ॥ चूर्णितं श्लेष्मपित्तानि निहंति विषमज्वरान् ॥ दुरालभादि ॥ ॥ तालीसं च तुगाक्षी
री चंदनद्वयसंयुतं ॥ सूक्ष्मैलाद्विगुणा चैव त्वगेकगुणा उच्यते ॥ श्वेतचंदनकर्षैकं कंपके विषमज्वरे ॥ तालीसादि ॥ ॥ वासाजी
समयाजातीलवंगत्रुटिकां रवा ॥ सितामधुसमायुक्तं हन्यादेकाहिकं ज्वरं ॥ वासादि ॥ त्वचद्राक्षात्रुटिशुभाउत्पलं च कणा सिता ॥
भागोत्तरमिदं लेहो विषमज्वरनाशनं ॥ त्वचादि ॥ ॥ शारिवामलकं मुस्तं चंदनं मधुयष्टिका शारिवोशीरकाश्मर्यमधुकं चंदनो
त्पलं ॥ शर्करामधुना लेहो विषमज्वरनाशनं ॥ वातपित्तज्वरं दाहं तृष्णां वैच नियच्छति ॥ शारिवादि ॥ शारिवामलकं चैव मुशीरं मुस्त
कं च वा ॥ कफपित्तापहं लेहं विषमज्वरनाशनं ॥ शारिवादि ॥ विभीतकहरीतक्यो सिंदुवारं सुचूर्णितं ॥ लेहोयं मधुना युक्तं विषमज्व

रशांतये ॥ विमीनक्वादि ॥ ॥ वासाजाजीछिजीराशिलवंगत्रिफलाकणा ॥ सूक्ष्मेलाशर्करामाध्वी लेहयेद्विषमज्वरे ॥ त्रिदोषान्नाशयत्या
शुदर्शांगंचापिकेशरी ॥ वासादिदर्शांगः ॥ शृंगीत्रिजातकंकृष्णातालीसंजाजिमाध्वी ॥ श्लेष्मगुल्महरं क्षिप्रंविषमज्वरनाशनं ॥ शृं
ग्यादि ॥ त्रिफलावासकंकृष्णासमभागीकृतंमधु ॥ पैत्तिकज्वरनश्यंति विषमज्वरनाशनं ॥ त्रिफलादि ॥ ॥ वासकश्चसमरिचंत्व
गेलपिप्पलीसमं ॥ जातीफलसमायुक्तं शर्करामधुनासह ॥ वातपित्ताधिकानांच तृतीयकचतुर्थके ॥ विषमज्वरहंत्येव क्षणाद्भव
तिविज्वरः ॥ वासादिषडंगः ॥ त्रायंती चैवसाजाजीपद्मकं नागकेशरं ॥ शीतांबुशर्करायुक्तं सततज्वरशांतये ॥ त्रायंत्यादि ॥ ॥
शिवाचमलकीशुंठीवासकंत्रिगुणंभवेत् ॥ शर्करामधुनालेहोवमनंविषमज्वरे ॥ शिवादि ॥ पटोलत्रिफलावासारक्तचंदनमेव
च ॥ लेहोमधुसितायुक्तोविषमज्वरनाशनः ॥ पटोलादि ॥ त्रिफलापिप्पलीमुस्तमजाजीनागकेशरं ॥ लवंगयुवतीजातीसूक्ष्मे
लावासकंसमं ॥ शर्करामधुनालेहोविषमज्वरनाशनं ॥ त्रिफलादि ॥ वासाविडंगाधकणासजातीतालीसशुंठीत्रिफलादिक
र्षी ॥ जातीफलेकारवीनागविल्वंवालंलवंगंमरिचंसकर्षं ॥ त्वक्ः पलांशर्करयापियुक्तं क्षौद्रेर्युतंप्रातलिहेवभक्ष ॥ चतुर्थकेवा
विषमज्वरेवाहन्यात्त्रिदोषानपिसर्वकृच्छ्रान् ॥ वासाद्यष्टादशांगः ॥ ॥ वासाफलत्रिकाजातीसूक्ष्मेलाजीरकद्वयं ॥ लवंगकेशरंश्या
मापिप्पलीमूलपत्रकैः ॥ ह्रीवेरंरोचनंविल्वंमरिचंविश्वभेषजं ॥ विडंगंभंगतालीसंसिताक्षौद्रेणलेहयेत् ॥ बृहद्वासादिकोह्येषवातपित्त

कफापहं ॥ तृष्णादाहभ्रमछर्द्दिमूर्छार्त्तविहृदामयान् ॥ काशश्वासशिरःशूलहृत्पार्श्वप्लीहरोगजित् ॥ एकाहिकं द्व्याहिकं च तृतीयक
चतुर्थकौ ॥ विषमज्वरेषु सर्वेषु नास्ति तस्मौषधंपरं ॥ बृहद्वासादि ॥ वासामहौषधंशृंगीत्रिफलामुस्तजीरक ॥ वंशजाधान्यकंपत्र
त्वगेलाफलिनी तथा ॥ केशरं पिप्पली विल्वं तालीसं कृष्णजीरकं ॥ लवंगंमरिचंजातीविडंगश्चदुरालभा ॥ बृहद्वासादिको ह्येष नि
नाश्वमधुनासह ॥ अंगमर्दारुचिहृल्लासतृष्णात्रिदोषविषमज्वरान् ॥ एकाहिकं द्व्याहिकं च तृतीयकचतुर्थकं ॥ काशश्वासारुचिछर्द्दिशि
रःशूलंचनाशयेत् ॥ वेगावरोधसंतापमूर्छामदंचपीनसान् ॥ चतुर्विंशतिवासादि ॥ वासकंत्रिफलाकृष्णामापटोलधान्यकेशरं ॥
साजाजीपर्पटंमुस्तंलवंगंचत्रिजातकं ॥ त्रिवृताजातितालीसंसमभागानिचूर्णयेत् ॥ शर्करामधुनालेह्योत्रिहंतिविषमज्वरान् ॥
वातिकंपैत्तिकंचैवश्लेष्मिकंसान्निपातिकं ॥ रक्तपित्तंज्वरंछर्द्दिहिक्कामूर्छामदःभ्रमान् ॥ नखनेत्रपीतत्वंविड्विबंधंनियच्छ
ति ॥ ज्येष्ठवासादि ॥ वासकंत्रिफलाकृष्णाविडंगंनागकेशरं ॥ व्योषजातीपुष्करंचलवंगंमुस्तजातिकं ॥ सशर्करंसमायुक्तंमधुना
सहलेहयेत् ॥ वातश्लेष्माधिकेदोषेनिहंतिविषमज्वरं ॥ अंगमर्दःशिरःशूलंविड्भेदंचवमिंजयेत् ॥ हृद्रोगश्वासकाशघ्नंनराणा
ममृतोपमं ॥ मध्यमवासादि ॥ ॥ वासकंजातिकाकृष्णापिप्पलीमुस्तकेशरं ॥ लवंगत्रिफलाकृष्णामातालीसंजीरकत्रयं ॥ वंशजाश
र्करायुक्तंसमभागानिकारयेत् ॥ पित्तश्लेष्माधिकेदोषेसदाहेपरमौषधं ॥ छर्द्दिमूर्छाभ्रमंचैवसन्निपातोद्भवानिच ॥ विषमज्वरेषुस

र्विषुहितमेतन्नसंशयः ॥ कान्तिकवासादि ॥ त्रिफलामागधीशृण्पामाकारवीतुल्लकेशरं ॥ एलाजाजीभृंगराजातीलवंगंवासकंसमं ॥ सिताम
धुयुतंलेहंवातपित्ताधिकेज्वरे ॥ तृष्णामूर्छाभ्रमोदाहोहृद्रोगछर्दिरेवच ॥ निहन्तिपरमंतस्यत्रिदोषंविषमज्वरं ॥ जातीफवासादि ॥ ॥
त्रिकटुत्रिफलामुस्तंविडंगंरजनीद्वयं ॥ जातीफलंलवंगंचतालीसगजकेशरं ॥ सूक्ष्मैलावासकंचैवशर्करामधुनालिहेत् ॥ पित्तश्ले
ष्मविकाराणांविषमज्वरशान्तये ॥ षोडशांगः ॥ शृंगीत्रिजातकंकृष्णातालीशंजातिमागधी ॥ श्लेष्मग्रहहरंक्षिप्रंविषमज्वरनाश
नं ॥ शृंग्यादि ॥ वासाव्योषविडंगानिपुष्करंकेशरंतथा ॥ त्रिफलासितमूलंचवैराजसदलानिच ॥ जातीफलंलवंगंचकारवीजीर
कंतथा ॥ मधुनालेहयेन्नृणांवातश्लेष्माधिकापहा ॥ त्रिदोषभेषजेदेतद्विषमज्वरनाशनं ॥ श्वासहृद्ग्रहपार्श्वार्तिकासहिक्का
वमीहरः ॥ वासादि ॥ वासाधात्रीकणाशुंठीकायस्थावडुरालभा ॥ कृष्णाजाजीलवंगानिपोष्कराहृरामाक्षिकं ॥ शृंगीसमस्तचू
र्णानिपित्तश्लेष्मनिहन्तिच ॥ विषमज्वरेषुगुल्मेषुदशांगोयंप्रशस्यते ॥ वासादिदशांगः ॥ येवासकंजातिफलंलवंगंफलत्रयं
जाजियुगंकुमारं ॥ वह्निसमंचूर्णमिदंदशांगंसितावतुल्यासहमाक्षिकंच ॥ प्रकोपजित्पित्तकफानिलादिसमस्तमर्द्धशिरसो
विकारं ॥ हृद्दशांगवासादि ॥ चूर्णयेद्राजिकाशुंठीसमभागंहरीतकिः ॥ नानादेशसमुद्भूताजलदोषंविमुंचति ॥ राजिका
दि ॥ फलत्रयंकटुत्रयंत्रिसुगंधित्रिजीरकंपटुत्रयंत्रिजातकंत्रिक्षत्रयंसुचूर्णितं ॥ श्रीरामसप्तकनामेदंविषमज्वरनाशकं ॥ ए

काहिकं द्व्याहिकं च तृतीयकचतुर्थकौ ॥ कालकालमवल्लब्धं वारिदोषं विमुंचति ॥ त्रिसप्तकं ॥ त्रिवर्गगंधत्रितयं त्रिजीरनिंवत्रयं वैवपटुत्रयं च ॥ भागसमं चूर्णमिदं त्रिसप्तकं दोषत्रयं हंति विदेशसंभवं ॥ द्वितीयत्रिसप्तकं ॥ ॥ वासात्रीणिफलं कटुत्रयमृगांशृंगी चतुर्जातकं यासोमेघसपुष्करं वकुलकांजालीलवंगं स्थिरा ॥ धान्यं जातिफलं च केशरिमुरवं तालीसकं पर्पटं द्राक्षापिष्टसपर्णिमंदनसुरदारुफली मूशिरं ॥ मत्स्यंडीसकलांतथैवगणिते क्षौद्रान्विते लेहयेद्रक्तस्थं रसजं तथा पललजं मेदोस्थिमज्जस्थितं ॥ शुक्रस्थान्तगतं त्रिदोषशमनं श्वासे च काशोदरे मूर्छादाहमदभ्रमप्रशमनः कृच्छ्रोपदंशापह ॥ महाषाडशादि ॥ ॥ अमृतायाशतं चूर्णं वाससा परिशोधितं ॥ पथ्यकषोडशभागाः मुस्तथावत्रुङ्माक्षिकं ॥ यथाग्निभक्षयेदेतन्नरो हितमितनाशनः ॥ नास्यकस्य भवे व्याधिर्नजरापलितं तथा ॥ न ज्वरं विषमान्नैव मेहानानिलरक्तकं ॥ न च नेत्रगता रोगाः परमेतद्रसायनं ॥ मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान् ॥ जीवेद्वर्षशतं साग्रं यथैव दितिजास्तथा ॥ गुडूचीकल्पः ॥ पलंकषानिंबपत्रं वचाकुष्टं हरीतकी ॥ सर्षपाः सयवाः सर्पिः धूपनं ज्वरनाशनं ॥ अष्टांगधूपः ॥ वैडालं वा सकृद्योज्यं वियमानस्य धूपनं ॥ शीतज्वरे धूपः ॥ इति ज्वराधिकारः ॥ ॥ अथातीसारः ॥ शुंठी प्रतिविषा हिंगु मुस्ता कुटजचित्रकं चूर्णमुष्णांबुनापीतमामातीसारनाशनं ॥ शुंठ्यादि ॥ ॥ हरीतकी प्रतिविषा सिंधुसौवर्चलं वचा ॥ हिंगु त्रिकटुका चूर्णं पिबेदु

॥ सान्पद ॥
३९

ष्मेनवारिणां ॥ आमातीसारशमनं ग्रहणीवह्निवर्द्धनं ॥ हरीतक्यादि ॥ विल्वाद्दमिंद्रयववालकधात्रिपुष्पपाठाश्चचंदनयुतानि विधाय चूर्णं
॥ क्षौद्रेण संयुतलिहेत्यतिरक्तशूलं कुक्षामयाच मतिसारहनराणां ॥ अष्टांगविल्वादि ॥ समसर्जदशभागस्य षड्भागटंकणस्य च ॥ धा
त्रीपुष्पत्रयंभागंमयविल्वमलाडुकाः ॥ ऐन्द्रयवाजातिफलाविषाजातीद्वयं तथा ॥ षड्भागं च गुडे नापि भक्षयेद्वातिसारिणां ॥ सर्ज्जादि ॥ मु
स्तं च सर्जरसवालकधान्यकं च लोध्रं त्रिजातकटुत्रयं विल्वमज्जा ॥ चूर्णानि माक्षिकसितालिहताश्च सामं वलातुरग्रहणिमाशु हरंस
शूलं ॥ मुस्तादि ॥ ॥ नागरातिविषाहिंगुपिप्पलीमरिचं तथा ॥ मुस्तं च कूटमलवणं पाठाकटुकरोहिणी ॥ पेयमुष्णांभुना चूर्णं पाचमामा
तिसारिणां ॥ नागरादि ॥ हरीतकीवचाशुंठीह्यामणावनमुत्तमं ॥ हरीतक्यादि ॥ ॥ हिंगुसैंधवमुस्तं च त्रिफलाकटुकत्रयं ॥ यमानीगु
डतुल्यांशा सामरोगे प्रशस्यते ॥ हिंग्वादि ॥ पिप्पली चाभयाशुंठीमुस्तधान्यविडंसमा ॥ आमशूले कुक्षिरोगे अजीर्णं च विनाशनं ॥ ॥
पिप्पल्यादि ॥ जलधरसयमानीशाल्मलीविश्वशृंगीमृगमदसहिफेनधातकीदेवपुष्पं ॥ त्रिभुवनकुटजाह्वजातिवृन्तास्थिमाजूफ
लमसितरसजातीपुष्पमोचाफलाख्यं ॥ एतानि समभागानि चूर्णयित्वा विचक्षणः ॥ सज्वरे मधुना देया मस्तुना सामपीडिता ॥ तंडुलो
दकसंयुक्तामामेरक्तनिषूदनं ॥ पक्वापक्वमतीसारं नानावर्णयुतेपि वा ॥ कृच्छ्रपूतिसगंधे च तद्दोषधीकृते थवा ॥ सुदारुणं चातिसारं
गंगावेगसमप्रभं ॥ सत्यपारोपमं चैव नाशयेन्नात्र संशयः ॥ चूर्णं जलधरानाममसाध्यसाधयेध्रुवं ॥ जनोभ्रधातकीमुस्ताविल्वाम्रास्थि

॥ रामः ॥
॥ ३९ ॥

कलिंगकं ॥ पिवेन्माहिषंतक्रेण पक्वातीसारनाशनं ॥ उक्तोयस्य परोगाः स्युः सक्षौद्रंतण्डुलांबुना ॥ अभ्र आदि ॥ अंबष्ठा धातकी लोध्रं समंगा पद्मकेशरं ॥ मधुकारलुविल्वं च पक्वातीसारनाशनं ॥ अंबष्ठ आदि ॥ पद्मसमंगामधुकं विल्वजंवूकपित्थकः ॥ पिवेत्तंडुलतोयेन सक्षौद्रमतिसारकं ॥ पद्म आदि ॥ कुटजो वह्निचूर्णं च मधुना सह लेहयेत् ॥ विरोत्थितमतीसारं पक्वातीसारनाशनं ॥ कुट आदि ॥ अजमोदामतिविषादाडिमत्वक्सवत्सकं ॥ आम्रास्थि शाल्लपर्णी च विजयाग्रंथिकानि च ॥ नागकेशरसंयुक्तं समभागानि कारयेत् ॥ सागरं वल्कलं जातीमदुगाइन्द्रमेव च ॥ अहिक्षीरान्वितं तत्र समभागं वदेद्बुधैः ॥ उष्णतोयेन मधुना चूर्णं च भक्षयेन्नरः ॥ वातपित्तातिसारे च वलासंप्रभवेपि च ॥ ग्रहणीनां चिरोत्थापि मामरक्तातिसारिणां ॥ हंति सेतुः यथावद्धं गंगावेगं तथा ध्रुवं ॥ वृहदजमोदादि ॥ ॥ मोचरसमुस्तनागरपाठारलुधातकीकुसुमैः ॥ चूर्णं मथितसमेतन्नुसमेतं तरुणाद्रिगंगाप्रवाहमपि ॥ गंगाधरः ॥ ॥ मुस्तावत्सववीजमोचरसो विल्वधातकीलोध्रं ॥ गुडमथितं संप्रयुक्तं गंगामपि वेगवाहिनीरुंध्यात् ॥ गंगाधर ॥ ॥ अहिक्षीरं सविजयाजातीफलसुचूर्णितं ॥ अन्नपानं यथायोज्यं तीव्रातीसारशांतये ॥ अहिक्षीरादि ॥ ॥ दाडिमत्वकजमोजावं अश्मभेदकसारकं ॥ जातीफलं अहिक्षीरं समचूर्णानि कारयेत् ॥ अजाक्षीरयुतं पीत्वामामरक्तातिसारजित् ॥ पक्वामपि मतीसारं ग्रहणीं चंप्रशमयेत् ॥ दाडिमादि ॥ वृक्षाम्लदाडिमं पाठामभयाश्च समागरं ॥ पिवेत्तक्रमंडेन पिवेदुष्णोदकेन वा ॥ एतद्देयं सशूलोयं भेषजमति

॥सात्यद॥
॥४०॥

मारिरो ॥ ह्रस्वाम्रादि ॥ समंगाधातकीपुष्पंविल्वसौवर्चलंविडं ॥ सक्षौद्रदाडिमंचैवकल्कितंडुलवारिणा ॥ पीतंपित्तातिसारघ्नंशूलं
चाशुनियच्छति ॥ समंगादि ॥ मधुकंकट्फलंलोध्रंदाडिमस्यफलत्वचं ॥ पित्तातिसारेमध्वक्तंपाययेत्तंडुलांबुना ॥ मधुकादि ॥ व
त्सातिविषाकुष्ठंवालविल्वसनागरं ॥ वत्सकंकट्फलंपथ्यासर्वश्लेष्मातिसारनुत् ॥ वत्सकादि ॥ पाठावचात्रिकटुकंमुस्तकटुक
रोहिणी ॥ उष्णांबुपानात्पचतिश्लेष्मातिसारनाशनं ॥ पाठादि ॥ कुष्ठपाठावचामुस्तंचित्रकंकटुरोहिणी ॥ पीतमुष्णांबुनाचूर्णं
श्लेष्मातिसारनाशनं ॥ कुष्ठादि ॥ ह्रीवेरातिविषामुस्तंविल्वधान्यकवत्सकं ॥ पिबेत्पिच्छाविबंधघ्नंसशूलंदोषपाचनं ॥ सशोणित
मतीसारंसज्वरंवाथविस्तरं ॥ ह्रीवेरादि ॥ अहिक्षीरंदाडिमत्वक्बिल्वकुसुमपाधती ॥ आम्रास्थिविल्वमज्जात्यातिविषा
नागकेशरं ॥ मुस्तेन्द्रयवसंयुक्तंयवानीपिप्पलीतिव ॥ जातीफलंशाल्मलीवीजंह्रीवेरसमचूर्णितं ॥ दधिवालोड्यारनालेवाचूर्णंवा
सुरयापिबा ॥ ग्रहणीमारुतापित्तावलासाप्रभवेज्जयत् ॥ नानावर्णंभवंशूलंअर्शांसिरक्तवाहिणी ॥ सातिसारेसकष्टेवअसा
ध्यंसाधयेद्ध्रुवं ॥ अहिक्षीरादि ॥ गुडेनपथ्ययेद्बिल्वंरक्तातिसारनाशनं ॥ आमशूलेविबंधघ्नंकुक्षिरोगविनाशनं ॥ गुडादि ॥
रसांजनंसातिविषाकुटजस्यफलत्वचं ॥ धातकीशृंगवेरंचपिबेत्तंडुलवारिणा ॥ क्षौद्रेणायुक्तेनुदतीरक्तातीसारमुल्वणं ॥
॥ रसांजनादि ॥ यष्टीमधुतिलाक्षूरसापद्मकेशरमुत्पलं ॥ क्षौद्रमत्स्यंडिकायुक्तमाज्येनपयसापिबेत् ॥ रक्तप्रवाहिकाशूलमेत

॥राम:॥
॥४०॥

ष्ठीतं नियच्छति ॥ यष्टीमध्वादि ॥ यमानीपिप्पलीमांसीचातुर्जातकनागरैः ॥ मरिचंपिप्पलीमूलंचित्रकचाजमोदकं ॥ बिल्वसौवर्चलंधान्यंवृक्षाम्लंचाम्लवेतसं ॥ अजाजीतुंबुरुचव्यंधातकीमुस्तबिल्वकैः ॥ सर्वैरेतैः समंचूर्णंशर्कराष्टगुणीकृतं ॥ हंतिसर्वातिसारंचग्रहणीसर्वजांनृणां ॥ काशश्वासरुचिछर्दिमामाजीर्णविषूचिकां ॥ यवान्यादिमिदंचूर्णंसर्वव्याधिविनाशनं ॥ यवान्यादि ॥ बिल्वाब्दधातकीपाठाशुंठीमोचरसः समा ॥ पीतानिरुध्यतीसारंगुडतक्रेणदुर्जयं ॥ बिल्वादि ॥ हिंगुसौवर्चलंपथ्याकृष्णामोचरसान्वितं ॥ उष्णोदकेनपातव्यमतीसारंव्यपोहति ॥ हिंग्वादि ॥ दीप्यकातिविषाजाजीबोषपथ्यासुवर्चला ॥ षड्ग्रंथंवातशूलंचशूलंचस्तिग्दोद्भवं ॥ श्वासारोचकहंत्याशुपिबेदुष्णेनवारिणा ॥ दीप्यकादि ॥ वत्सकंदाडिमंपाठाह्रीवेरधान्यनागरं ॥ धातकातिविषालोध्रंबिल्वमुस्तसजंबुकं ॥ एतानिसमभागानिपिबेत्तंडुलवारिणा ॥ नानावर्णमतीसारंविबंधमतिवेदनं ॥ रक्तस्रावंमहाघोरंअर्शांसिग्रहणीहरः ॥ वृहत्कुटजादि ॥ ॥ कलिंगकवचामुस्तंदारुसातिविषासमा ॥ चूर्णंतंडुलतोयेनपिबेत्पित्तानिलामयी ॥ फेनिलंबहुशोरक्तंसकफंवेदनान्वितं ॥ विबंधसार्यमानंचधारोष्णेनविवर्जयेत् ॥ कलिंगादि ॥ लोध्रंचंदनयष्ट्याह्वदार्वीपाठानिलोत्पलं ॥ श्लेष्मापित्तातिसारघ्नंरक्तंचाशुनियच्छति ॥ लोध्रादि ॥ कटुजातिविषामुस्तंहरिद्रापर्णिनीद्वयं ॥ सक्षौद्रंशर्कराशस्तंपित्तश्लेष्मातिसारिणां ॥ कुटजादि ॥ ॥ कुटजाविसमंगाचधातकाब्दतुनास्थिकं ॥ ब्राह्मीचबिल्वपत्राम्लातिविषादाडि

मत्वच॥ शिवातिकाम्रकोलास्थिकपित्थवकुलास्तथा॥ श्रीपुष्पोयवचंडंच अहिक्षीरंमगोज्जं॥ एतानिसमचूर्णानिमधुनालेहयेद्भिषक्॥
तण्डुलोदकतक्रेवाकांजिकोष्णोदकेपिवेत्॥ त्रिदोषोत्थमतीसारंसामरक्तंनिसूदनं॥ हिक्काकासज्वरश्वासतृष्णादाहास्त्रमूलनुत
॥ग्रहणीसर्वजाहन्यात्कुटजामकृमिहन्यते॥ कुटजादिमितिख्यातंसर्वातीसारजोजयेत्॥ महाकुटजादि॥ पाठावत्सकवीजानिह
रीतकीमहौषधं॥ एतदामसमुत्थानमतिसारंसवेदनं॥ कफात्मकेसपित्तंच अरिष्टंगात्रवंधनी॥ पाठादि॥ मुष्टंहरिद्रेमधुक
पुष्पपर्णीमहाक्षकं॥ मधुयुक्तानिहन्त्याशुश्लेष्मपित्तसमुद्भवं॥ सवेदनंसरक्तंचपुरीषंयश्चधावति॥ मुस्तादि॥ समंगाधात
कीविल्वआम्रास्थिपद्मकेशरं॥ ब्राह्मीमोचरसंलोध्रंकुटजस्यफलत्वचं॥ पिवेत्तंडुलतोयेनकषायंकल्कमेवच॥ श्लेष्मपित्ता
तिसारघ्नंरक्तंवाशुनियच्छति॥ समंगादि॥ चंदनंमधुकोशीरसूक्ष्मेलानागकेशरं॥ वालकंनगरंकुष्ठमंजिष्ठाछिन्नरुहांशके:।
चूर्णंमधुयुतंलेह्यंकफरक्तामपाचनं॥ चंदनादि॥ विल्वाकमिन्द्रयववालकधात्रिपुष्पंपाठाचचंदनमुस्तानिविचूर्णितंच॥ कु
क्षामयामह्यतिसारहरंनराणांसंलेहयेन्मधुनामधुकंचयोज्य॥ विल्वादिसमंगः॥ दाडिमस्यत्वचंयष्टिआस्थि—विल्वधा
तकी॥ राजवृक्षवकसाकंचयमानीसमचूर्णयेत्॥ पिवेत्तंडुलतोयेनमधुनासहसंयुतं॥ आमरक्तेसशूलेच अतीसारेप्रशस्य
ते॥ दाडिमादि॥ सैंधवमाम्रवीजंचवटवृक्षस्यवल्कलं॥ माहिषंनवनीतेनलेहोतीसारवारणं॥ सैंधवादि॥ अमृतातिविषाविल्व

पृष्ठिपर्णी सविल्वकं ॥ मोचं च धातकी पाठा आमरक्ते च संभवे ॥ ~~अम्बष्ठादि~~ ॥ एलाप्रियंगुमुस्ताक्षां पाययेत्तु यथाबलं ॥ तृस्नातीसारछर्दिघ्नं सक्षौद्रं तण्डुलांवुना ॥ ~~एलादि~~ ॥ कनकस्य फलं ग्राह्य वीजं तस्य विवर्जयेत् ॥ तन्मध्ये लवणं स्थाप्य मृद्वस्त्रैर्वेष्टयेद्दहेत् ॥ उद्धृत्य श्वांगशीते च खल्वमध्ये विमर्दयेत् ॥ तच्चूर्णं जातिकर्पूरं अहिफेनसमांसिके ॥ यथावलं ततः खादेच्छर्द्यतीसारनाशनं ॥ हृच्छूलं कुक्षिशूलं च कासं श्वासं निषूदनं ॥ लवणं सामुद्रलवणं ॥ ~~कनकस्थामादि~~ ॥ अनंतां भृशिज्ञातिसूक्ष्मैला कोलमज्जकः ॥ शतावरी सर्जरसं च वीरसेन पेषयेत् ॥ क्षौद्रप्रयुक्तं पिवेत्तत्र छर्दिज्वरातिसारनुत् ॥ ~~अनंतादि~~ ॥ आम्रवीजं पद्मवीजं उत्पलं दाडिमं त्वचं ॥ तंडुलोदकसंयुक्तं मधुना सह योजयेत् ॥ छर्दितृष्णातिसारं च ज्वरमाशु नियच्छति ॥ ~~आम्रादि~~ ॥ कोलास्थिमज्जा त्वचनागपुष्पं सशर्करं पत्रत्रुटितुगाक्षं ॥ यष्ट्याह्वाञ्जालाकनमंजनेलाचूर्णं लिहेत्क्षौद्रसितान्वितं वा ॥ कासाप्रवाहछर्दिहिक्कामुखप्रपाकेषु शिशुष्वा ॥ कोलास्थ्यादि ॥ विडंगातिविषामुस्तं दारुपाठा ॥ ~~कलिंगका~~ ॥ मरिचेन समायुक्तं शोथातीसारनाशनं ॥ ~~विडंगादि~~ ॥ केशरं धातकी लोध्रं पाठारुणापिप्पली समंगाभिः ॥ मोचरसपद्मकेशरसितायुतं क्षौद्रमिश्रार्शप्रभवं ॥ क्रिमिजं निरूहपानान्नदोषसंभूतं ॥ अतिसारमयं शमयति लेहः कल्याणको नाम्ना ॥ ~~कल्याणकं~~ ॥ समंगा धातकी पाठा कराणालोध्रविकेशरं ॥ सिता मोचरसं विल्वमधुना सह लेहयेत् ॥ विषार्शः क्रिमिसंभूतो भयशोकातिसारजित् ॥ ~~कल्याणकादि~~ ॥ सैंधवं कुटजं वीजं वचा कटुकरोहिणी ॥ विपाठामतिविषा विडंगं वि

श्वभेषजं ॥ सैन्धवादि इदं नाम्ना चूर्णं उष्णोदकेपिवेत् ॥ शूलं विवंधउर्द्ध्व प्रमेहदीपनपाचने ॥ सैन्धवादि ॥ नागरातिविषाहिंगुमुस्तवत्स
कचित्रका ॥ घनतेजोवती पाठा पिप्पलीन्द्रयवासमाः ॥ नागरादि इदं चूर्णं तथा उष्णोदकेनवा ॥ शूलं विवंधं तनव प्रवुं उर्द्धस्यादामपाचनं
॥ वृहन्नागरादि ॥ एलाकुटजवीजानि लोध्रं चशारिवानिशा ॥ वत्सकातिविषाशुंठी विल्वहिंगुवचोद्दः ॥ उष्णांवुःमधैःधान्याम्लः
पीतो वा श्लेष्मा चूर्णितः ॥ शूलातीसारशोकेनदीपनंपाचनास्मृतं ॥ एलादि ॥ तालीसनागरत्वचन्तथाशक्रयवापद्मकेशरपत्र
कत्रुटिस्तथा ॥ समसदाडिमत्वक्क्षौद्रेणाभाव्यमतिसारिरोगेषु ॥ अष्टांगतालीसादि ॥ तालीसकंव्योषसवल्कवैलाशक्राह्वय
थारलुपत्रकंवै ॥ सदाडिमत्वक्सहपद्मकेशरंसमाक्षिकैस्तन्वतिसारिणेषु ॥ षडंगतालीसादि ॥ ॥ लोध्रंचंदनकेशराम्रत
ग्रनाविल्वन्तथैवोत्पलंरुणमापिप्पलिमोचशुंठिमरिचंचैलालवंगन्तथा ॥ धात्रीपुष्पयुतासुरेन्द्रजयवंवत्सादनीमाक्षिकानाना
वर्णायुतातिसारसमनोलेहोहितंवातुरः ॥ लोध्रादि ॥ मुस्ताइंद्रयवाविल्वंलोध्रंमोचरसस्तथा ॥ धातकीचूर्णयेत्तक्रंगुडाभ्यांमदंय
लघी ॥ सर्वातीसारसमनंनिहराङ्कि प्रवाहिकां ॥ लघुगंगाधरंनामचूर्णंसंग्राहकंपरं ॥ लघुगंगाधर ॥ मुस्तामलकशुंठीभिःधा
तकीलोध्रवालकं ॥ विल्वमोचरसाभ्यांचपाठेन्द्रयववत्सकैः ॥ आम्रवीजंप्रतिविषालज्जालुचेतिचूर्णितं ॥ क्षौद्रंतण्डुलपानीयंपी
तंयातिप्रवाहिका ॥ सर्वातिसारोग्रहणीप्रशमंयातिवेगतः ॥ वृहद्गंगाधरंचूर्णंमरिहेगोपिवध्यते ॥ वृहद्गंगाधरः ॥ लाक्षामोचरस

लोध्रपरूषकंवनीलोत्पलंप्रतिविषानियुक्तानिचूर्णयेः ॥ कुक्षामसामग्रहणीसहितानिरक्तां क्षिप्रप्रवाहिकाहरंसहमाक्षिकेन ॥ लाक्षा-
दि ॥ वटवृक्षत्वंग्राह्यंमाम्रवीजंतथैवच ॥ भागद्वौद्वौततःकृत्वाभागैकंसैन्धवस्यच ॥ संचूर्ण्यनवनीतेनभक्षंप्रवाहिकेहितं ॥ वटवृ-
क्षादि ॥ जंब्वास्थिचैवचाम्रास्थिदाडिमस्यत्वचंतथा ॥ रसांजनमनंताञ्चसूक्ष्मेलापद्मकेशरं ॥ माक्षिकंभागसंयुक्तंमहासंग्राहकंमतं
॥ जंब्वादि ॥ ॥ चंदनेमधुकोशीरसूक्ष्मेलापद्मकेशरं ॥ वालकंनागरंकुष्टंमंजिष्ठाहिग्ररांशके ॥ चूर्णंमधुयुतंलेह्यंकफरक्तस्यपा-
चनं ॥ चंदनादि ॥ ॥ वालकंनागरंकुष्टंमंजिष्ठाहिग्ररांशके ॥ चूर्णंमधुयुतंलेह्यंकफरक्तस्यपाचनं ॥ वालकादि ॥ पिप्पलीस-
वचाकुष्टंपाठाकटुकरोहिणी ॥ उष्णोदकेनपातव्यंमतीसारविनाशनं ॥ पिप्पल्यादि ॥ जातीफललवंगंचत्र्यूषणंश्रीफलंतथा ॥ अ-
हिक्षीरंविभूतिंचकर्पूरंसमचूर्णयेत् ॥ रक्तपित्ताधिकेचैवसितयासहयोजयेत् ॥ वल्लासमात्राधिकोगुडेनसहभक्षयेत् ॥ अतीसारे
सकष्टंचचिरकालानुबंधिनी ॥ नाभिवस्तिकटिशूलेश्वासकाशनिषाप्ररामन् ॥ जातीफलादि ॥ ॥ इत्यतीसाराधिकारः ॥ ॥ अथग्रह-
णी ॥ नागरंकुटजंबीजंपिप्पलीवृहतीद्वयं ॥ चित्रकंसारिवापाठाक्षारंलवणपंचकं ॥ चूर्णयित्वासुरामंडदधिकोष्णांवुकांजिकेः ॥ स-
पिबेदग्निवृद्ध्यर्थंकोष्टवातहरंपरं ॥ नागरातिविषामुस्तंसूक्ष्मेलाविल्वबालकं ॥ त्वकूपत्रमजमोदाचआम्रास्थिभद्रमुस्तकं ॥ चूर्णंसामेस-
रक्तेचग्रहणीशूलसारजित् ॥ अग्निसंदीपनेशस्तंपिबेत्तंडुलवारिणा ॥ नागरादि ॥ ॥ चित्रकोनागरोहिंगुपिप्पलीपिप्पलीजटा ॥ च

॥ सान्यद ॥ ॥ ८३ ॥

व्याजमोदामरिचंप्रत्येकं कर्षसंमितं ॥ स्वर्जिकायावशूकश्च सौवर्चलबिडं वरं ॥ सामुद्रिकं रोमकं च कोलमात्राणि कारयेत् ॥ एकीकृत्याखि
लं चूर्णं भावयेन्मातुलुंगजैः ॥ रसैर्दाडिमजैर्वापि शोषयेदातपेन च ॥ एतच्चूर्णं जयेच्छूलं ग्रहणीनामवातजं ॥ अग्निं च कुरुते दीप्तं रु
चिकृत्कफनाशनं ॥ चित्रकादि ॥ पिप्पलीबृहतीव्याघ्रीयवक्षारकलिंगकः ॥ चित्रकं शारिवा पाठा शठी लवणपंचकं ॥ तच्चूर्णं पाय
येद्दध्नासुराचोष्णांभसापि वा ॥ मारुतग्रहणीदोषशमनं पावनं स्मृतं ॥ पिप्पल्यादि ॥ ॥ नागरातिविषामुस्तं धातकीसरसांजनं
॥ वत्सकत्वक्फलं बिल्वं पाठाकटुकरोहिणी ॥ पिवेत्समांसतच्चूर्णं क्षौद्रतंडुलवारिणा ॥ पैत्तिके ग्रहणीदोषे रक्तं यच्चोपदृश्यते
॥ अर्शस्वथगुदे शूले जयेच्चैव प्रवाहिकां ॥ नागराद्यमिदं चूर्णं कृष्णात्रेयेन पूजितं ॥ नागराद्यं ॥ भूनिंबकटुकाव्योषमुस्तकेन्द्रय
वासमा ॥ द्वौ चित्रकौ वत्सकत्वग्भागान्षोडश चूर्णयेत् ॥ गुडशीतांबुना पीतं ग्रहणीदोषगुल्मनुत् ॥ कामलाज्वरपाण्डुत्वमंदाग्न्य
रुचिसारजित् ॥ भूनिंबादि ॥ पाठाबिल्वव्योषजंबूदाडिमं धातकीकुसुम ॥ कटुकातिविषामुस्तं दार्वीभूनिंबवत्सकैः ॥ सर्वैरेतैः समं चू ॥ राम: ॥ ॥ ८३ ॥
र्णं कुटजेन तण्डुलांबुना ॥ सक्षौद्रेण पिवेच्छर्दिज्वरातीसारशूलवान् ॥ हृद्रोगं ग्रहणीदोषारोचकं श्वासजित्परं ॥ पाठादि ॥ पाठाव
त्सकबीजानि चित्रकं विश्वभेषजं ॥ पिवेत्सैंधवयुक्तानि सहैवोष्णेन वारिणा ॥ पाठादि ॥ पाठाप्रतिविषामुस्तं व्योषभूनिंबवत्सका ॥ ति
क्ताचित्रकटुःस्पर्शास्तुल्यैस्तु कुटजैः समैः ॥ गुडशीतांबुनापीतं चूर्णं दीपाचनं ॥ अतिसारं ग्रहण्यर्शो हृद्रोगज्वरगुल्मजित् ॥ पाठा

दिद्वितीयः ॥ शठीमोचाभयाक्षारोग्रंथिकंबीजपूरकं ॥ लवणोष्णांबुनापेयं श्लेष्मिके ग्रहणीगदे ॥ शट्यादि ॥ ॥ चित्रकंग्रंथिकंपथ्या
कुष्ठंप्रतिविषावचा ॥ शुंठीमुस्तंपिप्पलीवभ्रुरातक्रेणवारिभिः ॥ श्लेष्मिके ग्रहणीदोषे पीतंस्यादग्निविवर्द्धनं ॥ चित्रकादि ॥ समूलपि
प्पलीक्षारौ द्वौ पंचलवणानि च ॥ मातुलुंगाभयारास्नाशठीमरिचनागरं ॥ कृत्वासमांशमेतच्चूर्णंपिबेत्प्रातः सुखांबुना ॥ श्लेष्मिके ग्रह
णीदोषे बलमांसाग्निवर्द्धनं ॥ पिप्पल्यादि कलिंगाहिंग्वतिविषावचासौवर्चलाभया ॥ छर्दिगुल्मग्रहणीशूलेपेयमुष्णेन वारिणा ॥
कलिंगादि ॥ जातीफलेलाकर्षांशंलवंगंजातिसैंधवं ॥ मरिचानिपलार्द्धंचपथ्याकृष्णात्रिकार्षिकां ॥ आम्रबीजंपलैकंचक
र्षांशि बिल्वषष्ठकं ॥ बिल्वषष्ठः ॥ ॥ यमानीपिप्पलीमूलंचातुर्जातकनागरैः ॥ मरिचाग्निकणाजाजीधान्यसौवर्चलैः समैः ॥ वृ
क्षाम्लंधातकीकृष्णाबिल्वदाडिमतिल्वकैः ॥ त्रिगुणैः षड्गुणासिताकपित्थाष्टगुणीकृता ॥ चूर्णितीसारग्रहणीक्षयगुल्मगलाम
यान् ॥ काशश्वासारुचिहिक्काकपित्थाष्टमिदंजयेत् ॥ कपित्थाष्टकं ॥ ॥ कर्षंतुगासिताक्षीरीचातुर्जातंद्विकार्षिकं ॥ यवानीधान्यका
जाजीग्रंथिव्योषपलांशिकं ॥ पलानिदाडिमाच्चाष्टौसितायाश्चैकतः कृतं ॥ गुणौकपित्थाष्टकवच्चूर्णायंदाडिमाष्टकं ॥ दाडिमाष्ट
कं ॥ दाडिमद्वेपलंग्राह्यंखंडंचाष्टपलानि च ॥ त्रिसुगंधंपलंचैकंत्रिकटुस्यात्पलत्रिकं ॥ एतच्चैकीकृतंचूर्णंचूर्णस्याद्दाडिमाष्टकं
॥ रुचिकृद्दीपनंबल्यंग्रहणीसज्वरापहं ॥ दाडिमाष्टकं ॥ व्योषदीप्यजमोदाकृमिजिदपिदंतीरामठश्वाश्वगंधासिंधूत्थजीरक

॥ सान्याद: ॥
॥ ४४ ॥

द्वेफलत्रिकत्वकं धान्यकं तुल्यभागं शृंगी चूर्णितयुक्तं घृतमधुसहितं शाणमात्रं प्रदेयं कुर्याद्दीप्तिं च पुष्टिं बलमपि कुरुते नाशयेच्च ग्रहणीं ॥ व्योषादि ॥ नागरातिविषामुस्तापाठाबिल्वरसांजनं ॥ कुटजत्वक्फलं तिक्ता धातकी च कृतं रजः ॥ क्षौद्रेण तण्डुलतोयेन पेयं पैत्रिके ग्रहणीगदे ॥ प्रवाहिकार्शोगुदरुग्रक्तोत्थानेषु शस्यते ॥ नागरादि ॥ अष्टौ भागाः कपित्थस्य षड्भागाः शर्करा मता ॥ दाडिमं तिंतिडीकं च श्रीफलं धातकी तथा ॥ अजमोदा च पिप्पल्यो प्रत्येकं स्यात्त्रिभागकं ॥ मरिचं जीरकं धान्यं ग्रंथिकं वालकं तथा ॥ सौवर्चलं यवानी च चातुर्जातं सचित्रकं ॥ नागरमेकभागाः स्युः प्रत्येकं सूक्ष्मचूर्णितं ॥ कपित्थाष्टकसंज्ञस्याच्चूर्णमेतद्गलामयान् ॥ अतीसारं क्षयं गुल्मं ग्रहणीं च व्यपोहति ॥ कपित्थाष्टकं ॥ किराततिक्तषड्ग्रंथात्रायमाणाकटुत्रिकं ॥ चंदनं पद्मकोशीरं दार्वीवत्सककट्फलं ॥ मुस्तं यवानिकादारु पलाशं निंबपत्रकं ॥ एलासौराष्ट्रातिविषाकल्कलं मधुशिग्रुजं ॥ दुर्वापर्पटकं चैव तच्चूर्णं मधुसंयुतं ॥ पेयं सुरां सुना वापि हत्यां तु ग्रहणीगदे ॥ गुल्मशूलारुचिश्वासकामलां सन्निपातके ॥ ग्रहरोगेषु सर्वेषु हितं स्यान्नात्र संशयः ॥ किराततिक्तादि ॥ दाडिमस्य पलान्यष्टौ शर्करायाः पलान्यपि ॥ पिप्पली पिप्पलीमूलं यवानी मरिचं तथा ॥ धान्यकं जीरकं शुंठी प्रत्येकं पलसंयुतं ॥ कर्षं चैव तुगाक्षीर्याः पत्रैलात्वक् च केशरं ॥ मंदाग्निं पीनसं चैव श्वासकाशं व्यपोहति ॥ बृहद्दाडिमाष्टकं ॥ जातीफलं लवंगैलापत्रत्वक्नागकेशरैः ॥ कर्पूरचंदनतिलैस्त्वक्क्षीरीतगरामलैः ॥ तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ॥ शुंठीविडंगमरिचैः समभागमविचूर्णितैः ॥ यावंत्येतानि सर्वाणि कुर्याद्भंगावतावती ॥ सर्वचूर्णसमो दे

॥ राम: ॥
॥ ४४ ॥

याशर्करासुभिषग्वरैः॥कर्षमात्रंततःस्वादेन्मधुनाह्माविनेसुधीः॥अस्यप्रभावाद्ग्रहणींकाशश्वासांश्चविक्षयाः॥वातश्लेष्मप्रतिश्याया
:प्रशमंयान्तिवेगतः॥क्षपमेमेतु॥पलानिसप्तभंगायासिताःसर्वसमामतेतिपाठः॥जातीफलादि॥भागाद्विहत्राणिहिंगुवचांकुष्ठाहृणा
निच॥यवानीविश्वसिंधुंचपथ्याचूर्णानिकारयेत्॥उष्णोदकेनपातव्यंग्रहणीमामपावनं॥हिंग्वादि॥विभूतिरग्निर्घनदाडिमत्वग्यवानि
कासैन्धवधातकीनां॥कटुत्रयंविल्वफलाम्रवीजंहरीतकीधान्यकलोध्रपाठा॥तक्रेणपीतेमहतातिसारंनिहंतिवामंसकफंविबंधभू
रोदरानाहम–र्शाशोथंरुचिप्रदंकाशगुदामयघ्नं॥वृहद्भूतिकादि॥त्रिभुवनविजयाशुंठीनिर्यासदाडिमत्वच॥समंगांधातकीपुष्पं
यवानीविल्वपेशिका॥आम्रास्थिसैन्धवंकृष्णासमभागानिकारयेत्॥अग्निदीप्तिकरंख्यातंसर्वशूलेव्यपोहति॥सशोणितमतीसा
रंग्रहणीमामरोगकं॥त्रिभुवनविजया॥ ॥तिंतिडीकंसआम्रास्थियवानीकटुकत्रयं॥कङ्कुरावाभयाविल्वविजयासैंधवंसमं॥वि
जयाजंबुविल्वंचमोचपाषाणभेदकं॥तालीससालपर्णीचत्र्यूषणांभृंगवीजकं॥कुष्ठातिविषावकुलाह्वीवेलासहदेविका॥क्षिक्कि
णीसिंहिसारस्यवीजंकटुकरोहिणी॥हस्तीफलकोलमज्जाअर्कमूलानिमानिच॥मृगांज्जातीवंडूचअहिक्षीरंसमन्वितं॥एतानिसूक्ष्मचूर्णा
णिप्रातरुत्थायभक्षितं॥गुडेवादधिवालोघ्रशर्करावाप्रयोजयेत्॥वातपित्तातिसारेचकफजेसन्निपातिके॥रक्तमामातिसारेचशोकप्रवा
हिकापिवा॥ग्रहणीचमहाघोरंसर्वातीसारनाशनं॥महाविजया॥रुचकाग्निमरीचानांचूर्णंतक्रेणसेवितं॥ग्रहणीदरगुल्माशभुन्मां

॥ सान्यद ॥
॥ ४५ ॥

यस्तीह्नाशनं ॥ हवकादि ॥ ॥ इतिग्रहण्यधिकारः ॥ अथार्शः ॥ त्र्यूषणेन्द्रयवालोध्रशताह्वापद्मकंतथा ॥ त्रायमाणानिभूनिंवसर्जवि
ल्वरसांजनं ॥ पटोलमूलफलिनीशारिवाकृमिजिद्घनं ॥ कपित्थानिविषाणिंवगडूचीचंदनोत्पलं ॥ मद्वीकादीप्यकंभेदंद्विपलंकुटजस्यच ॥
चूर्णमुष्णांवुनापीतंज्वरास्त्रकपाण्डुकीलजित् ॥ गुल्मानाहमतीसारंहृमिदीपनपाचनं ॥ त्र्यूषणादिः ॥ अपामार्गस्यवीजानिचित्रकंविश्व
भेषजं ॥ भूनिम्बभड्गमुस्तंवपथ्यावगडसंमितान् ॥ अर्शासिनाशयत्याशुचूर्णमेतत्समस्ततः ॥ अपामार्गादि ॥ ॥ पूतीकमूशल्यभया
भूनिंवामृतवत्सकान् ॥ सूरणाग्निकसिंधूत्थदेवदालीसुचूर्णितान् ॥ तक्रेणपिवतश्चान्नंतक्रेणैवसमस्ततः ॥ मासात्यक्तफलावीव
पतत्यर्शांशसंशयः ॥ पूतीकादि ॥ शुंठीकणामरिचनागदलत्वगेलाचूर्णीकृतंक्रमविवर्द्धितमधुमंसानवोदेदिदंसमसितंगु
दजाग्निमांद्यगुल्मारुचिश्वशनकाशहृदामयेषु ॥ क्षयरोगेषु ॥ एलात्वग्नागकुसुमंतीक्ष्णंकृष्णामहौषधमितिपाठः समशर्करादि ॥ ॥ राम: ॥ ॥४५॥
किराततिक्तकंशुंठीधन्वयासंकुचंदनं ॥ दार्वीत्वक्कुवसेव्यानित्वचंवादाडिमोद्भवं ॥ कुटजत्वक्फलंतार्क्ष्यंमाभावमाक्षिकानिव ॥
पिवेत्तण्डुलतोयेनअर्शासिपित्तरक्तजं ॥ किराता दि कपित्थानिविषाणिंवगडूचीचंदनोत्पलं ॥ मद्वीकादीप्यकंभेदंद्विपलंकुटजस्य
च ॥ चूर्णमुष्णांवुनापीतंज्वरास्त्रकपाण्डुकीलजित् ॥ गुल्मानाहमतीसारंहृन्निदीपनपाचनं ॥ त्र्यूषणादि ॥ ॥ अपामार्गस्यवीजानिवि
त्रकंविश्वभेषजं ॥ भूनिम्बभड्गमुस्तंवपथ्यावगडसंमितान् ॥ अर्शासिनाशयत्याशुचूर्णमेतत्समस्ततः ॥ अपामार्गादि ॥ पूतीकमूशल्य

भयाभूनिंवामृतवत्सकान् ॥ सूरणाग्निकसिंधूत्थदेवदालीकचूर्णितान् ॥ तक्रेणापिवतश्चान्नं तक्रेणैवसमस्ततः ॥ मासात्पक्वफलानीवपतंत्य
र्शांशसंशयः ॥ पूतीकादि ॥ शुंठीकणामरिचनागदलत्वगेलाचूर्णीकृतंक्रमविवर्द्धितमध्वमंसात् ॥ खादेदिदंसममसितंतदजाग्निमांद्य
ल्मारुचिश्वशनकाशहृदामयेषु ॥ [illegible] ॥ एलात्वग्नागकुसुमंतीक्ष्णांकृष्णामहौषधमितिपाठः ॥ समशर्करादि ॥ किराततिक्तकंशुं
ठीधन्वयासकुचंदनं ॥ दार्वीत्वङ्निंवसेव्यानित्वचंवादाडिमोद्भवं ॥ कुटजत्वक्फलंतार्क्ष्यमाभाचमाक्षिकानिच ॥ पिवेत्तण्डुलतोयेनअर्शां
सिपित्तरक्तजं ॥ किरातादि ॥ चिरविल्वकसिंधूत्थनागरेन्द्रयवारलून् ॥ तक्रेणापिवतोर्शांसिनिपतंत्यसृजासह ॥ चिरविल्वादि ॥ ॥
कुटजंविल्वशुंठीचचित्रकातिविषाभया ॥ दुरालभादार्वित्वचंचवंश्लेष्मार्शोनाशनं ॥ कुटजादि ॥ दाडिमस्यत्वचंशुंठीचंदनंसदुराल
भा ॥ भूनिंवसहितंपानंमर्शोघ्नंशस्यतेवुधैः ॥ दाडिमादि ॥ समंगोत्पलमंजिष्ठामोचाह्वतिलचंदनं ॥ तेनछागक्षीरेणपानंरक्तार्श
नाशनं ॥ समंगादि ॥ ॥ उत्पलंमोचरससितंलोध्रकृष्णतिलसहशीतसमंगा ॥ चूर्णमिदंअजाक्षीरसमेतंहन्तिरक्तार्शमाशुसवेगं
॥ उत्पलादि ॥ ॥ नीलोत्पलंशर्करांचपद्मकेशरपद्मकं ॥ तंडुलोदकसंयुक्तंपाययेद्रक्तशांतये ॥ नीलोत्पलादि ॥ व्योषाग्निरुष्करविडं
गतिलाभयानांचूर्णंगुडेनसहितंसततंप्रयोज्यं ॥ दुर्नामशोथगरकुष्टकृमिविवंधमग्नेजयत्यवलतांवमिपांडुतांच ॥ व्योषादि ॥ त्रिकत्रयंवचा
हिंगुपाठाक्षारौनिशाद्वयं ॥ चव्यतिक्ताकलिंगानिशताह्वालवणानिच ॥ ग्रंथिविल्वाजमोदाचगणोह्याविंशतिर्मतः ॥ एतानिसमभागानिसूक्ष्म

॥ सारत्पद ॥
॥ ४६ ॥

चूर्णानि कारयेत् ॥ चूर्णं विडालपदकं पिबेदुष्णेन वारिणा ॥ एरंडतैलयुक्तं वा लिह्याच्चूर्णमिदं नरः ॥ हन्यादर्शांसि सर्वाणि श्वासशोषौ
भगंदरान् ॥ हृच्छूलं पार्श्वशूलं च वातगुल्मं तथोदरं ॥ हिक्कां कासं प्रमेहांश्च पांडुरोगं सकामलं ॥ आमवातमुदावर्त्तं मूत्रकृच्छ्रं यकृत्कृ-
मीन् ॥ अन्ये च ग्रहणीदोषा भिषग्भिपरिकीर्तिता ॥ विजयो नाम चूर्णोयं सर्वान्नाशयते ध्रुवं ॥ महाज्वरोपसृष्टानां भग्नोपहतचेतसां ॥
अप्रजानां च नारीणां हितमेतद्धि भेषजं ॥ विजयचूर्णं ॥ चित्रकपुष्करमूलशठीनां तेषु समांशाभिलान्विनियोज्यः सूरणकंदकरं-
डसमानैतैश्च समा त्रिफला विनियोज्यः ॥ सैन्धवमस्य चतुर्गुणमुक्तं भावितमर्करसेन समस्तं ॥ तं च घृतेस्य घटे विनिधायारणपकगो-
मयवह्निविपक्वं ॥ कल्याणनाम लवणं प्रविवेच्च कर्षं तक्रेण पित्तपवनामगुदांकुरेषु ॥ आनाहगुल्मकृमिशूलविशूचिकाशविड्ग्रो-
धमूत्रमदकामलपांडुरोगे ॥ भगंदरोचकंठगंडान्हरेद्यथा रामसरो रिहूंदान् ॥ कल्याणलवणः ॥ ॥ अर्कमूलं शमीपत्रं नृकेशाः सर्प-
कंचुकं ॥ मार्जारचर्म आज्यं च गुदे धूपोऽर्शसां हितं ॥ अर्कमूलादिधूपः ॥ अश्वगंधाथ निर्गुंडी बृहती पिप्पली घृतं ॥ धूपोयं गुदमार्गेण
अर्शांसि नाशयत्यलं ॥ अश्वगंधादिधूपः ॥ इत्यर्शोधिकारः ॥ अथाग्निमांद्यं ॥ पथ्यापिप्पलिसंयुक्तं चूर्णं सौवर्चलान्वितं ॥ मधु-
नोष्णोदकेनाथ ज्ञात्वा दोषागतिं भिषक् ॥ चतुर्विधमजीर्णं च मंदानलमथारुचिं ॥ आध्मानं वातगुल्मं च शूलं चाशु नियच्छति ॥ ॥
आरोग्यचूर्णं ॥ हिंगुवचाकणाशुंठीयवानी च हरीतकी ॥ क्रमोत्तरं गुणा वह्निरुक्वमारुतनाशना ॥ कासं श्वासं निहंत्याशु नकविस्रतिह

॥ राम. ॥
॥ ४६ ॥

न्यते ॥ पिबेद्धान्याम्लुनावाथ रयाकोष्णवारिणा ॥ सोदावर्त्तमजीर्णं च प्लीहानमुदरं तथा ॥ अंगानि यस्य शीर्य्यन्ते विषं वा येन भक्षितं ॥ अर्शोह
रं दीपनं च शूलगुल्मनाशनं ॥ अग्निमुखं ॥ द्वौ क्षारौ चित्रकं पाठा करंजं लवणानि च ॥ सूक्ष्मैलापत्रकं भार्ग्गी कृमिघ्नं हिंगुपौष्करं ॥ शठी
दार्वी त्रिवृन्मुस्तं वचा चेंद्रयवास्तथा ॥ वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुंचिका ॥ अम्लवेतसमम्लीका यवानी देवदारु च ॥ अभयाति
विषा श्यामा हपुषारग्वधं समं ॥ तिलमुष्कक शिग्रूणां कोकिलाक्षपलाशयोः ॥ क्षाराणि लोहकीट्टं च तप्तं गोमूत्रसेचितं ॥ कृत्वा तु समभा
गानि सूक्ष्मचूर्णानि कारयेत् ॥ मातुलुंगरसेनैव भावयेद्दिवसत्रयं ॥ दिनत्रयं तु शुक्तेन तथार्द्रकरसेन च ॥ इत्यग्निकारकं चूर्णं प्रदीप्ता
ग्निसमप्रभं ॥ उपयुक्तं विधानेन नाशयेदचिरान्गदान् ॥ अजीर्णं च तथा गुल्मं प्लीहानमुदराणि च ॥ उदराटोपं त्रवृद्धिं च हृच्छूलं वातशो
णितं ॥ प्रराहदष्टलवणान्दोषान्नष्टमग्निं प्रदीपयेत् ॥ वृहदग्निमुखं ॥ शुंठी मागधि वह्नि धान्यकयुतं हिंगुघनं दीपनं व्याघ्री गोक्षुरकाद्दि
जीरकविडंगसौवर्च्चलं सैंधवं ॥ सर्व्वाहारमजीर्णहारुचिकरं चूर्णीकृतं भागसमन्वितेन वडवानलप्रतिसमं कोष्ठाग्निसंदीपनं ॥ वृहद्वड
वानलं ॥ त्रिकटुकमजमोदा सैन्धवं जीरके द्वे समधरणधृतानामष्टमो हिंगुभागः ॥ प्रथमकवलभुक्तं सर्पिषा चूर्णमेतज्जनयति ज
ठराग्निं वातगुल्मान्निहंति ॥ हिंग्वाष्टकं ॥ सूक्ष्मैला जीरधान्याकं मुस्तमामलकानि च ॥ त्वकं पिप्पली शुंठी समभागं तु कारयेत् ॥ अन्न
पानेन योगेन — — वह्निकरं मतं ॥ रुच्यं हृद्यं प्रियं स्वादु पाचनं स्तंभनं परं ॥ एलादि ॥ तालीसं ग्रंथिधान्याभवरविडकणा कृष्णजीरं धदा

॥ सान्माद ॥
॥ ४७ ॥

म्लैः सामुद्रं विश्वजीरोषणामथरुचकं त्वकत्रुटिदाडिमं तैः ॥ विंशत्यष्टत्रिपंचैकचतुरवयवैर्भास्करोन्वथनाम्ना गुल्मार्शो – निकाशग्रहणिजठररुग्व
ग्गातश्लेष्मवाते ॥ भास्करलवणं ॥ ॥ शुंठीवारणिमिताकणार्णविमितादीप्यायवान्याक्रमाद्भागानांत्रितयंद्वयंचलवणाद्भागाःशिवेनस्तमा ॥ को
ष्णातोयरुगामयल्पमहृत्रोलिंबराजोदितं श्चूर्णांडीनपिमहमसाम्रकृतेनैकिंजरंनभोजना ॥ लोलिंबराजः ॥ ॥ विडरुचकयवानीजीरकैके
चपथ्यात्रिकटुकहुतभुग्भ्यंविनसांम्लाजमोदैः समविहितरजोभिर्धान्यकंतितिडीकंजरयतिनगकूटंकाकथाभोजनस्य ॥ सुधासागरः ॥
शुंठीकृष्णावलवणां अभयाचूर्णसंयुतं ॥ हिंगुमस्तुंवुनापीतंशूलाजीर्णविनाशनं ॥ शुंठ्यादि ॥ त्रिजातकंपिप्पलिकर्कटाख्यंतालीसपत्रं
मधुसंप्रयुक्ता ॥ अरोचकाशज्वरगुल्मशोफश्वासाग्निमांद्यारतिसारितेषु ॥ त्रिजातकादि ॥ ॥ पथ्यासौवर्चलाजाजीचूर्णमरिचसंयुतं ॥ पि
प्पलीनागरंपाठासारिवाबृहतीद्वयं ॥ चित्रकंकुटजंबीजंक्षारंलवणपंचकं ॥ चूर्णितंदधिमंडादिसुराकोष्णांबुनापिवेत् ॥ अग्निवृद्धिकरं
शूलंकोष्ठवातहरंपरं ॥ पथ्यादि ॥ अभयानिंबसंयुक्ताभक्षिताल– वृद्धिकृत् ॥ दद्रुविस्फोटकांश्चैवनाशयत्याशुदेहिनां ॥ अभयादि ॥
दहनाजमोदसैन्धवनागरमरिचाम्लतक्रेण ॥ सप्ताहादग्निबलंपांडुर्शोमर्दनंपरं ॥ दहनादि ॥ हरीतकीधान्यकृषोदसिद्धासपिप्पली
सैन्धवहिंगुचूर्णा ॥ सोद्गारधूमंभ्रशमप्यजीर्णंविजित्यसद्योजनयेत्क्षुधाच ॥ हरीतक्यादि ॥ विडंगभल्लातकचित्रकामृताःसनागराणास्त्र
ल्पगुडेनसर्पिषा ॥ निहंतियोमंदकृताशनानराः भवंतितेवाडवतुल्यवह्नयः ॥ विडंगादि ॥ चित्रकंहपुषाग्रंथिकंपिप्पलीसौवर्चलाजमो

॥ रमः ॥
॥ ४७ ॥

दाभिः ॥ विडधान्यशठीपुष्करमूलाजाजितित्तिडीकैश्च ॥ चव्ययवानीदाडिमपृथ्वीकेलाम्लवेतसैश्च समैः ॥ अग्निमुखोयं चूर्णः कांजिकमस्त्वम्ल
वारिसिक्थूनां ॥ पीतोन्यतमेन नरः भिर्ष्ठल्मातनुविवह्निप्रसाद शूलानि दुर्नामप्लीहोदरकफवातगदानाशु विनाशयति ॥ अग्निमुखं ॥ हिंगुसैन्धवकृ
ष्णानां कृष्णामूलकचोलयोः ॥ यवान्याश्च हरीतक्या दाडिमस्याम्लवेतसात् ॥ वह्निनागरनीक्षाणां भागाः संवर्द्धिताक्रमात् ॥ हिंगुद्वादशकं
नाम चूर्णं ब्रह्मविनिर्मितं ॥ अरुचिं पंचगुल्मांश्च हृद्रोगान् सनियच्छति ॥ अष्ठीलाध्मानतूनीनां छर्दमर्शांसि सेवनात् ॥ हिंगुद्वादशकं ॥
वकुलाकेशरं त्वक् चपत्रं तालीसकं तुगा ॥ पृथ्वीकाजीरकं धान्यं दाडिमं चार्द्रकार्षिकं ॥ पिप्पली पिप्पलीमूलं चव्यचित्रकनागरं ॥ मरिचं
दीप्यकं चैव वृक्षाम्लं चाम्लवेतसं ॥ अजमोदाजगंधा च दधित्थं चेति कार्षिकं प्रदेयमिह सूक्ष्मैलायाः शर्कराश्च चतुःपलं ॥ चूर्णमग्निप्र
सादाख्यं परमं रुचिवर्द्धनं ॥ प्लीहानं कासमर्शांसि शूलं श्वासं ज्वरं वमिं ॥ निहंति दीपयेदग्निं बलवर्णप्रदं परं ॥ वातानुलोमनं हृद्यं कंठ
जिह्वाविशोधनं ॥ चूर्णं शार्दूलकं नाम शार्दूलाग्निबलप्रदं ॥ आत्रेयमिहतं श्रेष्ठं समस्तर्षिगणैव पूजितं ॥ सूक्ष्मैलादिशार्दूलं ॥ ॥ पथ्या
नागरकृष्णाकरंजविल्वाग्निभिः सितातुल्यैः ॥ वडवामुखइव रयति वहुर्वपि भोजनचूर्णं वडवामुखं ॥ हिंग्वम्लवेतकटुत्रिकचित्रके
भ्यः सक्षारपौष्करफलत्रिकदाडिमेभ्यः ॥ कर्षान् पृथग्गुडपलान्यव चूर्णमद्धा ज्वालामुखोयमनलस्य करोति दीप्तिं ॥ ज्वालामुखं ॥
पिप्पल्यतिविषाहिंगुनागरेन्द्रयवा वचा ॥ पाठाजमोदाकटुकावृषसौवर्चलाभया ॥ वृषद्वादशकं चूर्णमजीर्णानाहशूलनुत् ॥ भगंदर

श्वासकाशौ मूत्रकृच्छ्रार्शसां हितं ॥ हृपुषादशकं ॥ ॥ नागरं कौटजं बीजं पिप्पली वृहती द्वयं ॥ चित्रका सारिवा पाठा क्षारं लवणपंचकं ॥ चूर्णयित्वानेनं मंददाधिको ह्यांवु कांजिके ॥ पिवेदग्निविवृद्ध्यर्थं कोष्णवातापहं परं ॥ नागरादि ॥ सैंधवसमूलमागधाचव्यानलनागरहरीतकी ॥ क्रमवृद्ध्या मग्निवृद्धिं करोति वडवानले ॥ वडवानलं ॥ त्रिफलात्रिकटुचित्रकचविकापुष्कराह्वपिप्पलीमूलैः ॥ पिष्टैः सपंचलवणैश्चिरविल्वरसप्लुतैरष्टकृत ॥ वडवानलचूर्णं संपीतं दध्यम्लसलिलाद्यैः ॥ प्रातर्यथाग्निखादन्नजठरानरमनीशयं कुरुते ॥ वृहद्वडवानलो ॥ ॥ इंद्राशनं दशपलं त्रिफलायाः पलत्रयं पलत्रयं त्र्यूषणास्य शिवायाश्च पलत्रयं ॥ आसां चूर्णं समादाय पलमात्रं पृथक् पृथक् ॥ भावयेदेकतः सर्वं भृंगराजरसेन च ॥ सुभावितमिदं कृत्वा स्निग्धभांडे निधापयेत् ॥ तल्लिहं मधुसर्पिभ्यां मंदाग्निः सहसा नरः ॥ मुच्यते ग्रहणीरोगात्कुदरोगात्सजाठरात् ॥ कृमिमेहविसर्प्पाश्वसामवातात्सशोणितात् ॥ नचात्रपरिहारोस्ति भैषज्यं सर्वकामिकं ॥ अस्याभ्यासादपलितं पुष्टिं वृद्धिं सुखं तथा ॥ रोगानीकप्रशांत्यर्थं मुनिभिः परिकीर्त्तितं ॥ त्रिसप्ताहप्रयोगाच्च नरः स्यान्निरुजः परं ॥ विजयादि ॥ ॥ कपूराड्क सूक्ष्मेला जातीफल लवंगकं ॥ शीतापला सर्वसमे पाययेत्तंडुलांवुना ॥ मूत्राघातं विस्पविंवनाशनं परमं मतं ॥ कर्पूरादि ॥ मरिचाग्निकरणापथ्या दाडिमं समहौषधं ॥ हिंगुसौवर्चलोपेतं चूर्णमग्निकरं परं ॥ मरिचादि ॥ सव्योषपिप्पलीमूलं त्रिवृद्दंति सचित्रकैः ॥ तच्चूर्णं गुडसंमिश्रं भक्षयेत्कल्यमुत्तमं ॥ एतद्गुडाष्टकं नाम वलवर्णाग्निवर्द्धनं ॥ शोथोदावर्त्तशूलघ्नं प्लीहपांडुमयापहं ॥ गुडाष्टकं ॥ सुहार्क चित्रकैरं

ऽवहरणं सप्तमतत्त्वं॥ त्रिफलापामार्गकदलीपलाशपारिभद्रकं॥ गृहीत्वा ज्वालयेदेतद्भस्माप्य मात्रं तु शीतलं॥ जलाढकसुपक्वं च यावच्च

दावशेषिकं॥ सुप्रसन्नं विनिस्राव्य लवणं प्रस्थसंयुतं॥ पक्वं निर्धूमकठिने श्लक्ष्णचूर्णीकृतं पुनः॥ यवानीजीरकं व्योषं जीरकं हयाहि

ङ्गुभिः॥ एतैरर्द्धपलान् भागान् चूर्णयित्वा प्रदापयेत्॥ आर्द्रकस्य रसेनापि भावयेच्छोषयेत्पुनः॥ उष्णोदकेन तच्चूर्णं पिबेत्प्रातः प्रकांक्षि

तः॥ जीर्णे चान्नं समश्नीयात् यूषैर्जाङ्गलजै रसैः॥ इषदम्लैः सलवणैः सुरेणो ह्येव वह्निदीपनैः॥ एतेनाग्निविवर्द्धनं बलमारोग्यमेव च॥ तत्रा

नुपानं यत्सात्म्यं॥ ~~तक्रं वा भोजने हितं~~॥ मंदाग्न्यर्शोविकारेषु वातश्लेष्मोद्भवेषु च॥ शर्कराश्मरिशूलेषु विरामज्ञानिलरोगिषु॥ क्षारो वैश्वान

लो नाम हितो वैद्यैः सुपूजितः॥ ~~वैश्वानलक्षारः~~॥ ॥ एलालवंगमरिचं कृष्णा शृङ्गिसमन्वितं॥ त्रुकनागरसिंधूत्थमूषकं पलपंचकं॥ ए

षां चूर्णं वस्त्रपूतं क्रव्यादाग्निनिरिच्यते॥ ~~क्रव्यादकल्पः~~॥ सगुर्वीयथास्यान्मथितपरिपिष्य दशपलान्करामूलोपेता जरणधनिकासिंधुज

विडु॥ सतालीशं पञ्चांग जमपिप्पथ्यग्निजन्युगलोन्मितं षड्वित्वमणाडुवकमपिसाद्वलवणं॥ सिताज्ञातीशुंठीमरिचमपिपादोनकुडवं त्वगे

लाविल्वांशेकरककुडवोर्द्धाम्लविडुल॥ पलदंदं तु क्वाथ्यलमपिपथ्यकुंभध्यारणीसितादंतीहिंग्वामलकशठीमूलाग्नियुगलं॥ अपिक्षा

राढ्यक्षाम्लकमपिसदीप्यनिखिलतोलवंगं त्वक्पांशंसर ══ सफलपूरादिसलिलैः॥ विभाव्यैतन्मोक्ते लवणमितियज्ञास्करमदो

भजन्मर्त्यो धैः स्यादनलबलवीर्योन्नितवपुः॥ मरुद्भूलं गुल्मं गदजविविधात्रीस्थहृद्रोगरोधं कोष्ठस्थं मरुतमपि च प्लीहजठरं तथामो

॥ सात्पद ॥
॥ ४९ ॥

न्थं दोषंग्रहरिणगदंपांडुदरंगदाघ्नेकार्त्तजीत्वानपुनरिदमीयास्यदमयं ॥ द्वितीयभास्करलवणं ॥ इत्यजीर्णाधिकारः ॥ अथ कृमिः ॥ व्योषशि
ग्रुविडंगानिसमभागानिचूर्णयेत् ॥ तक्रयुक्तंपिवेन्नित्यंसर्वकृमिविनाशनं ॥ व्योषादि ॥ विडंगत्रिफलाकृष्णाचूर्णलीढ्वासमाक्षिकं ॥ हंतिकु
ष्ठकृमीन्मेहांदुर्नामंचभगंदरान् ॥ विडंगादिः ॥ विडंगत्रिफलाकृष्णासूक्ष्मेलातिविषासमा ॥ माक्षिकेनलिहन्नित्यंकृमिरोगोविनश्यति
॥ विडंगादि ॥ विडंगवाकुचीमूलंत्रिकटुंदंतिमेवच ॥ पाठानुरुष्करंचैवपर्णीचसप्तपर्णिकं ॥ सैन्धवशुक्तिकामात्रंसमभागानिचू
र्णयेत् ॥ मस्तुनासहसंपीतकुक्षोकृमिहरंपरं ॥ विडंगादि ॥ पलासवीजानिसुचूर्णितानिधात्रीरसेनत्रिगुणीकृतानि ॥ विडंगयादं
समधुप्लुतानिमासेनकष्टंकृमिन्निहंति ॥ पलाशवीजादि ॥ विडंगमजमोदाचवीजंकिंशुकसैन्धवं ॥ द्विजीरकंत्र्यूषणंचव्यंचित्रकेन्द्रय
वानिच ॥ मातुलुंगस्यमूलानिलवंगंसमकारयेत् ॥ सर्पिर्गुडःसिताक्षौद्रंयथापर्यायएवच ॥ अजामूत्रयुतंपाच्यंसर्वकृमिनिवर्त्तये ॥ आ
मवातातिसारंचछर्दिंप्लीहोदराणिच ॥ वातशूलानिगुल्मंचहृद्ग्रहंरक्तातिसारहा ॥ विडंगादि ॥ पिप्पलीपिप्पलीमूलंसैन्धवंकृष्णजीर
कं ॥ चव्यचित्रकतालीसपत्रकंनागकेशरं ॥ एषांद्विपलिकाभागान्पंचसौवर्चलस्यच ॥ मरिचजाजीशुंठीनामेकैकस्यपलंपलं ॥ दाडि
मान्कुडवंचैवंद्विपलोचाम्लवेतसात् ॥ सर्वमेकत्रसंयोज्ययोजयेत्कुशलोभिषक् ॥ पिप्पल्याद्यमिदंचूर्णनष्टवह्नेश्चदीपनं ॥ अर्शांसिग्र
हणीगुल्ममुदरंसभगंदरं ॥ कृमिकंडूरुचिहरंसुरयोष्णोदकेनवा ॥ नातःपरतरंकिंचिदामशोथनिषूदनं ॥ पिप्पल्यादि ॥ ॥ पाथंकृत्र

राम:
४९

मविडंगंलांगलीभल्लातकन्तथोशीरं ॥ श्रीविष्टकसर्जरसंचंदनमरपत्रकच्चाकुष्टं ॥ एषसुगंधधूपोमसकानांविनाशकः ॥ शर्य्यासुमत्कुणा
नांशिरसिजगात्रेषुकानां ॥ पाथंकसमादिधूपः ॥ जंतुसर्जरसोशीमसर्षपापत्रवालकैः ॥ सवेह्वारुष्करसुरैर्क्रैसमैरर्जुनस्यच ॥ धूपोवासगृहे
हंतिविषस्थावरजंगमं ॥ नतत्रकीटाःसविषानोंदुरासरीसृपाः ॥ नकृत्याकार्मणाद्याश्चधूपोयत्रप्रदह्यते ॥ कीटादिधूपः ॥ इतिकृम्य
धिकारः ॥ अथपांडुकामलाः ॥ चित्रकंत्रिफला — — विडंगामरसारिवा ॥ मधुसर्पियुतोलेहोकामलापांडुरोगहा ॥ चित्रकादि ॥ नागरं
सैन्धवंवह्निमरिचवाजमोदकं ॥ युक्तंतक्रेणापीत्वापांडुशोफमर्दनंपरं ॥ नागरादि ॥ द्विशर्करात्रिवृच्चूर्णंपलार्द्धंपैत्तिकेपिबेत् ॥ शर्करादि
सितासितावलायष्टित्रिफलारजनीयुगैः ॥ लेहंलीढ्वासमध्वाज्यंहल्लीमकप्रशांतये ॥ सितादि ॥ इतिपांडुकामलाधिकारः ॥ अथरक्त
पित्तः ॥ दुरालभापर्पटकंप्रियंगुभूनिंबवासाकटुरोहिणीनां ॥ चूर्णंपिबेच्छर्करयाजलेनतृष्णास्वयुक्तंज्वरदाहपित्तं ॥ दुरालभादि ॥ हस्ति
नीलोत्पलसितामधुकंपद्मकेशरं ॥ पीतंवनजलेनैवविकारेरक्तपित्तके ॥ हस्त्यादि ॥ पद्मकंपद्मकिंजल्कशर्करालोध्रसंयुतं ॥ उत्पलेव
समायुक्तंपिबेत्तंडुलवारिणा ॥ रक्तपित्तात्प्रमुच्येतनात्रकार्याविचारणा ॥ पद्मकादि ॥ त्रिवृतापिप्पलीश्यामाजातिकोशस्यकेशरं ॥ त्रिफ
लामागधीमुस्तसूक्ष्मैलावचयासकं ॥ एतानिसमभागानिद्राक्षाशर्करयायुतं ॥ शर्करासर्वसंतुल्यंलेहयेमधुसर्पिषा ॥ त्रिवृतादिकले
होयंश्रेष्ठंपित्तविकारिणां ॥ तृष्णाकासारुचिश्वासदाहमूर्छाज्वरांतकृत् ॥ छर्दिहिक्कानिहंत्याशुरक्तपित्तंसुदुस्तरं ॥ त्रिवृतादि ॥ ॥

॥ सान्यद ॥
॥ ५० ॥

ह्रीवेलमुत्पलंधान्यंचंदनंयष्टिकामृता ॥ वृषोशीरयुतंलेह्यंशर्करामधुसंयुता ॥ रक्तपित्तंजयेदुग्रंतृष्णादाहज्वरान्वितं ॥ ह्रीवेरादि ॥ ह्रीवेरंचंद
नोशीरमुस्तपर्पटकामृता ॥ दुरालभायतश्चैवपिपासारक्तपित्तजित् ॥ ह्रीवेरादि ॥ प्रियंगुचंदनंलोध्रश्लेक्ष्माचूर्णानिशर्करा ॥ वासक्काथरसः
क्षौद्ररक्तपित्तनिसूदनः ॥ नासिकामुखपायुभ्योयोनिमेढ्रात्स्रुवापिजित् ॥ प्रियंग्वादि ॥ शारिवापद्मकोशीरमधुकंचंदनद्वयं ॥ काश्मर्यमधु
कंचेतिसारिवादिरयंगणः ॥ रक्तपित्तंनिहंत्याशुतृष्णांवापिप्रमाथिनी ॥ तीव्रपित्तज्वरच्छर्दिमहादाहविनाशनं ॥ सारिवादि ॥ मद्वीकाचं
दनंलोध्रप्रियंगुचेतिचूर्णयेत् ॥ चूर्णमेतत्पिवेत्क्षौद्रवासारससमन्वितं ॥ ह्रीवेरादि ॥ ह्रीवेरंचंदनोशीरमुस्तपर्पटकामृता ॥ दुरालभाय
तश्चैवपिपासारक्तपित्तजित् ॥ ह्रीवेरादि ॥ प्रियंगुचंदनंलोध्रश्लेक्ष्माचूर्णानिशर्करा ॥ वासक्काथरसःक्षौद्ररक्तपित्तनिषूदनः ॥ नासिकामु
खपायुभ्योयोनिमेढ्रात्स्रुवापिजित् ॥ प्रियंग्वादि ॥ शारिवापद्मकोशीरमधुकंचंदनद्वयं ॥ काश्मर्यमधुकंचेतिसारिवादिरयंगणः ॥ रक्तपि
त्तंनिहंत्याशुतृष्णांवापिप्रमाथिनी ॥ तीव्रपित्तज्वरच्छर्दिमहादाहविनाशनं ॥ सारिवादि ॥ मद्वीकाचंदनंलोध्रप्रियंगुचेतिचूर्णयेत् ॥ चूर्ण
मेतत्पिवेत्क्षौद्रवासारससमन्वितं ॥ नासिकामुखपायुभ्योमेढ्रयोन्याभिवेगतः ॥ रक्तपित्तंस्रवद्धंतिसिद्धएषप्रयोगराट् ॥ मद्वीका
दि ॥ ॥ पिवेद्वापित्तशांत्यर्थंशीततोयेनचंदनं ॥ चंदनादि ॥ यष्टीधात्रीवलाद्राक्षाएलाचंदनसारिवा ॥ तुगाक्षीरीसखर्जूरंदाडि
मंप्रेषयेत्समं ॥ शर्करामधुसंयुक्तंभक्षयेत्प्रातरुत्थितः ॥ रसराजमितिख्यातंरक्तपित्तविनाशनं ॥ रसराजः ॥ पत्रत्वगेलानतचंदनानां

॥ राम: ॥
॥ ५० ॥

रणमावशुंठीमधुकोत्पलानां॥ सधात्रिमांसीछित्तरोत्तरयासां चूर्णं सिताक्षौद्रसमन्विताभ्यां॥ खादेज्ज्वरे लोहितपित्तयुक्ते कासे क्षये
शोणितमूत्रकृच्छ्रे॥ रक्तेतिमात्रे पतिते मुखे वगुदेथ नासामतिमेढ्रयोनौ॥ प्रोक्तं प्रशस्तं रक्तविनिग्रहार्थं चूर्णं वसिष्ठेन महागद
घ्नं॥ ~~पत्रकादि~~॥ चंदनं पर्पटं मुस्तं तृगाद्राक्षासजीरकं॥ तुल्यभयासमं भागं लेह्येन्मधुनासह॥ प्रलापश्वासहिक्कां च तृष्णादाहभ्र
मोहवि:॥ मूर्छाछर्दित्रिदोषं च ज्वरघ्नं विषमं शिशो॥ ~~बालचंदनादि~~॥ चंदनं मधुकं लोध्रं नीलोत्पलकमेहकः॥ रक्तपित्तहरं योगं
पानवंनयनादिषु॥ ~~चंदनादि~~॥ चंदनेन्द्रयवापथ्याकटुकासकसेरुकं॥ गुडूचीवासकं लोध्रं पिप्पलीक्षौद्रसंयुतं॥ कफान्विते जये
द्रक्तं तृष्णाकासज्वरापहं॥ ~~चंदनादि~~॥ चंदनं बलवंगान्तिकेशरद्वयमेवच॥ कपित्थमुद्गमुस्तानि उशीरं विश्वभेषजं॥ दाडिमस्यत्व
चं लोध्रं त्वक्क्षीरी शर्करामधुः॥ रक्तपित्तक्षयकासहृद्यं तीसारनाशनं॥ पित्तोत्तरे संनिपाते हितं सोपद्रवेषु च॥ ~~चंदनादि~~॥ चं
दननगरमुस्तप्रियंगुनागकेशरं॥ ह्रीवेरं पद्मकोशीरं लवंगं जातिपत्रकं॥ सूक्ष्मेलानलदं पत्रं मधुकं कुंकुमानि च॥ कर्षांशं केशरं
भृंगं त्र्यूषणां च पलार्द्धकं॥ तुगायाः पलसंयुक्तं शर्करापृग्रणीकृतं॥ तच्चूर्णं श्वासकासघ्नं हिध्मादौर्गंध्यनाशनं॥ जीर्णज्वरमतीसारं
तृष्णाशोषमरोचकं॥ कृच्छ्राणि विद्रधीगुल्मंपित्तास्रकफहरं परं॥ ~~ज्येष्ठचंदनादि~~॥ ॥चंदनं पर्पटोशीरं तालीसत्रिफलात्रिवृत
ह्रीवेरमुस्तकं धान्यं प्रियंगुनागकेशरं॥ उत्पलं पद्मकं यष्टी रक्तचंदनवासकं॥ त्रिजातकं तृगाक्षीरी जाजी ह्रीवेर शर्करा॥ मधुनासं

हलेहोयं रक्तपित्तज्वरापहं ॥ दाहमूर्छाहविश्छर्दिविषमज्वरनाशनं ॥ मध्यमचंदनादि ॥ चंदनं नलदं लोध्रमुशीरं पद्मकेशरं ॥ नागपुष्पं च बि-
ल्वं च भद्रमुस्तामशर्कराः ॥ ह्रीवेरं चैव पाठा च कुटजस्य फलत्वचं ॥ शृंगवेरं सातिविषा धातकी सरसांजनं ॥ आम्रास्थिजंबुसाराख्यंस्तथा मोचर-
सोद्भवं ॥ नीलोत्पलं समंगा च सूक्ष्मेला दाडिमत्वचं ॥ चतुर्विंशतिरेतानि समभागानि चूर्णयेत् ॥ तंडुलोदकसंयुक्तं मधुनासह योजयेत् ॥ योगो
लोहितपित्तानामर्शसां ज्वरिणां तथा ॥ मूर्छामदापस्मारानां तृष्णार्त्तानां च प्रदापयेत् ॥ अतीसारं तथा छर्दि स्त्रीणां च रजसाग्रहं ॥ प्रच्युता-
नां च गर्भानां स्थापनं परमुच्यते ॥ अश्विभ्यां निर्मितो योगो रक्तपित्तनिवर्हणं ॥ तृतीयचंदनादि ॥ चंदनं तुगाक्षीरी पिप्पली बकुलत्व-
चं ॥ केशरं पत्रकं पद्मं मुस्ताशीरं प्रियंगुकं ॥ लवंग जीरकं धान्यं त्रिफला नीलमुत्पलं ॥ पर्पटं त्रिफला वासा तालीसं रक्तचंदनं ॥ शर्करा मधु-
नालेहं ज्ञानीयात्कुशलो भिषक् ॥ परमं रक्तपित्तघ्नं संनिपातहरं परं ॥ हृत्पार्श्वशूल श्वासं च कासं हिक्कामदभ्रमं ॥ नखनेत्रहरितं छर्दि
मूर्छां तापहं ॥ ज्वरस्त्रीणां विविधघ्नं रेचनं बलवर्द्धनं ॥ बृहच्चंदनादि ॥ ॥ श्रीखंडं मरिचं लवंगफलिनी द्राक्षा त्वचं पत्रजं रक्तं चंदनबाल-
कं मधुनिशा शुंठी कणा ग्रंथिकैः ॥ धान्याजीरककेशरं जलफलं खर्जूरसमासर्करं चूर्णं भेषजमिश्रितं समसिता मात्रा विडालपदं ॥ श्वा-
सः शोथयुतः क्षयज्वरहरं पित्तप्रमेहापहं रक्तस्तापतृट्प्रकासनविराध्याधिभयं नाशनं ॥ छिन्ने देहपतन्त्रयापि युगलं सर्वातिसारापहं
सर्वव्याधिविनाशनं निगदितं श्रीखंडचूर्णं बुधैः ॥ श्रीखंडादि ॥ ॥ कर्पूरद्राक्षासूक्ष्मेला मधुनासह लेहयेत् ॥ ज्वरतृष्णां निहंत्याशु हि

क्ष्माश्वासगलग्रहान् ॥ कर्पूरादि ॥ कर्पूरचंदनोशीरमरालं श्वेतचंदनं ॥ शतावरीबालकं चवनीलोत्पलसशर्करा ॥ चूर्णितानाशीततोयेनपीतास्रक्
पित्तहृज्ज्वरान् ॥ कनिष्ठकर्पूरादि ॥ हिमदलशशिनागःवारियासोपलानांफलत्रिकघनपद्मपद्मकैंकुंकुमानि ॥ सितसममधुभागोषट्पद
यारसेनजयतिकलुषरोगंसंनिपातंत्रिदोषं ॥ कर्पूरादि ॥ कर्पूरजातीफलसेव्यचंदनंकृष्णावनजीरकमुस्तमुत्पलं ॥ लवंगद्राक्षाफलधात्रि
कशर्करंमजाजिपत्रंनलदंसहांबुना ॥ सिताष्टभागंसमसूक्ष्मचूर्णितंलेहंप्रकुर्यान्मधुनाप्रयुक्तं ॥ सुरोचनंपाचनमग्निवर्द्धनंबलप्रदंवृष्य
तमंत्रिदोषनुत् ॥ तृष्णातिमूर्छाभ्रमरक्तपित्तंनिहंतिमोहंभयसन्निपातं ॥ ज्येष्ठकर्पूरादि ॥ कर्पूरंचंदनंशीरमधुकंलोध्रसारिवा ॥ ह्रीवेरधा
तकीमुस्तेशणामामुत्पलकेशरं ॥ शर्करामधुनायुक्तंरक्तपित्तंवमिंहरेत् ॥ कर्पूराद्यमिदंचूर्णंसन्निपातज्वरापहं ॥ मध्यमकर्पूरादि ॥ ॥
कर्पूरचंदनोशीरंपटोलंमुस्तधान्यकं ॥ द्राक्षापर्पटकंपासरक्तचंदनमुत्पलं ॥ ह्रीवेरंवासकंभृंगंशर्कराचूर्णीकृतं ॥ मधुनालेहयेच्चै
वरक्तपित्तज्वरापहं ॥ त्रिदोषज्वरदाहघ्नंप्रलापभ्रमनाशनं ॥ पित्तोत्तरेसन्निपातेहितंचैवावलेहितं ॥ वृहत्कर्पूरादि ॥ तालीसकेशरतुगा
त्रिकटूत्वजातीएलालवंगदलमर्द्धकृतानुभागात् ॥ तेसर्वचूर्णांक्रियतेसितार्द्धंकाशाहग्निज्वरहरंविषमज्वरंच ॥ तालीसादि ॥ ॥
इतिरक्तपित्ताधिकारः ॥ अथक्षयः ॥ सितोपलातुगाक्षीरीपिप्पलीबहुलात्वचा ॥ अन्यादूर्ध्वद्विगुणितंलेहयेन्मधुसर्पिषा ॥ चूर्णितंराज
रोगार्त्तंश्वासंकाशंज्वरातुरं ॥ पार्श्वशूलिनमल्पाग्निसुप्तजिह्वंरुचिच्युतं ॥ हस्तपादांगदाहेषुज्वरेरक्तेतथोर्ध्वगे ॥ सितोपलादि ॥ कृष्णाद्रा

श्वासितालेह क्षये क्षौद्रेणातैलयुक् ॥ कृष्मादि ॥ मधुसर्पियुतो कृष्णा अश्वगंधसितोत्पला ॥ व्योषवव्यविडंगानि चूर्णयित्वालिहेन्नरः ॥ स
र्पिर्मधुभ्यां प्रयुंजीत क्षयरोगान्न संशयः ॥ कृष्मादि ॥ शृंगपर्ज्जुनाश्वगंधानां वलापुष्करजाह्वयाद्धि त्वातालीसकं लिह्यान्मधुसर्पिषुय
क्ष्मणां ॥ शृंग्यादि ॥ यवानीतिंतिडीकं चनागरं चाम्लवेतसं ॥ दाडिमं वदरं चाम्लं कर्षकानुपकल्पयेत् ॥ धान्यसौवर्चलाजाजीवरां
गं चार्द्धकार्षिकं ॥ पिप्पलीनां शतैश्चैकं द्वे शते मरिचस्य च ॥ शार्करायाश्च चत्वारि पलान्येकत्र चूर्णयेत् ॥ जिह्वासंशोधनं हृद्यं तच्चू
र्णं भक्तरोचकं ॥ हृत्प्लीहपार्श्वशूलघ्नं विवंधानाहनाशनं ॥ काशश्वासहरं ग्राही ग्रहण्यर्शोविवंधनुत् ॥ यवान्यादि ॥ ककुभ
त्वङ्नागवलावानरीवीजानि सुचूर्णानि पयसा ॥ पीते घृतमधुयुक्तं ससितं काशादि यक्ष्महरं ॥ ककुभादि ॥ महौषधसमं तालीस
पत्रं पद्मकेशरं ॥ जीवंतीमभयां मण्डी चूर्णीकृत्य प्रयोजयेत् ॥ शर्कराश्च क्षिपेत्तत्र गुडूच्यासत्वमेव च ॥ स्थिरापुनर्नवैरंडवृषवास
कवीजका ॥ स्वदंष्ट्राभिश्चाश्वगंधाविदारीहंसपादिका ॥ वृहत्यौ वृश्चिकाली च द्वे सह मर्कटीवला ॥ शोषगुल्मानिलश्वासकाश
पित्तहरोगणाः ॥ महौषधादि ॥ कर्पूरत्वचकंकोलजातीफलदलं समं ॥ लवंगनागमरिचं कृष्णाशुंठीविवर्जितं ॥ चूर्णसमसितं हृ
द्यं रोचनं क्षयकाशनुत् ॥ वैस्वर्यश्वासगुल्मार्शोछर्दिकंठामयापहं ॥ प्रयुक्तं चान्नपानेषु भेषजं दोषरोगिहितं ॥ कर्पूरादि ॥ लवंगकंकोलं
मुशीरचंदनं नतं सनीलोत्पलकृष्णजीरकं ॥ एलासकृष्णागुरुभृंगकेशरं कणासविश्वानलदं सहांबुना ॥ कर्पूरजातीफलवंसरोचना

सिताष्टभागंसमगृह्यचूर्णितं॥ सुरोचनंतर्पणमग्निदीपनंबलप्रदंवृष्यतमंत्रिदोषजित्॥ उरोविबंधंतमकंगलग्रहंसकासहिक्कारु
चियक्ष्मपीनसं॥ ग्रहणपतीसारमुरक्षतंक्षयंप्रमेहगुल्मांश्चनिहंतिसत्वरं॥ लवंगादि॥ कर्पूरकंकोललवंगभृंगमेलासयष्टीमधुजी
रकंच॥ वत्सादनीसत्वककूरविग्रहंसिताष्टभागंसमसूक्ष्मचूर्णितं॥ समार्कलोहांबुदसेभवंरजःसमासमेतेनमधुप्रयोज्यं॥ निहं
तियक्ष्माणमुरक्षतंक्षयंसकासमेहज्वरपांडुरोगान्॥ ग्रहणापतीसारमथाग्निदीपनंसुरोचनंपुष्यतमंत्रिदोषजित्॥ श्वासादिछ
र्दीनिलशूलतापान्कृतासवृद्धिंवशरीरकंहरां॥ वृहत्कर्पूरादि॥ ॥तालीसमरिचंनागरंपिप्पलीतन्मूलंत्रुटिदलत्वग्भिः॥ जाती
फलम्एलालंत्वक्क्षीरीमुस्तंतुल्यांशाः॥ चूर्णंत्रिगुणितंसितोपलमेतद्रुच्यंप्रदीपनंहृद्यं॥ ज्वररक्तपित्तकासश्वासक्षयगुल्मशूल
घ्नं॥ कृमयतीसारग्रहणीहृद्रोगानाहमूर्छामानतदाहं॥ करचरणादिषुशमयतिपांडुगदंकंठरोगंच॥ तालीसादि॥ तालीसंचित्रकं
चोषंदाडिमंतितिडीयकं॥ एतेषांपलिकाभागान्दीप्यकोगजपिप्पली॥ यवानीशतवेध्यंचकृमिजित्कृथिकंतथा॥ त्वक्चकेशरंचैव
हपुषाजातिधान्यकं॥ जातीफलंलवंगंचत्रिसुगंधिकराणातुगा॥ एतेषांकर्षमेकंतुद्विगुणाशर्कराभवेत्॥ पीनसंराजयक्ष्माणंहृ
द्रोगंचापलत्रकं॥ मूत्रकृच्छ्रंनेत्ररोगंपांडुरोगंहलीमलं॥ आशीतिर्वातजांरोगांश्चत्वारिंशच्चपैत्तिकान्॥ विंशतिःश्लैष्मिकांश्चैवएका
दशगलग्रहान्॥ ज्वरांशूलानिचार्शांसिरक्षयभगंदरान्॥ वैश्वर्यंग्रहणीरोगमुरुस्तंभंहनुग्रहं॥ महातालीसमित्येतत्सर्वान्व्याधीन्

॥ सात्मद ॥
॥ ५३ ॥

विनश्यति ॥ महानालीसादि ॥ सूक्ष्मेलाकेशरंत्वकवपत्रंतालीसकंतुगा ॥ पथ्वीकादाडिमोदाजगंधाचदधि:स्थौवेतिकार्षिकं ॥ प्रदेयमिह
शुद्धायाशर्कराश्चचतु:पले ॥ चूर्णमग्निप्रसादाख्यंपरमंमरुवर्द्धनं ॥ प्लीहकासामयार्शांसिश्वासशूलंज्वरंवमिं ॥ निहंतिदीपयेत्य
ग्निंवलवर्णप्रदंवरं ॥ वातानुलोमनंहृद्यंकंठजिह्वाविशोधनं ॥ सूक्ष्मेलादि ॥ ॥ इतिराजयक्ष्माधिकार: ॥ अथकास: ॥ शठीशृंगी
कणाभार्गीगुडवारिदवासकै: ॥ सतैलैर्वातकाशघ्नोलेहोयमपराजित: ॥ शठ्यादि ॥ ॥ भार्गीद्राक्षाशठीशृंगीपिप्पलीविश्वभेषजै:
॥ गुडतैलयुतोलेहोहितोमारुतकाशिनां ॥ भार्ग्यादि ॥ चूर्णितानिविश्वदु:स्पर्शाशृंगीद्राक्षाशठीसिता ॥ लीढ्वातैलेनवातोत्थकासं
जयतिदुस्तरं ॥ विश्वादि ॥ खर्जूरंपिप्पलीद्राक्षासितालाजासमाक्षिका: ॥ मधुसर्पिर्युतोलेहपित्तकाशहर:पर: ॥ खर्जूरादि ॥ ॥
द्राक्षामधुकखर्जूरपिप्पलीमरिचान्वितं ॥ पित्तकाशंहरेदेतल्लिह्यान्माक्षिकसर्पिषा ॥ द्राक्षादि ॥ ॥ व्योषपुष्करमहीकात्रिफलाचि
त्रकंशठी ॥ मधुतैलयुतोलेहकफकाशनिवर्हण: ॥ व्योषादि ॥ शुंठीशठीपुष्करस्यासभार्गीशृंगीकणाभ्यांवृहतीद्वयंच ॥ लेह:स
मध्वाज्यसितानिहंतिश्लेष्मानिलोत्थंप्रशमंप्रयांति ॥ शुंठ्यादि ॥ कट्फलंकत्तृणंभार्गीमुस्तधान्यंवचाभया ॥ शृंगीपर्पटकंशुंठीसु
राह्वंवलजामतो ॥ मधुसिंगुयुतोलेहकाशंवातकफान्विते ॥ शूलकंठग्रहेरोगेश्वासहिक्काज्वरेषुच ॥ कट्फलादि ॥ ॥ लवंगजा
तीफलपिप्पलीनांभागप्रकल्प्याक्षसमानमीषां ॥ पलार्द्धमात्रंमरिचंप्रदेयंपलानिचत्वारिमहौषधस्य ॥ सितासमस्तेनसमाप्यचूर्णितो

॥ राम: ॥
॥ ५३ ॥

गानिमामाशुवल्लानिहंति॥ काशश्वारोचकमेहगुल्मश्वासाग्निमांद्यग्रहणीविकारान्॥ लवंगादि॥ पथ्याव्योषविडंगानित्रिजी
रं वह्निग्रंथिकं॥ पलासबीजविल्वानित्रिजातंशर्करामधुः॥ श्वासकाशातिसारंचहन्तिचक्रिमिनाशनं॥ पथ्यादि॥ शठीपुष्कर
मूलानिभद्रमुस्तायवानिका॥ त्रिकटुग्रंथिकं पाठाचव्यभार्गीत्वतीविषा॥ चातुर्जातकसंचूर्णं मधुनाश्वासकाशहा॥ शठ्यादि॥
त्वक्क्षीरंमधुकंद्राक्षापिप्पलीशर्कराघृतं॥ लाजासममधुलेहोयंसर्वकाशनिवारणं॥ त्वक्क्षीरादि॥ मधुनाशखचूर्णंवला
क्षाजीवकमाक्षिकं॥ लेहशर्करयायुक्तंक्षतकाशनिवारणं॥ शखचूर्णादि॥ मधूलिकातुगाक्षीरीपिप्पलीशर्करातथा॥ द्रा
क्षाक्षौद्रसमायुक्तंक्षतजंपित्तकाशहा॥ मधूलिकादि॥ ॥लाक्षाहरिद्रामंजिष्ठापिप्पलीदेवदारुच॥ एतच्चूर्णीकृतंसर्पिःक्ष
तकाशविनाशनं॥ लाक्षादि॥ पिप्पलीपद्मकंलाक्षासपक्वंबृहतीफलं॥ घृतक्षौद्रयुतोलेहःक्षतकाशनिबर्हणं॥ पिप्पल्यादि॥ ॥
दाडिमस्यत्वचंलोध्रंभद्रमुस्तामुशीरकं॥ विल्वशर्करसंयुक्तंक्षयजिद्रक्तपित्तहा॥ दाडिमादि॥ ॥पथ्याशुंठीसमुस्तानामेतेषांप्रति
तोलकं॥ द्विगुणंचगुडप्रोक्तंचूर्णंकाशहरंपरं॥ पथ्यादि॥ त्रिकटुदाडिमयुतेतावन्मानगुडंभवेत्॥ पिप्पलीचूर्णसंयुक्तंतुगाक्षी
रीसमन्वितं॥ चूर्णोयंगौडवप्रोक्तंकाशंहंतिनसंशयः॥ कटुत्रयादि॥ ॥देवदारुवलारास्नात्रिफलाव्योषपद्मकैः॥ विडंगानि
सितातुल्यानितच्चूर्णंपंचकाशजित्॥ देवदार्वादि॥ ॥नागरंपिप्पलीपाठाभार्गीचमरिचानिच॥ लेहोयंमधुनाकाशश्लेष्मछर्दिनि

सूदनं ॥ नागरादि ॥ पिप्पलीत्रिफलाचूर्णंमधुघृतसमन्वितं ॥ एषलेहप्रयोक्तव्यंशोषकाशज्वरापहं ॥ पिप्पल्यादि ॥ भार्गीकर्कटशृंगीच
शठीशुंठीतुगाभया ॥ द्विगुणांपुष्करंदत्वाघृतमाक्षिकसंयुतं ॥ लेहोयंसर्वकाशघ्नोहिक्काश्वासविनाशनं ॥ भार्ग्यादि ॥ कट्फलंशृंग
वेरंचपिप्पलीमरिचानिच ॥ शठीपुष्करमूलंचभार्गीमधुरसावचा ॥ अभयाकुष्ठलवणंशृंगीकर्कटकंतथा ॥ एतच्चूर्णवरंश्रेष्ठंक्वा
थंवामधुमूर्छितः ॥ पीनसेस्वरभेदेचतमकेसहलीमके ॥ सन्निपातेकफेश्वासेकाशेपिचप्रशस्यते ॥ कट्फलादि ॥ तालीसत्रिकटु
चव्यंचित्रकंग्रंथिकंतथा ॥ चातुर्जाततुगाक्षीरीधात्रीफलशठीसमा ॥ भार्गीपुष्करमूलंचविडंगांश्चदुरालभा ॥ अजमोदंजीरकेशृं
गीकर्कटमेवच ॥ एतानिसमभागानिचूर्णयेद्भिषगुत्तमः ॥ मधुनाप्युक्तलेहोयंकाशश्वासारुचिंहरेत ॥ प्लीहज्वरहरच्छर्दिक्षयोपहत
चेतसां ॥ श्रेष्ठंरसायनंप्रोक्तंदीर्घायुबलवर्द्धनं ॥ ज्येष्ठतालीसादि ॥ तालीसद्विगुणांत्रीक्षांशुंठीत्रिगुणितांतथा ॥ चतुर्गुणांचपिप्पल्यो
तुगायाभागपंचमं ॥ त्रिजातपंचमोभागपिप्पल्यष्टगुणांतथा ॥ शर्करासर्वतुल्यानोरवादेच्चूर्णंयथामतं ॥ प्लीहंक्षयपंचकाशपीनसकृ
मिशांतये ॥ अरुचिंनाशयत्याशुवृक्षमिंद्राशनिर्यथा ॥ मध्यमतालिसादि ॥ तालीसकेशरतुगात्रिकटुचव्यजाजीएलालवंगदलम
र्द्धकृमाक्षमाषान् ॥ चत्वारितत्रगुडभागहितंह्यजीर्णकाशज्वरारुचिहरंविषमज्वरार्त्ते ॥ कनिष्ठतालीसादि ॥ तालीसंमरिचंशुंठीकृ
ष्णाष्टगुणशर्करा ॥ काशश्वासारुचिछर्दिप्लीहशोफाग्निमांद्यता ॥ हृत्पांडुग्रहणीगुल्मछर्द्यतीसारनाशनं ॥ तालीसादि ॥ ॥

इति कासाधिकारः॥ ॥अथ हिक्का॥ कोलमज्जांजनं लाजातिक्ताकांवनगैरिकं॥ कृष्णा धात्री शिवा शुंठी कासीसं दधिनाम च॥ पाटल्या
सफलंपुष्पंकृष्णा खर्जूरमुस्तकं॥ षडेते पादिका लेहा हिक्काघ्ना मधुसंयुता॥ कोलादि॥ हिक्काश्वासी पिबेद्भार्गीं सविश्वामुष्णवारिणा
भार्ग्यादि॥ नागरं वासितां भार्गीं सौवर्चलसमन्वितं॥ मयूरचंद्रिकादग्धा लिह्यान्माक्षिकसंयुतं॥ असाध्यो जायते हिक्का हंत्यव
श्यं न संशयः॥ नागरादि॥ शृंगी कटुत्रयफलत्रिकर्कटकारी भार्गीसपुष्करजटालवणानि पंच चूर्णी भवेदशिशिरेण जलेन
हिक्काश्वासोर्द्ध्ववातकसनारुचिपीनसेषु॥ शृंग्यादि॥ इति हिक्काधिकारः॥ ॥अथ श्वासः॥ त्वगेलांबुशठीविश्वजीवंतिपुष्कराज
यः॥ रुचकागुरुकृष्णाद्भुरासागरमाक्षिकं॥ चूर्णमेतत्प्रदातव्यं शर्कराहुतराणीकृतं॥ हिक्काश्वासहरं काशज्वरहृत्पार्श्वशू
लनुत्॥ त्वगेलादि॥ दुरालभाशठीभार्गीसव्योषं चाभया लिहेत्॥ श्वासे कासे च हिक्कायां हितं स्यात्कश्यपो ब्रवीत्॥ दुरालभा
दि॥ ॥शठीवांसीव जीवंतित्वक्पत्रपुष्कराह्वयं॥ सुरसामलकैलाचपिप्पल्यगुरुनागरं॥ वालकश्वसमं चूर्णं कृत्वाष्टगुणशा
र्करा॥ सर्वदा तमके श्वासे हिक्कायां च प्रयोजयेत्॥ शठ्यादि॥ दुरालभाकणा द्राक्षा शृंगी पथ्या च चूर्णितं॥ मधुसर्पियुतो लेहं
श्वासकाशापतंत्रजित्॥ दुरालभादि॥ गृहधूमयवक्षारपिप्पलीमरिचं तथा॥ श्वासांतपरमो लेहं लभेन्नवत्सरमेव नात्
॥ गृहधूमादि॥ ॥द्राक्षाहितशठीशुंठीरसोनकंद एव च॥ सदाडिमं श्वासकाशं हिक्कातट्छर्दिनाशनं॥ द्राक्षादि॥ द्राभा

हरीतकी कृष्णा कर्कटाख्या दुरालभा ॥ विलिहन्मधुसर्पिर्भ्यां श्वासं हन्ति सुदुस्तरं ॥ जासादि ॥ मयूरशिखया सार्द्धं मधुना पिप्पली लिहेत् ॥ सि-
ताघृतापथ्यभोजि श्वासहिक्कां ज्वरं जयेत् ॥ मयूरशिखादि ॥ ॥ विभीतकीनां चूर्णं तु कर्षं माक्षिकसंयुतं ॥ लिहे क्षीरासनपश्चाकृच्छ्रा
सहानात्रसंशयः ॥ विभीतकादि ॥ पलं तालीसपत्रस्य तत्तुल्या गजपिप्पली ॥ पिप्पल्यो द्वेपले चात्र शृंगवेरपलत्रयं ॥ द्विपलं पिप्प-
लीमूलं च त्वारो मरिचस्य च ॥ पत्रं त्वचं स्यात्कर्षैकं पलार्द्धं केशरस्य च ॥ सूक्ष्मेलाया भवेत्कर्षं शर्करा सर्वतुल्यका ॥ एतच्चूर्णवरं श्रेष्ठं
गुल्माद्यग्रहनाशनं ॥ कफपित्तानिलहरं श्वासकासकफापहं ॥ रुचिकृत्क्रिमिशूलघ्नं विषयत्नोदरापहं ॥ ज्येष्ठतालीसादि ॥ शठीपुष्क-
रजीवंतित्वक्षुसंयुक्ताहयं ॥ सुरसा नामलकोला पिप्पल्यगुरु नागरं ॥ बालकं च समं चूर्णीकृत्वाष्टगुणा शर्करा ॥ सर्वथा तमके श्वासे हि-
क्कायां च प्रयोजयेत् ॥ शट्यादि ॥ इति श्वासाधिकारः ॥ ॥ अथ स्वरभेदः ॥ तालीसादि लवंगादि यवानीखांडवादिकं ॥ शितोपलादि
विविधं चूर्णैः शस्तोत्र भक्षणे ॥ पिप्पली पिप्पलीमूलं मरिचं विश्वभेषजं ॥ पिवेत्तक्रेण मतिमान्कफजे स्वरसंक्षये ॥ पिप्पल्यादि ॥
अजमोदां निशां धात्रीक्षारं वह्निं विचूर्णयेत् ॥ मधुसर्पिर्युतं लीढं स्वरभेदं व्यपोहति ॥ अजमोदादि ॥ फलत्रिकं त्र्यूषणं यावशूकं च चू-
र्णं वलिह्यात्स्वरभेदहंत्री ॥ फलत्रिकादि ॥ पथ्यापिप्पलिसंयुक्ता मरीच नागरेण च ॥ वदरीपत्रकल्कं तु घृतपक्वं ससैन्धवं ॥ स्वरो-
पघाते कासे च लेहमेनं प्रयोजयेत् ॥ पथ्यादि ॥ ब्राह्मी वचाभया वासा पिप्पली मधुसंयुता ॥ अस्य प्रयोगात्सप्ताहात्किंनरैः सह गीयते ॥ ॥

चयाप्यत्रयोऽज्यं ॥ व्राह्म्यादि ॥ त्रिकटु कट्फला चैव मधुतैलसमन्वितं ॥ स्वरभेदहरो लेह हृङ्वैद्येन पूजितः ॥ कटुत्रयादि ॥ शुंठी कृष्णा चित्र
फलाम धुयष्टीसमन्विता ॥ मधुसर्पियुतो लेहः स्वरभेदहरः परं ॥ शुंठ्यादि ॥ इति स्वरभेदाधिकारः ॥ अथारुचिः ॥ चंदनोशीरमालीसं
ह्रीवेरोत्पलचंदनैः ॥ भागवृद्धैकराम्भव्याकोलग्रंथिकनागरैः ॥ त्वगेलाकेशरैश्चैवप्पथककर्षमितं स्थितं ॥ चूर्णीकृतं सर्वमेभिः सि
तादेया चतुर्गुणा ॥ सर्वारोचकशांत्यर्थं चूर्णमेतत्प्रयोजयेत् ॥ दीपनं पित्तशमनं वल्यं प्रह्लिकरं भ्रमं ॥ रुचिकृद्दीपनं कंठ्यं जङ्जि
ह्वाप्रवोधनं ॥ चंदनादि ॥ त्रिजातकं पिप्पली कर्कटाख्यं तालीसपत्रं मधुसंप्रयुक्तं ॥ अरोचकार्शोज्वरतल्पशोफानृष्वासाग्निमांद्यान्यपि
सारिरोगु ॥ त्रिजातकादि ॥ ॥ लवंगमेलात्वचपिप्पलीकं भागप्रकल्प्यादिह कर्षमेकं ॥ पलं तथैकं मरिचस्य दद्यात्पलानि चत्वारि महौ
षधस्य ॥ सितासमं चूर्णमिदं प्रयोगान् रोगानिमान्प्रवलानि हंति ॥ काशक्षयारोचकपांडुमेहानर्शांसिरोगांग्रहणीसमग्रं ॥ हृत्कंठना
शावदनेगं दवनिहंति वह्नि कुरुते च दीप्तिं ॥ चूर्णलवंगाद्यमिदं नराणां यथामृतं देवगणस्य तद्वत् ॥ षडंगलवंगादि ॥ ॥ कारव्यजाजीम
रिचंद्राक्षाम्लदाडिमं ॥ सौवर्चलं गुडं क्षौद्रं सर्वारोचकनाशनं ॥ कारव्यादि ॥ ॥ कारव्यजातीपत्रैलाव्योषवृक्षाम्लचेतसां ॥ सक्षौद्रशर्करं
हृद्यं रुचिकृद्वह्निदीपनं ॥ कारव्यादि ॥ द्वे पले दाडिमादष्टौ खंडाद्व्योषपलत्रयं ॥ त्रिसुगंधिपलं चैकं चूर्णमेकत्र कारयेत् ॥ दीपनं रोचनं हृ
द्यं पीनसज्वरकाशनुत् ॥ दाडिमादि ॥ पिप्पलीनां शतं चैकं द्वेशते मरिचानि च ॥ सितापलचतुष्कं तु नागरार्द्धपलं तथा ॥ धान्यसौवर्चला

जातीत्वगेलावाऽर्द्धभागिके ॥ कोलदाडिमवृक्षाम्लयवानीचाम्लवेतसं ॥ कार्षिकं चूर्णयेदेतान्हृद्यमग्र्यप्ररोचकं ॥ प्लीहहृद्ग्रहणीदोषपंच
काशानिवर्हणं ॥ खांडवो नाम तत्स्मात्त्रिविधं धान्यहृच्छूलनुत् ॥ खांडवचूर्णं ॥ ॥ तालीशोषणनागपिप्पलवरोत्पलत्वांशकैश्छिन्नतः ॥ कृ
ष्णाग्रंथिकनिंत्रिशीकटुलभृत्कग्जीरकार्यैर्युतः ॥ विश्वेलावदराम्लवेतससयैर्नैर्धान्याजमोदायुतैर्हिंग्वैर्दाडिमपादएषविहितैः श्रेष्ठः ॥
सिताद्वीयुतः ॥ कंठं सोदरहृद्विकारशमनं कायाग्निसंदीपनो गुल्माध्मानविसूचिकाशगुदजश्वासकृमिछर्दिहाकाशार्हघ्नातिसारमू
छ मरुनाजेनाचसंकीर्त्तितं ॥ चूर्णोयंभिषजामतीवदयितः ख्यातोमहाखांडवः ॥ महाखांडवचूर्णम् ॥ ॥ भड्डेलाजीरकं धान्यं दाडि
मं चार्द्धकार्षिकं ॥ प्रदेयावातिशुद्धायाशर्करायाश्चतुःपलं ॥ चूर्णमग्निप्रसादंस्यात्परमं हृद्विवर्द्धनं ॥ प्लीहकार्श्यमथार्शांसिशूलश्वासं
वमिज्वरं ॥ निहंतिदीपयत्यग्निंबलकरंपरं ॥ वातानुलोमनंहृद्यंकंठजिह्वाविशोधनं ॥ भड्डेलादि ॥ ॥ इत्यरोचकाधिकारः ॥ ॥
अथछर्दिः ॥ पिप्पलीकोलमज्जावकेशरंजीरकंतथा ॥ लेहमेतछिधातव्यंसद्यछर्दिनिवारणं ॥ पिप्पल्यादि ॥ कलीरशृंगीसूक्ष्मेलाके
शरं मधुयष्टिका ॥ द्राक्षालाजासितालाक्षौद्रलेहछर्दिनिवारणं ॥ कलीरादि ॥ विडंगलवशुंठीनां चूर्णं श्लेष्मवमिंजयेत् ॥ विडंगादि ॥ सोव
र्चलमज्जातीचसूक्ष्मेलामरिचानिच ॥ उक्तोयंमधुनालेहश्लेष्मछर्दिनिवारणं ॥ सौवर्चलादि ॥ मज्जांबुवत्थवदरस्यचूर्णीकृलाजायुतंकर्क
टकस्यचूर्णं ॥ डरालभावामधुसंप्रयुक्तालिह्यात्कफछर्दिविनिग्रहाय ॥ अंबादि ॥ ह्रीवेरचंदनोशीरकोमलज्जासपर्पटं ॥ चूर्णंशर्करया

युक्तं छ रक्तछर्दिनिवारणं ॥ शिवेत्यादि ॥ स्वादुदाडिममरिचं माहिषं नवनीतकं । लिहेल्लोहितछर्दिं प्रशाम्यति नात्र संशयः ॥ दाडिमादि ॥ ह
रेणुकाविडंगानि चूर्णं प्रस्थोदकेन च । पिबेत्प्रातः सशूलं च क्रिमिछर्दिनिवारणं ॥ हरेणुकादि ॥ एलामुस्तकधान्याकं मरिचं हवकानि
व कृष्णाधात्रीमज्जाजीवसमचूर्णानि कारयेत् ॥ वातपित्तकफछर्दितृष्णाज्वरनिवारणं ॥ एलादि ॥ एलाघनलवंगं च प्रियंगुधान्यके
शरं ॥ तृणाकृष्णाकोलमज्जालाजालोहितचंदनं ॥ शर्करामधुनालेहं छर्दि हंति त्रिदोषजं ॥ एलादि ॥ एलालवंगगजकेशरकोलमज्जा
लाजाप्रियंगुघनचंदनपिप्पलीनां ॥ चूर्णानि माक्षिकसितासहितानि लीढ्वा छर्दिं निहंति कफमारुतपित्तजातां ॥ एलादि ॥ खर्जूरत्व
ग्लवंगैलाकाश्मीरं वंशरोचना ॥ चूर्णमस्तुनिमग्नेन पीतं छर्दिहरं परं ॥ खर्जूरादि ॥ कृष्णाषणशिलाचूर्णं लाजातुल्यं समाक्षिकं ॥ कपि
त्थंबीजपूरांबु कल्कं वा छर्दिनाशनं ॥ कृष्णादि ॥ लाजाकपित्थमधुमागधिकोषणानि क्षौद्राभयात्रिकटुधान्यकजीरकाणां ॥ पथ्या
मृतामरिचमाक्षिकपिप्पलीनां लेहास्त्रयः सकलवम्यनुविप्रशांत्यै ॥ लाजादि ॥ दधित्थफलसंयुक्तां पिप्पलीं माक्षिकान्वितां ॥ मुहुर्मुहु
श्च संलीढ्वा छर्दिभ्यः परिमुच्यते ॥ दधित्थफलादि ॥ ॥ इति छर्दिचिकित्सा ॥ अथ तृष्णा ॥ वटशृंगासितालोध्रदाडिमं मधुकं मधु ॥ पि
वेत्तंडुलतोयेन छर्दितृष्णानिवारणं ॥ वटशृंगादि ॥ एलात्वक्पत्रकोशीरतृषारं नागकेशरं ॥ द्राक्षाखर्जूरकाश्मर्यमधुकं मरिचानि च ॥ परू
ककसिताक्षौद्रैः समचूर्णानि लेहयेत् ॥ वातपित्तसमुद्भूतं छर्दिहिक्कामरोचके ॥ क्लमश्रमभ्रमोमूर्छातृष्णाज्वरविनाशनं ॥ कर्पूरादि ॥

तृणासौवर्चलं राजा शर्करा मरिचानि च ॥ यष्टी धान्यकरागा धात्री समं क्षौद्रेण लेहयेत् ॥ वमनं वातपित्तं च कफतृष्णां नियच्छति ॥ तृणादि ॥ चं
दनं वालकोशीरं पर्पटं मलयोद्भवं ॥ दुरालभोत्पलान्येव पद्मकेशर शर्करा ॥ माक्षिकेनावलेहोयं तृष्णादाहनिवारणं ॥ चंदनादि ॥ दुरा
लभो त्वचं नागकेशरं वकुलो मधु ॥ तृष्णापित्तार्द्दिहारे च शस्यते लेहमुत्तमं ॥ दुरालभा ॥ ॥ इति तृष्णाधिकारः ॥ अथ मूर्छा ॥ ॥
कोलमज्जोषणोशीरकेशरं शीतवारिणा ॥ पीता मूर्छा जयेल्लीढा कृष्णा वा मधुसंयुतैः ॥ कोलमज्जादि ॥ स्विन्नमामलकं पिष्ट्वा द्रा
क्षया सह योजयेत् ॥ विश्वभेषजसंयुक्तं मधुना सह लेहयेत् ॥ तेनाश्य शाम्यते मूर्छा कासश्वासस्तथैव च ॥ आमलकादि ॥ खर्जूर
सफलं द्राक्षा काश्मर्यः सपरूषकं ॥ कसेरुकं सशृंगाटं चूर्णितास्ससितान्विता ॥ लेहे क्षौद्रघृतोपेता भ्रममूर्छामयापहा ॥ खर्जूरा
दि ॥ उत्पलकोलमज्जा च तिक्तातोयेन पेषयेत् ॥ शर्करामधुसंयुक्तं भ्रममूर्छाज्वरापहं ॥ उत्पलादि ॥ ॥ उशीरं पर्पटं धान्यं शर्करा
सितवारिणा ॥ मधुना सह पीतं च भ्रमनाशनमुत्तमं ॥ उशीरादि ॥ वासा दुरालभा चूर्णं नवनीतेन लेहयेत् ॥ शर्करासहसंयोज्य भ्रमना
शनमुत्तमं ॥ वासादि ॥ इति मूर्छाधिकारः ॥ अथ दाहः ॥ सूक्ष्मैला धान्यकं वासा लवंग पर्पटं सिता ॥ अंतर्दाहं ज्वरं हन्यात्पिवेच्छी
तेन वारिणा ॥ सूक्ष्मैलादि ॥ चंदनं मधुकं द्राक्षा कटुकां सदुरालभां ॥ चंदनाद्यमिदं लेहं हन्याद्दाहज्वरानपि ॥ चंदनादि ॥ चंद
नं पद्मकिंजल्कमुशीरं शीतवारिणा ॥ पिबेच्छर्करया युक्तं मंतर्दाहज्वरापहं ॥ चंदनादि ॥ मधुकं मधुकोदीच्यं नीलोत्पलमधूलि

का॥ जयंति मधुसर्पिर्भ्यां लीढ्या दाहज्वरभ्रमान्॥ काशासृक्पित्तवैसर्पश्वासहिक्कावमीनपि॥ मधुकादि॥ इति दाहाधिकारः॥ अथ मदात्ययः॥ द्राक्षामधूकमधुकं लोध्रकाश्मर्यशारिवा॥ मुस्तामलकह्रीवेरं पद्मकेशरपद्मकं॥ मृणालं चंदनोशीरं नीलोत्पलपरूषकं॥ लेहो हिमो वा द्राक्षादि जातीकुसुमवासितं॥ युक्तो मधुसितालाजैर्जयत्यनिलपित्तजं॥ ज्वरं मदात्ययं छर्दि मूर्छा दाहभ्रमं श्रमं॥ ऊर्द्ध्वगं रक्तपित्तं च पिपासा कामलानपि॥ द्राक्षादि॥ सौवर्चलमजाजी च वृक्षाम्लं साम्लवेतसं॥ त्वगेलामरिचार्द्धांशं शर्कराभागयोजितं॥ एतल्लवणमष्टांगमग्निसंदीपनं परं॥ मदात्यये कफप्राये दद्यात् स्रोतोविशोधनं॥ लवणमष्टांगः॥ धान्यसौवर्चलं हिंगुपुष्करं विश्वदीप्यकं॥ चूर्णं मण्डेन पानेन पानात्ययरुजापहं॥ धान्यादि॥ ॥ इति पानात्ययाधिकारः॥ ॥ अथोन्मादभूतोन्मादश्च॥ सिद्धार्थको हिंगु वचा करंजो देवदारु च॥ मंजिष्ठा त्रिफला श्वेता कटभी त्वक्कटुत्रिकं॥ समांशानि प्रियंगुश्च शिरीषो रजनीद्वयं॥ बस्तमूत्रेण पिष्टोयमगदः पानमंजने॥ नस्यमालेपने चैव स्नानोद्वर्त्तने तथा॥ अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहं॥ भूतेभ्यश्च भयं हंति राजद्वारे च शस्यते॥ सर्पिरेतेन सिद्धं वा गोमूत्रेण तदर्थकृत्॥ सिद्धार्थकादि॥ शिरीषलशुनं हिंगु नगरं मधुकं वचं॥ कुस्तं च बस्तमूत्रेण पिष्टं स्याच्च तदर्थकृत्॥ शिरीषादि॥ नक्तव्योषहरिद्रे द्वे मंजिष्ठा गौरसर्षपा॥ शिरीषबीजं चोन्मादग्रहापस्मारनाशनं॥ व्योषादि॥ कुष्ठाश्वगंधे लवणाजमोदे द्वे जीरके त्रीणि कटूनि पाठा॥ मांगल्यपुष्पी च समानि चूर्णं सर्वैः समं चै

॥ सान्मद ॥
॥ ५८ ॥

ववचाविचूर्णं ॥ तुल्येन ग्रकं वरुशीरसेन तन्द्राविनं ब्रह्मविनिर्मितं या ॥ सर्पिर्मधुभ्यां वत्नेतो क्षमात्रैलिह्यान्नरः सम्प्रादिने हिनाशी
॥ रैश्वर्यमिष्ठन्मनसश्च धैर्यमेधांयथेष्ठं नृहिरण्यं च कालं ॥ पठेन्नरः श्लोकसहस्रमेतत्तत्वप्रयोज्यं हिरण्यं च कालं ॥ सारस्वतमिदं
चूर्णं ब्रह्मणा निर्मितं स्वयं ॥ जगद्धिताय लोकानां दुर्मेधानां विचेतसां ॥ सारस्वतचूर्णं ॥ विश्वाग्रमोघरजनीवयसेन्धवोग्रा
यष्ट्याह्वकुष्ठमगधोद्भवजीरकानां ॥ चूर्णं प्रभातसमये लिहतं ससर्पिर्वाग्देवतानिवसति स्वयमेव वक्त्रे ॥ विश्वादि ॥ कृष्णा
मरिचसिंधुत्थमधुगोरोचनाकृतं ॥ अंजनं सर्वदेवादिकृतोन्मादहरं परं ॥ कृष्णाद्यंजनं ॥ अक्षतैकलोमानिशाल्लकीलशुनं
तथा ॥ हिंगुमूत्रं च वस्तस्य धूपमस्य प्रयोजयेत् ॥ एतेन नश्यति क्षिप्रं बलवानपि ये ग्रहः ॥ अक्षतैलमादि धूपः ॥ ॥ सर्षपानिंबपत्रा
णि मदनस्य फलं वचा ॥ वृहत्यो सर्पनिर्मोकं कार्पासास्थि यवास्तुषं ॥ मुस्ताहिंगुदेवदारुशिखिपिछविडालविट् ॥ गोशृंगखररोमाणि
तुल्याचकटुरोहिणी ॥ छागरोमघृतं चैतिअजामूत्रेणपेषयेत् ॥ एषमाहेश्वरो धूपभूतोन्मादग्रहापहः ॥ माहेश्वरोधूपः ॥ सर्ष
पानिंबपत्राणि भूर्जपत्रवचाघृतं ॥ धूपोगजिनखैर्युक्तः सर्वग्रहनिवारकः ॥ सूक्ष्मधूपः ॥ सिद्धार्थविफलाशिरीषकटभी
श्वेताकरंजाकरैमंजिष्ठारजनिद्वयं ॥ त्रिकटुकश्णमावचाहिंगुभिः शस्तं छागलमूत्रपिष्टमगदं सर्वग्रहोच्चाटने कृत्स्नो
न्मादविषज्वरःप्रशमनं पानादिभिर्योजितं ॥ कार्पासास्थिमयूरपिछं वृहतीनिर्माल्यपिराडीतथं त्वग्वंशी वृकदंशविट्गुषव

॥ राम: ॥
॥ ५८ ॥

वाकेशाहिनिर्मोककं ॥ नागेन्द्रद्विजशृंगहिंगुमरिचैस्तुल्यैस्तु धूपः ॥ कृतः स्कंदोन्मादपिशाचराक्षससुरावेशज्वरघ्नं परं ॥ ॥
माहेश्वरो धूपः ॥ इत्युन्मादाधिकारः ॥ भूतोन्मादश्च ॥ अथापस्मारः ॥ यः खादेत्क्षीरभक्ताशी माक्षिकेण वचारजः ॥ अपस्मारं
चिरोत्थं सजये ध्रुवं ॥ वचादि ॥ ॥ पंचकोलं च मरिचं फलाविडसैन्धवं ॥ कृष्णाविडंगपूतीकयवानीधान्यजीरकं ॥ पीतमुष्णे
बुना चूर्णं वातश्लेष्मामयापहं ॥ अपस्मारे तथोन्मादे ह्यलक्ष्मीग्रहणीगदे ॥ एतत्कल्याणकं चूर्णं नष्टमग्नेश्च दीपनं ॥ ॥
कल्याणचूर्णं ॥ ऊषणं हिंगु लवणं वचा कटुकरोहिणी ॥ शिरीषरक्षमालानीवीजं श्वेताश्च सर्षपा ॥ गोमूत्रपिष्टैरेत
स्तु वर्त्तिर्नेत्रांजने हिता ॥ चतुर्थकमपस्मारमुन्मादं च नियच्छति ॥ ऊषणादि ॥ इत्यपस्माराधिकारः ॥ अथ वातव्याधिः ॥ ॥
वाजिगंधावलातिस्त्र दशमूलमहौषधौ ॥ देवध्रुतरबौ रास्नाच गणो मारुतनाशनं ॥ वाजिगंधादि ॥ हिंगुजीरकसिंधूत्थसौ
वर्चलकटुत्रिकैः ॥ चूर्णितं शाणिकोन्मानैरुष्णक्काथउपानतः ॥ दिने दिने प्रयोक्तव्यं मासमेकं निरंतरं ॥ वातरोगनिहंत्याशु
रर्दितं चापतंत्रकं ॥ एकांगरोगिणो दद्यात्तथा सर्वांगरोगिणो ॥ ऊरुस्तंभे च गृध्रस्यां कृमिदोषे विशेषतः ॥ कटिपृष्ठामयं हंत्या
उदरं च कफान्वितं ॥ हिंग्वादि ॥ ॥ पिबेत्कुटजबीजानि चूर्णं प्रातः सुखांबुना ॥ शुंठीचित्रकमूलानां कुक्षिवातनिवारणं ॥ कु
टजबीजादि ॥ ॥ विभीतकं सातिविषं भड्रमूलानि पिप्पली ॥ भार्गी च शृंगवेरं च श्लक्ष्णा चूर्णानि कारयेत् ॥ चूर्णान्येतानि

॥ सान्मद ॥
॥ ५९ ॥

मद्येनपीतमुष्णोदकेनवा ॥ नाशयंत्तिन्रांक्षिप्रंकाशश्वासापतंत्रकं ॥ विभीनकादि ॥ ॥ हिंगुपुष्करमूलंतुंबुरूणिहरीतकी ॥ य
वक्काथोदकेनेतन्पानतथ्यलवणैस्त्रिभिः ॥ हृद्रोगपार्श्वशूलंचप्रवृत्तेवापतंत्रकं ॥ दंडापतानकंहन्याद्धनुस्तंभंचनाशयेत् ॥ हिंग्वा
दि ॥ आभारास्नागडूचीचशतमूलीमहोषधैः ॥ शतपुष्पाश्वगंधाचहवुषाकृद्दारुकं ॥ यवानीचाजमोदाचसमभागानिचूर्णयेत्
॥ सूक्ष्मचूर्णमिदंकृत्वाविडालपदमात्रकं ॥ पिबेन्मासरसैर्यूषैरासवोष्णेनवारिणा ॥ ससर्पिषावापिलिह्याद्दधिमंडेनवा
पुनः ॥ अस्थिसंधिगतोवायुःस्नायुःमज्जास्थितःपुनः ॥ कटिग्रहाग्रध्रसीचमन्यास्तंभोगलग्रहः ॥ येचकोष्टगतांरोगास्तांश्च
सर्वाविनाशयेत् ॥ आभाद्यानामचूर्णोयंसर्वव्याधिनिवारणः ॥ आभादि ॥ कर्षमात्रंभवेत्कृष्णात्रिवृत्तास्यात्पलोन्मिता ॥ खंडा
दपिपलंग्राह्यंचूर्णमेकत्रकारयेत् ॥ मधुनाक्षमितंलिह्याच्चूर्णमाध्माननाशनं ॥ नाराच ॥ हिंगुग्रंथिकधान्यजीरकवचाचव्या
ग्निपाठाशटीवृक्षाम्लंलवणत्रयंत्रिकटुकंक्षारद्वयदाडिमं ॥ पथ्यापौष्करवेतसाम्लहपुषाजाअस्वदेभिःकृतंचूर्णंभाषितमेतदा
र्करसैस्याच्छीतपूरैर्द्रवैः ॥ आध्मानग्रहणीविकारगुदजागुल्मातुदावर्त्तकाश्वयथ्वाध्मानगदोदराश्मरिरुजस्तूनीद्वयारोचकान्
उरुस्तंभप्रतिभ्रमंचमनसोकष्टश्रियंमद्धिलाप्रत्याष्ठीलिकयासहायहरतेप्राक्पीतमुष्णांबुना ॥ हृद्वस्तिवंक्षणकटीजठरां
तरेषुवस्तिस्तनांशफलकेषुचपार्श्वयोश्च ॥ हन्याच्छूलमिहवातबलाशजातंहिंग्वाद्यमाद्यमिदमश्विनसंहितायां ॥ हिंग्वादि ॥

॥ राम: ॥
॥ ५९ ॥

भागा दश विश्वायास्तत्तुल्यो वृद्धदारकस्यापि पथ्याश्चैव भागास्तत्तुल्यं दीप्यकं घृतं ।। एकः सैन्धवभागस्तत्तुल्यं चित्रकं चात्र ।। सैंहृद्ग्रम्
र्दिवातं हंत्यनन्तचूर्णकं भुक्तं ।। विश्वादि ।। वलामूलं त्वचं चूर्णं ससितं कर्षसंमितं ।। पिबेत्कुडवदुग्धेन वक्रमूत्रेराशांतये ।। वलादि ।। नाल
केंदं च खर्जूरं पियालं च विदारिशर्करामधुसंयुक्तं पूत्रातीसारनाशनं ।। मुसलादि ।। खर्जूरं च पियालं च मधुकं सारिवास्तिला ।। मूत्राती
सारसमनं नान्योपायोऽस्ति भूतले ।। खर्जूरादि ।। यवक्षारस्य चूर्णं तु संयोज्य सितया सह ।। भक्षयेन्नियतं तस्य प्रशाम्येन्मूत्रनिग्रह ।। यवक्षा
रादि ।। मरिचं शिग्रुवीजानि विडंगं च फणिज्झकं ।। एतानि सूक्ष्मचूर्णानि दद्याच्छीर्षविरेचनं ।। मरिचादि ।। हरीतकी वचा रास्ना सैन्धवं
चाम्लवेतसं ।। घृतमार्द्रकसंयुक्तं मपतंत्रकनाशनं ।। हरीतक्यादि ।। हृदयनिलनाशाय गुडूचीमरिचान्वितं ।। पिबेत्प्रातः प्रयत्नेन सम्य
गुष्णोदकेन वा ।। गुडूच्यादि ।। पिबेद्दुग्धांभसा पिष्टामश्वगंधां विभीतकं ।। गुडप्रयुक्तं यत्नेन हृदयानिलनाशनं ।। अश्वगंधादि ।। देवदारुस
मायुक्तं नागरपरिपेषितं ।। हृद्वातवेदनार्तस्तु पीत्वा सुखमवाप्नुयात् ।। देवदार्वादि ।। इति वातरोगाधिकारः ।। अथ पित्तव्याधिः ।। चित्र
कसप्तच्छदतर्कारीपर्पटकारीष्टकुटवीजानि ।। सौराष्ट्रिकपटोलत्रायंतीदारुपूर्वाणां ।। त्रिक्राममृणालमलयजकलिंगककैराततिक्तानि ।। वचाविषाकेशरदीप्यकमधुशिग्रुवीजानां ।। सर्वचूर्णसुघृष्टमिदं पीतं शीतेन वारिणालीढं ।। क्षौद्रवाम्लपित्तं प्रायेणाधो
गतिं हंति ।। चित्रकादि ।। ।।व्योषवैरेलामुस्तविडंगं पत्रमखिलसमंत्रलवंगं ।। त्रिवृदपि सर्वद्विगुणितं चूर्णं सितासकलतुल्यितास

॥ सात्म्यद ॥
॥ ६० ॥

म चूर्णं ॥ प्रागशने शाणार्द्धयुक्तं श्रीफलशीतजलेन च भुक्तं ॥ तदनंतरमशनं करणीयं क्षीररसादि यथा कमनीयं ॥ जनयति तेजो मलव
लह्निं हरति मलद्वयबंधनसमृद्धिं ॥ आमवातमति शूलसमूहं मम्लपित्तमपि हरति दुरूहं ॥ अविपत्रिकराह्वयमेतच्चूर्णं रोगविपत्ति
हरं किल चूर्णं ॥ अविपत्तिकरं चूर्णं ॥ एकांशं पंचनिंबानां द्विगुणो वृद्धदारकं ॥ शक्तुदशगुणो देया शर्करा मधुरीकृतः ॥ शीतेन वारि
णापीतं शूलपित्तकफोत्थितं ॥ निहंति चूर्णं सक्षौद्रमम्लपित्तं सुदुःसहं ॥ पंचाननवादि ॥ धात्रीशतावरीक्षौद्रं तुल्यं शर्करया सह ॥ लि
हेत्तदनु भोजि· स्यात्प्रातरुत्थायमात्रया ॥ शीततोयेन पयसामम्लपित्तविनाशनं ॥ शीततोयानुपानेन पयसाथ घृतेन वा ॥ अम्लपि
त्तं निहंत्याशु वलीपलितनाशनं ॥ चक्षुष्यमायुष्यतमं वपुःसममुदाहृतं ॥ इति ग्रंथांतरे ॥ धात्र्यादि ॥ वृषभष्यकरं जस्यफलं चित्रफला
त्वच ॥ चूर्णमेतद्रसैर्भाव्यं धात्र्याम्लपित्तहानिदा ॥ कोटजं मधुसंयुक्तं पाययेत्तंडुलांवुना ॥ पित्तश्लेष्महरं नान्यदिमं श्रेष्ठं रसायनं ॥ वृष
पुष्पादि ॥ ॥ गुडूचीपद्मकं लोध्रं शारिवोत्पलयोस्तथा ॥ शर्करामधुसंयुक्तं शीतपित्तज्वरापहं ॥ गुडूच्यादि ॥ ॥ धान्यकं चंदनं
मुस्तायवाश्चेति समांशकं ॥ लेहः क्षौद्रयुतो हन्यादम्लपित्तारुचिज्वरान् ॥ धान्यादि पाठापटोलचंदनधान्यधात्रीवसावरानलदनाग
करणाभयाभिः ॥ लेहं सिताज्यमधुभिः शिलपालपिंडीहंत्यम्लपित्तवमनारुचिदाहमोह ॥ खालित्यमेहतिमिरक्षुराशुक्रदोषान्भुक्
त्वा नरः सततमामलकीरसेन ॥ वृद्धोप्यनेन हि भवेत्तरुणीरिदं भुक्त्वा नरः सततमामलकीरसेन ॥ सिताद्राक्षाभयाखादेत्सक्षौद्रं

॥ राम: ॥
॥ ६० ॥

वागृञ्जान्विता ॥ कटुकासितयालिह्यात्पटोलक्षौद्रसंयुता ॥ कटादि ॥ आर्द्रकस्यरसःपेयःपुराणगुडमिश्रितः ॥ शीतपित्तापहःश्रेष्ठो
वह्निमांद्यविनाशनः ॥ गुडादि ॥ इतिशीतपित्तरोगाधिकारः ॥ अथकफव्याधि ॥ वचाहिंगुगुडंशुंठीवाजमोदाहरीतकी ॥ मूलपुष्करजंकुष्टं
क्रमोत्तरगुणांकृत् ॥ चूर्णंकर्षंपिबेत्तक्रैःकफरोगप्रशान्तये ॥ वचादि ॥ यवानीसैन्धवंत्र्यूषंजीरकंचसमंसमं ॥ पलार्द्धंपाययेत्तक्रैःकफं
हन्यात्महोत्कटं ॥ यवान्यादि ॥ विडंगपिप्पलीहिंगुसर्ज्जीरसैन्धवनागरः ॥ रास्नायाश्चसमंचूर्णंकर्षंघृतयुक्तंपिबेत् ॥ कफश्वासह
रःश्रेष्ठंपरंदीपनपाचनं ॥ चिरकालस्थितंसद्योनिहरेत्कफसंचयः ॥ विडंगादि ॥ तालीसमरिचंनागरपिप्पलीतन्मूलत्रुटिदलत्वगि
: ॥ जातीफलमेलात्वक्क्षीरिप्रस्ततुल्यांशं ॥ चूर्णत्रिगुणशितोपलमेतद्रुच्यंदीपनंहृद्यं ॥ ज्वररक्तपित्तकासश्वासक्षयगुल्मघ्नं ॥
कृम्यन्नीसामग्रहणीहृद्रोगानाहमूत्रसादघ्नं ॥ कर्चूरणादि प्रशमयतिपाण्डुगदंकफरोगघ्नं ॥ तालीसादि ॥ ॥ इतिकफरोगाधिकारः ॥
अथवातरक्तः ॥ एरण्डतैलरामठसैन्धवचूर्णान्वितंपीतं ॥ प्रशमयतिवातरक्तंतथामवातंकरीशूलं ॥ एरंडादि ॥ पिबेद्वासामृ
तचूर्णंपित्तरक्तानुगेनिले ॥ तृत्तादि ॥ गुडूच्यास्वरसःकल्कंचूर्णंवाक्वाथमेववा ॥ प्रभूतकालमासेनसेव्यमुच्यतेवातशोणितात् ॥
गुडूच्यादि ॥ अमृताकटुकाशुंठीयष्टीचूर्णंसमाक्षिकं ॥ गोमूत्रपीतंजयतिसकफंवातशोणितं ॥ अमृतादि ॥ गुडूचीसारसंयुक्तंत्रि
कत्रयसमन्वितं ॥ वातरक्तंनिहंत्याशुसर्वरोगापहोपिसन् ॥ गुडूच्यादि ॥ ॥ इतिवातरक्ताधिकारः ॥ ॥ अथामवातोपलंभः ॥ हिंगुवचा

॥ सान्मद ॥
॥ ६१ ॥

विडंगं शुंठी कृष्णाजाजी सपुष्करं ॥ भागोत्तरमिदं चूर्णं पीतं वातामजिद्भयेत् ॥ हिंग्वादि ॥ पथ्यादिश्चायवानीभिस्तुल्याभिश्चूर्णितं पिबेत् ॥
तक्रेणोष्णोदकेनापि कांजिकेनाथवा पुनः ॥ आमवातं निहंत्याशु शोथं मंदाग्नितामपि ॥ पीनसं काशहृद्रोगं स्वरभेदमरोचकं ॥ पथ्यादि
शुकनासवल्कल्कलसहितं गोमूत्रे स्थापितं सप्ताहे ॥ हिंगुवचाशतपुष्पासैंधवयुक्तोनतेनाथ ॥ तमुठपक्कं चूर्णं हत्याकटीतजंघट
रापृंसां श्वासमेदोवृद्धिभवान्विकाराश्चानिलोद्भवान् ॥ शुकनर्वादि ॥ अमृतानागरगोमूत्रंडिंडिनिकावहुराकैः कृतं चूर्णं ॥ मस्तार
नालपीतं सामानिलनाशनं स्यात् ॥ अमृतादि ॥ अलंबुषागोक्षुरकं त्रिफलानागरामृता ॥ यथोत्तरं भागवृद्ध्या शणमा चूर्णं चनाशनं
॥ अलंबुषादिकं चूर्णं रोगानीकविनाशनं ॥ अलंबुषादि ॥ अलंबुषागोक्षुरकं मूलं गोक्षुरकस्य च ॥ गुडूचीनागरं चेति समभागानि
कारयेत् ॥ कांजिकेन तु तत्पेयं विडालपदमात्रकं ॥ आमवृद्धे वयोगोयं कथितं अमृतोपमं ॥ अलंबुषादि ॥ आभारास्नागुडूचीवरा
नार्क्यौमहौषधं ॥ इलंपुष्पाश्वगंधाचहपुषावृद्धदारुकं ॥ यवानीचाजमोदा च समभागानि कारयेत् ॥ आमवातं जयेत्याशु गुल्महृद
स्निजानगदान् ॥ आभा । वब्बूलः । आभादि ॥ ॥ अलंबुषागोक्षुरकं गुडूचीवृद्धदारकं ॥ पिप्पलीतृवृतामुस्तावहुराणसपुनर्नवा ॥ त्रिफ
लानागरं चैव सूक्ष्मचूर्णानि कारयेत् ॥ मस्तारनालतक्रेणापयोमांसरसेन वा ॥ आमवातं जयेत्याशु श्वयथुः संधिसंस्थितं ॥ अत्र त्रिफला
॥ हरीतक्यक्षधात्रीभिः भागवृद्ध्या यथोत्तरमिति ॥ ॥ अलंबुषादि ॥ मरिचमन्थस्य भागोह्येयवान्यास्तद्देवतु ॥ भागास्त्रयोजमोदाया नागरा

॥ रामः ॥
॥ ६१ ॥

ङ्गागपंचकं ॥ दशद्वौ च हरीतक्या सूक्ष्मचूर्णीकृतं शुभं ॥ पुष्ट्यर्थं पयसा साध्यं दद्याद्विण्मूत्रसंग्रहे ॥ दीपनार्थमतिमक्रमलुनाव प्रकीर्त्तितं ॥ वै
श्वानरचूर्णं ॥ ॥ अशीतिकामागधिकाग्निद्रूवीश्णमावराहीगजकर्णीशुंठी ॥ समांशतः क्रमश्लक्ष्णचूर्णं पिवेत्तडुष्णोदकमंडयूषैः
॥ तक्रैरसैर्मद्यसमस्तुभिर्वा यथेष्टचेष्टस्य तु भोजनस्य अववाध्यकं गच्छति सर्वजवातं विश्वाविनृणीप्रतितूनिरोगात् ॥ जंघामवातार्द्दि
तवातरप्पलीमूलं च व्योतित्रकनागरैः ॥ विडंगेन्द्रयवासिंधुभार्गीजीरव चान्वितैः ॥ सर्षपानिविषाजाजीजीवकारेणुकायुतैः ॥ शत
पुष्पाविडंगानि सैन्धवं मरिचं समैः ॥ चूर्णमुष्णांबुना पीतं मग्निसंदीपनीपरः ॥ आमवातं निहंत्याशु हार्द्दशोकसमापना ॥ पिप्प
लीपिप्पलीमूलं भल्लातकफलानि च ॥ चूर्णं मधुयुतं पीत्वा उरुस्तंभाद्विमुच्यते ॥ पिप्पल्यादि ॥ ॥ त्रिफलाचव्यकटुकं ग्रंथिकं मधुना
लिहेत् ॥ उरुस्तंभविनाशाय परं मूत्रेण वा पिवेत् ॥ त्रिफलादि ॥ ॥ लिह्याद्वा त्रिफलाचूर्णं क्षौद्रेण कटुसंयुतं ॥ सुखांबुना पिवेद्वापि
चूर्णं षड्धरणं नरः ॥ षड्धरणं ॥ पिप्पलीवर्द्धमानं वा माक्षिकेन गुडेन वा ॥ उरुस्तंभं प्रशंसंति गंडीरारिष्टमेव वा ॥ मंजिष्ठाद्यरिष्टं देयं ॥ पिप्प
ल्यादि ॥ ॥ चव्याभयाग्निदारूणां कल्कं वा मधुसंयुतं ॥ त्रिफलापिप्पलीमूलं वचा कटुकरोहिणी ॥ लिह्याद्वा मधुना चूर्णमुरुस्तंभार्द्दि
तो नरः ॥ चव्यादि ॥ ॥ इत्यामवातोरुस्तंभाधिकारः ॥ ॥ अथ शूलः ॥ शूलीनिरन्नकोयेऽड्रिरुक्षामिश्रचूर्णितानापिवेत् ॥ हंगुप्रतिविषा
व्योषवचसौवर्चलाभया ॥ हिंग्वादि ॥ सगुडां घृतसंमिश्रां भक्षयेद्वा हरीतकी ॥ लवणत्रयसंयुक्तं पंचकोलं सरामठं ॥ सुखोष्णेनांबुनापी

॥ सात्म्यद॰ ॥
॥ ६२ ॥

नेकफशूलंनिवारणं ॥ तुंबुरूण्यभयाहिंगुपौष्करंलवणत्रयं ॥ पिबेद्यवांबुनावातशूलगुल्मापतंत्रकं ॥ तुंबुर्वादि ॥ हिंग्वम्लकुष्ठाम
लकंयवानीक्षाराभयासैन्धवतुल्यभागं ॥ चूर्णंपिबेद्वारुणीमंडमिश्रंशूलेप्रवृद्धेनिलजेशिवाय ॥ हिंग्वादि ॥ पिप्पलीपिप्पलीमू
लंहिंगुसौवर्चलंवचा ॥ अजमोदंचसंचूर्ण्यपिबेदुष्णांबुनासदा ॥ हृच्छूलेपार्श्वशूलेचवस्तिशूलेचसर्वशः ॥ पिप्पल्यादि ॥ एलाहिं
गुयवक्षारंसैन्धवंविश्वभेषजं ॥ उष्णोदकेनपातव्यंसद्यःशूलनिवारणं ॥ एलादि ॥ प्रलिह्यात्पित्तशूलघ्नंधात्रीचूर्णंसमाक्षिकं
॥ लवणत्रयसंयुक्तंपंचकोलंसरामठं ॥ सुखोष्णेनांबुनापीतंकफशूलेप्रदापयेत् ॥ लवणत्रयादि ॥ शंखचूर्णंसलवणंसहिं
गुत्र्यूषसंयुतं ॥ उष्णोदकेनसंपीतंशूलंहंतित्रिदोषजं ॥ शंखचूर्णादि ॥ दिप्यकंसैन्धवंपथ्यानागरंसचतुःसमं ॥ चूर्णंशूलंजय
त्याशुमंदवन्हेश्चदीपनं ॥ दिप्यकादि ॥ हिंगुसौवर्चलंपथ्याविडसैसैन्धवंतुंबुरुं ॥ पौष्करंचपिबेच्चूर्णंदशमूलीयवांमसा ॥ पार्श्वहृ
त्कटिपृष्ठानांशूलेतंद्रापतानके ॥ श्लेष्मरोगेथप्रसेकेचगलरोगेचशस्यते ॥ हिंग्वादि ॥ ॥ तुंबुरूण्यभयाहिंगुपौष्करंलवणत्रयं ॥ य
वानीचयवक्षारंविडंगंनागरंसमा ॥ त्रिवृत्त्रिगुणितंचूर्णंरुबुतैलसमन्वितं ॥ उष्णांबुनाचतत्पेयंगुल्मेवातेकफात्मके ॥ उदरेषुवि
वंधेषुवातविण्मूत्ररेतसां ॥ तुंबुर्वादि ॥ ॥ विश्वोरुबूकदशमूलयवांभसात्रुटिक्षारहिंगुलवणत्रयपुष्कराणां ॥ चूर्णंपिबेद्धृदय
पृष्ठकटीग्रहामंपक्वाशयासमभशरुग्ज्वरगुल्मशूली ॥ विश्वादि ॥ ॥ चूर्णंसमंसरुचकंहिंगुमहौषधानांशृष्णांबुनाकफसमी

॥ राम॰ ॥
॥ ६२ ॥

रणसंभवास्तु ॥ हन्त्याध्मंप स्वजठराग्निविशूचिकास्तु पेयं तथा यवरसेन च विड्विबंधे ॥ रुचकादि ॥ कूष्मांडं तु ततं कृत्वा छित्वा
घर्मे विशोषयेत् ॥ स्थाल्यां निक्षिप्य तत्सर्वं पिधानेन पिधाय च ॥ चुल्ल्यां निवेश्य वह्निं च ज्वालयेत्कुशलो जन ॥ यथा न तत्र भवेद्भ
स्म किं त्वंगारो दृढो भवेत् ॥ तदा निर्वापयेद्धीतं चूर्णयेच्चूर्णितं तु तत् ॥ माषद्वयमितं तावच्छुंठीचूर्णं च मिश्रितं ॥ जलेन भ
क्षयेत्त्रिसप्तं महाशूलात्कलो नरः ॥ असाध्यमपि तच्छूलं तदप्येतेन शाम्यति ॥ कूष्मांडक्षारः ॥ हिंगुपुष्करशुंठीभिसंवुरु
कंटुकाभया ॥ शूक्ष्मैलापिप्पलीमूलं कालाचलवणत्रयं ॥ यकृत्प्लीहाश्रितं शूलं वस्तिरानाभिमध्यगं ॥ नाशयंति इदं शी
घ्रं वज्राहत इव द्रुमः ॥ तुंबुरादि ॥ हिंगुत्रिकटुकं कुष्ठं यवक्षारोथ सैंधवं ॥ मातुलुंगरसे पीतं प्लीहशूलहरं परं ॥ हिंग्वादि ॥ ॥
इति शूलाधिकारः ॥ अथ परिणामशूलः ॥ दंती वत् वृतत्रणामा कलिंगकटुकाह्वया ॥ नीलिकानागरं चूर्णं तैलैरेरंडजेन वा
॥ गुडैर्विरेचनं शस्तं पंक्तिशूलनिवारणं ॥ इत्यादि ॥ शंबूकजं भस्म पीतं जलेनोष्णेन तत्क्षणात् ॥ पंक्तिजं विनिहंत्येव तच्छूलं वि
ष्णुरिवासुरान् ॥ शंखचूर्णं ॥ शंबूकत्र्यूषणं चैव पंचैव लवणानि च ॥ चूर्णं वा गुटिकां कृत्वा करंजस्यरसेन वा ॥ प्रातर्भोजनकाले
वा क्षपयेच्च यथाक्रमं ॥ शूलाद्विमुच्यते जंतुः सहसा परिणामजात् ॥ शंखचूर्णादि ॥ नारिकेलं सतोयं च लवणेन प्रपूरितं ॥ वि
पक्वमग्निना सम्यक् पंक्तिशूलनिवारणं ॥ वातिकं पैत्तिकं चैव श्लेष्मिकं सन्निपातिकं ॥ नारिकेललवणं ॥ ॥ एकः सेन्धवसंभ

व:सशुद्धितःसन्नारिकेलात्रयोः॥ भागासांधुभिषग्भिरत्रहि — — धूमाग्निनापाचितः॥ तत्रैलाफलजीरकंसलवणंजातीफ
लानांक्षिपेन्नागंपंचमेवचूर्णितपसावायान्तिसिद्धिंततः॥ वह्निंकरोतिबलवीर्यमजीर्णहंताशूलंनिहंतिहृदयोदरमाभिजातं
दोषानुदस्यतितनोतिवधातुसाम्यंश्रीनारिकेललवणंकुरुतेसुकांति॥ बृहन्नारिकेललवणं॥ ॥इतिपरिणामशूला
धिकारः॥ ॥अथोदावर्त्तानाह॥ हरीतकीयवक्षारंकपिल्लंत्रिवृतानथा॥ घृतेश्चूर्णमिदंपेयमुदावर्त्तविनाशनं॥ हरीत
क्यादि॥ ॥हिंगुकुष्टवचास्वर्जिविडंचेतिद्विरुत्तरं॥ पीतमयेनचूर्णंतुमुदावर्त्तहरःपरः॥ हिंग्वादि॥ ॥वचाभयाचित्र
कयावशूकान्सपिप्पलीकातिविषान्सकुष्टान्॥ उष्णांबुनासाहविरुद्धवातान्पीत्वाजयेदाशुरसोदनाइति॥ वचादि॥ सव्यो
षपिप्पलीमूलंत्रिवृद्दंतीसचित्रकं॥ तच्चूर्णंगुडसंमिश्रंभक्षयेत्कल्यमुत्थितं॥ एतद्गुडाष्टकंनामबलवर्णाग्निवर्द्धनं॥ शोथोदा
वर्त्तगुल्मप्लीहपांड्वामयापहं॥ गुडाष्टकं॥ द्विरुत्तरंहिंगुवचासकुष्टंसुवर्चिकाचैवविडंगचूर्णं॥ सुखांबुनापीतविसूच्यानाह
हृद्रोगगुल्मोर्द्ध्वसमीरणोघ्नद्विरुत्तरादि॥ हिंगूग्रगंधाविडजाजिशुंठीहरीतकीपुष्करमूलकुष्टं॥ यथोत्तरंभागविवृद्धिमेतत्प्लीहो
दरानाहविशूचिकासु॥ हिंग्वादि॥ चूर्णंनाराचकंदेयमानाहेवगुडाष्टकं॥ ॥इत्युदावर्त्तानाहाधिकारः॥ अथगुल्मः॥ त्रिलव
णाहपुषाजमोदाजगंधावचाहिंगुपाठोपकुंचीशटीजीरकजाजीकुस्तुंबुरुःस्वर्जिकायावशूकोवाषिकोकारकातुंबुरुस्वर्जि

कायावशूकोयवंपौष्करादाडिमांतिंतिडीकविडंगानिभागिवरीवेतसांभोभिशि॥ मरिचगजकणाभयायंचकोलानिकंभविशालायवानीसु
राहंत्रुतत्सर्वमेकत्रचूर्णीकृतंवीजपूराईकाणांरसेणासकृद्भावितयः पिवेत्प्रातरुत्थायवाहारकालेथवामासमात्रंहिताशीनरः॥ गु
ल्मशिशिरवारिणाजीर्णमद्येनतक्रेणकोलांभसामस्तुनापयसासर्पिषाप्युष्ट्रदुग्धेनकौलत्थयूषेणवाक्षारनिश्चोततोयेनवाडाडिमाहार
सेनाथवातेभिरौषधैःसाधितंगोघृतंवासंभवेत्॥ हृदयगुडकटियकृत्प्लीहगुल्माश्रितंतस्यशूलंप्रणाश्यन्त्यथागुल्मविद्रंभदुर्नामहृ
द्रोगकृच्छ्रोदराध्मानहिध्मासयक्ष्मारुचिश्वासकाशाप्रयुक्तंचसक्तोभवेत्प्रावप्राश्यमाणानियाथाणाचूर्णान्यपि॥ त्रिलवणादि ॥
वचाहरीतकीहिंगुसैन्धवंसाम्लवेतसं॥ यवक्षारयवानीवपिवेदुष्णेनवारिणा॥ एतद्धिगुल्मनिचयंसशूलंसपरिग्रहं॥ भिनत्ति
सप्तरात्रेणवह्निंवृद्धिंकरोतिच॥ वचादि ॥ ॥हिंगूग्राविडशुंठ्यजाजिविजयाधान्याभिधान्यामयैश्चूर्णैःकुंभनिकुंभदंतिसहितै
र्भागोत्तरंमर्दितैः॥ पीतंकोष्णजलेनकोष्ठजरुजागुल्मोदरादीनयंशार्दूलःप्रसभंनिहंतिविविधान्व्याधीन्मृगोघानिव॥ हिंग्वादि॥
हिंगुत्रिकटुकंपाठाहवुषामभयाशठी॥ अजमोदाजगंधेचतिंत्रिडीकाम्लवेतसौ॥ दाडिमंपौष्करंधान्यमजाजीचित्रकंवचा॥ द्वौक्षारौ
द्वेचलवणेचव्यंचैकत्रयोजयेत्॥ चूर्णमेतत्प्रयोक्तव्यमन्नपानेनसंयुतं॥ प्रागुक्तमथवापीतंमद्येनोष्णोदकेनवा॥ पार्श्वहृद्बस्तिशूले
चगुल्मेवातेकफात्मिके॥ आनाहेमूत्रकृच्छ्रेषुशूलेचगुदयोनिजे॥ ग्रहण्यर्शोविकारेषुप्लीहपाण्ड्वामयेरुचौ॥ उरोविवंधेहिक्कायांका

शश्वासे गलग्रहे ॥ भवितं मातुलुंगस्य चूर्णमेतद्रसेन वा ॥ वडशोगुटिका कार्या कर्षकस्तुलनोधिका ॥ हिंग्वादिचूर्णगुटिका वा ॥ ॥
पिप्पलीपिप्पलीमूलंचित्रकाजाजिसैंधवैः ॥ गुक्रापीतासुराहंतिगुल्ममाशुखुडुलं ॥ पिप्पल्यादि ॥ ॥ अपामार्गपलाशानां तथैव
क्षुरकस्य च ॥ स्नुह्यर्कयोर्मातुलुंगकुटजस्याग्निकस्य च ॥ तिलसर्षपनालानि दग्ध्वा भस्मानि कारयेत् ॥ गोजाविमूत्रसहितं सर्पिस्तैल
समन्वितं ॥ त्र्यूषणं पिप्पलीमूलं चित्रकं पुष्करमूलकं ॥ मूर्वामितिविषापाठाकुष्ठभल्लातकानि च ॥ चव्यपूतीकरंजं च वटिल्वकं कटु
रोहिणी ॥ द्वौक्षारौ पंचलवणासमभागानि पूरयेत् ॥ सन्नीयचूर्णलवणैः शनैर्मृद्वग्निना पचेत् ॥ तदग्निचूर्णानि धूमं कृत्वा चूर्णं
सुशीतलं ॥ अंगुल्यग्रहमात्राजु सुरामंदेन पाययेत् ॥ मस्त्वारनालमूत्रैस्तु पनः स्याद्वातगुल्मनुत् ॥ शूलकासोदरप्लीहपांड्वाम
पाकिलासकः ॥ हन्यादारोग्यलवणं प्रशस्तं कफवातनुत् ॥ आरोग्यलवणं ॥ नादेयीकुटजार्कशिग्रुबृहतीस्नुग्बिल्वभल्लातक
व्याघ्रीकिंशुकपारिभद्रकजटापामार्गनीपाग्निका ॥ वासापुष्करपाटलाः सलवणा दग्ध्वा रसं पाचिता ॥ हिंग्वादि प्रतिवापयेत्त्रुड
दितं गुल्मोदराष्ठीलिषु ॥ तेयथा ॥ हिंगूग्रगंधाविडशुंठ्यजाजीहरीतकीपुष्करमूलकुष्टं ॥ भागोत्तरं चूर्णितमेतदिष्टं गुल्मोदराजी
र्णविसूचिकासु ॥ नादेयीक्षारः ॥ मधुकं चंदनं द्राक्षा पयस्या मधुकं मधुः ॥ पीतं तंदुलतोयेन पित्तगुल्मोपशांतये ॥ मधुकादि ॥ क्षा
रं च त्रृतरुद्भवं दशपलं तावत्ययोप्यर्कजं प्रत्येकं पलपंचकं वलवणं क्षारं च पंचात्मकं ॥ विंशत्यर्कदलैर्युतं पवितरोऽग्निजे श्वनुमि

:पलैः ॥ मज्जांतै गुल्ममार्गोत्तो गजपुटैर्वह्नौ विपक्वीकृतं ॥ संचूर्ण्य पटुकत्रयं त्रिपलमध्येकं पलं एरमठं सर्वं वस्त्रपूतीतसेतदमले
पात्रे सुरक्षं स्थापयेत् ॥ वज्रक्षार इति प्रणाशयति वै गुल्मान्दग्रान् रागंपीतस्तत्रयुतं प्रभातसमये कर्षप्रमाणं क्रमात् ॥ मंदाग्नि
सविसूचिकामरुचितामापांडुतां श्लीरातां श्वाशेकाशमजीर्णसेत्यपवनं श्माद्यान्विलाशोद्भवान् ॥ वज्रक्षार इमान्निरस्य भि
षजां कीर्त्तिं विधत्ते नरां मांसद्रावयति स्फुटं घटिकयोर्द्देहकिमत्रेपुनः ॥ वज्रीक्षारः ॥ स्वर्जिकाकुष्टसहितः क्षारकेतकिसंभवः ॥
पीतस्तैलेन शमयेद्वातगुल्मं सदारुणं ॥ केतकीक्षारः ॥ हिंगुसैन्धववृक्षाम्लराजिकानागरैः समैः ॥ गुल्मशूलविबंधघ्नस्पादेत
ड्डिंगुपंचकं ॥ हिंगुपंचकं ॥ सामुद्रसैन्धवं कांचयवक्षारसुवर्चलं ॥ टंकणं स्वर्जिकाक्षारस्तुल्यं चूर्णं प्रकल्पयेत् ॥ वज्रीक्षीरेणार्वक्षी
रेणातपे भावयेत्त्र्यहं ॥ विशुष्ये दर्कपत्रैश्च रुध्वा भांडपुटे पचेत् ॥ तत्क्षारं चूर्णयेत्पश्चात्त्र्यूषणं त्रिफलां तथा ॥ यवानीजीरकौ वह्निश्चूर्ण
मेषां प्रकल्पयेत् ॥ सर्वचूर्णसमं क्षारं सर्वमेकत्र कारयेत् ॥ गुल्मशूले तथाजीर्णे शोथे सर्वोदरेषु च ॥ मंदे वह्नावुदावर्त्ते प्लीहि वा पिप
रं हितं ॥ वातेधिके जलैः कोष्णैर्हितं पित्ताधिके घृतैः ॥ गोमूत्रेणकफाधिको कांजिकेन त्रिदोषजे ॥ वज्रक्षार इति ख्यातः प्रोक्तः पूर्वंस्व
यंभुवा ॥ सेवितो हरते जीर्णं तथा जीर्णभवां गदान् ॥ वज्रक्षारः ॥ तिलक्वाथो गुडो व्योषघृतभार्गीयुतो भवेत् ॥ पानं रक्तभवे गुल्मे वा
समसृष्टेवयोषितां ॥ तिलादि ॥ ॥ इति गुल्माधिकारः ॥ अथ हृद्रोगः ॥ घृतेन दुग्धेन गुडांभसा वापिबंति चूर्णं ककुभत्वचोपि ॥ हृद्रो

गजीर्णज्वररक्तपित्ते भवेयु— — चिरजीविनस्ते ॥ कणमादि ॥ हरीतकी वचारास्नापिप्पली नागरोद्भवं ॥ शटीपुष्करमूलाख्यं चूर्णं
हृद्रोगनाशनं ॥ हरीतक्यादि ॥ सूक्ष्मैलामागधीमूलं चूर्णं वहविषासह ॥ नाशयंत्याशु हृद्रोगं गुल्मानपि विशेषतः ॥ सूक्ष्मैला
दि ॥ सूक्ष्मैलाचंदनोशीरयवानी व्योषचित्रका ॥ कंपिल्लकटुकादारु दार्वीत्वक्पर्यटं वचा ॥ पटोलीनिंबषड्ग्रंथामूर्वाभूनिंबसंयु
ता ॥ चूर्णं त्रायंतिसौराष्ट्रीकिशराजविषासमाः ॥ त्रिकर्कं नामगुल्मघ्नं शूलहृत्सन्निपातहृत् ॥ ॥ त्रिकर्कं चूर्णं ॥ ॥ पिप्पल्येला
वचाहिंगुयवक्षारोथसैन्धवं ॥ सौवर्चलं मथो शुंठी दीप्यश्चेति विचूर्णितं ॥ फलधान्याम्लकौलत्थदधिमंथवसादिभिः ॥ पा
येयेत्कुद्भदेहं वचानहृद्रोगशांतये ॥ पिप्पल्यादि ॥ ॥ हारहूरहरीतक्योस्तुल्यशर्करयोरजः ॥ पीतं हिमांबुना हंति पित्तहृद्रो
गमंजसा ॥ हारहूरादि ॥ ॥ तत्रुटीबलारास्नाशुंठीपथ्यासपौष्करं ॥ चूर्णितानावासतामूत्रे पातव्या कफहृद्रुदे ॥ तत्रुट्यादि ॥
पुटदग्धहरिणशृंगं पिष्ट्वा गव्येन सर्पिषा पीतं ॥ हृत्पृष्ठशूलमचिरादुपैति शांतिं सुकष्टमपि ॥ हरिणशृंगचूर्णं ॥ चूर्णं पुष्कर
जंतलीह्यान्माक्षिकेन समायुतं ॥ हृच्छूलकाशघ्नं ककुभस्य च वल्कलं ॥ पुष्करादि ॥ हिंगुग्रगंधाविडविश्वकृष्णाकुष्टाभयाचि
त्रकयावशूवान् ॥ पिबेत्ससौवर्चलपुष्करार्थयवांभसा शूलहृदामयघ्नं ॥ हिंग्वादि ॥ शुंठीवर्चलं हिंगुदाडिमं चाम्लवेतसं
॥ चूर्णमुष्णांबुनापेयं शूलहृद्रोगशांतये ॥ शुंठ्यादि ॥ मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् ॥ हृद्रोगश्वासकासघ्नं क

क्रमस्य वल्कले ॥ रसायनपरं वत्सं वातजिन्मासयोजितं ॥ संवत्सरप्रयोगेन जीवेद्वर्षशतं द्वयं ॥ नागरादि ॥ वचाम्लवेतसं क्षारं सरामठसचित्रकान् ॥ पिवेत्तैलारनालाभ्यां सरोग्रहनिहृत्तये ॥ वचादि ॥ ॥ इति हृद्रोगाधिकारः ॥ ॥ अथ मूत्रकृच्छ्रः ॥ एलाश्मभेदकशिलाजतुपिप्पलिनामेर्वारुवीजलवणोत्तमकुंकुमानां ॥ चूर्णानि तंदुलजलेलुलितानि पीत्वा प्रत्यक्षमृत्युरपि जीवति मूत्रकृच्छ्री ॥ एलादि ॥ शतावरी तथेरंडप्रवालेव पुनर्नवा ॥ एतच्चूर्णं पिवेच्चापि कफजं तण्डुलांवुना ॥ शतावर्यादि ॥ ॥ यष्टीमधुकमद्वीकाचंदनेरक्तचंदनं ॥ रक्ततंदुलतोयेन पीतं मूत्ररुजापहं ॥ यष्ट्यादि ॥ ॥ एलाशिलाजतुपुतेमागधिपाषाणभेदजं चूर्णं ॥ तंदुलजलेन पीतं समूत्रकृच्छ्रं विनाशाय ॥ एलादि ॥ मूत्रेण सुरया वापि कदलीस्वरसेन वा ॥ कफकृच्छ्रविनाशाय श्लक्ष्णां पिष्ट्वा त्रुटिं पिवेत् ॥ त्रुट्येलादि ॥ तक्रेण पिष्टं शितिवारकस्य वीजं पिवेत्कृच्छ्रविघातहेतोः ॥ श्लक्ष्णां पिवेत्तण्डुलधावनेन प्रवालचूर्णं कफमूत्रकृच्छ्रे ॥ ॥ एलाश्मभेदकशिलाजतुपिप्पलीनां चूर्णानि तंदुलजलेलुलितानि पीत्वा ॥ यद्वा गुडेन सहितान्यवलिह्य वेतान्यासन्नमृत्युरपि जीवति मूत्रकृच्छ्री ॥ एलादि ॥ इति मूत्रकृच्छ्राधिकारः ॥ अथ मूत्राघातः ॥ स्वगुप्ताफलमृद्वीकाकृष्णेक्षुरसितारजः ॥ समानमर्द्धभागानि क्षीरक्षौद्रघृतान्वितः ॥ सर्वं सम्यग्विमथ्याक्षमात्रं लीढ्वा पयः पिवेत् ॥ हंति शुक्रक्षयोत्थांश्च दोषावंध्यासुतप्रदा ॥ स्वगुप्तादि ॥ ॥ अश्मरीमूत्रकृच्छ्रेषु भेषजं यत्प्रकी

त्रितं॥ मूत्राघातेषु नन्कुयीद्भिषजं देशकालवित्॥ इति मूत्राघाताधिकारः॥ ॥अथाश्मरी॥ त्रिकंटकस्य बीजानां चूर्णं माक्षिकसं
युतं॥ अवीक्षीरेण सप्ताहं पिवेदश्मरिनाशनं॥ गोक्षुरादि॥ त्रपुसीबीजपयसा पीतेवा नारिकेलजं॥ ऊडुमं॥ मूत्रकृच्छ्राश्मरी श
र्करा वा भवति सुखी कतिपयदिवसैः॥ त्रपुसिबीजादि॥ क्वाथश्चूर्णादियोगेन वरुणादिगणो न च॥ वातश्लेष्माश्मरीशूलं
न्मोदावर्तनाशनं॥ वरुणादि॥ य ऽपिवेदुजंनी सम्यक्तमुडं नृषवारिणा॥ तस्याशु चीरकृत्वापियांत्यस्तं मेरुकशीरा॥ रजन्या
दि॥ पिवतः कटजेद धायवनमन्त्रं वरवादनः॥ निपतत्यचिरादस्य निश्चितं मेरुशर्करा॥ ऊठजादि॥ ॥वरुणाकभस्म
परिश्रं तं तच्चूर्णं यावश्रूकयुतं॥ क्वथनीयं तेताव यावच्चूर्णत्वमायाति॥ तत्कुड्युक्तं हन्त्या ऽद्याममश्मरीघोरं॥ स्त्री हानेगल
मवरं श्वेतरोणंकुक्षौरुजातीबुं॥ आचमवयंवस्तिगदा न्कृछं वातजं घोरं॥ वह्निसदनं सुकुहं मश्ममयं मश्मरीवाणु॥ ॥
वरुणादि॥ इत्यश्मर्याधिकारः॥ अथप्रमेह॥ न्यग्रोधोडुंवरोश्वत्थ शोनकारग्वधाशनं॥ आम्रंकपित्थं जंवूश्च प्रियाले
ककुभं धवं॥ मधुकं मधुकं लोध्रं वरुणं पारिभद्रकं॥ पटोलं मेषश्रृंगी वदंती चित्रक माढकी॥ करंजं त्रिफला शक्रभल्लात
कफलानि च॥ एतानि समभागानि सूक्ष्मं चूर्णानि कारयेत्॥ न्यग्रोधाद्यमिदं चूर्णं मधुना सहयोजयेत्॥ फलत्रयरसं वा ऽपिवे
न्मूत्रविशुद्ध्यति॥ एतेन विंशतिर्मेहा मूत्रकृच्छ्राणि यानि च॥ प्रशमं यान्ति योगेन पिडिका न च जायते॥ न्यग्रोधादि॥ जंबुरसांज

नलिकागुन्नकर्कटाख्यंमाजध्यधात्रिवकुलादलकेशरंच ॥ मांसीलवंगत्रयकंटकभागमेकंचूर्णंनिहंतिनियतंखलुरक्तमे
हं ॥ विडंगादि ॥ गायत्रीशंकंसममंवुप्रक्रंफलत्रयंचैवनिशाविशाला ॥ पयोभिराज्ञैःसलिलेपिवेद्वानिहंतिमेहंरुधिरे
तिसंज्ञं ॥ मायत्र्यादि ॥ छिन्नावह्निकषायेनपाठाकुटजरामठं ॥ त्रिकंटगंचैवसंचूर्ण्यसर्पिमेहीपिवेन्नरः ॥ त्रिकंटकंकिरा
ततिक्तं ॥ छिन्नादि ॥ कंपिल्लसप्तछद्सालजानिवैभीतकीरोहितकोटजानि ॥ कपित्थपुष्पाणिचचूर्णितानिक्षौद्रेण
लिह्यात्कफपित्तमेही ॥ कंपिल्लादि ॥ त्रिफलारजःसमानंरजोरजन्याःसितासमता ॥ ताभ्यामधुनावलीढेमेत्रत्वमेहना
मापिनाशनि ॥ त्रिफलादि ॥ ॥ चूर्णंनिशायामधुनासमेतंधात्रीफलानांस्वरसेनमिश्रं ॥ प्रलीढमल्पैर्दिवसैर्निहंतिप्रमे
हसंज्ञानखिलान्विकारान् ॥ निशादि ॥ सक्षौद्ररजनीचूर्णममृतायारसंपिवेत् ॥ सक्षौद्ररजनीचूर्णमामलक्यारसैःसह ॥ सर्व
प्रमेहनाशाययथाक्रमंवशीलयेत् ॥ रजन्यादि ॥ ॥ इतिप्रमेहाधिकारः ॥ अथमेदरोगः ॥ सचव्यजीरकव्योषहिंगुसौ
वर्चलानला ॥ मस्तुनासक्तवपीतामेदोघ्नावह्निदीपना ॥ चव्यादि ॥ फलत्रयंसकटुकसतैललवणान्वितं ॥ षण्मासमुपयो
गेनकफमेदोनिलापहं ॥ फलत्रयादि ॥ व्योषचित्रकशिग्रूणांत्रिफलाकटुरोहिणी ॥ बृहत्यौद्वेहरिद्रेचपाठामतिविषास्थि
रां ॥ हिंगुकेबुकमूलानियवानीधान्यचित्रकं ॥ सौवर्चलमजाजीचहपुषाचेतिचूर्णयेत् ॥ चूर्णंतैलघृतक्षौद्रभागाःस्युर्मानतः

॥ सात्मद ॥
॥ ६७ ॥

समाः ॥ शत्रूणां षोडशगुणो भागः संतर्पणं पिबेत् ॥ प्रयोगां तस्य शाम्यंति रोगा संतर्पणोत्थिता ॥ प्रमेहमूढवाताश्चकुष्ठा
न्यर्शांसि कामलो ॥ प्लीहं पांड्वामयः शोथो मूत्रकृच्छ्रमरोचकं ॥ हृद्रोगो राजयक्ष्मा च काशश्वासो गलग्रहः ॥ कृमयो ग्रहणी
दोषः श्वैत्यं च स्थौल्यमेव च ॥ नराणां दीप्यते वह्निः स्मृतिर्बुद्धिश्च वर्द्धते ॥ व्योषादिसक्तुः ॥ पीत्वाश्वगंधां पयसार्द्धमासं घृतेन तै
लेन सुखांबुना वा ॥ कृशस्य पुष्टिं वपुषो विधत्ते बालस्य सस्यस्य यथांबुवृष्टिः ॥ अश्वगंधादि ॥ अलंबुषाभवं चूर्णं पीतं कांजि
कसंयुतं ॥ दौर्गंध्यं नाशयत्याशु स्वेदं मेदोभवं नृणां ॥ अलंबुषादि ॥ शैलेयकुष्ठागुरुदेवदारुकौंतीसमांसीद्वयपत्रकैला ॥
श्रीवासस्य क्षारवपुष्पदेवपुष्पा तथा सर्वमिदं प्रविष्टं ॥ धत्तूरपत्रस्वरसेन गाढमुद्वर्त्तनं स्थौल्यहरं प्रदीष्टं ॥ शैलेयादि
॥ हरीतकी लोध्रमरिष्टपत्रं चूतत्वचो दाडिमवल्कलं वा ॥ एषोंगरागः कथितोंगनानां जंघाकषायेन नराधिपानां ॥ गोमूत्रपि
ष्टं विनिहंति कुष्ठं वर्णोज्ज्वलं गो पयसा च युक्तं ॥ कक्षादिदौर्गंध्यहरं पयोभिः शस्तं वशीकृद्रजनीद्वयेन ॥ हरितक्यादि ॥ ॥
विल्वाम्लजंबूफलपूरकाणां पत्रैः कपित्थस्य दलानुमिश्रैः ॥ आनूपवत्कर्मविधानयोगैः वचाधिशोध्यावरगंधहेतोः ॥ विल्वा
दि ॥ पथ्या नखी चंदनकुष्ठसर्ज्जैः पुनः पुनश्चागरुशर्कराभ्यां धूपोजनानां हृदयापहारो विख्याततनामा मलयानिलोयं ॥ पथ्या
दि ॥ चंडांशुकनिलैलेलाध्रैः शिरीशोशीरकेशरो ॥ उद्वर्त्तनं भवेद्रौक्ष्यप्रश्वेदकनिवारणः ॥ ॥ इति स्थौल्यकृशाधिकारः ॥ ॥

॥ रामः ॥
॥ ६७ ॥

अथोदरः॥ कुष्टंदंतियवक्ष्यारव्योषंत्रिलवणंवचः॥ अज्ञादीदीप्यकंहिंगुस्वर्जिकाचव्यचित्रकं॥ शुंठीचोष्णांभसापीतावातोदररुजापह॥ कुष्ठादि॥ सामुद्रसौवर्चलसैन्धवानांक्षारोयवानीमजमोदकंच॥ सपिप्पलीचित्रकशृंगवेरंहिंगुविडंगेतिसमानिकुर्यात्॥ एतानिचूर्णानिघृतप्लुतानिभुंजीतपूर्वंकवलप्रशस्तं॥ वातोदरंगुल्ममजीर्णभुक्तंवायुप्रकोपंग्रहणीचदुष्टं॥ अर्शासिदुष्टानिचपांडुरोगंभगंदरंश्वेतिनिहंतिसद्यः॥ सामुद्राद्यं॥ पटोलमूलंरजनीविडंगंत्रिफलात्वच॥ कंपिल्लकंनीलिनीचत्रिवृताश्चेतिचूर्णयेत्॥ षडाद्याकर्षिकानंत्यांस्त्रीश्चद्वित्रिचतुर्गुणान्॥ कृत्वाचूर्णंततोमुष्टिंगवांमूत्रेणनापिबेत्॥ विरिक्तोजांगलरसैरोदनंमृदुभोजयेत्॥ मंडंपेयांचपीत्वावासव्योषंषडहंपयः॥ शृतंपिबेत्ततश्चूर्णंपिबेदेवंततःपुनः॥ हंतिसर्वोदरापेतच्चूर्णंजातोदकानिच॥ कामलापांडुरोगंचश्वयथुंचापकर्षति॥ अत्रपटोलादेभागाषट्कार्षिकाः॥ एषांद्वित्रिचतुर्भागाग्रहणीयाः॥ ॥पटोलादि॥ चित्रकंत्रिफलाव्योषंजीरकंहपुषावचा॥ यवानीपिप्पलीमूलंशतपुष्पांजगंधिका॥ अजमोदाशठीधान्यंविडंगंस्थूलजीरकं॥ हेमाह्वापोष्करामूलंक्षारोलवणपंचकं॥ कुष्ठंचेतिसमांशानिविशालास्याद्विभागिका॥ त्रिवृत्त्रिभागाविज्ञेयादंत्याभागत्रयंभवेत्॥ चतुर्भागासातलास्यात्सर्वाण्येकत्रचूर्णयेत्॥ पाचनास्नेहनाद्यैश्चस्निग्धकोष्ठस्यरोगिणः॥ दद्याच्चूर्णंविरेकार्थंसर्वरोगप्रणाशनम्॥ हृद्रोगेपाण्डुरोगेचकासेश्वासेभगंदरे॥ मंदेग्नौचज्वरेकुष्ठेग्रहण्यांचगलग्रहे॥ दद्याद्युक्तानुपानेनतथाध्मा

निभृतादिभिः॥गुल्मे बदरजीरेण विड्भङ्गे दधिमस्तुना॥उष्णाम्बुभिरजीर्णे च वृक्षाम्लैः परिकर्त्तिषु॥उष्ट्रीदुग्धेनोदरेषु तथा तक्रेण वा
गवां॥प्रसन्नया वातरोगे दाडिमांभोभिरर्शसि॥द्विविधे च विषे दद्यात् घृतेन विषनाशनं॥चूर्णं नारायणं नाम दुष्टरोगगणापहं
॥नारायणचूर्णं॥तिलसर्षपनालानि यवानालं कुधान्यपि॥दशमूलमपामार्गं दन्ती चित्रकमाढकी॥मधुनामेड्डित्रिफला
त्रिवृताकदवीरजं॥पुनर्नवा वृश्चिकाली मर्ककंपिल्लनिम्बकं॥एषां दशपलान् भागान् नयाद् दग्ध्वा समाचरेत्॥गोमूत्रद्रोणसं
युक्तं सह कृत्वा तु पाचयेत्॥अथास्येमानि चूर्णानि समवाप्य पुनः पचेत्॥वचामतिविषापाठा द्वेहरिद्रे महौषधं॥त्रिवृत्कं
पिल्लकं क्षारं तथैव लवणानि च॥महौषधं शिग्रुफलं कुष्ठं भल्लातकानि च॥पिप्पल्यथ विडङ्गानि त्रिफला देवदारु च॥कटु
कारोहिणी मुस्तं दन्ती हिंग्वम्लवेतसं॥दधिमण्डारनालानां माढकाढकमाचरेत्॥ग्रसामऽङ्गारभावेन सर्पिस्तैलं विपाचयेत्॥
विगतार्चि यथाशान्तमथैनवतारयेत्॥ततो विडालपदकं पिबेदुष्णेन वारिणा॥मद्यैरम्लैश्च भावस्तेन क्षीरैर्मूत्रेण वा पुनः॥म
हाक्षार इति ख्यातो जठराणां विनाशनः॥प्लीहश्वासार्शासिगुल्मानि शूलं च हृदयग्रहं॥यक्ष्माणं च प्रमेहं च पांडुरोगं — — दरं॥सकृ
मीन् ग्रहणीदोषान् तथोदावर्त्तकं डलान्॥मूत्रकृच्छ्रमपस्मारं क्षारोयं विनिवर्त्तयेत्॥महाक्षारः॥विडङ्गकाग्निसिंधूत्थाशक्र
न्द धाव चानिना॥पिबेत्क्षारेण संचूर्णं प्लीहगुल्मोदरापहान्॥विडङ्गादि॥ ॥अर्कपत्रं सलवणं पुटदग्धं सचूर्णितं॥निहंति

मस्तुनापीतं प्लीहानमग्निदारुणं ॥ अर्कादि ॥ हिंगुत्रिकटुकं कुष्ठं यवक्षारोथ सैन्धवं ॥ मातुलुंगरसोपेतं प्लीहशूलेहरं रजः ॥ हिंग्वादि ॥ यवानिकाचित्रकयावशूकषड्ग्रंथदंतीमगधोद्भवानां ॥ प्लीहानमेतद्विनिहंतिचूर्णं उष्णांबुनामस्तुसुरासवैर्वा ॥ यवान्यादि ॥ विडंगानियवानीकचित्रकंचेतितत्समं ॥ द्विगुणांदेवदारुंच नागरं सपुनर्नवं ॥ त्रिवृद्भागाश्चत्वारस्तत्सर्वं कल्कपेषितं ॥ क्षीरेणोष्णेनपानंवा स्नेहं प्लीहविनाशनं ॥ अथचैतानि चूर्णानि गवांमूत्रेणपाययेत् ॥ उदरीमूत्रयुक्तैवं प्लीहानं संप्रणाशयेत् ॥ विडंगादि ॥ विडंगचित्रकं शुण्ठी सघृतं सैन्धवं वचा ॥ दग्ध्वाकपाले पयसागुल्मप्लीहापहं पिवेत् ॥ विडंगादिक्षारः ॥ चित्रकं त्रिवृतादंती त्रिफला पुष्करैः समैः ॥ यावंत्येतानि चूर्णानि तावन्मात्रं तु सैन्धवं ॥ भावयेत्तु स्नुहीक्षीरेनत्कांडे प्रक्षिपेत्ततः ॥ मृत्तिकाचान्लिप्तस्य प्रक्षिपेज्जातवेदसि ॥ सुदग्धंतु ततः कृत्वा उद्धृत्य शनैर्भिषक् ॥ यकृत्प्लीहोदरानाहगुल्मपाण्डुामयादिहत् ॥ सेवितोग्निवलं मस्त्वाचार्शोभ्यः प्रतिमोक्षयेत् ॥ लवणोग्निमुखोनामवह्निदीप्तिकरः परः ॥ अग्निमुखलवणं ॥ ॥ चपलायाः पलं पंचयवाग्रतावदेव तु ॥ सामुद्रलवणानां च पलानां च प्रदापयेत् ॥ वेरण्ड मारेवाटकं चैव शिखीकंजी तथैव च ॥ शिरीषालोध्रवृक्षश्च विषाख्यामाराकंदवः ॥ सुधावशिरखगमेवमस्तकं ताडसंभवं ॥ वहूणांशिग्रुमूलं च वाघालं चित्रकं तथा ॥ एषां पंच पलान्भागान् पलाशास्तेचविंशतिः ॥ क्षारं कृत्वा तु सर्वेषां पचेत्तत्र जलाढकं ॥ गोमूत्रस्य तु तत्रैव साधयेत्तद्यथाविधिः ॥ भक्षयेत् घृतसंयुक्तं यकृत्प्ली

हृद्ग्रहं परं ॥ वातमष्ठीलकं चैवगुल्मं हन्ति त्रिदोषजं ॥ क्षारपिप्पली ॥ ॥ प्रशस्तेहनि छिन्ने वृक्षकं लोध्रचित्रकं ॥ विशाला वाशिरं पु
ष्पं खरमंजरिका स्नुही ॥ वेणुमारवोटकं नालमस्तकं सहमारकं ॥ वरुणं शिग्रुमूलं च वासाघातं चापरुष्करं ॥ कंदो विशाखापु
ष्पी च तथा ब्राह्मणयष्टिका ॥ पृथक्पंचपलान्येषां पलाशान्येव विंशति ॥ क्षारं कृत्वा पचेद्वारि गोमूत्राढकयोस्तथा ॥ तस्मिन्वि
पाच्य सक्षारं समुद्रानलपिप्पली ॥ पृथक्पंचपलैः भागैः पिप्पली च नमर्द्दितं ॥ यकृत्प्लीहापहं श्रेष्ठं वाताष्ठीलामगुल्मजित्
॥ बृहत्क्षारपिप्पली ॥ ॥ पारिभद्रपलाशार्कस्नुह्यपामार्गचित्रका ॥ वरुणाग्निमंथवसुकश्वदंष्ट्रावृहतीद्वयं ॥ पूतिकास्फोट
कुटजः कोशातकपुनर्नवा ॥ समूलपत्रशाखांश्च क्षोदयित्वा तु लूखले ॥ तिलनालायदीप्ताग्नौ सुदग्धं तस्य शीतले ॥ क्षारप्रस्थं
गृहीत्वा तु न्यसेत्पात्रे दृढे नवे ॥ जलद्रोणे विपक्तव्या यावत्पादांशशेषितं ॥ पूर्ववत्क्षारकल्केन साधयेत विचक्षणः ॥ प्रस्थमेकं
वलवणं तदर्द्धं च हरीतकी ॥ तुल्यांबुभागे गोमूत्रे साधयेन्मृदुनाग्निना ॥ किंचित्सवाष्पे वार्द्रे च सम्यक्सिद्धे वतारिते ॥ अजाजी
ऊषणं हिंगुयवानीपुष्करं शठी ॥ एतैरथार्द्धपलिकैश्चूर्णं कृत्वा प्रदापयेत् ॥ लवणं चाभयानाम भक्षयीत तथा बलं ॥ व्याधिं चापेम
तिमानन्नपानं यथाहितं ॥ ये च कोष्ठगता रोगास्तांस्त्रिहन्ति न संशयः ॥ यकृत्प्लीहोदरानाहगुल्मशूलाग्निसादजित् ॥ प्रातरुत्थान्त्रहृ
द्रोगशर्कराश्मरिनाशनं ॥ अद्धपेच्छिल्यरक्त्वा क्षारांभो ग्राह्यमिष्यते ॥ अभयालवणं ॥ ॥ उदराधिकारः ॥ अथ शोथ ॥ तेवरु

हपुषाव्योषचित्रकंचव्यमुस्तकं॥ त्रिफलाचविडंगंचकारवीहिंगुवत्सकं॥ दुरालभाचभृंगीचशठीपुष्करकंततः॥ एलापूतीकरं
जश्चसमभागानिकारयेत्॥ पंचभिर्लवणैर्युक्तंचूर्णंकृत्वाप्रयत्नतः॥ अजीर्णेसुरयादियाघृतमंडेनवाभजेत्॥ तक्रेणवायथाप्र
ज्याउजलेनोष्णेनवारिणा॥ कांजिकेनचसंपीतंतथातेंडुलवारिणा॥ धात्रंसमीक्ष्यदातव्यंभिषज्ञासुसमाहिता॥ श्वयथौपांडुरो
गेषुहृद्रुचौप्लीहसंभवे॥ शूलेगुल्मेचमंदाग्नौतथैवविषमज्वरे॥ पित्तरोगेषुसर्वेषुवातरोगेतथैवच॥ श्लेष्मरोगेषुसर्वेषुचूर्णमे
तत्प्रशस्यते॥ हृहतुंबुरादि॥ तुंबुरुचित्रकंपथ्यायवानीविडसैन्धवं॥ ग्रंथिकंचाजमोदाचनिर्गुंडीव्योषसंयुतं॥ चूर्णमामेवशोथे
चश्लेष्मिकेचाग्निमंदके॥ तुंबुरादिरितिख्यातसर्वमारुतदोषजित्॥ द्वादशांगतुंबुरादि॥ ॥ हिंगुतुंबुरुनिर्गुंडीत्रिक्षारलवणात्र
यं॥ चव्यंग्रंथिकचित्रंचव्योषधात्रिफलाम्लता॥ चविकंचविकाधान्यसकृष्णाजातिपूतना॥ कारवीचवचादीप्यकाजमोदासमानिच
॥ पीतमुष्णांबुनाचूर्णंसर्वारोचकनाशनं॥ हृत्पार्श्वोदरशोथंचवातघ्नंचाग्निवर्द्धनं॥ हिंग्वादि॥ ॥ हिंगुतुंबुरुधान्याकाम्लतश
टीत्रिक्षारनिर्गुंडीनीव्योषचित्रकचव्यग्रंथिकशिवात्रिजीरधात्रीफलं॥ कुष्टैलालवणंचदीप्यकवचापातव्यमुष्णांबुनासर्वेष्वेवत्व
रोचकेप्युरकेशोथेसदाशस्यते॥ मध्यमहिंग्वादि॥ यवानीसैन्धवंचव्यंमरिचंपिप्पलीशिवा॥ तालीशकामलंविश्वंरुचकंचगुडेन
वा॥ वातश्लेष्मंचमंदाग्निंश्वयथुंनाशनंपरं॥ पांडुरोगंतथाशीहृग्रहणीनाशनंपरं॥ यवान्यादि॥ कृष्णाग्निविश्वघनजीरककंट

कारीपाठानिशाकरिकणामगधाजटानां ॥ चूर्णं तु वोष्णसलिलेन विलोड्य पीतं नातः परं श्वयथुरोगहरं नराणां ॥ कृष्णादि ॥ भू
निंवविश्वचूर्णं जग्ध्वा पिबपुनर्नवाक्काथ ॥ अपहरति नियतमाशु श्वयथुं सर्वांगजं नराणां ॥ भूनिंवादि ॥ गुडपिप्पलीशुंठीनां
चूर्णं श्वयथु सर्वांगजं नराणां ॥ भूनिंवादि ॥ गुडपिप्पलीशुंठीनां चूर्णं श्वयथुनाशनं ॥ आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोध
नं ॥ गुडादि ॥ पुनर्नवादार्व्यमृतापाठाविल्वं श्वदंष्ट्रिका ॥ रजन्यौ द्वे बृहत्यौ च पिप्पली चित्रकं वृषं ॥ समभागानि संचूर्ण्य गवां
मूत्रेणावापिबेन्न ॥ वहुप्रकारं श्वयथुं सर्वगात्रप्रसारिणं ॥ हंति वाप्युदरारापर्शोप्रणाशश्चोढ्नानपि ॥ पुनर्नवाद्यं ॥ ॥
पुनर्नवाविश्वत्रिवृद्गुडूचीशम्याकपथ्यासुरदारुचूर्णं ॥ शोफोकफोत्थं महिकाक्षयुक्तं मूत्रं पिवेद्वा सलिलेन थोष्णे ॥ पुनर्न
वाद्यं ॥ ॥ विडंगातिविषादारुनागरेन्द्रयवावचा ॥ उष्णांबुना हरेत्क्रोथ वातश्लेष्मसमुद्भवं ॥ विडंगादि ॥ ॥ पुनर्नवाजयाचू
र्णं तु ल्यमुषणाजेरजं ॥ पेयमुष्णांबुना हंति शोथं पित्तकफोद्भवं ॥ पुनर्नवादि ॥ यवानिकाजाजिसचित्रपाठासकुष्ठमेलावच
पंवलोणं ॥ हिंगुत्रिवृड्डिनतनंयं वदंति पिबेत्सुखोष्णं श्वयथौ विरेकं ॥ यवान्यादि ॥ पिप्पल्यजाजीगजपिप्पलीवनितिदिग्धिका
नागरचित्रकानि ॥ यवान्यथोपिप्पलिमूलपाठामुस्तश्वसोयंसुखवचूर्णयीत ॥ हन्यात्रिदोषं चिरजं च शोथं कल्कश्च भूनिंवम
होषधाभ्यां ॥ पिप्पल्यादि ॥ रास्नाविषार्कत्रिफलाविडंगशिग्रुवचामूषिककर्णिकाच ॥ निर्वीकजोव्याघ्रनखेसमूर्वासुवर्चलाति

क्रकरोहिणी च॥ सकाकमाचीवृहती सकृष्णापुनर्नवानागरचित्रकौ च॥ उद्वर्त्तनं शोथविमृत्त्वपि कृसरतेन तथा मूलकतोयशो
षकः॥ स्नुह्यादि॥ इति शोथाधिकारः॥ अथ वृद्धि॥ गंधर्वहस्ततैलेन क्षीरेणाच्युतं पिवेत्॥ विशालामूलजं चूर्णं वृद्धिहन्या
न्न संशयः॥ गंधर्वादि॥ हरीतक्याहृ भूनिंवधानिकाक्षगंधपथक्॥ लवंगसार्द्धकर्षं स्यात्सनाप्यक्षचतुष्टयं॥ सर्वतः सार्द्धग
रिणतां सितां तावत्तथा मधुः॥ लेहोऽयं वृद्धिनाशाय द्वितीयो नास्यतः परं॥ पथ्यदं स्तुवादि॥ मूलं विल्वकपित्थयोररलुकस्याग्नो
र्वहन्त्योर्द्धयोः श्यामापूतिकरंजशिग्रुकतरोविश्वौषधात्पुष्करं॥ कृष्णाग्रंथिकवेल्लपंचलवणां क्षाराजमोदान्वितं पीतं कांजिक
कोष्णेनायमथितस्ते श्चूर्णितं वृध्नाजित्॥ विल्वादि॥ मृष्टैश्चैरंडतैलेन सम्यक्कल्कोभयाभव॥ कृष्णसैंधवसंयुक्तो वृध्नरोगहरः
परः॥ एरंडादि॥ इति वृद्ध्यधिकारः॥ अथ गंडमाला॥ हिंगुभागो भवेदेको वचायाद्विगुणा मता॥ त्रिगुणा त्रिफला देया त्रिगुणं गंड
माहिषः॥ भक्षयेत्प्रातरुत्थाय गलगंडविनाशनं॥ दिने दिने प्रयोक्तव्यं मासमेकं निरंतरं॥ हिंग्वादि॥ विषघ्नकृष्णाभयाशुंठीमधुनाक
र्षमात्रकं॥ गलरोगहरे द्वक्के धारयेद्दिनसप्तकं॥ विषघ्नाद्यादि॥ द्विमाषहिंगुकं कोलं षरामार्षं व्योषकं ददेत्॥ सर्वांङ्गमाहिषं गंडंति
लतैलेन लेहयेत्॥ हिंग्वादि॥ त्रिकटुहिंगुकं कोलं षज्जाजीदीप्यकस्तथा॥ जातीसत्क्ष्मेलसिंधूत्थयवक्षाराग्निग्रंथिकं॥ प्रतिकर्ष
वसर्वांङ्गमाहिषस्य च गंडाकं॥ त्रिमाषमात्रान्तस्येवतिलतैलविलोडितं॥ सप्ताहयोजयेन्मासात् गलगंडविनाशयेत्॥ त्रिकट्वादि॥

॥ सात्म्य ॥
॥ ७१ ॥

अश्वत्थकाष्ठनिर्मुलगवार्द्दंशैच दाहयेत् ॥ वाराहमधुसंयुक्तं भस्म हन्त्यपचीव्रणान् ॥ अश्वत्थादि ॥ कांचनारत्वचश्चूर्णं पीत्वा तण्डु
लवारिणा ॥ कांचनारत्वचं पीत्वा मुच्यते गलगंडयोः ॥ कांचनारादि ॥ इति गंडमालाधिकारः ॥ अथ श्लीपदः ॥ पिप्पलीत्रिफ
ला दारु नागरं सपुनर्नवा ॥ प्रत्येकं षोडश पलं ग्रहीत्वा चवि चूर्णयेत् ॥ वृद्धदारकचूर्णेन समभागेन मिश्रयेत् ॥ अतश्चूर्णं पिवेत्
कर्षमानवः कांजिकादिभिः ॥ जीर्णे त्वपरिहारस्याद्भोजने सर्वकामिके ॥ नाशयेच्छ्लीपदं गुल्मं शूलप्लीहानमेव च ॥ अग्निं च कु
रुते दीप्तिं सेव्यमानं तु भस्मकं ॥ उदावर्त्तमजीर्णं च हन्त्यामानिलपांडुतां ॥ पिप्पल्यादि रयं ख्यातो विशेषा श्लीपदे हितः ॥ पिप्पल्या
दि ॥ काकादनी काकजंघा बृहती कंटकारिका ॥ कंदं च पृष्ठी मेदारो लंवीभूकनसांतथा ॥ दग्ध्वा मूत्रेण तद्भस्म श्रावयेत् क्षारकल्प
वित् ॥ तस्य दध्यात्तती वापं काकोडुंवरिकारसं ॥ मदनाच्च – फ क्वाथं भूकाल्व स्वरसं तथा ॥ काकरांति काकमही वृहती कंटका
री· मुंडी· अर्कफल· पलास· दग्ध्वा· भस्म गोमूत्रेण श्रावयित्वा· पुन· डुंवरीरसं मेलयित्वा धत्तूरक्वाथपल १ सिरिसस्वरसपल १
भावयित्वा तच्चूर्णं कर्षार्द्धं भक्षयेत् ॥ केचित्तु स्योनाकं च दंती ॥ एष क्षारस्तु पानीय श्लीपदं हंति सेवितं ॥ अपचीगंडमालां चग्रहणी
दोषमेव च ॥ अभक्तरोचकं चैव हन्यात् सर्वविषाणि च ॥ पक्वे च तैलं संसिद्धं नस्याभ्यंगेषु योजितं ॥ एतान्येवामयान् हन्यात् येव दुष्ट
व्रणान्नृणां ॥ काकादन्यादि क्षारः ॥ ॥ त्रिकटुत्रिफलाचव्यदार्वीवरुणागोक्षुरं ॥ अलंवुषा तद्द्र्वी च समभागानि चूर्णयेत् ॥ स

॥ राम: ॥
॥ ७१ ॥

र्वेषां चूर्णमाहृत्य वृद्धदारस्य तत्समं ॥ कांजिकेन च तत्पेयमक्षमात्रप्रमाणतः ॥ जीर्णे वापरिहारस्याद्भोजनं च सदा हितं ॥ नाशये
च्छ्लीपदं स्थौल्यमामवातं च दारुणं ॥ गुल्मकुष्ठारुचिहरं वातश्लेष्मरुजापहं ॥ अलंबुषालज्जालुभेदः वृद्धदारचूर्णं ॥ ॥
पिप्पलीत्रिफलादारुनागरं सपुनर्नवं ॥ भागैर्द्विपलिकैरेषां तत्समं वृद्धदारुकं ॥ कांजिकेन हितं चूर्णं पिबेत्कर्षप्रमाणतः ॥ जी
र्णे चापरिहारस्याद्भोजनं सर्वकामिकं ॥ श्लीपदं वातरोगांश्च हन्यात्प्लीहानमेव च ॥ अग्निं च कुरुते घोरं भस्मकं च प्रयच्छति ॥
पिप्पल्यादि ॥ ॥ इति श्लीपदाधिकारः ॥ अथ विरेकविधिः ॥ भूनिंबार्द्धपलं निशापलयुतं दार्व्याः पले द्वे तथा ॥ पूर्वार्द्धेन पुनर्नवांकुरस
मं दार्व्याः समः प्रग्रहः ॥ सार्द्धं दुस्पर्शकाया द्विपलकटुकाया स्यात्तदर्द्धं तवैविभ्याह्वं विशाला समानममृताकर्षांस्तु पंचैव तु ॥ सर्वं व
त्सकसप्तकर्षसहितं सश्लक्ष्णाचूर्णीकृतं वासायाः ॥ स्वरसेन भावितमिदं त्रिगुणं च चैवासरान् ॥ भूनिंबकर्ष २ निशापल १ दार्वीप
ल २ पुनर्नवाकर्ष १ दुरालभपल २ कटुकाकर्ष ६ यष्टिमधुकर्ष ३ शुंठीपल १७ दन्तीकर्ष ५ वत्सककर्ष ७ चूर्णयित्वा वासास्वरसभा
वना ३ ॥ भूयस्तद्रुजवारिणा प्रतिदिने पीतं पुरस्त्वेरवोप्रसांविद्रधिविनाशनं च कथितं पथ्यं स्वयं ब्रह्मणा ॥ भूनिंबादिचूर्णं वटिका
या ॥ हरीतकीसैंधवधातकीनां रजो पलं क्षौद्रयुतं प्रयुक्तं ॥ निहंति सद्यः कृतमेव पुंसामंतर्भवं विद्रधिं रूपमुग्रं ॥ हरीतक्यादि ॥ शाम
यितमाराकमूलं क्षौद्रयुतं तंदुलांबुनापीतं ॥ अंतर्भूतविद्रधिमुद्धतमश्वमेव मनुजस्य ॥ पाममूलादि ॥ कासीससैन्धवशिलाजतु

हिंगचूर्णमिश्रीकृतो वरुणावल्कलजः कषाय ॥ आभ्यंतरोत्थितमपक्कमतीप्रमाणं व्रणामयं जयति विद्रधिमुग्रशोथः ॥ कासीसादि ॥ इति विद्र
ध्याधिकार ॥ ॥ अथ व्रण ॥ न्यग्रोधोडुंवरोश्वत्थप्लक्षामलकपीवना ॥ आम्रातकाम्रककुभजंवुद्वयपिपीलक ॥ मधुयष्टीरोहिणीवंजुल
श्च करंजकः ॥ वदरीतिंदुकोल्लोध्रभल्लातकपलाशक ॥ नंदिवृक्षश्चेति गणो न्यग्रोधादिरुदीरितं ॥ न्यग्रोधादिगणो व्रणपसंग्राही भग्नसा
धनः ॥ रक्तपित्तहरो दाहमेहघ्नो योनिदोषहा ॥ चूर्णकल्कादिवटिकास्ते हाद्याव्रणारोपणा ॥ भग्नसंधानकाज्ञेया यथायोग्यं प्रयोजयेत्
॥ न्यग्रोधादिगणः ॥ ॥ अतिविषामलकमार्गी विश्वौषधिपिप्पलीविभीतं ॥ चूर्णितं गुकृमिघ्नांपं समुष्णेन वारिणापीतं ॥ अतिविषका
द्यचूर्णं ॥ सघृतं वस्थिसंहार लाक्षागोधूममर्जुनं ॥ संधिभग्ने स्थितं भग्ने पिवेत्क्षीरिणा वा घृतः ॥ लाक्षादि ॥ इति व्रणभग्नाधिकारः ॥ अ
थ भगंदरः ॥ मधुतैलयुता विडंगासारत्रिफलामागधिकाकणाश्चलीढा ॥ कृमिकुष्टभगंदरप्रमेहाक्षजनाडीव्रणरोपणं भवंति ॥ ॥
विडंगादि ॥ खदिरांवुतनोधत्वाकषायं त्रैफलं पिवेत् ॥ महिषाक्षविडंगानां भगंदरविनाशनं ॥ खदिरादि ॥ इति भगंदराधिकारः ॥
अथोपदंशः ॥ चूर्णयेत्त्रिवपत्राणि पथ्यानि चाहूमांशकं ॥ धात्रीचत्वावंतीर्णत्रिंनिंवषोडशभागिकं ॥ शाणमानमिदं चूर्णं
मश्रीयादंभसासह ॥ फिरंगं नाशयेत्सेव बाह्याभ्यंतरजं तथा ॥ निंवादि ॥ चोपचीनोद्भवं चूर्णं शाणमात्रं समाक्षिकं ॥ फिरंगव्याधि
नाशाय भक्षयेल्लवणं त्यजेत् ॥ चोपचीन्यादि ॥ पलाशपत्रवृंतानि कर्षमात्रं च भक्षयेत् ॥ तथा निंववराचूर्णं उपदंशहरं परं ॥ पलाशप

चादि ॥ इत्युपदंशफिरंगाधिकारः ॥ अथ कुष्ठः ॥ अवल्गुजविडंगानि धात्रीपिप्पलयो मधु ॥ एषां चूर्णं तैललीढं सर्वकुष्ठापहरं परं
वाकुच्यादि ॥ विडंगत्रिफलाकृष्णारजो मधुयुतं लिहन् ॥ हंति कुष्ठं कृमिन्मेहान्नाडीव्रणभगंदरं ॥ विडंगादि ॥ त्रिफलातिविषाक
टुकं निंबकलिंगकवलापटोलानां ॥ मागधिकारजनीद्वयपद्मकमूर्वाविशालानां ॥ भूनिंबपलाशानां दद्याद्दंतीपलं त्रिवृद्ब्राह्मी
यथोत्तराद्विगुणा ॥ तस्याञ्जपुनर्नवायुतं पीतं चूर्णं सुप्रिकुष्ठघ्नं परमं ॥ त्रिफलादि ॥ पटोलमूलस्य तथा गवाक्ष्याः पृथक् पलांशा त्रि
फलात्वचश्च स्यात्त्रायमाणा कटुरोहिणी च भागार्द्धिके नागरपादयुक्ते ॥ पलं तथैषां सह चूर्णितानां जले श्रृतं दोषहं पिवेत्त्रा ॥
जीर्णे रसैर्धन्वमृगद्विजानां पुराणशाल्योदनमंददीत ॥ कुष्ठानि शोफं ग्रहणीप्रदोषं अर्शांसि कृच्छ्राणि हलीमकं च ॥ योगः प्र
योगेन निहंति चैषां हृद्वस्तिशूलं विषमज्वरं च ॥ पटोलादि ॥ यः सोमराज्याः करषं पिवेत्तु कोष्णांभसा सूर्यकरानतप्तः ॥ यश्चान्न
काले पयसान्नमश्नन् त्रिसप्तरात्रेण निहंति कुष्ठं ॥ करषं ॥ कर्षं ॥ तिलैः समं वाकुचिकां हि नासीसं वत्सरं यो नियमेन खादेत् ॥
तस्य प्रणस्यंति हि कुष्ठमेधमेधादयश्चापि भवंति भावा ॥ वाकुच्यादि ॥ सितातैलकृमिघ्नानां धात्रीवाकुचिपिप्पली ॥ लीढा नः स
र्वकुष्ठानि जयत्यतिउत्कटान्यपि ॥ विडंगादि ॥ शशांकलेखा सविडंगसारा सपिप्पलीका सहुताशमूलं ॥ सायोमला सामलकं सतैला
सर्वाणि कुष्ठानि निहंति लेहः ॥ वाकुच्यादि ॥ काकोडुंबरिकारिष्टविडंगव्योषयासकं ॥ चूर्णं पीत्वा जयेत्कुष्ठं कटजत्वक्सितांवुना ॥

काकोदुंवरिकादि ॥ तुत्थं व्योषं त्रिफला मंजिष्ठा दारु पंचमूलं लेपो ह ॥ सप्तछदनिंवत्वक् सविशाला श्वित्रको मूर्वा ॥ चूर्णितं पर्णाभागेन
वभिः संयोजितं मध्वंशासिद्धं कुष्टनिवर्हणामेतत्त्रयोगिकं भक्षणां ॥ श्वयथुं पाण्डुरोगं श्वित्रं ग्रहणीप्रदोषमर्शांसि ॥ व्रध्नभगंद
रपिडिकाकंडुकोपं च विनिहंति ॥ तुत्थकादि ॥ तिलाज्यत्रिफलाक्षौद्रव्योषंभल्लातशर्कराः ॥ वृष्यसप्तनमो मेध्य कुष्टहा कामचा
रिणा ॥ त्रिफलादि ॥ अवल्गुजवीजकर्षं पिवेदुष्णेन वारिणा ॥ छिन्नायास्वरसो वापि पीयमानो यथावलं ॥ जीर्णे घृतेन भुं
जीत स्वल्पयूषोदनेन सः ॥ अपि पूतिशरीरोऽपि दिव्यरूपि भवेन्नरः ॥ अवल्गुजादि ॥ निंवपत्रनिशाचूर्णं वाकुचीवीजकं समं
॥ चूर्णयित्वा पिवेदुष्णैः प्रभाते श्वित्रनाशनं ॥ निंवादि ॥ मथितेन पिवेच्चूर्णं काकोदुंवर्यवल्गुजं ॥ तैलाक्तो घर्मसेवि स्यात्तक्रा
शीवसमड्ररेत् ॥ कुष्ठं निर्गुंडिकामूलं वाकुचीवीजसंयुतं ॥ तक्रेण कर्षमात्रं तु पीत्वा श्वित्रं विनाशयेत् ॥ काकोदुंवर्यादि ॥ वा
कुचीवीजचूर्णं तु खदिरं चामलीफलं ॥ चतुर्निष्कमितं तक्रैः पीत्वा श्वित्रं विनाशयेत् ॥ वाकुच्यादि ॥ इति कुष्ठाधिकारः ॥
अथ विसर्पः ॥ वासानिंवपटोलाभ्यां पिप्पली मदनेन वा ॥ विरेचनं त्रिफलया शस्तं नृतया सह ॥ इति विसर्पाधिकारः ॥
अथ विस्फोट ॥ अतिविषामुस्तक भार्गी विश्वौषधि पिप्पली विभीतकं ॥ चूर्णमिदं तं तु घृष्टं सोसोष्णेन वारिणापीतं ॥ अति
विषादि ॥ ॥ इति स्नायुकाधिकारः ॥ अथ मसूरि ॥ निंवपर्पटकं पाठापटोलं कटुरोहिणीं ॥ वासादुरालभाधात्रीमुशीरं वंद

न हयं ॥ एष निंबादिक रव्यातो योगः शर्करया स्थितः ॥ मसूरिं सर्वजां हन्ति ज्वरं विसर्पसंभवं ॥ उथितां प्रविशेद्यस्तु पुनस्तां वा[illegible]तो नयेत्
॥ निंबादि ॥ विलिख्याद्दादरं चूर्णपाचनार्थं गुडेन तु ॥ अनेनाशु विपच्यंते वातपित्तकफात्मिका ॥ वदर्यादि ॥ शिरीषोदुंबराश्वत्थ
वटप्लक्षत्वचं रजः ॥ उद्धूलनेन जयति मसूरी क्लेदमुल्वणां ॥ शिरीषादि ॥ पंचवल्कलचूर्णेन क्लेदिनीमवचूर्णयेत् ॥ दशांगलेप
चूर्णेन चूर्णितां शांतिमेति च ॥ इति मसूर्यधिकारः ॥ अथ कुष्ठरोगः ॥ गृहधूमयवक्षारपाठाव्योषरसांजनैः ॥ तेजोह्वात्रिफला
लोध्रश्चित्रकश्चेति चूर्णितं ॥ सक्षौद्रं धारयेद्येतद्गलरोगविनाशने ॥ कालकं नाम तच्चूर्णं दंतास्यगलरोगनुत् ॥ कालकचूर्णं ॥
त्रिफलालोहचूर्णं च माजूफलसमं समं ॥ माईं भागं च काशीसमेकं पूगीफलस्य च ॥ श्लक्ष्णाच्चूर्णीकृतं सर्वं वाससा चापि शोधितः
तच्चूर्णं दंतरोगघ्नं दंतरंजनकं परं ॥ त्रिफलादिमंजनं ॥ तेजोह्वामगधामूलं समंगा कटुकायनं ॥ पाठाज्योतिष्मतीलोध्रं कुष्ठं चेति
विचूर्णयेत् ॥ दंतानां घर्षणं कंडूरक्तस्रावरुजापहं ॥ तेजोह्वादिमंजनं ॥ जरणाद्वकपथ्याशाल्मलीकंटकान्तां प्रतिदिनमुपघृष्टं
दंतमूलेषु चूर्णं ॥ व्रणादहररारुग्स्रावि चांचल्यशोथान्नपनयति विवर्णान्दंधकारानि वा ७ ॥ जीरकादिमंजनं ॥ काशीसलोध्र
मधं सममंगापाठातिक्ताते जनी निशायुगलैः ॥ कंडूतिस्रुस्रावि चांचल्यशोथान्नपनयति विवर्णान्दंधकारानि वा ७ ॥ जीरकादिमं
जनं ॥ काशीसलोध्रमधंसमंगापाठातिक्तातेजनीनिशायुगलैः ॥ कंडूतिस्रुस्रावयुतदंतान्संघर्षयेन्न श्लक्ष्णैः ॥ पाठादि ॥ ॥ गासा

मूर्वाहरिद्राद्वयखदिरवल्कागस्तिभूनिंबनिंबेदुस्पर्शाराजवृक्षस्त्रिफलजंतुविडंगेश्चाम्रजासप्तपर्णौः॥ निक्वाथकृष्णंजनार्ढ्योमुखपिटकमयो
घर्षरोगेनेत्रिशांतिश्लेष्मास्रकपित्तजन्मामहदिवदुष्यितंजाह्नवीस्नानमात्रा॥ वासादि॥ पटोलकटुकाव्योषपाठासैन्धवभार्गिभिः॥ चूर्णो
र्मधुयुतैर्लेपःकवलोमधुतैलिकः॥ पटोलादि॥ व्योषक्षाराभयावह्निचूर्णमेतत्प्रघर्षणं॥ उपजिह्वाप्रशांत्यर्थमभिस्तैलंविपाचयेत्॥
व्योषादि॥ मरिचंटंकणंक्षारंसिंधूरंहिंगुकट्फलं॥ शृंगवेररसोकृष्णांजिह्वागामपोहति॥ मरिचादि॥ कुष्ठोषराववाशिंधुकणापा
ठाम्लवेतसः॥ सक्षौद्रभिषजाकार्यंगलशुंड्याप्रघर्षणं॥ कुष्ठादि॥ मदौकाकटुकाव्योषदार्वीत्वक्त्रिफलाघनं॥ पाठारसांजनंमू
र्वातेजाह्वतिक्तचूर्णितं॥ क्षौद्रयुक्तंविधानज्ञंगलरोगेभिषग्जितं॥ मदौकादि॥ ॥ इतिमुखरोगाधिकारः॥ अथनासारोगः॥
व्योषचित्रकतालीसतिंतिडीकाम्लवेतसः॥ सचव्याजाजितुल्यांशैरेलात्वक्पत्रपादिकं॥ व्योषादिकमिदंचूर्णंपुराणगुडमिश्रि
तं॥ पीनसश्वासकासघ्नंरुचिस्वरकरंपरं॥ व्योषादि॥ कट्फलंशृंगवेरंचपिप्पलीमरिचानिच॥ शठीपुष्करमूलंचभार्गीमधुरसा
वचा॥ अभयाकुष्ठलवणांशृंगीकर्कटकस्य च॥ एतच्चूर्णंवरंप्रोक्तंक्वाथोवामूत्रमूर्छितं॥ पीनसेस्वरभेदेचतमकेसहलीमके॥ सं
निपातेनिलकफेश्वासेकासेचशस्यते॥ कट्फलादि॥ शठीतावलकिव्योषचूर्णंसर्पिगुडाचितं॥ हरेत्घोरंप्रतिश्यायंपार्श्वहृद्व
स्तिशूलजित्॥ शठ्यादि॥ इतिनासारोगाधिकारः॥ ॥ अथनेत्ररोगः॥ पटोलवासकारिष्टगुडूचीत्रिफलाघनं॥ पंचमूलीसर

स्यांहं चंदनं विश्वभेषजं ॥ पटोलादिगणः प्रोक्तः सर्वनेत्ररुजापहं ॥ वातपित्तकफोत्थं च निहन्यात्सान्निपातिकान् ॥ कांचं कडुस्तिमिं शो
थं मिरं पटलं तथा ॥ पटोलादि ॥ वत्त्रैफलं चूर्णमपथ्यवर्त्तिं सायं समस्तानि च माक्षिकाख्यं ॥ समुच्यते नेत्रभवैर्विकारैर्मुक्तो यथा क्षी
णधनो मनुष्यः ॥ त्रिफलायोगः ॥ द्वौ भागौ तु हरीतक्याश्चत्वारश्च विभीतकान् ॥ अष्टौ चामलकानां तु सितात्वामलकैं सहः ॥ यष्टीसै
न्धवपिप्पल्यास्त्वक्क्षीरी समभागिनः ॥ भागौ द्वौ मधुसर्पिभ्यां रात्रौ खादेत्सयंत्रितः ॥ एषा चक्षुप्रदा तृष्णा विशेषेणाक्षिरोगिणां ॥ ति
मिरं पटलं पुष्पं काचं चाप्यर्ममेव च ॥ शिरोरोगेषु सर्वेषु गडूदेषु तथैव च ॥ कासे श्वासे तथोन्मादे हिक्कायां विषमज्वरे ॥ छर्दीतीसा
रशूलघ्नी दशमूलहरीतकी ॥ हरीतक्यादि ॥ इति नेत्ररोगाधिकारः ॥ अथ शिरोरोगः ॥ गोक्षुरकंटकारी चलाजायुक्तं जलैः पिबे
त् ॥ सद्यः पार्श्वशिरःशूलशांतिमाप्नोति नान्यथा ॥ गोक्षुरादि ॥ ॥ इति शिरोरोगाधिकारः ॥ अथ स्त्रीरोगः ॥ पाठाजंब्वाम्रयोर्वीजं शि
लोद्भेदं रसांजनं ॥ अंवष्टकी मोचरससमंगा पद्मकेशरं ॥ वाल्हीकातिविषामुस्तं विल्वं लोध्रं सगैरिकं ॥ कट्फलं मरिचं शुंठी मृद्वीका
रक्तचंदनं ॥ कट्वंगवत्सकानंताधातकीमधुकार्जुनं ॥ पुष्येणोद्धृत्य तुल्यानि श्लक्ष्णचूर्णानि कारयेत् ॥ तानि क्षौद्रेण संयोज्य पाययेत्तंदु
लांवुना ॥ अर्शेषु चातिसारेषु रक्तं यश्चोपवेश्यते ॥ दोषागंतुकृता ये च बालानां तांश्च नाशयेत् ॥ योनिदोषं रजोदोषं श्वेतं नीलं सपीतकं ॥
स्त्रीणां श्यावारुणां यच्च प्रसह्य विनिवर्त्तनं ॥ चूर्णं पुष्यानुगं नामहितमात्रेयपूजितं ॥ पुष्यानुगं चूर्णं ॥ ॥ माषचूर्णं च मधुकं विदारीम

धुशर्करा॥ पयसापाययेन्नारीनत्त्वपाधारणमुत्तमं॥ माषचूर्णं॥ कदलीनांफलंपक्वंविदारीचशतावरीं॥ क्षीरेणापाययेन्नारीं त्वपं धारणमुत्तमं॥ कदल्यादि॥ ॥ तालकंदंचनरुसांखर्जूरंकदलीफलं॥ पयसापाययेन्नारीनत्त्वपांधारणमुत्तमं॥ तालकंदादि ॥ तालकंदंचखर्जूरंमधुकंचविदारिकां॥ शर्करामधुसंयुक्तंमूत्रातिसारनाशनं॥ तालकंदादि॥ एलामंशुमतिंद्राक्षामञ्जीरंत्रिक्करोहिणी॥ चंदनंकुस्मलवगंसारिवालोध्रसंयुतं॥ वातासृग्दरशांत्यर्थंपिबेद्धावरांगना॥ पित्तासृग्दरशांत्यर्थंपिबेदिक्षुरसेन च॥ हंतिमकत्त्रशूलार्त्तिछर्दिसत्यामयानपि॥ एलादि॥ सूक्ष्मैलासैन्धवंलाजाकोलमज्जात्रिजीरकं॥ एलामागधिकाचैवगुडेनसहभक्षयेत्॥ निहंतिसूतिकारोगान्छर्दिश्वासंव्यपोहति॥ सूक्ष्मैलादि॥ बलाअतिबलाचैवशर्करामधुयष्टिका॥ क्षीरंमधुघृतंचैवपीतंगर्भप्रदंभवेत्॥ बलादि॥ नागकेशरपूगस्थिचूर्णंवागर्भदंपरं॥ नागकेशरादि॥ पिप्पलीशृंगवेरंचमरिचंकेशरंतथा॥ घृतेनसहपानव्यंवंध्यागर्भप्रदंपरं॥ पिप्पल्यादि॥ ऊषणांपिप्पलीमूलंदारुंचवासचित्रकं॥ रजन्यौहवुषाजाजीसक्षारंलवणत्रयं॥ चूर्णमिदंमुष्णेनापीतंसुखेनाशुविशिष्यते॥ ऊषणादि॥ मूर्वाव्योषवचाकोलजंबूत्वग्दारुसर्षपाः॥ सपाठामधुनालीढ्वास्तन्यदोषनिवर्हणं॥ ॥ मूर्वादि॥ ॥ इतिस्त्रीरोगाधिकारः॥ ॥ अथबालरोगः॥ प्रियंगुसर्जिकासिंधुमधुनालेहयेच्छिशुं॥ क्षीरामयंनिहंत्याशुविडंगेनयुतःकृमिन्॥ प्रियंग्वादि॥ ॥ लाजांजनसितावांसिमधुकैःसूक्ष्मचूर्णितैः॥ बालावदेयोमधुनालेहःसर्वरुजापहः॥ लाजादि

॥शर्कराक्षौद्रसंयुक्तान्तिक्तांलीढ्वाज्वरंजयेत्॥ तिक्तादि॥ जातीकोशलवंगैलापूतिमांनागकेशरं॥ साजाजीकारवीपथ्याघनविल्वा
ह्रणाकरणा॥ पद्मकिंजल्कालाद्यौवीजंप्राजलीश्चकलिंजनं॥ हयगंधाकृमिरिपुनालीसंवंशलोचनं॥ शृंगीपुष्करमूलंवडुग्रगंधावरां
गकं॥ एतच्चूर्णीकृतंश्लक्ष्णंक्षीरयुक्तंपिबेत्सदा॥ शिशोरतिसारश्लेष्माणंज्वरजीर्णंवमिंजयेत्॥ घोटानाममिदंचूर्णंस्तंभनंपुष्टिवर्द्ध
नं॥ घोटाचूर्णं॥ घनकृष्णारुणाशृंगीचूर्णंक्षौद्रेणयोजितं॥ शिशोर्ज्वरातिसारघ्नंकासश्वासवमिंहरेत्॥ चातुर्थकंचूर्णं॥ ॥
धातकीविल्वधान्यार्कधात्रीह्रीवेरमुस्तकं॥ मधुनालेहयेद्बालेज्वरातिसारशांतये॥ धातक्यादि॥ मधुसर्पिर्विडंगानिसरलंदेवदा
रु च॥ पटोलकुटजारिष्टसप्तपर्णयवानि च॥ ज्वरंछर्दिमतीसारंशमयत्यवलेहनात्॥ मध्वादि॥ धातक्यातिविषाशृंगीमजाह्वा
श्लक्ष्णाचूर्णितं॥ बालानांछर्द्यतीसारमधुनाघ्नंतिलेहनात्॥ धातक्यादि॥ कणाप्रियंगुकोलास्थिमधुमुस्तांजनैःकृतं॥ क्षौद्रंलीढ
कुमारायछर्दिनत्स्यातिसारजन्॥ कणादि॥ ह्रीवेरशर्कराक्षौद्रंपीतंतंदुलवारिणा॥ शिशोरक्तातिसारघ्नंतृड्छर्दिज्वरनाशनं
॥ ह्रीवेरादि॥ लाजासयष्टिमधुकंशर्कराःक्षौद्रमेव च॥ तंदुलोदकसंयुक्तंक्षिप्रंहंतिप्रवाहिकां॥ लाजादि॥ फलिन्यंजनमुस्तानां
सूक्ष्मचूर्णंसमाक्षिकं॥ तत्स्याच्छर्दिमतीसारंशिशूनामुद्धतंहरेत्॥ फलिन्यादि॥ दाडिमस्यतुवीजानिजीरकंनागकेशरं॥ चूर्णंसश
र्करंक्षौद्रलेहनत्स्मांविनाशकः॥ दाडिमादि॥ पुष्करातिविषायासकणाशृंगीरजोलिहन्॥ मुच्यतेमधुनावालःकासैःपंचभिरु

छिद्रिते ॥ पुष्करादि ॥ तालीसपिप्पलीशृंगीसूक्ष्मैलाचदुरालभा ॥ मुस्तवालकत्वग्धान्यवंशजानागकेशरं ॥ चूर्णितंमधुनालेहं श्वास
काशज्वरापहं ॥ बालतालीसादि ॥ लवंगभृंगमेलाचत्रिकटुत्रिफलातथा ॥ मुस्तंप्रियंगुजंतुघ्नंजीरकद्वयमेवच ॥ एतानिसमभा
गानि श्लक्ष्णाचूर्णानिकारयेत् ॥ सर्वचूर्णसमायोज्यासिताचंद्रसमप्रभा ॥ मधुनाप्राशयेच्चैनंबालकामयनाशनः ॥ पंचकाशान्प्र
मेहांश्चश्वासहिक्कावमिंजयेत् ॥ बालामयेषुसर्वेषुषट्कर्मनैवप्रशस्यते ॥ बाललवंगादि ॥ लवंगवज्रलाकुष्ठाफलत्रयपु
नातथा ॥ चंदनंपर्पटंमुस्तंनुगाडाक्षासजीरकं ॥ त्वचोशीरसमायुक्तंमधुनासहलेहयेत् ॥ प्रलापहिक्काश्वासंचवमं स्मोदाहंप्र
मोरुजां ॥ मूर्छाछर्दित्रिदोषंचविषमज्वरहरःशिशोः ॥ द्वितीयलवंगादि ॥ ॥ घृतेनसिद्धंविश्वैलाहिंगुभार्गीरजोलिहन् ॥
आनाहंवातिकंशूलंहन्यात्तोयेनवाशिशोः ॥ हिंग्वादि ॥ ॥ कणोषणासिताक्षौद्रसूक्ष्मैलासैन्धवैःसह ॥ मूत्रग्रहेप्रदातव्योशिशू
नांलेहमुत्तमं ॥ मूत्राघातेकणादि ॥ यदान्नदुर्वलोबालःखादन्नपिचवह्निमान् ॥ विदारिकंदगोधूमयवचूर्णघृतभृज्जितं ॥ खादये
त्तदनुक्षीरंशृतंसमधुशर्करं ॥ कार्श्येविदारिकंदादि ॥ पिप्पलीत्रिफलाचूर्णघृतक्षौद्रपरिप्लुतं ॥ बालोलेहिनयनस्पैलीढं
दशासुखावहं ॥ रोदनेपिप्पल्यादि ॥ सौवर्णंमुकुतंचूर्णंकुष्ठंमधुघृतंवचा ॥ मत्स्याक्षकंशंखपुष्पीमधुसर्पिःसकांचनं ॥ अ
र्कपुष्पीमधुघृतंचूर्णितंकनकंवचा ॥ सहेमचूर्णकैटर्यश्वेताडुर्वाघृतंमधु ॥ चत्वारोभिहिताप्राशार्द्धश्लोकसमापना ॥ कु

मारारांवपुर्मेधावलपुष्टिकरामता ॥ ॥इतिबालरोगाधिकारः॥ अथविषरोगाः॥ मूलंतंदुलवारिणापिबतियःप्रत्यंगिरासं
भवतिःपिष्टविमइयोगदिवसेतस्याहिभीतिःकृतः॥ दर्पाद्देवफणीर्द्रदादशनितंमोहान्वितंमूर्छधीस्थानेतत्रसएवयाति
नियतंवक्त्रंयमस्याचिरात्॥ तण्डुलमूलादि॥ ॥ मसूरनिंबपत्राभ्यांखादन्मेषगतेरवौ॥ अब्देमेकंनभीतिस्याविषात्तस्यनसं
शयः॥ मसूरादि॥ योवृषवर्त्तिनिमेवित्रारिशिरीषवीजमेकमश्नाति॥ सनरःखगपतिसदृशोभुजंगमैर्दृश्यतेसततं॥ शिरीषवी
जादि॥ श्लेष्मांतककर्कोटकीमातुलुंगश्वेतागिरिकर्णिकसिंहिकाच॥ सतण्डुलीयोगदएषमुख्योविशेषदर्वीकरराजिलानां
॥ श्लेष्मांतकादि॥ ॥सैन्धवमरिचंतुल्यंनिंववीजंसमीकृतं॥ मधुसर्पियुतंहंतिविषंस्थावरजंगमं॥ सैन्धवादि॥ द्राक्षासुगं
धानगरम्त्रिकाचश्वेतासुपिष्टासदृशैस्तुभागैः॥ द्वेयोविभागःसुरसाच्छदस्यकपित्थविल्वादपिदाडिमाश्च॥ तथाक्षभागोसित
सिंदुवारादंकोटमूलादपिगैरिकाच॥ एषोगदःक्षौद्रयुतोनिहंतिविशेषतोमंडलिकांविषाणि॥ ॥द्राक्षादि॥ प्रपौण्डरीकंसु
रदारुमुस्तंकालानुसारिंकटुरोहिणीच॥ स्थौणेयकंध्यानकगुग्गुलूनिपुन्नागतालीशसुवर्चलाश्च॥ कुटंनटैलासिंदुवाराछिपश्च
कुष्ठतगरंप्रियंगु॥ लोध्रांजनकांचनगैरिकंचसमागधसैन्धवचंदनंच॥ सूक्ष्माणिचूर्णानिसमानिकृत्वाशृंगेनिदध्यान्मधुसं
युतानि॥ एषोगदःतार्क्षइतिप्रदिष्टोविषंनिहन्यादपितक्षकस्य॥ पानांजनाभ्यंजननस्ययोगेप्रयुज्यमानोभिषजाजवेन॥ ॥

॥ सात्म्यद ॥ ॥७७॥

प्रपौंडरीकादि ॥ ॥ नतहिङ्गुशालेमधुकंहरिद्रेमांजिष्ठवर्गीलवणांचसर्वं ॥ कटुत्रिकंचैववविचूर्णितानिशृंगेनदध्यान्मधुसंयुता
नि ॥ एषोगदोहंत्युपयुज्यमानः पानांजनाभ्यंजननस्ययोगैः ॥ अवार्य्यवीर्योविषाणिचस्थावरजंगमानिसोपद्रवाण्यपचिरेणहंति
॥ मयूरपित्तादि ॥ ॥ पिप्पल्योध्यामकंमांसिलोध्रामलकुवर्चलं ॥ वालकंपरिपेलंचतथाकनकगैरिकं ॥ क्षौद्रयुक्तोगदोहे
षहृषीविषमपोहति ॥ दूषिविषारिनाम्नायंनचान्यत्रपिधार्यते ॥ पिप्पल्यादि ॥ चंदनंपद्मकोशीरशिरीषसिंदुवारकः ॥ क्षीर
शुक्लानंतकुष्ठंसारिवादीप्यपाटला ॥ शैलूषरसपिष्टोयंलूतानांसर्वकामिकः ॥ चंदनादि ॥ चंदनंपद्मकंकुष्ठंनलिनुशी
रपाटला ॥ निर्गुंडीसारिवाशेलुर्लूताविषहरोगदः ॥ चंदनादि ॥ फलिनीद्विनिशाक्षौद्रसर्पिर्भिः पद्मकाह्वयैः ॥ अशेषलूता
कीटानामगदः सर्वकामिकः ॥ फलिन्याद्यगदः ॥ विशालाकोलमूलेचतिलमूलेसितामधुः ॥ घृतेनाशुविषंहंतिपीतमात्रंव
दुस्तरं ॥ विशालादि ॥ विल्वकाकोलमूलंगिरिकर्णीतिलस्यच ॥ सितामधुससर्पीषिपानमारवुविषापहं ॥ विल्वादि ॥ विष
तिंदुभवंवीजंपिष्टागोजलसंयुतं ॥ लेपात्पानाच्चसप्ताहादुन्मत्तश्वाविषंहरेत् ॥ विषादि ॥ काकोडुंवरिकामूलंधत्तूरफलसंयु
तं ॥ पीतंतण्डुलतोयेनसारमेयविषापहं ॥ काकोरिकादि ॥ घृतेनसैन्धवंपीतंहंतिवृश्चिकजंविषं ॥ घृतेनरजनीपीताकार
वीरंविषंजयेत् ॥ घृतादि ॥ शिरीषकटभीपार्थशेलुक्षीरद्रुमत्वच ॥ विषंजलौकसाहंतिप्रयुक्तापानलेपयोः ॥ शिरीषादि ॥

॥ रामः ॥ ॥७७॥

॥ कटुरोहणपित्तिविषागंरह्धूमहरेणुका ॥ व्योषकुष्टहविक्षौद्रंहंति। वाजिगजेविषं ॥ कटुरोहिण्यादि ॥ एलातालीसप
त्राणित्र्यूषणाजीरकंसमं ॥ चूर्णंद्विधासितायोज्यागुडूगरहरंनयेत् ॥ एलादि ॥ पुत्रंजीवकोस्थितामत्तानिक्कनात्रंगवापयैः॥
पीत्वाचोपगरंहन्यान्नानायोगकृतंविषं ॥ पुत्रंजीवादि ॥ इतिविषाधिकारः ॥ अथरसायन ॥ यज्जराव्या धिहरंभेषजंतत्
द्रसायनं ॥ पूर्वेवयसिमध्येवाशुद्धकायःसमाचरे ॥ सिन्धूत्थशर्कराशुंठीकणामधुगुडैःक्रमात् ॥ वर्षादिष्वभयाप्राश्यारसा
यनंग्रोगघ्णा ॥ अभयायोगः ॥ मंडूकपर्णीस्वरसःप्रयोज्यःक्षीरेणयष्टीमधुकस्यचूर्णं ॥ रसोगुडूच्यास्तुसमूलपुष्पाःक
ल्कप्रयोज्यःखलुशंखपुष्पाः ॥ आयुःप्रदान्यामयनाशनानिबलाग्निवर्णस्वरवर्द्धनानि ॥ मेध्यानिचैतानिरसायनानिमेध्या
विशेषेणतुशंखपुष्पी ॥ मंडूकपर्ण्यादि ॥ येमाससेकंस्वरसंपिबंतिदिनेदिनेभृंगरजसमुत्थं ॥ क्षीराशिनस्तेबलवीर्ययुक्ता
समाशतंजीवितमाप्नुयाच्च ॥ भृंगराजयोगः ॥ असिततिलविमिश्रान्यहृवान्भक्षयेद्यःसततमपयसासीन्भृंगराजस्य
मासे ॥ सभवतिचिरजीवीव्याधिभिर्विप्रयुक्तोभ्रमरसदृशकेशःकामचारीमनुष्यः ॥ तिलयोगः ॥ शतावरीकुंडलिकागुडू
चीसहस्तिकर्णीसहतालमूली ॥ एतानिकृत्वासमभागयुक्तान्याज्येनकिंवामधुनाविलिह्यम् ॥ जरामयामृत्युविमुक्तदेहोभ
वन्नरोवीर्यबलादियुक्तो ॥ विभातिदेवप्रतिमःसनित्यप्रभामयोभूरिविवृद्धबुद्धिः ॥ शतावर्यादि ॥ पीताश्वगंधापयसार्द्ध

भासं घृतेनतैलेनसुखांवुनावावीर्यस्यपुष्टिंवपुषोविधत्तेवालस्यशस्यस्ययथांवुवृष्टिः ॥ अश्वगंधादि ॥ धात्रीतिलान्भृंगरजो-
विमिश्रान्यो भक्षयेन्नित्यजनाक्रमेण ॥ तेकृष्णकेशाविमलेन्द्रियाश्चनिर्व्याधयोश्चाप्यजराभवेयुः ॥ धात्र्यादि ॥ त्रिकटुवि-
दारीनिस्तुषतिलवह्निपुत्रीजरजश्चतुःप्रस्थं ॥ भल्लातकप्रस्थंपुनंनसमानेगुडूच्याश्च ॥ पंचत्रिंशन्मधुनोव्योषस्याष्टौप-
लानिदशवह्नेः ॥ वह्नेर्द्विगुणावाराहीसप्तदशगुणाशर्करादद्यात् ॥ अशायथाहंतिरोगानिकंक्षयंकाशंअश्मर्युदरभगं-
दरकुष्ठवलीपलितपीनसंसाध्यं ॥ नरसिंहदशविक्रमसमपत्यभिवांछितंलभते ॥ वलवर्णस्वरकांतिप्रभुत्साहसत्व-
संयुक्तं ॥ उपयुज्यचूर्णमद्धभर्तृनारसिंहाख्यं ॥ नारसिंहचूर्णं ॥ गुडूच्यपामार्गविडंगशंखिनीवचाभयाकुष्ठशताव-
रीसमा ॥ घृतेनलीढाप्रकरोतिमानवंत्रिभिर्दिनैःश्लोकसहस्रधारणं ॥ गुडूच्यादि ॥ ब्राह्मीवचंमयोवासपिप्पलीमधुसैन्ध-
वं ॥ अस्यप्रयोगात्सप्ताहात्किन्नरैःसहगीयते ॥ ब्राह्म्यादि ॥ नीत्रेणाकुष्टेनपरीतमूर्त्तिर्यःसोमराजीनियमेनखादेत् ॥ संव-
त्सरंकृष्णतिलद्वितीयःससोमराजीवपुषातिशेते ॥ श्यामकाशातिसारज्वरजठररुजाकोष्ठमेदोविकारामूत्राघातास्त्वपि-
त्तेश्रवणगलशिरःश्रोणिशूलाक्षिरोगान्येवान्येवातपित्तक्षतजकफकृताव्याधयःसंजितंतोहत्वास्तालभ्यासयोगाद-
पहरतिपयःपीतमंतेनिशायां ॥ विगतघननिशीथेप्रातरुत्थायनित्यंपिवतिखलुनरोयोघ्राणरंध्रेणवारि ॥ सभवतिमति

चूर्णश्लक्ष्णमासमश्नन्नरोवलिपलितविहीनसर्वरोगैर्विमुक्तः पातव्यंनाशयानीरंप्रसृतित्रयमात्रया॥ व्यंगंवलिपलीतघ्नंपीनसवैश्व
श्वर्यकाशशोथहरं॥ रजनीक्षयंतुनस्यंरसायनंदृष्टिमंजनं॥ अंभसःप्रसृतिरष्टौरवावनुदितेपिबेत्॥ नवनागंवलंप्राप्यजीवे
द्वर्षशतंनरः॥ स्नेहेपीतेक्षणेशुद्धेवाध्मानेस्तिमितोदरे॥ हिक्कायांस्नेहपानेवत्वाधौतदारिवारयेत्॥ नवनीताद्यापेये॥ नके
वलंदीर्घमथायुरश्नुतेरसायनंयोविधिवन्निषेवते॥ गतिंसदेवर्षिगणोनसेवितांप्रपद्यतेब्रह्मतथैवचाक्षयं॥ इतिरसायनाधि
कारः॥ अथवाजीकरणं॥ यद्द्रव्यंपुरुषंकुर्याद्वाजीवत्सुरतक्षमं॥ तद्वाजीकरमाख्यातंमुनिभिःभिषजांवरैः॥ चूर्णंविदार्या
स्तुकृतंस्वरसेनैवभावितम्॥ सर्पिक्षौद्रयुतंलीढ्वादशगच्छेत्वराणिता॥ विदार्यादि॥ एवमामलकंचूर्णंस्वरसेनैवभावितं॥ शर्क
रामधुसर्पिर्भिर्युक्तंलीढ्वापयःपिवेत्॥ एतेनाशीतिवर्षोपियुवेवरमतेसदा॥ आमलकादि॥ ॥ गोक्षुरकक्षुरकःशतमूलीवान
रीनागवलातिवलानां॥ चूर्णमिदंपयसानिशिपेयंतस्यगृहेप्रमदाशतमस्ति॥ गोक्षुरकादि॥ ॥ अश्वगंधादशपलास्तन्मा
त्रोवृद्धदारकः॥ कर्षैकंपयसापीत्वानारीभिर्नैवतृप्यति॥ अश्वगंधादि॥ गोक्षुरक्षुरकाभीरुवानरीतिवलावला॥ शर्करामधु
संयुक्तंपयसापुष्टिकारकं॥ गोक्षुरादिपलंगोक्षुरवीजस्यद्विपलंकपिकच्छुरा॥ पलंनागवलावीजंपलमेकंशतावरी॥ विदारी
कंदचूर्णस्यपलंद्वयमथापरं॥ द्विपलंत्रापुसंवीरंवाजिगंधापलत्रयं॥ वासाचतालमूलीवज्रद्रुवीरक्तचंदनं॥ त्रिसुगंधिकरा

धात्रीलवंगंनागकेशरं॥एतानिकर्षमात्राणिसूक्ष्मचूर्णानिकारयेत्॥वालशाल्मलिमूलंचभवेत्कर्षैकविंशतिः॥कुशकाशशिफा
सप्तशर्करासमयोजिता॥दुष्टशुक्रंबीजहानिमूत्रकृच्छ्राणियानिच॥मूत्राघातंमूत्रदोषंकुर्यात्कृच्छ्रविवर्द्धनं॥शतंगच्छसिचस्त्री
णांश्चहतुल्यपाक्रमः॥कामदेवाभिधंचूर्णंधन्वंतरिनिरूपितः॥कामदेवचूर्णं॥त्वक्पिप्पलीलवंगैलाश्चंदनंचसितापलं॥सा
रसार्द्धपलोनशृंगासार्द्धद्विपलसंमितं॥कर्पूरोमृगनाभिश्चदशमाषमितःपृथक्॥सर्वतुल्यासितायोज्यापानसोह्लाससंज्ञकं॥
वृष्यंवह्निप्रदंचेतद्राज्यरामप्रकाशितं॥स्वचादि॥आकारकरभंशुंठीलवंगंकुंकुमंकणा॥जातीफलंजातिपुष्पंचंदनंकार्षिकंपृ
थक्॥चूर्णयेदहिफेनंचतत्रदशात्पलोन्मितं॥सर्वमेकीकृतंमाषमात्रंक्षौद्रेणभक्षयेत्॥शुक्रस्तंभकरंपुंसामिदमानंदकारकं
॥नारीणांप्रीतिजननंसेवेतनिशिकामुकः॥आकारभादि॥शतावरीचूर्णप्रस्थंप्रस्थंगोक्षुरकस्यच॥वाराह्यांविंशतिपलंगु
डूच्याःपंचविंशतिः॥भल्लातकानांद्वात्रिंशच्चित्रकस्यसदेवहि॥तिलानांलुंचितानांचप्रस्थंदद्यात्सुचूर्णितं॥त्र्यूषणस्यपलान्य
ष्टौशर्करायाश्चसप्तति॥माक्षिकंशर्करार्द्धेनमधुनोर्द्धेनवैघृतं॥शतावरीसमंदेयंविदारीकंदचूर्णकं॥एतानिसूक्ष्मचूर्णा
निस्निग्धेभांडेनिधापयेत्॥पलार्द्धमुपभुंजीतयथेष्टंचान्नभोजनं॥एषमासोपयोगेनरुजांहंतिजरामपि॥वलीपलितखालित्यंवृ
हवंठत्वषीनसात्॥भगंदरंमूत्रकृच्छ्रानगृध्रसीवहलीमकं॥क्षयंचैवमहाव्याधिपेवकाशंसुदारुणं॥गुल्मानिपंचविद्रधीनश्म

रींचमिनत्रिव ॥ अष्टादशानि कुष्टानि तथाष्टावुदराणि च ॥ प्रमेहाश्च महाव्याधिं पंचकाशान्सुदुस्तरान् ॥ अशीतिवातजान् रोगं
श्चत्वारिंशच्च पैत्तिकान् ॥ विंशतिश्लैष्मिकांश्चैव संसृष्टान्सान्निपातिकान् ॥ एतांसर्वान्रुजोहंति वृक्षामिन्द्राशनिर्यथा ॥ सुकांचना
भोमगराजविक्रमस्तुरंगमादर्प्यति जातिवेगतः ॥ स्त्रीणांशतंगच्छति सातिरेकः सुहृष्टपुष्टश्चटकोयथातथा ॥ पुत्रान्जनयते वी
रान्नरसिंहपराक्रमान् ॥ नारसिंहइतिख्यातं चूर्णं रोगगणापहं ॥ नारसिंहचूर्णं ॥ ॥ इतिवाजीकरणाधिकारः ॥ ॥
इतिवैद्यविश्वनाथकृतौसात्म्यदर्पणेचूर्णाधिकारकथनंनामतृतीयोध्यायः ॥ ३ ॥ अथवटकविधि ॥ वटकाअथक
थ्यंते तन्नामगुटिकावटी ॥ मोदकोगुटिकापिण्डीगुडोवटिस्तथोच्यते ॥ लेहवत्साध्यतेवह्नौगुडोवाशर्कराथवा ॥ गुग्गुलुर्वाक्षिपे
त्तत्रचूर्णंतन्निर्मितावटी ॥ तत्रवह्निसिद्धगुडदो ॥ कुर्यादवह्निसिद्धेनक्वचिद्गुग्गुलुनावटी ॥ द्रवेणमधुनावापिगुटिकांकारये
द्भिषक् ॥ सिताचतुर्गुणादेयावटीषुद्विगुणोगुडः ॥ चूर्णेचूर्णसमःकार्योगुग्गुलुर्मधुतत्समं ॥ द्रवंचद्विगुणंदेयंमोदकेषुभिष
ग्वरैः ॥ कर्षप्रमाणातन्मात्राबलंदृष्ट्वाप्रयुज्यते ॥ तत्रविधिः ॥ लेहविधिनासाधिता ॥ तद्यथा ॥ द्रवचतुर्गुणांदत्वागुडादिकं
कृत्वातत्तुल्येयावद्घनवतिअप्सुमज्जतिस्थिरत्वंभवति ॥ गुडितेवभवतितदाचूर्णंक्षिप्त्वावटिर्भवति ॥ अनग्निसिद्धस्यद्रवंद
त्वावटिंकुर्यात् ॥ मोदकेतु ॥ आदौघृतेनवाधयित्वापुनगोधूमादिभर्जयित्वासितांदत्वामोदकादिकुर्वंति ॥ गुग्गुलुपक्षेतु·गुग्गुलुंशो

धयित्वा घृतेन भर्जयित्वा गुटिकां कुर्वन्ति ॥ केचिन्मधुना अपि कुर्वन्ति ॥ स यथा ॥ उषरां भागमेकं च यवक्षार द्विभागकं ॥ जीमूतकस्य भागां
व गुटिकां कारयेद्भिषक् ॥ केचित्तु ऊषणामूषकं चापि जीमूतकमवर्द्धितं ॥ त्रिगुंजावटिकां कृत्वा सर्वज्वरविनाशनः ॥ मधुना लेहयेच्चापि ततः
शीतोदकं पिबेत् ॥ ज्वरांकुशः ॥ लवंगमुत्पलं धान्यमजाजी मुस्तनागरं ॥ पिप्पली कटुकं पाठा पटोलं समचूर्णयेत् ॥ गुडेन मोदकं कृत्वा वातज्व
रविनाशनं ॥ लवंगादि ॥ बृहती मरिचं किराततिक्तं कटुकीनां च सवाजिदं तेगुडूच्चं सत्रायंती शीतवारिप्रघृष्टं मज्जाकारं पित्तदोषेण भूतं ॥ ॥
बृहत्यादि ॥ एलात्वक्पत्रकोशीरवासा कृष्णा च उत्पलं ॥ नागकेशरसूक्ष्मेला पलार्द्धं च प्रयोजयेत् ॥ सितासमधूक खर्जूरमृद्विका च पलो
न्मिता ॥ शर्करा मधुना युक्तं गुटिकां संप्रकल्पयेत् ॥ रक्तपित्ते ज्वरे दाहे सन्निपाते सूपद्रवे ॥ बृहदेलादि ॥ पिप्पली नागरं मुस्तं साजाजी पुष्कराह्व
यं ॥ गुडेन मोदकं बद्धा वातज्वरहरं परं ॥ कलिंगामलकी व्योषं पथ्या त्वग्दार्वि पिप्पली ॥ त्रिवृता षड्गुणा देयाः शर्करा षड्गुणा मता ॥ भक्षयेदक्ष
मात्रं तु मोदकं तूदकान्वितं ॥ रेचनं सर्वरोगेषु श्रेष्ठं मंगलकारिणं ॥ ब्राह्मी वासक त्रायमाणा त्रिफला तालीसकं पित्तकं कैरातं सपटोल निंब कटुकं
चैन्द्रीयवा पर्पटं ॥ चव्यसातिविषासग्रंथिघनं छिन्नोद्भवा कारवी साजाजी रविडंग दार्वि नतवृतं यष्टीमधु दीपनं ॥ सोदिच्यमजमोद पंचलवणं दक्षा
रहिंगुसमं पाठैला सलवंग दंतिनितुलं वर्षाभू व्योषाग्निकं ॥ निरूहं चैतत्सं ॥ कृत्वैतत् बदरीप्रमाण गुटिका पूर्वाह्ने के भक्षितं कालाकालविदेशजंतु
गमनं दोषत्रयं कोपजित् ॥ गुल्मशूलज्वराष्टधाभ्रमश्रमकाकृशमयानां पहं मानाहोदरपांडुमेहमरुविमाध्माक्रिमीन्नाशनं ॥ ब्रह्मादि ॥ ब्राह्मीतिक्त

पटोलनिम्बकटुकंव्योषान्तथाकारवीवासापिप्पलिमूलचव्यमभयासौवर्चलातिविषंसाजाजीचयवानीचव्यकपुत्तंहिंगुन्तथासैन्धवक्षारंवि
त्रकसाजमोदसहितंत्रायन्तिकाचूर्णयेत्॥ कृत्वैतद्गुटिकाप्रमाणावदरीनानाहजौनाशयेत्कालाकालविदेशजंतुगमनंपित्तातिविषज्व
रं॥ गुल्मंशूलमरोचकंश्रममदःकायाग्निसंदीपनंभक्षेत्तागुटिकाविबंधहरणीनाम्नामहांतिर्कं॥ ~~द्वितीयव्योषाद्यादि~~ ॥ जातीफलाजा
जीलवंगमेलाभागैकतुल्यंमरिचंचतुष्कं॥ षड्भागकृष्णापितुंवासकानांजलेनपिष्ट्वागुटिकाविधेया॥तत्रैनतोयेमधुनाप्रयुक्तेनांभक्षयेद्वावि
षमज्वरार्त्तः॥ ~~लवंगजातीफलादि~~॥ ॥लवंगपिप्पलीचैवकंकोलंमरिचंतथा॥ त्वगेलापत्रकंशुंठीसैन्धवंमालतीफलं॥मदनीकृष्णज
टान्चैवकुष्ठंचहिमवालुकं॥ एतानिसमभागानिसूक्ष्मचूर्णानिकारयेत्॥दत्वासितासमंचूर्णंमोदकंपरिकल्पयेत्॥अग्निसंदीपनंचैवज्व
रघ्नपुष्टिकारकं॥जलदुष्टभवंदोषंतत्क्षणादेवनश्यति॥लवंगाद्यमिदंनाम्नावृद्धवैद्यप्रकाशितं॥अतःकमपिदेयंस्याद्व्यूषकचूर्णात्तदर्द्धकं॥चू
सीचूर्णसमंदेयंमोदकेद्विगुणासिता॥ मदनी·मल्लिकापथ्यंलवंगजातीसूक्ष्मैलाएकैकंभागपिप्पलीमरिचंतुचतुर्थंभागोष्टगुणावास
कः॥पिष्ट्वाचवटिकांकृत्वामधुनासहभक्षयेत्॥विषमज्वरेषुसर्वेषुनाशनेष्टज्वरांतकः॥~~ज्वरांतकादि~~॥वासावत्तुःपलाचापिगुडंदद्यात्
पलाष्टकं॥जातीफलंद्विजीरशिवव्योषपलंभवेत्॥कोलप्रमाणागुटिकासर्वज्वरविनाशिनी॥प्रातःकालेसदाभक्ष्यमधुनासहमि
श्रितं॥विषमज्वराश्चसर्वाश्चहन्याद्वृक्षमिवाशनिः॥~~वासादि~~॥वासाशुंठीपलैकैकचकृष्णामरिचतत्समं॥ग्रंथिकंचविकावह्निगजकृष्णाप

लाइर्कं ॥ तालीसपत्रकोशीरलवंगत्रुटिचंदनं ॥ केशरं कारवी धान्यमजाजी कर्षमेव च ॥ एतच्चूर्णीकृतं चैव सर्कराद्विगुणां पचेत् ॥ धात्रीप्रमा
णगुटिकाभक्षयेच्च यथावलं ॥ वातिकांपैत्तिकांचैव श्लेष्मिकान्सान्निपातिकान् ॥ विषमज्वरेषु सर्वेषु प्लीहशोथगदामयं ॥ काशश्वासारुचि:
पांडुत्वमकार्श्यक्षयापहं ॥ अग्निंच कुरुते दीप्तिं वलवर्णकराणि च ॥ वासादि ॥ शुद्धजेपालटंकंतु कद्धीतंकद्वयोन्मितं ॥ गैरिकं टंकमेकं
तु कन्यानीरेण मर्दयेत् ॥ कलायसदृशी कार्या वटिकानांच भक्षयेत् ॥ शीतलेन जलेनैषा जीर्णज्वरहरा परा ॥ जीर्णज्वरघ्नी ॥ क्षौद्राद्विद्वि
गुणितं सर्पिघता द्विगुणा पिप्पली ॥ सिता चद्विगुणा तस्याः क्षीरं देयं चतुर्गुणं ॥ चातुर्जातं क्षौद्रतुल्यं पक्त्वा कुर्याच्च मोदकान् ॥ धातुस्था
श्च ज्वरान्सर्वान्श्वासकाशं च पांडुतान् ॥ धातुक्षयं वह्निमांद्यं पिप्पलीमोदको जयेत् ॥ पिप्पलीमोदक ॥ ॥ ज्वरातिसार: ॥ समंगा धातकी
लोध्रं तथा जंबुशलादु च ॥ शाल्मलीविष्टकं चैव वृक्षदाडिमयोस्त्वच ॥ आम्रास्थिविल्वमध्यं च मधुकं सप्रियंगु च ॥ मुस्तकं शृंगवेरं च दी
र्घवृत्तत्वगेव च ॥ नवपर्णानि चूर्णस्य कपित्थफलमेव च ॥ पिष्ट्वा तंदुलतोयेन गुटिकां कारयेन्नर: ॥ पिवेत्तेनैव तोयेन पक्वातीसारशां
तये ॥ जंबुशलातु ॥ अपक्वजंबुफलं ॥ समंगादि ॥ अभयानागरं मुस्तं गुडेन सह योजितं ॥ वटुसमेयं गुटिका त्रिदोषघ्नी प्रकीर्तिता ॥ आ
मातिसारमानाहसविष्टंभं विसूचिका ॥ कृमिनरोचकं हन्याद्दीपयत्याशु चानलं ॥ अभयादि ॥ नागरातिविषाकुष्ठं यवानी चित्रकं व
चा ॥ शठीपुष्करमूलं च पाठाकटुकरोहिणी ॥ भल्लातकास्थि त्वभया धातकीकुटजाफलं ॥ हिंगुसौवर्चलं क्षारं विडंगं विडसैन्धवं ॥ मूत्र

पिष्ट्वासमान्येतान्वटकानक्षसंमितान्॥छायाशुष्कांस्ततोज्ञात्वादद्याश्लेष्मातिसारिणे॥कृमिश्वयथुपांड्वर्तिप्लीहगुल्मोदरापहान्॥ग्र
हण्यर्शोविकारघ्नानग्निसंजननंपरं॥नागरादि॥बिल्वाब्दविल्वयवगोक्षरकोरुबुके।॥छिन्नोद्भवांबुषजलैर्मधुनावलीरु॥वहल्प
विट्कमतिशूलमसृग्विमिश्रमामातिसारमपहंतिहरीतकीयं॥लघुमधुपकाभया॥गोरिमरीचाहिक्षीरंपिष्ट्वाचवटीकाकृता॥
रवादेत्सामातिसारेचविशेषाद्रक्तशांतये॥गोरीवटि॥अहिक्षीरमतिफलंपुन्नागंधातकीगोरी॥यथोत्तरंभागवृद्धंपिष्ट्वाचनकमिता
वकुर्यात्॥गोरीवटि॥ ॥वसुवेदाग्निपक्षेषुगोरीमोचरसस्तथा॥पुन्नागंकुसुमंजातीफलाहीक्षीरसंयुते॥पिष्ट्वाचवटकान्कृ
त्वाहरिमंथप्रमाणतः॥सर्वातिसारशमनीविषादामरक्तजित्॥गोरीवटि॥दातव्यंकोटपाठानांमूलंत्वक्कुटजस्यच॥शाल्मलीर
सनिर्यासंधातकीलोध्रदाडिमं॥पिष्ट्वासंमिलितान्कृत्वावटकांस्तंडुलांभसा॥तेनैवमधुसंयुक्तामेकैकांप्रातिरुत्थितः॥पिवेदज्ञ
यमापन्नोविड्विसर्गेणमानवः॥अंकोटवटकानामसर्वातीसारनाशनं॥अंकोटादि॥वत्सकस्यामृतायाश्चद्वेपलेप्रस्थमोदकं
॥श्वपयित्वारसेतस्मिंपादशेषेवतारिते॥अष्टौपलानिशक्रस्ययवचूर्णीकृतानितु॥मृदापाकंविदित्वातुयथावच्चावतारिते
सद्यसर्वातिसारांश्चसर्वांश्चग्रहणीगदान्॥नाशयेद्दीपयेच्चाग्निंकृष्णात्रेयस्यशासनात्॥वत्सकादि॥पलमंकोटमूलस्यपा
ठादार्वीचतत्समं॥पिष्ट्वातंडुलतोयेनवटकानक्षसंमितान्॥छायाशुष्कान्पिवेत्क्षिप्रंपिष्ट्वातंडुलवारिणा॥वातपित्तकफप्रा

याः कृच्छ्रांसन्निपातिकान् ॥ हन्यात्सर्वातिसारांश्च गुटिकेयंप्रयोजिता ॥ अंकोलादि ॥ कटङ्गविल्वजम्ब्वास्थिकपित्थसरसाजनं ॥ ला
क्षाहरिद्रेद्वीवीरं कट्फलं शुकनाशिकां ॥ लोध्रं मोचरसः शंखं धातकीवटशुंगकं ॥ पिष्ट्वा तंडुलतोयेन वटकानक्षसंमितान् ॥ छाया
शुष्कां पिबेत्क्षिप्रं ज्वरातिसारनाशनं ॥ रक्तपित्तज्वरहरः शूलातिसारनाशनं ॥ कर्द्दमवटक: ॥ जातीफलं छिद्रं कृत्वा चाहिफेनेनपूर
येत् ॥ स्वेदयेद्वटिकाग्नौ तत्तो समरसीभवेत् ॥ संचूर्ण्य दीप्यकं शुंठीनिर्यासो दाडिमत्वच ॥ गुडेनालोड्य वटिकां कृत्वा कोलास्थिमानकं ॥
आमातिसारं शोकोत्थं मासरक्तातिसारनुत् ॥ जातीफलादि ॥ ॥जातीफलं गोक्षुरकं कुंकुमं भंगमेव च ॥ वीजया अहिफेनं च समभा
गं च कारयेत् ॥ खदिरं पंचकर्षं च मर्दयित्वा वटीकृतं ॥ । हरिमंथप्रमाणां च भक्षयेत्तंदुलांबुना ॥ अजीर्णमामसरक्तं च पिपासादाहनाशनं
॥ वटिका रक्तनामाख्या ज्वरातिसारनाशनम् ॥ रक्तवटि ॥ इत्यतीसाराधिकारः ॥ अथग्रहणी ॥ कृष्णागुडविजयानां गुटिकासर्पि
षाहितापाने ॥ ग्रहणीदोषसंयुक्तो मंदाग्नेश्च कृच्छ्रविबंधे च ॥ कृष्णादि ॥ चित्रकं पिप्पलीमूलं द्वौ क्षारौ लवणानि च ॥ व्योषहिंग्वजमोदा
चव्यं चैकतश्चूर्णयेत् ॥ गुटिकामातुलुंगस्य दाडिमस्य रसेन वा ॥ कृत्वा विपाचयेत्सा मंदीपयत्याशु चानलं ॥ चित्रकादि ॥ तालीसपत्रच
विकामरिचानां पले पलं ॥ कृष्णा तन्मूलयोर्द्वे द्वे पले शुंठिपलत्रयं ॥ चातुर्जातं सूक्ष्मशीरं च कर्षांशं श्लक्ष्णचूर्णयेत् ॥ पक्त्वेन्तु वटकाकार्यागुडेनाक्षि
नयाथवा ॥ सेवेत सर्वदा छर्दिग्रहणीपार्श्वहृद्रुजां ॥ ज्वरःश्वयथुपांडुत्वगुल्मयानात्ययार्शसि ॥ प्रसेकपीनसश्वासकाशादिनिनिवर्त्तते ॥ अ

भयानागरस्थानेदद्यादत्रैवविड्हे ॥ छर्द्यादिषुचपित्तेषुशर्करात्रचतुर्गुणा ॥ अम्लपित्ताग्निमांद्यादौप्रयोज्यगुदजांकुरे ॥ मात्रीसादि ॥
चतुःपलंसुधाकांडंत्रिपलंलवणात्रयं ॥ वार्ताककुडवश्चार्कादष्टौद्वेचित्रकात्पले ॥ दग्धानिवार्ताकरसेगुटिकाभोजनोत्तरा ॥ भुक्तंभु
क्तंपचत्याशुकासश्वासार्शसांहितं ॥ विसूचिकाप्रतिश्यायहृद्रोगघ्नाश्चनामता ॥ कार्याएतानिशेषेणहृज्जीर्णेग्रहणीगदे ॥ सुधाकांगु
टि ॥ प्रस्थत्रयेणामलकीरसस्यशुद्धस्यदत्वार्द्धतुलांगुडस्य चूर्णीकृतैर्ग्रंथीकजीरव्ययोषेभ्यकृष्णाहवुषाजमोदैः ॥ विडंगसिंधुत्रि
फलायवानीपाठाग्निधान्यैश्चपलप्रमाणैः ॥ दत्वात्रचूर्णपलानिचाष्टौवष्टौचतैलस्यपचेद्यथावत् ॥ तंभक्षयेदक्षफलप्रमाणंयेष्टचे
ष्टत्रिसुगंधियुक्तं ॥ अनेनसर्वेग्रहणीविकाराः सश्वासकासास्वरभेदशोषाः ॥ शाम्यंत्यवश्यंचिरमांद्यमग्नेर्हतस्यपुंस्त्वस्यचवृद्धि
मेति ॥ स्त्रीणांचवंध्यामयनाशनः स्यात्कल्याणकोनामगुडः प्रदिष्टः ॥ तैलेमनाक्विवृद्धेष्टात्रिसुगंधिपलंपलं ॥ सिद्धेनिक्षिप्यमात्रेवगु
डेकल्याणपूर्वे ॥ कल्याणगुडः ॥ विडंगपिप्पलीमूलंत्रिफलाधान्यचित्रकं ॥ मरिचेंद्रयवाजाजीपिप्पलिहस्तिपिप्पली ॥ लवंगात्यज
मोदाचचूर्णितंकार्षिकंपृथक् ॥ तिलतैलत्रिवृच्चूर्णभागावष्टपलोन्मितौ ॥ धात्रीफलरसप्रस्थास्त्रीन्गुडार्द्धतुलांतथा ॥ पक्त्वामृदग्नि
नाखादेद्गुडानौदुंवरोपमान् ॥ नकापिकथितावृद्धैःविहाराहारयंत्रणा ॥ मंदाग्नित्वंज्वरंमूर्छांमूत्रकृछ्रमरोचकं ॥ अंश्वर्यंचांगशूलंच
कासंशोषंभ्रमंक्षयं ॥ कुष्ठार्शकामलामेहगुल्मोदरभगंदरान् ॥ ग्रहणीपांडुरोगांश्चहन्युपुंस्त्वकराइमे ॥ सर्वर्तुषुहितश्चायंवृहत्कल्याण

केगुडः ॥ हृहत्कल्याणगुडः ॥ ॥ पिप्पलीपिप्पलीमूलंचित्रकोहस्तिपिप्पली ॥ धान्यकंवविडंगानियवानीमरिचानिच ॥ त्रिफलाचाज
मोदाचनीलिनीजीरकंतथा ॥ सौवर्च्चलंसैन्धवंचसामुद्रंरुचकंविडं ॥ आरग्वधंत्वचपत्रंसूक्ष्मैलाचोपकुंचिका ॥ नागरंच्चयवाश्चैव
षट्त्रिंशत्येककार्षिका ॥ महीकायाप्रधानायाद्याम्पलचतुष्टयं ॥ तृवृतायापलान्यष्टौगुडस्याद्वितुलांतथा ॥ तिलतैलपलान्यष्टौरस
मामलकंतथा ॥ प्रस्थैकंत्रिगुणंकृत्वाशनैर्मृद्वग्निनापचेत् ॥ उदुंवरंवामलकंवदरंवाप्रकल्पयेत् ॥ यथावलंप्रयुंजीतसमीक्ष्यमतिमा
न्भिषक् ॥ सर्वाश्चग्रहणीरोगांप्रमेहांश्चाविविंशति ॥ उरोघातेप्रतिश्यायंदौर्वल्यंवन्हिसंक्षये ॥ धातुक्षीणोवयःक्षीणस्त्रीभिःक्षीरा
भयीतथा ॥ ज्वराणांचैवसर्वेषांवंध्यानांवापिपुत्रदः ॥ रूपौदार्यस्वरौदार्यमेधामावहतीस्थिरां ॥ महाकल्याणकोह्येषरसायनमनु
त्तमः ॥ कल्याणकगुडंचेमंपिवन्मात्रंसमाचरेत् ॥ वृवंतेभिषजायोज्यंरक्तपित्तेथविद्रुहे ॥ महाकल्याणगुडः ॥ चित्रकामृतवांगेरी
वव्यग्रंथिकनागरैः ॥ विल्वंचधातकीपाठाह्रीवेरंसपुनर्नवं ॥ कुटजत्वक्फलंलोध्रंपथ्यकंचपलाशकः ॥ जलेचतुर्गुणेसिद्धंयावत्
पादावशेषितं ॥ आर्द्रकस्वरसंप्रस्थंत्रिप्रस्थंवाम्लकांजिकं ॥ तुलार्द्धंचपथ्यकद्याद्गुडस्यार्द्धशतंपचेत् ॥ तंतुमत्सदंशीतोयंप्रक्षिप्तो
नविसर्पति ॥ त्र्यूषणंत्रिफलामूलंयवानीजीरकद्वयं ॥ चूर्णमष्टपलेशीतेःसिद्धेशीतेःप्रदापयेत् ॥ मात्रामग्निवलंज्ञात्वाउपयुंजीतवु
द्धिमान् ॥ मंदाग्न्युपहताःकेचित्येचवातकफामयेः ॥ ग्रहणीदोषशूलघ्नेशोथपांड्वामयापहः ॥ श्वासकाशज्वरार्शोघ्नप्लीहगुल्मोदराप

हं॥दीर्घकालोथितंचैवकिंपुनश्चाचिरोत्थितं॥गुडंकल्याणकंनामवृष्यंपुष्टिवलप्रदं॥मिलितानांहिचूर्णानांपलमष्टकमुच्यते॥ ॥
महाकल्याणकंद्वितीयं॥मस्त्वारनालेवांगेरिश्रृंगवेरीरसेनथा॥तुलार्द्धंतुपथक्दद्यादामलक्याशतार्द्धकं॥तिलतैलंपलान्यष्टौगुडस्या
र्द्धतुलांपचेत्॥वत्सकानिविषाकुष्ठंधात्नकीसरसांजनं॥सव्योषंपिप्पलीपलंदारुचव्यंसचित्रकं॥सक्षारलवणंचूर्णंदद्याद्द्विपलांशिकं
॥मात्रामग्निवलापेक्षीवोपयुंजीतबुद्धिमान्॥दुर्नामश्वासकाशघ्नोग्रहमेहदोषनुत्॥गुल्मोदावर्त्तहृद्रोगशोथपांड्वामयापह॥क
फवातामदोषघ्नःपाचनोवह्निदीपनः॥गुडकल्याणकोनामवृष्यःपुष्टिवलप्रदः॥कल्याणकगुडः॥कुष्मांडकाणांरूढानांस्वि
न्नानांतिष्कलत्वचां॥सर्पिःप्रस्थेपलशतंताम्रपात्रेशनैःपचेत्॥पिप्पलीपिप्पलीमूलंचित्रकोहस्तिपिप्पली॥धान्यकानिविडंगानिना
गरंमरिचानिच॥त्रिफलाचाजमोदाचकलिंगाजाजिसैन्धवं॥एकैकस्यपलंचैकंतृवृदष्टपलंभवेत्॥तैलस्यचपलान्यष्टौगुडंपंचाशदे
वतु॥प्रस्थैस्त्रिभिःसमेतंतुरसेनामलकस्यच॥यदादर्विपलेपस्तदैवमवतारयेत्॥उडुंवरंवामलकंवादरंवाप्रमाणतः॥यथावलं
तुकायस्यभक्षयेत्तुगुडंनरः॥अनेनैवविधानेनप्रयुक्तश्चदिनेदिने॥प्रसह्यग्रहणीरोगान्कुष्ठान्यर्शोभगंदरान्॥ज्वरमानाहहृद्रोग
गुल्मोदरविश्वचिकां॥कामलापांडुरोगांश्चप्रमेहांश्चापिविंशतिं॥वातशोणितवीशर्पदद्रुयक्ष्महलीमकान्॥कफपित्तानिलान्सर्वा
न्प्रसक्तांश्चापिनाशयेत्॥व्याधिक्षीणावयःक्षीणास्त्रीषुक्षीणाश्चयेनराः॥तेषांवृष्यश्चवल्यश्चवयस्थापनएवच॥गुडःकूष्मांडकल्या

रोगं वध्यानां पुत्रदः परः ॥ कूष्मांडकल्याणगुडः ॥ त्रिवृत्त्रिकानि कुंभोथ स्वदंष्ट्रा चित्रकं शठी ॥ विशाला मुस्तकं शुंठी कृमिशत्रुहरी
तकी ॥ द्विपलांशा पलान्यष्टौ भल्लातकफलानि च ॥ सूरणाद्द्वादशप्रोक्तं षट्पलं वृद्धदारकात् ॥ एतानि खंडशः कृत्वा द्विद्रोणेनेरोग्नां वि
पाचयेत् ॥ पादशेषं तु कुर्वीत पचेत् गुडतुलां भिषक् ॥ कटुत्रिकात्त्रिवृद्दन्ती सूक्ष्मैला मरिचं त्वचः ॥ नागकेशरचूर्णं च एकैकं द्विपलांशकं
॥ सूक्ष्मचूर्णानि कुर्वीत गुडमध्ये विनिक्षिपेत् ॥ भक्षयेद्गुटिकाप्राज्ञः कर्षांशाः पथ्यभुङ्नरः ॥ वातपित्तकफप्रायां द्विदोषां सान्निपा
तिका ॥ ग्रहणीनाशयत्याशु चक्रपाणिर्यथासुरान् ॥ कामलाकुष्ठमेहार्शः पांडुरोगभगंदरान् ॥ स्वपथ्यदूरतस्त्यं च वर्जयेत्सम्यक्प्र
योजितः ॥ सर्वतुल्यं च कर्तव्यो गुडोयं बाहुशालकः ॥ बाहुशालगुडः ॥ ॥ इतिग्रहण्यधिकारः ॥ अथार्शः ॥ व्योषाग्निपुष्करं विडंग
तिलाभयानां चूर्णं गुडेन सहितं सततं प्रयोज्यं ॥ दुर्नामशोथगरकुष्ठसकृद्विबंधः ॥ मग्निर्जयत्यवलतां क्रिमिपांडुतां च ॥ व्योषादि ॥
मरिचमौषधचित्रकं सूरणभागा यथोत्तरं द्विगुणा ॥ सर्वसमो गुडभागः सेव्योयमोदकप्रकामधेयैः ॥ ज्वलनं ज्वलयति जाठरमुन्मूल
यति शूलगुल्मादीन् ॥ निःशेषयति श्लीपदमर्शांसि विनाशयत्याशु ॥ लघुसूरणमोदकः ॥ षोडशसूरणतो भागा वह्नेरष्टौ महौषधस्या
थः ॥ अर्द्धेन भागयुक्तिर्मरिचस्य ततोपि चार्द्धेन ॥ त्रिफलाकणासमूलातालीसारुष्करक्रिमिघ्नानां ॥ भागा महौषधस्यासमदहनांशांता
लमूली च ॥ भाग सूरणतुल्यो दातव्यो वृद्धदारकस्यापि ॥ भृंगैलेमरिचांशे सर्वाण्येकत्र कारयेच्चूर्णं ॥ द्विगुणो गुडेन युक्तः सेव्योयं मोद

कप्रकामधनैः॥भरसा १६ चित्रक ८ शुंठी ४ मरी व २ चित्रफलाप थक् ४ करमा ४ ग्रंथिक ४ तालीस ४ भल्लातक ८ विडंग ४ मुशल्ली
८ वृद्धदारु १६ त्वग १ सूक्ष्मैला १ गुड कर्ष १०८॥गुरुवृष्यमोज्यनिरतैरपितरैश्च पडवेक्षर्यः॥हन्नाशस्त्वक्षाएतत्लैविनाप्यर्शसामेषः॥
श्वयथुश्लीपदहृत्कृहणीकफानिलोद्भूतं॥नाशयति वलीयति तं मेधाकृत्सतेजरांहरते॥हिक्काकाशश्वासमसराजरोगांप्रमेहांश्च॥प्ली
हानं च तथोग्रहन्यात्सुरसायनं पुंसां॥वृहच्छूरणोमोदक गुड भल्लातकं शुंठी विडंगं वृद्धदारुकं॥भल्लातक १ शुंठी १ विडंग १ वृद्ध
दारु १ गुडः १२ सर्वत्र॥भल्लातकेऽसहत्वेनुरक्तवेदनं मिष्यते॥त्रिगुणांदीपनं मृष्यं मर्शोघ्नं विविद्धिवर्धनम्॥~~[illegible]मोदकः~~॥सनाग
रुष्करवृद्धदारुकं गुडेन योमोदकमनुदारकं॥अशेषदुर्नामकरोगदारकं करोति वृद्धिं सहसैव दारकं॥~~वत्नसमोमोदकः~~॥ ॥हरी
तकीनां त्रिफलं त्रिपलके टुकत्रयं॥त्वक्पत्रकं चार्द्धपलं गुडस्याष्टपलं मतं॥अगस्त्यमोदकानेतान्कार्षिकान्परिभक्षयेत्॥तथार्शोग्र
हणीदोषशोषावर्त्तनाशनम्॥~~अगस्त्यमोदकः~~॥त्रिफलापंचलवणं कटुकं कटुकरोहिणी॥देवदारुविडंगानि पिचुमंदफलानि च
॥वलाचातिवलाश्चैव हरिद्रे द्वे सुवर्चला॥एतत्संभृत्य संभारं कारं तत्वग्रसेन वा॥पिष्ट्वा वटिकां कृत्वा वदरास्थिसमां वुधः॥एकैकां
तांसमुद्धृत्यरोगेरोगेपृथक्पृथक्॥उष्णेन वारिणापीताशांतर्मग्निं प्रदीपयेत्॥हन्यादर्शांसि तत्क्षेणा गुल्ममम्लेन निहरेत॥जंतुरोगं तु तत्
क्षेरात्वग्दोषं खदिरं वुना॥मूत्रकृच्छ्रं तु तोयेन हृद्रोगं तैलसंयुताः॥आकाशोदकसंयुक्ता सर्वज्वरविनाशिनी॥मातुलुंगरसेनाथ सघ

शूलं हरापराः॥ कपित्थतिंदुकानां च रसेन सह मिश्रिताः॥ विषाणि हंति सर्वाणि पानाशनविधानतः॥ गुडशक्रद्रससंयुक्ता हंत्याकु
ष्ठानि सर्वशः॥ श्यामायकषायसहिता जलोदरविनाशिनी॥ भक्तछंदं च जनयति भक्तस्योपरि सेविताः॥ नागार्जुनी वटी॥ त्रिपलं
शृंगवेरस्य चतुर्थं मरिचस्य च॥ पिप्पल्याः कुडवार्द्धं च चव्यस्यैकपलं भवेत्॥ तालीसपत्रस्य पलं पलार्द्धं केशरस्य च॥ द्वे पले पिप्प
लीमूलादर्द्धकर्षं पत्रकात्॥ सूक्ष्मैलाकर्षमेकं च कर्षं त्वक्कमृणालयोः॥ गुडात्पलानि त्रिंशच्च चूर्णमेकत्र कारयेत्॥ अक्षप्रमाणा
गुटिका प्राणदा इति संस्मृता॥ शुंठीपल ३ मरिचकर्ष ३ पिप्पलीपल २ चव्यपल १ तालीसपत्रपल १ नागकेशरकर्ष २ पिप्पली
मूलपल २ पत्रकाल १ सूक्ष्मैलाकर्ष १ त्वक्कोल १ पद्मनालकोल १ गुडपल ३० मात्राकर्ष १॥ पूर्वं संभक्ष्य पश्चाच्च भोजनस्य यथा
बलं॥ मद्यं मांसं रसं यूषं क्षीरं तोयं पिबेद्गु॥ हन्यादर्शांसि सर्वाणि सहजान्यसृजानि च॥ वातपित्तकफोत्थानि सन्निपातोद्भवा
नि च॥ पानात्पयेमूत्रकृच्छ्रे वातरोगजलग्रहे॥ विषमज्वरे च मंदेग्नौ पांडुरोगे तथैव च॥ कृमिहृद्रोगिणां चैव गुल्मशूलार्त्तिनां त
था॥ छर्द्यतीसाररोगाणां कामलाहिक्कीणां तथा॥ शुंठ्यास्थाने भयादेयाछिन्नरुहापित्तवायुजे॥ प्राणदेयं सितादंत्वाचूर्णमात्राच
तुर्गुणा॥ अम्लपित्ताग्निमांद्यादौ प्रयोज्या गुडजा नरे॥ ~~अथ गुडपानं~~॥ अथ पाने प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलं॥ पलद्वयं च निलपे
जे पित्तजे गुडपलत्रयं॥ फलाम्लधान्याम्लरसोष्णतोयं मद्यं महद्रोगिणां च गुडपानं॥ इक्षोरसं क्षीरहिमांबुपित्ते उष्णांबुयुक्तं कफजे विद

धात्॥ गंडूषमात्रया देयं मदोत्क्रेरेचर्पवच॥ पिप्पलीपिप्पलीमूलं चव्यचित्रकनागरैः॥ पलाभिर्वृद्धाक्रमशो यवक्षारपलद्वयं॥
भल्लातकपलान्यष्टौ कंदस्त्रिद्विगुणो मतः॥ द्विगुणो न गुडो नैषां वटकानक्षसंमितान्॥ कृत्वैकं भक्षयेत्प्रातस्तक्रमुष्णांबुनापिवे
त्॥ मंदाग्निदीपयेत्येष ग्रहणीपांडुरोगनुत्॥ कांकायनेन शिष्येभ्यः शस्त्रक्षाराग्निभिर्विना॥ भिषग्जिनमिदं प्रोक्तं श्रेष्ठमर्शो
विकारिणां॥ पथ्यापल ५ जीरकपल १ मरिचपल १ पिप्पलीपल १ ग्रंथिपल २ चव्यपलः चित्रकपल ४ नागरपल ५ यवक्षार
पल २ भल्लातकपल ८ सूरणपल १९ गुडपल ९६ विधिगुडपाकवत् मात्रा कर्ष १॥ ~~कांकायनमोदक~~॥ ॥भल्लातकसहस्रे द्वे
जलद्रोणे विपाचयेत्॥ पादशेषे रसे तस्मिन् पचेद्गुडतुलां भिषक्॥ भल्लातकसहस्रार्द्धं छिन्नानत्रैव दापयेत्॥ सिद्धे तस्मिन् त्रिफला
व्योषयवनीमुस्तसैंधवैः॥ कर्षांशैश्चूर्णितैर्दद्यात्त्वगेलापत्रकेशरान्॥ भल्लातक २००० जलपल २५६ शेष ६४ गुड १०० पुनर्भल्ला
तक ५०० तत्र चूर्ण त्रिफला त्रिकटु·यवानी·मुस्ता·सैंधव पथक्कर्ष ८ चातुर्जात पथक्कर्ष ॥ ~~मात्रा कर्ष~~। खादेदग्निबलापेक्षी प्रात
रुत्थाय मानवः॥ कुष्ठार्शः कामलामेह ग्रहणीपांडुतामपि॥ हन्यात्प्लीहोदरं कार्श्यं कृमिरोगं भगंदरान्॥ भल्लातकगुडो ह्येष श्रे
ष्ठश्चार्शोविकारिणां॥ ~~भल्लातकगुड~~॥ दशमूलामृताभार्गीश्वदंष्ट्राचित्रकं शठी॥ भल्लातकसहस्रं तु पलांशं क्वाथयेद्बुधः॥
द्रोणद्वयजले दत्वा तुलामेकां गुडस्य च॥ पक्वा पूर्वविधानेन लेहीभूते समुद्धरेत्॥ माक्षिकं पिप्पली तैलमौरुबूकं च दापयेत्॥ उंडवे

कुडवं चात्र त्वगेलामरिचं तथा ॥ दशमूलपल १ गुडुचिपल १ भार्गीपल १ क्षरपल १ चित्रकपल १ शठीपल १ भल्लातक १००० जल
पल ५१२ शेषपल ५२८ गुडपल १०० मधुपल ४ पिप्पलीपल ४ एरंडतैलपल ४ त्वक्शुक्ष्मैलामरिच सर्वं मिलित्वा पल ४
मात्रा कर्ष १ ॥ अर्शीकाशमुदावर्त्तपांडुत्वंशोथमेव च ॥ नाशयेद्वह्निमांद्यं च परो भल्लातको गुडः ॥ ~~वृहद्भल्लातकगुडः~~ ॥ त्रिवृत्तेजो
वती दंती श्वदंष्ट्रा चित्रकं शठी ॥ गवाक्षिविश्वमुस्ता ह्वाविडंगानि हरीतकी ॥ पलोन्मितानि चैतानि पलान्यष्टा वह्लकरात् ॥ वृ
द्धदारुपलान्यष्टौ सूरणस्य च षोडश ॥ जलद्रोणे पचेत्क्वाथ्यं चतुर्भागावशेषितं ॥ पूतं तु तत्र संभूयः क्वाथेभ्यो द्विगुणो गुडः
॥ लेहं पचेत्तु तेनाव यावद्दर्वीप्रलेपनं ॥ अवतार्य ततः पश्चाच्चूर्णानिमानि दापयेत् ॥ त्रिवृत्तेजोवती दंती चित्रकं द्विपलांशिका
न् ॥ एलात्वक्पत्रनागाह्वमेषां चापि षट्पलं ॥ द्वात्रिंशश्च पलान्येवं चूर्णं दत्वा निधापयेत् ॥ ततो मात्रां प्रयुंजीत जीर्णे क्षीरर
साशिनः ॥ त्रिवृत्तेजोवती दंतिः कंठकारी चित्रकशठी ॥ इंद्रवारुणिशुंठी· विडंग· पथ्याप्रत्येकपलानि ११ भल्लातकपल
८ वृद्धदारुपल ८ सूरणपल १६ जलपल ५१२ पक्वाशेषपल १२८ गुडपल ४६ तत्र चूर्णानि त्रिवृत्· तेजोवती दंती चि
त्रक· प्रत्येकं पल २।२ सूक्ष्मैला त्वक्· पत्रक· नागकेशर· त्रिकटु सर्वं द्विद्विपलं १४ सर्वं मिलित्वा द्वाविंश २२ पलं भवति मात्रा
तु कर्ष १।१ अर्द्ध कर्ष ॥ पंचगुल्मां प्रमेहांश्च पांडुरोगं हलीमकं ॥ जयेदर्शांसि सर्वाणि तथा सर्वोदराणि च ॥ दीपयेदनलं मंद

पक्ष्माणं चापकर्षति ॥ पीनसे च प्रतीश्याये आस्यवाते तथैव च ॥ अयं सर्वगदेश्चैव कल्याणोल्लेहदुच्यते ॥ दुर्नामारिरयं चात्रदृष्टो
वारसहस्रशः ॥ जीवंतेन प्रयुंजाना शतवर्षाणि मया ॥ आयुष्यं पुत्रजननं वलीपलितनाशनं ॥ रसायनं वरश्चैव मेधाजननमु
त्तमः ॥ गुडः श्रीवाहुशालोयं दुर्नामारिः प्रकीर्तितः ॥ ~~श्रीवाहुशालोगुडः ॥ इत्यर्शोधिकारः ॥ अथाग्निमांद्यं~~ ॥ हरीतकीनां कु
डवं त्र्यूषणस्य पलत्रयं ॥ द्वे पले पिप्पलीमूलात्तथैवाम्लवेतसात् ॥ चिविकाचित्रकं धान्यमजाजी हपुषामपि ॥ यवानी चाजमो
दाचतित्तिडीकं सदाडिमं ॥ सौवर्चलं सैन्धवं च पलिकानुपकल्पयेत् ॥ त्वगेलापत्रकं चैव कर्षांशं चूर्णयेत्ततः ॥ गुडस्य तु पला
न्यत्र दापयेद्विगुणानि च ॥ अभयागुटिका ह्येषां मंदस्याग्नेस्तु दीपनी ॥ वातर्शांसिनमानाहं गुल्मं पंचविधं तथा ॥ चतस्त्राग्रह
णी दोषान्षड्विधार्शांसि सेवनात् ॥ क्षयकाशं विवंधं च शूलहृज्जठरामयं ॥ भक्षिता नाशयेत्याशु भोज्ये चायं वराग्नस्यता ॥
अभयागुटी ॥ सिंधुत्थहिंगुत्रिफलायवानीव्योषैर्गुडांशैर्वटिकाप्रकुर्यात् ॥ ताम्भक्षितान्नित्यमवाप्नुवन्ना भुंजीतमंदाग्निरपिप्रभूतं ॥
सैन्धवादि ॥ द्वे पाठे दशमूलार्ककटफलानि विषानृतत् ॥ भागोर्दशपलैर्दत्वा जलद्रोणे विपाचयेत् ॥ पादशेषे गुडे तु लां दत्वा
पक्वे गुडे ततः ॥ चूर्णितां पंचपलिकाश्चव्यव्योषहरीतकि ॥ चित्रकं सयवक्षारं द्विगुणं तत्र प्रदापयेत् ॥ दर्व्याः प्रलेपनं वापि तत्रस्मा
मवतारयेत् ॥ हिंग्वम्लवेतसं चव्यन दन्तसु पलंपलं ॥ ततः क्षारं गुडं खादेदजीर्णाहविनाशनं ॥ प्लीहार्शःशोषपांडुत्वं मेहकुष्ठ

ज्वरापहः॥ गुडक्षारं॥ द्विपंचमूलीत्रिवृतानिकुंभापाठाश्वधास्फोतपलासरास्ना॥ शतावरीचित्रकमर्कमूलं पृथक् समस्तानि पले
दशांशे॥ भस्मीकृतान्यंभसि गालयित्वा पचेत्तुलां जीर्णगुडस्य सम्यक्॥ चूर्णीकृतैः पंचपलैरिमैस्तु विपाचयेत्॥ पाकविधिं वि
दित्वा· दंत्यश्विकालोयवशूकजं च क्षारं तथा स्वर्जिकसंज्ञकं च॥ व्योषं वचा चैव हरीतकी च पृथक् पलानां सह चित्रकेन
हिंगू जवानी च पलं च दत्वा विपाचयेत्क्षारगुडं यथावत्॥ तत्राक्षमात्रा गुटिकाप्रयोज्या कायाग्निहीनैर विषैर्नरैश्च॥ सश्ले
ष्म कासारुचिगुल्महृद्रोकफश्च कंठोरसिय श्वानिष्ठेवन्॥ कष्टं प्रमेहाश्च पथं च हन्यात्॥ पांड्वामयान् प्लीहगुडोग्रवाश्च
क्षारोगुडो पुत्ररसेन पुंज्या भुक्तं सुभुक्तं जरयेत्सुशीघ्रं॥ आस्फोटअपराजिता॥ वृहत्क्षारगुडः॥ ॥ तत्केसमक्षिप्य
शिवाशानितद्बि जमुद्रत्यच कोशलेन॥ षड्ूषणां पंचपटूनि हिंगु क्षारावजाजीमजमोदकं च षड्ूषणादेस्तु हृदर्द्धभा
गागरोस्यदेयांवरगालितस्य॥ विभाव्य वृक्षेणाररजास्यमीषा क्षिपेच्छ वाबीजनिकासगर्भे संमृद्य घर्मे च विशोष्य तासां ह
रीतकीमन्यतमां निषेवे॥ हरीतकी १०० तत्केसरेद्यः तद्बीजंपुत्रानिकाश्यतद्बीजस्थाने चूर्णानि निक्षिपेत्॥ तद्यथा पि
ली: पिप्पलीमूलं चव्यचित्रकनागरः॥ मरिचपंचलवणाः॥ हिंगु· यवक्षार· स्वर्जीक्षार· जीरकजवानी पृथक् कर्षः ११ त्रि
वृता ८ तत्केशात चूर्णविभाव्य तद्बीजगर्भे क्षिपेत् घृतभांडमध्ये संक्षिप्य घर्मे विशोष्याचरकाहरीतकीखादेत्॥ अजीर्णा

संदानलजाठरामयान्सगुल्मशूलग्रहणीगदामयान्॥ विबंधमानाहहरोजयत्यसौ समस्तामवातान्स्वमृताहरीतकी॥
अमृताहरीतकी॥ हिंगुदीप्यकटुकंग्रंथिचव्याग्नीभकरौषणं॥ विडंगकणाहिंग्वाविषंकट्फलकंसमंएलदेवरजोद्विघ्र
क्षीरकंदरजोखिलं॥ निर्वत्तमर्दितंसम्यक्कोलास्थिकृतगोलकं॥ मांद्येजीर्णमहारोगेशूलेपांडौचकामले॥ रोगराजेग्रह
रापांचमंहमांद्येज्वरार्तिहा॥ क्षीरकंदवटकः॥ त्रिकटुत्रिफलाचैववत्तथालवणपंचकं॥ विजहीफेनतीक्ष्णांसमभागंवि
चूर्णितं॥ यावंतिमरिचानिस्युस्तावंतिगुटिकांचरेत्॥ एकैकांवटिकांखादेद्द्रववेगस्यशृतेनच॥ विश्वचीनाशयत्याशुसत्यंगु
रुवचोयथा॥ वन्हेर्द्विपंचमूलस्यक्वाथेपलशतद्वये॥ अमृतायारसस्यैकेपूतेस्मिन्नभयाष्टके॥ पचेद्गुडतुलांयावद्यावत्पा
कस्यलक्षणं॥ अन्येपुस्तत्रमधुनस्तुशीतेतुडवदयं॥ प्रक्षिपेत्त्रिसुगंधस्यत्रिकटोश्चपलंपलं॥ प्रत्येकंस्याद्यवक्षारान्तु
त्तिस्तस्मिन्रसायने॥ उत्तमंकथितंपुंसामभ्यामग्निवृद्धये॥ जीर्यंत्यपिहिकोनित्यंकाशश्वासक्षयंकृमिन्॥ गुल्मोदरार्शः
कुष्ठानिसांत्रवृद्धिंनिहंतिच॥ योगशतैरप्यजितान्व्याहाजयतिपीन्मान्॥ अत्रचित्रकादीनांत्रयाणांप्रत्येकंपंचाशद्भागंद
त्वाविश्राम्यसार्द्धंवाद्दशवासरान्स्थापयितव्य॥ चित्रकगुड॥ द्वेपंचमूलेत्रिफलान्तृन्मूलंशतावरी॥ दंतीचित्रकमास्फो
टारास्नापाठांसुधांशठी॥ पृथग्दशपलाभागांदत्वाम्भस्समसमाहरेत्॥ त्रिसप्तकृत्वातद्भस्मजलद्रोणेनगालयेत्॥ तद्रोणं

साधयेदग्नेश्चतुर्भागानशेषितं॥ ततो गुडतुलां दत्वा साधयेन्मृदुनाग्निना॥ सिद्धं गुडं तु विज्ञाय चूर्णानिमानि दापयेत्॥ वृश्चि
कालीद्विकाकोल्यौ यवक्षारसमापयेत्॥ एते पंचपला भागाः पृथक् पंचपलानि च॥ हरीतकी त्रिकटुकं स्वर्जिकां चित्रकं वचा
॥ हिंग्वम्लंवेतसांभ्यां च द्वैपलेन तु दापयेत्॥ ~~आमोदाश्मयसंज्ञिना~~॥ ॥ अक्षप्रमाणां गुटिकां कृत्वा प्रातर्यथाबलं॥ अजीर्ण
त्वरयत्येष जीर्णं संदीपयत्यपि॥ भुक्ताभुक्तं च जीर्यति पांडुत्वमपकर्षति॥ मंदाग्निं विषमाग्निं च कफे कंठोरसि स्थिते॥ कृष्णा
तिवप्रमेहाश्च गुल्मं चापि व्यपोहति॥ ख्यातः क्षारगुडो ह्येषः सर्वरोगे प्रयोजयेत्॥ ~~क्षारगुड~~:॥ त्रिकटु त्रिफला मुस्तं जीरकद्वय
धान्यकं॥ कट्फलं पौष्करं शृंगी यवानी सैंधवं विडं॥ तालीशं केशरं पत्रं त्वगेलावपलं तथा॥ जातीकोशं लवंगं च मुराकर्पू
रचंदनं॥ यावन्त्येतानि चूर्णानि तावन्तो बहु मेथिका॥ संचूर्ण्य गुटिका कार्या पुरातनगुडेन तु॥ घृतेन मधुना किंचित् खादेद द
ग्निबलं प्रति॥ अग्निं च कुरुते दीप्तिं मेदं श्वासं महौषधं॥ बलवर्णकरो ह्येष स्वरसंधानकारकः॥ प्रमेहान् विंशतिं चैव मू
त्राघातं तथाश्मरीं॥ पांडुरोगं तथा शोषं यक्ष्माणं हंति कामलां॥ स्तनौ च पातितौ गाढौ स्यांतातालफलोपमं॥ दृष्टिप्रसाद
नश्चैव नारीणां हृदयप्रदः॥ प्रोक्तोगहन्ताधेन मेथिकामोदकः प्रभः॥ ~~मेथिकामोदक~~:॥ निःक्षिपेत् त्रिदिनं मूत्रे गवां
वीं हरीतकीं॥ ततस्तक्रे गदामेव त्रिदिनं तां विभावयेत्॥ स्वेदयेदिनमेकं तु दशमूलीभसमासरः॥ निमज्य च ततः कृत्वा

चूर्णेनाग्निविवृद्ध्यादिना ॥ संपूर्यविसृयेत्सत्रैर्निंबुकानांरसेनच ॥ मज्जयेद्दिनमेकंतु धनंजयहरीतकी ॥ प्रत्यहंभक्षयेदर्धप्रमाणेन
रसःसदा ॥ वर्द्धनंजठरस्याग्नेरामातीसारनाशिनी ॥ धनंजयहरीतकी ॥ ॥ इत्यग्निमांद्याधिकारः ॥ अथक्रिमिः ॥ पलंक
षापलंद्वेतुकृष्णायाश्चपलद्वयं ॥ पथ्यामृताक्षधात्रीणांपृथगेकैकशपलं ॥ पूतिकचव्यबोलाग्निकारवीकृमिनाशनैः ॥
चूर्णितैरर्द्धपलिकैस्तिलतैलपलद्वयं ॥ त्रिफलायारसप्रस्थंखंडप्रस्थघृतंभवेत् ॥ दर्वीप्रलेपपाकश्चचातुर्जातकसंयुते
॥ सचित्रवटकोह्येषयथाग्निबलमाश्रितः ॥ कृमिकोष्ठाग्निदौर्बल्यशोथगुल्मोदरव्रणान् ॥ कामलापांडुरोगार्शोभगंदरगरज्व
रान् ॥ निहंत्युवह्निसंवृद्धिंवयस्थैर्यबलप्रदा ॥ पापमेहप्रशमनंवंध्यापुष्टिवर्द्धना ॥ निरत्ययांस्निग्धभुजांधातानामपनिषेवि
तां ॥ पलंकषाः ॥ लाक्षा ॥ पूतीकंकरंजा ॥ सचित्रवटका ॥ इतिक्रिमिव्याधिकारः ॥ अथपांडुकामला ॥ कृष्णेद्वेग्रंथिकोवह्निदीप्यको
षराःसैंधवैः ॥ कृमिघ्नत्रिफलाधान्यकालाजाज्यजमोदिका ॥ पलिकानित्रिवृच्चूर्णंतैलयोश्चपलाष्टकं ॥ रसप्रस्थत्रयंधात्र्या
गुडस्यार्द्धतुलांपचेत् ॥ एतत्कल्याणकंपांडुकामलार्शोगरापहं ॥ मेहकुष्ठक्षयश्वासग्रहणीहृद्रसायनम् ॥ कल्याणगु
डः ॥ इतिपांडुकामलाधिकारः ॥ ॥ अथरक्तपित्तः ॥ मधुकंमधुकंद्राक्षात्वक्क्षीरीपिप्पलीतथा ॥ त्रिजातस्यत्रयःकर्षा
पिप्पल्याश्चपलंतथा ॥ द्राक्षामधुकखर्जूरपलांशंश्लक्ष्णचूर्णितं ॥ मधुनागुटिकाघ्नंतिप्रवृद्धंपित्तशोणितं ॥ कासश्वास

॥सात्मद॥ रुचिछर्दिमूर्छाहिक्कामदभ्रमा॥ क्षतक्षयंनिहंत्याशुमधुकाख्यगुटिस्मृतः॥ मधुकादिवटि:॥ एलापत्रत्वचोशीरवासाकृष्णापलार्द्ध
॥८९॥ कम्॥ सितामधुकखर्जूरमृद्वीकाश्चपलोन्मिता॥ संचूर्ण्यमधुनायुक्तंगुटिकांकारयेद्भिषक्॥ अक्षमात्रांततश्चैकाभक्षयेन्नादिने
दिने॥ कासश्वासज्वरंहिक्काछर्दिमूर्छामदभ्रमा॥ रक्तनिष्ठिवनंतृष्णापार्श्वशूलमरोचकं॥ शोषप्लीहाढ्यवाताश्चस्वरभेदंक्षतक्षयं॥ गुटिका
सर्परीवृष्यारक्तपित्तविनाशनं॥ एलादिगुटिका॥ तवृतापिप्पलीश्यामापिप्पलीशर्करामधुः॥ मोदकेसन्निपातोत्थरक्तपित्तज्वरापहं
त्रिफलापिप्पलीश्यामाकेशरंसर्कराघृतं॥ सक्षौद्रमोदकोह्येषरक्तपित्तप्रणाशयति॥ ॥त्रिफलादिमोदक॥ ॥इतिरक्तपित्ताधिकारः॥
॥ ॥अथक्षय:॥ तालीशपत्रंमरिचंनागरंपिप्पलीशुभा॥ यथोत्तरंभागवृद्ध्यात्वगेलेचार्द्धभागिके॥ पिप्पल्यष्टगुणाचात्रप्रदेयाशुभ्र
शर्करा:॥ कासश्वासारुचिहरंतच्चूर्णंपाचनंपरं॥ हृत्पांडुग्रहणीरोगप्लीहशोषज्वरापहं॥ छर्द्यतीसारशूलघ्नंमूढवातानुलोमनं॥ ॥रम:॥
कल्पयेद्गुटिकाश्चैवचूर्णंपक्त्वासितोपला॥ गुटिकास्त्वग्निसंयोगाच्चूर्णात्लघुतरास्मृता॥ तालीसादिगुटि॥ ॥तालीसपत्रमरि ॥८९॥
चंचविकानांपलंपलं॥ कृष्णासमूलयोर्द्वेद्वेपलेशुंठिपलत्रयं॥ चातुर्जातकशीरंचकर्षांशंसूक्ष्मचूर्णितं॥ गुडेनगुटिकांकृत्वात्रिगुणेन
सदाभवेत्॥ मद्ययूषरसारिष्टमस्तुपेयांपयोनुपः॥ वातश्लेष्मकृतछर्दिग्रहणीपार्श्वहृद्रुजा॥ ज्वरःश्वयथुपांडुत्वंगुल्मपानात्ययार्शसां
॥प्रसेकपीनसःश्वासकासानांवविनिहत्तये॥ अभयानागरस्थानेदद्यादत्रैवविड्ग्रहे:॥ छर्द्यादिषुचसर्वेषुचतुर्गुणासितान्विता॥ चतुर्लावटकांकृत्वा

गुडेनसितयापिवा॥ ~~मुसलीसादि~~॥ ॥उच्चटेक्षुरसोक्षौद्रगोक्षीर्याश्वगुडिमान्॥प्रस्थंप्रस्थंपृथग्घृताच्छर्करार्द्धतुलांतथा॥आत्मगुप्ताफला
नांचकुडवंमरिचस्यच॥त्रिसुगंधिकृतापापंमथनेनविमंथितं॥ ~~[illegible]~~॥स्वरवर्णवलोदार्यतुष्टिपुष्टिविवर्द्धनं॥आयु
ष्यपौष्टिकंचाग्र्यंभूतोपहतचेतसां॥व्याकुलीकृतदेहानांवृद्धानांक्षीणरेतसां॥वाजीकरणमप्येवंवंध्यानांपुत्रदंपरं॥धनुस्त्रीमद्यभारा
ध्वखिन्नानांचवलप्रदं॥हृत्प्लीहग्रहणीदोषंमूत्रकृच्छ्रापनेत्रकं॥अपस्मारविषोन्मादनाशनंतद्रसायनं॥उच्चटमोदकः॥ ॥धात्री
सैन्धवकुष्ठकट्फलकणाशुंठीयवानीद्वयंयष्टीजीरकयुग्मधान्यकशठी॥शृंगीजपकेशरं॥तालीसंसविभीतकंसमरिचंमोथ्याख्य
मिश्रणान्वितं॥चूर्णीकृत्यमनाक्पृथक्पलमितंमत्स्याथशक्रानं॥सर्वैस्तुल्यसितंसितांसविमलांदद्यात्कंनिक्षिपेन्माक्षीकंसघृतंप्रश
स्तादिवसेकुर्यात्कुमोमोदकान्॥कर्पूरैरवचूर्णितानमपितदाभक्षान्तिलान्योजितान्योगोयंक्षितिमंडलेमलधियापार्वतिनामग्रतः॥
॥सर्वव्याधिहरंक्षयक्षयकरंकुष्ठापहंवृंहणंपोषित्रौघकरंस्मरैवद्युतिकरंशुक्राग्निवृद्धिप्रदं॥काशश्वासवलासरोगनिचयंमर्शग्रह
रापहवृत्तिव्रह्मरुद्रोमहेन्द्रप्रभः कामेश्वरंमोदकं॥ ~~कामेश्वरोमोदक~~ः॥ ॥वलांविदारिकुस्तांवपंचमूलीपुनर्नवां॥पंचानांक्षीर
वृक्षाणांशुंगान्मुशलिकांतथा॥विपाच्यासलिलेद्रोणेपूतेपादावशेषिते॥पादांशेमंवुगोक्षीरेविदार्याश्चरसैःपृथक्॥जीवनीयैपंचे
कल्कैःअक्षमात्रैःघृताढकं॥सितोपलानिपूतेचशीतेद्वात्रिंशदापयेत्॥गोधूमंपिप्पलीवांसिचूर्णंशृंगाटकस्यच॥समाक्षिकंकोड

विकं तत्सर्वमवलोडयेत्॥ स्त्याने सर्पिर्गुडान्कृत्वा भूर्जपत्रेण वेष्टयेत्॥ तान्जग्ध्वा परिकांक्षीरं मद्यं वानुपिबेत्कफे॥ शोषकाशे क्षये क्षीणे श्रमस्त्री
भारकर्षिते॥ रक्तनिष्ठीवने वापि पीनसे चोरसि स्थिते॥ शस्तेपार्श्वशिरःशूले भेदे च स्वरवर्णयोः॥ सर्पिर्गुडः॥ ॥गोक्षीरार्धकं सर्पिप्रस्थमि
क्षुरसाढकं॥ रसो विदार्याकुडवं रसप्रस्थश्चैतत्रिराट्॥ दद्यात्सिद्धशीते तस्मिन्सुपिष्टानि क्षुरसास्तिमान्॥ मधूकपुष्पकुडवं प्रियालकुडवं त
था॥ कुडवार्द्धं तुगाक्षीर्याः खर्जूराणि च विंशति॥ पथग्विभीतकानं च पिप्पल्याश्च चतुर्थिका॥ त्रिंशत्पलानि खंडाच्च मधुकात्कर्षमेव च॥
तथार्द्धपलिकान्यत्र जीवनीयानि दापयेत्॥ सिद्धेस्मिन्कुडवं क्षौद्रं शीते प्रक्षिप्य मोदकान्॥ कारयेन्मरिचाजातीफलचूर्णविचूर्णितान्॥ वा
तासृक्पित्तरोगेषु क्षतकाशे क्षयेषु च॥ शुष्काणां क्षीणशुक्राणां रक्ते चोरसि संस्थितेः॥ कृशदुर्वलभीरूणां पुष्टिवर्णवलाग्निकृत्॥ योनिदो
षक्षतस्रावं हन्तानां वापि योषितां॥ गर्भार्थिनीनां गर्भश्च स्रावद्यासां म्रियेत तथा॥ ॥धान्यावत्याहितास्तासां शुक्रशोणितवर्द्धना॥ ॥
सर्पिर्मोदकः॥ द्राक्षावासासामलकामात्मगुप्तापुनर्नवा॥ शतावरी विदारी च समंगा पिप्पली तथा॥ पथग्दशपलान्भागान्पलान्यष्टौ च नागरा
न्॥ यष्ट्याह्व सौवर्चलस्याद्विपलं मरिचस्य च॥ क्षीरैतैलघृतानां च आढके शर्कराशते॥ क्वथितेतानि संचूर्ण्य दत्वा विल्वसमान्गुडान्॥ कुर्वी
त भक्षयेत्क्षीणक्षतशोषि च मानवः॥ तेन सद्यो वलकरो वृद्धः पुष्टिसविंदति॥ सर्पिर्गुडः॥ ॥ कुष्मांडपक्वात्पलशतं तमस्विन्नं सक्कुलीकृतं॥
प्रस्थं चैव घृतं देयं तस्मिंश्चैव प्रदापयेत्॥ त्वक्पत्रधान्यकं व्योषं जीरकैलाद्वयानलं॥ ग्रंथिकं चव्यमातंगपिप्पलीशृंगवेरकं॥ सिंघाडकं कसेरु

च मुशलीकंदमस्तकं ॥ अष्टवर्गस्तुगाक्षीरीतालीसं च लवंगकं ॥ जातीफलं गोक्षुरकं मर्कटीवीजकं तथा ॥ जातीपत्रमाकल्लकं च कस्तूरीकेशरं
तथा ॥ अभ्रकं लोहवंगं च ताम्रं चैतानि दापयेत् ॥ चूर्णितं पलाशेन गुडस्य तुलया पचेत् ॥ संसिद्धितस्मिन्त्य पलान्यष्टौ मधुना संप्रदापयेत् ॥ क
फपित्तानिलहरं मंदाग्निपरिपाचयेत् ॥ कृशानां बृंहणं श्रेष्ठं वाजीकरणमुत्तमं ॥ प्रमदासुप्रसक्तानां ये चान्ये क्षीणरेतसां ॥ क्षयेणाव गृ
हीतानां परमं वैद्यपूजितं ॥ काशं श्वासं तथा हिक्कां हंति छर्दिमरोचकं ॥ गुडकूष्मांडकं ख्यातं कृष्णात्रेयेण पूजितं ॥ गुडकूष्मांडः ॥ ॥
इति क्षयरोगाधिकारः ॥ ॥ अथ काशः ॥ मरिचं कर्षमात्रं स्यात्पिप्पली कर्षसंमिता ॥ अर्द्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमं ॥ एतच्चूर्णी
कृतं युंज्यादष्टकर्षगुडेन हि ॥ शाणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ॥ अस्य प्रभावात्सर्वोपि काशो यात्येव संक्षयं ॥ मरिचादि ॥ ॥ कर्षक
र्षी शोपलद्वयं स्यात्ततोर्द्धकर्षं च ॥ मरिचस्य पिप्पलीनां दाडिमगुडयाव भूकानां ॥ सर्वौषधैरसाध्या काशा ये वैद्यविनिर्मुक्ता ॥ अपि पूयं छर्द
यति तेषामिदं मौषधं शस्तं ॥ मरिचादि द्वितीयः ॥ हरीतकी कणा शुंठी मरिचं गुडसंयुतं ॥ काशघ्नो मोदकः प्रोक्तः परं वह्निप्रदीपनं ॥ हरी
तक्यादि ॥ ॥ तुलालवंगमरिचाक्षफलत्वचक्षः सर्वैः समश्च गदितः खदिरस्य सारः ॥ वव्वूलवृक्षजकषायजुषां च तूर्णा काशं निहंति गुटि
काष्टकेन ॥ लवंगादि ॥ ॥ पंचकोलं वचाकुष्टं विडंगं लाक्षाग्न्युपुष्करं ॥ धान्यो वराणि शाणयुग्मं दारुतुंवुरुसैंधवं ॥ गजाह्वाह्वयुषां जाज्यंति
ता क्षारौ विचूर्णयेत् ॥ पुरेणाद्विगुणेनैव सप्तविंशतिकं कृतं ॥ सक्षौद्रं योजयेत्काशे श्वासे शोथांत्रवृद्धिषु ॥ प्लीह जीर्णज्वरे शूले क्षयपीन

सर्पांकुष ॥ ~~सप्तविंशतिकोगुग्गुलु~~ ॥ ॥ पथ्याशुंठीघनगुडैर्गुटिकां धारयेन्मुखे ॥ सर्वेषु श्वासकाशेषु केवलं वा विभीतकम् ॥ ~~पथ्यादि~~
॥ सपिप्पलीपुष्करमूलपथ्याशुंठीशठीमुस्तकसूक्ष्मचूर्णैः ॥ गुडेन पक्वा गुटिकाप्रयोज्या श्वासेषु काशेषु च वह्निजेषु ॥ ~~पिप्पल्यादि~~
॥ ॥ शृंगीशकेशरतुगात्वचवंशक्षीरीदुस्पर्शग्रंथिमरिचानिवचित्रजाजी ॥ एलातनूपुष्करमूलगोक्षुरं शुंठीभार्गीकरार्द्दप
लसूक्ष्मचूर्णं ॥ क्षौद्रसिताद्याद्विगुणांगुटिकाप्रकुर्यात् कासं तथा श्वपथुपीनसश्वासहारी ॥ वैश्वर्यमारुतकफोदुरहिध्मंहंताचै
वर्णपुष्टिकरणं हृचिकाग्निकारि ॥ ~~मधुमोदकः~~ ॥ ॥ तालीसवह्निदीप्यकचविकाम्लवेतसव्योषैः ॥ सजाजीत्रिसुगंधियुतैर्गु
डेन गुटिकाप्रकर्तव्या ॥ कासश्वासारोचकपीनसहृत्कंठवह्निरोगेषु ॥ ग्रहणीगदोद्भवेषु च गुटिकां व्योषादिनाम्ना ॥ ~~व्योषादि~~ ॥ ॥
कुलत्थानां पलशतं दशमूलपलेन तथा ॥ शतंत्रालसरायपस्पाश्च चतुर्गुणजलेशृतं ॥ पादानशेषं पूते च गुडस्यार्द्धतुलां पचेत् ॥ पाकं ज्ञा
त्वावतार्य च सुशीते क्षिपेच्चूर्णितं ॥ षट्पलं च तुगाक्षीर्याः पिप्पल्यादिपलं तथा ॥ कुडवं मधुनो दद्यात्स्थापयेत्स्निग्धभाजने ॥ खादेदद
ग्निबलापेक्षी नाशयेदचिरादपि ॥ यक्ष्माणं पीनसं कासं श्वासं जीर्णमजीर्णकं ॥ जीर्णज्वरं पांडुरोगं हृद्रोगं श्लेष्ममारुतं ॥ कुलत्थ
गुड इत्युक्तः सर्वोपद्रवनाशनं ॥ कुलत्थगुडः चतुःपलं मूलकं शुंठिकस्य तथैव शुद्धस्य कुलत्थकस्य ॥ तुलां प्रदद्याद्दशमूलकस्य द्रो
णाम्भसः सर्वमिदं पचेत् ॥ पूते रसे पादचतुर्थशेषे प्रस्थप्रमाणे रसमार्द्रकस्य ॥ ततो हविस्तैलपलाष्टकं च गुडस्य शुद्धस्य तुलां तथैव ॥

तावत्पचेच्चैव दिदं समस्तं संमर्द्य दद्यात् गुडपाकमेतत् ॥ चूर्णीकृते जीरकचव्यशृंगीमार्गीनिशोगंधिककट्फलैश्च ॥ मुस्तायवानीशठीपुष्करैश्च सव्योषकैरर्द्धपलप्रमाणैः ॥ सार्द्धक्षिपेन्माक्षिकप्रस्थमात्रं दद्यात्तुशीतं बलवह्निवेक्ष्य मात्रां ततो लेहवदादिशेच्च पथ्याशनस्याप्रयोगकाले ॥ कफोद्भवायेश्चविकारजाता सश्वासकाशाहृदयाश्रिताश्च ॥ हृत्पार्श्वशूलज्वलछर्दितृष्णास्वरक्षयारोचकवह्निसाद ॥ तेनासमायांत्युपयोगतश्च कुलत्थसंज्ञस्य गुडस्य शीघ्रम् ॥ द्वितीयकुलत्थगुडः ॥ ॥ इति काशाधिकारः ॥ ॥ अथ वटकाधिकारे हिक्कारोगस्य वटको नास्ति ॥ अथ श्वासः ॥ दशमूलीकणावह्निकपिकच्छुविभीतकं ॥ धात्रीजंतुघ्नशिखरीशृंगीदारुपुनर्नवा ॥ कट्फलं मरिचं चैव पिप्पलीमूलसंयुता ॥ वेदंतरोहितकं दंती द्राक्षा जातीनिशाद्वयं ॥ धान्यकं देवकुसुमं राजवृक्षं त्रिकंटकं ॥ वृद्धदारुकवेराक्षोमूलं वीरणिकाभवं ॥ सतेषां पलयुग्मं तु भेषजानां पृथक् पृथक् ॥ आरुकं चैव पथ्यानां तद्द्रोणेषु विपाचयेत् ॥ सुस्विन्ना च यदा पथ्या मधुमध्ये विनिःक्षिपेत् ॥ गुरूपदेशाविविधात्रिदिनं च ततः परं ॥ पुनःक्षिपेत्सप्तदिनं तथा च दशवासरं ॥ नीरसामभयापश्चात् घृतभांडे निधापयेत् ॥ विमले सुदृढे क्षौद्रे परिपूर्णे च यत्नतः ॥ चातुर्जातकणानां तु चूर्णमष्टपलोन्मितं ॥ पश्चात्पूर्वोक्तभांडे तु क्षिपेद्बुद्धिपरायणः ॥ धन्वंतरीकृतो योगो लोकानां हितकाम्यया ॥ भक्षयेद्यो नरो नित्यं रोगान् हंति सर्वतः ॥ श्वासकासं क्षयं चैव छर्दिमूर्छामदभ्रमं ॥ मुखरोगं तथा तृष्णामरुचिं वह्निमायतां ॥ यकृत्प्लीहोदराणां च वृद्धिं च विषमज्वरं ॥ मूत्रकृच्छ्रं प्रमेहं च वातरक्तं सुदारु

रां ॥ रुजं च वातसंभूतं तथा वक्त्रगदोद्भवं ॥ रक्तपित्तं श्लेष्मपित्तं सिध्मा दद्रु विचर्चिका ॥ कुष्टमर्शांस्त्वपस्मारं पांडुरोगं सकामलं ॥ मधु
पक्केति विख्याता लोकानां हितकाम्यया ॥ सेवते यो नरो नित्यं पूर्वोक्तान्वै व्यपहति ॥ मधुपकहरीतकी ॥ शतं संगृह्य भार्गीस्तु दश
मूलान्तथापरं ॥ शतं हरीतकीनां च पचेत्तोये चतुर्गुणे ॥ पादावशेषे तस्मिंस्तु सम्यक् वस्त्रनिपीडिते ॥ आलोड्येनतुलं पूतं गुडस्य च म
यां ततः ॥ पुनः पचेत्तु मृद्वग्नौ यावल्लेहत्वमागतं ॥ शीतेतनमधुनश्चात्र षट्पलानि प्रदापयेत् ॥ त्रिकटुत्रिसुगंधिं च पलिकांश्च पृथ
कपृथक् ॥ वर्षद्वयं यवक्षारं संचूर्ण्य प्रक्षिपेत्ततः ॥ भक्षयेदभयामेकां गुडस्यार्द्धपलं लिहेत् ॥ श्वासं सुदारुणां हंति कासं पंचविधं त
था ॥ स्वरवर्णप्रदो ह्येष जठराग्नेश्च दीपनः ॥ हरीतक्यौ शतैकस्य जनप्रस्थमिहाधिकं ॥ भार्गीगुडः ॥ कुलत्थदशमूलं च तथैव द्विज
यष्टिका ॥ शतं शतं च यष्टिकां संगृह्य जलद्रोणे विपाचयेत् ॥ पादावशेषे तु पुनर्गुडं सार्द्धतुलां क्षिपेत् ॥ शीतीभूते च पक्कं च मधुनोष्टौ
पलानि च ॥ षट्पलानि तुगाक्षीर्याः पिप्पल्याश्च पलद्वयेत् ॥ त्रिपलं त्रिसुगंधं च खादेदग्निबलं यथा ॥ श्वासकासज्वरं हिक्कां नाशये
त्तमकं तथा ॥ कुलत्थगुडः ॥ इति श्वासाधिकारः ॥ अथ स्वरभेदः ॥ अश्वगंधावचाकुष्टयष्टीसैन्धवनागरं ॥ पिप्पलीक्षौद्रसंयुक्तागु
टिका शाणसंमिता ॥ स्वरभेदहरश्रेष्ठमुखेधार्या सदा बुधैः ॥ अश्वगंधादि ॥ चव्याम्लवेतसकटुत्रिकतिंतिडीकतालीसजीरकतुगा
दहनैः समांसैः ॥ चूर्णं गुडप्रमुदितं त्रिसुगंधियुक्तं वैस्वर्यपीनसकफारुचिषुप्रसक्तः ॥ चव्यादि ॥ ॥ इति स्वरभेदाधिकारः ॥ अथारु

धि:॥ त्र्यूषणानि त्रिफलारजनीद्वयं च चूर्णीकृतानि यवशूकमिश्रितानि ॥ क्षौद्रान्वितानि गुटिका मुखधारितानि विमन्त्यानि तिक्तकटु
कानि च भेषजानि ॥ त्र्यूषणानि ॥ खर्जूरं पृथुलं मृदुकृत्तमसघनं स्विन्नं कटू स्नोदके पश्चात्त्रिवृक वारिणा मल्लवरो मुक्तं तु घस्त्राव
धि ॥ एलाभृंगसपत्रकेशरयुतं मांसीविडंगैर्युतं नागकृष्णाग्रंथिमिरम्लापूरकयुताजातीपट्टतां तथा चूर्णं श्लक्ष्णमिदं विधाय मधुयुता
संयोज्य निबंधना ॥ युक्तं खर्जूरिकासमं विधिरयं पाकस्य संसेवनात् ॥ पित्तस्यास्रविनाशनं कफहरं दृष्टिप्रदं पुष्टिदं ॥ वातस्य ग्रह
रं रसायनकरं कांतिप्रदं वाग्निदं ॥ गुल्मारोचकनाशनं कृमिहरं तृष्णापहं हृंहरं ॥ पाको भालुकिना विनिर्मितवरं वैद्याय मद्भूषणं ॥
खर्जूरपाकः ॥ ॥ इति अरोचकाधिकारः ॥ अथ छर्दि ॥ केशरं कोलमज्जाम्लवल्कपत्रसमासिकं ॥ पथ्यात्रुटिसितायुक्तां गुटिकां भक्षयेन्न
रः ॥ छर्द्यतीसारसमनं तृष्णादाहविनाशनं ॥ केशरादि ॥ ॥ इति छर्द्यधिकारः ॥ ॥ अथ तृष्णा ॥ वटशुंगरोहं मधुककुष्ठमुत्पलं सलाज
चूर्णं गुटिकां प्रकल्पयेत् ॥ मुसंहितानां वदनेन धारितं तृष्णाप्रवृद्धं शमयंति सत्वरं ॥ वटप्ररोहादि ॥ आम्लले कमलं कुष्ठं लाजाश्च वट
रोहकं ॥ एतच्चूर्णस्य मधुना गुटिकां कारयेन्मुखे ॥ तृष्णां प्रवृद्धां हंत्येष मुखशोषं च दारुणं ॥ आमलादि ॥ कुष्ठनीलोत्पलं लाजाय
ष्टिमधुकसंयुतं ॥ वटप्ररोहगुटिकां मुखशोषहरं परं ॥ कुष्ठादि ॥ इति तृष्णाधिकारः ॥ अथ मूर्च्छा ॥ कृष्णाशताह्वाशुंठीनां सामया
नां पलेपतं ॥ गुडस्य षट्पलान्येषां वटिका भ्रमशांतये ॥ कृष्णादि ॥ ॥ इति मूर्च्छाधिकारः ॥ अथ मदात्ययः ॥ कट्फलमुस्तकं शुंठी

माषैक्रमविवर्द्धितैश्च ॥ तत्सर्ववटविकृतंमुखवधतमग्रजगं धजं हन्ति कटुफलादि ॥ ॥ मदात्ययप्रसंगादहिफेनत्यागोपायमाह ॥
अश्वगंधामतालजामुस्ताधत्तूरपुष्पकं ॥ शरपुंखावृहद्दंडी व्याघ्रीसिंहिस्तथैव च ॥ पथक्पलंपलंचैवत्रिपलंकरवीरकं ॥ अष्टा
शेनकृतकाथोमृद्भांडेविपचेद्बुधः ॥ पश्चाद्यवानिकाचूर्णंपलषट्कंनियोजयेत् ॥ स्थापयेत्मृन्मयेभांडेपूर्वकल्केनभावयेत् ॥
कर्षार्द्धंजलसंयुक्तंतथात्रिदिवसेपिबेत् ॥ प्रातकालेनिशाभागेअहिफेनादिदोषहृत् ॥ दुग्धोदनंवपथ्यंचकक्षाराम्लंवर्जयेत् ॥
अश्वगंधादियोगोयंतत्क्षणात्त्रैलोककौतुकं ॥ एषाराजवतीविद्यापुत्रस्यापिनकथ्यते ॥ गुह्याद्गुह्यतरंगुह्यंमातगुह्यमिवाद्धतः ॥
अश्वगंधादि ॥ इतिमदात्ययाधिकारः ॥ अत्रवटकाधिकारेऽस्माद्अपस्मारः नास्ति ॥ ॥ अथवातव्याधि ॥ नागरंपिप्पलीचव्यं
पिप्पलीमूलचित्रकौ ॥ भृष्टहिंगुवजमोदाचसर्षपाजीरकद्वयं ॥ रेणुकेन्द्रयवापाठाविडंगंगजपिप्पली ॥ कटुकातिविषाभार्गीवचा
मूर्वेतिभागतः ॥ प्रत्येकंशाणिकानिस्युर्द्रव्याणिमानिविंशतिः ॥ द्रव्येभ्यनिखिलेभ्यश्चत्रिफलाद्विगुणाभवेत् ॥ एभिश्चूर्णीकृतैःसर्वैःस
मोदयत्तुगुग्गुलुः ॥ एकपिंडंततःकृत्वाधारयेत्घृतभाजने ॥ गुटिकाशाणमात्रास्तुःकृत्वाग्राह्यायथोचिता ॥ गुग्गुलुर्योगराजोयं
त्रिदोषघ्नोरसायनः ॥ मैथुनाहारपानानांनियमोनात्रविद्यते ॥ सर्वान्वातामयान्कुष्ठमर्शांसिग्रहणीगदः ॥ प्रमेहंवातरक्तंचना
भिशूलंभगंदरं ॥ उदावर्त्तक्षयंगुल्ममपस्मारंमुरोग्रहं ॥ मंदाग्निश्वासकाशोचनाशयेदरुचिंतथा ॥ रेतोदोषहरंपुंसांरजोदोषह

॥राम:॥
॥९३॥

रत्विपः॥ प्रसामप्रत्यजनकोवंध्मानांगर्भदस्तथा॥ रास्नादिक्काथसंयुक्तो विविधंहंतिमारुतं॥ काकोल्यादिशृतंपित्तंकफमारग्वधादि
ना॥ दार्वीशृतेनमेहांश्चगोमूत्रेणवपाण्डुता॥ मेदोवृद्धिश्चमधुनाकुष्टनिंवशृतेनच॥ छिन्नाक्काथेनवातास्रंशोथमूलकजा
ऋतां॥ पाटलाक्काथसहितोविषंमूषकजंजयेत्॥ त्रिफलाक्काथसहितोनेत्रार्तिंहंतिदारुणान्॥ पुनर्नवादिक्काथेनहन्या
त्सर्वोदराणिच॥ योगराजोगुग्गुलु॥ ॥ नागरंपिप्पलीमूलंचव्यमूषणाचित्रकं॥ भृष्टहिंग्वजमोदाचसर्षपोजीरकद्वयं॥ रेणुकेंद्र
यवैपाठाविडंगंगजपिप्पली॥ कटुकातिविषाभार्गीवचामूर्वासपत्रकं॥ देवदारुकणाकुष्टंरास्नामुस्ताचसेव्यच एलात्रिकंटकंप
थ्याधान्यकंचविभीतकं॥ धात्रीचत्वगुशीरंचयवक्षारोखिलान्यपि॥ एतानिसमभागानिसूक्ष्मचूर्णानिकारयेत्॥ यावंत्येतानिचूर्णा
नितावदेवात्रगुग्गुलुः॥ संमर्द्यसर्पिषापश्चात्सर्वंसंमिश्रयेच्चमत्॥ एकपिंडंततःकृत्वाधारयेत्घृतभाजने॥ गुटिकाःसूकमात्राःस्यु
खादिताश्चयथोचिताः॥ दोषकालानलापेक्षया॥ परिभाषाव॥ आदौशाणोन्मितंखादेत्ततःकर्षार्द्धमात्रकं॥ ततःकर्षमितंखादे
द्गुग्गुलुंक्रमतोनलः॥ दिनानांसप्तकेपूर्वेगुग्गुलोःशाणमाहरेत्॥ द्वितीयकर्षमर्द्धंतुपूर्णंकर्षंततःपरं॥ गुग्गुलुर्योगराजोयंमहा
न्मुख्योरसायनः॥ मैथुनाहारपानानांनियमोनात्रविद्यते॥ सर्वांवातामयान्हन्याशमवातमपस्मृतिं॥ वातरक्तंतथाकुष्टंत
थादुष्टव्रणानपि॥ अर्शांसिग्रहणीरोगंप्लीहगुल्मोदराण्यपि॥ आनाहंमंदमग्निंचश्वासंकाशमरोचकं॥ प्रमेहंनाभिशूलंच

॥ सात्म्यदः ॥ क्रिमिक्षयमरोग्रहं ॥ शुक्रदोषरजोदोषप्रदावर्त्तभगंदरं ॥ महायोगराजगुग्गुलुः ॥ पथ्यकपलांशास्त्रिफलापिप्पलीचविचूर्णिताः ॥ दश
॥ १४ ॥ मूलांबुनाभाव्यंत्वगेलार्द्धपलान्वितं ॥ दत्वापलानिपंचैवगुग्गुलोवटकीकृतः ॥ एवंमासंरसाभ्यासाद्धन्तिरोगानशेषतः ॥ हंतिसंध्यस्थि
मज्जास्थान्क्षिमिंद्राशनिर्यथा ॥ लेहवद्विगरोनाथमालोघ्यालोड्यवानये ॥ दशमूलांबुनाशोष्यःसप्तवारांश्चगुग्गुलुः ॥ आदित्य
पाकोगुग्गुलुवटकाः ॥ आभाश्वगंधाहवुषागुडूचीशतावरीगोक्षुरकंसरास्ना ॥ श्यामाशठीघोषवतीयवानीसनागराचेतिसमे
श्चचूर्णं ॥ तुल्यंभवेत्कौशिकमत्रमध्येदेयंतथासर्पिरतोर्द्धभागं ॥ अक्षार्द्धमात्रंतुततःप्रयोगात्कृत्वानुपानंसुरयाथयूषेः ॥ मध्ये
नवाकोष्णजलेनवाथक्षीरेणवामांसरसेनवापि ॥ कटिग्रहेगृध्रसिवाकुपृष्ठेहनुग्रहेजानुनिपादयुग्मे ॥ संधिस्थितेवास्थि
गतेववातेमज्जाश्रितेस्नायुगतेचपक्षे ॥ रोगान्जयेद्वातकफानुविद्धान् ॥ वातेरितान्हृद्ग्रहयोनिदोषान् ॥ भग्नास्थिविद्धेषुचवपंजवा ॥ रामः ॥
तेत्रयोदशांगंप्रवदंतिसिद्धाः ॥ त्रयोदशांगगुग्गुलु ॥ ॥ व्योषंसग्रंथिकपथ्याचिकंजीरकद्वयं ॥ अजमोदायवानीचवचाचव्या ॥ १४ ॥
मवलगुजं ॥ लवणानितथाक्षारौसमभागानिकारयेत् ॥ द्रव्याण्येतानियावंतितावंतंगुग्गुलुंशुभं ॥ पादार्द्धसम्मितंचात्रदातव्यंचा
म्लवेतसं ॥ गुटिकैषाहिनावातेसामेसंध्यास्थिमज्जगं ॥ दृढीकरोतिभग्नंचजठरानलदीपनं ॥ पूजितादेवदेवेनकालपादेनशंभु
ना ॥ स्वयंभुवोगुग्गुलुः ॥ ॥ शुक्लैरंडस्यमूलंचयुग्मंसहचरस्यच ॥ मुस्तादुरालभादीप्यादेवाह्वकटुकाशठी ॥ पंचकोलबला

पथ्याक्षडेढैचपुनर्नवा ॥ विवोग्रावाजिगंधाचशतावर्य्यावरूषकं ॥ धान्यच्छिन्नरुहाचैवविडंगंव्याधिघातकं ॥ गोक्षुरवृद्धदारुंचदीप्य
कोनिशियुग्मकं ॥ चतुस्त्रिंशतिकोयोग: पीतकोषिकसंयुतं ॥ शर्ववातविकारघ्न: पावनोदीपनोलघु: ॥ आमवातस्यशोथस्यस्रोत
सांकफनाशनं ॥ पंज्ञादिगुग्गुल: ॥ ॥ पथ्याविभीतामलकीफलानांशतंक्रमेणाच्छिन्नरुहाभिवृद्धं ॥ प्रस्थेनयुक्तंचपलैकयानांद्रोणे
जलेसंस्थितमेकरात्रे ॥ अर्द्धावशेषंक्वथितंकषायंभांडेपचेत्तन्पुनरेवलोहे ॥ अमूनिपश्चादवतार्यदद्याद्व्योषाग्निसंचूर्णपलार्द्धका
नि विडंगदंतीत्रिफलागुडूचीकृष्णात्रिवृन्नागरकोषणानि ॥ यथेष्टचेष्टस्यनरस्यशीघ्रंहिमांवुपानिचभोजनानि ॥ निषेव्यमाणोवि
निहंतिरोगान्व्याधीयुतान्गृध्रसिखंजनांश्च ॥ प्लीहानमुग्रंजठराणिगुल्मान्पांडुत्वकंडूवमिवातरक्तं ॥ पथ्यादियोगुग्गुलुरेषनाम्ना:
ख्यात:क्षितौवाप्रमितप्रभाव: ॥ वलेननागेन्द्रसमंमनुष्यंजयेनकुर्याद्धयतुल्यवेगं ॥ आयु:प्रकर्षंविदधातिसद्यश्चक्षुर्वलंपुष्टिकरो
विषघ्न: ॥ क्षतस्यसंधानकरोविशेषान्रोगेषुशस्तसकलेषुचैव ॥ पथ्यागुग्गुल: ॥ ॥ अजमोदायवानीचअजाजीकारवीतथा ॥ ना
लीशत्र्यूषणंमुस्तंकार्षिकान्युपकल्पयेत् ॥ षट्पलंगुग्गुलंचापिह्यथवागुडमेवच ॥ संधिमज्जगतेवापिस्नायुशिरागतेनिले ॥
गृध्रस्यांचामवातेचहनुस्तंभेपतानके ॥ अर्दितेवातरक्तेचऊरुस्तंभेहनुग्रहे ॥ पक्षाघातेकटिशूलेसर्वांगवायुपीडिते ॥ अग्निं
चकुरुतेदीप्तंसर्वेषांवातरोगिणां ॥ अजमोदादिगुग्गुल: ॥ ॥ रास्नायाश्चपलंचैकंपंचकर्षाणिगुग्गुलो: ॥ सर्पिषांगुटिकांकृ

त्वाखादेनागधसीहरं ॥ रास्नादिगुग्गुलः ॥ इति वातव्याध्यधिकारः ॥ ॥ अथ पित्तव्याधिः ॥ वासानिम्बपटोलत्रिफलाशमयायोजि
तं जयति ॥ अधिकफमम्लपित्तं प्रयोजितागुग्गुलु क्रमशः ॥ वासादिगुग्गुलुः ॥ ॥ कणाचूर्णस्य कुडवं षट्पलं हविषस्तथा ॥ शता
वरीरसस्याष्टौ पलान्यत्र प्रयोजयेत् ॥ खंड प्रस्थसमादाय क्षीरप्रस्थद्वये पचेत् ॥ त्रिजात मुस्त धान्याकं शुंठि वांसिडि जीरकं ॥ अभ
यामलकं चैव चूर्णं द्वादशमाषकं ॥ तदर्द्धं मरिचं नागं सारं खादिरमेव च ॥ मधुनस्त्रिपलं चैव प्रक्षिप्याथ प्रयोजयेत् ॥ कणापल ४ स
ितपल ६ शतावरीरसपल ८ खंडपल १९ गोदुग्धपल ३२ त्रिजात मुस्त· धान्याक· शुंठि· वंशलोचन· जीरक· कृष्णजीरक· पथ्या· आ
मलक· प्रत्येकं माष १२ मधुपल ३ पक्वा· मात्रा कर्ष २ शूलारोचकतृट्दाहछर्दिपित्ताम्लपित्तनुत् ॥ अग्निसंदीपनं हृद्यं खंडपिप्पलीसं
ज्ञका ॥ खंडपिप्पली ॥ शुंठीचूर्णस्य कुडवं खंडप्रस्थसमं भवेत् ॥ दत्वा द्वि कुडवं सर्पिः क्षीरप्रस्थत्रये पचेत् ॥ लेहवत्सारिते दद्याज्जात्री
धान्यकमुस्तकं ॥ अजाजीपिप्पलीवांसीत्रिजातं कारवी शिवा ॥ त्रिशाणं मरिचं नागं षराम्भासं च पृथक् पृथक् ॥ पलत्रयं च मधुना शीती
भूते प्रदापयेत् ॥ ततो मात्रां प्रयुंजीत ह्यम्लपित्तनिवृत्तये ॥ शूलहृद्रोगवमनैरामवातैश्च पीडितं ॥ शुंठीखंडः ॥ कुष्मांडस्य रसो ग्राह्यः प
लानां शतमात्रकं ॥ रसतुल्यं गवां क्षीरं धात्रीचूर्णं पलाष्टकं ॥ धात्रीतुल्या सिता योज्या गव्यमाज्यं पलद्वयं ॥ मंदाग्निना पचेत्सर्वं यावद्दर्वति
पीडितं ॥ पलार्द्धं कर्षमेवं वा प्रत्यहं भक्षयेदिदं ॥ खंडकुष्मांडकख्यातमम्लपित्ताहरं परं ॥ खंडकुष्मांडः ॥ धात्रीफलरसद्रोणो सर्करा

र्द्धेन लोघनं ॥ चतुः पलं त्वपत्रकानां पृथगर्द्धपलं क्षिपेत् ॥ वेल्लानलचतुर्जातयष्टीसैन्धवजीरकं ॥ पलांशं विश्वमरिचमञ्जीकायाश्चतुःपलं
प्रस्थं करागात्रितयोः प्रस्थपुष्परससपाव ॥ धात्रीफलरसपलः २५६ शर्करापल ५० घृतपल ४ विल्वचित्रक चातुर्जातः यष्टीमधुः
सैन्धवजीरकः पृथक् कर्ष २ शुंठी मरिच पृथक्पल १ द्राक्षापल ४ पिप्पलीपल १६ मधुपल ४८ मात्राकर्ष २।१ तत्खंडामलकं नाम
पांडुश्वपथुकामलौ ॥ शिरोभ्रमाम्लपित्तार्शप्लीहदाहांश्च नाशयेत् ॥ खंडामलकः ॥ ॥ कुंडवं नालिकेरस्य सूक्ष्मं दृषदि पेषितः ॥
शुंडं खंडस्य कुडवं सर्वमेतच्चतुर्गुणे ॥ आलोड्य नालिकेरस्य जलेन मृदग्निना पचेत् ॥ धान्यकं पिप्पलीमूलं चातुर्जातं सचूर्णितं ॥ शाला
प्रमाणां तत्तुल्यं शीति भूते क्षिपेद्बुधः ॥ नालिकेरकखंडोयं पुस्त्वनिद्राबलप्रदः ॥ अम्लपित्तक्षयश्वासं शूलं च परिणामजं ॥ नाशये
द्रक्तपित्तं च शुष्कं दावानलो यथा ॥ नालिकेरखंडः ॥ प्रस्थं तु नारिकेरस्य सूक्ष्मं दृषदि पेषितं ॥ निष्कुली कृत्य कुष्मांडखंडानां मर्द्दमा
रुकं ॥ तद्द्वयं भर्जयेद्रव्ये घृतेन कुडवोन्मिते ॥ ततस्तत्र क्षिपेत्कुडवं गोदुग्धं चाष्टकोन्मितं ॥ तत्रैव निक्षिपेद्द्व्यं सिताप्रस्थं द्वयोन्मितं ॥ प
चेत्सर्व्वाणि चैकत्र मृदुनावह्निना भिषक् ॥ सपक्वे शीतले तत्र चूर्णीकृत्य विनिक्षिपेत् ॥ सूक्ष्मैला धान्यकं धात्री पर्पटं वालकं जलं ॥ उ
शीरं चंदनं द्राक्षा शृंगाटककसेरुकं ॥ त्वक्पत्रकं समं चूर्णं कर्षयुग्मं पृथक्पृथक् ॥ सर्वं संमिश्रयेदेतद्भाजने मृन्मये नवे ॥ पलमा
त्रमिदं प्रातर्भक्षयेत्तद्यथाबलं ॥ एतन्निषेवितं हंति रोगानेतान्न संशयः ॥ अम्लपित्तज्वरं पित्तं रक्तपित्तमरोचकं ॥ वातरक्तं तथादा

हं पांडुरोगं सकामलं ॥ क्षयं क्षपयति क्षिप्रं शूलं च परिणामजं ॥ नालिकेरकखंडोयं मश्विभ्यां भाषितं पुरा ॥ वर्णादोहंहरो वल्यं पुंस्त्व
निद्राबलप्रदः ॥ बृहन्नारिकेलखंडः ॥ ॥ आर्द्रकप्रस्थमेकं स्याद्गोघृतं कुडवद्वयं ॥ गोदुग्धप्रस्थयुगलं तदर्द्धं शर्करामता ॥ पिप्प
ली पिप्पलीमूलं मरिचं विश्वभेषजं ॥ चित्रकं च विडंगं च मुस्तकं नागकेशरं ॥ त्वगेलापत्रकर्चूरं प्रत्येकं पलमात्रकं ॥ विधाय पाकं
विधिवत्खादेदेनस्पलोन्मितं ॥ इदमार्द्रकखंडाख्यं प्रातर्भुक्तं व्यपोहति ॥ शीतपित्तमुदर्दं च कोठमुत्कोठमेव च ॥ यक्ष्माणं र
क्तपित्तं च काशश्वासमरोचकं ॥ वातगुल्ममुदावर्त्तशोथं कंडूं कृमीनपि ॥ दीपयेदुदरं वह्निं बलं वीर्यं च वर्द्धते ॥ वपुपुष्टिं प्रकुरु
ते तस्मात्सेव्यमिदं सदा ॥ आर्द्रकखंडः ॥ गुडपिप्पलीपथ्याभिस्तुल्याभिर्मोदकः कृतः ॥ पित्तश्लेष्मापहः प्रोक्तो मंदमग्निं च
दीपयेत् ॥ गुडाद्यो मोदकः ॥ इति पित्तव्याध्यधिकारः ॥ अथ वातरक्तः ॥ सुदारु सैंधवक्षारं यवानी त्रूषणं वचा ॥ मुस्तं चाज
मोदा च त्रिफलाजीरकद्वयं ॥ विडंगाग्निनिशायुग्मं कार्षिकं सम ज्वालयो ॥ शार्करा गुग्गुलोश्चैव समभागानि कारयेत् ॥ सर्पि
षामर्द्धभागानि वातरक्तं गदे हितं ॥ हंति प्लीहोदरं यक्ष्म विषमज्वरनाशनं ॥ चित्रकाद्यप्रहरणं गृध्रसीगदजान्वित ॥ शार्क
रागुग्गुलः ॥ त्रिफलायास्त्रयः प्रस्था प्रस्थैकममृता भवेत् ॥ संक्षुद्य लोहपात्रे तु साईद्रोणांबुना पचेत् ॥ जलमर्द्धं शृतं ज्ञा
त्वा गृह्णीयाद्वस्त्रगालितं ॥ ततः क्वाथे क्षिपेकुद्धं गुग्गुलं प्रस्थसंमितं ॥ त्रिफलाद्विपलाज्येया गूडूचि पलिकामता ॥ षडक्षं त्रूषे

णां प्रोक्तं विडंगानां पलार्द्धकं ॥ दंती कर्षमिता कार्या त्रिवृत्कर्षमिता स्मृता ॥ ततः पिंडीकृतं सर्वं घृतपात्रे विनिक्षिपेत् ॥ गुटिका
शाणिका प्रोक्ता युज्याद्दोषाद्यपेक्षया ॥ अनुपाने भिषग्दद्यात्कोष्णनीरं पयोथवा ॥ मंजिष्ठादि शृतेनापि युक्तियुक्तं त्रिदोष
जं ॥ सर्वव्रणानि गुल्मांश्च प्रमेहपिटकांस्तथा ॥ प्रमेहोदरमंदाग्निकाशश्वयथुपांडुता ॥ हंति सर्वामयान्नित्यमुपयुक्तो रसाय
नं ॥ कैशोरकाभिधानोयं गुग्गुलुः कांतिकारकं ॥ वासादिनानेत्रगदगुल्मादिवहृणादिना ॥ क्वाथेन खदिरस्यापि व्रणान्कृ
त्स्नान्विनाशयेत् ॥ अम्लं तीक्ष्णमजीर्णं च व्यवायं श्रममातपं ॥ मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरसेवकः ॥ अत्र भीमविनोदे भा
वप्रकाशे च ॥ पारदगोरिरजसोः कज्जलीकां विल्वमाणमिति वदंति ॥ कैशोरगुग्गुलुः ॥ प्रस्थमेकं गुडूच्याश्च अर्द्धप्रस्थं गु
ग्गुलोः ॥ प्रत्येकं त्रिफलायास्तु तत्प्रमाणं विनिर्दिशेत् ॥ सर्वमेकत्र संकुद्य क्वाथयेन्नल्वणेभसि ॥ पादशेषं परिश्राव्य कषायं
ग्राहयेद्भिषक् ॥ पुनः पचेत्कषायं तु यावत्सांद्रत्वमागतं ॥ दंतीव्योषविडंगानि गुडूचीत्रिफलात्वच ॥ ततश्चार्द्धपलं चूर्णं गृह्णी
याश्च पलंपलं ॥ कर्षं तु त्रिवृतायाश्च सर्वमेकत्र चूर्णयेत् ॥ तस्मिन्सुसिद्धं विज्ञाय कवोष्णे प्रक्षिपेद्बुधः ॥ ततश्चाग्निवलं मत्वा दे
त्कर्षप्रमाणतः ॥ वातरक्तं तथा कुष्ठं गुदजान्यग्निसादनं ॥ दुष्टव्रणप्रमेहांश्च आमवातं भगंदरं ॥ नाड्याढ्यवातश्वयथुं स
र्वान्वातान्व्यपोहति ॥ अमृतादिगुग्गुलुः ॥ त्रिप्रस्थममृतायाश्च प्रस्थमेकं तु गुग्गुलोः ॥ प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थ

मेकं तु गुग्गुलोः ॥ प्रत्येकं त्रिफलाप्रस्थं वर्षाभूप्रस्थमेव च ॥ सर्वमेकत्र संक्षुद्य साधयेन्नल्वणोभसि ॥ पुनः पचेत् पादशेषं यावत्सां
द्रत्वमागतं ॥ दंतीचित्रकमूलानां कणाविश्वफलत्रिकं ॥ गुडूचीत्वग्विडंगानां प्रत्येकार्द्धपलं मतं ॥ गु कृत्वा कर्षमेकं तु सर्वमे
त्र चूर्णयेत् ॥ सिद्धमस्मे क्षिपेत्तं च अमृतागुग्गुलुः परे ॥ अतो यथाबलं खादेदम्लपित्तविशेषतः ॥ वातरक्तं तथा कुष्ठं गुद
जान्यग्निसादनं ॥ दुष्टव्रणप्रमेहाश्च आमवातं भगंदरं ॥ नाड्याढ्यवातं श्वयथुस्त्वात्सर्वामयास्तथा ॥ अश्विभ्यां निर्मित
श्चायं अमृताख्यो हि गुग्गुलुः ॥ द्वितीयामृताख्यगुग्गुलु ॥ ॥ प्रस्थत्रयं कषायस्य त्रिफलायाः सुचूर्णितं ॥ सौगंधिकं पलं चै
कं कौशिकस्य पलत्रयं ॥ अर्द्धं च चित्रतैलस्य सर्वमादाय यत्नतः ॥ पाचयेत्पाकविद्वैद्यः पात्रे लोहमये दृढे ॥ हंति वातं तथा पि
त्तं श्लेष्माणं खंजपंगुतां ॥ श्वासं सुदुर्जयं हंति कासं पंचविधं तथा ॥ कुष्ठानि वातरक्तं च गुल्मशूलोदराणि च ॥ आमवातज
येत्येनदपि वैद्यविवर्जितं ॥ सर्वदास्योपयोगेन जरापलितनाशनं ॥ स्वर्पिस्तैलरसोपेतमश्नीयाच्छालिषष्टिकं ॥ सिंहनाद
इति ख्यातो रोगवारणदर्पहा ॥ वह्निदीप्तिकरं पुंसां भाषितं दंडपाणिनां ॥ अत्राद्रुस्त्रिफलाक्वाथं पथक् त्रिपलसंयुते ॥
किंचित्रिणीति वैरंडस्नेहपाकेधिके श्वसः ॥ सिंहनादगुग्गुलुः ॥ ॥ त्रिफलानिविषादारुदार्वीमुस्ताटरूषकैः ॥ खदि
रामृतातिक्ताह्वगुडूचीत्वपपाद्पैः ॥ भूनिंबनिंबकटुकं कलिंगकुलकैः समैः ॥ क्वाथं कृत्वा ततः पूतं श्चतमष्टांगरोभसि ॥

गुडुच्यास्तत्वसंयुक्तं चूर्णमर्द्धं तु वारिणा ॥ सिद्धायसनूतने भांडे वासयेद्रजनीगतं ॥ सोमोपेतेन पूतेन कौसिकं परिभावयेत् ॥ षड्गुणे
न तु सप्ताहं शिलाजतु समन्वितं ॥ शुक्रस्य तु पलान्यष्टौ समावाप्य विचक्षणः ॥ ताप्यचूर्णपलं चैकं द्वे पले मधुसर्पिषोः ॥ एकी
कृत्य समं सर्वं लिह्यात्सत्रिफलां तु ना ॥ तनुनाम्लकटु पूर्वे न जांगलानां रसेन वा ॥ जीर्णे जीर्णे च भुंजीत पुराणं शालिषष्टिकं ॥
यथायथात्म्यरसैर्यूषैः क्षीरैश्च सत्कृतैः ॥ त्रिसप्ताहप्रयोगेन वातरक्तं सुदारुणं ॥ निहंति वीर्यतः क्षिप्रं कुचरोगाव्रणानपि ॥
मित्रं मित्रं च संधत्ते त्रिफलाख्यो हि गुग्गुलुः ॥ त्रिफलागुग्गुलुः ॥ ॥ गुग्गुलुस्त्वमृतावल्लीद्राक्षालुंगरसेन वा ॥ त्रिफलापा
रसैर्युक्ता गुटिका कोलसंमिता ॥ भक्षयेमधुनालिह्या क्रणकुर्वंति यत्फलं ॥ पादस्फोटं महाघोरं स्फुटं सर्वांगजं च यत् ॥ नस्य
र्वं नाशयत्याशु साध्यं चवातशोणिते ॥ अमृतादिगुग्गुलुः ॥ अष्टौपलान्यत्र फलं कषायाप्रस्थं पथक्कुद्रफलत्रयस्य ॥ दत्वाप
चेद्द्रोणयुगे जलस्य पादावशेषं पुनरेव वैद्यः ॥ दंतीत्रवृन्मूषणावारणीयविडंगमुस्तात्रिफलामृतानां ॥ कंदोग्रगंधाग्निकमान
कानां सपारदानां च सगंधकानां ॥ पलार्द्धमानप्रमितं सचूर्णं दद्याद्विपक्कं पुनरेव तत्र ॥ फलानि संचूर्ण्य च कान्तकानि सहस्रसं
ख्याकलितानि पश्चात् ॥ खादेत माषद्वितयं प्रभाते तोयादिकं देयमहो तुषार्तैः ॥ अमानिलं संधिगतं सशूलं शिरोगतं जानु
कटिस्थितं च ॥ अर्शांसि हन्ति विषमज्वरार्तिप्रमेहकुष्ठानि भगंदरं च ॥ हन्यान्नराणामिति सिंहनादो मेदोमरुच्छ्लेष्मगतान्गुरो

यं ॥ दाहोत्थं न प्रवृत्तिर्वा विकारात्योपि वेद्धकुः ॥ मक्तनं तत्तु नत्र भक्तं हितं तु भोजनं भवेत् ॥ उद्वर्तनं शीतजलं स्नानं च शयनं तथा ॥ रेवि
कानिशायं कुर्यात्सिंहनादेयं तु सुधी ॥ ज्ञात्वा बलं शरीरे तु दद्याद्देवन वा भिषक् ॥ तोयारतालयो क्षीरैः क्रमात्तक्रं विशुद्ध्यति ॥ पलंक
नकसंज्ञं तु कृत्वा चूर्णं ततः क्षिपेत् ॥ पलंकषाद्य गुग्गुलुः ॥ अथामवातः ॥ अजमोदा मरिचं पिप्पली विडंगं सुरदारु चित्रकशताह्वा
॥ सैन्धवपिप्पलीमूले भागा नवकस्य पलिकास्युः ॥ शुंठी दशपलिकास्यात्पलिनि तावन्ति वृद्धदारुकस्यापि ॥ पथ्यापलानि पंच स
वीनेकत्र कारयेच्चूर्णं ॥ समगुडवटकानदंतश्लक्ष्णं चूर्णं वा सुखाम्बु वारिणा पिवतः ॥ नस्यंत्यामानिलऽजाः सर्वे रोगाः सकटाश्च ॥ प्र
तितूनी च विश्वाची रोगाश्चान्ये गृध्रसी चोग्राः ॥ कटिवस्तिगुदस्फुटने चैवास्तिजंघयोस्तीव्रा ॥ श्वयथुं सर्वांगसंधिषु ये चान्ये वाम
वातसंभूताः ॥ सर्वे प्रयान्ति नाशं तम इव सूर्यांशुविध्वस्तं ॥ शुक्रोधनमरोगत्वं स्थिरयौवनं वलीपलितनाशनं ॥ कुरुते च सदाभ्यासा
न्नगराणान्यांस्तथा वकुन ॥ ॥ अजमोदादिवटका ॥ चित्रकं पिप्पलीमूलं यवानी कारवी वचा ॥ विडंगमजमोदा च जीरकं सुर
दारु च ॥ चव्येला सैन्धवं कुष्ठं रास्नागोक्षुरधान्यकं ॥ त्रिफला मुस्तकं व्योषं त्वगुशीरं यवासकं ॥ तालीसपत्रं पत्रं च सूक्ष्मचूर्णानि का
रयेत् ॥ यावन्त्येतानि चूर्णानि तावन्मात्रं तु गुग्गुलुः ॥ संमर्द्य सर्पिषा गाढं स्निग्धे भांडे निधापयेत् ॥ अतो मात्रां प्रयुंजीत यथेष्टाहारवान
पि ॥ आमवाताढ्यवातादीन्कृमिंदुष्टव्रणानपि ॥ प्लीहगुल्मोदरानाहदुर्नामानि विनाशयेत् ॥ अग्निं च कुरुते दीप्तं तेजो वृद्धिं बलं त

था ॥ वातरोगान् जयेत्सर्वं संधिमज्जगतानपि ॥ योगराजगुग्गुलुः ॥ ॥ त्रिकटु त्रिफला कुष्ठ पटोल कटुकामृता ॥ सूक्ष्मैला गंधकं रास्नाम श्वगंधा सगोक्षुरं ॥ एतानि समभागानि सूक्ष्म चूर्णानि कारयेत् ॥ गुग्गुलु पाक संभूतं चूर्णमेतन्निधापयेत् ॥ एरंडतैल संमिश्रं वटिका कोलमात्रकं ॥ भक्षयेत्स्वत्यहं प्रातस्तोयानुपानत ॥ आमवातं कटीशूलं गृध्रसीं खंजपंगुतां ॥ वातरक्तं सशोथं च सदाहं क्रोष्टुशीर्षकं ॥ शमयेत्कृतसोऽत्यर्थमपि वैद्यविवर्जितः ॥ वातारिगुग्गुलुः ॥ ॥ व्योषसग्रंथिकं पथ्याचित्रकं जीरकद्वयं ॥ अजमोदा यवानी वचा सैंधव पौष्कलं ॥ लवणानि त्रितयं क्षारौ समभागानि कारयेत् ॥ द्रव्याणेतानि यावंति तत्समो गुग्गुलुर्मतः ॥ पादार्द्धं निर्मितं चात्र योजयेद क्लचेतसं ॥ गुटिका हितवाते सामे संधिस्थिते तथा ॥ दृढीकरोति भग्नं च जठरानलदीपनम् ॥ पूजितो देवदेवेन शंभुना कालहारिणा ॥ व्योषादिगुग्गुलु ॥ नागरस्य पलान्यष्टौ घृतस्य पलविंशति ॥ क्षीरद्विप्रस्थसंयुक्तेरंडस्यार्द्धशतं पचेत् ॥ व्योषत्रिजातकं द्राक्षा प्रत्येकं च पलं पलं ॥ विदव्याश्चूर्णितं तत्र स्वादेद्दग्निबले प्रति ॥ क्षीरद्विप्रस्थसंयुक्तेरंडस्याग्निशतं पचेत् ॥ आमवातप्रशमनं बलपुष्टिविवर्द्धनं ॥ वल्यमायुष्यमोजस्यं वलीपलितनाशनं ॥ शुंठीखंडः ॥ रसोनस्य शतं क्षुण्णं तदर्द्धलं वितास्त्रिलान् ॥ पात्रे तु गव्यतक्रेणापि पिष्टैर्द्रव्यैः समं पचेत् ॥ त्रिकटु धान्यकं चव्यं चित्रकं हस्तिपिप्पली ॥ अजमोदा त्वगेला च ग्रंथिकं च पलांशिकं ॥ सर्करायाः पलान्यष्टौ पलांशं मरिचस्य च ॥ कूष्मजाज्योश्च चत्वारि माक्षिकस्य गुडस्य च ॥ आर्द्रकस्य च चत्वारि सर्पिषोष्टौ पलानि च ॥ तिलतैलस्य तावंति शुक्रकस्य च विंशतिः ॥ सिद्धार्थकस्य चत्वारि राजिकायास्तथैव च ॥ कर्षप्रमाणा

॥ सात्सद· ॥
॥ ९९ ॥

दानव्योहिंगुलवरापंचकं ॥ एकीकृत्य समे भांडे धान्यमध्ये निधापयेत् ॥ द्वादशाहात्समुद्धृत्य ततः खादेद्यथाबलं ॥ सुरासौवीरकं सिंधु
मद्यं वापि पिबेन्नरः ॥ जीर्णे पथ्ये मितं भोज्यं दधि पिष्टं विवर्जयेत् ॥ एकमासप्रयोगेन सर्वान्व्याधीन्नियच्छति ॥ अशीतिवातजान्रोगान्श्च
त्वारिंशच्च पैत्तिकान् ॥ विंशतिं श्लेष्मजांश्चैव प्रमेहांश्चैव विंशतिः ॥ उदगंरापष्टवर्शांसि गुल्मपंचविधं तथा ॥ अष्टादशविधं कुष्ठं क्षयरोगं ह
रं परं ॥ अपथ्यं योनिशूलं च रोगान्सर्वान्व्यपोहति ॥ च्युतसंध्यस्थिभग्नानां संधानं केवलं भवेत् ॥ दृष्टिवर्णीकरं वृष्यं सायुष्यं बलवर्द्ध
नं ॥ बृहद्रसोनपिण्डः ॥ क्षारां रसोनपलशतं मसितानां तिलानां पलानि पंचाशत् ॥ घृतलिप्तभाजनस्थं तक्रेण समेन कुर्यात् ॥
विंशतिपलानि तक्रासगुडार्द्रकमातुलुंगमेतावत् ॥ तिलतैलानि च तावन्तिवात्र सर्पिषो दद्यात् ॥ शतपुष्पा गजपिप्पली दाडिमवृक्षाम्ल
धातकीमुस्तं ॥ ऊषणाकुष्ठयवानीद्राक्षाशैलासजीरकचित्रकया ॥ सुरदारुसिंधुसविड्सौवर्चलरोमकं च ॥ पलसमितानि कृत्वा श्लक्ष्णचूर्णं
वदापयेन्मतिमान् ॥ आलोड्य धान्यराशौ सप्ताहात्तान्यसेच्च कृतरक्षः ॥ उद्धृत्य दत्तसिद्धं शुभतिथिमुहूर्ते शुभनक्षत्रे ॥ त्वक्पत्रैलाकेशर
कर्पूरलवंगजातीचूर्णेन ॥ सुरभीकृतेतीरंभः खादेद्द्विपलोन्मितपिण्डः ॥ अत्यर्थाम्लिविवर्जितन्नृषितश्च पिबेत्सुरा यथेष्टं ॥ अमृता
दप्यमृताख्योयं रसोनपिण्डः पराशरेणोक्तः ॥ हतपतितच्युतभग्नसंधिविश्लिष्टास्थिभग्नदेहानां ॥ अस्मात्परा नराणां न ह्यस्ति भिषग्जितं
वनान्यत् ॥ बलवर्णवह्निजननं स्मृतिमेधावृद्धिवर्द्धनं धन्यं ॥ समयति सर्वविकारान् शतसोन्यैर्भेषजैरजिंतान् ॥ अमृतरसोनपिण्डः ॥

राम:
९९

इत्यामवाताधिकारः ॥ अथ शूलः ॥ हिंगुसचित्रककुष्ठयवक्षारोथसैन्धवं ॥ हिंगुसौवर्चलंपाठाद्वौक्षारौलवणात्रयं ॥ चूर्णीकृतंविधातव्यमि
षजांलेश्नैरपि ॥ हृच्छूलेपार्श्वशूलेचमन्यास्तंभेचदारुणे ॥ प्रयोज्यंकुक्षिशूलेचभिषजासिद्धिमिच्छता ॥ हिंग्वादि ॥ शंबूकत्र्यूषणंचैव
लवणानिचपंचच ॥ प्रातर्भोजनकालेचभक्षयेत्तुयथाबलं ॥ शूलाद्विमुच्यतेजंतुःसकफात्परिणामजात् ॥ शंबूकादि ॥ ॥ विडंगतंडु
लव्योषत्रिवृद्दंतीसचित्रके ॥ सर्वाण्येतासमाहृत्यश्लक्ष्णचूर्णानिकारयेत् ॥ गुडेनमोदकान्कृत्वाभक्षयेत्प्रातरुत्थितः ॥ पीतेनु
दद्यादग्नि ---- प्रवर्द्धनः ॥ जयेत्त्रिदोषजंशूलंपरिणामसमुद्भवम् ॥ विडंगादिमोदकः ॥ खिन्नंपीडितकुष्मांडंतुलार्द्धं
भृष्टमाज्यतः ॥ प्रस्थार्द्धखंडतुल्यंचपचेदामलकीरसे ॥ प्रस्थेसुस्विन्नकुष्मांडरसप्रस्थंचघट्टयेत् ॥ दर्व्याप्रचालयेत्तास्मिंश्चूर्णीकृत्य
निक्षापयेत् ॥ द्वेद्वेपलेकणाजाजीशुंठिमांमरिचस्यच ॥ पंक्तिशूलंनिहंत्येतद्दोषत्रयकृतंश्चयत् ॥ छर्द्यम्लपित्तमूर्छांचकाशश्वासावरो
चकं ॥ हृच्छूलंरक्तपित्तंचपक्षशूलंचनाशयेत् ॥ रसायनमिदंश्रेष्ठंखंडामलकसंज्ञकंः ॥ खंडामलकं ॥ दीप्यकंसैन्धवंपथ्याना
गरंशंखचूर्णकं ॥ मरिचंपिप्पलीशुंठीविडंविजयमुस्तकं ॥ चित्रकंधान्यकंधात्रीजंतुघ्नंचाहिफेनकं ॥ वटिकोह्मोदकेनैवसर्वशू
लनिवारणः ॥ अग्निमांद्यमजीर्णंचवातपित्तभवान्गदान् ॥ ग्रहणीमामवातंचहृहच्छुरववटिंहिता ॥ शंखवटिका ॥ एकएवकुवेराक्ष
हंतिशूलशतत्रयं ॥ किंपुनर्लशुनोपेतंहिंगुसैन्धवनागरैः ॥ कुवेराक्षवटि ॥ ॥ कर्षैकंचकुवेराक्षंकर्षैकंचमहौषधं ॥ सौवर्चलंचक

र्षार्द्धं कर्षार्द्धमष्टहिंगुलं ॥ शिग्रुमूलरसेनैव रसोनस्य रसेन वा ॥ पिष्ट्वा सर्वप्रयत्नेन स्वच्छांगारे विपाचयेत् ॥ भुक्त्वा तेन विनश्यन्ति शूलमष्ट
विधस्तथा ॥ कुबेराक्षवटिका ॥ इति शूलाधिकारः ॥ अथानाह ॥ त्रिवृत्कृष्णा हरीतक्यो द्वित्रिः पंचभागिका ॥ गुटिका गुडतुल्यास्ता
विड्विबंधगदापहा ॥ त्रिवृतादिगुटिका ॥ इत्युदावर्त्तानाहाधिकारः ॥ अथगुल्माः ॥ त्रिवृतायाः फलं कर्ष्यास्त्रिकर्षीश्चैव हिंगुलः ॥ प
लं च लवणानां च यवक्षारपलं तथा ॥ शठ्याः पुष्करमूलस्य दंती चित्रकयोरपि ॥ द्वे द्वे पले तथा शुंठ्या द्वे पले चाम्लवेतसात् ॥ यवा
न्याजाजिमरिचं धान्यकं गिरिकर्णिकां ॥ उपकुंचीकाजमोदा च कुर्यादर्द्धपलोन्मितान् ॥ हरीतकि पले द्वे च विडंगं दाडिमं तथा
मातुलंगरसेनैता गुटिकाकारयेद्भिषक् ॥ त्रिवृतापल १ हिंगुकर्ष ३ त्रिलवणपल १ यवक्षारपल १ शठी पुष्करमूल दंती चित्र
क· प्रत्येकं पले २ शुंठिपल २ अम्लवेतस यवानी· जीरक· मरिच · धान्यकं अपराजिता· उपकुंचिका ·अजमोदा· प्रत्येकं कर्ष २
हरीतकी पल २ दाडिमपल २ ॥ मातुलुंगरसेन गुटिका बदरास्थिमिता कार्या ॥ तासामेकां पिबेद्वत्ति स्त्रावापि सुखांबुना ॥
अम्ले मद्ये श्वपानव्या घृतेन पयसापि वा ॥ एताः कांकायनः प्राह गुटिका गुल्मभेदिकाः ॥ अर्शोहृद्ग्रहणीदोषा कृमिणां च वि
नाशिका ॥ गोमूत्रेणानिहन्त्युश्च श्लेष्मगुल्मचिरोत्थितः ॥ क्षीरेणापित्तगुल्मं तु मद्येन श्लेष्मवातिकं ॥ त्रिफलारसमूत्राभ्यां नियतं
सान्निपातिकं ॥ रक्तगुल्मं च नारीणां पयसा चैव नाशयेत् ॥ कांकायनवटी ॥ ॥ हिंगुत्रिकटुचव्याजमोदाधान्याजगंधादाडिम

तिंतिडीकपाठाचित्रकचव्यसैन्धवंविडसौवर्च्चलंयवक्षारंस्वर्जिकापिप्पलीमूलाम्लवेतसशठीपुष्करंहपुषाजाजीपथ्यासंचूर्ण्यमातु
लुंगाम्लेनवहुशपरिभाव्याक्षमात्रागुटिकाःकारयेत्॥ ततःप्रातरेकैकांभक्षयेत्एषखलुयोगोगुल्मश्वासकाशारोचकहृद्रोगाध्मा
नपार्श्ववस्तिशूलानाहमूत्रकृच्छ्रार्शप्लीहपांडुरोगानपहंतितृनीप्रतून्योश्चात्यर्थमुपजायते॥ **हिंग्वादिवटी** ॥ ॥भार्गीरसांज
नंव्योषंगुडेनगुडिकांचरेत्॥तिलक्वाथेनतत्पीत्वागुल्मंलोहितजंजयेत्॥ **भार्ग्यादि**॥ भार्गीकृष्णाकरंजंचग्रंथिकामलदारुच
॥गुडंतिलानांक्वाथेनपीतंगुल्मरुजापहं॥ **भार्ग्यादि**॥ **इतिगुल्माधिकारः**॥ **अथहृद्रोगः**॥पिप्पल्येलावचाहिंगुयवक्षारोथसै
न्धवं॥सौवर्च्चलमथाशुंठीचाजमोदाविचूर्णितः॥सर्पिषावटिकांकृत्वाएकैकांभक्षयेन्नरः॥ **अस्यानुपानंच**॥पलधान्याम्लकोल
त्थदधिमद्यासवादिभिः॥पाययेत्कुष्ठदेहंचस्नेहेनान्यतमेनवा॥काशश्वासानिलहरंशूलहृद्रोगनाशनं॥ **पिप्पल्यादिवटि**॥ ॥
इतिहृद्रोगाधिकारः॥ **अथमूत्रकृच्छ्र**॥ त्रिकटुत्रिफलामुस्तंगुग्गुलंचसमाक्षिकं॥गोक्षुरक्वाथसंयुक्तंगुटिकांकारयेद्बुधः॥प्रमेहं
मूत्रकृच्छ्रंचमूत्राघातंतथैवच॥अस्मरीप्रदरंचैवनाशयेदविकल्पतः॥ **त्रिकट्वादिगुग्गुलुः**॥ कर्पूरचंदनोशीरयावशूकशिलाजतु
॥ पाषाणभेदस्थूलैलाःपटोलंमुस्तधान्यकं॥ द्राक्षापर्पटकंयासरक्तचंदनमुत्पलं॥ वासाह्रीवेरगोकंटमेतत्कर्षमितंपृथक्॥सि
द्धिकुडवंनीत्वाशनैःमृद्वग्निनापचेत्॥मूत्ररोगेषुसर्वेषुरक्ताश्रितेसवेदने॥पित्तोत्तरेषुमेहेषुमूत्रमाविश्यशोधकृत्॥मुस्तैकैविं

शतिदिना द्राघवं जायते नराणां ॥ कर्पूररसः ॥ इति मूत्रकृच्छ्रमूत्राघाताधिकारः ॥ अथाश्मरी ॥ पाषाणभेदवृषकीश्वदंष्ट्रापाठाभया
व्योषशठीनिकुंभाः ॥ हिंस्राखराश्वासितिमारकाणामेवारुकाच्चत्रपुषाच्चवीजं ॥ उंकचिकाहिंगुसवेतसाम्लं स्याद्बृहत्योहतुषाव
चाव ॥ चूर्णं गुडं वाश्मरिभेदि पक्वं सर्पिश्च गोमूत्रचतुर्गुणेन ॥ पाषाणभेदादि ॥ ॥ नोजगंधक्षिमिमिर्घनेस्तुतरुणां स्निग्धं शुचि
स्थानजं प्रक्षेप्य रापनिरिक्षिते चरुणाकं दग्ध्वा तु लांग्याहरयेत् ॥ संग्रह्यांस्तु चतुर्गुणाम्भविपचेत्पादावशेषं जलं तत्तुल्येन गुडेन वै
हटतैरभांडेप्पचेत्पुनः ॥ ज्ञात्वैवं गुडवन्नानारूपरिणते प्रत्येकमेषां पलं शुंठ्या धात्रकीवीजगोक्षुरकणापाषाणभिद्धीनलांकु
ष्मांडीत्रपुषाक्षवीजकतटीश्रीचव्यसोभांजनैडाक्षैलागिरिजाभयाकृमिहृत्ताचूर्णीकृतानां क्षिपेत् ॥ पथ्याशी प्रतिवासरं गुडम
मुं यो जंप्रमाणं नरः खादेत्तस्य समस्तदोषजनिताश्मर्यपनिकृन्तते ॥ वरुणकगुडः ॥ इत्यश्मर्यधिकारः ॥ अथ प्रमेहः ॥ अहानि विंश
तिसंख्यानि पलान्यानीयगोक्षुरोः ॥ विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योर्द्धशोषितः ॥ ततः पुनः पचेत्तत्र पुरं सप्तपलं क्षिपेत् ॥ गुडपाक
समाकारं ज्ञात्वा तत्र निक्षेपेत् ॥ त्रिकटु त्रिफला मुस्तं चूर्णितं पलसप्तकं ॥ ततः पिंडीकृतस्यास्य गुटिकाः परिकल्पयेत् ॥ हन्यात्प्रमे
हं मूत्रकृच्छ्रं प्रदरं मूत्रघातकं ॥ वातास्रं वातरोगं च शुक्रदोषं तथाश्मरी ॥ गोक्षुरादिगुग्गुलुः ॥ त्रिकटु त्रिफला पाठा मूलं सोभांजनस्य
च ॥ विडंगं तंडुला हिंगु तथा कटुकरोहिणी ॥ बृहती कंटकारी च हरिद्रे द्वयवानिका ॥ केवुकं शालपर्णी च तथातिविषचित्रको ॥ सो

वर्वलं जीरकं च हवुषा धान्यमेव च ॥ एषा कर्षप्रमाणं च श्लक्ष्णचूर्णं च कारयेत् ॥ यवशर्क्रपलानां च नवनितिद्वितयाधिका ॥ घृतं तैलं लेनमधुना प्रत्येकं च पलानि षट् ॥ एभिः कर्षप्रमाणं च प्रत्यहं मोदकं सुधी ॥ भक्षयेन्नाशयेदुग्रा प्रमेहान् विंशति दारुणान् ॥ प्रमेहान्मूत्रवांताश्मकृच्छ्राण्यर्शांसि कामलान् ॥ प्लीहपाण्ड्वामयः शोथोमूत्रकृच्छ्रमरोचकं ॥ हृद्रोगोराजयक्ष्मा च कासश्वासोगलग्रहः ॥ क्रिमयोग्रहणी दोषाः श्वैत्र्यं स्थौल्यमतीव च ॥ नराणां दीप्यते चाग्निः सुखनिवृद्धिश्च जायते ॥ अभयादिमोदकं ॥ इति प्रमेहाधिकारः ॥ अथ मेदः ॥ अमृता त्रुटि वेल्लवत्सकं कलिंगपथ्यामलकानि गुग्गुलुः क्रमवृद्धमिदं मधु[illegible]तं पीडकास्थौल्यभगंदरं जयेत् ॥ अमृताद्यो गुग्गुलुः ॥ ऊषणाग्नि घवेल्लवचाभिर्भक्षयेत्समधुभिः महिषाक्षं ॥ आशु हन्ति कफमारुतमेदोदोषजान्बलवतां हि विकारान् ॥ अष्टांगगुग्गुलुः ॥ व्योषाग्नित्रिफलामुस्ताविडंगैर्गुग्गुलुसमं ॥ खादन्सर्वाञ्जयेद्व्याधीन्मेदश्लेष्मामवातजान् ॥ नवकगुग्गुलुः ॥ ॥ इति मेदाधिकारः ॥ अथोदरः ॥ त्रिपलमभयाफलानां पलत्रयं त्रिकटुकात्पलं मूलात् ॥ दीप्यकचविकाचित्रकविडंगवृक्षाम्लसैन्धवं वचार्द्धपलैः ॥ त्वक्पत्रैलाकर्षैस्त्रिभिर्युतं चूर्णितं सूक्ष्मं ॥ त्रिंशद्गुडस्य पलशतानां हि तत्कर्त्तव्यास्त्वक्षमितावटिका ॥ अभयावटकानाम्ना प्लीहगुल्मजठरापहा ॥ पाण्ड्वामयकामलिनां मंदाग्निनाशनसर्वदासक्ता ॥ मूलोक्त· ग्रंथिक अभयामोदक ॥ भल्लातकाभयाजाजीगुडेन सह मोदकः ॥ सप्तरात्रान्निहंत्युग्रं प्लीहानमतिदारुणं ॥ भल्लातकमोदकः ॥ मानभागैमिः तावोसा

स्थिराचित्रकसैन्धवं ॥ नागरंत्रिफलैरंडं प्रत्येकं तु त्रिकार्षिकं ॥ विडंसौवर्चलंक्षारोपिप्पल्यश्चापिकार्षिका ॥ एतच्चूर्णीकृतंसर्वं गो
मूत्रस्याढकंपचेत् ॥ सांडीभूतेगुडेकर्षौ दत्वात्रिपलमाक्षिकं ॥ यकृत्प्लीहोदरहरंगुल्मार्शोग्रहणीहरं ॥ योगंपरिकरोनाम्ना व
ह्निसंदीपनंपरं ॥ मानोच्च·मानकंदः ॥ मारणाकगुटिका ॥ क्षारंवाजकरीषाणांस्नुतंवस्त्रेणगालयेत् ॥ कार्षिकंपिप्पलीमूलंपं
चैवलवणानिच ॥ पिप्पलीचित्रकंशुंठीफलान्हृतावचा ॥ द्वौक्षारौसानलादंतीस्वर्णक्षीरीविषाणिका ॥ कोलप्रमाणांव
टिकांपिबेत्सौवीरसंयुतां ॥ स्वपथोवथवक्रेचप्रवृद्धेतूदकोदरे ॥ क्षारगुटिका ॥ इत्युदराधिकारः ॥ अथशोथः ॥ द्विपंचमू
लस्यपचेत्कषायेकंसेभयानांचशतंगुडाच ॥ लेहेसुसिद्धेविनिधायचूर्णंव्योषंत्रिसौगंध्यमुपस्थितेच ॥ प्रस्थार्द्धमात्रंमधुनःसु
शीतेकिंचिच्चचूर्णादपियावशूकात् ॥ दशमूलपल ६४ जलपल २५६ शेषपल ६४ हरीतकीपल १०० गुडपल १०० लेहंविधा
यतत्र त्रिकटु·त्रिसुगंधिः प्रत्येकंपल १ मधुपल ६२ यवक्षारकर्ष ॥ मात्राहरीतकी १ लेहश्च·केचित्तु·हरीतकीअर्द्धमितिवदंति
॥ एकाभयांप्राश्यततश्चलेहाच्छुक्तिनिहंतिश्वयथुप्रवृद्धः ॥ श्वासः ज्वरारोचकमेहगुल्मंप्लीहप्रदोषोदरपांडुरोगान् ॥ कार्श्या
मवातावम्गाम्लपित्तंवैवर्ण्यमूत्रानिलशुक्रदोषान् ॥ कंसहरीतकी ॥ दशमूलकषायस्यकंसेपथ्याशतंगुडात् ॥ तुलांपचेत्
नेदद्याव्योषक्षारश्चतुःपलं ॥ त्रिजातकंतुवर्णांसंप्रस्थार्द्धमधुनोहिमे ॥ दशमूलहरीतक्याशोथान्निघ्नंतिदुस्तरान् ॥ ज्वरा

रोचकगुल्मार्शोमेहं पांडुदरामयान् ॥ श्वासकार्श्यामवातास्रपित्तं वह्नेश्च मंदतां ॥ दशमूलहरीतकी ॥ ॥ इति शोथाधिकारः ॥ अथ गंडमाला ॥ कांचनारस्य गृह्णीयात्वचं पंचपलोन्मितं ॥ नागरस्य करणायाश्च मरिचस्य पलं पलं ॥ पथ्याविभीतधात्रीणां पलमर्द्धं पृथक्पृथक् ॥ वरुणास्याक्षमेकं च पत्रकेलात्वचं पुनः ॥ टंकटंकं समादाय सर्वाण्येकत्र चूर्णयेत् ॥ यावच्चूर्णमिदं सर्वं तावन्नेवात्र गुग्गुलुः ॥ संकुट्य सर्वमेकत्र पिंडं कृत्वा विधानतः ॥ गुटिकां शाणिकां कृत्वा प्रभाते भक्षयेन्नरः ॥ गंडमालां जयेत्युग्रामपचीमर्बुदानि च ॥ ग्रंथिव्रणानि गुल्मांश्च कुष्ठानि च भगंदरान् ॥ प्रदेयं चानुपानार्थं क्वाथो मुंडितिकाभवः ॥ क्वाथः खदिरसारस्य क्वाथः कृष्णाभयाभवः ॥ कांचनारगुग्गुलुः ॥ त्रिफलायाः कृतादंती नीलिनी चतुरंगुलैः ॥ पंचविंशति संख्यानि प्रत्येकं पलमात्रया ॥ क्वाथितेकुट्टितैरेतैश्चतुर्द्रोणप्रमाणतः ॥ पचेत्तु सलिले तावद्यावद्द्रोणावशेषितं ॥ पंचाशत्तत्र निक्षिप्य गुग्गुलोस्तु पलान्यपि ॥ क्वाथयेद्द्विपलं पूतं पुनस्तत्सर्वं व न्यसेत् ॥ ततस्तस्मिन् घनीभूते त्वगेलानागकेशरं ॥ त्रिकटुत्रिफलापत्रं यवानीक्षीरकानि च ॥ पिप्पलीमूलवद्रोहृषाकृष्णजीरकं ॥ वाषिकामाजमोदा च त्रिवृड्डीकाम्लवेतसैः ॥ सौवर्चलं पुनः कृत्वाश्लक्ष्णाचूर्णं विनिक्षिपेत् ॥ प्रत्येकं सार्द्धपलिकैः भागैः सम्यग्विवक्षणः ॥ ततोक्षमात्रां गुटिकां भक्षयेत्तां दिने दिने ॥ गंडमालार्बुदं ग्रंथिमूरुस्तंभं तथार्दितं ॥ अनेन विधिनानेन गिरिजं वा प्रयोजयेत् ॥ त्रिफलायोगगुग्गुलुः ॥ शिलाजतुश्च ॥

त्रिफलायास्त्रयो भागा व्योषं तद्विगुणं भवेत् ॥ तस्माद्विगुणं देयं कांचनारस्य वल्कलं ॥ एकीकृतेन चूर्णेन समो देयोथ गुग्गुलुः ॥
क्षौद्रस्य च ततो दद्याद् द्वादश भागान्विचक्षणः ॥ नाडीदुष्टास्तु सर्वास्तु गंडे दुष्टे तथैव च ॥ सर्वास्तु गंडमालासु गुटिके यं प्रशस्यते ॥ ल
घुस्त्रिफलायोगगुग्गुलुः ॥ ॥ इति गलगंडमालाद्यधिकारः ॥ अथार्बुदः ॥ कुम्भाचित्रकदंतीनां कर्षमर्द्धपलद्वये ॥ विंश
तिस्त्वक्हरीतक्योगुडस्य तु पलद्वयं ॥ मधुना सह संयुक्तं श्लीपदं हंति दारुणं ॥ ॥ कुम्भामोदकं ॥ निर्गुंडीनितिन्तिडीकं शिखिमं
थं दलं पुनर्नवाम् ॥ भित्वा पाषाणनां गोक्षुरकः पारिभद्रत्वक् ॥ एतैः पलांशैर्यो राशिस्तस्माद्विगुणखलिः ॥ तैलेन सर्षपाच्चे
कीकृत्य बुद्धिमान् ॥ शालेर्मंडलवद्ध्यासप्तरात्रे स्थिते घटे ॥ ततः सर्षपतैलेन पिबेत्कर्षप्रमाणतः ॥ जीर्णे भुंजीत शाल्यन्नं मृ
गानां पक्षिणां रसैः ॥ पंचाशद्वर्षजातं च जातांकुरमपि ध्रुवं ॥ त्रिसप्ताहाजयेत्येष श्लीपदं नात्र संशयः ॥ निर्गुंड्यादि ॥ गंधर्व
हस्ततैलं सिद्धां हरीतकीं गोजलेन यः पिबति ॥ श्लीपदबंधविमुक्तो भवत्यसौ सप्तरात्रेण ॥ गोमूत्रहरीतकी ॥ ॥ इति श्लीप
दाधिकारः ॥ अथ व्रणाः ॥ विडंगत्रिफलाव्योषचूर्णं गुग्गुलुना समं ॥ सर्पिषा वटकान्कृत्वा खादेद्वा हितभोजनः ॥ दुष्टव्रणा
पचीमेहकुष्ठनाडीविशोधनः ॥ विडंगादिगुग्गुलु ॥ ॥ अमृतापटोलमूलं त्रिफलात्रिकटुक्रिमिघ्नानां ॥ समा भागानां चूर्णं
सर्वसमो गुग्गुलोभागः ॥ प्रतिवासरमेकैकां खादेद्दथाक्षपरिमाणां ॥ जेतुं व्रणवातासृग्गुल्मोदरश्वयथुपांडुरोगादीन् ॥ ॥

त्रिफलाचूर्णतुल्यांशो गुग्गुलुवटकीकृतः ॥ निर्यंत्रणोविवंधघ्नोव्रणशोधनरोवणः ॥ त्रिफलागुग्गुलुः ॥ ॥ त्रिकटुत्रिफलामुस्तं
विडंगामृतचित्रकं ॥ पटोलपिप्पलीमूलं हपुषासुरदारु च ॥ तुंवुरुपुष्करं चव्यं विशाला रजनीद्वयं ॥ विडसौवर्चलं क्षारौ सैन्धवं गजपिप्प-
ली ॥ यावंत्येतानि सर्वाणि तावद्द्विगुणगुग्गुलुः ॥ कोलप्रमाणगुटिकां भक्षयेन्मधुना सह ॥ कासं श्वासं तथा शोषमर्शांसि च भगंदरं
हृच्छूलं पार्श्वशूलं च कुक्षिवस्तिगुदेरधः ॥ अश्मरीमूत्रकृच्छ्रं च अंत्रवृद्धिं तथा कृमिं ॥ चिरज्वरोपसृष्टानां क्षयोपहतचेतसां ॥ अना-
हं च तथोन्मादं कुष्ठान्युदराणि च ॥ नाडीदुष्टव्रणान्सर्वा प्रमेहा श्लीपदं तथा ॥ सप्तविंशतिको नाम गुग्गुलुप्रथितो महान् ॥ धन्वंत-
रिकृतो ह्येष सर्वदोषनिषूदनः ॥ सप्तविंशतिको गुग्गुलुः ॥ ॥ इति व्रणाधिकारः ॥ अथ भग्नः ॥ आभाफलत्रिकं व्योषं सर्वैरेतैस-
मांशिकैः ॥ तुल्यं गुग्गुलुना योज्यं भग्नसंधिप्रसाधनं ॥ आभागुग्गुलुः ॥ ॥ लाक्षास्थिसंहृत्ककुभाश्वगंधाश्चूर्णीकृता नागवलापु-
रश्च ॥ संभग्नमुक्तास्थिरुजं निहंत्यादंगानि कुर्यात्कुलिशोपमानि ॥ लाक्षादिपुरः ॥ ॥ गुग्गुलुस्त्रिफलाव्योषैः समांसैराज्ययोजितैः ॥
अक्षप्रमाणगुटिकां खादेद्वह्नीतं वुना नरः ॥ नाडीदुष्टव्रणं शूलमुदावर्तं भगंदरं ॥ गुल्मं वग्जां हन्यात्यक्षिराश्वंतगानि च ॥ ॥
॥ सप्तांगो गुग्गुलुः ॥ इति भग्नाद्यधिकारः ॥ अथ भगंदरः ॥ त्रिफलापुरकृष्णानां त्रिपंचैकांशयोजिता ॥ गुटिका शोथगुल्मार्शोभगं-
दरवतां हिता ॥ त्रिफलादिपुरः ॥ त्रिकटुत्रिफलामुस्तं विडंगामृतचित्रकं ॥ शठ्येलापिप्पलीमूलं हपुषासुरदारु च ॥ तुंवुरुपुष्करंमू-

लेचव्यंविशालारजनीद्वयं॥ विडंसौवर्चलंभार्गीसैंधवंगजपिप्पली॥ यावंत्येतानिचूर्णानितावद्विगुणगुग्गुलुः॥ कोलप्रमाणांगुटि
कांभक्षयेमधुनासह॥ कासंश्वासंतथाशोथंमर्शांसिचभगंदरं॥ हृच्छूलंपार्श्वशूलंश्चकुक्षिवस्तिगदेरुजं॥ अश्मरीमूत्रकृच्छ्रंच
अन्त्रवृद्धिंतथाक्रिमि॥ चिरोज्वरोपसृष्टानांक्षयेपहतचेतसां॥ आनाहंचतथोन्मादंकुष्ठानिचोदराणिच॥ त्रिकटाद्यगुग्गुलुः
इतिभगंदराधिकारः॥ अथोपदंशः॥ वराणिर्वीजुनाश्वत्थखदिराशनवासकैः॥ चूर्णितैर्गुग्गुलुसमैर्वटकानक्षसंमितान्॥ कर्त्त
व्यानाशयन्त्याशुसर्वलिंगसमुत्थितान्॥ तथादुष्टव्रणान्हंतिवातरक्तंविशेषतः॥ वरादिगुग्गुलुः॥ ॥ इत्युपदंशाधि
कारः॥ अथकुष्ठः॥ चित्रकंत्रिफलाव्योषमजाजीकारवीवचा॥ सैन्धवातिविषाकुष्ठंचव्यैलायावशूकजं॥ विडंगान्यजमोदाचमु
स्ताचामरदारुजं॥ यावंत्येतानिसर्वाणितावन्मात्रंतुगुग्गुलुः॥ संक्षुद्यसर्पिषासार्द्धंगुटिकाकारयेद्भिषक्॥ प्रातर्भोजनकालेवखादे
दग्निवलंयथा॥ हंत्यष्टादशकुष्ठानिक्रिमिन्दुष्टरुजस्तथा॥ ग्रहण्यर्शोविकारांश्चमुखामयगलग्रहान्॥ गृध्रसिमथभग्नंचगुल्मंचा
पिनियच्छति॥ व्याधीन्कोष्ठगतांश्चापिजयेद्विष्णुरिवासुरान्॥ एकविंशतिकोगुग्गुलुः॥ हरिद्रायाःपलान्यष्टौषट्पलंहविषंल
था॥ खंडद्विप्रस्थसंयुक्तंक्षीरस्याढकशंतेतथा॥ व्योषत्रिजातकेचैवतत्वृन्मुस्तंतथैवच॥ जीरकंचविडंगंचदेवदारुसयष्टिकं॥ ए
तानिसमभागानिचूर्णयित्वापलानिच॥ प्रक्षिप्यविपचेत्तावद्यावद्दर्विप्रलेपनं॥ तद्यथाग्निवलंखादेत्कुष्टरोगंव्यपोहति॥ खंड

विस्फोटदद्रूणां नाशनं परमौषधं ॥ अर्शांसि षट्प्रकाराणि रक्तपित्तंभगंदराणां ॥ अम्लपित्तं निहंत्याशु पांडुरोगं हलीमकं ॥ अग्नि
म्यां निर्मितं श्रेष्ठं हरिद्राखंडमुत्तमं ॥ हरिद्राखंडः ॥ ॥ पथ्यासैन्धुयवासकिंशुकफलासार्कांतथावर्द्धनी व्याधिघ्नेनवयोजिताऽ
नभुजासारुष्करावाकुची ॥ नद्दवक्रिमिशत्रुरोगपरिगतामेकैकवृद्धामिमांगोमूत्रेणानुविमर्द्यगुडवटीःकुष्टिवत्तांभक्षयेत् ॥ पथ्या
१ इन्द्रयवा २ पलाशफल ३ अर्कमूल ४ शुक्लैरंड ५ राजवृक्ष ६ चित्रक ७ भल्लातक ८ वाकुची ९ विडंग १० भागवृद्ध्यासंचूर्ण्य
गोमूत्रेणपिष्टावटींकुर्यात् ॥ वदरास्थिप्रमाणांकृत्वा रोगानुरूपानुपानं ॥ निहंति हतनासिकाकरजकर्णपादांगुलीक्षरद्रुधि
र कृमिपूयजन्तुजजग्धव्रणां ॥ प्रभिन्नचिरलक्षितंवरमशेषकुष्टंमहंति कुरुतेनरहणार्कविंववपुषंनवंदेहं ॥ पथ्यामोदकः ॥ निशा
करणानागरवेल्लत्रिवृतोवरंसवह्निनाप्यक्रमसोविवर्द्धितं ॥ गवांवुपीतंवटकीकृतंतथा निहंति कुष्टानि भगंदराण्यपि ॥ निशादिवटी
॥ पथ्यागुडतिलैः पिंडीकुष्टंसारुष्करैर्जयेत् ॥ गुदारुष्करंजंतुघ्नंसोमराजीकृथाथवा ॥ पथ्यादि ॥ त्रिफलारुष्करुष्करंलोध्रैःसाव
ल्गुजभृंगलांगलीव्योषैःसगुडैर्वराहकंदैः पलिकैरेकत्रसंमिश्रैः ॥ त्रिफलाभल्लातकः लोध्र·वाकुचि·भृंगराज· लांगली·त्रिकटु·वा
राहिकंद·पृथक्पलं·गुडपल २२ मात्राकर्ष १ गुटिकाप्रकल्प्यखादेदेकैकामक्षंसंमितांप्रातः ॥ कुष्टदद्रुकिलासंजित्वावर्षेणानिर्व
लीपलितः ॥ जीवतिवर्षशतंवैदीप्तद्रुनागवेवमत्तसहतैः ॥ त्रिफलादिमोदकः ॥ ॥ विडंगवाकुचीपथ्याकृष्णावाराहिलांगली

वाराग्न्यर्हस्करा: सगुडामोदकाकुष्ठनाशना॥ विडंगादिमोदकः॥ ॥इति कुष्ठाधिकारः॥ अथ विसर्पः॥ अमृतघटपटोलंनिंब
कल्कैरुपेतंत्रिफलखदिरसारं व्याधिघातंश्चतुल्यं॥ क्वथितमिदमशेषं गुग्गुलोपादयुक्तं हरति विषविसर्पान्कुष्ठसेघातमाशु॥
गुडूची·गोघृतपटोलनिंब·त्रिफला·खदिर·राजवृक्ष·प्रत्येकंपलं१।१ जलपल३९ शेषपल८ गुग्गुलपल४॥ पञ्चकागरिका
शाणा१ मात्रा· अत्र· पादेनिपठितमपि शोधनार्थसंगृहीत॥ नवकार्षिकोगुग्गुलुः॥ ॥इति विसर्पाधिकारः॥ अथमुखरो
गः॥ भद्रमुस्ताभयाव्योषविडंगारिष्टपल्लवैः॥ गोमूत्रपिष्टैर्गुटिकांछायाशुष्कांप्रकल्पयेत्॥ तांनिधायमुखेसुप्याच्चलदंतातु
रोनरः॥ नातपरतलंकिंचिच्चलदंतस्यभेषजं॥ भद्रमुस्तादिवटि॥ खदिरस्यतुलांसम्यग्जलद्रोणेविपाचयेत्॥ शेषभागंतत्रैव
प्रतिवापंप्रदापयेत्॥ जातीकर्पूरपूगानिकंकोलकफलानिच॥ इत्येषांगुटिकांकार्यामुखसौभाग्यवर्द्धिनी॥ दंतोष्ठगलरोगेषु
जिह्वातात्वामयेषुच॥ खदिरादि॥ गायत्रीसाररजतुलामरिमेदवल्कसार्द्धतुलायुगलमंबुगतेश्चतुर्भिनिक्काथ्यपादमवशेष्यसु
वस्त्रपूतंभूयःपचेदथशनैर्मृदुपावकेनतस्मिन्घनत्वमुपगच्छतिचूर्णमेषांश्लक्ष्णांक्षिपेच्चकवलग्रहभागिकानां—एलामरा
लसितचंदनचंदनाम्बुरुणामातमालविकलाघनलोहयष्टी॥ लज्जाफलत्रयरसांजनधातकीनांश्रीपुष्पगैरिककर्कपह्वपकट्
फलानां॥ पद्माह्वलोध्रवटरोहयवासकानांमांसीनिशासुरभिवल्कलसंयुतानां॥ कंकोलजातिफलकोशलवंगकानांचूर्णीकृ

तानि विदधीत पलांशकानां ॥ शीतेवतार्य घनसारचतुःपलं च क्षिप्त्वा कलायसदृशीं गुटिकां प्रकुर्यात् ॥ खदिरसार पल १०० खदिरव
ल्कर १०० जलपल ८०० शेषपल २०० वस्त्रपूतं कृत्वा पुनर्मंदाग्नौ पचेत् ॥ ततः सूक्ष्मैलाः कमलनालश्वेतचंदन· वाल· प्रियंगु· प
त्रक· मंजिष्ठा· मुस्तक· कृष्णागुरु· यष्टीमधु· लज्जावती· रसांजन· धातकीपुष्प· त्रिफला· लवंग· गैरिक· कर्कटशृंगी· कट्
फल· पद्मकाष्ठ· लोध्र· वटांकुर· दुरालभा· जटामांसि· तेजवल्कल· त्वगीतिच· कंकोल· जातीफल· जातीकोश· लवंग· प
थक्कर्षमितं ॥ १ ॥ कर्पूरपल ४ तत्र शाणमिता कस्तुरिं च क्षिप्त्वा कलायसदृशीं गुटिं कुर्यात् मुखे धार्या ॥ अस्के मुखे विनिहिता विनि
वारयंति रोगान्द्रदोष्टवदनागलतालुजातान् ॥ कुर्यान्मुखे सुपटुतां च रुचे स्थिरत्वं स्थैर्यान्वितं च दशनारसालघुत्वं ॥ महाखदिर
वटि ॥ कर्पूरजातीफलचंदनैलालवंगकंकोलफलैः सुपिष्टैः ॥ सारेण सार्द्धं खदिरद्रुमस्य कृताभिरघ्राकुटिकात्रमानि ॥ आभासि
तानि कुसुमैर्मनोज्ञैः कस्तूरिकामोदमनोरमाभिः ॥ कर्पूर· जातीफल· चन्दन· सूक्ष्मैला· लवंग· कंकोल· कुंकुम· सर्वसमाभागं· ख
दिरसारं तद्द्वादशभागं कस्तूरिका च· शाणा· संमर्द्य गुटिकां कुर्यात् ॥ दंतायदौर्बल्यनिवारणाय सदा प्रवंडास्यगदोपशांत्यै ॥ मु
खेन धार्या गुटिका तु एषाग्निवलदायिनी ॥ तांबूलमध्ये निक्षिप्य यः खादेद्बुद्धिमान्नरः ॥ मुखजातान्गदाहन्यान्मुखदौर्गंध्यनाशिनि
॥ संभोगकाले रतिकृद्दृढ स्त्रीवृद्धिवर्द्धिनी ॥ क्षयक्षयकृतान्रोगान्नाशयेन्नात्र संशयः ॥ कर्पूरादि वटि ॥ यवाग्रजं तेजवती सपाठार

सांजनं दारु निशां च कुष्टं ॥ क्षौद्रेण कुर्याद्गुटिकां मुखेन तां धारयेत्सर्वगलामयेषु ॥ यवाग्रजं गुग्गुलुः ॥ यवाग्रजादी वटि ॥ ॥ पंचकोल
तालीसपत्रैलामरिचत्वच ॥ पलाशमुष्कक क्षारयवक्षारश्च चूर्णिता ॥ गुडे पुराणे क्वथिते पक्वा च गुटिका कृता ॥ कर्कंधुमात्रा सप्ताहं स्थि
तामुष्कक भस्मकं टरोगेषु सर्वेषु धार्य्या सुरमृतोपमा ॥ अमृतक्षारगुटि ॥ ॥ कासीसं हिंगु सौराष्ट्रि देवदारु समं जुला ॥ गुटिकां धार
येद्दंतैः क्रमिशूलहरां भृशं ॥ कासीसादि वटि ॥ इति मुखरोगाधिकारः ॥ ॥ अथ नाशारोगः ॥ चित्रकषायपलशतममृताधात्री
रसं च तुल्यांशं ॥ प्रक्षिप्य गुडशतं च दशपंचमूलीकषाये च ॥ वतुल्येन हरीतक्याष्टकमेकं विपाच्य गुडपाक अर्द्धप्रस्थं मधुनस्तस्मिन्द
द्यात्ततोत्येषुः ॥ द्वे द्वे पले निदध्याद् लात्वकपत्रकटुकानां चसयवक्षारार्द्धपलं प्रयोजयेदग्निवृद्धये पुंसां ॥ चित्रकपल १०० गुडूचीप
ल १०० धात्रीफलरसपल १०० गुडपल १०० दशमूलीपल १०० हरीतकीपल ६८ मधुपल ३२ ततः सूक्ष्मेलात्वक्पत्रत्रिकटुः पृथक्पल
२।२ यवक्षारकर्ष २ मात्राकर्ष १ एतद्रसायनोत्तममश्विभ्यां निर्मितं सुविख्यातं ॥ उपयुक्तं च तां पुंसां चूर्णीकाष्ठान्यपि च जीर्यंति ॥ अर्श
श्वासभगंदरकाशाक्रमिशोफकुष्टगुल्मांश्च ॥ मासद्वयोपयोगाद्धन्यतंद्रवृद्धिश्च ॥ अजितभेषजशतैः पीनसरोगं त्र्यहाज्जयति ॥ रोगा
नीकसमेतं विशेषतो हंति राजयक्ष्माणं ॥ नृपतिरसायनमेतद्दाहारयंत्रणारहितं ॥ राजरसायनगुडः ॥ ॥ इति नाशारोगाधिका
रः ॥ अथ कर्णरोगः ॥ रास्नामृतैरंडसुराह्वविश्वं तुल्यं पुरे सोपरिमृज्य सादेत् ॥ वातामयी कर्णशिरोगदी च नाडीयुताश्चैव भगंदरी

व ॥ रास्नादिगुग्गुलुः ॥ इति कर्णरोगाधिकारः ॥ अथ नेत्ररोगः ॥ पिप्पलीत्रिफलालाक्षालोध्रसैंधवसंयुतं ॥ भृंगराजरसैर्घृष्टं
गुटिकांजनमिष्यते ॥ अर्मसतिमिरं कांचं कंडुशुक्रं तथार्जुनं ॥ अंजनं नेत्रजान्रोगान्हन्त्येतन्न संशयः ॥ गुटिकांजनं ॥ हरेणुका
सैन्धवसंप्रयुक्ता श्रोतोंजपक्काम्रपकल्ययाच पिष्टाजमूत्रेण कृता च वर्त्तिर्नक्रांध्यविध्वंसकरी नराणां ॥ हरेणुकावर्त्तिः ॥ ॥
अशीतिस्तिलपुष्पाणि षष्टिः पिप्पलतंडुलाः ॥ जात्याः पुष्पाणि पंचाशन्मरिचानि च षोडश ॥ एषा कुसुमिकावर्त्तिर्गतं चक्षुर्निव
र्तते ॥ कुसुमिकावर्त्तिः ॥ तुलस्याबिल्वपत्रस्य रसो ग्राह्यो समांशके ॥ ताभ्यां तुल्य पयो नार्याः स्विन्नयं कांश्यभाजने ॥ गजवल्या
दरं सर्घ ताम्रेण प्रहरं पुनः ॥ कज्जलं तु समुत्पाद्य तेनांजितविलोचन ॥ सद्यो नेत्ररुजं हंति सशूलं पाककजामपि ॥ नारायसांजनं
॥ ॥ शुंठी हरीतकी वचा कुलत्थापर्यंतं तथा ॥ स्फाटिकं श्वेतखदिरं पृथग्माजुफलं समं ॥ कर्पूरं मृगनाभिश्च मौक्तिकं स्यात्त्र
दर्दकं ॥ प्रत्येकं निंबुकद्रावैः खल्वे मर्द्यं दिनत्रयं ॥ पश्चात्तु वटिकां कुर्यात् जलेन तिमिरं हरेत् ॥ स्तन्येन पुष्पं पटलं मधुना कांजिका
म्लं ॥ नेत्रस्रावरसो नेन नक्रांध्यं भंगयोषितः ॥ गोमूत्रैर्विपिष्टं मासं हृड्डिरंभाजनेन तु ॥ नयनामृतं ॥ हरिद्रानिंबपत्राणि पिप्पली
मरिचानि च ॥ भद्रमुस्ताविडंगं च सप्तमं विश्वभेषजं ॥ गोमूत्रे गुटिका कार्या छागमूत्रेण चांजनात् ॥ ज्वरांश्च निखिलान्हन्याद्दृत्ता
वेशं तथैव च ॥ वारिणा तिमिरं हंति मधुना पटलं जयेत् ॥ नक्रांध्यं भृंगराजेन नारीक्षीरेण पुष्पकं ॥ हरिद्रादिवटि ॥ गैरिकं कांश्य

रंडेन कांस्यपात्रे विघर्षयेत् ॥ जलेन कज्जलाभं तज्ज्ञात्वा तं जनमाचरेत् ॥ नेत्रस्रावं च रागं च पीडां जयति दुस्तरां ॥ गैरिकांजनं ॥ वब्बूल
दलक्काथेन षोडशांशावशेषितं ॥ वस्त्रपूतं पुनः पक्त्वा गुटिकां संप्रकल्पयेत् ॥ तिमिरं पटलं काचं कंडुं जयति चांजनात् ॥ वब्बूला
दिवटि ॥ रासभीयात्तु या दंष्ट्रा तया त्वंजनमाचरेत् ॥ शीतलाजनितं पुष्पं नाशयेन्नात्र संशयं ॥ रासभीयदंष्ट्राजनं ॥ इति ने
त्ररोगाधिकारः ॥ अथ स्त्रीरोगाः ॥ जीरकं हपुषा धान्यं शताह्वा वदरा शिवा ॥ यवानी मेथिका हिंगु पत्रिका काशमर्दकं ॥ पि
प्पली पिप्पलीमूलं अजमोदा च वाष्पिका ॥ चित्रकं चपला शालि तथा धान्यं चतुष्पले ॥ कसेरुकं नागरं त्वक्कुष्ठं दीप्यकमेव च ॥ गुडस्य च
चतुर्दशा घृतप्रस्थं तथैव च ॥ क्षीरं द्विप्रस्थसंयुक्तं शनैमृद्वग्निना पचेत् ॥ पंचजीरकमित्येतत् सूतिकानां प्रसस्यते ॥ गर्भार्थिनी
या च नारी स्त्रीहरा यीयं च मारुते ॥ विंशति व्यापदो योने कासश्वासस्वरक्षये ॥ हलीमकं पांडुरोगं दौर्बल्यं मूत्रकृच्छ्रतो ॥ हंति पीनोन्न
तकुची पद्मपत्रायतेक्षणा ॥ उपयोगो स्त्रियो नित्यामलक्ष्ममलवर्जितं ॥ पंचजीरकगुडः ॥ विश्वादष्टपलानि विंशति घृतात्प्र
स्थद्वयं क्षीरकात् खंडस्यार्द्धशतं त्रिगंधिककणाजीरे पलांशैः क्षिपेत् ॥ व्योषं धान्यपृथक्पृथक्द्वयमिदं क्षिप्रं निहन्यामयान्वाता
न्कांतिबलौजसः प्रकरणं तत्सूतिकायै हितं ॥ लघुसौभाग्यं ॥ आज्यस्यांजलियुग्ममत्र पयसः प्रस्थद्वयं खंडतः पंचाशत्पलमत्र चू
र्णितमिदं विश्वस्य च प्रक्षिपेत् ॥ प्रस्थार्द्धं गुडवह्निपाच्यमधुना शुंठित्रयं धान्यकं ॥ मिश्रणपंचपलं पलं क्रिमिरिपो साजाजिजीराद

पि ॥ छायाभांददलोरगेद्रगुटिकाभंगात्तथानिक्षिपेत् ॥ गोघृतपल ८ गोदुग्धपल १ नागकेशरपल १ सूक्ष्मैला १ त्वकपत्र १ मात्राक
र्ष २।२ तद् छर्दिज्वरदाहशोषशमनं सश्वासकाशापहं ॥ प्लीहारोचककारसांकृमिहरं कामाग्निसंदीपनं ॥ भूतानांखलु खंडनाग
रमिदं सिद्धौषधं योषितां ॥ खंडेनागर ॥ त्रिकटुत्रिफलामुस्तंजीरकद्वयधान्यकं ॥ कट्फलंपौष्करंशृंगीयवानीसैन्धवंविडं ॥ ताली
शं केशरं पत्रं त्वगेलाचफलेनतथा ॥ जातीकोशंलवंगंचमूराकर्पूरचंदनं ॥ यावंत्येतानिचूर्णानितावत्येवत्रमेथिका ॥ संचूर्ण्यगुटि
काकार्यप्रमाननगुडेनतु ॥ घृतेनमधुनाकिंचित्खादेदग्निवलंप्रति ॥ अग्निंचकुरुतेदीप्तिंमेदश्वासेमहौषधं ॥ वलवर्णक
रो ह्येषस्वरसंधानकारकं ॥ प्रमेहाविंशतिंचैवमूत्राघातंतथाश्मरिं ॥ पांडुरोगंतथाशांसि यक्ष्माणंहन्तिकामलं ॥ स्तनौचपतितौ
गाढौस्यातांनालफलोपसौ ॥ दृष्टिप्रसादनंचैवनारीणांहृदयप्रदः ॥ प्राक्रोगहननाथेनमेथिकामोदकः शुभा ॥ मेथिकामोदकः
॥ सुनीलकमलंपिष्ट्वापयसाकारयेद्वटिं ॥ नान्निधायक्षराणांयोनौवृद्धापिस्यात्कुमारिका ॥ नीलकमलादिवटि ॥ ॥ इतिस्त्रीरोगा
धिकारः ॥ अथवालरोगः ॥ चातुर्जातंवराव्योषंजातीपत्रीफलंतथा ॥ वेल्लंलवंगंवातामंखर्जूरंचवियालकं ॥ सममागंचचूर्णितत्समं
मुगघृतंसि ॥ तस्यार्द्धंगोघृतंग्राह्यंक्षीरमाढकमेवच ॥ द्विप्रस्थशर्करायोज्यापक्वाचगुटिकांचरेत् ॥ यथाग्निभक्षयेन्नित्यंक्षीरंवा
त्रपिवेच्छिशुः ॥ वलवर्णकरंहृद्यंवालानांपुष्टिदंपरं ॥ चातुर्जातादिमोदकः ॥ गुटिकापूर्वमुद्दिष्टामहत्तांयज्वरादिषु ॥ कार्यातदे

॥ सात्मद ॥ व भेषजं किं तु मात्राकनीयसि ॥ ॥ इति वातरोगाधिकारः ॥ शिरीषपुष्पकुष्ठैलाशितैलाद्यो षरेराः का ॥ यष्ट्यार्कहिंगुश्वेताग्रासिंदु
॥ १०८ ॥ वारकरंजकं ॥ वल्कं नरं मूत्रपिष्टं गोपित्तमधुसंयुतं ॥ कालेनाप्यहिदंष्टस्य मृतसंजीवनो ह्ययं ॥ शृंगालश्वानमार्जारैमंडूकैरथ
वाहिभिः ॥ निर्मितो मुनिभिः सर्वैः सूर्योदयमहागदः ॥ सूर्योदयोगदः ॥ अभयापिप्पलीमूलं मरिचं नागरं तथा ॥ त्वक्पत्रपि
प्पलीमुस्ताविडंगामलकानि च ॥ कर्षः प्रत्येकमेषां स्याद् दंत्याकर्षत्रयं तथा ॥ षट्कर्षा श्वशीतायास्त्रिवृद्द्विपलं तु तो भवेत् ॥ सर्वमेकत्र चूर्णि
तं कृत्वा मधुना मोदकं कृतं ॥ खादेत्प्रतिदिनं चैकं शीतं चानुपिबेज्जलं ॥ तावद्विरिच्यते जंतुर्यावदुष्णं न सेवते ॥ विषं गरं पांडुकाशं
जंघापार्श्वरुजां तथा ॥ पर्शार्तिमूत्रकृच्छ्रं च वदुर्नाभं च भगंदरं ॥ अश्मरिमेहकुष्ठं च दाहशोथोदराणि च ॥ यक्ष्माणं च क्षयोरोगं
क्रमं वै घ्नेन रात तथा ॥ योजितोयं निहंत्याशु अभयाद्यो हि मोदकः ॥ अभयाद्योमोदकः ॥ ॥ इति विषरोगाधिकारः ॥ अथ रसाय ॥ रामः ॥
नं ॥ चिकित्सितं व्याधिहरं पथ्यासाधनमौषधं ॥ प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितं ॥ दीर्घमायुः स्मृतिर्मेधामारोग्यं तरुणं ॥ १०८ ॥
वयः ॥ प्रभावर्णस्वरौदार्यं देहेंद्रियबलं परं ॥ वाक्सिद्धिं प्रणतिं कांतिं लभंते ना रसायनात् ॥ सयथा ॥ पिप्पलीकिंशुकक्षारभावि
ताघृतभर्जिता ॥ प्रयोज्या मधुसर्पिभ्यां रसायनगुणैषिणा ॥ जेतुं कासं क्षयं शोथं हिक्काश्वासं गलग्रहं ॥ अर्शांसि ग्रहणीरोगं
पांडुतां विषमज्वरं ॥ वैस्वर्यं पीनसं शूलं गुल्मं वातबलासकं ॥ पिप्पलीकल्पः ॥ ॥ त्रिफलासनखदिरामृतावर्षाभूभृंगगोक्षुर

क्वाथे॥ साऽर्द्धरु केतगुग्गुलुपलानि त्रिंशच्चले ह्ववह्निपचेत्॥ मधुंच तसितानाविमिश्रं स्वादन्नरः कान्तिबुद्धिबलयुक्तः॥ तथागदे
र्विमुक्तो जीवति संवत्सरत्रितयं॥ गुग्गुलुरसायनं॥ गुडूचीखंडशः कृत्वा कुट्टयित्वा तु पेषयेत्॥ शिलायं जलयोगेन वस्त्रसूक्ष्मकल्क
वद्दरं॥ तु वस्त्रजलयोगेन श्रावयेत्तच्छनैः शनैः॥ विमलीकृत्य तस्यार्द्धं मच्छमच्छ जलं तयेत्॥ अधस्थं तु घनीभूतं छायाशुष्कं
विधायच॥ शुभ्रं शंखनिभं चूर्णं गुडूच्याः सत्वमुच्यते॥ चूर्णान्येषां ततो दद्यात्त्रैपलचतुष्टयं॥ उशीरं वालकं पत्रकं कृष्णधात्रीच
मौशली॥ एलाहरेणुकं द्राक्षा कुंकुमं नागकेशरं॥ पद्मकं दं वतुकर्पूरं चंदनंद्वयमिश्रितं॥ व्योषं च मधुलाजं च वाजिगंधा शता
वरी॥ गोक्षुरं कर्कटीवीजं जातिकं कोलचोरकं॥ रसाभ्रवंगलोहं च समं श्रकारयेद्बुधः॥ एतानि समभागानि द्विगुणा स्यात्तु शर्करा
मत्स्यंड्याज्यमधूपेतं भक्षयेत्प्रातरुत्थितः॥ क्षयं च रक्तपित्तं च पाददाहं मसृग्दरं॥ मूत्राघातं मूत्रकृच्छ्रं वातकुंडलिकां तथा॥ प्रमेहा
दारुणान्सोमरोगं चैव तथाविधं॥ जीर्णज्वरादिकांश्चैव निहन्यात्सह सोदकं॥ वल्योवृष्यंतरो मेध्यो जराव्याधिविनाशकः॥ देवाना
ममृतं यद्वन्मनुष्याणां तथैव च॥ गुडूचीसत्वविड्डोयं सप्तर्ष्यादिनिषेवितः॥ संवत्सरप्रयोगोस्य युक्तमपरिकीर्तितं॥ षण्मासिको मध्य
मस्तु शेषा हीनफला स्मृता॥ पथ्यं गोधूमशाल्यन्नं मुद्गाढकिमसूरिका॥ शाकं त्वदोषलं क्षाराक्षाराम्लादि त्यजेद्बुधः॥ दुग्धं ससार्क
रं सेव्यमन्याद्यमत्स्यं तु गोदधिः॥ गुडूचीमोदकः॥ ॥ इति रसायनाधिकारः॥ ॥ अथ वाजीकरणं॥ कुडवं सर्पिषश्चैव शर्करासपिप्पा

समं ॥ कुडवं चूर्णीभूतस्य चात्मगुप्ताफलस्य च ॥ कुडवश्चैव माषाणां द्वौ द्वौ च तिलमुद्गयोः ॥ गोधूमशालिचूर्णानां कुडवः कुडवो भवेत् ॥ सर्पिषः कुडवं चैव तन्मात्रं वै क्षीरसर्पिषा ॥ पक्वापूपलिकां खादेद्धृष्यास्तु परयोषितः ॥ पूपलिकावटि ॥ बीजानि कोशकेभ्यः कुडवमितानि स्वेदयेद्दुग्धेनैव गृहीतानि च कृत्वा सूक्ष्मं संपेषयेत्तानि ॥ पिष्टिकया च वटिकां कृत्वा गव्ये पचेदाज्ये ॥ द्विगुणितशर्करया वटिकां संपक्वमालेप्या ॥ वटिका भक्षितकं मध्ये मज्जनयोगे विलास्याप्या ॥ पंचटंकमितास्तास्तु प्रातः सायं च भक्षयेत् ॥ कपिकच्छुबीजानि त्वक्ररहितानि पलानि च ॥ ८ ॥ गोदुग्धे दाग्नौ पक्वा सूक्ष्मं दृषदि पेषयित्वा गव्ये घृते पटकापक्वा द्विगुणया शर्करया पाकं कृत्वा वटकाछित्वा पुनर्मधुमध्ये मज्जयित्वा मधुपात्रे स्थाप्य मात्रा टंक ५ कर्ष १ अनेन शीघ्रं द्रावीयो यश्चापि पतितध्वजः ॥ सोपि प्राप्नोति सुरते सामर्थ्यमपि वाजिवत् ॥ नानेन सदृशं किंचिद्द्रव्यं वाजिकरं परम् ॥ वानरीवटी ॥ समुद्रशोषबीजानि भागैकं धूर्तबीजकं ॥ भागत्रयं जातीपत्रं भागमेकं च तत्फलं ॥ यवानी म्लेक्षदेशस्था भागत्रयसमन्विता ॥ भागार्द्धमहिफेनं च माहिषीक्षीरसोधितं ॥ बीजया तत्फलक्वाथे दशवारं विभावयेत् ॥ धत्तूरबीजतैलेन मर्द्दयेत्तं रनेन तं बदरास्थिप्रमाणेन वटिकां संप्रकल्पयेत् ॥ मदनानंदजननी वीर्यस्तंभकरी परा ॥ उन्मत्तानां नर्तकीनां मतिगर्भहरा कलौ ॥ स्तंभनीवटी ॥ ॥ भागैकं मृगनाभिश्च प्रत्येकं कुंकुमं तथा ॥ जातीफलं लवंगं च प्रत्येकं भागयुग्मकं ॥ चतुर्भागाहिफेनो च बीजया भागयुग्मकं ॥ भक्षयेन्मधुना सार्द्धं रमते कामिनीशतं ॥ चणकाभा वटी कार्या वीर्यस्तंभकरी मता ॥ कस्तूर्यादिवटी ॥

गोक्षुरक्षुरवीजानोअश्वगंधाशतावरि ॥ मुशलीवानरीवीजंयष्टीनागवलावला ॥ एषांचूर्णंदुग्धसिद्धंगव्येनाज्येनभर्जितं ॥
ससितामोदकंकृत्वाभक्षंवाजीकरंपरं ॥ चूर्णादष्टगुणंक्षीरंघृतंतच्चूर्णसमंस्मृतं ॥ सर्वतोद्विगुणंखंडंखादेदग्निवलंयथा ॥ वर्द्धनो
मोदकः ॥ त्रिकटुत्रिफलाजातीफलंपत्रिलवंगकं ॥ त्वगेलाभ्रसमंसर्वंचूर्णार्द्धविजयाक्षिपेत् ॥ सर्वेभ्योद्विगुणाखंडेनामिश्रयेन्मधु
नाज्यतः ॥ कर्षकर्षप्रमाणांस्तुगुटिकांकारयेद्बुधः ॥ प्रातःखादेद्गदध्वस्तोनिशायांकामवृद्धये ॥ दुग्धतांवूलभुक्पश्चाद्दी
र्घस्तंभप्रजायते ॥ काशेश्वासेक्षयेमेहेपूजितावरसायनी ॥ लघुकामेश्वरस्येयंगुटिंगोरक्षनिर्मिता ॥ लघुकामेश्वरवटी ॥
कंकोलंवृहदेलिकागजवलावीरावरेदीवरीवासावत्सकवीजवानराकरणाविस्पोयकल्पोत्तरं ॥ वीजानित्रपुसत्रिकंटककरणा
ध्यांड्रेक्षुराणांतथा ॥ मज्जानोवदलीविभीतकशिवाधात्रीपियालोद्भवा ॥ तालीशंशिवकंवलाम्बनलनागांगेरुकीवीजकंशृंगीधा
न्यकचित्रकंसमुलवंहीराशठिमेथिका ॥ दीर्घापुत्रवृषमोथमेदमुमहामेदावकाकोलिकातद्वक्षीरकवायसीनिगदितावृद्धिस्तथाऋद्धि
काशाल्मकद्वयराजिकाद्वयपथ्यजीराजमोदाद्वयमश्विशोष — — — — — — मुशलीमांसिसर्वांसिमिसी ॥ जातिपत्रलवंगमर्ककरभः
काश्मीरकंदाडिमंचातुर्जातकलोलिकाकुमुदिकाजातीफलंयष्टिका ॥ द्राक्षाखाखसवल्कलंमदनकंशृंगाटव्योषणांजंवूपद्मक
पुष्कराह्वकदलीकंदाश्वगंधालिका ॥ मारवाशाल्मलीवीजवल्कलरसामूलंचपौनर्नवा ॥ कर्षांशंविजयाखिलार्द्धतुलयादेयाथशुक्लं

शका॥ रसरसकभुजंगास्तारनामीजवंगागगणान्नराशिसारावेधमुष्यान्तुपारा॥ द्विगुणितासितमेतच्चूर्णगोलंविदध्यात्प्रदत्तमधु
हविर्भ्यांप्राश्यपेयेयपयोउ॥ कंकालएला॥ नागवल्लाक्षीरकाकोलि·त्रिफला·शतावरि·वृषइन्द्रयवगजपिप्पली·शुंठी·पिप्पली
मरिच·त्रपुसि·वीजानिगोक्षुरवीजानिपिप्पलिवीजानिअधंझेक्षरवीजानिवदरिविभीतकशिवा·पियालज्ञानांमज्ञाननाली
सभूर्जपत्रवल्लागुड़चीनागवल्लावीजककर्कटशृंगी·धान्यक·चित्रक·शाल्मिमिश्रिइतिवकाश्मरीशठी·मेथिऋषभक·मेदामहा
मेदा·काकोली·क्षीरकाकोलीऋद्धिवृद्धिकमलनीलकमलराजिकाशर्षपजीराकृष्णजीराअजमोदाखुरामानिज्यान्तुवसमुद्रशो
ष — — — — — — — मुशलि·जटामसि·वंशलोचन·सोफजांतीपत्रलवंगअकरकलाकेशरदाडिमचातुर्जातलोलिकाकमुदिका
जातीफलयष्टीमधुद्राक्षाखसवल्कलमदन·शृंगाटसिगुवीज·जांववंपद्मकाष्टपुष्करमूलकदलीकंद·अश्वगंधतिल·माष
शाल्मलीवीज·शाल्मलीवल्कलशाल्मलीमूलशाल्मलीरसपुनर्नवाएतेपृथक्कर्षा१विसयासर्वार्धांरससिंदूर·खपरियानाग
भस्मतारभस्मसुवर्णमाक्षिकभस्म अभ्रकभस्म·लोहभस्म·कस्तुरि·कर्पूर·प्रत्येकंद्विकर्ष२सर्वैद्विगुणासितायोज्यामधुहविर्भ्यां
गोलंविदध्यात्अस्यमात्राकर्षैकंभुक्त्वापश्चात्·पय·पिवेत्॥ यक्ष्मारोगग्रहणीगदंगुदरुजामानाहदाहोदरान्उन्मादानलसादंदीर्घ
कमनापस्मारमेहाश्मरी॥ शूलंश्वासमरोचकंज्वरगुरोरोगंकृमिकामलापांडूत्ववहलीमकंविजयतिश्रीमानयंलीलया॥ एतसी

रामलं करोति मदनोन्मादेन मंदानलोपन्नागर्वसनस्परोगहमनं पुष्टिप्रदं कामिनां ॥ पारींद्रवपराक्रमेण तुरगो वेगेन नारापतिं कान्त्या
वह्निरदं बलेन शिखिनं नादेन तुष्टावहं ॥ नासत्यावधरीकरोति वपुषा लावण्यलक्ष्मीपुषा श्रीकामेश्वररसेवयागतवयाऽप्येति नृ
नःश्रियः ॥ ~~॥ महाकामेश्वरो मोदकः~~ ॥ जातीफलं च सौराष्ट्री कृष्णधत्तूरबीजकं ॥ जातिपुष्पमहिफेननागं हिंगुलमेव च ॥ एतानि स
मभागानि खसक्वाथेन मर्दयेत् ॥ गुंजामात्रां वटिं खादेत् सितया सह भक्षयेत् ॥ नाम्ना कामेश्वरः प्रोक्तो रमते कामिनीशतं ॥ सौराष्ट्री आका
रकरभं ॥ ~~कामेश्वरवटी~~ ॥ जातिकोशलवंगैला भूमितामरिचं नखं ॥ हरीतकी त्रकुंडीचरिचंदनकुंकुमं ॥ पारसीयकसेरुं च शृं
गाटकवरांगकं ॥ मृगकस्तूरिकासर्वं पृथक् कर्षं विचूर्णयेत् ॥ पुष्पतैलतृतीयासंमर्दितं विजयारजः ॥ पलपंचमितं शुद्धं टंका
ईलघुतैलपक् ॥ रक्तामितिमंजुलापुष्पं संधितामसितोपला ॥ नखमृष्टिसितानस्नादिगुराणां त्रसितोपला ॥ गुरूपदेशादारक्तं मंजु
लाजलयोगतः ॥ जातीपत्रिलवंग· सूक्ष्मैला· शतार्द्धमरिचमखौगुंग धडबोहरितकितत्ता ॥ शुंठी शतावरी· श्रीखंड· केशर·
खुरासानि· यवानी· कसेरु· शृंगाटक त्वक् एकांगी कस्तूरि सर्वं पृथक् कर्ष १ पुष्पतैलकर्ष ६ अत्ररक्तिका १६ विजयापल पग्
लं दपल २० सितोपलापल ४० प्रक्रियातु पूर्वं विजयारजः पुष्पतैलेन मर्दितं विजयापुनः चूर्णादि मर्दयित्वा पुनः गुलावपानि
ख्याने मर्दयित्वा सितोपलां दत्वा च मृगं धडव्येन वासयित्वा सिद्धानि मात्रा कर्ष १ लेहो लक्ष्मीविलाससंज्ञः षोवत्यग्निदीपनः ॥ ॥

॥ लक्ष्मीविलासः ॥ निस्तुषंमाषचूर्णस्य शालितंडुलजंतथा ॥ सूक्ष्मचूर्णंचपिप्पल्यापलिकान्युपकल्पयेत् ॥ ततरेकीकृतंचूर्णंभर्जयेद्गोघृ-
तेनच ॥ अर्द्धमात्रेणसर्वेभ्यस्ततःखंडंसमंक्षिपेत् ॥ जलंचद्विगुणंकृत्वापाचयेत्तच्छनैःशनैः ॥ ततःपक्वंसमुद्धृत्यकृत्वांकुर्वीतमोदकान् ॥
ऽत्कासायंपलैकंचपिबेत्क्षीरंचतुर्गुणं ॥ वर्ज्जनीयोविशेषेणक्षाराम्लौदोरसावपि कृत्वैवंरमतेनारीनवीर्यंक्षीयतेनरः ॥ माषादिमो-
दकः ॥ समभ्रघारितमभ्रकंकटुफलंकुष्ठाश्वगंधामृतामेथिमोचरसोविदारिमुशलीगोक्षुरकक्षुरके ॥ रंभाकंदशतावरीमज-
मोदापाठातिलाधान्यकंयष्टीनागवल्लाकचूरमदनंजातीफलंसैंधवं ॥ भार्गीकर्कटशृंगिकात्रिकटुकंजीरद्वयंचित्रकं ॥ चातुर्जात-
पुनर्नवागजकणाद्राक्षाभयावासकः ॥ वीजंमर्कटिशाल्मलीफलत्रिकंचूर्णंसमंकल्पयेच्चूर्णांशंविजयासिताद्विगुणितंमध्वाज्य-
योःपीडितं ॥ कर्षार्द्धंगुटिकर्षमथवासेव्यासदासर्वदा ॥ पेयंक्षीरयुतंसुवीर्यकरणंलभेस्वयंकामिनां ॥ अभ्रकभस्मसर्वद्रव्यमपि
समभागं ॥ कटुफल· कुष्ठ· अश्वगंधा· गडूची· मेथिका· मोचरस· विदारिकंद· मुशलीकंद· गोक्षुर· क्षुरक· कदली· कंद· शताव-
री· अजमोदा· पाठातिलाधान्यकयष्टिमधु· नागवल्लाकचूरमदनफल· जातीफलसैन्धव· भार्गी· कर्कट· शृंगीव्योषजीराकृष्ण-
जीरा चित्रक· चातुर्जात पुनर्नवागजपिप्पलीद्राक्षापथ्यावृषकपिकच्छुवीजंशाल्मलीवीजंत्रिफलावीजानिप्रत्येकंकर्ष१।१ विज-
यासर्वचूर्णसमंसितावचतुर्गुणाकृत्वावैद्यमतेनघृतेभर्जयित्वासितोदत्वाघृतार्द्धमधुदत्वामोदकांचरेत् ॥ मात्राकर्षार्द्धवाकर्षमेकं

१॥ रामावश्यकरंवरंवसुखदंरत्यांगणाढ्यावरोक्षीणेपुष्टिकरंक्षतक्षयहरंहंत्याशुसर्वामयं॥ कासश्वासमहातिसारसमनंमंदा
ग्निसंदीपनंमर्शोसिग्रहणीप्रमेहनिचयेरक्तातिसारप्रणाशनं॥ नित्यानंदकरंविशेषकवितावाक्यंविलासोद्भवं॥ धत्तेसर्वगुणोम
हास्थिरमतिकालोवसंतोत्सवं॥ अभ्यासेननिहंतिमत्युपलितंकामेश्वरोवत्सला॥ सर्वेषांहितकारिणीनिगदितःश्रीनित्यना
थेनवै॥ वृद्धानांमदनोदयोदयकरःप्रौढांगनासेवनेसिद्धोयंमदहृष्टिप्रत्ययकरोभूपैसदासेव्यतां॥ ॥कामेश्वरोमोदकः॥
मेथिगडूचीमुशलीशठीचविदारकंदत्रिसुगंधिसिंधुः धात्रीलवंगोक्षुरकक्षणिशतावरीमोचरसश्चयष्टी· कृष्णाश्वगंधाक
दलीजकंदानागाह्वजातिफलजातिवत्रिशृंगीधनीयाह्वयकट्फलंचचूर्णमत्राभ्रंद्विगुणानियोज्य॥ सर्वतुर्यांसविजयासर्व
द्विगुणाशर्करापिंडीवमधुसर्पिभ्यांमाषोरुकौवभक्षयेत्॥ मेथिका· गडूची· मुशली· कर्चूर· विदारिकंद· सूक्ष्मेला· त्वक्पत्र·
सैंधव· धात्रीलवंग· गोक्षुर· क्षुरक· शतावरी· मोचरस· मधुयष्टि· पिप्पलीअश्वगंधकदली· कंद· नागकेशरजातीफलजाती
पत्रकर्कटशृंगीधान्यक· कट्फल· प्रत्येकंवर्ष१॥ अभ्रकभस्मद्विकर्ष२ सर्वस्यचतुर्थांशंविजयाचूर्णंशर्कराश्चतुर्गुणाघृतंचू
र्णसमंघृतनार्द्रमधु॥ मात्राटंक१माषश्च४॥ कामसुंदरवटी॥ सरपुंखाजटायास्त्वग्वर्षाभ्वश्वजटात्वच॥ चांपेयमूलजंत्वक्क
विदारिकंदजंरजः॥ समुद्रफलजंचूर्णमजगंधोत्थवीजजं॥ वीजंचातिवलायाश्चपथक्पलमितंरजः॥ तुल्यशक्रासनस्याश्च

चूर्णान्तुल्या समिश्यते ॥ तज्ञावनौषधेभ्यस्या चूर्णाद्विगुणा शर्करा ॥ अनिश्चनातयापाकस्तुर्यसंजातिकाफलं ॥ मात्रास्यात्पंचभिः शा
णीमूलकामेश्वराभिधं ॥ सपुंस्त्वामूलः ॥ पुनर्नवामूल· नागकेशर· विदारिकंद· समुद्रफल· पिप्पलीवीजअग्निवल्लावीजत्व
क्पत्रंचपथक्पले १।१ विजयाचूर्णं कर्ष ८ शर्कराचतुर्गुणा जातीफलं कर्ष १ कस्तूरी टंक १ मात्रा कर्ष १ ॥ मूलकामेश्वरवटि ॥
कुष्ठंकट्फलसैन्धवंत्रिकटुकंमेथीयवानीद्वयंवासामोचरसंविदारिमुशलीजातीफलंपत्रकं ॥ जीरंचापरजीरकंगजकणा
द्राक्षाभयावानरीतालीसंत्रिसुगंधिकंत्रिलवणंवैभीतकंशृंगीका ॥ रंभाकंदशतावरीद्वयंशठीयष्टिपियालाम्लताजातीपत्र
लवंगकेशरजलंगोक्षुरकंशाल्मली ॥ धात्रीमाषपुनर्नवाश्वकनकंशृंगाटकंमस्तकीमांसीचापिवलात्रयंचजलदंमार्गीभ
कर्णीसिता ॥ कंकोलंवरहाटकंचविजयः श्रीस्वग्रगंधाकुंकुमंजापष्पजवीजमेतदखिलंसंचूर्णितंस्निग्धकं ॥ एतत्कर्ष
मितंपथक्पथगथोतुल्यांशतोत्यांजयांतस्यार्द्धमितंमतामभ्रकमहोवंगंतदर्द्धंक्षिपेत् ॥ लोहंमारितमेतदर्द्धममलंसूतंतद
र्द्धमतंसर्वेभ्योद्विगुणांसिताथमधुनावाप्येनसंमिश्रयेत् ॥ कार्यातस्यपलार्द्धमानवटिकाः स्वादेद्यथाग्निप्रदेनक्तंवापिज
राविपत्तिशमनीमेकाचदुग्धंपिवेत् ॥ कुष्ठ· कट्फल· सैन्धव· व्योष· मेथीयवानी· अजमोदा· वृषा· मोचरस· विदारिकंद·
मुशली· जातीफल· पत्रक· जीरक· कृष्णजीरक· गजपिप्पली· हारहूराः पथ्या· कपिकछुवीज· तालीसपत्र· त्रिजातकः त्रिल

वराविभीतक·कर्कटशृंगीकदलीकंद·सतावरी·महासताठरी·कर्चूर·यष्टिमधु·वारमज्जागडूची·जातीपत्रीलवंग
केशर·सुगंधवाल·गोक्षुर·क्षुरकशाल्मली·आमलकंमाषपुनर्नवा·अश्वगंधा·नागकेशरशृंगाटक·रोमिमस्तकिजटा
मसित्रिवल्लावीजंमुस्ताभार्गी·पिप्पलीतिलाकंकोल·अकरकलाविजयसारबवावदरी·वीजमज्जा·पद्मवीज·प्रत्येकं
कर्षा १।१ विजयाचतुर्थांसकेपुनअभ्रकभस्मकर्ष १ वंगभस्मकर्ष १ लोहकर्षार्द्धः॥ लोहार्द्धरसभस्मः॥ सर्वेभ्योचतुर्गुणांश
र्करादुक्रमंद्विगुणांशर्करांदेयामित्यादि अनुक्रमपिगोघृतंघृतार्द्धमधुमात्राकर्ष १।२ एषासोगतसिंहनाभिषजालोकेप्र
काशीकृताहस्मीरायमहीभुजेशतवर्षसंभोगभोजेभ्यःशं॥ एषावयकरीमहामयकरीक्षुद्बोधतेजस्करीकांतिस्थौल्यमति
प्रकाशजननीविंनामयध्वंसिनी॥ नाहरायोद्धुतकामिनीजनमहादर्पद्विपानांमहासिंहोसर्वमनो — — दनवतिश्रीकामदे
वाभिधा॥ कामदेववटी॥ ॥इतिवाजीकरणाधिकारः॥ ॥इतिश्रीवैद्यविश्वनाथकृतेसात्म्यदर्पणेवटिकाधिकारे
नामाध्यायश्चतुर्थः॥ ४ ॥अथरसाः॥ तंत्रप्रसंसारसरत्नाकरे॥ हतोहंतिजरामृत्युंमूर्छितोव्याधिघातकः॥ धत्तेवखेगति
वद्धःकोन्यस्तान्कृपाकरः॥ दोषहीनोरसोब्रह्मामूर्छितस्तुजनार्दनः॥ मारितोरुद्ररूपस्याद्वद्धसाक्षान्महेश्वरः॥ वेधकोदे
हलोहानांस्मृतोदेवीसदाशिवः॥ दर्शनंरसराजस्यब्रह्महत्यांव्यपोहति॥ स्पर्शनान्नाशयेद्देवीगोहत्यांनात्रसंशयः॥ किंपुनः

भक्षणादेविप्राप्यते परमं पदं ॥ अल्पमात्रेपयोगित्वादरुचेरथसंगतः ॥ क्षिप्रमारोग्यदायित्वादोषधिभ्योधिको रसः ॥ रसरत्न
प्रदीपेच ॥ दोषहीनो यदा सूतस्तदा मृत्युरुजापहः ॥ साक्षादमृतयुक्तोपि दोषयुक्तो रसो विषं ॥ दोषानाहस एव ॥ स्वाभाविका
:सप्तगुणा रसेस्मिन्नागाग्निवलोंगाधिकनामधेयाः ॥ नागाद्भवेयुर्गलगंडरोगाः कुष्ठंचवंगात्मरणांविषेराः ॥ मलेन मूर्छाद
हनेन दाहो वीर्यच्युतिस्यादशकृच्चलत्वान् ॥ जाड्यंगिरेकंचुकयोदरादि ततोविशुद्धोपिमतोरसेन्द्रः ॥ तस्य शोधनं तत्र बहु
:प्रयाससाध्यत्वात्सर्वशास्त्रानुसारि भिषग्भिरनुभूतं प्रकारं चाह रसरत्नाकरे ॥ पारिभद्ररसेपेष्यंहिंगुलंपाममात्रकं ॥ जंवी
राराद्भवेद्वीथ पात्यं पातनयंत्रके ॥ तं सूतं योजयेद्योगे सप्तकंचुकवर्जितं ॥ इत्येवं शुद्धमाख्यातं सर्वकर्मसु योजयेत् ॥ दरदं शो
धयित्वा पश्चादम्लवर्गेणानिंवपत्रैश्च मर्दयेत् पातनयंत्रेणपातयेत् ॥ तद्भूतमलतश्चएवेव ॥ ॥ रसरत्नप्रदीपे ॥ कदर्थनेनैवनपुं
सकत्वमेवं भवेदस्य रसस्य पश्चात् ॥ वलप्रकर्षाय च दोलिकायां स्वेद्योजलेसैन्धववन्हिगर्भे ॥ वंध्याहिनेत्रांवुजमार्कवाणां समिक्त
कानांदिवसद्वैके ॥ स्विन्नस्थिरत्वंलभजेग्नितोयेसकांजिके दीप्तियुतोतितिक्षा ॥ सहस्रनिंबूफलतोयघृष्टो रसो भवेद्वह्नि
समप्रभावः ॥ सप्तोपहिंगूलवणाः सचित्रकोसरामठो विंशतिवासराणि ॥ दीपितं रसराजं तु जंवीररससंयुतं ॥ दिनैकं धा
रयेत् घर्मेमत्पात्रेवाशिलोद्भवेत् ॥ ॥ अथोपरसः ॥ ॥ तत्रगंधकशोधनं ॥ लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्

॥ तप्ते घृते तत्समानं क्षिपे गंधकजं रजः ॥ विद्रुतं गंधकं ज्ञात्वा दुग्धमध्ये विनिक्षिपेत् ॥ एवं गंधकशुद्धिः स्यात्सर्वकर्मसु योजये-
त् ॥ प्रसंगात्सर्वधातूपधातूपरसादीनां शोधनमारणं ॥ रसेंद्रचिंतामणौ रसी भवति लोहानि मृतानि शुद्धं वदिते ॥ विनिघ्नंति
जराव्याधीन् रसयुक्तानि किं पुनः ॥ स्वर्णताराररताम्रायपत्राणग्नौ प्रतापयेत् ॥ निषिंचेत्तप्ततप्तानि तैले तक्रे गवां जले ॥ कांजिके
च कुलत्थानां कषाये सप्तधा पृथक् ॥ एवं स्वर्णादिलोहानां विशुद्धिः संप्रजायते ॥ नागवंगौ प्रतप्तौ च गालितौ तौ निषेचयेत् ॥
सप्तधैवं विशुद्धिः स्याद्रविदुग्धे च सप्तधा ॥ मतांतरे तप्तानि सर्वलोहानि कदलीमूलवारिणा ॥ सप्तधानि विशुद्धानि शुद्धिमा-
यांतिनुत्तमां ॥ मारणं ॥ शुद्धसूतसमं स्वर्णं खल्वे कृत्वा तु गोलकं ॥ ऊर्ध्वाधो गंधकं दत्वा सर्वतुल्यं निरुध्य च ॥ त्रिंशद्वन्योत्पलै-
र्दयेपुटान्येवं चतुर्दशः ॥ निरुत्थं जायते भस्म गंधो देयः पुनः पुनः ॥ विधाय पिंडिं सूतेन रजतस्याथ मेलयेत् ॥ तालकं गंध-
कं पश्चात्मर्दयेन्निंबुकद्रवैः ॥ द्वित्रिपुटैर्भवेद्भस्म योज्यमेतद्यथादिषु ॥ अन्यच्च ॥ गंधेन ताम्रतुल्येन ह्यम्लपिष्टेन लेपयेत्
कंठवेध्यं ताम्रपात्रं मर्दयित्वा पुटे पचेत् ॥ उद्धृत्य चूर्णयेत्पश्चात्पादांशं गंधकं क्षिपेत् ॥ पाच्यं जंभांभसा पिष्ट्वा पुटमेकं प्रदापये-
त् ॥ शितशर्करयाप्येकं पुटो देयं मृतो भवेत् ॥ अन्यच्च ॥ जंबीररससंपिष्टं रसगंधकलेपितं ॥ ताम्रपात्रं शरावस्थं त्रिपुटैपचिति
भस्मतां ॥ इति ताम्रमारणं ॥ वन्योपलोपरिस्थे तु गोस्तिखंडे क्षिपेद्रजः ॥ तिंतिणीवल्कलस्याथ तिलांतत्रविनिक्षिपेत् ॥ अं

गुल्याईप्रमाणेन तत्र वंगदलं न्यसेत् । एवं द्वी कृतं पुनस्तेन कमेणैव गात्र विन्यसेत् ॥ तिलं तिन्तिणीवल्कं च गोमयं वाग्निना दहेत् ॥ खांगं शीतं ततो दह्यं गुञ्जा वंगस्य भस्मनात् ॥ अन्यच्च ॥ तांबूलरससंपिष्टं शिलालेपात् पुनः पुनः ॥ द्वात्रिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते ॥ इति वंगमारणं ॥ क्षिपेद्वादशमासेन दरदं तीक्ष्णचूर्णितं ॥ मर्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत् ॥ एवं सप्तपुटैर्मृत्युलोहचूर्णमवाप्नुयात् ॥ इति लोहमारणं ॥ राजरीतिस्तथा घोषं ताम्रवन्मारयेद्भिषक् ॥ ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकं ॥ इति सप्तधातुशोधनमारणं ॥ अथोपरसा ॥ रसास्तान्प्रदीपन्तु ॥ शुद्धस्यात्तालकं स्विन्नं कूष्माण्डशलिलेन ॥ चूर्णोदके पथक्केले भस्मीभूतो न दोषकृत् ॥ मातुलुंगजलैः पिष्ट्वाजपानीरैः मनःशिलां ॥ सप्ताहं स्वेदितः शुद्धो रसको नरवारिणा ॥ ओतो विष्टा समं तुत्थं सक्षौद्रं टंकणां घृयुक् ॥ त्रिधैवं पुटितं शुद्धं वामिभ्रांतिविवर्जितं ॥ भावितो विमलागर्भे जंबीरद्वारिणा ॥ मेषशृंगं पंचनाद्य, श्वोश्चद्रुककोटिकाजलैः ॥ तुर्यांशसंभवोपेतं माक्षिकं मर्दयेद्दृढं ॥ बीजपूरांबुनादग्धं सम्यक्पात्रे च लोहजे ॥ स्थापयेदग्नियोगेन यावद्धोहि न तां व्रजेत् ॥ ताम्रवर्णं भवेत्तत्तु तावच्छुध्यति माक्षिकं ॥ अम्लद्रवेण संपिष्टो दरदो माहिषेण च ॥ दुग्धेन सप्तधा पिष्टो श्लक्ष्णीभूतो विशुध्यति ॥ गोदुग्धस्तु फलाम्लंगद्रवैः पिष्टं शिलाजतु ॥ दिनैकं लोहजे पात्रे शुद्धिमायात्यसंशयं ॥ त्रिदिनं कांजिके क्षिप्तः शुद्धिःस्याद्विषतिंदुकः ॥ अक्षाग्निदग्धं गो-

मूत्रंसिक्तंलोहमलंतुशुचिः॥ कृष्णाभ्रकंधमेद्वह्नौततः क्षीरेविनिक्षिपेत्॥ भिन्नपत्रंतुतत्कृत्वातंडुलीयाम्लयोर्द्रवैः॥ भावयेदष्टयामंतदेवमभ्रंविशुध्यति॥ पादांशंशालिसंयुक्तंमभ्रंवध्वाथकंवले॥ त्रिरात्रंस्थापयेन्नीरेस्नात्क्लिन्नंमर्दयेत्करैः॥ कंवलाद्गलितंश्लक्ष्णंवालुकारयितंचयत्॥ तद्धान्याभ्रमितिप्रोक्तंसद्भिर्देहस्यसिद्धये॥ कंकुष्ठंगैरिकंशंखंकाशीसंटंकणंतथा॥ नीलांजनंशुक्तिभेदाः क्षुल्लकाःसवराटकाः॥ जंवीरवारिणास्विन्नाःक्षालिताकोष्णवारिणा॥ शुद्धमायांत्यमीयोग्याभिःषड्भिर्योगसिद्धये॥ उपरसादिशुद्धिः॥ दुग्धत्रयंनरजलंवरकंन्यकांवुगंगाजलंसवटशृंगमजस्यरक्तं॥ सभिर्विभाव्यगमनंविमलंविशुद्धंभस्मीभवेत्कथितपर्ययैश्चपुटैर्यथावत्॥ निश्चंद्रंभजतेतत्तुशुद्धदेहेरसायने॥ रसेंद्रविंतामरोगेतु॥ शुद्धत्वम्लेनमारिणाकंजयंत्यामौक्तिकंतथा॥ विद्रुमक्षारवर्गेणतार्क्ष्यंगोदुग्धतःशुचिः॥ पुष्परागंचसंधानैःकुलत्थक्वाथसंयुतैः॥ तंडुलीयजलैर्वज्रंनीलंनीलरसेनच॥ रोचनाभिश्चगोमेदंवैडूर्यंत्रिफलाजलैः॥ नवरत्नशुद्धिः॥ कुमार्यातंडुलीयेनस्तन्येनचनिषेचयेत्॥ प्रत्येकंसप्तवेरंचतप्ततप्तानिकृत्स्नशः॥ मौक्तिकानिप्रवालानितथारत्नानिशेषतः॥ क्षणाद्विविधवर्णानिशुध्यंतेनात्रसंशयः॥ हिंगुसैन्धवसंयुक्ते क्वाथेकौलत्थिकेक्षिपेत्॥ तप्तंतप्तंपुनर्वज्रंभूयाच्चूर्णंत्रिसप्तधा॥ वैकांतंवज्रवच्छोध्यंमारयेद्वज्रवत्ततः॥ नवरत्नमारणं॥ विषंतुखंडशःकृत्वावस्त्रखंडेनिवंधयेत्॥ गोमूत्रेनिःक्षिपेद्भांडेस्थापयेदातपेत्र

हं ॥ ततो द्रुत्यमले न्यस्य महिषेदरधमुद्रितं ॥ करीषाग्नौ पचेद्यामं वस्त्रपूतं विषं शुचिः ॥ रक्तसर्षपतैलाक्तं तथा धार्यं च वाससी ॥ ॥
विषशोधनं ॥ रसं विना तु यं सामे ज्वरे दद्याच्च भेषजं ॥ तद्रोगो वाप्यपक्वे वा भूयो वर्द्धयति ज्वरं ॥ भेषजं कार्यं ॥ तस्मात्पूर्वं रसं देय
ततः कल्कादि चूर्णकमित्यादि ॥ अथ नवज्वरे रसाः ॥ विषं टंकं वरिक्ष दंतीवीजक्रमाद्वहु: ॥ दंत्यंबु मर्दितं यामं रसस्त्रिपुर
भैरवः ॥ वल्लो व्योषेण चार्द्रस्य रसेन सितया सह: ॥ दत्तो नवज्वरं हंति मांद्यामानिलशोथहा ॥ हंति शूलं सविष्टंभमर्शांसि क्रि
मिजान् गदान् ॥ पथ्यं तक्रेण भुंजीत रसे स्थिरोगहारिणि ॥ त्रिपुरभैरवरसः ॥ ताम्रभस्म विषं हेम्नः शतधा भावितं रसैः
॥ गुंजार्धांशं जयेत्सन्निपातं वापि नवज्वरं ॥ ताम्रभस्म विषं स्वर्णभस्म समभागं कृत्वा आर्द्रकरसेन शतधा भावयेत् ॥ अस्य
मात्रा गुंजार्द्ध आर्द्रवृशर्करासिंधुयुतः स्वच्छंदभैरवः ॥ इक्षुजाक्षामि माभिर्वा दधिपथ्यं हितो ददेत् ॥ स्वच्छंदभैरवरसः ॥ ताम्रं
पत्रवत्सं प्रतप्य वहुशो निर्वाप्य पंचाम्लतैगोमूत्रेग्निजले च तद्विशोधिते म्लेछे न पिष्टं भवा ॥ लिप्त्वा सम्नम् दंष्ट्रकैरथ पुनः
सार्द्धयामं पचेद्यंत्रे नावणकेन नवज्वरारिपुः स्याद्गुंजयासंमिता ॥ शुद्धताम्रपत्रं लिप्त्वा शरावपुटे ध त्वाम हस्ते लेपयित्वा लव
णपूरितयंत्रे प्रहर ८ पाचयित्वा स्वांगशीतं धृत्वा चूर्णयित्वा मात्रा गुंजा १ आर्द्रकरसेन दद्यात् ॥ ॥ नवज्वरारिपुरसः ॥ ॥
भवेत्समं सूतसमुद्रफेनहिंगुलगंधं परिमर्द्य यामं ॥ नवज्वरे वल्लयुगं त्रिघस्रमसामामे हं समायं ज्वरधूमकेतु ॥ ज्वरधूमकेतुरसः ॥ ॥

सूताभ्रताम्रस्वर्णानिगंधंचार्द्धशिलोहकं॥ लोहार्द्धमतवैक्रांतंमर्दयेभृंगजैर्द्रवैः॥ पर्पटीरसवैत्पाज्यं चूर्णितंभावयेत्पृथक्॥ शिग्रु
वासवनिर्गुंडीगुडूचीत्राग्निभृंगजैः॥ क्रुडार्कंजीजयंत्याथमुनीब्राह्मीथत्रिकके:॥ कंन्यायांश्चद्रवैर्भाव्यंत्रिवारंतुपृथक्पृथक्॥ ततो
लघुपुटेपक्वंस्वांगशीतंसमुद्धरेत्॥ माषोदनकणाधान्यपक्कं वाभिन्नवज्वरे॥ पारदअभ्रकभस्म· ताम्रभस्म·सुवर्णभस्म·एतेसमभा
गाः सर्वविषरोगंधकं॥ गंधार्द्धलोह· लोहार्द्धमतवैक्रांतंभृंगराजरसेनमर्दयेत्॥ द्वोषयित्वापर्पटिकृत्वापुनः चूर्णयेत्॥ पर्पटीवि
धिः॥ वदरिकाश्वज्जंनिधूमंवह्नौलोहपात्रेद्रावयित्वागोमयेनमंडलंकारयित्वातदुपरिकदलिपत्रं॥ तस्योपरिढालयित्वातदुपरि
पत्रंदत्वोपरिमयंदत्वाशीतलंग्राहयेत्॥ ततश्चूर्णयित्वाआसांद्रवैस्त्रिवारंपृथग्भावयेत्॥ शिग्रु·वासक·निर्गुंडी·गुडूची·वचा·चि
त्रक·भृंगराज·कंटकारि·मुंडी·अग्निमंथ·अगस्ति·ब्राह्मी·कटुरोहिणी·कंन्याया· दिवसः३।३ततः लघुपुटंदत्वा· स्वांगशीतमुद्धृत्य
पिष्टामात्रामाषमात्रअनुपानेन· पिप्पलीधान्यकाथेनपाययेत्॥ कर्यीज्वरविनिर्मुक्तंरोगिरोगाघटिकाद्वयात्॥ अयंरत्नगिरिर्नामरसोयंयोग
वाहिकः॥ रत्नगिरिरसः॥ मुक्तान्तंमुक्तपूर्वंवासनीरंतक्रभक्तकं॥ रसेचोक्तंपथ्यमस्मिंशाकंसर्वज्वरोदितं॥ मूर्छितोसुतोभावेशुद्धसूतए
वग्राह्य॥ तत्प्रकारोयथा॥ सूतंक्षाराम्लमूत्रैर्वसनपरिहृतः स्वेदितोष्टौतुयामान्कन्याछुहार्कदुग्धैः त्रिफलजलयुतैर्मूर्छितःसप्तवारान्पा
दांशार्केनयुक्तःसमगगनयुतः॥ तुत्थताप्येनवासाउर्ध्वंपात्यस्त्रिवारंभवतिकिलततःसर्वदोषैर्विहीनः॥ अशुद्धपारदःक्षारा·अष्टक्षार

अम्लवर्गे· मूत्रवर्गे· दोलायंत्रेण· अष्टौयामानि स्वेदितः पुनः कन्यारसेन स्नुहिक्षीरेण अर्कदुग्धेन त्रिफलारसपुटैः सप्तवारान्मूर्छि
त पुनः पादांशं ताम्रचूर्णं धान्याभ्रकचूर्णं पुटं अथवा ताप्यचूर्णेन पुटं पातनयंत्रके पात्य ऊर्द्ध· अध· तीर्यक् पात्यं शुद्धो भवेत् ॥ इत्यादि
सूतश्चित्रकरक्तागिरि अत्वेन मूलकंटकर्णं शुद्धगंधचूर्णं समं समं ॥ सूताद्विगुणितं देयं जैपालं तुषवर्जितं ॥ सैन्धवं मरिचं विंबा त्वग्
भस्म शर्करापिव ॥ प्रत्येकं सूततुल्यं स्याज्जंवीरै मर्दयेद्दिनं ॥ द्विगुंजं तप्ततोयेन वात श्लेष्मज्वरापहं ॥ सूटंतेकण· गंधक· समभा
गं· जैपालवीज रसैन्धव· मरिच· विंवाभस्म· शर्करा ३ ॥ तत्रांतरे तु सूर्यसेषनामा परं जो गजाह्यो क्विते तिपाठः ॥ प्रत्येकमेकैकं
जंवीररसेन मर्दनं मात्रा रत्ति ३ रससीतारि नामायं शीतज्वरहरः परः ॥ शीतारिरसः ॥ तुल्यांशं मर्दयेत्खल्वे पिप्पली हिंगुलं विषं
॥ द्विगुंजं मधुना देयं वातज्वरनिवारणं ॥ हिंगुलेश्वररसः ॥ रक्तचंदन ह्रीवेर पाठाशीरकणां शिवा ॥ नागलोत्पल धात्रीमिश्रि
मर्दनसमन्वितं ॥ लोहानि हंति विविधान्समस्तान्विषमज्वरान् ॥ विषमेश्वथा ॥ मुस्ताचित्रकविडंगानि मिलितानि त्रिमदस्मृतः ॥ विष
मज्वरांकुशो लोहः ॥ रसहिंगुलगंधं च जैपालं मर्दितं त्रिभिः ॥ दंतिक्वाथेन संपिष्य रसो ज्वरहरं परं ॥ आर्द्रकस्य रसेनाथ दापये
द्रक्तिकाद्वयं ॥ नवज्वरमहाघोरं नाशयेद्याममात्रतः ॥ शर्करादधिभक्तं च पथ्यं देयं प्रयत्नतः ॥ शीततोयं पिवेद्वातुरश्रभगद्दरसो
हितः ॥ शीतमंजीररसो नाम सर्वज्वरकुलांतकृत् ॥ शीतमंजीररसः ॥ शुद्धसूतं तथा गंधं लोहं ताम्रं वशीसकं ॥ मरिचं पिप्पली विश्वं

समभागानि चूर्णयेत् अर्द्धभागं विषं दत्वा मर्दयेद्वासरद्वयं ॥ शृंगवेरानुपानेन दद्याद्गुंजाद्वयं भिषक् ॥ नवज्वरे महाघोरे वातसंग्रह
णीगदे ॥ नवज्वरेभसिंहोयं सर्वज्वरे प्रशस्यते ॥ नवज्वरेभसिंहरसः ॥ शुद्धसूतं समं गंधं मरिचं टंकणं तथा ॥ चतुस्तुल्यासिता
योज्या मत्स्यपित्तेन भावयेत् ॥ त्रिदिनं मर्दयेत्तेन रसोयं चंडेश्वरः ॥ हिंगुजमार्द्रकद्रावे देयं शीतोदकं पुनः ॥ तक्रभक्तं च वृंताकं
पथ्यं तत्र निधापयेत् ॥ त्रिदिना श्लेष्मपित्तोत्थं मन्युग्रं नाशयेज्ज्वरं ॥ चंडेश्वररसः ॥ सूतं गंधं विषं तुल्यं धूर्त्तबीजं त्रिभिः समं
॥ चतुर्णां हि गुणं व्योषचूर्णं गुंजाद्वयोन्मितं ॥ जंबीरकस्य मज्जाद्भिरार्द्रकस्य रसैर्युतं ॥ महाज्वरांकुशो नाम ज्वराणां मूलकृंतनं ॥ ए
काहिकं द्याहिकं चैव तृतीयकचतुर्थकं ॥ रसोदत्तोनुपानेन ज्वरान्सर्वान्व्यपोहति ॥ महाज्वरांकुशरसः ॥ आरं कांस्यं समं ताम्रं त्रिभिस्तु
ल्यतु गंधकं ॥ रसेनेमेघनादस्य पिष्टारुध्वा पुटे पचेत् ॥ संचूर्ण्य पर्णखंडेन दातव्यो विषमापहा ॥ अत्र मात्रा द्विगुंजा स्यात्पथ्यं दुग्धौ
दनं हितं ॥ पंचाम्रतपलं चैकमनुपानं प्रयोजयेत् ॥ मेघनादरसः ॥ रसम्लेच्छशिलातालं श्वंड्र- ग्न्यर्कभागिका ॥ पिष्ट्वा तान्मुशली
तोयैस्ताम्रपात्रोदरे क्षिपेत् ॥ न्यब्जं शरावेणालुध्य वालुकामध्यगं पचेत् ॥ स्फुटंति व्रीहयो यावत्तद्भिरस्याश्मनैः शनैः ॥ सचूर्ण्य शर्क
रायुक्तं द्विवल्लं संप्रयोजयेत् ॥ पारद १ दरद १ मनशिला ३ हरिताल ॥ ताम्रपत्र १२ रसादित्रयमुशलीतोयेन पिष्टा ताम्रपात्रादरे लुध्वा
वालुकायंत्रे पचेत् ॥ यावद्धान्यस्फुटंति तावत्कालं पचेत् ॥ स्वांगशीतं निनित्वा संचूर्ण्य· मात्रा द्विवल्ल शर्करायुतं भक्षयेत् ॥ विद्यावल्लभ

॥सान्यद॥
॥११७॥

रसः॥ रसंकतालकंतुत्थंपारकंगंधटंकणं॥ सर्वमेतत्समंशुद्धंकारवेल्लीद्रवैर्दिनं॥ मर्दयेत्तेनकल्केनताम्रपात्रोदरेक्षिपेत्॥ अंगु
ल्यार्द्धमानेनतंपचेत्सिकताह्वये॥ यत्रेतावत्स्फुटत्येवव्रीहयस्तस्यपृष्ठगः॥ ततस्तंशीतलंग्राह्यंताम्रपात्रोदराभिषक्॥ शीतभं
जिरसोनामचूर्णयेन्मरिचैःसमं॥ माषैकंपर्णखंडेनभक्षयेन्नाशयेज्ज्वरं॥ खपरिया· तालक· तुत्थ· पारद· गंध· टंकण· स
र्वेसमभागं· कारवेल्लीद्रवैर्दिनेमर्दयित्वा· सर्वसमशुद्धत्वाताम्रपत्रोदरे· तेनकल्केनलेपयेत्॥ घर्मेशोषयेत्· सरावेधृत्वावा
लुकायंत्रेपचेत्॥ यावद्धान्यस्फुटंतितावत्पचेत्स्वांगशीतंधृत्वा· मरिचैःसमंविचूर्ण्य· माषमात्रंताम्बूलपत्रेणसहभक्षयेत्
॥ त्रिदिनैर्विषमंतीव्रमेकंद्वित्रिचतुर्थकं॥ शीतभंजीरसः॥ गंधेशाभ्रंपृथग्वेदभागमन्यच्चभागिकं॥ स्वर्जिटंकयवक्षाराः
पंचैतलवणानिच॥ वराव्योषंडवीजातिद्वीजीराग्नियवानिका॥ सहिंगुवीजसारंचशतपुष्पासुचूर्णिताः॥ गंधकरसअभ्रक
पृथक्सर्वे४।८ स्वर्जिक्षार· टंकण· यवक्षार· सैन्धव· सौवर्चल· सामुद्र· विडंगड· त्रिफला· त्रिकटु· इंद्रयव· जीरक· कृ
ष्णजीरक· चित्रक· यवानिका· हिंगु· विजयसार· शतपुष्पापृथक्सर्वकर्ष१।१ मात्रारत्ति ९ तांबूलपत्रेणभक्षयेत्॥ सिद्धप्रा
णेश्वरः· सूतःप्राणिनांप्राणदायकः॥ माषैकंभक्षयेदस्यनागवल्लीदलैर्युतं॥ ऊष्णोदकानुपानंतुदद्याद्वपलद्वयं॥ ज्वरा
तिसारेतिश्रेतोकेवलेवाज्वरेपिच॥ घोरेत्रिदोषजेघोरेग्रहण्यामग्रगामये॥ वातरोगेचशूलेचशूलेचपरिणामजे॥ सि

॥रामः॥
॥११७॥

ऽपारोश्वररसः ॥ पंचभिर्लवणैः सूतं त्रिभिः क्ष्पात्लैस्तथैव च ॥ मर्दयेद्दोषनाशाय यग्राधिकाविधिर्यथा ॥ एवं संशोध्य सूते
न्द्रे राजिकाहिंगुशुंठिभिः ॥ चूर्णितैः पिंडिकां कृत्वा तन्मध्ये सूतकं क्षिपेत् ॥ ततस्तां स्वेदयेत्पिंडिं वस्त्रे बध्वा तु कांजिके ॥ दोला
यंत्रेण तां यत्नात्स्वेदयेद्यामचतुष्टयम् ॥ एवं शुद्धरसं कृत्वा क्रमेणानेन मर्दयेत् ॥ गिरिकर्णी तथा भृंगवारि निर्गुंडिका तथा ॥ ज
यंति शृंगवेरं च मंडूकी चलछदा ॥ काकमाचीतथोन्मत्तो रुद्रकं च ततः परं ॥ एतासामोषधीनां च रसतुल्ये रसे क्रमात् ॥ त
तस्तत्सूतराजस्य कार्या मरिचमात्रिका ॥ वटिका सन्निपातस्य निकृन्त्यर्थीभिषग्वरैः ॥ इत्ययं लोकनाथेन संनिपातनिकृन्तये
॥ कीर्तिता गुटिका पुण्या दृष्टप्रत्ययकारिणां ॥ इयं प्राप्य वटिं यस्मात्सन्निपातान्न नश्यति ॥ मयूरमीनवाराहछागमाहिषसं
भवैः ॥ प्रत्येकं वार्थसर्वैर्वा भावितानोविदयं भवेत् ॥ खालयेत्तत्रतोयानि सुशीतानि वहाग्निव ॥ पंचलवणैस्त्रिक्षारैश्च जंबीराम्लद्र
वं दत्वा विमर्दयेत् ॥ ततः राजिका·हिंगु·शुंठिभिः पिष्ट्वा पिंडिकां कृत्वा ॥ तन्मध्ये सूतं क्षिप्त्वा वस्त्रे बध्वा भांडे कांजिकं दत्वा दो
लायंत्रे यामचतुष्टयं ४ पश्चात्तप्तोदकेन प्रक्षाल्य ॥ खल्वे क्षिप्त्वा प्रत्येकं ओषधिरसं दत्वा मर्दयेत् यथा ॥ अपराजिका·भृंग
राज·निर्गुंडी·अग्निमंथ·आर्द्रक ब्राह्मि तिलपर्णी·काकमाची·धत्तूर·एरंड·एतासां रसैः पृथक् मर्दयेत् ॥ मानं तु रसस्य समा
नं तस्य वटिकां कुर्यात् ॥ मरिचप्रमाणा·सन्निपाते दद्यात् ॥ अथवा·मयूरपित्त·मत्स्यपित्तः वराहपित्त·छागपित्त·माहिषपि

॥सान्मद॥
॥११८॥

त्रैःप्रत्येकंवासर्वैर्वा·माचित्वा·क्षालयित्वा·चदद्यात्॥ पद्मपित्तवधरसः॥ अनुपानंतुगात्रुरूपंपथ्यंतुदक्तवत्॥ शर्करादविसंयु
क्तंभक्तमस्मिन्प्रदापयेत्॥ इक्षवक्षनथायोज्यारसवीर्यविवृद्धये॥ शीतद्रव्यैर्भवेवीर्य्यंपित्तवद्धेमहारसः॥ लोकनाथरसः
॥ रस·गंधकमनशिलास्वर्णमाक्षिकंतुत्थसमुद्रफल·टंकण·जयपालवीजं·विषंसमभागंचूर्णितं॥ अहिपित्तेनत्रि
धारंभावितं·सिद्धेरसे॥ नद्वरःशिरसि·क्षुरेणप्रछयित्वारुधिरेदापयेत्॥ त्रिदोषमहारिस्यात्॥ त्रिदोषहारिरसः
॥ ॥द्वौकर्षौगंधकोग्राह्योसूतकात्रौतथैवच॥ पत्नतस्तुभयंभर्द्यंहंसपादिरसैर्दिनं॥ कल्कस्यवटिकांकृत्वाक्षिपेत्काच
नाभाजने॥ कर्षैकममृतंतत्रक्षिप्त्वावक्रेनिरोधयेत्॥ कूपिकायापरौभागोवालुकाभिश्चपूरयेत्॥ अहोरात्रंभवेत्सार्द्धमा
वत्तत्रपचेद्रसं॥ दीपमात्रंसमारभ्यःपावकंवर्द्धयेच्छनैः॥ स्वांगशतलनांज्ञात्वासमाकृष्यरसंततः॥ तोलार्द्धमरिचंदत्वातो
लार्द्धममृतंतथा॥ भक्षयेद्रक्तिकामेकांसर्वरोगविनाशिनी॥ रसकर्ष२ गंधककर्ष२ कज्जलिकांकृत्वा·हंसपदीरसैर्विम
र्द्दनपर्यंतंतस्यवटिकांकृत्वा॥ काचकूपिकायांसप्तभिर्मृत्तिकाभिर्लिप्त्वानिक्षिप्यतत्रकर्षैकंविषंचूर्णयित्वाक्षिप्त्वाखटि
काभिर्मुद्रैश्चमरवंमुद्रयित्वा॥ वालुकायंत्रेदीपमात्रंवाग्निंदत्वाद्वादशप्रहरंपचेत्॥ स्वांगशीतंगृहीत्वापुनःकर्षार्द्धविषंद
त्वामर्दयित्वावटिंकृत्वानत्तोगनुपानैःरक्तिका१मात्रादेयाः॥ सन्निपातंतथावातंशूलमंदाग्निनामपि॥ नाशयेग्रहणीं

॥राम॥
॥११८॥

त्मक्षयपांडुगदानपि ॥ अग्निकुमारो रसः ॥ अष्टगुणं रसराजं गंधैकं तावदेव विषतैलं दत्वा ॥ दत्वा लवणं मद्दिया कजली
भवति यावत् ॥ रसकर्ष ८ गंधककर्ष ८ विषकर्ष ८ तिलतैलकर्ष १ सैन्धवकर्ष १ दत्वा मर्दयेत् ॥ मात्रा रत्ति १ मंदाग्नि संनिपात
व्रणो कुष्ठादीन् महारोगान् अपहरति नीलकंठसूतोयं कांतिपुष्टिकरः ॥ नीलकंठरसः ॥ सूतं गंधकमभ्रकं सममलं सूतार्द्ध
भागं विषं तत्त्र्यंशं जयपालमम्लमर्दितं तत्कोलकैर्वेष्टितं ॥ यंत्रे मंजुभुजंगवल्लिजनितैर्निक्षिप्य खादेपुतं ॥ दत्वा कुक्कुटसंज्ञ
कं सह दलैः संचूर्ण तत्र क्षिपेत् ॥ भागार्द्ध जयपालवीजममृतं तत्तुल्यमेकीकृतं गुंजा नागरसिंधुचित्रकयुता सर्वाज्वरानाश
येत् ॥ रसः गंधक· अभ्रकं· समं सूतार्द्ध विषं जयपालवीजं त्रिभागं· अम्लद्रवमर्दितं गोलकं कृत्वा तांबूलपत्रे वेष्टयित्वा· ततः कु
क्कुटपुटे दत्वा चतुर्भिर्वनोत्पलैः पुटे देयः ततः स्वांगशीतं गृहीत्वा· अर्द्धभागं अमृतं· जैपालं च मिश्रयित्वा· मात्रा गुंजा १ अनुपा
नं च रोगानुरूपं ॥ शूलं संग्रहणीगदं सजठरं दध्मानसमेवितं ॥ तापे सेवनकारि रोगगदवतां सूतस्य चिंतामणी ॥ अयमेव रसो
देयो मतकल्पो गदांतरे ॥ संनिपाते तथा वाते त्रिदोषे विषमज्वरे ॥ अग्निमांद्ये ग्रहण्यां च शूले वातिमतो पुनः ॥ शोथे वाध्मा
नि उष्टाग्नि वाते सामे नवज्वरे ॥ चिंतामणिरसः ॥ रसेन गंधं द्विगुणं प्रगृह्य तत्पादभागं रविनारहेमं ॥ भस्मीकृतं तैर्योज्यच मर्दये
न दिनत्रयं वह्निरसेन घर्मे ॥ विषं च दत्वात्र कलाप्रमाणं मजादिपित्तैः परिभावयेच ॥ वल्लद्वयं वास्य ददीत वह्नीकटुत्रयार्द्रद्रवसंप्र

॥ सान्पद· ॥
॥ ११९ ॥

युक्तं ॥ रसपल १ गंधकपल ८ ताम्रकर्ष १ तारकर्ष १ हेमकर्ष १ त्रिदिनं वह्निरसेन मर्दयेत् ॥ तत्र विषं धरणामात्रं क्षिप्त्वा · मत्स्यपित्ते
अजापित्तैर्मयूरपित्ते श्च भावयेत् ॥ मात्रा रत्ति ६ तैलेन वाभ्यक्तवपुश्च कुर्यात्स्नानं जले नापि वशीतलेन ॥ यावद्भवेदुःसहशी
तमस्य मूत्रं पुरीषं वशरीरकंपाः पथ्ये यदि ह्यपरि जायतेस्य मरीचखंड दधिभक्तकं च ॥ स्वल्पं ददीतार्द्रकमत्स्यशाकं दिना
ष्टकं स्नानविधिं च कुर्यात् ॥ संनिपातसूर्यरसः ॥ ॥ ये रसपित्तासंयुक्ताः प्रोक्ताः सर्वत्र संयुता ॥ जलमेकावगाहाद्येवलितंत्रे
तु नान्यथा ॥ सयथा ॥ रसेन गंधिगुणं कृशानुरसैर्विमर्द्याष्टदिनादिघर्मैः ॥ रसाष्टभागं द्विगुणं च दत्वा विमर्दयेद्वह्निजले
न किंचित् ॥ पित्तैस्तु संभावित एष देयस्त्रिदोषनिर्हारविनाशसूर्यः ॥ रस १ गंधक २ चित्रकरसैः दिनाष्टकंयर्मे स्थितमर्दयेत्ता
तः रसाष्टभागं रसस्य अष्टभागं · रसाष्टभागं द्विगुणं ॥ रसस्य पादं मत्स्यपित्तं पुनरपि चित्रकतोयेन मर्दयेच्च सिद्धं भवति ॥ अ
त्र मात्रा वल्ल २ · अनुपानमार्द्रकरस त्रिदोषनिर्हारसूर्यरसः ॥ त्र्यूषणं पंचलवणं त्रिक्षारं जीरकद्वयं ॥ शताह्वागंधसूताभ्रयामं
सर्वं विमर्दयेत् ॥ चित्रकार्द्रकसिंधूत्थैः पंचगुंजैः प्रयोजयेत् ॥ सन्निपातज्वरादौ तु सामे जीर्णे तु वैज्वरात् ॥ पानीयं पाययित्वा
तु निर्वाते स्थापयेत्ततः ॥ दधिभक्तं प्रदातव्यं क्षुधिहीने तु पुनर्ददे ॥ आमवाते च मंदाग्नौ प्रयुंजीत यथाविधिः ॥ सन्निपात—ला
नलरसः ॥ शुद्धसूतं मृतं ताम्रं समं गंधकटंकणं ॥ जंबीरफलमध्यस्थं दोलायंत्रे पचेद्दिनं ॥ मर्दयेद्भावयेद्भावैः शिग्रुवासार्द्रकैर्त्रिं

॥ राम ॥
॥ ११९ ॥

वज्रैः॥ सर्पाक्षिविजयीब्राह्मीमीनाक्षीहंसपादिका॥ हस्तिशुंडीरुद्रजटाधूर्त्तवानारिवायसा॥ दिनैकं मर्दयेदासां लोहसंपुटगं पचे
त्॥ दिनैकं वालुकायंत्रे समुद्धृत्य विचूर्णयेत्॥ तालकं दिप्यकं व्योषं विषं चित्रकजीरकौ॥ एभिः रससमैर्मिश्रं त्रिगुंजं भक्षयेत्सदा
॥ सन्निपातज्वरं हंति शूलपूर्ष्वादिशिनपरं॥ भैरवो रसः॥ सूतभस्मसमं गन्धं गन्धपादां मनःशिला॥ माक्षिकं पिप्पली व्योषं प्रत्ये
कं च शिलासमं॥ चूर्णयेद्भावयेन्नित्यं मत्स्यमायूरकैः क्रमात्॥ सप्तधा भावयेत्कुष्ठं देयं गुंजाद्वयं द्वयं॥ तालपर्णीरसं चात्र पंच
कोलमथापि वा॥ निहंति सन्निपातादीन् रसोयं जलयोगिका॥ जलयोगे विनाप्यत्र रसवीर्यं न वर्द्धते॥ जलयोगी रसः
॥ स्वर्णनागार्कपत्राणि गुंजापंच पृथक् पृथक्॥ त्रयाणां द्विगुणं सूतं जम्बीराम्लेन मर्दयेत्॥ पिष्टिकामिंवुकेक्षिप्त्वा दोला
यंत्रे दिनत्रयं॥ पाचयेदारनालेन तस्मादुद्धृत्य चूर्णयेत्॥ ऊर्ध्वाधो गंधकं दत्वा तालकं च रसोन्मितं॥ लोहसंपुटगं कृत्वा भांडे क्षि
प्रपूरयेत्॥ लवणस्य च चूर्णेन त्र्यहं मंदाग्निना पचेत्॥ आदाय चूर्णयेत्कुष्ठं दद्याद्गुंजाचतुष्टयं॥ शुद्धानि· स्वर्णपत्र· नागपत्र· ता
म्रपत्र· पृथक् गुंजाप त्रयाणां द्विगुणं सूतं॥ रत्ति ३० जंबीराम्लेन मर्दयेत्॥ तद्गोलकं कृत्वा निंबुमध्ये क्षिप्त्वा वस्त्रेणावेष्ट्य दोलायंत्रे
आरनाले दिनत्रयं पचेत्॥ ततरुद्धृत्य चूर्णयेत्॥ पुनर्गोलकं कृत्वा समखयां गंधक रत्ति ३० हरितालं च ३० चूर्णं कृत्वा ऊर्ध्वाधो
तच्चूर्णं दत्वा पुनर्लोहसंपुटे धृत्वा लवणापूरितयंत्रे त्रिदिनं पचेत् मंदाग्निना स्वांगशीतं समुद्धृत्य चूर्णयित्वा मात्रा रत्ति ४ दद्यात्।

आर्द्रकस्यरसोयेनंशिग्रुंपथ्यान्नदापयेत्॥ विश्वमूर्त्तिरसोनाम्नासन्निपातादियाप्यजित्॥ विश्वमूर्त्तिरसः॥ शुद्धसूतंद्विधागंधंसूत
तुल्यंमृताभ्रकं॥ निर्गुंडीकाकमाचीवधत्तूरार्द्रकचित्रकं॥ गिरिकर्णीजयंतीचतिलपर्णीचभृंगराट्॥ दंतिशिग्रूकदंवस्यकुसुम
स्यचकेशरं॥ जयाकृष्णामहाराष्ट्रिमर्द्यमासांडवैकमात्र॥ यामंपृथक्पृथक्विशोष्याथकटुतैलेनलोलयेत्॥ शरावसंपुटेरुद्ध्वावालुका
यंत्रगंपचेत्॥ यामैकंतत्समुद्धृत्यचूर्णितंकृष्णलात्रयं॥ सूत १ गंधकं २ अभ्रक १ खल्वेक्षिप्त्वामर्द्दयेत्॥ ततोनिर्गुंडीकाकमाचीधत्तूर
आर्द्रक· चित्रकअपराजिता· अग्निमंथतिलपर्णी· भृंगराज· दंती· शिग्रू· कदंव· कुसुम· केशरजयंतिपुष्प· पिप्पलि· महाराष्ट्रि
आसांडवै· पृथक्पृथक्मर्द्दयेत्॥ यामपर्यंतंपुनःकटुतैलेनमर्द्दयित्वागोलंकृत्वाशरावपुटेधृत्वावालुकायंत्रेयामपर्यंतंपचे
त् स्वांगशीतंसमुद्धृत्यचूर्णयित्वारक्तिकात्रयंमात्रादेया अनुपानमुक्तवत्॥ ऊषणंपंचलवणंत्रिक्षारंजीरकद्वयं॥ वचाडाग्नि
यमानीयसमभागानिकारयेत्॥ अनुपानेचतुर्माषंसन्निपातहरंपरं॥ माहिषंदधिपथ्यंस्याद्रसवीर्यविवर्द्धनं॥ साध्यासाध्येप्रयो
क्तव्योरसोयंवारिसागरः॥ वारिसागररसः॥ ऊषणंपंचलवणंशतपुष्पीद्विजीरकं॥ क्षारत्रयंसमांसेनचूर्णमेषापलत्रयं॥ शुद्धस
तंमृतंचाभ्रंगंधकंचपलेपलं॥ आर्द्रकस्यद्रवैःखल्वेदिनमेकंविमर्द्दयेत्॥ वीरभद्ररसख्यातोमाषैकंसन्निपातजित्॥ चित्रकार्द्रक
सिंधुत्थमनुपानंजलेनच॥ पथ्यंक्षीरोदनंदेयंद्विवारंचरसोहितः॥ वीरभद्ररसः॥ गंधेशार्कगवाक्षीरैस्त्रिमिस्तुल्यैःखरातपे॥

संमर्द्य शिग्रुकद्रावैर्दिनं गोलं विधाय तं ॥ त्रियामं वालुकायंत्रे चांधमूषागतं पचेत् ॥ संचूर्ण्य सर्वदक्षांशं विषं तत्र विमिश्रयेत् ॥ द्वित्रि
गुंजं त्रिनेत्राख्यं प्रदेयं सन्निपातजित् ॥ पंचकोलपिवेच्चानुपथ्यं छागपयः समं ॥ त्रिनेत्ररसः ॥ गंधेशटंकमरिचं विषं धत्तूरजद्र
वैः दिनं संमर्दितं शुष्कं पंचवक्त्ररसो भवेत् ॥ द्विगुंजमार्द्रनीरेण त्रिदोषज्वरहृत्परः ॥ पंचवक्त्ररसः ॥ सूतांधकलोहानि रौप्यं
संमर्दयेत्र्यहं ॥ सूर्यावर्त्तश्च निर्गुंडी तुलसी गिरिकर्णिका ॥ अग्निपर्णाडकं वह्नि विजयाथ जयासह ॥ काकमाचीरसैरासां
पंचविंशैश्च भावयेत् ॥ अंधमूषागतं पश्चाद्वालुकायंत्रगं दिनं ॥ आदाय चूर्णितं खादेन्माषैकं चार्द्रकंदुवैः ॥ रसगंधकलोहभ
स्म ॥ रामभागं कृत्वा· खल्वे क्षिप्त्वा वक्ष्यमाणैर्द्रवैर्मर्दयेत् ॥ सूर्यभक्ता· निर्गुंडी तुलसी· अपराजिता पृथक्पर्णी· आर्द्रक· चित्र
क· हरीतकी· अग्निमंथ· काकमाची भावयेत् ॥ पुनः पंचपित्तैर्मत्स्य· महिष· मयूर अजा· सर्पाणां पित्तैर्मर्दयेत् गोलं कृत्वा· अं
धमूषागतं· वालुकायंत्रे दिनं पचेत् ॥ मंदाग्नौ स्वांगशीतं समुद्धृत्य चूर्णयेत् ॥ मात्रा तु माषैकं निर्गुंडी दशमूलानां कषायं शोषणं पि
वेत् ॥ अभिन्यासं निहंत्याशु रसः स्वच्छंदनायकः ॥ छागीदुग्धेन मुद्गैर्वा पथ्यमत्र प्रयोजयेत् ॥ अभिन्यासहर स्वच्छंदभैरवरसः ॥ ॥
सूतभस्माभ्रकं तारं मुंडं तीक्ष्णालमाक्षिकं ॥ वह्निटंकणकं व्योषं समं संमर्दयेद्दिनं ॥ पाठानिर्गुंडिकायष्टिविल्वमूलकषायकैः ॥
ततो मूषागतं रुद्ध्वा विपचेद्भूधरे पुटे ॥ माषैकं दशमूलस्य कषायेन प्रयोजयेत् ॥ सूतभस्म· अभ्रक· कांतलोह· पित्तलमुंडलोहनी

॥ सान्मद ॥
॥ १२१ ॥

क्ष्णलोहं हरिताल·स्वर्णमाक्षिकं चित्रकटंकण·त्रिकटु सर्व्वसमभागं खल्वे मर्द्दनं पुन पाठा·निर्गुण्डी यष्टिमधु·विल्वमूलकं रसैर्मर्द्दयेन्
गोलं कृत्वा मूषरे यंत्रे पचेत् माषैकमात्रं भक्षयेत् ॥ अजनेनाथवा नस्यात्संनिपातं जयध्रुवं ॥ जयमंगलरसः ॥ मृतसूतार्कतीक्ष्णाभ्रटंक
णां स्वर्परं समं ॥ सव्योषमर्कदुग्धेन दिनं संमर्द्दयेद्दृढं ॥ अर्कक्षीरयुतेनस्यं सन्निपातहरं परं ॥ सूतभैरवरसः ॥ सूतं तीक्ष्णाकणागंधं ता
कांहीं जयपालकं ॥ सर्वं त्रिगुणितं जमवारिपिष्टं दिनाष्टकं ॥ नेत्रांजनेन हंत्याशु सर्वोपद्रवयुग्ज्वरं ॥ अंजनभैरवो रसः ॥ गंधशैलयुतं तां
म्रोभिमर्द्दयेद्यानमात्रकं ॥ तस्योदकेन संयुक्तं तस्येन त्वतिबोधकं ॥ मरिचेन समायुक्तं हंति तंद्राप्रलापकान् ॥ मोहान्धसूर्यरसः सूतभस्मविषं
॥ ताम्रं जयपालयुग्गंधकं ॥ हेमतैलेन संमर्घततोल घुघुटं ददेत् ॥ भावयेत्कनकद्रावैरत्नामाहिषमीजनैः ॥ पित्तैः पृथक् सममितं विषधू
मेन शोधयेत् ॥ सप्तवारं त्रिवारं वाप श्वादार्द्रकाभावयेत् ॥ रसचूडामणीसिद्धः साक्षाद्रुद्रीमेरवं महा ॥ तस्यास्य रक्तिकायुग्मं ज्याकुज्यार्द्रवार्द्र
निंवुयुक् ॥ महाघोरे सन्निपाते नवे वाप्यनवज्वरे ॥ जलावगाहनं कुर्यात्सेवनं व्यजनानिलं ॥ तत्क्षणान्मंगलस्नानं कुंकुमं चंद्रवन्दनं ॥ पथ्यं
यथेप्सितं स्वाद्यं स्वादुद्राक्षेक्षुदाडिमं ॥ सितासमभ्रकलमोकांजिकस्नानमेव च ॥ शूले गुल्मेऽग्निमांद्यादौ ग्रहण्युदरपाण्डुषु ॥ वाते सर्वां
गगे कांगेप्यनिले पित्तजे तथा ॥ प्रसूतिवाते वास्वानुपानैः प्रयोजयेत् ॥ रक्तदोषविनाचैनं योजयेद्वर्जयेदिह ॥ तैलाम्लराजीकामीनक्रोध
शोकाध्वसंक्रमं ॥ विल्वारनालखर्वीफलंहृनाकमैथुनं ॥ चूडामणीरसः ॥ पटुना पूरयेत्स्थालीं तन्मध्ये पटमृत्तिकां ॥ तन्मध्ये राम

सामेर

॥ राम ॥
॥ १२१ ॥

टभस्वं तन्मध्ये पारदं क्षिपेत् ॥ विषं निघृष्य सूतांशं वारिणा सम्मलोडितं ॥ वह्निं प्रज्वालयेच्चुल्ल्यां दृढं यामचतुष्टयं ॥ तद्भस्मा तिलमात्रं तु
दद्यात्सर्वेषु पात्रेषु ॥ लवणायंत्रे लवणाकृतमूषायां प्रवाहं गंधकरवयोपरिस्थाप्य तदुपरि लवणं भस्मं संवेध्य लवणेन पूरयित्वा त
दुपरि शरावेणाछाद्य मुद्रां दत्वा चुल्लिकोपरि संस्थाप्य यामचतुष्टयं वह्निं दत्वा स्वांगशीतलं गृहीत्वा चूर्णयित्वा तिलप्रमाणं दद्यात्
॥ अनुपानं तु यथारोगोक्तं केचित्तु ऊर्द्धशरावस्थरसं गृहीत्वा कूपिकायां संस्थाप्य काशीशयुतेन पुनः पचेदिति वदंति ॥ ग्रहण्यां जठरे
शूले मंदाग्नौ पवनामये ॥ अपमेतान्निहंत्येव कुर्याद्वह्नितरां क्षुधां ॥ तापे शीतक्रियां कुर्याद्वाडु रेवरमोत्तमे ॥ ऊर्द्धखर्परकखंडान् लव
णास्यच पातयेत् ॥ दार्ढ्याम कूपिकाकायं भूखगेन पुनः पचेत् ॥ वाडवोरसः ॥ विषं विनारसकर्पूरो यं सर्वरोगापहारकं ॥ विषं परि
मितं सूतं सानिकं चूर्णयेद्बुसं ॥ तच्चूर्णं संपुटे कृत्वा काचलिप्तशरावयोः ॥ मुद्रां कृत्वा च संशोष्य ततश्चुल्ल्यां निवेशयेत् ॥ वह्निं शनैः श
नैः कुर्यात्प्रहरद्वयसंख्यया ॥ ततः रूढं त्यक्त्वा मुद्रापरिस्थशरावकाम् ॥ संलग्नो यो भवेद्भस्म तं गृहीयाच्छनैः शनैः ॥ वायुस्पर्शी य
था न स्यात्तथा कुप्यति भेषजं ॥ तावन्मात्रे रसो देयो मूर्छिते सन्निपातिनि ॥ क्षीरेणाप्रहते मूर्छि नत्रांगत्वाव घर्षयेत् ॥ रक्तभेषजसंयु
क्तो मूर्छितो हि जीवति ॥ विषयाणा· सूतषाणा· प्रहर २ मर्दयेत् ॥ पुनः काचलिप्तशरावयो दत्वा संशोष्य ततश्चुल्ल्यां निवेश्य वह्निं श
नैः शनैः प्रहरद्वयं ददत्· ततः स्वांगशीतं मुद्रां त्यक्त्वा वायुस्पर्शेन स्यात् कूपिकायां न्यसेत् मुद्रां दत्वा· यत्नेन स्थापयेत् ॥ ततस्तेन मूर्छितेन

रेन्द्रूरेणमूर्छितप्रहतेभ्रष्टांग्रेणारसोदेयंअंगुल्यग्रेणप्रघर्षयेत् ॥ रक्तभेषजसंपर्कान्मूर्छित· अजीवति ॥ तथैवसर्पदंष्ट्रोपिमृताव
स्थोपिजीवति ॥ यदातापोभवेत्तस्यमधुरंतत्रदीयते ॥ सूचीकाभरणोरसः ॥ भस्मषोडशनिष्कस्यादारणोपात्पलकोद्भवं ॥ निष्क
त्रयंचमरिचंविषंनिष्कंविचूर्णयेत् ॥ अयंभस्मेश्वरोनाम्नासन्निपातनिकृंतनं ॥ पंचगुंजामितोभक्ष्योथार्द्रकस्यरसेनच ॥ भस्मे
श्वरोरसः ॥ रसगंधकतुल्यांशोधत्तूरफलजैर्द्रवैः ॥ मर्द्दयेद्दिनमेकंतुतुल्यकंपिष्टामार्कवतोयगाःखरतरंमुद्गप्रमाणावटिः ॥
वह्निश्चापनयेत्रिदोषमतुरंशोन्याधिसूत्यादिकंशूलाजीर्णकफामयंत्रसनकावातान्सपांडवादिकान् ॥ त्रिपुरभैरववटिरसः ॥ ॥
इतिरसेन्द्रचिंतामणुक्तारसः ॥ अथनानातंत्रोक्तारसः ॥ शुद्धसूतोविषंगंधंप्रत्येकंशाणसंमितं ॥ धत्तूरवीजंत्रिशाणंस्यात्
सर्वेभ्योद्विगुणाभवेत् ॥ हेमाह्वाकारयेदेषांसूक्ष्मंचूर्णंत्रिदोषजे ॥ एकाहिकंद्व्याहिकंचत्र्याहिकंचचतुर्थकं ॥ विषमंचज्वरंह
न्यात्तथाजीर्णंचसर्वथा ॥ महाज्वरांकुशोनाम्नारसोयंसर्वसंमतं ॥ हेमाद्रिमहाज्वरांकुशोरसः ॥ द्विभागतालेनहतेनताम्रं
रसंचगंधंचसमीनमात्रः ॥ विषंसमंवह्निगुणंचताम्रंत्रिसप्तवारेणदिवांकराशौ ॥ विमर्द्दयेरिष्टकरसेनचूर्णंगुंजैकदंतंसि
तयासमेतं ॥ ज्वरांकुशोयंरविसुंदराख्योज्वरानिहंत्यष्टविसमग्रान् ॥ रविसुंदरोज्वरांकुशोरसः ॥ शुद्धसूतद्विधागंधंमृताभ्रंवि
षसंयुतं ॥ सर्वंतंमर्द्दयंतालमूलीरसेत्र्यहंबुधः ॥ पूरयेत्कूपिकांतेनमुद्रयित्वाथशोषयेत् ॥ पुटेत्कुंभिप्रमाणेनस्वांगशीतंसमु

द्रवेन ॥ गृहीत्वा कूपिकामध्ये मर्द्दयेद्दिनमेकतः ॥ अजाजी चित्रकं हिंगु स्वर्जिका टंकणं त्रये ॥ गुग्गुलु पंचलवणं यवक्षारो यवा
निका ॥ कलिंग त्रिफला व्योषं प्रत्येकं रसमानतः ॥ एतेषां सम भागेन घर्मे मिश्रेण मर्द्दयेत् ॥ एषां कषायेन पुनर्भावयेत् सप्तधात
पे ॥ नागवल्लीदलश्वेतो पंचवक्त्रो रसेश्वरः ॥ सूतभाग १ गंधकभाग २ अभ्रकभागः ॥ विषभाग तालमूलीरसेन त्रिदिनं मर्द्दी कू
पिकां पूरयित्वा सप्तवस्त्रमृत्तिकाभिर्लेपयित्वा पुटयेत् ॥ स्वांगशीतं समुद्धृत्य चूर्णयित्वा पुनः ॥ जीरकं · चित्रकं · हिंगु · स्वर्जिक्षार
· टंकण · गुग्गुलु · पंचलवणं · यवक्षार यवानिका इंद्रयव · त्रिफला व्योष · प्रत्येकं कर्ष १ संमिश्र · केचित् · सूतादि व्योषप
र्यंतं · मुशलिकंदरसेन दिनत्रयं भावयित्वा कूपिमध्ये पूरयित्वा · एवं व पुटयित्वा चूर्णीकृत्य पुनर्जीरकाद्योषांत ओषधिक्वाथे
त पुनः पूर्णं च मिश्रयित्वा भावयेत् सप्तदिनपर्यंतं ततः ॥ शोषयित्वा मात्रा रत्ति ५ रोगानुरूपानं दद्यात् नवज्वरे सोष्णं वारि पिबेद
नु प्राणेश्वरो रसो नाम सन्निपातप्रकोपजित् ॥ दाहपूर्वे शीतपूर्वे गुल्मे शूले त्रिदोषजे ॥ कांछितं भांजनं दद्यात् कुर्याच्चंदनलेपनं ॥
भवेत् नात्र संदेहो स्वस्थं च लभते नरः ॥ प्राणनिर्गमे काले तु यं दापंतालुसंगतः ॥ गतायुः परमायुस्यादिदं च शिवभाषितं ॥ प्राणेश्व
रो रसः ॥ विषं त्रिकटुकं गंधं टंकणं मृतताम्रकं ॥ धत्तूरस्य च वीजानि हिंगुलं नवकं स्मृतं ॥ एतानि सप्तभागानि दिनैकं विजया
द्रवैः ॥ मर्द्दयेच्चणकाकारा कर्तव्या वटिकाथ सा ॥ मक्षणीयानुपानव्यो रविमूलकषायकः ॥ मृतसंजीवनी नाम्ना सन्निपातज्वरांत

कुर्यात्॥ मृतसंजीवनी रसः॥ शुद्धसूतं द्विधा गंधं शिलालिविषहिंगुलं॥ मृतं कांतं ताम्रमभ्रं पत्राख्यतालकं गंधमाक्षिकं॥ अम्लवेतसजं
बीरचांगेरिनिंबरसेन च॥ निर्गुंड्याहस्तिशुंड्याश्च द्रवैर्मर्द्यं दिनद्वयं॥ रुध्वा तु भूधरे पाच्यं दिनांते च समुद्धरेत्॥ चित्रकस्य कषायेन मर्द्
येत् प्रहरद्वयं॥ माषमात्रं प्रदातव्यं हिंगुव्योषार्द्रवैर्द्रवैः॥ शुद्धसूतभाग १ गंधकभाग २ मनःशिला १ हरिताल १ विष १ हिंगुल १ कां
तलोह १ ताम्र १ अभ्रक १ पत्राख्यताल १ कृत्रिमगंधकं १ स्वर्णमाक्षिक १ खल्वे क्षिप्त्वा वक्ष्यमाणद्रवैर्दत्वा मर्दयेत्॥ अम्लवेत
सजंबीरः॥ चांगेरी निर्गुंडी हस्तिशुंड्याकारणांरसैः दिनद्वयं ततः गोलं कृत्वा भूधरयंत्रे पचेत्॥ स्वांगशीतं समुद्धृत्य संचूर्ण्य
पुनः चित्रकः कषायेन यामद्वयं मर्दयेत्॥ माषमात्रं प्रदापयेत्॥ सकर्पूरस्यानुपानं स्यान्मृतोत्थापनको रसः॥ पीडितः सन्निपा
तेन गतो वा पियमालये॥ नक्षराणा दापयेत्तथ्यं क्षीरभक्तं प्रयोजयेत्॥ गुंजाद्वयं प्रदातव्यं रसो ह्यानंदभैरवः॥ स्वच्छंदभैरवो ह्या
पि दशमूले स्मृगंजकः॥ मृतोत्थापनो रसः॥ ब्रह्मास्त्रमथ वक्ष्यामि सद्यः प्रत्ययकारकं॥ भस्मसूतं त्रिधा गंधं तत्समं गरलं विहि
॥त्रिभिः समं विषं योज्यं मरिचं सर्वतुल्यकं॥ वराहके कि महिषं पित्तैः सप्तधा विभावयेत्॥ लांगल्या देवदाल्या च ज्वालामुख्या द्र
वैः॥ एकविंशतिधा भाव्यं प्रत्येकं घर्मशोषितं॥ द्विगुंजमात्रं नस्येन मृतमुत्थापयेद्ध्रुवं॥ सूतभस्म १ गंधक २ सर्पगरल ४ वि
ष ८ मरिच १६ सर्वे खल्वे क्षिप्त्वा वराहपित्तमयूरपित्तमहिषपित्तैः सप्तधा विभावयेत्॥ पुनः लांगल्याः देवदाल्या ज्वालामुख्या

आर्द्रकद्रवैरेकविंशतिवारंविभाव्य· प्रत्येकं· इत्यनेनदिन२८ घर्मशोषितं· ततःमात्रागुंजा२ तस्यदेयःदध्यन्नसंसिक्तंपथ्यंमु
पचारश्चशीतला ॥ सर्वोदरगदघ्नोयंमसाध्यमपिसाधयेत् ॥ अस्थिशूलानिसर्वाणिनाशयत्येवसर्वथा ॥ ~~क्रव्यादरसः~~ ॥
सू॰ना॰हि॰ताम्रवलिलोहशिलालहेमवज्रामृतंदरदलालवकंगमये ॥ संमर्द्यमूलपयसामृगनेत्रांमुशल्याकुप्यांस्थितंलघुपु
टेक्वसकूपिपिष्टा ॥ ज्वालामुखिज्वलनभृंगपुराजमोदक्षारेणवैशिखरिणाञ्चिफलार्द्रधूर्त्तैःपित्तैर्विषैरायथगेखमि
तंविभाव्यसर्वंचपारदसमंमृतधूपनार्थं ॥ आर्द्रीमसायवमितेश्चप्रदायकालविध्वंसनोविजयतेखिलसन्निपाते ॥ सूत
नाग· ताम्र· गंधक· लोह मनःशिला· सुवर्ण· हरिताल· अभ्रकविष· दरद· वंग· पुनः हरिताल· समभागं· संगृह्य· खल्वेक्षि
प्त्वामृशलकंदरसेनसंपिष्यसर्पमृत्कर्पटलिप्तायांलघुपुटंदत्वास्वांगशीतंसंगृह्य पुनःवक्षमाणद्रवेणभावनांकुर्यात् ॥
तद्यथा ॥ ज्वालामुखी१चित्रक२भृंगरस३गुल४अजमोदा५अपामार्ग६समुद्रफल७आर्द्रक८ धूर्त्त९ मत्स्यपित्तेनवि
षचूर्णकर्ष१क्षिप्त्वायवमितांवटिकांकृत्वा· आर्द्रीमसादेया ॥ तोयाभियोगदधिभक्तकृतेक्षपथ्यशीतोपचारविधिरप्यधिको
मतोत्र ॥ ~~कालविध्वंसनोरसः~~ ॥ समभागंवसंग्राह्यंपारदामृतगंधकं ॥ जातीफलंचभागार्द्धंदत्वाकुर्यात्सुकज्जलीं ॥ सर्वार्धंमा
गधीचूर्णंखल्वेक्षिप्त्वाविमर्दयेत् ॥ शीतज्वरेसन्निपातेविसूच्यांविषमज्वरे ॥ जीर्णज्वरेवमंदाग्नोशिरोरोगेवदारुणे ॥ योजयेद्र

षड्जं सम्यग्रसस्वच्छंदभैरवः॥ स्वच्छंदभैरवरसः॥ रसभागो भवेदेको गंधको द्विगुणो मतः॥ विषतालककंकुष्ठं शिलाहिंगुललोहकं॥ वह्निस्त्रिकटु भृंगाह्व हेममाक्षिकनभ्रकं॥ हस्तिशुंडी विषंकुंभी तंडूलीयक ताम्रके:॥ एषां प्रत्येककं भागं मादाय सुविचूर्णियेत्॥ आर्द्रकस्य रसेनैव मर्दयेच्च दिनत्रयं॥ जंवीरस्य रसोग्राह्य पलत्रयप्रमाणतः॥ त्रिफलायाश्च निर्गुंड्याः प्रत्येकं च दिनत्रयं॥ रसस्य पलमात्रं तु चांगेर्या परिकीर्तितं॥ काचकूप्यां विनिक्षिप्य स्वेदयेत्सप्तकद्वयं॥ काचकूपीं मृदा लिप्य यंत्रे पक्त्वाथ वालुके॥ उद्धृत्यार्द्रकनिर्यासैर्मर्दयित्वा विशोषयेत्॥ रस १ गंधक २ विष हरिताल· कंकुष्ठ· मनःशिला· दरद· लोह चित्रक· त्र्योष· भृंगराज स्वर्णमाक्षिक· अभ्रक· हस्तिशुंडीपुनर्विषं जयपाल मेघनाद· ताम्रः प्रत्येक भाग १। १ आर्द्रकरसेन दिन ३ मर्दयेत्· पुनर्जंवीरस्य रसेन दिन ३ त्रिफलारसेन दिन ३ निर्गुंड्या रसेन दिन ३ चांगेर्या रस पल १ वटिकां कृत्वा कांचकूप्यां विनिक्षिप्य चतुर्दश घटिकां स्वेदयित्वा पूर्ववद्विधिना वालुकायंत्रे दीपमात्रानलेन पाचयित्वा स्वांगशीतं गृहीत्वा पुनः आर्द्रकरसेन मर्दयित्वा गुंजामात्रां वटिं आर्द्रकरसेन दद्यात्॥ मृतसंजीवनो नाम रसोयं विदितं तु भुवि॥ गुंजाद्वयं ददीतास्य सन्निपातापनुत्तये॥ मृतसंजीवनीरसः॥ रसं तालकं गंधकं तिंतिडीकं विषं टंकणं सर्वमेकत्र तुल्यं॥ मनस्त्रिफलं त्र्योषचूर्णेन युक्तं समं मर्दयेच्छृंगवेरद्रवेण॥ रसपंचवक्त्राविधानोयमेकाजयच्छन्निपातानशेषान्सुयुक्तः॥ ततो

वल्लमात्रं प्रयुंजीत पुत्राज्वरे वातिके पैत्तिके श्लेष्मिके च ॥ हिंगुलीमपं ववक्रो रसः ॥ विषगंधं स्वर्णं सूतं मौपित्तेन मत्स्यवराहयोः ॥ अ
जामायूरपित्तेन महिषस्यापि योजयेत् ॥ हरितालं तु सर्वांशं बानरीवीजसंयुतं ॥ अपामार्गचित्रमूलं जयपालं च मर्दयेत् ॥ सर्व
मेतत्समांसेन छागमूत्रेण मर्दयेत् ॥ माषेणास्य दृशीकुर्याद्दन्तिकां भिषगुत्तमं ॥ महाज्वरे महाशीते तथा शीतज्वरेपि च ॥ मज्ज
गे सन्निपाते च विसूच्यां विषमज्वरे ॥ असाध्येपि गदे योज्या नात्र कार्या विचारणा ॥ द्व्याहिकं त्र्याहिकं चैव चातुर्थ्यं विषमज्वरे ॥
ज्वरोदरे शिथिलांगे नाशारोगे सपीनसे ॥ अजीर्णे चैव मूर्छायां श्लेष्मवातेषु दुर्जये ॥ निर्वाते निर्जने स्थाने गर्वे वा समावृते
॥ प्रस्वेदक्षणमात्रेण जायते विहृमीदृशं ॥ शोथकामलपाण्ड्वादिशैत्यरोगापहारकं ॥ मृत्युंजयसन्निपाते ज्ञानज्योतिहृदाह
तः ॥ भृंगराजरसेनायं रसराज प्रदीयते ॥ मूर्छितं पतितो भूमौ दाहयुक्त पुनः पुनः ॥ एवं विहृ समालोक्य मन्यथां शंकरोदितं ॥
पथ्यं च तस्य दातव्यं ॥ रोगिणो चैव धीमता · एवं महारसश्चैव शंभुना निर्मितो ध्रुवं ॥ कृपया सर्वभूतानां ज्ञानज्योतिप्रकाशितः ॥
सन्निपातमृत्युंजयरसः ॥ ताम्रं गंधरसश्चैव संध्यादामरिवपूतना ॥ समीतपित्रजैपालं तुल्यमेकत्र मर्दयेत् ॥ गुंजा चतुष्टयं चा
स्य नवज्वरहरं मतं ॥ ज्वरांकुश सन्निपातभैरवोयं प्रकाशितं ॥ संतोयगदितं सिद्धो दागतो रसः ॥ संध्या अपराजिता ॥ सन्निपात
भैरवरसः ॥ अपामार्गस्य मूलानां चूर्णं चित्रमूलजे ॥ वल्कले मर्दयित्वाथ रसं निपीड्य रक्षयेत् ॥ तेन सूतसमं गंधमभ्रकं दरदं

निपा

विषं ॥ टंकणं तालकं चैव मर्दयेद्दिनसप्तकं ॥ त्रिदिनं मुशलीद्रावे भावयेत् घर्मरक्षितं ॥ मूषां च गोस्तनाकारमापूर्य्य परिमुद्रयेत्
॥ सप्तभिर्मृत्तिकावस्त्रैर्वेष्टयित्वा पुटे लघु ॥ रसकृल्यं लोहभस्मं मृतं वंगरसस्तथा ॥ मधूकं सारजलदौ रेणुकं गुग्गुलुः शि-
ला ॥ चांपेयस्य समो सस्या भागार्द्धं शोधितं विषं ॥ तत्सर्वं मर्दयेत् खल्वे भावयेद्विषनीरतः ॥ आतपे सप्तधा तीव्रं मर्दयेत् घ-
काढयं ॥ कटुत्रयकषायेण कनकस्य रसेन च ॥ भूधात्रिकाकषायेन मुनिवृक्षरसेन च ॥ समुद्रफलनीरेण विजया
परमवारिणा ॥ चित्रकस्य कषायेण ज्वालामुख्या रसेन च ॥ प्रत्येकं सप्तधा भाव्यं तदात्यित्तौर्विभावयेत् ॥ सर्वस्य सम
भागेन विषेण परिभूषयेत् ॥ विमर्द्य मंत्रयित्वाथ रक्षयेत् कूपिकांतरे ॥ गुंजेकावह्निनीरेण शृंगवेररसेन च ॥ ददीन रोगि
णे तीव्रमोक्षविसूचिशांतये ॥ शस्त्रेण तालुमाहत्य घर्षयेद्वाईनीरतः ॥ ततो नघटं तेयदत्वा तदा कुर्यादभ्युविधिं ॥ सेवये
न्मंत्रविदैत्नेवाराकुंभ शनैर्बुधः ॥ भोजये छाय यदा तस्य जायते रोगिणः परा ॥ दध्योदनं सिताष्यक्तं दद्यात्तत्रं ससजीरकं ॥ पानेपा
नं सितत्राजातं यदि छिन्नं तदा ददेत् ॥ एवं कृते नसांतिः स्यात् त्रायस्य रसज्जस्य वै तत् ॥ सर्वं चंदनरसालेपनं कुरु शीतलं ॥ तुलि
का मल्लिकाजातीपुन्नागवकुलाहृता ॥ विधाय स्थापयेत्तत्र लेपयेच्चंदनैर्मृदुः ॥ हावभावविलासोक्तिकटाक्षावलवीक्ष
णैः ॥ पीनोत्तुंगकुचोत्पीडैः कामिनी परिरंभमौ ॥ रस्यवीजानि नादाद्यैर्गायन्ते श्रवणोमृतैः ॥ पुरण्ये श्लोकपुराणार्थकथा

संभाषणैः शुभैः॥ एभिः प्रकारैस्तापस्य जायेते शमनं परं॥ वर्जयेन्मैथुनं तावद्यावत्स्वबलवान् भवेत्॥ दद्यादेतेषु सर्वेषु सिद्धगुग्गु
लुवह्निभिः॥ दद्यात्कणामांक्षिकाभ्यां कामलाक्षयम्पांडुषु॥ तत्तद्योगानुपानेन सर्वरोगेषु योजयेत्॥ अयं प्रतापलंकेशः सर्वरोग
षु शस्यते॥ ~~प्रतापलंकेश्वरो रसः~~॥ ॥ सूतकं गंधकं नागं चूर्णं हंसाङ्घ्रिवारिणा॥ दिनं घर्मे विमर्द्याथ गोलकं तस्य योजयेत्॥ काच
कूप्यां च संवेष्ट्य दृढं मृत्कर्पटैस्त्रिभिर्मुखं संरुध्य संशुष्कं स्थापयेत्सिकताह्वये॥ सार्द्धं दिवं क्रमेणैव ज्वालालयेत्तदधस्ततः॥ स्वांग
शीतलमुद्धृत्य षड्गुंजेनामृतं क्षिपेत्॥ मरिचान्यर्द्धभागेन समस्तस्याथ मर्दयेत्॥ अयमग्निकुमारस्याद्रसो मात्रा द्विरक्तिकां
॥ तांबूलस्य दलसंयुक्तं हंति रोगान्सुदुस्तरान्॥ वातरोगान्क्षयं श्वाशं काशं पाण्डु कफोल्वणं॥ अग्निमांद्य सान्निपातं पृष्ठशूला
दिकं लघुः॥ जलयोगप्रयोगेपि संतापस्य प्रशांतयेत्॥ अग्निकुमारो रसः२ रसमंजर्या॥ वचा रसोनं कटुकं सैन्धवं बृहतीफलं॥
रुद्राक्षमधुसारं च फलसामुद्रकं मतं॥ समभागानि सर्वाणि अर्कक्षीरेण भावयेत्॥ भावयेत्त्रिभिः पित्तेन त्रिवारं चूर्णयेत्ततः॥ प्र
धमं कथितं श्रेष्ठं सन्निपातेषु दारुणे॥ कफोल्वणे तीव्रवाते अपस्मारे हलीमके॥ शिरोरोगे नेत्ररोगे कर्णरोगे विधानतः॥ प्राप
येत् घ्राणच्छिद्राभ्यां संज्ञाकरणमुत्तमं॥ संज्ञाप्रबोधप्रथमनं॥ प्राणेश्वरस्य कर्षैकं मभ्रकं कर्षमेव च॥ सूतं गंधं कुंकुमं च नाग
पुष्पं त्रुटिं तथा॥ कस्तूरिं चैव कोलस्यात्तुगाक्षीरिद्विकर्षकं॥ मत्स्यपित्तं पितुमितं सूक्ष्मचूर्णानि कारयेत्॥ ब्राह्मीरसेन संमर्द्य

दिनमेकंप्रयत्नतः॥गुंजाभांवटिकांकृत्वासंनिपातेत्रिदोषजे॥योजयेद्द्वंद्वजेचैवपित्तोद्रेकेतथैवच॥ज्वरेच्चावायसंभूतेकोलमूलद्रवे
णतु॥नानानुपानयोगेनसर्वज्वरनिकृंतनः॥नवरसः॥रसोगंधस्ताम्रत्रिकटुकटुकानंकणावरान्हुदंतीहेमाघुमणिविषमेत
त्समिदं॥समस्तोनुल्यंस्याछिमलजयपालोद्भवरजस्ततः॥स्नुग्क्षीरिणाप्रगुणाम्‌दिनंदंतिसलिलैः॥त्रिगुंजास्याद्बोरखाज
यनिवटिका॥सामवज्जलंज्वरपांडुगुल्मंग्रहणिग्युदकिलोदरतुजः॥मरुत्कूलांजीर्णंपवनमथसामंकृमिदांविवंधंप्लीहानंप्र
वलमपिविद्याधररसः॥विद्याधररसः॥रसंडिनंहारिणांश्रृंगंज्वालामुख्यारसैर्दिनं॥रुध्वाभांडेपचेत्तूल्यांभस्मीभूतंविचूर्ण
येत्॥अष्टांशंत्रिकटुंदत्वानिष्कमत्रेवभक्षयेत्॥नागवल्यारसैःसार्द्धंवातपित्तज्वरापहं॥अयंज्वरांकुशोनामरससर्वज्वराप
हः॥ज्वरांकुशरसः॥रसवलिफणिलोहंव्योषताम्राणितुल्यान्यथरसदलभागोनागएतत्त्रिदिह्वं॥भवतिगदमुरारिश्चा
सगुंजार्द्धवाराक्षयति॥दिवसेनप्रौरुनामज्वरारव्यं॥नागवल्लिरसैमर्घः॥ज्वरारिरसः॥एकोभागारसाकृष्णाद्वैलेयपि
प्पलीशिवा॥आकारकरभागंधकटुतैलेनशोधितः॥फलानिचेन्द्रवारुण्याश्चत्रुर्भागमितानुधैः॥एकत्रमर्दयेच्चूर्णंमिंद्रवा
रुणिकारसैः॥श्लेष्मकालानुसार्यकं॥माषांन्मितांवटिकृत्वादद्यात्संध्योज्वरावुधः॥छिन्नारसानुपानेनज्वरघ्नीवटिकामता
ज्वरघ्निवटिकारसः॥रसंगंधंवदरंदंजैपालंक्रमवर्द्धितं॥दंतिरसेनसंपिष्ट्वावटीगुंजामताकृता॥प्रभातेसितयासार्द्धमसि

नातिनवारिणा॥एकेनदिवसेनैषांनवज्वरहरीभवेत्॥ज्वरघ्नीवटीरसः॥रसोगंधोविषंशुंठीपिप्पलिमरिचानिच॥पथ्याविभीतकं
धात्रीदंतिवीजंचशोधितं॥चूर्णमेषांशमासानांद्रोणपुष्पीरसैःपुटेत्॥वटीमाषनिभांकुर्याभक्षयेन्नूतनेज्वरे॥नवज्वरघ्नीवटिका
रसः॥दारुमूषाशिखिग्रीवांरसकंचपृथक्पृथक्॥टंकत्रयानुमानेनगृहीत्वाकनकद्रवैः॥मर्दयेत्रिदिनंकुर्याद्वटिंवराकमात्र
या॥मरिचैरेकविंशत्यासमभिस्तुलशीदलैः॥खादेद्वटीद्वयंपथ्यंदुग्धभक्तंसशर्करं॥नरःसांविषमंजीर्णंहन्यात्सर्वज्वरंध्रुवं
॥दारुमूषादारुमसीइतिलोकेशिखिग्रीवातुत्थकं॥ज्वरांकुशरसः॥नागरंकर्षमात्रंस्यात्कर्षमात्रंचटंकणं॥मरिचंसार्द्धकर्षं
स्यात्तावद्गंधंवराटकं॥विषंकर्षचतुर्थांशंसर्वमेकत्रचूर्णयेत्॥रसोड्नाशनोनाम्नाखाद्योगुंजामितोज्वरे॥ड्नाशनोरसः॥
शुद्धजैपालटंकंतुकट्वीटंकद्वयोन्मिता॥गैरिकंटंकमेकंचकन्यानीरेणमर्दयेत्॥कलायसदृशीकार्यावटिकांतांचभक्षयेत्॥शी
तलेनजलेनैवावटिजीर्णज्वरापहा॥जीर्णज्वरघ्नीवटिरसः॥शुद्धसूतंतथागंधंखल्वेनावर्द्धिमर्दयेत्॥सूतंनदृश्यतेयावत्किंतु
कज्जलंभवेत्॥एषाकज्जलीकाख्यातादृष्टंहरिणावीर्यवर्द्धिनी॥नानानुपानयोगेनसर्वव्याधिविनाशिनी॥कज्जलीरसः॥षड्गुणा
षर्परमरखयुग्मकारवेल्लीसमरसमर्दययुग्मकं॥मर्दयमर्दयपुनरपियुग्मंचातुर्थज्वरनाशनमुग्रं॥खर्परभाग६सोमलभाग२का
रवेल्लीरसेनदिन·मर्दयेत्॥मात्रारक्ति॥शीतारीरसः॥मनःशिलातालकशुल्वगंधसमांशुवीरेणशितेनयुक्ता॥अर्कामसास

त्रिविभावितारं मृदग्निना नतिपचेच्छरावे स्वांगे च शीते परिगृह्यनीरैर्भृंगस्य च द्रावैश्चणकप्रमाणा॥मनःशिला॰हरितालं॰ताम्रभस्मगंधक
सर्वसमभागं॰सोमलभागसर्वसमं॰अर्कीभस्ता भावना ७ मृदग्निनासरावे संपुटेन संपक्वं॰ स्वांगशीतं समुद्धृत्य भृंगराजरसेन संपिष्ट्वा चण
कं प्रमाणं वटी॰ मरिचसीतासहितं देया॥ देयासिताचोषणयोगयुक्ता ज्वरारिसंज्ञो कथितोश्विनीभ्यां॥ प्रतिज्ञया शीतज्वरं निहंति संवत्
सराणां दशतोपि जाता॥ ज्वरांकुशरसः॥ अहिफेनं च रसः॥ कं शिला शंखच माक्षिकं॥ एतानि समभागानि द्विगुणं च शिलाखु
हा॥ कालवैरिडवैर्मर्द्यं दशगुंजा सशर्करा॥ नाशयेत्तं च विषमा दाहशीतप्रपूर्वका॥ पथ्यं दुग्धोदनं देयं द्राक्षेक्षुडाडिमीफलं॥ खर्जू
र सुरभीदुग्धं शीततोयं च दापयेत्॥ तांबूलरसतो मर्द्यं दिनं तांबूलपत्रयुक्॥ दत्तो नवज्वरं हंति तापे शीतक्रियोचितः॥ मध्यज्वरे सन्नि
पाते दरितार्श्व द्विगुंजकं॥ आरोग्यनामा रागीनाभार्यरसपरमदुर्लभः॥ त्र्यूषं संभक्षयेत्याग्रेतक्रमम्लं पिबेदनु॥ ततोद्धुताशसेवेत प्राह्न
तावातपं स्फुटं॥ ततः प्रस्विद्यसर्वांगे याति शीतज्वरक्षयं॥ आरोग्यनामी रसः॥ तालकं तुत्थकं ताम्रं रसं गगं मनःशिला॥ कर्षक
र्षं प्रयोक्तव्यं मर्द्दयेत्त्रिफलांबुभिः॥ गोलं न्यसेत्संपुटके पुटं दद्यात्प्रयत्नतः॥ ततो नीत्वार्कदुग्धेन वज्रीदुग्धेन सप्तधा॥ क्वाथेन दंता
रुणामायाः भावयेत्सप्तधा पुनः॥ माषमात्रं रसं देयं पंचाशन्मरिचैर्युतं॥ गुडं गद्यानकं चैव तुलसीदलयुग्मकं॥ भक्षयेत्त्रिदिनं भक्त्या
शीतारिर्दुर्लभं परं॥ पथ्यं दुग्धौदनं देयं विषमं शीतपूर्वकं॥ दाहपूर्वं हरत्याशु तृतीयकचतुर्थकौ॥ द्व्याहिकं सततं चैव वैवरांपं चनिय

इति शीतज्वरारिरसः ॥ सूतकं गंधकं चैव हरितालं मनःशिला ॥ एकनिष्कं द्विनिष्कं च चतुर्निष्कं तथैव च ॥ पंचनिष्कं रसे कारवेल्लाकल्कं
प्रकल्पयेत् ॥ ताम्रपत्राणि तुल्यानि तेन कल्केन लेपयेत् ॥ सरावसंपुटे तानि कृत्वा तेषां तूपर्यपि ॥ दद्यात्तां पिष्टिकां पश्चात्पुटपाकेन पा-
चयेत् ॥ ततः संचूर्णयेद्देव रक्षौद्रेण भक्षितं ॥ सूत १ गंधक २ हरिताल ४ मनःशिला ५ ताम्रपात्र १२ कारवेल्लीद्रवैः संमर्द्य· ताम्रपत्रे· सं-
लेप्य शरावसंपुटे धत्वा पुटपाके संपाच्य स्वांगशीतमुद्धृत्य संचूर्णयेत् गुंजामात्रं मधुना सह दापयेत् ॥ एकैकमात्रया हंति घोरं शीतज्व-
रं ध्रुवं ॥ शीतज्वरारिरसः ॥ अष्टौ तालकमेतदर्द्धममलं शंबूकचूर्णं क्षिपेत् ॥ पश्चाद्दत्तनवांशको वरशिखि सर्वंपुनपेषयेत् ॥ उ-
त्थमाष १९ तोयैस्तत्त्वकुमारिकादलभवैपक्वं गजाख्यपुटेप्यव द्वित्रिचतुर्थशीतहरणः शीतांकुशोयं रसः ॥ गुंजाद्वयमिदं दद्यात् सि-
तया सह वारिणा ॥ सजीरकेन दध्यन्नं पथ्यं शीतज्वरांकुशे ॥ महाशीतज्वरांकुशरसः ॥ संभामसाभाविततालचूर्णं शीतज्वरे भुक्तमि-
तं प्रदेयं ॥ सशर्करं भक्तपयश्च पथ्यं शीतज्वरघ्ने खलु पंचवाणः ॥ शीतभंजीरसः ॥ सूतकं दरदं चैव तालकं टंकणं तथा ॥ अभ्रकं ह-
मनागं च शिलां च रविखर्परं ॥ कंगोणी चरसैर्मर्द्यं पुटं दद्यात्त्रयस्तथा ॥ अर्कक्षीरैः स्नुहिक्षीरैर्भावयेच्च त्रिधा पृथक् ॥ खल्वेयंचव-
तुर्यामाद्रसेश्रेष्ठोभविष्यति ॥ अर्द्धनारीश्वरो नाम गुंजामात्रं तु दापयेत् ॥ करणावृह्मोर्दके देयं दक्षनाडी यदा भवेत् ॥ कंगोणी· ज्यो-
तिष्मती· अर्द्धनारीनस्यं सूतं गंधाम्रतैश्चैव समं अर्द्धसटंकणं मर्दयेत्तु शिलाखल्वे यावत्कज्जलसंनिभं ॥ नकुलारिमुखे क्षिप्त्वा म

॥सात्मद॥
॥१२८॥

दासंवेष्टयेदृढं॥ स्थापयेन्मृण्मयेभांडेअर्द्धसलवणान्वसेत्॥ भाण्डवक्त्रंनिरुद्धेत्तुकुर्यान्मंदहठाग्निना॥ स्वांगशीतलमादायश्लक्ष्णखल्वेनतुक
जलं॥ गुंजायवप्रमाणेननस्यकर्मणियोजयेत्॥ वामनाडिज्वरंहंतितत्क्षणाल्लोककौतुकं॥ नकुर्यादक्षिणेनांगेआरोग्यंनिश्चितं
भवेत्॥ गुह्याद्गुह्यतमश्रेष्ठंगोपनीयंप्रयत्नतः॥ नकुलारीःसर्प॥ तृतीयार्द्धनारीश्वररसः॥ ॥सूतकंगंधकंलोहंअभ्रकं
ताम्रभस्मकं॥ एतानिसमभागानित्रिफलानेत्रभागिका॥ मुस्ताकटुकिवैभागोचूर्णितंवस्त्रगालितं॥ पुत्रवत्याश्चदुग्धेनवटिकाकृ
तमंजनं॥ अर्द्धांगज्वरनाशायअंजयेदेकलोचनं॥ सर्वांगज्वरनाशायअंजयेल्लोचनद्वयं॥ अर्द्धनारिअंजनरसः॥ तालकोद
रदोद्भूतपारदोगंधकःशिला॥ क्रमाद्भागार्द्धरहितंकारवेल्याश्चमर्दितं॥ अनेनास्यप्रमाणेनताम्रपात्रंप्रलेपयेत्॥ अधोमु
खीदृढेभांडेतान्निरुध्याथपूरयेत्॥ तुल्यांवालुकयाघस्त्रमग्निंप्रज्वालयेदृढं॥ शीतसंचूर्णमाषास्यनागवल्लीदलेस्थि
तः॥ भक्षितोमरिचैःसार्द्धसमस्तान्विषमज्वरान्॥ हरिताल८ दरदोद्भूतरसः४ गंधक२ मनःशिला१ शुद्धताम्रपत्र१५ कारवेल्ली
फलरसैर्मर्दयित्वातत्कल्कंताम्रपत्रेलेपयेत्॥ तच्छरावेधृत्वापुनराच्छाद्यवालुकायंत्रेयाम४ हठाग्निनापक्वास्वांगशीतल
मुद्धृत्यचूर्णयित्वामाषमात्रंतांबूलेनमरिचेनसहभक्षयेत्॥ शीतदाहादिकान्हंतिपथ्यंशाल्योदनंपयः॥ शीतभंजीरसः॥
पारदंगंधकंचैवविषहेमवनीतथा॥ पंचमंदंतिवीजंचक्रमवृद्ध्यानियोजयेत्॥ निंबुनीरेणवटिकाकर्त्तव्यामाषसन्निभा॥ शी

॥रामः॥
॥१२८॥

नलेनजलेनैषाजीर्णज्वरहरीमता ॥ एषालीलावतीनाम्नालीलयाज्वरनाशिनी ॥ जीर्णज्वरारिरसः ॥ शुद्धंखर्परमष्टभागसमलं
स्वर्णंवस्मक्रमात्फलंहिंगूलंमरिचंविवर्द्धितमिदंहैयंगवीनेनतु ॥ भाव्यंजंभरसेनचत्रिदिवसंनिस्तेहमेतद्धियांगुंजाद्वंद्वमनुष्यमा
लिनिवसंतसज्ज्वरेधातुगे ॥ वसंतमालिनीरसः ॥ रसकयुगलभागंवह्निजंभागमेकंछितयमपिकुखलेमर्द्दयेन्नक्षरोन ॥ भव
तिघनविम्बक्रोनिंबुरसीरेरसानावत्ज्वरहरमधुककल्पामालिनीप्राक्वसंतः ॥ जीर्णज्वरेधातुगतेतिसारेरक्तात्वितेरक्तजविश्व
योगे ॥ घोरेथपित्तप्रभवेचदोषेवग्रप्रमोदुग्धयुतंचपथ्यं ॥ प्रदरंनाशयत्याशुतथादुर्नामशोणितं ॥ विषमंनेत्ररोगंचगजेंद्रमिवके
शरि ॥ मालिनीवसंतरसः ॥ वैक्रांतभस्महेमताप्यरौप्यगंधप्रवालंरसभस्ममोहं ॥ शृटंकणांकंवुकभस्मसर्वंसमस्तमेतत्खवरीरज
नो ॥ द्रवैविमर्द्यमुनिसंख्ययाचमुगांऽजाशीतकरेणपश्चात् ॥ वल्लप्रमाणोमधुपिप्पलीभ्यांजीर्णज्वरेधातुगतेप्रदेय ॥ कृष्णाभ्रस
रिनिहंताम्रमातुलुंगयग्रिंजेजैले: ॥ रसोवसंतनामायंमालिनीपदपूर्वकः ॥ अपरोमालिनीवसंतरसः ॥ शुल्वोरसमयोगंधंभुजंबो
षमिदंसममेवतत्पांशं ॥ विषमपिवासरभानुमुपिष्टंभवतिरसोखिलरोगविनाशी ॥ सर्वसमंकर्षविषमाषमात्र ॥ वलमितोतिजभेष
जपक्षोहतमप्यामयविघ्नगणेशः ॥ विघ्नगणेशोरसशंभोकंठविभूषणंसमरिचंदेतंडरक्तरसः ॥ पक्षौसागरलोचनंहिमरुवि
भागेस्तथाऽर्करवि: ॥ ॥ स्वल्पांतरखल्लमर्द्दयेद्रविलजैगुंजाप्रमाणोऽशितः प्रोदंडज्वरदंतिदर्पदलनोपंचाननोसोरसः ॥ पंचाननोरस

:॥ हृद्राक्रमेणारसहिंगुलगंधकानां भागा रसेन विजया कनकद्रवदानां ॥ व्योषस्यसपृथगेवविभावनास्तु : शुष्कंपिवेद्धि द्रुगरोशनाम:
॥ उग्रंज्वरंग्रहणीकामपि धातुतापसामनिराममतिसारमथोवमिंच ॥ श्वासंचकासमरुचिंत्वनुपानभेदाद्ध्रोस्यगाजयति मागधिका
मधुभ्यां ॥ कनकछद· धत्तूरपत्र· सिद्धगरोशोरस: ॥ शुद्धंगरात्रिग्रशितोदरदंडपिष्टोगुंजार्द्धमस्यमसितज्वरहानिकारी ॥ वेद्भाव
नागबजपित्तभवासक्तसप्तस्या सन्निपातदलनोदयभास्कराख्य: ॥ ॥ विद्धविष १ शुद्धदरद: ३ शुपिष्ट: रक्तिकार्द्ध· सितया
सहज्वरहरि· सप्तवसप्तवारं मत्स्यपित्तैर्मविभावेत ॥ सन्निपाददलनस्यातमात्रारति १॥ रसराजअयंदेय: सर्वधातुगतेज्वरे
॥ विषमेवाज्वरेजीर्णेशूलेवाह्यतिसारजे ॥ उदयभास्करोरस: ॥ रसविषवलिभागाव्योषमेषांसमानं शुभडसलिलमर्द्यं
पारदंशाम्लतेन ॥ तदहिनविहितधूपंशोष्यपिष्टांगुंजार्द्रकरससहदत्त्वांसन्निपातंनिहंति ॥ रसविषगंधक· अभ्रक· निंवरसेन
सप्तवारभाव्य· पुनर्विषभाग १ कर्पूर १ संमिश्रमागुंजा १ अनुपानआर्द्रकरसेन ॥ रसोयंसन्निपातघ्रागभैरवोनाशयेत्पलं ॥ शा
खाशैत्यंमहात्तंडावानमोघंविचेतनं ॥ सन्निपातभैरवरस: ॥ सोमलंरसगंधाभ्रेशिलातालकखर्परं ॥ हिंगुलंताम्रभस्मंचतु
लसीरसमर्दितं ॥ काकवेल्लपारसै: सप्तभावनात्वपृथक्पृथक् ॥ मरिचंघृतसंयुक्तं गुंजामात्रंप्रदापयेत् ॥ सर्वज्वरहरश्चायंस
न्निपातारिनामत: ॥ सन्निपातारिरस: ॥ रसकंतालकंगंधंकंतित्रि[illegible]जंविषंटंकणंसर्वमेकत्रतुल्यं ॥ ततस्तेफलंव्योषचूर्णेन

युक्तं समं मर्दयेद्भृंगराजद्रवेण ॥ रसः पंचवक्त्राभिधानो यमेको जयेत्सन्निपातानशेषान्युक्तः ॥ ततो वल्लमात्रं प्रयुंजीत युक्त्या ज्वरे वा
तिके पैत्तिके श्लेष्मिके च ॥ द्वितीयपंचवक्त्ररसः ॥ निस्तुग्जेपालवीजं च दशनिष्कं विचूर्णयेत् ॥ मारिचपिप्पलीमूलं प्रतिनिष्कं वि
मिश्रयेत् ॥ भाव्यो जंवीरजैर्द्रावैः सप्ताहं तु प्रयत्नतः ॥ रसोयमंजने दत्तो सन्निपातं विनाशयेत् ॥ नस्यं [illegible] नसूतार्कतीक्ष्णानि टंक
णं खर्परं समं ॥ सव्योषमर्कदुग्धेन दिनं संमर्दयेद्दृढः ॥ अर्कक्षीरयुतो नस्यं सन्निपातहरः परः ॥ नस्यभैरवरसः ॥ विषं त्रिखर्परं तु
त्थं गोपित्त व्योषटंकणं ॥ अर्कक्षीरे दिनं मर्द्यं नस्यं संज्ञाप्रबोधनं ॥ विष १ खर्पर ३ तुत्थ १ गोरोचन १ त्र्यूषण २ टंकण १ अर्कक्षीरेण
याममात्रं संमर्द्य· मात्रा रत्ति १ नस्यं ॥ धत्तूर्वीजग्रहोन्मादकृत्यापस्मारनाशनं ॥ यक्षराक्षसभूतघ्नं चातुर्थिकहरः परः ॥ नस्यमगंधेशो लशु
नांभोभिमर्दये याममात्रकं ॥ नस्योदकेन संयुक्तो नस्यस्तु प्रतिवोधकृत् ॥ मरिचेन समायुक्तो हंति तंद्राप्रलापकौ ॥ मोहांधसूर्य्यर
सः ॥ सूततीक्ष्णाकणागंधमेकांशं जयपालकं ॥ सर्वैस्त्रिगुणितैर्जंभवारिपिष्टं दिनाष्टकं ॥ नेत्रांजनेन हंत्याशु सर्वोपद्रवयुग्ज्व
रं ॥ अंजनभैरवरसः ॥ रसो गंधस्त्रिस्त्रिकर्षः कार्यात्कज्जलकां द्वयोः ॥ ताराभ्रताम्रवंगाहिसाराश्चैकैककार्षिका ॥ शिग्रुज्वा
लामुखी शुंठी विल्वभ्यस्तांडुलीलकैः ॥ प्रत्येकं स्वरसैः कार्या याममेकं विमर्दयेत् ॥ कृत्वा गोलं हृतं वस्त्रे लवणां पूरितं न्यसेत् ॥ कां
चभांडे ततस्थाल्यां काचरुध्यां निवेशयेत् ॥ वालुकाभिः प्रपूर्याथ वह्निर्यामद्वयं भवेत् ॥ ततरुद्धृत्य तं गोलं चूर्णयित्वा विमिश्रयेत्

प्रवालचूर्णकर्षेण यानमात्रं विषेणाव ॥ कृष्णसर्पस्यगरलैर्द्विवेद्वंभावयेत्ततः ॥ नगरंमूशलीमांसीहेमाह्वावेतसकरणा ॥ लीलिनीपत्र
कंचैलाचित्रकश्चकुठेरकः ॥ शतपुष्पादेवदालीधत्तूरागस्त्यशुंडिका ॥ मधूकाजातिमदनारसैरेषांविमर्दयेत् ॥ प्रत्येकमेकवेलंचततः संशो
ष्यधारयेत् ॥ वीजपूरार्द्रकद्रावैर्मरिचैः षोडशोन्मितैः ॥ रसाद्दिगुंजप्रमितंसंनिपातेषुदीयते ॥ प्रसिद्धोयंरसोनाम्नासन्निपातस्यभै
रवः ॥ रसकर्ष२ गंधककर्ष२ रौप्य·अभ्रक·तांम्र·वंग·लोह·प्रत्येकंकर्ष१।१ तत्रभावना·शिग्रु·ज्वालामुखी·शुंठि·तिल्व·मे
घनादैः प्रत्येकंस्वरसैः याममात्रंकंमर्दयेत् ॥ तत्रगोलकंकृत्वावस्त्रावृतंकाचपात्रेलवणपूरितेवस्त्रावृतेसंस्थाप्यपुनः स्थालां
निवेश्यवालुकायंत्रेयामद्वयंपचेत् ॥ स्वांगशीतंततोलंनिष्काश्यचूर्णयित्वाप्रवालचूर्णकर्ष१विषंशाण१संमिश्रकृष्णसर्पस्य
गरलेनाद्विवारंभावयेत् ॥ पुनः प्रत्येकं·वक्षमाणद्रवैर्भावयेत् ॥ नगर·मूशलीकंदजटामांशी·हेमदुग्धानिर्गुल·पिप्पली·लिलि
नी·पत्रक·एला·चित्रक·लोणशाक·शतपुष्पादेवदालीधत्तूर·अगस्ति·शुंडि·यष्टी·मधु·जातीमल्लिका·प्रत्येकमेकवारं
ततः संशोष्य·मात्रागुंजा·अनुपानंआर्द्रकारस·मरिचैः१६दापयेत्·केचित्वीजपूरार्द्रकद्रावैरितिवदंति ॥ संनिपातभैरवरस
॥ यथाकरणकंविषंतिंदुकदंतीवीजत्रिक्षारंतहेन्द्रसवल्लीसदृशाविमर्द्य ॥ धुर्तोवुतोसकलवासरमेषसूतः स्याद्विश्वतापहर
रोगाभिनवज्वरघ्नवद्भयुगं भजेदस्यशृंगवेररसान्वितं ॥ मुद्गयूषान्वितोनित्यंभोजनायप्रशस्यते ॥ विश्वतापहरोरसः ॥ शुल्वं

टंकणंगंधकंचगरलंतुत्थंरसंत्वेर्परंतालंतुल्यमिदंविमर्द्यवटिकामात्रंसुखंव्यारसैः सूतस्याद्विगुणारिणांविरचिते सीतारिरि
त्थसम्मतं ॥ गुंजाजाजिसितायुतोविजयतेदैकाहिकादिज्वरान् ॥ ~~सीतारिरसः~~ ॥ विषंभागद्वयंदग्धकपर्दंपंचभागिकं ॥ मरिचंनव
भागस्याच्चूर्णंवस्त्रेणशोधयेत् ॥ आर्द्रकस्यरसेनस्यात्कुर्य्याद्गुंजानिभावटीं ॥ वारिणावटिकायुग्मंप्रातःसायंचभक्षयेत् ॥ अयंरसो
ज्वरेयोज्यस्तस्मिन्तुजैललेपिच ॥ अजीर्णाध्मानविष्टंभशूलेषुश्वासकाशयोः ॥ ~~दुर्जरजेतारसः~~ ॥ कलावेदांकवेदांशैःस
वींशसितयायुतैः ॥ शक्रासनरजोजातीफलश्रुत्रैःसुमेलितैः ॥ भगा १६ गंधक ४ जातीफल ९ पारद १ संमिश्रसंचूर्ण्यमात्रागुं
जा ६ ज्ञानोदयोभवेदेषसाधकानंदसिद्धिदः ॥ सेवितेसात्म्यतोग्राहिजलदोषापनोदनः ॥ वातश्लेष्मामयध्वंसिज्वरातिशार
नाशनः ॥ ~~ज्ञानोदयरसः~~ ॥ ~~इतिज्वराधिकारः~~ ॥ ~~अथातिसारः~~ ॥ दरदंवत्सनाभंचमरिचंटंकणंकणाः ॥ चूर्णयेत्समभागेनरसो
ह्यानंदभैरवः ॥ गुंजैकंवाद्विगुंजंवाबलंज्ञात्वाप्रयोजयेत् ॥ मधुनालेहयेच्चानुकुटजस्यफलंत्वचं ॥ चूर्णितंकर्षमात्रंतु — — — —
— — — ॥ दध्यान्नंदापयेत्पथ्यंगव्याज्यंतक्रमेवच ॥ पिपासायांजलंशीतंविजयाचहितानि ॥ ~~आनंदभैरवोरसः~~ ॥ मुस्तामो
चरसंलोध्रंधातकीबिल्वकौटजं ॥ अहिफेनंरसंगंधंसूक्ष्मचूर्णानिकारयेत् ॥ वल्लमात्रमिदंखादेत्कुटजत्वक्तुपानतः ॥ अतीसा
रेप्रवाहेचग्रहणीषुविशेषतः ॥ ~~गंगाधररसः~~ ॥ रसबलिसमभागंतुल्यहिंगूलयुक्तंद्विगुणितः ॥ मोहिफेनंधूर्त्तबीजेनतुल्यंनिखि

॥ सात्म्य द॰ ॥
॥ १३१ ॥

लविहितचूर्णं षोडशांशं विषं स्यात्क्रहरणीशोषीसतराजो ह्यगस्तिरस १ गंधक १ दरद २ अहिफेन ८ धूर्त्तवीजं ८ विष १ संमर्द्य मात्रा गुंजा १ अ
नुपानं जीरक ॥ जातीफलं तंदुलोदकेन ॥ अथवा रोगानुरूपं ॥ घृतमरिचयुतो यं गुंजमात्र प्रवाहं हरति षडतिसारान् नीरजातीफलेन ॥ त्रि
कटुकमजमोदः सर्ववातातिशूलं कफपवनविकारा वह्निमाद्यं च निद्रा ॥ अगस्तीरसः ॥ शुद्धं रसं गंधकहिंगुलं च समानभागं विषजप्र
युं ज्ञात् ॥ षड्भागयुक्तं कनकस्य बीजं तथैव दद्यादहिफेनयुक्तं ॥ सर्वमेकीकृतं दद्याद्भागेकमम्लतस्य च ॥ अगस्तिरसनामायं प्रसिद्ध
स्याद्रसोत्तमः ॥ भक्षयद्रक्तिकामात्रं जीरजातिफलैः सह ॥ षट्प्रकारमतीसारं दुर्नामानं विनाशयेत् ॥ मरिचं घृतसंयुक्तं प्रवाहिं वापि
नाशयेत् ॥ द्वितीयो अगस्तिरसः ॥ एकैकं रसकं गंधं दरदश्चैकभागिकः ॥ अहिफेनस्य चत्वारस्तथा धत्तूरजस्य च ॥ अम्लतश्चैकभा
गेव सर्वं संमर्द्यमेकतः ॥ अगस्तिरसराजाख्यो जीरजातीफलैः सह ॥ भक्षयेद्रक्तिकामात्रं सर्वातीसारनाशनं ॥ मरिचैर्घृतसंयुक्तो
नाशयेच्च प्रवाहिकां ॥ पूर्वानुपानसंयुक्तो भक्षयेद्रक्तिकां बुधः ॥ तृतीयोगस्तिरसः ॥ शंखभस्म चतुःकर्षं कर्षैकमहिफेनकं ॥ जातीफ
लं टंकणं च पृथक्कर्षं प्रकल्पयेत् ॥ अतिसूक्ष्मं विमर्द्याथ नवनीतेन वल्लकं ॥ रसः शंखोदरो नाम्ना अतिसारान्निवर्हणः ॥ शंखोदरर
सः ॥ उन्मत्तवैश्वानरजातनीये रसेन गंधसमकं विमर्द्य ॥ शंखोदरं पूरयति नयत्नादधोमुखे — प्रपुटेन श्वांते ॥ कुमारिकापत्ररसेन
पश्चाद्विषेण संयोज्य पुटेत्त्रिवारं ॥ अजातिकाक्षोडजयासमेतं नियोजयेद्धे त्रिमितं प्रदद्यात् ॥ धत्तूर· चित्रक· रसेन रसगंधयोः ॥ क

॥ राम: ॥
॥ १३१ ॥

जलीं दिनद्वयं भाव्यअष्टगुणा शुद्धसत्वेपूरयित्वा शरावे शंपुटे पुटं दद्यात् ॥ स्वांगशीतलमुद्धृत्य चूर्णयित्वा विषकर्ष १ दत्त्वा पुटत्रयं द
त्वा स्वांगशीतं चूर्णयित्वा वल्लमात्रं भृंगाजीरकक्षौद्रेण सह दद्यात् घोरातिसारे ग्रहणीविकारे ज्वरातिसारे गुडजप्रकोपे ॥ मरी
चचूर्णेन घृतान्वितेन शूलाग्निमांद्यानिलजे विकारे ॥ रसगंधयोरगुणा ॥ लघुशंखोदररसः ॥ शुद्धसूतसमंगंधं सू
तपादं विषं क्षिपेत् ॥ सर्वतुल्यमृतं चाभ्रं मर्द्यधत्तूरजंद्रवैः ॥ सपाक्षावंद्रवैर्यासंकषायेनाथ भावयेत् ॥ धातकातिविषामुस्ता
शुंठीवालकजीरकं ॥ यवानीधातकीविल्वपाठापथ्याकणान्विता ॥ कुटजस्य त्वचं वीजं कपित्थं दाडिमं वला ॥ प्रत्येकं कर्षमा
त्रं स्यात्कल्कितं क्वाथितं जलैः ॥ कल्काचतुर्गुणं तोयं क्वाथ्यं पादावशेषितं ॥ अनेन त्रिदिनं भाव्यं पूर्वोक्तं मर्दितं रसः ॥ रुद्ध्वा तु वालु
कायंत्रे क्षणं मृदग्निना पचेत् ॥ मृतसंजीवनो नाम रसो गुंजाचतुष्टयं ॥ दातव्यमनुपानेन असाध्यमपि साधयेत् ॥ नागराति
विषामुस्तादेवदारुवचाकणा ॥ यवानीवालकं धान्यं कुटजस्यत्वचाभया ॥ धातकीन्द्रयवाविल्वपाठामोचरसं समं ॥ चू
र्णितं मधुनालेह्यमनुपानं सुखावहं ॥ मृतसंजीवनोरसः ॥ शुद्धसूतसमं गंधं मरिचं टंकणं तथा ॥ स्वर्णवीजसमं मर्द्यं
भृंगद्रावैर्दिनार्द्धकं ॥ सूततुल्यं विषं योज्यं रसकनकसुंदरः ॥ गुंजैकोगुंजाद्वयं हंति चातिसारमुद्धतं ॥ दध्योदनं दापयेत्पथ्यं मार्जं
वाथगवां दधिः ॥ कनकसुंदररसः ॥ रसभस्माद्विधागंधतस्माद्विगुणं मृताभ्रकं ॥ दिनं सर्षपतैलेन पिष्ट्वा यामं विपाचयेत् ॥ रसमार्कं

वमूलोत्थैर्नियासैः संविमर्द्य च ॥ त्रिक्षालपंचलवणांविषंव्योषाग्निचित्रकैः ॥ सचित्रकैः समानांशैर्युक्ताकारूपसागरः ॥ माषद्वयंप्रयुं
जीतरसस्यादतिसारकेः ॥ रसभस्म १ गंधक २ अभ्रक ४ खल्वे शूक्ष्मे सर्द्य सर्षपतैलेन दिन १ संमर्द्य याम १ भृंगराजरसे दत्वा लोहपा
त्रेपाचयेत् ॥ ततः पुनर्भृंगराजरसेन मर्दयेत् दिन १ पुनः क्षारत्रयं ३ पंचलवणां ५ विष १ व्योष ३ चित्रक ३ रससमं पृथग्योजं
पुनर्भृंगराजरसेन संमर्द्य माषद्वयमितां वटीं कृत्वा प्रयोजयेत् ॥ सज्वरे विज्वरे वाथ सशूले शोणितोद्भवे ॥ निरामे शोषयु
क्ते वा ग्रहण्यामामवातके ॥ अनुपानं विना ह्येष कार्यसिद्धिं करिष्यति ॥ कारूपसागररसः ॥ सूतं हिंगुलमभ्रकं
विषयुतं गंधायुतं मर्दयेत् पाठाचित्रकबिल्वनागरजलैः प्रत्येकशो भावयेत् ॥ राजैकं मधुसंयुतं सरजरसं श्रीवेष्टचूर्णा
न्वितं ॥ नाद्यं वातकफापहं रसमिदं सर्वातिसारं जयेत् ॥ अतिसारेभसिंहरसः ॥ मृतं सूतं मृतं स्वर्णं मृतं ताम्रं समं समं ॥ तुल्यं च खादिरं सा
रं तथा मोचरसं क्षिपेत् ॥ द्रवैः शाल्मलिमूलोत्थैर्मर्दयेत् प्रहरद्वयं ॥ चणामात्रा वटी भक्षा निष्कैकं जीरकैः सह ॥ त्रिदोषोत्थमतीसारं सज्वरं
नाशयेद्ध्रुवं ॥ इयं चंद्रप्रभावटीरसः ॥ इत्यतीसाराधिकारः ॥ अथ ग्रहणी ॥ चित्रकं त्रिफला व्योषं विडंगं रजनीद्वयं ॥ भल्लातकं
यवानी वहिंगुलवणपंचकं ॥ गृहधूमं वचा कुष्ठं घनमभ्रं च गंधकं ॥ क्षारत्रयं चाजमोदा पारदं गजपिप्पली ॥ एतेषां चू
र्णितं यावत्तावच्छुक्राशनस्य च ॥ अभ्यर्च्य लाइकां प्रातर्योगिनीकामरूपिणी ॥ विडालपणमात्रं तु भक्षयेदस्य गंजकं

॥ मंदाग्निकाशदुर्नामप्लीहपांडुरुचिज्वरान्॥प्रमेहशोथविष्टंभसंग्रहग्रहणीहरः॥सर्वातिसारसमनंसर्वशूलनिवारणं॥आ
मवातगदःछेदीसन्निकादोषनाशनं॥नेत्रस्यव्याधयःसंतिवातपित्तकफोद्भवा॥कोष्टमप्पूदरेतस्यभक्षणाच्छांतिजीयतां॥वार्य्यन
चव्यवायंचस्नानंपिसितभोजनं॥कांजिकाम्लसदापथ्यंदध्यमीनंतथादधिं॥तस्मादसौसदासेव्योगडुंकोलायिकाकृतं॥कृ
३॥आलिप्यतापीकरविरिकाभ्यांवैश्वानरेप्रज्वलितेनिधाय॥तप्तंसुतप्तंविनियोज्यतक्रेनिर्वाप्यपाराचतुःशतलोहं॥एभिःप्र
कारैःसुद्धतावलोहचूर्णंकृत्वाचापिपलानिचाष्टौसर्पिपलंतैलपलंपलानिचत्वारिवादायवरिरसस्य॥रक्तस्यवाम्लस्य
चतुःपलानिकर्षंचकर्षंपृथगौषधानां॥व्योषाजमोदाचविकानलानांमूलंप्रदद्यादथपिप्पलीनां॥सिंधूप्रसूतंमविडंगचू
र्णंतक्रेणहन्याद्ग्रहणीसमस्तांशुद्धलोहपलः॥पत्रलंपत्रंविधायततःस्वर्णपाक्षिकपल४मनःशिलापल४द्वयं॥तक्रेणकल्कं
विधायलोहपात्रेअर्धंसंलेपयेत्॥ततोभूषायांस्थाप्यस्तारांगारेणधमेत्॥यावदग्निवर्णंभवेत्ततःतक्रेविनिक्षिपेत्पुनरुद्ध
त्यपूर्ववत्कल्केनलेपयेत्॥एवंप्रकारेणयावच्चूर्णंभवतितावद्वारपर्यंततक्रेक्षिपेत्॥यदाचूर्णंतद्वारितरंभवतितदा
मृतोभवति॥तल्लोहचूर्णपल ८ गोघृतपल ४ तिलतैलपल ४ म्लतक्रपल ४ सतावरीस्वरसपल ४ लोहपात्रेपक्कात
त्रचूर्णंमिषड्षणाअजमोदा·सैंधव·विडंग·पृथककर्ष१।१क्षिप्त्वापक्कावगुटिकांवल्लमात्रांचरेत्॥अर्शांसिशोथंप

रिणामशूलं स्थूलं च दीप्तं च करोति वह्निं ॥ करविरिकामनःशिला ॥ लोहसारकल्प· अष्टौ गंधकतोलकाद्रसपलं लोहं तदर्द्धं अभ्रं
लोहार्द्धं च वराभ्रकं सुविमलं ताम्रं तथो भार्ड्गकं ॥ पात्रे लोहमये च मर्द्दनविधौ चूर्णीकृतं चैककं रोगौड्राव्यावादरवह्निमान्तिमडु
नापाकं विदित्वा दले ॥ रंभापालघुटालये त्यदुरियं पंचामृतापर्पटी ख्याता नाक्षौद्रघृतान्विताप्रतिदिनं गुंजाद्वयं वृद्धितः लो
हे मर्द्दनयोगतः सुविपुले भर्क्षक्रियालोहवर्ज्जु जाहा वथवा त्रिकं द्विगुणितं सन्नाहमेवं विधिः ॥ नानावर्णग्रहणामरुचि
समुदयेदुष्टदुर्नामके पिछर्यो दीर्घातीसारे ज्वरभरकलिते रक्तपित्ते क्षये पि वृष्याणां वृष्यराज्ञी वलिपलितहरानेत्ररोगैक
हंत्री तुडं दीप्तं स्थिराग्निं पुनरपि नवकं रोगिदेहं करोति ॥ पंचामृतापर्पटीरसः ॥ पंचलवणांत्रिशाणांच प्रत्येकं त्र्यूषणांपि च ॥
गंधकान्माषकान्षष्टौ चतुरो माषकान्रसात् ॥ इंद्रानाल्पं शाणांत्रितयाधिकमिष्यते ॥ खादन्ति श्रीकृताद्रसामनुपेयं च कां
जिकं ॥ माषकादिक्रमेणैव मनुयोज्यं रसायनं ॥ अत्यंताग्निकरं चापि भोजनं सर्वकामिकं ॥ प्रसिद्धं योगिनीप्रोक्तं चूर्णं रसा
यणं ॥ लघूलाइचूर्णीरसः ॥ दग्धाकपर्दिकानिष्टात्र्यूषणाटंकणांविषं ॥ गंधकं शुद्धसूतं च तुल्यं वीरजैर्द्रवैः ॥ मर्द्दयेद्व
क्षये न्माषंमरिचाज्यं लिहेदनु ॥ निहन्ति ग्रहणीरोगं पथ्यं तक्रोदनेहितं ॥ हंसपोटलीरसः ॥ तारामौक्तिकहेमानिसार
श्चैकैकपीभागिकं ॥ द्विभागं गंधकसूतस्त्रिभागोमर्द्दयेदिमां ॥ कपित्थस्वरसैर्गाढ मृगशृंगेततः क्षिपेत् ॥ पुटेत्मध्यपुटेनैव तत्

तउद्धृत्य मर्दयेत् । बलारसैः सप्तवेरमपामार्गरसैस्त्रिधा ॥ लोध्रप्रतिविषामुस्ता धातकीन्द्रयवामृता ॥ प्रत्येकमेतत्स्वरसैर्भावनास्यात्त्रिधात्रिधा ॥ माषमात्रो रसो देयामधुनामरिचैस्तथा ॥ हन्यात्सर्वानतीसारान्ग्रहणीसर्वजामपि ॥ कपाटो ग्रहणीरोगे रसोयं वह्निदीपकः ॥ ग्रहणीकपाटरसः ॥ मृतसूताभ्रकं गंधं यवक्षारं सटंकणं ॥ अग्निमंथवचाकर्षान्सूततुल्यानि मात्सुधीः ॥ ततो जयंति जंबीरभृंगद्रावैर्विमर्दयेत् ॥ त्रिवासरं ततो गोलं कृत्वा संशोध्य धारयेत् ॥ लोहपात्रे शरावं च दत्वोपरि च मुद्रयेत् ॥ अधो वह्नि शनैः कुर्याद्यामार्द्धं ततउद्धरेत् ॥ रसतुल्यामतिविषां दद्यान्मोचरसं तथा ॥ कपित्थविजयाद्रावैर्भावयेत्सप्तधा पृथक् ॥ धातकीन्द्रयवामुस्तालोध्रविल्वगुडूचिका ॥ एतद्द्रवैर्भावयित्वा चैलैकैकं तु शोषयेत् ॥ रसवज्रकपाटाख्यं माषैकं मधुना लिहेत् ॥ रसभस्म ॥ अभ्रक· गंधक· यवक्षार· टंकण· अग्निमंथ· वचा· सर्वं पृथक् कर्ष १।१ ॥ ततः भावना — — — — जंवीर· भृंगराज· त्रिदिनं मर्दयेत् ॥ ततः गोलं कृत्वा· संशोध्य लोहपात्रे स्थापयित्वा उपरि सरावं दत्वा ॥ मुद्रयित्वा चूल्हिकोपरि स्थापयित्वा घटिका ४ वह्निं दत्वा स्वांगशीतं निकास्य सर्वं तुल्यामतिविषां दत्वा मोचरसं च दत्वा भावना कपित्थे विजया द्रावे सप्तधा पुन धातकी इंद्रयव· मुस्ता लोध्र विल्व गूडूची एतैः पृथग्वेलैकं भावयित्वा शोषयित्वा· मात्रा माष· अनुपानं गुडकैच ॥ वह्निशुंठी विडंग विल्व लवणं चूर्णयेत्समं पिबेदुष्णांबुना चानु सर्वजां ग्रहणीं हरेत् ॥ ग्रहणीवज्रकपाटरस ॥ रसं गंधाभ्रकाणां च

भागानेकद्विकाष्ठकान् ॥ संचूर्णं सर्वरोगेषु युञ्ज्याद्द्विवल्लद्वयं ॥ ग्रहणीक्षयगुल्मार्शोमेहधातुगतज्वरान् ॥ हंति सूतराजोयं मंड-
लैकस्य सेवया ॥ गगनसुंदरो रसः ॥ सूतं गंधं चाभ्रगंधा गूडूची यष्टितोयेमर्दयेदेकघस्रं ॥ शुद्धं शंखं मौक्तिकं लोहभस्मि भूततु-
ल्यं तु दद्यात् ॥ भूकपर्णीद्रैर्वासरं त्रिदिनं यंगोलं कृत्वा भूधरे तं पुटेच ॥ चूर्णीकृत्वा नागवल्लीरसेन दद्यादेनं मर्दयित्वैकयामं ॥ म-
ध्वाज्याभ्यां पूर्णचंद्रं रसेंद्रं पुष्टिवीर्यदीपनश्चैव कुर्यात् ॥ प्रायोयोज्यं पित्तरोगे ग्रहण्यां मर्शोरोगे पित्तले योल्पयुक्तं ॥ स्त्रीणां ता-
पे शाल्मलीनीरयुक्तं योज्यं वाज्यं वा शताह्वाविपक्वं ॥ पूर्णचंद्ररसः ॥ शुद्धसूतं मृतं चाभ्रं गंधकं मर्दयेत्समं ॥ लोहपात्रे घृताभ्य-
क्ते क्षणं मृद्वग्निना पचेत् ॥ चालयेल्लोहदंडेन आवत्तार्यं विभावयेत् ॥ त्रिदिनं जीरकक्वाथे माषैकं भक्षयेत्सदा ॥ ग्रहणी शां-
तिमायाति सर्वोपद्रवसंयुता ॥ तंत्रमरे· रसचित्रांवरानाम ग्रहणी रक्तसंयुता ॥ शमयेदनुपानेन आमशूलं प्रवाहिकं ॥ त्रिसुंद-
ररसः ॥ कर्षगंधकमर्द्धपारयुतं कुर्या कुंभां कज्जली व्योषासत्रिकटोत्वपंचवल्लवराणत्सार्द्धंच कर्षपृथक् ॥ सार्जीक्षारं द्विपलं वि-
चूर्णं सकलं शक्रासनाम श्रितान्स्वादेद्धाणमनोनु काजिकपलं मंदाग्निसंदीपनं रेवद्धां भोजनतारसायनमिदं पुण्यं द-
कोपद्रवैः पेयं चात्रनुकांजिकं वदंति सा त्वायी महायोगिनी ॥ त्रीन्दोषान् ज्वरकृष्टपांडुजठरातीसारकाशक्षयप्लीहार्शो-
ग्रहणी जयेन्मतिवलं सत्वायुराजप्रदं ॥ घर्षांशे प्रत्येक सार्जीक्षः ॥ सार्द्धकर्षं द्विपलं च मध्यमत्वायी चूर्णरसः ॥ गंधेशव

ज्जलीलोहेडुलांवादरवह्निना॥ गोमयोपरि विन्यस्य कदलीपत्रपातनात्॥ कुर्यात्पर्पटिकारामस्यारक्तिद्वयंक्रमात्॥ दशाकु
ष्मलकंयावत्प्रयोगःप्रहरार्द्धतः॥ तदूर्ध्ववद्धपूगस्यभक्षणंदिवसेष्ठतः॥ नालीयवमांसाज्यदुग्धान्यत्रविधीयते॥ वर्ज्यविदा
हि क्षीरंभाम्लंतैशाकंचसार्षपं॥ ग्रहणीक्षयकुष्ठार्शःशोथदुर्नीरुग्विनाशिनी॥ रसपर्पटीरसः॥ शुद्धसूतपलमितंतुर्यांशंस्व
र्णसंयुते॥ मर्दयेन्निंवुनीरेणयावदेकत्रमाप्नुयात्॥ प्रक्षाल्योष्णांवुनापश्चात्पलमात्रेसुगंधके॥ द्रुतेलोहमयेपात्रेवद
लानलयोगतः॥ प्रक्षिप्यचालयेल्लेहांमंदलोहशलाकया॥ ततःपाकंविदित्वातुरंभापात्रेशनैःक्षिपेत्॥ गोमयेस्थितत
दुपरिरंभापात्रेणयंत्रयेत्॥ शीतंतच्चूर्णितंगुंजाक्रमवृद्ध्यानिषेवयेत्॥ माषमात्रंभवेद्यावत्ततोयात्रांनवर्द्धयेत्॥ सक्षौ
द्रेणाथवाज्येनैवलेहयेद्भिषगुत्तमः॥ ग्रहणींहंतिशोथंचस्वर्णारसपर्पटी॥ सद्योवल्करीशुक्रवर्द्धिनीवह्निदीपनी॥ क्षेप
काशेश्वासमेहेशूलातीसारपांडुजित्॥ स्वर्णपर्पटीरसः॥ हिंगुलंमरिचंगंधंपिप्पलींटंकणांविषं॥ कनकस्यचवीजानि
समांसेविजयाद्रवैः॥ मर्द्दयेद्याममात्रंतुचणमात्रंवटिकृता॥ भक्षयेद्ग्रहणींहंतिरसकनकसुंदरः॥ लवंगादिकषायेन
स्त्रीरोगंहंतिदुस्तरं॥ अग्निमांद्यंज्वरंतीव्रमतिसारंचनाशयेत्॥ दध्यन्नंदापयेत्पथ्यंयवानक्रोदनंपिवेत्॥ कनकसुंदरस
॥ सूतकंगंधकंलोहंविषंविजयपत्रकं॥ विडंगंरेणुकामुस्तमेलाग्रंथिककेशरः॥ फलत्रिकंत्रिकटुकंशुल्वभस्मंतथैव

च॥ एतानि सम भागानि द्विगुणो दीयते गुडः॥ काशे श्वासे क्षये शूले प्रमेहे विषमज्वरे॥ लूतायां ग्रहणी मांद्य शूले पार्श्वामये तथा॥ हस्त
पादादि रोगे गुटिकेयं प्रशस्यते॥ नेत्रांतरे तु॥ चणप्रमाणां गुटिकां खादये कुष्ठदेहिनां॥ विशेषग्रहणी रोगे शूले पाण्ड्वामये तथा॥
मूत्रगर्भे वातरोगे हृच्छूचगग्रहे॥ ॥ गंडमाला भगंदरोगे हिक्कामूर्छाचिनानरे॥ उन्मादे वातरोगे च रक्तपित्ते च दारुणे॥ अशीतिवा
तजान् रोगान्नाशयेन्नात्र संशयः॥ विजयभैरवरसः॥ करणा नागर पाठाभिस्त्रिवर्गाद्वितयेन च॥ विल्वचंदनह्रीवेरैः सर्वातिसारह
न्मतः॥ सर्वापत्रवसंयुक्तामपिहंतिप्रवाहिकां॥ नागेन सदृशो लोहे विद्यते ग्रहणीहरः॥ त्रिवर्गाद्वितयं त्रिफलात्रिभेदं ते यथा॥ पथ्या
विभीतधात्रीणां फलैस्स्यात्रिफला समैः॥ द्राक्षा काश्मर्य खर्जूर फलानीति फलत्रयः॥ जातीफलं पूगफलं लवंगं च फलत्रयं॥ तृतीयं॥ स
र्वचूर्णसंलोहं एवं वक्ष्यमाणप्रयोगे मेतव्यं॥ करणाद्यलोहं· हेमसूतम˜ नागतप्रक्षालितगंधकाभ्रकपर्दकमेतत्॥ द्विघ्नशंखमिलि
तं विजयाम्त्योरभसातत्रुपिषे कृत्वा गोलं॥ चूर्णवेष्टितमतः पडुभांडे वेदयामपि पाचितं तत्र भकुर्यं॥ आपसेनलरसेन पचेच्चलोकनाथव
दर्थकियोगात्॥ सुवर्णभस्म· लोहभस्म· रसभस्म· मौक्तिकभस्म· लोहभस्म· अभ्रकभस्म कपर्दभस्म पृथक्कर्षे १।१ शंखभस्म १२
चूर्णयित्वा विजयारसेन द्विघटिकं पचेत् लोकनाथवत्सर्वयोगं ज्ञेयं॥ देयाग्रहण्यामतिसारशूलमांद्यक्षयेमागधिकामछुभ्यां
॥ पित्तप्रकोपे पिकफानिले तु घ्नोषणाभ्यां ग्रहणीकपाटः॥ द्वितीयग्रहणीकपाटरसः॥ शुद्धादि फेनवलिसूतकपर्दभस्म

हालाहलोषणाविश्वदन्तवर्णावीजैः ॥ अभ्रोधिपक्तिकरशोलधराष्टाविंशत्यंशैर्विचूर्णितममसौग्रहणीकपाटः ॥ वद्धोस्यहंतिमधुनास
ह जीरकेण भुक्तोतिसारमपिसंग्रहणीमुदग्रां ॥ आमंविपाच्यसहसाजनयत्यवश्यंवैश्वानरंजठरवर्तिनमर्चिभाजः ॥ तत्रीयग्रहणी
कपाटरसः ॥ गंधपारदमभ्रकं च दरदं लोहं वजातीफलं ॥ विल्वं मोचरसं विषाप्रतिविषाव्योषंतथाधातकी ॥ भ्रष्टामव्यभयाकपित्थ
जदलौदीप्यानलो दाडिमं टंकाभस्मकलिंगकं कनकजंवीजं वयक्षेक्षरां ॥ एतत्तुल्यमफेनमेतदखिलं संमर्द्य संचूर्णयेत् धत्तूरद्र
दजैरसैश्चमतिमान्कुर्यान्मरीचाकृतिम् ॥ दत्तासाग्रहणीगदं सरुधिरं सामं सशूलं चिरात्तीसारंविनिहंति - तिंसहितांतीव्रांविसूची
मपि ॥ दुःसाध्याविविधागदान्परिहरेदुक्तानुपानैरपि नाम्नान्ग्रहणीमतंगजमदध्वंसीभकंठीरवः ॥ यक्षेक्षरां·करंजफलं ॥ ग्रहणी
गजकेशरीरसः ॥ रसेन्द्रगंधातिविषाऽभयाभ्रं क्षारत्रयं मोचरसोवचावा * जयावजंवीररसेनपिष्टं पिंडीकृतंस्याद्ग्रहणीकपाटः ॥ त
स्यार्द्रमाषमधुनाप्रभाते शंवूकभस्माभियुतं निहंति ॥ उग्रंहरत्यामपिमग्निमांद्यं क्षैरांप क्षयंस्वाससमुरक्षतं च ॥ ग्रहणीकपाटरसः ॥
॥ शुद्धपारदगंधाभ्यां कृतपर्पटिकानुरागां निहंति ग्रहणीक्षोद्रयुक्तापथ्यभुजांभृशं ॥ रसपर्पटीरसः ॥ जयापत्ररसेनाथवर्द्धमान
रसेन च ॥ भृंगराजरसेनापि काकमाच्यारसेन च ॥ रसंसंशोध्ययत्नेन तत्समंशोध्येवलिं ॥ भृंगराजरसैः पिष्टाशोषयेदर्करश्मिभिः
॥ सप्तधावात्रिधावापिपश्चाच्चूर्णंतुकारयेत् ॥ चूर्णयित्वासमंतेनरसेनसहमर्दयेत् ॥ नष्टसूतंयदाचूर्णंभवेत्कज्जलसंनिभं ति

ड्रूमेव दरांगारे द्रवीकुर्यात्प्रयत्नतः ॥ ततस्तं महिषीविष्ठास्थापिते कदलीदले ॥ निक्षिप्य तदुपर्यन्यत्पत्रं दत्वा प्रपीडयेत् ॥ शीतलां तां ततः प
त्रात्समुद्धृत्य विचूर्णयेत् ॥ एवं सिद्धा भवेद्व्याधिघातिनी रसपर्पटी ॥ ज्वरादिव्याधिभिर्व्याप्तं विश्वं दृष्ट्वा पुरा हरः ॥ चकार कृपयायुक्तः सु
धावद्रसपर्पटिः ॥ रक्तिकासंमितावढ्ढषजीरकसंयुतंतं जार्द्रभृष्टहिंग्वासां भक्षयेद्रसपर्पटिं ॥ रुःगात्रं रूपभेषज्यैरपितां भक्षयेद्बुधः
॥ विवेत्तदनुपानीयं शीतलं तुलकत्रयं ॥ प्रत्यहं वर्द्धयेत्तस्यां एकैकां रक्तिकां भिषक् ॥ नाधिकां दशगुंजातो भक्षयेत्तां कदाचन ॥ ए
कादशादिनारंभात्तां तथैवापकर्षयेत् ॥ एवमेतां समश्नीयात्तरोविंशतिवासरान् ॥ शिवं गुरुं तथा विप्रान्पूजयित्वा प्रणाम्य च ॥ श्रद्ध
या भक्षयेदेतां क्षीरमांसरसाशनः ॥ ज्वरं च ग्रहणीं चापि तथातीसारमेव च ॥ कामलापांडुरोगं च शूलप्लीहजलोदरं ॥ एवमादीन्ग
दान्हत्वा हृष्टपुष्टश्च वीर्यवान् ॥ जीवेद्वर्षशतं साग्रं वलीपलितवर्जितः ॥ जया·विजयावर्द्धमानरकैरंडः ॥ रसपर्पटीरसः ॥ ॥
लोहाभ्रार्करसं समं द्विगुणितं गंधं पचेत्कोलिकाकाष्ठाग्नौ मडुले निधाय सकलं लोहस्य पात्रे भिषक् सर्वं गोमयमंडले विनिहितं रं
भादले विन्यसेत्तस्योर्द्ध्वकदलीदलं डत्तरं वैयेश्वरो विन्यसेत् ॥ स्यात्पंचामृतपर्पटी ग्रहणीकायक्ष्मातिसारज्वरप्लीहरुक्पांडुगदा
म्लापित्तगदजध्वान्तौघविध्वंसिनी ॥ ग्रहण्यामनुपानं तु हिंगुसैन्धवजीरकं ॥ जीरकं पांडुगरयोरितरेषु स्वयुक्तितः ॥ पंचामृतप
र्पटीरसः ॥ चिंचाश्वत्थस्नुहीमुष्ककापामार्गस्य च भस्मतः ॥ पृथक्संमुद्धरेत्क्षारा लवणानि भिषग्वरः ॥ टंकणं च यवक्षारं स्वर्जि

कालवणानि च ॥ रामठं नालकं चैव लोणारं नवसादरं ॥ सोमक्षारं च गोदंतं ताप्यगंधकजं रजं ॥ विडंगमब्धिफेनं च सोराष्ट्रि सोरकं विषं
॥ शंखचूर्णं शंखनाभिचूर्णं पाषाणजो रजः ॥ मनःशिला च काशीसं सममेतत्तु कारयेत् ॥ अम्लवेतसजद्रावै रातपे भावयेद्दिवा ॥ सप्त
धा तद् भावेत्तु जंवीराम्लेन च त्रिधा ॥ अतिसूक्ष्ममिदं काचकूपिकाजठरे क्षिपेत् ॥ कूपिकायं निवेश्याथ ज्वालाहरणीयंत्रमाचरेत् ॥ ततो जंतु
ततो ग्राह्यं भिषग्जातरूमार्गतः ॥ काचपात्रे क्षिपेदेतद्दिव्यमंत्राभिमंत्रितः ॥ गुंजैकं पर्णखंडेन गुंजाद्वयमथापि वा
चिंचा · अश्वत्थ · स्नुहि · पलाश भेद अपामार्गादीनां भस्म · सर्वलवणानि · टंकणं · यवक्षारं · स्वर्जिक्षारं · हिं
गु हरिताल · कृत्रिमलवणं नवसादरः सोमलं · गोदंती · सुवर्णमाक्षिक · गंधकं · विडंग · समुद्रफेन · सोराष्ट्री
सोरकं विषं · शंखभस्म · शंखनाभी · पाषाणजचूर्णं · मनःशिला : काशीस · पृथक् सम भाग संग्रह चूर्णयित्वा अ
म्लवेतसद्रावे आतपे सप्तधा विभाव्य · पुनर्जंबीरद्रवैस्त्रिधा विभाव्य आतपे शुष्कं कांचकूपीं विनिक्षिप्य नलिकायंत्रेन तद्ग्राह्यं च कूप्यां सं
स्थाप्य इष्टमंत्राभिमंत्रितः मात्रा गुंजा १ पर्णखंडेन सह भक्षयेत् ॥ भक्षयेदथवो देहबलाग्निविचित्रमात्रया ॥ कासश्वासक्षयाजीर्ण
ग्रहणीमुदराणि च ॥ गुल्मारोचकमंदाग्निप्लीहकृच्छ्राण्यपि कृमीन् ॥ अर्शोश्मरीमूत्रकृच्छ्रमूत्राघातांश्च पांडुतां ॥ आमवातं च कुष्ठा
निपक्षाघातादिकान् गदान् ॥ अशीतिसंख्यान् वातोत्थान् श्लेष्मोत्थान् विंशतिं तथा ॥ शूलानि शोषान् यक्ष्माणमाजीर्णानि निहंति

च॥ भुक्त्वानुकंठपर्य्यंतं रसोऽयं जाम्बिरं तलिहेत ॥ भस्मीभवति तद्भुक्तं पुनर्भोजनमिच्छति ॥ यामार्द्ध — वयत्येन शंखधाव श्मवज्रकं ॥ मांसे दत्वा
नुपेक्ष्या ध्यमासेऽद्रवति तत्क्षणात ॥ आमनारांवोरसः ॥ इतिग्रहणाधिकारः ॥ अथार्शः ॥ शुद्धंसूतं षड्गुणांजीर्णगंधकं चैपात्रेवा
लुकायंत्रयोगात ॥ भस्मीकृत्वा योजयेद्दत्तं हेमतुल्यांशंस्याद्यस्य लोहाभ्रयोश्च ॥ सूतात्तुल्यं गंधकं मेलयित्वा खल्वे मर्द्यं सूरणास्यद्र
वेण ॥ दंतीमुंडिकाकमाचीहलारव्याशृंगो कांग्निसप्तधैषां रसेन ॥ क्षिप्त्वा पश्चाद्धान्यराशौ त्रिघस्रं ॥ चूर्णीकृत्वा माषमात्रं ददीत ॥ अ
त्रषड्गुणगंधकाजीर्णरसभस्मलोहा ॥ अभ्रकं सर्वं पृथक्समभागं खल्वे मर्दयित्वा पृथक्तैर्द्रवैर्भावयेत ॥ सूरणास्य १ दंतीरसे
न १ मुंडी १ काकमाची १ — — — — — — — कर्कटाशृंगी १ चित्रक दिनसप्तकं भाव्यंगोलं कृत्वा दिन २१ धान्यराशौ निधाय पश्चा
त्रिक्षारस्य मात्रा माष १ अनुपानं च यथायोग्यं ॥ अर्शोरोगो दारुणो चग्रहण्यां शूलेपांड्वाम्लपित्ते क्षयेच ॥ श्रेष्ठं क्षौद्रं चानुपानं प्र
शस्तं रोगोक्तं वा माषषट्कप्रयोगात ॥ सर्वरोगा यांति नाशं जरायां वर्षैकं हंसे वनीयं प्रयत्नात ॥ पथ्यं सात्म्यमम्लतैलादि योषिद्वर्ज्जं देयं स
र्वरोगप्रशांत्ये ॥ पुष्टिकान्तिवीर्यवृद्धिं सदार्थं सेवायुक्तः मानवं संलाभते ॥ पीयूषसिंधुरसः ॥ वैक्रांतताम्राभ्रकगंधकानां रस
स्य कांतस्य समानभंगं ॥ चूर्णीभवेत्यवषजन्नतोयं अर्शोविनाशाय च वल्लमात्रं ॥ षडाननरसः ॥ शुद्धसूतं पलैकं तु द्विपलं शुद्ध
गंधकं ॥ मृतताम्रं मृतं लोहं प्रत्येकं च पलत्रयं ॥ शूरणं लांगली दंती चित्रकं पीलुकं तथा ॥ प्रत्येकं द्विपलं योज्यं यवक्षारं वटं कणां ॥

॥उभौपंचपलौयोज्यौसैंधवंपलपंचकं॥ द्वात्रिंशत्पलगोमूत्रेस्नुहिक्षीरंचतत्समम॥ मृदग्निनापचेत्सम्यक्स्थालायावत्सुपिंडितं॥
मारवद्वयंतथाखादेत्रसोह्यर्शःकुठारकः॥ पिलुकंकपित्त॥ अर्थकुठाररसः॥ क्रिमिरिपुदहनव्योषत्रिफलामरदारुहव्यभूनिं
व॥ मागधिमूलंमुस्तंशठीवचाधातुमाक्षिकंचैव॥ लवणक्षारनिशायुगकुस्तुंबुरुगजकणातिविषा॥ कर्षांशकान्येवसमानिकु
र्यात्पलाष्टकंरसजंतोर्विदाध्यात्॥ निष्कत्रयंशुद्धरसस्यपुरस्यधीमान्पलद्वयंलोहरजस्तथैव॥ सिताचतुष्कंपलमत्रघांस्यानिकुंभ
कंभंत्रिसुगंधियुक्तं॥ चंद्रप्रभेयंगुटिकाप्रयोज्याअर्शांसिनिर्नाशयतिषडेव॥ भगंदरंपांडुलीमकंचनिनेष्टवह्निंकुरुतेचदीप्तिः॥
॥हंत्यायमान्पित्तकफानिलोत्थांनाडीगतेमर्मगतेव्रणेच॥ ग्रंथ्यर्बुदेविद्रधिराजयक्ष्ममेहेभगारव्यप्रबलेचयोज्या॥ शुक्रक्षये
वाश्मरिमूत्रकृच्छ्रेशुक्रप्रवाहेप्रदरामयेच॥ भक्तस्यपूर्वंसततंप्रयोज्यातक्रानुपानंत्वथमस्तुयान्ते॥ अजोरसोजांगलजोरसोवा
सीतजलानुपाने॥ वलेननागस्करगोलवेनदृष्णासुपर्णाश्रवणोवराह॥ वलीपलितनिर्मुक्तोहृष्टोपितहरणायते नपानभोज्येप
रिहारमस्तिनशीतवातातपमैथुनेषु॥ संभुसमभ्यर्च्यकृतप्रसादेनाम्नागुटिचंद्रसमाप्रसादात्॥ चंद्रप्रभागुटिः॥ गुडूचिकासत्व
ममौरसंद्रगंधौसमासोनिखिलेनवर्वरः॥ विमर्द्येच्छलिकाभवाद्भिःस्याद्बोलवद्योमधुयुक्तिमाषा॥ रक्तार्शोनाशकएषसूतः
पित्तोशर्शांपित्तजविद्रधेश्च॥ रक्तप्रमेहस्यखुडस्यचापिस्त्रीणांप्रवाहस्यभगंदरस्य॥ बोलबद्धरसः॥ खर्परंमानुषीमूत्रेस्थितंघस्रे

॥सात्मद॰॥
॥१३८॥

त्रिसप्तकं॥वत्सनदर्द्धमरिचंनवनीतेनमर्दयेत्॥शतधाभावयेन्निंबरसैस्याड्रकेशरः॥पिपलीमधुप्रयुक्तंससितंचास्यभोजनं॥ज्वरंधा
तुगतंपित्तंश्लेष्मंपित्तश्लेष्मजंगदान्॥रक्तातिसारग्रहणीदुर्नामास्त्रंनिवारयेत्॥अनर्गलंदधिवादुग्धंपथ्येचास्मिन्प्रयोजयेत्॥लघूमा
लतीवसंतरसः॥चित्रकंत्रिफलामुस्तंग्रंथिकंचविकामृतः॥हस्तिपिप्पल्यपामार्गदंडोत्पलकुठेरका॥एषांचतुःपलांभागान्जलद्रोणे
विपाचयेत्॥भल्लातकसहस्रेद्वेछित्वातत्रैवदापयेत्॥तत्रपादावशेषेणलोहपात्रेचपेभिषक्॥तुलार्द्धंतीक्ष्णलोहस्यघृतस्य
कुडवद्वयं॥त्र्यूषणंत्रिफलावह्निसैन्धवंविडमौद्भिदं॥सौवर्चलंविडंगानिपलिकांशानिकल्पयेत्॥कुडवंवृद्धदारस्यतालमू
लास्तथैवच॥शूरणस्यफलान्यष्टौचूर्णंकृत्वाविनिक्षिपेत्॥सिद्धशीतेप्रदातव्यंमधुनाकुडवद्वयं॥प्रातर्भोजनकालेवाततःख
देद्यथाबलं॥अर्शांसिग्रहणीदोषंपाण्डुरोगमरोचकं॥क्रिमिगुल्माश्मरीमेहान्शूलंचापिव्यपोहति॥करोतिशुक्रोपचयंवली
पलितनाशनं॥रसायनमिदंश्रेष्ठंसर्वरोगहरंपरं॥भल्लातकलोहः॥मृतलोहंचेन्द्रयवंशुंठिभल्लातचित्रकं॥बिल्वमज्जा
विडंगानियथातुल्यंविचूर्णयेत्॥सर्वतुल्यंगुडंयोज्यंमासात्पित्तार्शयोजयेत्॥भल्लातकशिवापथ्याचूर्णंगुडलमायुतं॥मोद
कंभक्षयेत्कर्षमासात्पित्तार्शसांजयेत्॥द्वितीयभल्लातकलोहः॥मृतंसूतामृलोहार्कविषगंधंसमंसमं॥सर्वतुल्यंशुभ
ल्लातफलमेकत्रचूर्णयेत्॥द्रवैःशूरणकंदोत्थैःखल्वेमर्द्यंदिनत्रयं॥माषमात्रंलिहेदाज्यैरसश्चार्शांसिनाशयेत्॥रसोनितो

॥रामः॥
॥१३८॥

दितो नामगदोद्भवकुलांतकृत् ॥ हस्तेनाभौ मृद्वेपादौ गदे त्रूषणायोत्तथा ॥ शोथोहृत्याश्वशूलेच यस्यासाध्योर्शसो हितः ॥ असा
ध्यस्यापि कर्त्तव्या चिकित्सा संकरोदिता ॥ ~~नित्योदितरसः~~ ॥ दिनत्रयं गंधसमं रसेन्द्रं विमर्दयेद्धनवसूद्रवेण ॥ ताम्रस्य चक्रे राणि
वध्यवाह्निं हरितकीष्वंगररसे विमर्द्य ॥ कटुत्रयेणास्य ददीत गुंजाद्वयं मरुत्याग्रजरुक्प्रशांत्यै ॥ चंड्रवंधरसोयं हि सर्वरोगोपका
रकः ॥ एतत्तुगंधकेनैव पुटं दत्वैव दापयेत् ॥ ~~चक्रबंधरसः~~ ॥ ~~अथ लोहानि~~ ॥ त्रिवृच्चित्रकनिर्गुंडी स्नुहिमुंडीतिकाशठी ॥ प्रत्येक
शोषपलिकान् जलद्रोणे विपाचयेत् ॥ पादशेषे रसे तस्मिन् पुनस्तेन विपाचयेत् ॥ पलद्वयं रुक्मलोहस्य चूर्णितं ॥ मधुशर्कर
योपुक्तं चतुर्विंशतिभिः पलैः ॥ घनीभूते सुशीते च दापयेद्दवमारिते ॥ एतदग्निमुखं नाम दुर्नामांतकरं परं ॥ सममग्निकरोत्याशु
कालाग्निसमतेजसं ॥ पाषाणोपिहि नीर्यंतप्रभावादस्य देहिनः ॥ गुरुद्रव्यान्नपानानि पयोमांसरसाहितं ॥ दुर्नामपांडुश्वयथुप्लीह
कुष्ठोदरापहं ॥ अकालपलितं चैतद्दामवातगदामयं ॥ न स्वरो गोस्ति यं चापि न निहन्त्यादिदं क्षणात् ॥ करीरकांजिकादीनि ककारा
दिनिर्वर्जयेत् ॥ भवत्यतोन्यथारोहात्लोहात्किट्टं चतुर्गुणां ॥ दिव्यौषधिमतः शिला· वैकंठ सुवर्णमाक्षिकं अग्निमुखं लोहं ॥ पलद्वा
दशकं कृत्वा कृष्णलोहस्य खंडशः ॥ भाव्यैवस्तासगंडीरापूले पिंडप्रदापयेत् ॥ दत्वा प्रधमयत्तावद्यावत्सर्वं मृतं भवेत् ॥ घृतस्य ष
ट् पलं देयं शर्करायास्तथैव च ॥ सूर्यावर्त्तरसप्रस्थे त्रिफलासहिते शुभे ॥ प्रक्षिप्य विपचेद्भूयो यावत्सांद्रनिभं भवेत् ॥ सिद्धेराश्रूषिते

वीजं सूर्य्यावर्त्तसादापयेत् ॥ कर्षत्रिकटुकस्यापि त्रिकर्षचूर्णसंयुतं ॥ मधुत्रिपलसंयुक्तं यथाग्निचोपयोजयेत् ॥ अर्शांसि कामला कुष्ठं पांडुरोगं कृमिं तथा ॥ वृद्धिगुल्मोदरं शोथविशेषात्परिणामजं ॥ शूलं निहंति सर्वास्रविकारान्नात्रसंशयः ॥ एतल्लोहामृतं नाम सर्वव्याधिषु योजयेत् ॥ सर्वसिद्धिप्रदं दिव्यं सर्वदोषहरं परं ॥ लोहामृतं ॥ चव्यापलाष्टकं देयं खदिरं चार्द्रमेव च ॥ चित्रकस्यपलं पंच तालमूली च तत्समा ॥ त्रिफलाप्रस्थमं युक्तं जलद्रोणे विपाचयेत् ॥ अष्टभागावशेषेण कषायेमवतारयेत् ॥ आज्यात्पलाष्टकं देयं रुक्मलोहं स्यषोडशाः ॥ पचेतास्रमये पात्रे सुद्दी तोयावतारिते ॥ त्र्यूषणं द्वीविडंगानि पथ्या चामलकानि च ॥ शुंठी विभीतकं कृष्णा एषां चूर्णपलाष्टकं ॥ शर्करामधुचत्वारि स्निग्धे भांडे निधापयेत् ॥ गुरुहृष्यान्नपानियपयोमांसरसाहिता ॥ दुर्नामकुष्ठश्वयथुं पांडुप्लीहोदराणि च ॥ गुदशूले कुक्षिशूले परिणामकृते हितं ॥ बलवर्णकरं हृष्यं अग्निसंदीपनं परं ॥ करिरं कांजिकं चैव काकमाचीं विवर्जयेत् ॥ चव्याद्यो लोहः ॥ प्रणम्य शंकरं रुद्रं दंडपाणिं महेश्वरं ॥ जीवितारोग्यमविच्छन्नारदः पृच्छते गुरुं ॥ सुखोपायेन हे नाथ शस्त्रक्षाराग्निभिर्विना ॥ दुर्बलानां च भीरूणां चिकित्सां वक्तुमर्हसि ॥ सशिष्यवचनं श्रुत्वा लोकानां हितकाम्यया ॥ अर्शसां नाशनं श्रेष्ठं भेषज्यमिदमीरितं ॥ पांड्यवज्रादिलोहानां आदायान्यतमं शुभं ॥ कृत्वा निर्मलपादेन कृतघा माक्षिते वा ॥ पचुरमूलककल्केन सरसेन दिहेत्ततः ॥ वह्नौ विक्षिप्य धिवसोरांगारेणाग्निधमेन् ॥ ज्वालावत्स्पर्शधव्यात्रिफलापारसेन तु ॥ ततो विज्ञापगलितं शंकुनोर्द्धं समुक्षिपेत् ॥ त्रिफलायारसपुटे तदा कृष्णनिर्धमेत् ॥

ते
तसम्यग्गलितंतत्तुवैवविधिनापुनः॥ध्मातंनिर्वापयेत्तस्मिन्लोहं तंत्रिफलारसे॥यल्लोहंनमृतंतत्तुपुनाध्माप्ययोपिपूर्ववत्॥नमृतं
मारणायच्चतत्पक्वंमलोहवत्॥तदत्तुघनलोहपात्रेकालायसमुद्गरेणासेचूर्णपि:॥दत्वावहुशःसलिलंप्रक्षाल्यागारकुद्रव्य॥त
दयःकेवलमग्नौशुष्कीकृत्यातपेथवापश्चात्॥लोहशिलायांपिष्ट्वास्यादसितेश्मनितदप्राप्तौ॥ततःसंशोध्यविधिवच्चूर्णयेल्लोह
भाजने॥लोहेनैवतदापिष्ट्वादृषदिश्लक्ष्णचूर्णितं॥कृत्वालोहमयेपात्रेमृत्तिकालिप्तरंध्रके॥रसैःपंकोपमंकृत्वास्वधेतत्क्रमयाग्नि
ना॥पुटानिक्रमशोदद्यात्यथेगेषांविधानतः॥त्रिफलार्द्रकभृंगाराणांकेशराजस्यबुद्धिमान्॥माणकंदकभल्लातवह्निनासूरणस्य
च॥हस्तिकर्णपलाशस्यकुलिशस्यतथैवच॥पुटेपुटेचूर्णयित्वालोहात्षोडशिकंपलम्॥तन्मानंत्रिफलायाश्चपरेनाधिकमाहरेत्
॥अष्टभागावशिष्टेतुरसेतस्याःपचेद्बुधः॥अष्टौपलानिदत्वाचसर्पिषालोहभाजनैः॥ताम्रेवालोहदर्व्यातुचालयन्विधिपूर्वकम्
॥ततःपाकविधानज्ञःस्वस्थोवार्द्रवसर्पिषि॥मृदुमध्यादिभेदेनगृहीयापाकमादतः॥आरम्भेनविधानज्ञःकृतकौतुकमंगलः॥प्रा
मरंघृतसंयुक्तंलिहेद्वारक्तिकांक्रमात्॥वर्द्धमानात्तुपात्तुपानाद्वागव्यक्षीरेणसंमतं॥शुद्धलोहपत्रपल१२शुद्धरसपल१२मनःशिलाप
ल१२वा·सुवर्णमाक्षिकपलकवंदनकल्केन·संमिश्रलोहपात्रेसंलिप्य॥त्रिफलाद्यारसैर्निःक्षिपेत्॥एवंप्रकारेणपुनःपुनःकृत्वा
वचूर्णीकृत्वाचवक्ष्यमाणद्रवैःपुटयेत्॥तत्रक्रमः॥त्रिफलायारसेन१आर्द्रकरसेन१भृंगराजरसेन१पीतपुष्पभृंगराजरसेन१

मानकंदरसेन १ भल्लातफलरसेन १ चित्रकरसेन १ सूरणरसेन १ वर्द्धमानरसेन १ पलासरसेन १ वज्रीक्षीरेण १ पुनः पुनः त्रिफलाचूर्णं दत्वा पुटे
त्यावद्वारितरं न भवति तावत्तमेवप्रकारेण पुटेत् पुनश्चूर्णयित्वा स्थालीपाकेन त्रिफलाक्काथ आढक १ गोघृत प्रस्थ १ लोहचूर्ण पल १३ लो
हकटाहे दत्वा विधिवत्पाकं कृत्वा ताम्रदर्व्या वा लोहदर्व्या चालयेत् ॥ मृदुपाक· मध्यपाक· खरपाक· भेदेन पाकं गृह्णीयात् ॥ शिवं शक्तिं गणे
शं वटुकं· रसभैरवं· पूजयित्वा आरभेत ततश्चूर्णं कृत्वा· मधुगोघृतसहितं लिहेत् ॥ ततः आज्ञं वा गव्यं क्षीरं पिबेत् ॥ मात्रा रक्ति १ दिनप्र
तिवर्द्धमानं १२ दिनपर्य्यंतं १३ दिनादपकर्ष एव २४ पर्यंतं ॥ अथवा दिने दिने रक्तिका १ सर्वसंमतं गव्याभावेप्यजायाश्च ग्निग्ध दृष्ट्वानि
भोजनं ॥ सद्यो वह्निकरं चैव भस्मकं च नियच्छति हंति वातं तथा पित्तं कुष्टानि विषमज्वरं ॥ गुल्मशूलाक्षिरोगाश्च निद्रालस्यमरोचकं ॥ व्रणं
वपरिणामं च प्रमेहमववाहुकं ॥ श्वपथुं रक्तश्रावं च दुर्नामं च विशेषतः ॥ बलकृद्धर्षणं चैव कांतिदं स्वरसोधनं ॥ लाघवं च मनोज्ञं च आ
रोग्यं पुष्टिवर्द्धनं ॥ आयुष्यं श्रीकरं चैव वयस्तेजस्करं शुभं ॥ सस्त्रीकपुत्रजननं वलीपलितनाशनं ॥ दुर्नामारिरयं नाना दृष्टो वारसहस्रजं
॥ निर्मूलं दहते शीघ्रं यथ तूलकमग्निना ॥ सौकुमार्य्यल्पकायत्वान्मद्यसेवी यदा नरः ॥ जीर्णमद्यानि युक्तानि भोजनैः सह पाययेत्
॥ लावतित्तिरिगोधायामयूरशशकादयः ॥ चटककलविंकश्च वर्तितश्च हरितालकः ॥ श्येनकश्च वृहद्वावो वनविष्किरिकादयः ॥
॥ पारावतमृगादीनां मांसं जांगलकं हितं ॥ मद्गुरो रोहितश्चेष्टशकुनश्च विशेषतः ॥ मत्स्याराज्ञा इमे प्रोक्ता हितमत्स्याश्च ये मता ॥ प्रशस्त

वार्त्ताकफलं पटोलं बृहतीफलं ॥ फलं वा भीरुवेत्राग्रं ताडकं तंदुलीयकं ॥ वास्तुकं धान्यशाकं च कर्त्तितं च प्रवर्द्धनं ॥ नारिकेलं च खर्ज्जूरं दाडि
मं लवलीफलं ॥ शृंगाटकं च पक्वाम्रं द्राक्षा तालफलानि च ॥ जातिकोशं लवंगं च पूगं तांबूलपत्रकं ॥ नाश्नीयाल्लकुचं कोलं कर्कंधु बदरा
णि च ॥ जंबीरं बीजपूरं च करमर्दकर्णि[illegible]डी ॥ आरण्यपशिवमांसानि क्रकरापुंडुकादयः ॥ हंससारसदात्यूहमंगुलीकवलाकयोः ॥ मारण
कं दकरीराणि च शाकं च कलिंगकं ॥ कूष्मांडकं च ककौटकेत्रकं च विशेषतः ॥ कटुकं कालशाकं च केशरं कर्कटी तथा ॥ विदलानि च स
वीणि ककारादिश्च वर्जयेत् ॥ चूर्णी राजस्तथा चायं स्वयं रुद्रेण भाषितः ॥ जगतामुपकाराय दुर्नामारिरयं ध्रुवं ॥ स्थानादि येभि मे रुश्च
यथ्वी पर्य्येति वायुना ॥ पतंति चंद्रताराश्च मिथ्याचेदमिह ध्रुवं ॥ ब्रह्महत्याकृतघ्नं च क्रूरश्चासत्यवादिनः ॥ वर्ज्जनीया विदग्धेन भिषजा
गरुनंदका ॥ मुनिरसपिष्टविडंगमुनिरसलीढं चिरस्थितं घर्मे ॥ द्रावयति लोहदोषान् वह्नि नवनीतपिंडमिश्रं च । कालेमलप्रवृत्ति ह्रा
घवमुदरे विशुद्धमुज्जारः ॥ अंगे घृनावसारो मनः प्रसादोस्यपारे पाके ॥ कृमिरिपु चूर्णालीढं सहितं स्वरसेन वनकर्पासस्य क्षपयत्यविरा
नियतं लोहाजीर्णोद्भवे शूलं कयीत्कनकबीजेन रेचनं कीटशांतरे ॥ भवेद्वयति सारसश्च पीत्वा दुग्धं गुतं जयेत् ॥ शंकरमतं लोहं ॥ इत्यर्शो
धिकारः ॥ अथाग्निमांद्य ॥ द्विपलं गंधकं शुद्धं द्रावयित्वा विनिक्षिपेत् ॥ पारदं पुरमानेन मनश्त्वायसिपुनः ॥ तेन मानेन संमिश्रं पं
चांगुलदले क्षिपेत् ॥ ततो विचूर्णं पत्रेन प्रक्षिप्याय सपात्रके ॥ चूर्ल्यानि वेश्य पत्रेन ज्वालयेन्मृदुनानले ॥ पात्रमात्रे रसं सम्यग्जंबीरस

प्रयोजयेत्॥ संचूर्णपंचकोलोत्थैकषायसाम्लवेतसैः॥ भावनाखलुदातव्यास्त्रंचाशत्प्रमितास्तथा॥ भस्मटंकणचूर्णेनतुल्येनसहमेलयेत्॥ त
दर्द्धकृष्टलवणंसर्वतुल्यंमरीचकं॥ सप्तधाभावयेत्पश्चाच्चणकक्षारवारिणा॥ ततःसंशोष्यसंपिष्यकूप्यास्कजठरेक्षिपेत्॥ अन्यर्थगुरुमांसा
निगुरुभोज्याननेकशः॥ भक्षयेदाकंठपर्य्यातंवल्लमितंरसं॥ पञ्चाम्लतक्रसहितंपिबेत्तदनुपानतः॥ क्षीप्रंप्रजीर्य्यतेभक्तंजायतेदीपनंपु
नः॥ रसःक्रव्यादनामायंप्रोक्तोमंथानभैरवैः॥ सिंहलक्ष्मणपालस्यवङ्गीसप्रियस्यच॥ दिष्टोग्रासांसंमांसाद्यभैरवानंदयोगिना
॥ कार्यादीपनभक्तानपचनेदुष्टामयोच्छोषणंभेदस्थौल्यनिवर्हणंयदहितिश्रूलार्त्तिश्रूलापहं॥ गुल्मप्लीहविनाशनेलघुरुजांविध्वंस
नेस्वेशनेवातग्रंथिमहोदरापहरणंक्रव्यादनामारसः॥ क्र~~व्यादएवमेवरसामराजोलिखतिसक्रव्यादरसः~~॥ ॥ पलंरसस्यद्विपलंब
लेस्यात्तुल्यायसिताद्यपलप्रमाणं॥ संचूर्णसर्वंद्रुतमग्नियोगादेरंडपत्रेषुनिवेशनीयं॥ पिष्ट्वातथापर्पटिकांनिधायलोहस्यपात्रेवर
पूतमस्मिन्॥ जंवीरजंपक्वरसंपलानिशतंगलेदग्निमलाल्पमात्रे॥ जीर्णेरसेभावितमेतदेवैसपंचकोलोद्भवारिपूतैः॥ सवेतसाम्लैःश
तपत्रयोज्यसमेरसःटंकणांजभस्मष्टं॥ विडंतदर्द्धमरिचंसमेवतत्सप्तरात्रंचणकाम्लवारि॥ क्रव्यादनामाभवतिप्रसिद्धोरसस्तुमं
थानभैरवोक्तः॥ मासद्वयंसेव्यवतक्रपीतमेतस्यधन्यैःखलुभोजनांते॥ गुरूणिमांसानिपयांसिपिष्टाकृतानिसेव्यानिफलानियोगा
त्॥ मात्रातिरिक्तान्यपिसेवितानियामद्वयाज्जारयतीप्रसिद्धः॥ ॥ द्वितीयक्रव्यादरसः॥ शुद्धसूतंविषंगंधंसमंसर्वंविचूर्णयेत्॥ म

रिचंसर्वंतुल्यांशंकंटकार्य्याफलद्रवैः ॥ मर्दयेद्भावयेत्सर्वमेकविंशतिवारकं ॥ वटिंगुंजात्रयंखादेत्सर्वाजीर्णप्रणाशयेत् ॥ अजीर्णकंट
कशोयंरसोहंतिविसूचिका ॥ अजीर्णकंटकरसः ॥ गंधेशटंकणाश्चैकैकाविषमत्रत्रिभागिका ॥ अष्टभागंतुमरिचंजंभाम्भोमर्दितंदिनं
॥ तद्वटिंमुद्गमानेनकृत्वाजीर्णप्रणाशयेत् ॥ शूलारोचकगुल्मेषुविसूच्यावह्निमांद्यके ॥ अजीर्णसंनिपातादिशैत्यजाड्येशिरोगदे ॥
हृन्नाशनवटीरसः ॥ कुर्याद्गंधविषंव्योषत्रिफलापारदैःसमैः ॥ भृंगांबुमर्दितैर्मुद्गमात्रास्तुवटीशुभा ॥ अजीर्णश्लेष्मवातघ्नीदीप
नीरुचिवर्धनी ॥ अमृतनगरिकारसः ॥ त्रिकटुत्रिफलाचैवतथालवणपंचकं ॥ क्षारत्रयंरसोगंधोद्विभागंपूर्ववद्विषं ॥ आर्द्रक
स्यरसेनैवगुंजाभावटकीकृता ॥ अजीर्णहि वटींखादेलवंगैःपंचसप्तभिः ॥ क्षुधासागरनाम्नीयंवटिसूर्येणनिर्मितं ॥ क्षुधा
सागररसः ॥ एकंचद्विग्वादशभागमानंयोज्यंविविपटंकणमूषणांच ॥ हुताशनानामहुताशनस्यकरोतिवृद्धिंकफवातहंता ॥
हुताशनरसः ॥ टंकणंरसगंधौचसमभागत्रयंविषात् ॥ कपर्दशंखंत्रिलवोवसुभागंमरीचकं दिनंजंभाम्भसापिष्टंभवेद्गुंजिक
मारकः ॥ विसूचिंसूरवातादिवह्निमांद्यद्विगुंजकं ॥ अजीर्णसंग्रहण्यांवाप्रयोज्योयंनिजौषधैः ॥ अग्निकुमाररसः ॥ पलैकंमूर्छि
तंसूतंमरिचंहिंगुजीरकं ॥ प्रतिकर्षंवचाशुंठीतत्सर्वंमार्कवद्रवैः ॥ दिनंपिष्टोलिहेन्माषंमधुनावह्निदीप्तये ॥ कर्षैकंभक्षयेच्चात्र
दाडिमंनागरंगुडैः मूर्छितंसूतंसंसिंदूरं ॥ अग्निजननंवटिरसः ॥ धान्याभ्रंसूतकंतुल्यंमर्दयेन्मार्कद्रवैः ॥ दिनैकंतेनकल्केनपलं

लिप्ताथवर्त्तिकां ॥ कृत्वैवनस्पतैलेनविलिप्यचपुनःपुनः ॥ प्रज्वाल्यतामधपात्रेसतैलःपारदःपचेत् ॥ सदिनेभूधरेपक्वोभस्मिभवति
नान्यथा ॥ योजितोरसयोगेशतत्तद्रोगहरोभवेत् ॥ मर्दनंतप्तखल्वस्यविशेषादग्निकारकः ॥ अत्रप्रकरणेवक्ष्येशुद्धसूतस्यमा
रकः ॥ औषधीर्यासमस्तावाव्यस्तादशोत्तराः ॥ योजिताघ्नंतिदेवेशिसूतगंधंविनापिताः ॥ मेघनादवज्रवल्लीदेवदालीचचि
त्रकं ॥ वलाशुंठीजयंतीचककौंदितुंगविकातथा ॥ कटुतुंबीकंदरभाकंदवाररासुंठिका ॥ कोशातकयमृताकंदफंन्यकाच
कमर्दकां ॥ सूर्यावर्त्तकाकमाचीगुंजानिर्गुंडिकातथा ॥ लांगलीसहदेवीचगोक्षुरंकाकतुंडिका ॥ जातीलज्जालुकटुकेहं
सपादंगराजकं ॥ ब्रह्मवीजंचभूधात्रिनागवल्लीवरीतथा ॥ सुह्यर्कदुग्धंतुलसीधत्तूरोगीरिकर्णिका ॥ गोपालिपुटमेतामिर्व
ज्रमूषागतंचरेत् ॥ वज्रमूखागारादग्धातुषादग्धादग्धावह्निकमत्रिका ॥ लोहकिट्टंचघस्त्वार्द्धमजाक्षीरेणमर्दयेत् ॥ तत्केशरारासंयु
क्ताचवज्रवाचतत्कृतिः ॥ मूषांतरंयथा ॥ मृत्स्नैकाषकुशानुपाख्यातामूषाहृद्वीयसी ॥ भक्तांगारकतालोहभ्रमराशोधनेस्थिता ॥ म
तांतरं ॥ अप्रसूतगवांमूत्रेपेषयेदुक्तमूलिकाः ॥ तद्द्रवैर्मर्दयेत्सूतंतुल्यंगंधकसंयुतं ॥ तप्तखल्वेचतुर्यामंवि[illegible]चविमर्दयेत् ॥ त
त्पिंडंपाचयेद्यंत्रेत्रिसप्ताहेमहापुटे ॥ एवंदशपुटेमार्य्यमर्द्यपाच्यपुनःपुनः ॥ ततोधत्यपुनर्मर्द्यवज्रमूषानिरोधयेत् ॥ भूधराख्य
पुटेपाच्यंदग्धाभस्मतांनयेत् ॥ द्रवैःपुनःपुनर्मर्द्यंसिद्धोयंभस्मसूतकं ॥ मूलिकामालितसूतजारणाक्रमवर्जितः ॥ तत्क्रमेदेहलो

हिंष्टरोगहन्तीभवेद्ध्रुवं ॥ भस्मसूतकः ॥ पारदाभ्रत्नलवंगंगंधकभागयुग्ममरिचैनमिश्रितं ॥ तत्रजातिफलमर्द्धभागिकंतिंतिणीफल
रसेनमर्दितं ॥ वह्निमांद्यदशवक्त्रनाशनोरामबाणइतिविश्रुतोरसः ॥ संग्रहग्रहणीकुंदकर्णीकंसामवातरवरदूषणांजयेत् ॥ रोच
कःकफकुलांतकारकं श्वासकाशवमिजंतुनाशनं ॥ रामबाणरसः ॥ टंकणंरसगंधौचसमभागत्रयंविषात् ॥ कपर्दस्वर्जिकाक्षारंमा
गधीविश्वभेषजा ॥ पथकर्षकमात्रंत्रवसुभागंमरीचकं ॥ जीवीराम्लेर्दितपिष्टंभवेदग्निकुमारकः ॥ विषूचिशूलवातादिवह्निमां
द्यप्रशांतये ॥ लघ्वग्निकुमाररसः ॥ पारदंगंधकंलोहमभ्रकंविषमेवच ॥ समांसंमरिचंचाष्टौटंकणंचचतुर्गुणं ॥ भृंगराजरसैः
सप्तभावनाचाम्लदाडिमैः ॥ गुंजाद्वयंपर्णखंडैःखादेत्तांयंनिहंत्यमून् ॥ वातश्लेष्मोभवान्रोगान्मंदाग्निग्रहणीज्वरान् ॥ अरुचि
पांडुतांचैवजयेदचिरसेवनात् ॥ लघ्वानंदरसः ॥ एकैकंविषसूतंचजातिरेकद्विगंधकं ॥ कृष्णात्रिकंविश्वषट्कंदग्धकपर्दकंत
था ॥ देवपुष्पंवाराणितसर्वंसंमर्दयत्नतः ॥ महोदधिवटीनामनष्टमग्निंप्रदीपयेत् ॥ महोदधिवटीरसः ॥ रसगंधमृतंशुल्वमृ
तमभ्रंफलत्रिकं ॥ त्र्यूषणंबीजजैपालंसमंखल्वेविमर्दयेत् ॥ द्रोणपुष्पिरसेभाव्यंशुष्कंतद्दद्गुंजात्रितं ॥ चिंतामणिरसोह्येषअ
जीर्णेशस्यतेसदा ॥ ज्वरमष्टविधंहंतिसर्वशूलहरःपरः ॥ गुंजैकंवाद्विगुंजंवाआमवातंहरंपरं ॥ चिंतामणिरसः ॥ शुद्धसूतं
विषंगंधमजमोदांफलत्रयं ॥ स्वर्जिक्षारंयवक्षारंवह्निसैन्धवजीरकं ॥ सौवर्चलंविडंगानिसामुद्रंत्र्यूषणंसमं ॥ विषमुष्टिसर्व

तुल्यांजंबीराम्लेनमर्दयेत्॥ मरिचाभावटिखादेदग्निमांद्यप्रशांतये॥ पथ्यार्थंठिगुडंचानुपलार्द्धंभक्षयेत्सदा॥ अग्नितुंदिवटिख्यातानास
र्वरोगकुलांतकः॥ अग्नितुंडिवटिरस॥ रसनिष्कंगंधकैकंनिष्कमात्रेप्रदीपनं॥ सार्द्धपलंप्रदातव्यंचूल्लिकालवणंततः॥ खल्वेवि
मर्दयेत्तुसूक्ष्मवस्त्रेणगालयेत्॥ माषमात्रेप्रदातव्यंभुक्तमांसादिजारकः॥ अजीर्णेषुत्रिदोषेषुदेयोयंराजवल्लभः॥ चुल्लिका
लवणंनवसादरं॥ राजवल्लभरसः॥ ॥ रसोर्द्धभागिकतुल्यंविडंगंमरिचाभ्रकं॥ भक्तोदकेनसंपर्द्यकुर्याद्गुंजासमानगुजान्
॥ भक्तोदकोवपानेकःसेव्यावह्निप्रदीपनि॥ वार्य्यत्रभोजनंचात्रप्रयोगेसात्म्यमिष्यते॥ लघुपानीयभक्तगुटिकारसः॥ ॥
पलेसूताद्वित्वद्वयमथवलेलौहसहितात्पलेश्रुत्वार्कंधेडंतंदहनिदध्यात्परमपि॥ निषिंचेदेरंडछदइहमथोलोहजनि
तेद्रवामत्रेपिधानिहितइहपूतंतुसलिलं॥ सुजंबीरांक्षिप्त्वापलशतमितंकिंचिदललंविधायाथोजीर्णेरसइहविडंगंसर्वतुलितं
॥ अथाद्यर्धांशस्यान्मरिचमपितुल्यंविडलंवैः॥ सुभृष्टंनिक्षेप्यंरसविधिविदारंकणामपि॥ विभाव्यंचांगेर्यास्त्रिदिनमथतोयेरन
लजैरथैतन्निर्यूहेनमरुषमितंपंचकटुजैस्तथैवार्द्रांभोभिश्चणाकलवणाद्भिश्चविधिवत्त्रिधाभंगांभोभिःक्षुतमितितुमाषद्वयमि
तं॥ रसंक्रव्यादाख्यंचरमथितयुक्तंयदिभजेदजीर्णात्रसंघोभवतिवडवाग्नेःसमतया॥ रसपलः१ गंधक२ लोहकर्ष२ ताम्र
—— २ कज्जलीकांविधाय· लोहपत्रिद्रावयित्वाएरंडदलेनिधायस्वांगशीतंचूर्णयित्वा· जंबीररसपूतेपल१०० लोहकटा

हेचूल्यांनिधायमंदवह्निप्रज्वाल्यचूर्णितंपूर्वचूर्णंक्षिप्त्वापचेत्पुनः।चूर्णीकृत्वाखल्वेतत्समंविडलवणचूर्णं।तदर्द्धमरिचचूर्णंद
योःसमंभृष्टटंकणचूर्णंमिश्रयित्वा।भावयेत्॥तद्यथा॥चांगेर्यारसैर्दिन३चित्रकरसैर्दिन५०पंचकोलरसैःदिन५०आर्द्रकर
सैर्दिन७चणकाम्लैर्दिन७पुनर्भृंगराजरसैःदिन३भावयित्वासिद्धरसः काचकूप्यांनिधायमात्रारत्ति१२अनुपानेतक्रसैन्धवं
गरीयोमांसादिप्रतिदिनमदंदीत्रड्डुनभुक्त्वाम्नौल्लस्यान्नोसकृद्दशनकांक्षीवभवति॥तृतीयक्रव्यादरसः॥समंवलिरसा
मृतंत्रितयतुल्यतीक्ष्णंरसैर्विभाव्यकलसीभवैस्त्रिगुणितसंमितासावटी॥त्रिगुंजमितमात्रयाविविधमामदोषंजयेदजीर्णवयकं
कोरसइतिप्रदिष्टोवुधैः रस१गंधक।विषय१लोह३खल्वेसंमर्द्यधावनीरसैरेकेविंशतिवासरान्भावयेत्मात्रागुंजा३अजीर्ण
कंटकरसः॥ ॥ताम्रपालदगंधकौत्रिकटुकंतीक्ष्णंचसौवर्चलं॥खल्वेमर्द्यदिनेविधायसिकताकुंभेद्वियामंततः॥स्विन्ने
तस्यचरक्तसाकविभवंक्षीरंसमंमर्दयेत्सर्वंमर्द्यचमातुलुंगफलजैर्नाम्नारसोराक्षसः॥मंदाग्नौसततंददीतमधुनाप्राणप्रणाशं
करात्सौख्यैःस्यात्पवनायमंदहुतभुग्वीर्यायतुष्टौजसे॥तेनादायसमस्तलोकगुरवेसूर्यायतस्मैनमोमर्त्यानामपिचास्यदान
समयेगुंजाष्टकंभक्षयेत्॥राक्षसरसः॥वेदंकर्षोरसप्रोक्तोनवसारस्तुकर्षकः॥सूततुल्योगंधकस्यात्तस्यार्द्धंतालकंमतं॥ता
लतुल्योयवक्षारनागकर्षमितोभवेत्॥काकमाच्यारसैर्भाव्यंसप्तवारंप्रयत्नतः॥उन्मत्तस्यरसेनापिसप्तवारंतुभावयेत्॥पचेत्त

॥ सात्म्यद॰ ॥
॥ १६४ ॥

वालुकायंत्रे द्वादशप्रहरावधिः॥ पुनस्तत्रपचेकं धंवेदकर्षं च भावयेत्॥ पूर्वोक्तैस्तु द्रवैर्यंत्रे वालुकाख्ये पचेत्ततः॥ अधश्शेषभस्मनामेति तावक्राणिषु
योजयेत्॥ सप्तभिश्शमनामेति ब्रह्मराक्षसपारदः॥ नानानुपानयोगेन सर्वरोगान्निकृंतति॥ मरीचकं भुज्यते नित्यं नरैर्नैनत्समस्वना॥ ब्रह्मराक्ष
सरसः॥ क्षारत्रयं सूतगंधौ पंचकोलमिदं शुभं॥ सर्वैस्तुल्या जयाभ्रष्टा तदर्द्धशिग्रुजाजराः॥ एतत्सर्वं जयाशिग्रुवन्हिमार्कवजैर्द्रवैः॥ भा
वितं घर्मततोलघुपुटे पचेत्॥ सप्तधार्द्रद्रवैर्घृष्टो रसो ज्वालानलो भवेत्॥ निष्कोऽस्य मधुना लीढो ह्यनुपानं गुडनागरं॥ हन्त्यजीर्णम
तिसारं ग्रहणीमग्निमांद्यं च श्लेष्महृच्छ्वासशमनं मालस्य मतविंजवान्॥ ज्वालानलो रसः॥ क्रोधघ्नं सिंधुत्थवलिभिरेकाढित्रिलवैः॥
स्मृतः॥ निर्वत्तमर्दितगारुं नाम्नाक्रोधघ्नो रसः॥ क्रोधघ्नो रसः॥ पलं विडाक्षारः पलपरिमितं पंचलवणं द्वयं सम्यक्पिष्टं भ
वति तद्घृतं तु फलरसैः॥ ततस्तत्पात्रे तस्मिन्पलपरिमितं शंखशकलं क्षिपेद्द्रावान्संप्रद्रवति तदनेनैव विधिना॥ पलप्रमाणं कटुक
त्रयं च पलार्द्धमात्रेण च हिंगुभागः॥ विरवपलद्वादशभागयुक्तं ताव — सोगंधकएषचोक्तः॥ वदरास्थिप्रमाणेन वटिमेतस्य कारयेत्॥ भक्ष
येत्॥ भक्षयेत्सर्वदा सम्यक्सर्वाजीर्णप्रशांतये॥ सर्वोदरेषु शूलेषु विसूच्यां त्रिविधेषु च॥ अग्निमांद्येषु गुल्मेषु सदा शंखवटी हिता॥
पलस्य द्वादशभागयुक्तं विषेन सम्मं रसगंधकमिति टंकं॥ शंखवटीरसः॥ अजीर्णरसप्रदीपे॥ स्नुगर्कविंवापामार्गरं भानितिलपञ्जाजान्॥
लवणाभिषगाद्यात्प्रत्येकपलमात्रया॥ लवणानि पृथक्पंचग्राह्याणि पलमात्रया स्वर्जिका च यवक्षारः टंकणं त्रितयं पलं॥ सर्वत्र

॥ रामः ॥
॥ १६४ ॥

यो दशपलं सूक्ष्मचूर्णं विधाय तत् ॥ निंबुफलरसे प्रस्थे संमिते तत्परिक्षिपेत् ॥ तत्र शंखस्य सकलंपल वह्नौ प्रतापयेत् ॥ वारान्निर्वापयेत्
सप्त सर्वे द्रवन्ति तथा ॥ नागरं त्रिपलं ग्राह्यं मरिचं चपरद्वयं ॥ पिप्पलिपलमानास्यात्त्वल्लाऊंभ्रहिंगुलं ॥ ग्रंथिकं चित्रकं चापि यवानी
जीरकं तथा ॥ जातीफलं लवंगं च पथक्कर्षद्वयोन्मितं ॥ रसो गंधो विषं चापि टंकणं च मनःशिला ॥ एतानि कर्षमात्राणि सर्वं चूर्णं विमिश्रयेत्
त् ॥ शरावार्द्धनचूर्णेण सधीयवटिकां चरेत् ॥ माषप्रमाणां सा वैद्ये हृहद्दकुंखवडी स्मृता ॥ सर्वाजीर्णप्रशमनी सर्वशूलनिवारिणी
॥ विसूच्यरसकादीनां सद्यो भवति नाशिनी ॥ हृहद्दकुंखवटी रस अजीर्णे ॥ ॥ त्रिफलामुस्तविडंगैः कणाया सितया समं ॥ स्यात्ख
रमंजरीवीजैः लोहभस्मकनाशनः ॥ खरमंजरी अपामार्गवीज ॥ त्रिफलाद्यंलोह : ॥ विडंगं नागरं कृष्णा पथ्यामलविभीतकं ॥ वचागु
डूचि भल्लातविषं चात्र प्रयोजयेत् ॥ एतानि समभागानि गोमूत्रेणैव पेषयेत् ॥ गुंजाभा वटिकां कृत्वा दद्यादार्द्रकजै रसैः ॥ एकामजीर्णयु
क्तस्य देव विसूच्यां च दापयेत् ॥ त्रिस्रो भुजंगदष्टस्य चेतनस्त्रः संनिपातिनः ॥ गुटिकां जीवनी नाम्ना संजीवयति मानवः ॥ संजी
वनीगुटिकारसः ॥ ॥ इत्यजिर्णाधिकारसः ॥ अथ कृमिः ॥ क्रमेणाहृद्रं रसगंधकाजमोदाविडंगं विषमुक्तिका च ॥ पलाश
वीजं च विचूर्णं तस्य निष्कप्रमाणं मधुनावलीढं ॥ पिवेत्कषायं घनजं तु पश्चाद्रसोयमुक्तः कृमिमुद्गराख्यः ॥ कृमिन्निहंती कृमिजांश्च रोगान्सं
दीपयत्यग्निमयं त्रिरात्राम् ॥ कृमिमुद्गररसः ॥ इति कृम्यधिकारः ॥ अथ पांडुः ॥ रसं गंधकलोहैकं पांडुरिपुरितत्रिधा ॥ कुमार्या कृश्चं तु व हृत्वा पं

॥ सात्मद· ॥
॥ १८५ ॥

डुकामलपूर्वनुत् ॥ पांडुारिरसः ॥ रसंगंधंमृतंताम्रंजयपालंचगुग्गुलं ॥ समांशमाज्यसंयुक्तंगुटिकाकारयेन्मितं ॥ एकैकाकारयेद्देयः शोथपां
डुपतुत्रये ॥ शीतलंचजलंचाम्लंवर्जयेत्पांडुसूदने ॥ पांडुसूदनरसः ॥ वंगसूतकयोःकृत्वासारणांकन्यकाद्रवैः ॥ संमर्द्यवटिकांकृत्वा
पाचयेत्कांचभाजने ॥ यावत्स्वनिभाष्ठभ्राश्रीवंगेशोमहागुणाः ॥ पांडुप्रमेहदौर्वल्यकामलानेककनाशनं ॥ मारणांकुर्यांकृत्वा ॥ श्रीवंगेश्व
ररसः ॥ अभ्रभस्मरसगंधकं — — लोहभस्मचशाल्मलीविमर्दितं ॥ शाल्मलीरसततोयगुडूचिकाक्वाथकैश्चपरिमर्दितंदिनंभावयेत्त्रिफल
यार्द्रककन्यकावह्निशिग्रुजरसैश्चसप्तधा ॥ जायतेहिमवज्जोमृतप्रमेहंशोथपांडुसमनिहंतिदायकं ॥ वत्सगुग्गुपरिमाणंतस्मिंमंल्लेहयेत्व
घृतमाक्षिकान्वितं ॥ पथ्यमत्रपरिभाषितंप्रायत्रदेवपरिवर्ज्यवर्जनं ॥ शोथपांडुविनिहंतिदायकसेवितस्त्वयवचिंचिकाद्रवैः ॥ नागराग्नि
जयपालकैस्त्वावत्तिदुग्धपरिपक्वत्यपिषा ॥ तक्रभक्तमिहभोजयेद्दातिस्निग्धमंनमतिनूतनंत्यजेत् ॥ पांडुनिग्रहोरसः ॥ ताम्रभस्मरस
भस्मगंधकंवत्सनाभमपितुल्यभागिकं ॥ वह्नितोयपरिमर्दितंपचेद्यामयादमथमंदवह्निनामृतलोहगंधकौभागवर्धितंमिदंविनि
क्षिपेत् ॥ दीर्घनालदृढकूपिकोदरेमृत्सयाचपरिवेष्टितापचेत् ॥ कुप्तिकोपरिचकूपिकामुखेप्रक्षिपेत्नवरशाल्मलिद्रवंत्रैफलंवसु
गुडूचिकारसंपाचयेत्क्रमहुवह्निनादिनं ॥ स्वांगशीतलमिदंप्रगृह्यचत्र्यूषणार्द्रकरसेनभावयेत् ॥ लोहसुंदररसोथमारितः अभ्रकपां
डुविनिहंतिदःपरः ॥ लोहसुंदररसः ॥ पलानिचत्वारिरसस्यपंचगंधस्यसत्वंगुडूचिकायाः ॥ व्योषस्यचूर्णस्यचतालमूल्याःसशाल्मल

रुप

॥ राम: ॥
॥ १८५ ॥

स्याहपलत्रयस्यात् ॥ पृथक्पृथक्षड्गगनस्य चाष्टौ लोहस्य सर्वं त्रिफलाजलेन ॥ घृत्वा चतुःषष्टिमितं तदर्धं सुभावनामार्कवजद्रवस्य ॥ शीग्रुत्थ
नीरेण च षोडशांशो तथानलोत्थां गृहकन्यकाया ॥ आर्द्रद्रवस्यैति रसोयमुक्तः पांडुक्षयस्यामगदादि हंता ॥ ॥ रस ४ गंधक प गुडू
चिसत्वस्य·त्रिकटु·मूशी·शाल्मलीमूलस्य पृथक् १ अभ्रकस्य·लोहस्य·पृथक् ८ त्रिफलाजलैघृत्वा भावना १४ भृंगराजद्रवै २ शि
ग्रुनीरेण १६ चित्रकद्रवै ८ गृहकन्यानीरेण ८ आर्द्रकद्रवै ८ तत्रासिद्धो रसमात्रा रक्तिका ६ अनुपानं रोगानुरूपं ॥ क्षौद्रेण वा शर्करया
घृतेन कर्षार्द्धमेतस्य भजेत्प्रयत्नात् ॥ त्रैलोक्यनाथरसः ॥ शुद्धसूतं च सिंदूरं पलैकैकं विमर्दयेत् ॥ वासारसेन यामैकं तेन कुर्याच्च चक्रिकाः
॥ स्वल्पकां कारयेन्मूकामुत्रतां द्वादशांगुलं ॥ तन्मध्ये गंधकं शुद्धं क्षिपेत्पलचतुष्टयं ॥ पूर्वोक्तं चक्रिकां तां योज्यं तल्लोहं च मर्दयेत् ॥ लशुनेन द
शांशेन चणमात्रा वटी भवेत् ॥ शुद्धरसपल १ शुद्धहिंगुलपल १ वासारसेन संमर्द्य चक्रिकां कृत्वा द्वादशांगुलसमितां मूषायां गंधकपल
४ चूर्णायित्वा मूषोपरि चक्रिकां स्थापयित्वा तदुपरि गंधकचूर्णं दत्वा गोमयाग्नौ कच्छपयंत्रेण पक्वा स्वांगशीतं धृत्वा तत्समं लोहभ
स्मं दत्वा तदर्धांश लशुनेन दत्वा चणमात्रा वटी कुर्यात् ॥ वातपांडुहरं सिद्धो रससिंदूरभूषणः ॥ पिबेच्चानुपामार्गहोरंडस्य च मूलकं ॥
तक्रेपिष्ट्वा च कर्षैकं हंति पांडुसकामलं ॥ सिंदूरभूषणरसः ॥ रसभस्म चतुर्भागं लोहभस्माष्टभागिकं ॥ वह्निमुस्ताविडंगं च त्रिफलाकुटज
त्वचं ॥ त्रिकटूचूर्णितं योज्यं प्रतिभागं च लेहयेत् ॥ मधुना कर्षमात्रं च पित्तपांडुहरं परं ॥ रसोयं लोहगर्भाख्यो देयं पथ्यं मृगांकवत् ॥ लोहगर्भो

रसः॥ त्र्यूषणं त्रिफला मुस्तं विडंगं चित्रकं तथा॥ एतानि नव भागानि नव भागा हतायसः॥ एतदेकीकृतं चूर्णं नरो द्वादशरक्तिकां
॥ प्रलिह्यान्मधुसर्पिर्भ्यां पिवेत्तक्रेण वा सह॥ गोमूत्रेणापि वे द्वापि पांडुरोगसनाशयेत्॥ शोथं हृद्रोगमुदरं कृमिकुष्टं भगंदरं॥
नाशयेदग्निमांद्यं च दुर्नामकमरोचकं॥ आर्द्रकस्य रसेनापि लिह्यात्कफसमृद्धिमान्॥ अयनवायसं नाम्ना रसं नवरक्तिकामि
तं भक्षणीयं॥ यतदुक्तं रसप्रदीपे॥ गुंजामेकां समारभ्य यावत्स्युर्नवरक्तिका॥ तावल्लोहसमं श्रीयाद्यथादोषानलं नरः॥ नवा
यसं रसः॥ अयस्तिलत्र्यूषणकोलभागैः सर्वैः समं माक्षिकधातुचूर्णं॥ तैर्मोदकः क्षौद्रयुतोनुतक्रं पांड्वामये हृद्गतेपि शस्तः॥ त्र्यू
षणाद्यं लोहं॥ नागरं लोहचूर्णं वा यथाक्रममथाश्मजं॥ गुग्गुलुं वाथ मूत्रेण कफपांड्वामयी पिवेत्॥ नागरं लोहं॥ त्रिफला
यास्त्रयो भागास्त्रयस्त्रिकटुकस्य च॥ भागाचित्रकमूलस्य विडंगानां तथैव च॥ पंचाश्मजतुनो भागाः पंच रूप्यमलस्य च॥ माक्षि
कस्य च शुद्धस्य लोहस्य रजसस्तथा॥ अष्टौ भागाः सितायाश्च तत्सर्वं श्लक्ष्णचूर्णितं॥ माक्षिकेण समायुक्तं स्थाप्यमायसभाजने
॥ अन्यच्च॥ मण्डाद्रिजतुरूप्यायोमलाः पंचपलान्पृथक्॥ चित्रकत्रिफलाव्योषविडंगैः पारिकैः सह॥ शर्कराष्टपरोन्मिश्राः चूर्णिता
मधुनाप्लुता॥ उदुंवरसमां मात्रां ततः खादेद्यथाग्निमान्॥ दिने दिने प्रयोगेन जीर्णे भुंज्याद्यथेप्सितं॥ वर्जयित्वा कुलत्थांश्च काकमा
चीकपोतकं॥ योगराज इति ख्यातो योगोयममृतोपमः॥ रसायनमिदं श्रेष्ठं सर्वरोगहरं परं॥ पांडुरोगविषं कांशं यक्ष्माणं विषमज्व

रं ॥ कुष्टानि जठरं मेहं स्वासं हिक्कामरोचकं ॥ विशेषाड्गुल्मपस्मारं कामलां गुदजानि च ॥ सुवर्णमथवा रूप्यं योगे यत्र न संभवेत्
॥ तत्र लोहेन कर्मास्य – भिषक्कुर्य्यादतंद्रितः ॥ योगराजरसः ॥ त्र्यूषणो त्रिफला दारुहरिद्रे नीलिनीफलं ॥ द्राक्षामिंद्रयवं मुस्तं मंजिष्ठा
कटरोहिणी ॥ शतावरि शिग्रुबीजं चित्रकं गजपिप्पली ॥ शालपर्णीपृश्निपर्णी बृहती कंटकारिका ॥ पाठा भल्लातकं दंती विशाला
सदुरालभा ॥ शठी मधुरसा रास्ना विडंगं च समाक्षिकं ॥ एतैश्चूर्णसमैकापि लोहं किट्टगणमावपेत् ॥ यावश्चूर्णकं च संग्राह्य गवां मूत्रेण
पाचयेत् ॥ ततोक्षमात्रां गुटिकां पाययेत्तंडुलांबुना ॥ पांडुरोगं जयत्याशु व्रध्नं दंडइवासुरान् ॥ कृमिकुष्ठप्रमेहार्शोग्रहणीदोषशो-
षजित् ॥ भगंदरश्वासकाशप्लीहगुल्मोदरापहं ॥ हृत्र्यूषणाद्यं लोहं ॥ कौटजत्रिफलानिंबपटोलघननागरैः ॥ भावितानि द-
शाहानि रसे द्वित्रिगुणानि च ॥ शिलाजतु पलान्यष्टौ तावन्ती सितशर्करा ॥ त्वक्क्षीरी पिप्पली धात्री कर्कटाख्या पलोन्मिता ॥ निदिग्धि-
काफलं मूलं पलं युंज्यात्रिगंधिकान् ॥ मधुत्रिपलसंयुक्तं कुर्यादक्षसमान्गुडान् ॥ दाडिमाम्लपयःक्षीरसयूषसुरासवान् ॥ कासास-
ग्कपित्तसकफशोथगुल्मगलग्रहान् ॥ नेत्रवक्त्रगदान्हन्तुः सर्वरोगहरा शुभान् ॥ शिवगुटिका ॥ किराततिक्तं सुरदारुदार्वीमु-
स्तां गुडूचिं कटुकां पटोलं ॥ दुरालभां पर्पटकं सनिंबं कटुत्रिकं वह्निफलत्रिकं च विडंगसारं च समांसकानि सर्वैः समं चूर्णम-
थात्र लोहं ॥ सर्पिर्मधुभ्यां गुटिकां विधेयात्तक्रानुपानाभिषजाप्रयोज्या · निहंति पांडुश्वपथुंप्रमेहं हलीमकं हृद्ग्रहणीप्रदोषं ॥

श्वासंचकाशंचरक्तपित्तमर्शांस्यथोदग्रहणामवातं॥व्रणांसगुल्मान्कफविड्ढथिंचश्वित्रारोाकुष्ठसननप्रयोगात्॥अष्टादशांग
लोहः॥पुनर्नवात्रिवृत्व्योषविडंगदारुचित्रकं॥कुष्ठंहरिद्रेत्रिफलादंतिचव्यकलिंगक॥कटुकापिप्पलीमूलमुस्तंचेतिप
लोन्मितं॥मंडूरंद्विगुणंचूर्णंगोमूत्रार्द्धाढकेपचेत्॥तद्वद्वटकान्कृत्वातक्रेणालोयनान्पिवेत॥तेपांडुरोगंप्लीहानंअर्शां
सिविषमज्वरं॥श्वयथुंग्रहणीदोषंकुष्ठंकृमिस्तथा॥मंडूरवटका॥तत्रनागरमंडूरनिलाशान्मानतःसमान् पि
प्पली॥द्विगुणान्दत्वागुटिकाःपांडुरोगिणांगुडादिमंडूरः॥त्र्यूषणंत्रिफलामुस्तंविडंगंचव्यचित्रको॥दार्वीत्वङ्माक्षि
कोधातुग्रंथिकंदेवदारुच॥एषांद्विपलिकान्भागान्कृत्वाचूर्णीप [illegible] थकपथक॥मंडूरद्विगुणांचूर्णाच्छुद्धमंजनसंनिभं॥मू
त्रेचाष्टगुणेपक्त्वास्तस्मिंतत्प्रक्षिपेत्ततः॥उडुंवरसमान्कुर्यात्वटकांस्तान्यथाग्निवत्॥उपयुंजिततक्रेणासात्म्यंजीर्णेचभो
जयेत्॥मंडूरवटकाह्येतेप्राणदाःपांडुरोगिणां॥कुष्ठानिजठरंशोथमूस्तंभकफामयात्॥अर्शांसिकामलामेहप्लीहानंस
मयंतिच॥द्वितीयमंडूरवटका॥निंवंपटोलंकुटजंत्रिफलामुस्तनागरं॥पचेज्जलाढकेपादशेषेदद्यात्तुशीतले॥शिलाजं
तुपलान्यष्टौमासंसंस्थापयेत्ततं॥उद्धत्यतच्छिलाजतुल्यमेलाश्चापिपलोन्मितान्॥मोचाधात्रीफलत्वगाककर्कटाख्यानिदि
ग्धिका॥त्रिवरीपादसंयुक्तंक्षौद्रत्रिफलसंयुतं॥पयोनुपानंगुटिकांकृत्वाषादेद्यथावलं॥कामलापांडुरोगेणाथवा

ज्वरन पीडितः॥ केचित्तु त्रिभंदिनिवदंति पंचकर्षं॥ त्रिवर्णमितेवटिः॥ मंडूरं चूर्णयेत्सूक्ष्मं गोमूत्रेष्टगुणे पचेत् ऊषणं त्रिफ
लामुस्तं विडंगचव्यचित्रकौ॥ दार्वीग्रंथिदेवदारु तुल्यं तुल्यं विचूर्णयेत्॥ एतन्मंडूरकल्कं च लोकानां हितकाम्यया॥ भक्ष
येत्कर्षमात्रं तु तक्रभोजनमाचरेत्॥ पांडुशोथहलीमकं जातं स्तंभे च कामलं॥ अर्शांसि विनिहंत्याशु ब्रह्मणा परिकीर्तितं
॥हंसमंडूर॥ विडंगमुस्तात्रिफलादेवदारुषडूषणैः॥ निर्वाप्य सप्तधामूत्रे मंडूरं ग्राह्य सिध्यते॥ तुल्यमात्रमयश्चूर्णं गो
मूत्रेष्टगुणे पचेत्॥ नेरक्षमात्रां गुटिकां कृत्वा खादेद्दिने दिने॥ कामला पांडुरोगार्त्तः सुखं संपद्यते क्षणात्॥ मंडूरगुटिका
॥रोहिणीचिरबिल्वं च कटजं च फलत्रिकं॥ मुस्तं च पिप्पलीमूलं यष्ट्याह्वं निंबनागरं॥ एतत्कषायैर्विधिवद्भावना च शिलातले
॥शिलाजतुपलान्यष्टौ तावतीशीतशर्करा॥ वांशपाककर्कटशृंग्याश्च मागध्याश्च पलं पलं॥ धात्रीदशपलाईंतु व्याघ्रीमूलत्व
चं तथा॥ पत्रत्वगेलागंधार्थे दत्वा चूर्णानि कारयेत्॥ तंहमन्डयथा न्यायं दद्यामधुपलत्रयं॥ वर्त्तयेद्वटकान् धीमानुडुंबरफ
लोपमान्॥ ततैकं भक्षयेत्काले सानुपानं यथाबलं॥ विडंगरसयूषांबुत्तरारिष्टासवादिभिः॥ क्षीरेर्दाडिममस्तैर्वा पथ्य
भोजी पिबेन्नरः॥ सजयेत्पांडुरोगार्शः कुष्ठमेहगलामयान्॥ यक्ष्मकासाध्यवातादि श्वासशोफोदरामयान्॥ रोगानी
कप्रमाणंशार्थसंता भगवता पुरा॥ वज्रकेति समाख्यातो वटकोयं महागुणः॥ नैनं दद्यात्कृतघ्नाय नास्तिकायो कृताव

॥साल्पद·॥
॥१४८॥

य॥ इत्यायसंप्रयोक्तव्योब्राह्मणायविशेषतः॥ नित्यमाश्रिणीणांचैवयोज्यमेतद्रसायनं॥ ~~वज्रवटक~~ः॥ पंचकोलंसमरिचंदेवदारु
फलत्रिकं॥ हिंगुचूर्णसमायुक्ताभागास्त्रिपलसंयुता॥ यावंतेतानिचूर्णानिमंडूरंद्विगुणंचकं॥ अर्शांसिग्रहणीशोथमूरुस्तंभ
हलीमकं॥ क्रिमिप्लीहानमुदरंगलरोगंचनाशयेत्॥ मंडूरंवज्रनामायंरोगानीकप्रणाशनः॥ निर्वाप्यसप्तधामूत्रैमंडूरंग्राह्य
मिष्यते॥ ग्राहयेदष्टगुणितंगोमूत्रंसर्वचूर्णतः॥ ~~मंडूरवज्रवटक~~ः॥ विडंगत्रिफलाव्योषदार्वीकृष्णामयोरजः॥ कामलापां
डुरोगघ्नंहन्यात्क्षौद्रघृतप्लुतं॥ विडंगाद्यलोहः॥ धात्रीलोहरजोव्योषनिशाक्षौद्राज्यशर्करं॥ लोहंनिवारयत्याशुकाम
लांसहलीमकं॥ ~~धात्रीलोहं~~॥ काशेनपिष्टिकांकृत्वादेवदालीरसंप्लुतां॥ तीक्ष्णागंधरजोयुक्तायुक्त्याहंतिहलीमकं॥ कां
शपिष्टिरसः॥ लोहचूर्णनिशायुग्मंत्रिफलांकटुरोहिणीं॥ प्रलीह्यमधुसर्पिभ्यांकामलार्तस्सुखीभवेत्॥ ~~लिषड्गलोहं~~॥ दग्
ध्वाक्षकाष्ठैर्मलमायसंतुगोमूत्रनिर्वापितमष्टवारान्॥ विचूर्णलीढंमधुनाचिरेणकुंभाह्वयंपांडुगदंनिहंति॥ ~~गोमूत्रमंड~~
रः॥ सितानिक्तावलायष्टित्रिफलायष्टिरजनीद्वयं॥ लोहंलिह्यात्समध्वाक्षहलीमकप्रशांतये॥ ~~सितायलोहं~~॥ इतिपांडुका
~~मलाद्यधिकारः~~॥ ~~अथरक्तपित्तः~~॥ लोहाच्चतुर्गुणंक्षीरंमाज्यंद्विगुणंसमेसितामधूनि॥ पादंविडंगसारंदत्वेछ्यान।पचेल्लोह
॥ रक्तपित्तजयेदुग्रंखंडखाद्यंरसामृतं॥ ~~शर्करासमंलोहं~~॥ अमृतातनृतादंतिश्रावणीखदिरोवृषः॥ चित्रकोभृंगराजश्च

रामः
१४८

कोकिलाक्षसपुष्करं ॥ पुनर्नवावलाकाशशिग्रुमोरतदारुकाः ॥ स्नुहानत्केसरोदर्भकुशास्थिहृत्पीवरिः ॥ गवाक्षीवरुणार्कंदच विकानालमूलिकाः ॥ नागवलाकरणामूलं कुष्ठब्राह्मीसरणायष्टिका ॥ पलोन्मितानि चैतानि जलद्रोणे विपाचयेत् ॥ अष्टभागावशिष्टे तु कषायमवतारयेत् ॥ त्रिफलायास्तथाप्रस्थं जले षड्गुणपाचितं ॥ तस्मादष्टावशेषन्तु कषायं तु परिस्रुतं ॥ माक्षिकेन हतस्यापि खह्नितस्य यथाविधिः ॥ गुडस्य च पलान्यष्टौ सितया वाथ पैत्रिके ॥ रक्तपित्तेथखंडस्य मत्स्यंड्या वापि कार्षिके ॥ गुग्गुलोर्द्विपलं दद्यात्तस्यार्द्धं सर्पिषस्तथा ॥ एवं पाकविधिर्यस्तु पचेल्लोहं समाहितः ॥ शीते च तार्थ्यमधुना क्षिपेदष्टंपलं भिषक् ॥ माक्षिकस्य विशुद्धस्य द्विपलं च रजः क्षिपेत् ॥ शिलाजतु तथा चूर्णं पलार्द्धसमितं पृथक् ॥ अथैषां प्रक्षिपेच्चूर्णं पलमात्रं पृथक् पृथक् ॥ त्रिकटुत्रिफलादंतीत्रिवृताजीरकद्वयं ॥ गायत्रीसारतालीसंधान्यकमधुयष्टिका ॥ तगरसांजनंशृंगीचित्रकं च कशेरुकं ॥ चातुर्जातिकं कंकोललवंगं मालतीफलं ॥ द्राक्षाखर्जूरकं चूर्णं पलार्द्धसमितं पृथक् ॥ गुडूचित्रिवृतादंतीमुंडीखदिरहूषचित्रक· भृंगराज· पुष्करमूल· पुनर्नवा· वला· कांस· शिग्रु मूर्वा· देवदारु स्नुहि कुट· नागकेशर· कुश· अस्थिसंहारि शालपर्णी इंडवारुणि· तिक्तशाक· सरण· चव्य· मूशलि नागवला ग्रंथी पुनः कुष्ठं भार्गी· पृथक् सर्वपलं ११ जलपलं २५६ पादशेष ६४ वस्त्रपूते लोहकटाहे संस्थाप्य पाचयेत् ॥ ततः माक्षिकहतलोहचूर्णपल १६ अभ्रकपल ४ गंधकपल ४ पारदपल ४ गुड पल

॥ साम्प्रद ॥
॥ १४९ ॥

८ पैत्तिके तु शर्करीवलाचिनि कर्ष ३ २ गुग्गुलु पल २ गोसर्पि पल ८ माक्षिकपल ८ सुवर्णमाक्षिक पल २ शिलाजतु कर्ष २ त्रिक
टु· त्रिफला· दंती· त्रवृता· द्विजीरकखदिरमार· तालीसधान्यकंमधुयष्टिकुगारसांजनं कर्कटशृंगी· चित्रकं कसेरुकं सर्वं
पथक् पलं २।१ चातुर्जातकं कंकोलं लवंगं जातीफलं हारहूरा॥ खर्जूर· सर्वंपथकर्ष २।२ मात्रा तु रक्तिकाद्वाद्या १।२ इत्यादि रि
त्या प्रतिदिनं यावदष्टमासो भवति तावद्दिनपर्यन्तं हृद्यं॥ एषलोहवरः श्रीमान्सर्वव्रणप्रणाशनं॥ यत्र तत्र प्रयुज्येतेन
त्तदाश्वविनाशयेत्॥ रक्तपित्ते म्लपित्ते च क्षयेकृष्टज्वरेह्वै॥ दुर्नाम्नि चोदरे गुल्मे ग्रहण्यामामवातके॥ वातरक्ते मूत्रकृच्छ्
प्रमेहे शर्करागदे॥ अस्योपयोगामनुजस्तारुण्यमधिगच्छति॥ ब्रह्मचर्येणकुर्वीततुतं माक्षिकसर्पिषा॥ माषकं रक्तिकाद्वाद्यायावदष्टौ
च माषकान्॥ वर्जयेद्विदलं सूपं मांसं वानूपसंभवं॥ ककारपूर्वकं सर्वं प्रयत्नेन विवर्जयेत्॥ अम्लं तारव्योवरोलोहं· सर्वत्रैवोपयुज्यते॥ अने
नजं नवः स्वस्थानि रुजः संति नान्यथा॥ अमृतसारं लोहं॥ सूतगंधमाक्षिकं लोहचूर्णं सर्वघृष्टेः फलेनोदकेन॥ मूषामध्ये भूधरेन पुटि
त्वादद्यात्कुं जान त्रैपलेनोदकेन॥ लोहपात्रे गोमय पाचयित्वा रात्रौ दद्याद्रक्तपित्तप्रनुत्यै॥ गुडाग्निविधिक्रमः॥ शर्करातिलसंयुक्तं त्रिकत्रयसम
मत्रयात्॥ रक्तपित्तं निहन्त्याशु सर्वरोगहरोपि सन्॥ शर्करायं लोहं॥ शतावरीछिन्नरुहावृषकंजिनिकाबलात्॥ तालमूलीवगायत्रीत्रि
फलायास्त्वचस्तथा॥ भार्गीपुष्करमूलं च पृथक् पंचपलानि च॥ जले द्रोणेपि वक्तव्यमष्टभागावशेषितं॥ दद्योषधिहतस्यापि माक्षिकेणाह

॥ रामः ॥
॥ १४९ ॥

तस्या वा ॥ पलनादशकंदेयंतत्कान्तलोहस्यचूर्णितं ॥ खण्डतुल्यंघृतंदेयंपलषोडशकंबुधैः ॥ पचेत्ताम्रमयेपात्रेगुडपाकोमतोयथा ॥ प्रस्थार्द्धंम
धुनोदेयंशुभाश्मजतुकत्वचा ॥ त्रिफलाधान्यकंपत्रेद्वक्षंमरिचकेशरं ॥ शृंगीविडंगकृष्णाचशुंठीजाज्यपलंपलं ॥ चूर्णंदत्वासमथितंस्नि
ग्धमांसादिबृंहणं ॥ रक्तपित्तक्षयंकाशंपक्तिशूलंविशेषतः ॥ वातरक्तप्रमेहंचशीतपित्तंवमिंक्लमिः ॥ श्वयथुंपांडुरोगंचकुष्ठप्लीहोदरं
तथा ॥ आनाहंरक्तसंश्रावंमम्लपित्रंनिहंतिच ॥ आनाहंरक्तसंश्रावंमम्लपित्तंनिहंतिच ॥ चक्षुष्यंबृंहणंवृष्यंमांगल्यंप्रीतिवर्द्धनं ॥ आ
रोग्यंपुत्रदंश्रेष्ठंकामाग्निबलवर्द्धनं ॥ श्रीकरंलाघवकरंखण्डखाद्यंप्रकीर्त्तितं ॥ छागणरावन्तमांसेतित्तिरंक्रकराशशा ॥ कुरंगकृष्ण
सारश्चतेषांमांसानियोजयेत् ॥ नारिकेलपयःपानंसुनिषण्णकवास्तुकं ॥ शुकमूलकजीवाख्यपटोलंबृहतीफले ॥ फलवार्त्ताकपक्वा
म्रंखर्जूरंस्वादुदाडिमं ॥ ककारपूर्वकंयच्चमांसचानूपसंभवं ॥ वर्जनीयंविशेषेणखण्डखाद्यंप्रकीर्त्तितं ॥ खण्डखाद्यलोहं ॥ मृतसूतंमृतंनी
क्ष्णंतुल्यंवासारसैर्दिनं ॥ मर्दितंमाषमात्रंतुभक्षितंरक्तपित्तनुत् ॥ द्राक्षाभयारतूषरांक्वाथसमधुशर्कराः ॥ रक्तपित्तहरस्तद्वद्रसफल्गु
फलोद्भवः ॥ मृतसूतादिरसः ॥ शुद्धपारदवल्लीप्रवालकंहेममाक्षिकभुजंगरंगकं ॥ मारितंसकलमेतदुत्तमंभावयेत्पृथगथद्रवैस्त्रि
तः ॥ चंदनस्यकमलस्यमालतीकेशरस्यच ॥ धान्यवारणाबुसाशतावरीशाल्मलीवटजटामृतस्यच ॥ रक्तपित्तकुलकंदनाभिधोज्ञा
यतेरसवरोस्त्रपित्तिनाम् ॥ प्राणदोमधुवृषद्रवैरयंसेवितस्त्ववसुकृत्स्ननामितः ॥ नास्त्यनेनसममत्रभूतलेभेषजंकिमपिरक्तपित्तिनाम् ॥

॥ वासावुसाकदलीकन्दरस: ॥ रक्तपित्तकुलकंदनोरस: ॥ आतरूषनवपत्त्रवद्रवपालिके सरसभस्मवत्रकं ॥ कर्षसम्मितमधुप्रयोजि
तंप्राशयनाशयतिरक्तपित्तकं ॥ वासामृत: ॥ इतिरक्तपित्ताधिकार: ॥ अथराजयक्ष्म: ॥ रसभस्मामृतासत्वलोहंमधुघृतान्वितं ॥ अमृ
तेश्वरनामोयंषड्गुंजोराजयक्ष्मनुत् ॥ अमृतेश्वररस: ॥ रसवज्रहेमताराँनागलोहंचताम्रकं ॥ तुल्यांशंमारितंयोज्यंमृताभ्रमाक्षिकीव
द्रुमं ॥ राजावर्त्तंचवैक्रांतंगोमेदंपुष्परागकं ॥ कृत्वाचितं ॥ शंखचतुर्थांशंतुल्यांशंसप्ताहंचित्रकद्रवै: ॥ मर्दयित्वाविचूर्णाथतेनापूर्य
वराटकान् ॥ टंकणंरविदुग्धेनपिष्टातन्मुखंसंधयेत् ॥ मृद्भांडेतान्निरुध्याथसम्यग्गजपुटेपचेत् ॥ आदायचूर्णयेत्सर्वं निर्गुंड्या
सप्तभावना ॥ आर्द्रकस्यद्रवै: सप्तचित्रकस्यैकविंशति: ॥ द्रवैर्भाव्यंतत: शोष्यंदेयंगुंजाचतुष्टयं ॥ रसभस्म ॥ हीरकभस्मस्वर्णभ
स्मतारभस्म ॥ नागभस्मलोहभस्म· ताम्रभस्म· मुक्ताभस्म· माक्षिकभस्मविद्रुमभस्मराजावर्त्तभस्म· वैक्रांतभस्मगोमेदभस्म
पुष्परागभस्मशंखभस्मतुत्थभस्मएतत्सर्वंपृथक्समभागंकृत्वाचित्रकक्वाथेनसप्ताहंभावयेत् ॥ तत: संचूर्ण: सर्वसमंस्थलमि
दंशुद्धवराटकान्संपूर्यशुद्धकं टंकणंरविदुग्धेनसंपिष्यवराटिकामुखंसंरोध्यमुखंमृडांदत्वाघर्मेसंशोष्यसरावसंपुटेनवन्यो
त्पलेनगजपुटेपचेत् ॥ स्वांगशीतंसंचूर्ण्यनिर्गुंडिरसेनभावना ७ आर्द्रकस्यरसेभावना ७ पुनश्चित्रकरसेनभावना २१ संशोष्यचू
र्णयित्वारक्तिका ८ अनुपानंउक्तमेवच ॥ क्षयरोगंनिहंत्याशुसाध्यासाध्येनसंशय: ॥ योजयेत्पिप्पलिक्षौद्रसघृतै:मरिचैववा ॥

महारोगाष्टकेकाशेस्वरेस्वासातिसारके ॥ पोटलीरत्नगर्भोयंयोगवाहेनियोजयेत् ॥ रत्नगर्भपोटलीरसः ॥ स्याद्रसेनसमंहेमं
मौक्तिकंद्विगुणंभवेत् ॥ गंधकस्तुसमस्तेनसमपादस्तुटंकणं ॥ सर्वंतद्गोलकंकृत्वाकांजिकेनावशोषयेत् ॥ भांडेलवणापू
र्णेथपचेद्यामचतुष्टयः ॥ रसभस्म १ स्वर्णभस्म १ मुक्ताभस्म २ शुद्धगंधरस ४ टंकणा ० सर्वंकांजिकांजिकेनसंमर्द्यगोलंकृ
त्वालवणापूरीयंत्रेयामंचतुष्टयंअग्निंदत्वापचेत् ॥ स्वांगशीतंसमुद्धृत्यसंचूर्ण्यमात्रांगुंजा ४ मृगांकसंज्ञकोयोगोरोगराजनिकृं
तनं ॥ रसस्यभस्मनाहेमभस्मीकृत्यप्रयोजयेत् ॥ गुंजाचतुष्टयंवास्यमरिचैर्भक्षयेद्भिषक् ॥ पिप्पलीदशकेर्वापिमधुनालेहयेद्बु
धः ॥ पथ्यंस्तुलघुमांसेनप्रायसोप्रयोजयेत् ॥ दध्याज्यंगव्यतक्रंवामांसमाजेप्रयोजयेत् ॥ व्यंजनेघृतपक्वैश्चनातिक्षारेरहिंगुभिः
॥ एलाजाजिमरिचैश्चसंस्कृतैरविदाहिभिः ॥ वृंताकजैलवीलानिकालवेलंचवर्जयेत् ॥ त्रियंपरिहरेकोपंचापिपरित्यजेत्
॥ वह्नोतुवलिवानामतन्मूलेक्वाथयेत्पलं ॥ तत्क्वाथंदापयेद्धात्रीकटुकत्रयसंयुतं ॥ त्रिमूलियासमाख्याताातन्मूलेक्वाथयेत्पलं
कटुत्रयसमायुक्तंपाययेत्काशशांतये ॥ इषद्धिंगुसमायुक्तंकिंकिनीमूलमेवच ॥ भक्षयेत्प्रयत्नोह्येतत्सर्ववांतिप्रशांतये ॥ मार्कंडे
यत्रचूर्णस्यगुटिकामधुनाकृतां ॥ धारयेत्सततंवक्त्रेकाशविजृंभनाशिनी ॥ छागमांसपयःछागंछागसर्पिसनागरं ॥ छागोपसे
वासमयेछागमध्येतुयक्ष्मजित् ॥ शुक्रायत्तंबलंपुंसांमलायत्तंहिजीवनं ॥ अतोविशेषासंरक्षद्यक्ष्मिनोमलरेतसि ॥ मृगांककर

॥सान्मद॥
॥१५१॥

सः॥ पलंकपर्दचूर्णस्यपलंपादरसंगंधयोः॥ माषंटंकणकस्यैकोजंबीराद्भिर्विमर्दयेत्॥ पुटेलोकेश्वरंनामलोकनाथोयमुत्तमं॥ अनेकुष्ठ
रक्तपित्तमन्यान्रोगान्क्षयंनयेत्॥ पुष्टिवीर्य्यप्रसादौजकांतिलावण्यदःपरः॥ कोस्तिलोकेश्वरादन्योन्राणांशंभुरवोदितान्॥ लो
केश्वररसः॥ रसस्यभस्मनाहेमपादांशेनप्रकल्पयेत्॥ द्विगुणंगंधकंदत्वामर्दयेचित्रकांवुजाः॥ वराटकाश्चसंपूर्य्यटंकणेननि
रुध्यच॥ भांडेचूर्णप्रलिप्तेथक्षिप्त्वारुंधितमम्रामये॥ शोषयित्वापुटेगर्त्तेरत्निपात्रेपराह्निके॥ स्वांगशीतलमुद्धृत्यचूर्णयित्वाथ
विन्यसेत्॥ एषलोकेश्वरोनामवीर्यपुष्टिंविवर्द्धयेत्॥ गुंजाचतुष्टयंचास्यपिप्पलिमधुसंयुतं॥ खादयेत्परयाभक्त्यालोकेशसर्व
दर्शनः॥ अंगेकार्श्येग्निमांद्येचकार्श्येपित्तेरसस्त्वयः॥ मरिचैघृतयुक्तैःप्रदातव्यादिनत्रयं॥ लवणंवर्जयेत्तत्रसाज्यंदधिचयो
जयेत्॥ एकविंशतिनेयावमरिचसघृतंपिबेत्॥ पथ्यंमृगांकवज्ज्ञेयंशयांतेनानपादनः॥ येभुक्ताविषमानलैःक्षयतृज्ज्ञाव्याप्ता
श्चयेकुष्टिनोयेपांडुत्वहताः॥ कुवैद्यविधिनायेशोषिणोदुर्भगाः॥ येतप्ताविविधैर्ज्वरैर्भ्रममदोन्मादैःप्रमादंगतास्तेसर्वेविग
तामयाहयरयाःसापोटलीसेवया॥ लोकेश्वरपोटलीरसः॥ रसभस्मत्रयोभागाभागैकंहेमभस्मकं॥ मृतताम्रस्यभागैकंशि
लागंधकतालकं॥ प्रतिभागद्वयंसिद्धमेकीकृत्यविचूर्णयेत्॥ वराटिपूरयत्तेनअजाक्षीरेणटंकणं॥ पिष्ट्वातेनमुखंरुध्वामृत्
भांडेपरिरोधयेत्॥ शुष्कंगजपुटेपाच्यंचूर्णयेत्स्वांगशीतकं॥ रसराजमृगांकोयंचतुर्गुंजाक्षयापहः॥ दशभिःपिपलिक्षौद्रै

॥राम:॥
॥१५१॥

मरिचैकोनविंशतिः ॥ सघृतैर्दापयेत्क्वाथं वातश्लेष्मोद्भवे क्षये ॥ रसजमृगांकरसः ॥ शिलजत्वमधुव्योषताप्यलोहरजांसि यः ॥
॥ क्षीरभुक्लेहि तत्तस्य क्षयक्षयमवाप्नुयात् ॥ शिलाजित्वादिलौहः ॥ शुद्धोभ्रक्षितः सूतो भागद्वयमितो भवेत् ॥ तथा गंध
स्य भागो द्वौ कुर्यात्कज्जलिकां ततः ॥ सूताच्चतुर्गुणे चैव कपर्द्दे विनिक्षिपेत् ॥ भागैकं टंकणं दत्वा गोक्षीरेण विमर्दयेत् ॥ त
थाशंखस्य खंडानि भागान षट्प्रकल्पयेत् ॥ क्षिपेत्सर्वं पुटस्यांतश्चूर्णलिप्तं सरावये ॥ गर्त्ते हस्तोन्मिते धृत्वा पुटेद्गजपुटेन च
॥ स्वांगशीतं समुद्धृत्य पिष्ट्वा तत्सर्वमेकतः ॥ षड्गुंजासंमितं चूर्णमेकोनत्रिंशदूषणैः ॥ घृतेन वातजे दद्यान्नवनीतेन पित्तजे ॥ क्षौ
द्रेण श्लेष्मजे दद्यादतीसारे क्षये तथा ॥ अरुचौ ग्रहणीरोगे कार्श्ये मंदानले तथा ॥ कासे श्वासे च गुल्मेषु लोकनाथरसो हितः ॥ त
स्योपरि घृतान्नं च भुंजीत कवलत्रयं ॥ मंत्रेक्षरोकमूत्राभ्राः शापीतानुपधानके ॥ अनाम्लमत्रसंघृतं भुंजितमधुरं दधिः ॥ प्रायेण जां
गलं मांसं प्रदेयं घृतपाचितं ॥ सदुग्धभक्तं दद्याच्च जातेग्नौ सांध्यभोजने ॥ सघृतान्पक्ववटकान् व्यंजने च वारयेत् ॥ तिलामल
ककल्केन स्नापयेत्सर्पिषास्तथा ॥ अभ्यंजयेत्सर्पिषा च स्नानं कोष्णोदके न च ॥ क्वचित्तैलं नगृह्णीयान विल्वं कारवेल्लकं ॥ वार्त्ता
कसफरिचिंवात्यले व्यायाममैथुने ॥ मद्यसंधानकं हिंगुशुंठिमाषान्मसूरकान् ॥ कूष्मांडराजिकां कोपं काजिकं चैव वर्जयेत् ॥
त्यजेदयुक्तनिद्रां च कांस्यपात्रे च भोजनं ॥ ककारादियुतं सर्वं त्यजेत्काकफलादिकं ॥ ग्राह्योयं लोकनाथस्तु शुभनक्षत्रवासरे

॥पूर्णानितिथौशुक्लपक्षेयानेवंद्रवलेनतथा॥पूजयित्वालोकनाथंकुमारीभोजयेत्ततः॥दानंदत्वाद्विघटिकामध्येग्राह्योरसोत्तमः॥र
सान्नजायतेतापस्तदाशर्करयायुतः॥सलवंगदूर्वागडूच्यावंशरोचनयायुतं॥खर्जूरंदाडिमंद्राक्षामिक्षुखंडानिदापयेत्॥अरु
चौनिस्तुषंधान्यंघृतभृष्टंससर्करं॥दद्यात्तथाज्वरेधान्यगडूचीक्वाथमाहरेत्॥उशीरंवासकक्वाथंदद्यात्समधुशर्क
रं॥रक्तपित्तेकफेश्वासेकाशेचस्वरसंक्षये॥अग्निमंथजयाचूर्णंमधुनानिशिदीयते॥निद्रानाशेतिसारेचग्रहणांपा
चकक्षये॥सौवर्चलाभयाकृष्णाचूर्णमुष्णजलैःपिवेत्॥शूलेजीर्णेतथाकृष्णामधुयुक्ताज्वरेहिता॥प्लीहोदरेवातरक्ते
क्षयेचैवगुदांकुरे॥नासिकास्तरक्तेचरसंदाडिमपुष्पजं॥दूर्वायास्वरसंनस्येप्रदद्याच्छर्करायुतं॥कोलमज्जाकणावर्हिप
क्षभस्मसशर्करैः॥मधुनालेहयेच्छर्दिहिक्काकोपस्यशांतये॥विधिरेषप्रयोजस्तुसर्वस्मिंपोटलीरसे॥मृगांकहेमगर्भेच
मौक्तिकाख्येपरेषुच॥इत्ययंलोकनाथोक्तोरसःसर्वत्रयोजयेत्॥लोकनाथपोटलिरसः॥भूर्ज्जवत्तनुपत्राणिहेम्नःसूक्ष्
माणिकारयेत्॥तुल्यानितानिसूतेनखल्वेक्षिप्त्वाविमर्दयेत्॥कांचनाररसेनैवज्वालामुख्यारसेनच॥लांगल्यावारसै
स्तावद्यावद्द्रवतिपिष्टिका॥ततोहेम्नश्चतुर्थांशंटंकणंतत्रनिक्षिपेत्॥पिष्ट्वामौक्तिकचूर्णंचहेम्नद्विगुणमाचरेत्॥तेषु
सर्वसमंगंधंक्षिप्त्वाचैकत्रमर्दयेत्॥तेषांकृत्वाततोगोलंवासोभिःपरिवेष्टयेत्॥पश्चान्मृदावेष्टयित्वाशोषयित्वाचधार

येत् ॥ सरावसंपुटे स्थांनस्तत्र पुडं प्रदापयेत् ॥ लवणपूरिते भांडे धारयेत्तं च संपुटं ॥ पुडं दत्वा शोषयित्वा बहुभिर्गोम
येः पुटेत् ॥ ततः शीते समाहृत्य गंधसूतं समं क्षिपेत् ॥ घृष्ट्वा च पूर्ववत् खल्वे पुटे गजपुटेन च ॥ स्वांगशीतं ततो नीत्वा गुंजा
युग्मं प्रयोजयेत् ॥ अष्टमिमरिचैर्युक्तां कृष्णात्रययुतान्तथा ॥ विलोक्य देया दोषादिस्तथैका रसरक्तिका ॥ सर्पिषा म
धुना वापि दद्याद्दोषाद्यपेक्षया ॥ लोकनाथसमं पथ्यं कुर्यात्स्वस्थमना शुचिः ॥ श्लेष्मारोगहरी काशंश्वासंक्षयम
रोचकं ॥ अग्निं च कुरुते दीप्तिं कफवातं नियच्छति ॥ मृगांकोयं रसो हन्यात्कृशत्वं बलहानितं ॥ मृगांकपोटली रसः
॥ ॥ सूतात्पादप्रमाणेन हेम्नः पिष्टीं प्रकल्पयेत् ॥ तयोस्त्वाद्विगुणं गंधं मर्दयेत्कांचनारिणां ॥ कृत्वा गोलं क्षिपेन्मू
षासंपुटे मुद्रयेत्ततः ॥ पचेद्भूधरयंत्रेण वासरत्रितयं बुधः ॥ तत उद्धृत्य तत्सर्वं दद्याद्गंधं च तत्समं ॥ मर्दयेदार्द्रकरसे श्चित्र
करसेन च ॥ स्थूलपीतवराटीश्च पूरयेत्तेन युक्तितः ॥ एतस्याद्दोषधा कुर्यादष्टमांसेन टंकणं ॥ टंकणार्द्धविषं दत्वा पिष्ट्वा
सेहुंडदुग्धकः ॥ मुद्रयेत्तेन कल्केन वराटानां मुखानि च ॥ भांडे चूर्णप्रलिप्ते थ धृत्वा पुडं प्रदापयेत् ॥ गर्त्ते हस्तोंमिते धृ
त्वा पुटे गजपुटेन च ॥ स्वांगशीतं रसं नीत्वा प्रदद्याल्लोकनाथवत् ॥ पथ्यं मृगांकवज्ज्ञेयं त्रिदिनं लवणं त्यजेत् ॥ यदा छर्दि
भवेत्तस्य दद्याच्छिन्नाम्बु तं तदा ॥ मधुयुतं तथा श्लेष्मकोपे दद्यात्तदार्द्रकं ॥ विरेकभर्जितां भंगां प्रदद्याद्दधिसंयुतां ॥ जये

न्काशं क्षयं स्वाशं ग्रहणीमरुचिं तथा ॥ अग्निं च कुरुते दीप्तं कफवातं नियच्छति ॥ हेमगर्भपरीज्ञेयो रसपोटलिका भवेत् ॥ ॥
हेमगर्भपोटलीरसः ॥ रसस्य भागाश्चत्वारस्तावंतः कनकस्य च ॥ तयोश्च पिष्टिकां कृत्वा गंधो द्वादशभागिकः ॥ कुर्यात्कज्ज
लिकां तेषां मुक्ताभागाश्च षोडश ॥ चतुर्विंशति शंखस्य भागैकष्टंकणस्य च ॥ एकत्र मर्दयेत्सर्वं पक्वनिंबूकजैरसैः ॥ कृ
त्वा तेषां ततो गोलं मूषासंपुटके न्यसेत् ॥ मृद्वां दत्वा ततो हस्तमात्रे गर्ते च गोमयेत् ॥ पुटे गजपुटेनैव स्वांगशीतं समुद्धरेत् ॥ पिष्ट्वा गुंजा
चतुर्मितं दद्यागव्याज्यसंयुतं ॥ एकोनत्रिंशदुन्मानं मरिचैः सह दीयते ॥ राजते मृन्मये पात्रे कांचने वा प्रलेपयेत् ॥ लोकनाथसमं
पथ्यं कुर्यात्प्रयत्नमानसः ॥ कासे श्वासे क्षये वाते कफे ग्रहणीकागदे ॥ अतिसारे प्रयोक्तव्या पोटली हेमगर्भका ॥ द्वितीयहेमगर्भ
पोटलीरसः ॥ ॥ अथ तुल्यसूतमसितपरिमर्द्य मुनिवारमेतदपि शिग्रुजंटोदैः ॥ अथ मूर्छनाप्रमितमग्निकषाये मुनिवीरमार्द्र
करसैर्विजयोत्थैः ॥ सतिलैस्त्रिवालमथ जंभजलैः फलपूरकाम्लकजलैश्च विभाव्यं ॥ खरखारमेतदखिलार्धमितं स्यादिहतं करांवि
षमथोषणमेव ॥ सुरसूतनागरकणाभयजातिफलत्तप. थक्विषचतुर्थविभागं ॥ रुचकद्रवैः परिविचूर्णितदेतन्मृगनाभि
भावितमुपैति हि सिद्धं ॥ सूतं · रसभस्म · असितं कृष्णाभ्रभस्म तुल्यं समानभागं खल्वे क्षिप्त्वा भावना देया ॥ तद्यथा ॥ शिग्रुजटारसे
७ चित्रकरसे ७ आर्द्रकरसैः ७ विजयारसैः जंवीररसे ३ वीरपूररसैः ७ विभाव्य पुनः टंकणविष · मरिच · लवंग · शुंठी · पिप्पली

॥ रामः ॥
॥१५३॥

उशीरं जातीफलं चतुर्थभागं पृथक् चूर्णं । पुनर्मातुलुंगरसैः पुनर्विभाव्यः संचूर्ण्य अष्टमांसकस्तूरिं मेलयित्वा च मात्रा वल्ल २ अनु
पानेन यथोचितं अथवा द्वयं गुंजाचित्रौषधयुक्तं प्रतियोजयेद्भिषगमुष्य विलोक्य ॥ ऋतुदेशकालमुपदेश्य कालहि चिंतामणि
संज्ञको रस इति प्रतिदिष्टः ॥ चिंतामणिरसः ॥ मृतं सूतं मृतं नागं गंधकं तुत्थटंकणं ॥ प्रत्येकमर्द्धनिष्कं स्यान्मृतं शुल्वं विनिष्क
कं ॥ शंखनिष्कद्वयं चूर्णं नवनिष्कं वराटकं ॥ पूरयेत्सर्वचूर्णेन प्रत्येके लोकनाथवत् ॥ ततो अर्कद्रवज्ञावैर्मर्द्येत् द्वापुटे पचेत् ॥
आदाय चूर्णयेत् श्लक्ष्णं तुल्यांशैः मरिचैर्युतं ॥ चूर्णं चतुर्थांशगंधमेकीकृत्य विचूर्णयेत् ॥ पंचमाषं घृतैर्लेह्यं मसाध्यं राजय
क्ष्मजित् ॥ त्रिसप्ताहात्र संदेहो रसोयं कालवंचकः ॥ कालवंचकरसः ॥ शुद्धसूतं स्वर्णपत्रं जंबीरैर्मर्दयेत्समं ॥ तयोर्द्विगुणितं त
मुक्तात्रिभिस्तुल्यं तु गंधकं ॥ टंकणं गंधकार्द्धं च सर्वं जंबीरजैर्द्रवैः ॥ मर्द्यं यामं चतुर्गोलं वस्त्रे बद्ध्वा विपाचयेत् ॥ दोलायंत्रे सारनाले
यामार्द्धं तु शोषयेत् ॥ ततो मृन्मयभांडांते लवणं चांगुलीद्वयं ॥ क्षिप्त्वा तत्र पूर्यैते पूर्वगोलकं वस्त्रवेष्टितं ॥ लवणैः पूरयेद्भांडं मु
द्रयित्वा दिनं पचेत् ॥ तुल्यांशं मारितां सिद्धं रसो महामृगांककं ॥ अनेनैव प्रकारेण मृगांकोपाचयेद्रसा ॥ राजरोगनिवृत्त्यर्थं द
पंगुंजोन्मितं घृतैः ॥ दशभिर्मरिचैः सार्द्धं पिप्पलीमधुनापि वा ॥ महामृगांकोरसः ॥ लोहभस्मपलैकं तु द्विपलं भृंगराजद्रवैः ॥ क
र्दूरभार्ग्योद्रावैः पलैकं तु नियोजयेत् ॥ पलैकं त्रैफलं क्वाथं भर्ज्यं भर्ज्यं च खर्परे ॥ लोहांशं माक्षिकं शुद्धं मर्द्यं पूर्वोदितैर्द्रवैः ॥ र

त्वा त्रिभिः पुटैः पाच्यं द्रवैमर्द्यं पुनः पुनः ॥ मृतं सूतं मृतं नागं निष्कं निष्कं विमिश्रयेत् ॥ शुद्धं गंधक तौ निष्कौ वराटानां चतुष्टयं ॥ एकी
कृत्य पुटे पाच्यं पूर्वलोहे विमिश्रयेत् ॥ पूर्वोक्तैश्च द्रवैमर्द्यं पुटैनैकेन भावयेत् ॥ चूर्णास्मिन्मरिचस्यात्र तुथं टंकणयोर्दश ॥ मेलयेच्च
पृथग्निष्का प्राणनाथाह्वयो रसः ॥ भक्ष्ययेन्निष्कपादार्द्रं असाध्यं राजयक्ष्मरोग ॥ शोफोदरार्शोग्रहणीज्वलगुल्मादयन्नुतं ॥ प्राण
नाथरसः ॥ पारदं शोधितं गंधमभ्रकं च समं समं ॥ तदर्द्धं दरदं दद्यात्तदर्द्धं चमनःशिला ॥ सर्वार्द्धं मृतलोहं च खल्वमध्ये विनिक्षिपे
त् ॥ दिवसत्रभावनादेया शतावर्या रसेन च ॥ ततः सिद्धो भवत्येव कुमुदेश्वरसंज्ञकः ॥ सितयामरिचेनाथ गुंजाद्वित्रिप्रमाणतः ॥ भ
क्षयेत्प्रातरुत्थाय पूजयेत्विष्टदेवतां ॥ यक्ष्माणामुग्रं हंत्येव वातपित्तकफामयान् ॥ ज्वरादीनां — लान्रोगान्यथादेत्यान्जना
र्दनः ॥ सततान्याससयोगेन वलीपलितनाशनं ॥ ~~कुमुदेश्वररसः~~ ॥ भस्मीभूतसुवर्णतारदिनकृत्सूताभ्रसत्वैक्रमात्संवृद्धैस्तिलय
स्त्रयकृमिहरांभोदैस्तुतकट्फलैः ॥ निर्गुंडिशमूलवह्निरजनीव्याघ्रार्द्रकैर्भावितो ॥ गोलीकृत्य विशेषतो निगदितः पंचामृताख्यो र
सः ॥ सुवर्णभस्म १ तारभस्म २ ताम्रभस्म · रससिंदूर ४ अभ्रकभस्म ५ विडंग ३ मुस्ता ३ कट्फल ३ खल्वे क्षिप्त्वा तत्र भावना ॥ निर्गुं
डीरसः १ दशमूलक्वाथ १ चित्रकरस १ हरिद्रारस १ व्याघ्रक्वाथ १ आर्द्रकरस १ गोलीकृत्वा मात्रा रत्ति २ तानेन सदृशः कोपि रसो
स्ति भुवनत्रये निहंति सकलान्रोगान्भवरोगमिवाच्युतः ॥ सर्वरोगहरः सूतस्तत्तद्रोगानुपानतः ॥ अयं पंचामृतो नाम रसांत्रिदशा

नांमि वाम नं ॥ पंचामृतोरसः ॥ प्रवालरसमौक्तिकांवरमिदं वङ्गमर्कभाक्पृथक्गंधस्य तेरजतहेमतीक्ष्णशंके ॥ अयोभुजंगंगकं त्रि
लवकंविमर्यारिवलंश्रमेहानिविभावयेद्भिषगिदं धियासत्प्रशः ॥ द्रवैर्वृषभजेक्षजैः कमलमालतीपुष्पजैः पयः कदलिकंद
जैर्मलयजैर्गणनाभृङ्गवैः ॥ प्रवाल· रससिंदूर· मौक्तिक अभ्रक· पृथक्कर्ष ४ रौप्य· सुवर्ण· पृथक्कर्ष २ लोह· नाग· वंग· पृथक्क
र्ष ३ ततो भावना वृषरसैः ७ इक्षुरसैः ७ श्वेतकमलरसैः ७ मालतीपुष्परसैः ७ गोदुग्धैः ७ कदलीकंदजैः श्रीखंडजैः कस्तू
रिसंभवैः रसैः ७ मात्रा गुंजा १ अनुपानैरोरुपंचमहालवंगाद्यनुपानैर्नुवङ्गुणाकारकः ॥ वसंतकुसुमाकरो रसपतिर्हिव
लोहितः समस्तगदहृद्भवेत्किलनिजानुपानैरयम् ॥ शिलाजतुमधुघृतैः क्षयगदेषु सर्वेष्वपि प्रमेहहृत् जिरात्रिभिः समधुशर्क
राशिः सह ॥ सितामलयजद्रवैर्महतिरक्तपित्तेथवा सितामधुसमन्वितैर्वृषभपल्लवानां द्रवैः ॥ त्रिरात्रगजचंदनैरपि च तुष्टिपु
ष्टिप्रदो मनोभवकरः ॥ परोवमिषु शंखपुष्पिरसैः ॥ अभीरुरसशर्करामधुभिरम्लपित्तामये परेष्वनुयथोचितं तत्तुगदे प्रयोज
येत् ॥ वसंतकुसुमाकररसः ॥ शुद्धसूतं द्विधागंधं कुर्यात्खल्वेन कज्जलीं ॥ तयोः समतीक्ष्णचूर्णं मर्दयेत्कन्यकाद्रवैः ॥ द्विया
ममातपे गोलं ताम्रपात्रे विधारयेत् ॥ आच्छाद्यैरंडपत्रेण स्यादुष्णं स्याद्यामयुग्मतः ॥ धान्यराशौ न्यसेत्पश्चात्सप्तरात्रात्तदुद्धरेत्
संचूर्ण्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् ॥ त्रिकटुत्रिफलैलाभिर्जातिफललवंगकैः ॥ नवभागोन्मितैरेतैः समएषरसो भवे

त॥निष्कद्वयमितंनित्यंमधुनासहलेहयेत्॥अयमग्निरसोनाम्नाकाशक्षयहरंपरः॥अग्निरसः॥शंखनाभीगवांक्षीरेःपेषये
निष्कषोडश॥तेनभस्मप्रकर्तव्यातन्मध्येभस्मसूतकं॥निष्कार्द्धंगंधकत्रीणिचूर्णीकृत्यविनिक्षिपेत्॥रुध्वातद्वयेद्वस्त्रेम
कांलेपयेद्वाहि॥शोष्यंगजपुटेपाच्यामषयासहचूर्णयेत्॥गुंजैकमनुपानेनक्षयंहंतिमृगांकवत्॥पिप्पलीमधुनाचैवमरि
चैर्वाघृतान्वितैः॥लेहयेद्रोगिणांवैद्योवयोवलविशेषतः॥सन्निपातेददीतेदंउआर्द्रकस्यरसैर्युतः॥गुडूचित्रिफलाक्काथैः
संस्कृतोगुणरैवरः॥शंखनाभिरसः॥अथकफघ्नः॥हेमभस्मंचसूतस्यभस्मगुंजाद्वयंद्वयं॥पूर्ववद्वानुपानेनमृगांकक
कफयक्ष्मणि॥मृगांकरसः॥शुद्धसूतसमंगंधंसूततुल्यंचसैंधवं॥शमीश्वेतदलाद्रावैर्मर्द्दितंगोलकीकृतं॥नागवल्लीद
लैर्वेष्ट्यंपातापानपत्रकैः॥दिनांतेउर्द्धृसंलग्नंग्राह्यंभक्ष्यंत्रिगुंजकं॥पर्णखंडेनसंयुक्तंमाषैकंराजयक्ष्मजित्॥रसचंद्रामृतो
नामह्यनुपानंमृगांकवत्॥श्वेतदलापुंडरीकदलकेचितु॥शुक्लदला·तुलसिरितिच·शुक्लपत्रीनिदर्शनात्॥चंद्रामृतोरसः
॥रसभस्मचतुर्थांशंसहेमभस्मप्रकल्पयेत्॥तालकंरसकंतुत्थंमाक्षिकंगंधकंशिला॥रससाम्येनयुंजीतसूतपादंचटंकणं॥
एकीकृत्यद्रवैर्मर्द्यंप्रत्येकंवादिनेदिने॥अर्कक्षीरंजयंतिश्चभृंगीवासाचलांगली॥अगस्तिचित्रकंपाठामर्दयित्वातुगोलकं॥
कृत्वामृगांकवत्सर्वंचूर्णयित्वाद्रकद्रवैः॥भावयेत्त्रिकटुक्काथेसप्तवारंपृथक्पृथक्॥द्विगुंजंराजयक्ष्मार्तेह्यनुपानंमृगां

कवत् ॥ क्षयं हंति महातीव्रं रसकनकसुंदरः ॥ कनकसुंदररसः ॥ मुक्ताप्रवालरसहेमसिताभ्रवंगकांतं मृतं सकलमेतदहोविभाव्यं चा
रसेन चवरीसलिलेन सप्तपश्चात्तु गोमधुरहिमरिवेन शाकं ॥ मुक्तादिरसः ॥ इति क्षयरोगाधिकारः ॥ अथ काशः ॥ शुल्वं सूतसमं ह
योरपि समं गंधस्तदर्धं पुनस्तालचार्द्ध शिलायुक्तो विरचयेत्पिष्टं तिनन्कज्जली ॥ लिप्त्वा ताम्रदलानि र्मार्नि कटुधापात्रे निधायाथत
न्याच्छ्यं केकनयंत्रके द्वि दिवसं शीतं स्वतो निर्हरेत् ॥ शुद्धसूतं ४ शुद्धताम्र ४ गंधक ८ हरितालं ४ मनःशिला २ रसादिखल्वे मनःशि
लादयित्वा निंबुरसेन कल्कं विधाय ताम्रपात्रे लेपयेत् ॥ तत्तु शरावपुटे धृत्वा तत्संपुटं महति हंडिकायां स्थापयित्वा वालुकायंत्रे या
मद्वयं वह्निं दत्वा स्वांगशीतं निष्कास्य संचूर्ण्य मात्रा रक्तिका ३ अथवा ६ अनुपानं यथायोग्यं तत्काशश्वसनाग्निमांद्यगुदजातेका
र्त्तिपांडुमयप्लीहोरप्रतिरोधकोष्ठमरुज्जोयुत्तयाज्ञयेद्योजितं ॥ वह्नंदुहमितं करामधुयुतं क्षाराईवारापिवायुक्तं सर्वकफामयघ्न
मविराद्य सोमनाथाभिधं ॥ सोमनाथरसः ॥ पारदं गंधकं शुद्धं मृतं लोहं चटंकणं ॥ रास्नाविडंगत्रिफलादेवदारुकटुत्रिकं अमृता
पद्मकं क्षौद्रं विषतुल्यानि चूर्णयेत् ॥ त्रिगुंजं सर्वकाशघ्नो ज्वरारोचकमेरुजत् ॥ काशकेशरीरसः ॥ पारदं टंकणां गंधविषं व्योषं फ
लत्रयं ॥ तालकं च समं सर्वं जैपालं चापि तत्समं ॥ मर्दयेद्भृंगनीरेण भावनात्त्रिसप्तधा ॥ गुंजामात्रा वटी कृत्वा छायायां शोषयेद्बु
धः ॥ शृंगवेररसैः सार्द्धं वटीमेकां प्रयोजयेत् ॥ उष्णेन वारिसूरेव काशे श्वासे च यक्ष्मणी ॥ घोरं चोलिनिविख्याता नानाम्ना नागार्जु

नोदिता॥अन्यच्च॥रसामृतवल्लीतालंऊषणंत्रफलत्रयं॥टंकरांक्रमवृद्धाजैपालंसर्वसमंमतं॥भृंगराजरसैर्नैवभावनाचत्रिसप्तधा
॥छायाशुष्कांवटीकृत्वासर्वरोगेषुयोजयेत्॥घोडाचोलीतिविख्यातासिद्धेनागार्जुनोदिभिः॥रस१विष२॥ गंधक३हरिताल४त्रि
कटु५त्रिफला६टंकरा७सर्वसमंजैपालंसंयोज्यखल्वेमर्दयित्वाभृंगराजरसेनभावना२१दिनपर्यंतंततोवटिकांकृत्वाछायाशुष्कं
कृत्वाअनुपानंयथायोग्य॥उदितासर्वरोगेषुकशेश्वासेविशेषतः॥नानानुपानयोगेनसर्वरोगानिकृंतति॥तद्यथा॥मधुनावलि
पलितंजयेत्॥सौभांजनाग्रिरसंगोघृताभ्यांजठरशूलंजयेत्॥दध्नाअजीर्णंजयेत्॥शतपत्ररसेनसीतज्वरंजयेत्॥पुनर्नवारसेनपांडुं
जयेत्॥तिलपर्णीरसेनेत्रांजनेननेत्ररोगंजयेत्॥तंडलोदकेनविषंजयेत्॥जीरशर्करयाज्वरंजयेत्॥वहुदिनसेवनेनसुभगोभवे
त्॥वचादेवदारुक्वाथेनअस्थिवातंजयेत्॥मस्तुनाअस्थिलांजयेत्॥नींवुनीरेण·अजीर्णंजयेत्॥गोमूत्रेण·शूकलग्नव्यथां
हरेत॥घोडाचोलीरसः॥शुद्धंशंकरशुक्रमक्षतुरितंमारारितारीरजस्तावन्तो — — मापतितुटगलालंकारवस्तुस्तनम्॥ता
वन्त्येवमनशिलाचविमलातावत्तथाटंकरांशुंठीद्यक्षमिताकरावमरिचंदिकपालसंख्याक्षकं॥विषादिवस्तूनिशिलांपरिस्फोटि
चूर्णयेत्तासशिसोधयेच्च॥ततस्तुखल्वेरसगंधकोचतुल्यचतुयामयुगंविमर्द्य॥रस१गंधक१विष१मनःशिला१तारमाक्षिक
१टंकरा१शुंठी२पिप्पली२मरिच१०चूर्णीकृत्य·मात्रागुंजा१अनुपानंआर्द्रकरसःकल्पतरुनामधेयोयथार्थनामारसश्रेष्ठःस

मीरणं श्लेष्मगदान् हरते मात्रास्य गुंजैका आर्द्रकेण सममेष भक्षितो हंति वातकफ — — ।वं ज्वरम्॥ श्वासकासक्षयशोथहीनताव
ह्निमांद्यविरूचिश्च नाशयेत्॥ नस्यनाश्चैव हरति शिरोर्त्तिकफवातजाः॥ मोहं महान्तमपि च प्रलापक्षवथुं ग्रहस्यं॥ कल्पतरूरस रसेन्द्र
वलिपिप्पलीयुगभयाऽक्षवासकहृदास्वदुत्त्ररविहृद्भिनुप्रतिविभाव्यवचूलजैः॥ स्तनैरिह हि मूर्छनामितमनार्द्रनामागतां विचूर्ण्य
मधुनोदितोग्निरस एष काशापह॥ अग्निरसः॥ शुद्धसूतद्विभागं धमर्द्धमेमिड वै पुनः॥ वातारिकाटुवं भृंगाकाकमाच्यंडिकार्णि
का॥ दिनैकं मर्दयेत् खल्ले पाचयेत् पर्पटी यथा॥ द्वयोपादं मृतं ताम्रं क्षिप्त्वा मृदग्निना पचेत्॥ रक्तवर्णा भवेद्यावत्तावत्पात्रे प्रगालयेत्
॥ प्रक्षिपेत् कदरिपात्रे — थवाग्निपुटे पुनः॥ आछादयेत्तेन योगेन अधश्चोर्द्ध च गोमयं॥ देयं विचूर्णयेत् पश्चाच्चूर्णपादं विषं क्षिपेत्॥ र
स १ गंधक २ मर्दयित्वा· भावयेत्॥ एरंड· भृंगराज· काकमाचि· अपराजिता प्रतिदिनं मर्दयेत्॥ संशुद्धं पर्पटी रसवत्याश्वं पुनस्ताम्र
भस्म द्वयोश्चतुर्थांशं दत्वा चूर्णयित्वा मंदाग्निना पाचयित्वा रक्तवर्णं द्रवति गोमयमंडले कदलीपत्रे क्षिप्त्वा पुनः॥ पत्रेणाछाद्य पुनः
स्वांगशीतं चूर्णयित्वा पर्पटीपादं विषचूर्णं क्षिप्त्वा मर्दयित्वा मात्रा गुंजा २ रुद्रपर्पटिका एषा देया गुंजाद्वयं द्वयं चूर्णितं कटुनिर्गुं
यामूलं निष्कद्वयं पिबेत् भृंगराजरसेनैव पिबेन्मधुना सह॥ वातकासं निहंत्याशु नात्र कार्या विचारणा॥ रुद्रपर्पटीरसः॥
शुद्धसूतस्य भागैकं विभागं शुद्धगंधकं॥ भागत्रयं मृतं ताम्रं मरिचं दशभागकं॥ मृताभस्य चतुर्भागा भागमेकं विषं क्षिपेत्॥ मूलं

कृशस्य भागैकं सर्वमम्लेन मर्दयेत् ॥ यामं भूताकुशो नाम माषैकं वातकासजित् ॥ अनुपानं लिहेत् क्षौद्रै विभीतकफलत्वचम् ॥ भूतां
कुशाभावे विभीतके त्रिच ॥ भूतांकुशो रसः ॥ रसमेकं द्विधा गंधं त्रिताप्यं पंचतालकं ॥ सर्वशुद्धं विचूर्ण्याथ चतुर्भागं मृताभ्रकं ॥ व
चाकुष्ठं हरिद्राग्निटंकणं विषसैंधवं ॥ सपाठालांगलीव्योषमाक्षं प्रत्येक कर्षितं ॥ भावितं भृंगसारेणा दिनैकं टंकं भक्षयेत् ॥ माषं सू
र्यरसो नाम्ना हिक्कावैस्वर्य्यकासजित् ॥ अर्कोविभीतक सूर्यो रसः ॥ इति कासाधिकारः ॥ अथ हिक्का ॥ हेमगुञ्जार्ककांतानां भस्म व
द्वमितं वरं ॥ विजपूररसक्षौद्रसौवर्चलसमन्वितं ॥ हिंतं हिक्काः शतं सत्यमेकमात्रप्रयोगतः ॥ काकश्वापं वहिक्कानां हरतोध्रुन
हृत्यते ॥ हिक्कान्तको रसः ॥ पाटलाफलतोयेन क्षौद्रेणाव समन्वितं ॥ हेमं भस्म निहंतश्वापं वहिक्काश्चदुस्तरं ॥ हेमभस्म रसः ॥ तं
दुलीयडवैः पिष्टं सूततुल्यं च गंधकं ॥ वज्रमूषागतं चैव भूधरे भस्मतां नयेत् ॥ दशमूलकषायेन भावयप्रहरद्वयं ॥ गुंजाद्वयं निहं
त्याशुहिक्काश्वासज्वरं किल ॥ अनुपानेन दातव्या रसोयंमेघडंवरः ॥ मेघडंवररसः ॥ पिप्पल्यामलकीद्राक्षाकोलास्थिमधुशर्क
रा ॥ विडंगपुष्कलेपक्रोलोहोहंतिस्वडर्जेयान् ॥ छर्दिहिक्कातथातृष्णास्त्रिरात्रेणा न संशयः ॥ पिप्पल्यादिलेह ॥ इति हिक्काधि
कारः ॥ अथ श्वासः ॥ सूताद्द्विगंधको मर्द्यो यामैकं कन्यकाद्रवैः ॥ द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत् ॥ दिनैकं वालुकायंत्रे
पक्वामादाय चूर्णयेत् ॥ सूर्यावर्त्तो रसो ह्येषद्विगुंज श्वासजिद्भवेत् ॥ सूर्यावर्त्तो रसः ॥ कर्षं शुद्धरसेंद्रस्य गंधकस्याभ्रकस्य च ॥

नाग्रस्य हरितालस्य लोहस्य च विषस्य च ॥ मरिचस्य च सर्वेषां श्लक्ष्णचूर्णं पृथक् पृथक् ॥ शाणोन्मौ खंडकर्षं च निर्गुंडीकाकमा
चिका ॥ केशराजभृंगराजस्य रसेनैव भावितं ॥ कलायपरिमाणां तु वटिकां कारयेद्भिषक् ॥ कृत्वादौ शिवमभ्यर्च्य द्विजादिन्प
रितोषयेत् ॥ जीर्णे तु भोजयेत्पश्चात्क्षीरमांसरसाशना ॥ अपि वैद्यशतैस्त्यक्तमम्लपित्तं नियच्छति ॥ कासं पंचविधं हंति श्वासं वै
वक्रुडजं यं ॥ रसेन्द्रवटीरसः ॥ आह्लादिना शिलां नागाग्रादिग्रगां वालुकाह्वये ॥ पक्त्वा संचूर्ण्य गंधेशे शोदिनाईतां पुनः पचेत् ॥ श्वासहे
माडिनामायं महाश्वासविनाशनः ॥ वर्णवृद्धिकरो ह्येषस्तु वर्णस्य न संशयः ॥ श्वासहेमाडिरसः ॥ पलं सूतं पलं गंधं त्रिकटु त्रिफ
लं भवेत् ॥ वंगमेकापलं योगं दिनानि त्रीणि मर्दयेत् ॥ मूत्रेणाच तथा ब्रीशादिनानि परिमर्दयेत् ॥ माषप्रमाणा वटकां छायायां शुष्कं
तु कारयेत् ॥ नित्यमेकं तु वटकं दिनानि त्रिंशमेव च ॥ आसकाशज्वरहरं अग्निमांद्यादिविप्रणाशन ॥ श्वासमतांकुशरसः ॥ रसं गंधं वि
षं चैव टंकणं च मनःशिला ॥ एतानि टंकमात्राणि मरिचं चाष्टकं टकं ॥ एकैकं मरिचं दत्वा खल्वे सूक्ष्मं विचूर्णयेत् ॥ कटुत्रयं टंकषटकं
दत्वा पश्चाद्विचूर्णयेत् ॥ सर्वमेकत्र संचूर्ण्य काचकूप्यां विनिक्षिपेत् ॥ गुंजामात्रं प्रदातव्यं पर्णखंडे तु बुद्धिमान् ॥ संनिपाते वमूर्छायां
अपस्मारे तथा पुनः ॥ अतिमोहत्वमापन्ने नृपि दद्याद्विचक्षणः ॥ रसः श्वासकुठारोयं सर्वश्वासनिकृंतनं ॥ श्वासकुठारोरसः ॥ धा
न्याभ्रंसूतकं गंधं श्वेतापामार्गजे रसे ॥ तुल्यांशं मर्दयेच्चाहं यंत्रे पाचनके पचेत् ॥ उड्डलग्नं तु नद्याख्यं रसो ह्युदयभास्करं ॥ उदयभास

रोरसः॥सूतकंगंधकंलोहंविषंचापिवरांगकं॥ताम्रकंवंगभस्मंचअभ्रकंचसमांशकं॥त्रिकटुंभद्रमुस्तंचविडंगनागकेशरं॥रेणुकां
त्रिवृत्तकंचैवपिप्पलीमूलमेवच॥एषांचद्विगुणांभागांमर्दयित्वाप्रयत्नतः॥भावनात्रयदातव्याजलंपिप्पलीकांबुभिः॥मात्राच
णकमात्रंतुवटियंपरिकीर्तितं॥श्वासंहंतितथाकाशंपाण्ड्वर्शांसिभगंदरं॥हृच्छूलंपार्श्वशूलंचकर्णरोगंचपालिकां॥हरेत्सं
ग्रहणीरोगानष्टौचजठराणिच॥प्रमेहान्विंशतिंचैवअस्मारिंचचतुर्विधं॥नचान्नपानेपरिहारमस्तिनसीतवाताध्वनिमैथुने
च॥यथेष्टचेष्टाभिरतप्रयोगेनरोभवेत्कांचनराशिगौरः॥जलपिप्पली॥हलहल्याइतिलोके॥महोदधीरसः॥शिलाहिंगुवि
डंगंचमरिचंकृष्णसैन्धवं॥मध्वाज्याभ्यांलिहेत्कर्षक्षयश्वासकफावहं॥शिलाजतुरसः॥सूतषोडशतःसमोदिनकरस्तूर्णा
ङ्भागोवलिंसिंधुस्तस्यसमःसूक्ष्मंमर्दितंततपिप्पलीचूर्णितंजंबीरस्वरसेनमर्दितमिदंतत्तुल्यपक्वंभवेत्श्वासकाशक्षय
ल्म — — — जठरंपांडुलिहंनाशयेत्॥सूत१६ताम्रभस्म१६गंध८सैन्धव८पिप्पली८चूर्णयित्वाजंबीरस्वरसेनमर्दनंकृ
त्वाकिंचिद्द्रवैःसंपक्वंस्वांगशीतंचूर्णितंसिद्धमात्रागुंजा३पुनस्तामपारदंगंधकंतैवपलमेकंपृथकपृथक्॥पलत्रयंत्रिकटुकंवं
गमेकंपलंक्षिपेत्॥सर्वमेकत्रसंमर्घगोमूत्रेणतथैवच॥अक्षप्रमाणावटकंछायाशुष्कंतुकारयेत्॥नित्यमेकंतुवटकंदिना
निविंशएवहि॥श्वासकासज्वरहरमग्निमांद्यारुचिप्रणाशनं॥तमकः॥रसगंधकपिप्पल्योहरितकीविभीतकः॥वांसाभार्गीस

॥राम:॥
॥१५८॥

मस्तानिभागविद्याविचूर्णयेत् ।। वब्बूलक्काथमादायभावयेदेकविंशतिः ।। विभीतकप्रमाणेनमधुनाकारयेद्वटी ।। एकैकांभक्षये
त्प्रातः श्वासकासनिवृत्तये ।। श्वासमंजांकुशरसः ।। इतिश्वासाधिकारः ।। अथस्वरभेदः ।। रसभस्मार्कलोहस्याभ्राविन्नस्यात्रिस
प्रधा ।। क्ष्माडाफलरसैर्युगगुल्याकार्यावटीशुभा ।। भवस्याहरतेशीघ्रंस्वरभंगमसंशयः ।। गोरक्षनाथेर्गदितास्वरभंगंकृपा
लुभिः ।। क्ष्माडाःकंठकारि ।। गोरक्षवटिरसः ।। इतिस्वरभेदाधिकारः ।। अथारुचिः ।। सूतगंधाभ्रमगदाम्लिकामरिचसैन्ध
वैः ।। गुटिकारोचकहरिजीह्वावंदनशुद्धिकृत् ।। रसादिगुटिका ।। इत्यरोचकाधिकारः ।। अथछर्दिः ।। रसवलिघनसारको
लमजामरजम्बुमातुधरःप्रियंगुलाजामलयजमगधात्वगेलपद्मंदलितमिदंपरिभाव्यचंदनाद्भिर्मधुमरिचयुतंरजोस्यमाषं
जयतिवमिंप्रवलामिविलिह्यमर्त्यः ।। अमरकुसुमं ।। लवंगं ।। रसादिरसः ।। इतिछर्द्यधिकारः ।। अथतृष्णा ।। रसेरजतवटीपठीय
सिंयोवदनसरोरुहमध्यमगाद्धाति ।। सजयतितृषितंस्तृषंवनस्यभृशमयसंघमिवत्रिमार्गः ।। गंधकरसादिगुटिका ।। रसगं
धककर्पूरैःसैलोशीलोशिरमरिचकैः ।। सममितैक्रमवृद्धैश्चचूर्णमहर्मुखे ।। त्रिगुंजाप्रमितंखादेत्पिवेत्पर्युषितांवुच ।। भृशंतृ
षंनिहंत्येषनरचूर्णप्रभावतः ।। रसादिचूर्णः ।। ताम्रवङ्गिकयावङ्गसूततालंसमंतथकं ।। वटांकुररसैर्मर्दयेत्स्याहृद्वयमात्र
कं ।। तृष्णागजकेसरीरसः ।। इतितृष्णाधिकारिरसः ।। अथमूर्छा ।। करणामधुयुतंसुतंमूर्छायामतशीलयेत् ।। शीतसेकाव

॥ सान्नद ॥
॥ १५९ ॥

गाहादि सर्ववायीउनेहितं ॥ करादिरसात्ताम्रंदुरालभाक्काथैर्पीतेन घृतसंयुतं ॥ निवारयेभ्रमं शीघ्रं तथा शोथमाषितं ॥ ताम्ररस ॥ इति
मूर्छाधिकारः ॥ अथामदात्ययः ॥ धात्रीस्वरसनिःपीतारसगंधकज्जली सितासहिता ॥ हरति मदात्ययरोगानाशुगरुत्मानिवारगानहसा
॥ धात्रीरस ॥ इति मदात्ययाधिकारः ॥ अथदाह ॥ प्रत्येकं तोलमादाय सूतं ताम्रं तथाभ्रकं ॥ डिगुरां गंधकं चैव कृत्वा कज्जलिकां शुभां
॥ मुक्ता दाडिमतोयेन केतकीसूतवारिणा ॥ सहदेव्या कुमार्याश्च पर्प्पटोशीरमागधिः ॥ श्रीखंडसारिवां चैषां समानचू
र्णकं क्षिपेत् ॥ प्रक्षाफलकषायेण सप्तधा परिभावयेत् ॥ छायाशुष्कां विधेयाथवटीकार्या चणोपमा ॥ महाचंद्रकलाना
म्ना रसेन्द्रोयेनिरूपितः ॥ अम्लपित्तः प्रसमनः प्रदरध्वंसकारकः ॥ अंतर्वाह्यामहादाहविध्वंसनघनाघनः ॥ ग्रीष्मकालेस
रत्काले विशेषेण प्रशस्यते ॥ रसमूर्छारक्तपित्तज्वरदवानलः ॥ मूत्रकृच्छ्राणिसर्वाणिप्रमेहानपि दुस्तराण् ॥ हरत्येषरसोनूनंमहा
चंद्रकलानिधिः ॥ महाचंद्रकलारसः ॥ इति दाहाधिकारः ॥ अथोन्मादः ॥ उन्मादे पर्पटी दद्याजातिपत्ररसान्विता ॥ अपस्मारेपि
तत्प्रोक्तमेतयोराजकेतवा ॥ त्रिदिनं कनकद्रावैमहाराष्ट्रिरसैः पुनः ॥ विषमुष्टिकतोयेन समुत्थाप्यर्कचक्रिका ॥ कृत्वा
तप्रांशुगं — तं पुक्रावं धनमाचरेत् ॥ तत्समं कनकं बीजमभ्रकं गंधकं विषं ॥ मर्दयेत्रिदिनं सर्वं वल्लमात्रं प्रयोजयेत् ॥
उन्मादगजारस ॥ यद्भेषजमपस्मारे तदुन्मादे वकीर्तितं ॥ त्रिकत्रयसमायुक्तं जीवनीयगणान्वयः ॥ हंत्यपस्मारमुन्माद

॥ रामः ॥
॥ १५९ ॥

वातव्याधिमुद्धुस्तरं ॥ जीवनीयं लोहः ॥ सूतगंधं शिलातालं स्वर्णबीजं विचूर्णयेत् ॥ भावयेद्दुग्धगंधाया क्वाथेन मुनिशः पृथक् ॥ ब्रा
ह्मीरसेन सप्तैव भावयित्वा विचूर्णयेत् ॥ रससंजायते नूनमुन्मादगजकेशरी ॥ अस्य माषससर्पिष्का लीढो हंति हठागदं ॥ उन्मादा
ख्यमपस्मारभूतोन्मादमपिज्वरं ॥ उन्मादगजकेशरीरसः ॥ गंधेशकज्जलीलोहे द्रुतावदरवह्निना ॥ गोमयोपरि विन्यस्य
कदलीपत्रपातनात् ॥ कुर्यात्पर्पटिकाकारा अस्या रक्तिद्वयं क्रमात् ॥ पथ्याहिंगुरणोजीरकृष्णाशोरामदुस्पव ॥ दीयते मधु
वैषाशिशोगुंजाचतुष्टयं ॥ श्लेष्मपित्तानिलकासश्वासपीनसपांडुना ॥ प्लीहाग्निसादशूलानि हन्यादस्य ज्वरं नवं ॥ कृष्णधत्तू
रबीजैः पंचभिः पर्पटीरसः ॥ साज्यो योज्यः प्रशांत्यर्थमुन्मादस्याशुनावले ॥ पर्पटीरसः ॥ इत्युन्मादाधिकारः ॥ अथापस्मारः ॥ रस
गंधकतालानां सलिलानाय्य भास्वता ॥ मर्द्दीनामर्द्दितानांत्तं चूर्णं भाव्यवचाम्बुनैः ॥ एकविंशतिधा पश्चाद्ब्राह्मीवारास्तथैव च
खटमिबीजतैलेन भावयेदेकवासरः ॥ स्मृतिसागरनामायं रसोपस्मारनाशनं ॥ सर्पिषा माषमात्रोयं भक्षो हन्यादपस्मृति
॥ उन्मादोक्ता रसाः सर्वे ह्यपस्मारेपि युज्यते ॥ खटमीश्वेतापराजिता ॥ बीजतैलं नस्यतैलं स्मृतिसागररसः ॥ इत्यपस्माराधिका
रः ॥ अथ वातव्याधिः ॥ रसंगंधकं नागकांचलोहं तथाताम्रकं व्योमनिवंडकंच ॥ कणाटंकणांशोषणं नागरं तत्पृथग्भागमेकं
विमर्द्याथ यामं ततो वत्सनाभं चतुःसार्द्धभागं दृढं भावये भावनाव्योष जातीवराचित्रकैर्मार्कवैः कुष्ठतोयैस्तथा कारहाटैः सनि

ऊँडितोयैर्मनोह्वार्ककैरात्रिकैर्निर्गुण्डीनीरैः समं भावयेद्वातविध्वंसनोये ॥ समीरे च शूलेग्रहश्लेष्मरोगेग्रहण्यापानथा निपाते च सो हि ॥ अपस्मारमाद्यैः ससैन्ये सपित्तोदरप्लीहकुष्ठार्शसिध्मागदे च ॥ निषेके नरं जाड्यं चास्य दन्त्रं गदघ्राणपानेष्वयं रोगजित्स्यात् ॥ वातविध्वंसनो रसः ॥ गंधालमाक्षिकमयश्चरसा विषाणि सूतं टंकणं कटुत्रयमग्निमंथः भृंगी शिवा हृष्ठनरं गरसैभशंग्नेनीरे राघः क्षपति लामयहारि वल्लं रसानाम् नादेवदालीशुंठिवानारिजं स्वतं ॥ सगुग्गुलुः पिवेत्कोष्णमनुपानं सुखावहं ॥ स्वच्छंदभैरवरसः ॥ सूतात्यं चार्कनश्चैवं कृत्वा पिष्टं सगंधकं ॥ सूतं सं नागवल्याश्च द्रवैः पिष्ट्वा प्रलेपयेत् ॥ ताम्रपत्रैः प्रलिप्यैवं रुद्ध्वा गजपुटे पचेत् ॥ ॥ ताम्रपत्रैः प्रलिप्यैवं रुद्ध्वा गजपुटे पचेत् ॥ हिंगुजं भूषरो नाड्ववग्वेन्ते सकंमकं ॥ निहन्ति दाहसन्तापमूर्छापित्तसमन्वितं ॥ पित्तारिरसः ॥ वज्रसूताभ्रहेमार्कतीक्ष्णमुण्डकमोत्तरं ॥ मारितं मर्दयेदम्लैर्वर्गेण दिवसत्रयं ॥ त्रिक्षारपंचलवणामर्दितस्य समं समं ॥ दत्वा निर्गुण्डिकाद्रावैर्मर्दयेद्दिवसत्रयं ॥ शुष्कयेत्तद्विचूर्ण्याथ विषं चास्याष्टमांशतः ॥ टंकणं विषतुल्यांशं दत्वा जंवीरजैर्द्रवैः ॥ भावयेद्दिनमेकं तु रसोयं कालकंटकं ॥ दातव्यः सर्वरोगेषु संनिपाते विशेषतः ॥ हिंगुजमार्डकद्रावैः घृतैर्वा वातरोगिणां ॥ हिंगुजमार्डकद्रावैः घृतैर्वा वातरोगिणां ॥ गुडूचीमूलचूर्णं तु माहिषाक्षं च गुग्गुलुः ॥ समांसं मर्दयेदाज्येन वटिः कर्षसंमिता ॥ अत्रयोज्या घृतेनित्यं स्निग्धं मत्स्यं च भोजनं ॥ मंडेला नाशयेत्सर्वान् वातरोगान्न संशयः ॥ संनिपातेपिवेच्छागरविमूल

कषायकं ॥ वातकंटकरसः ॥ शुद्धगंधविषव्योषरसंटंकान्समांशकान् ॥ भावयेसप्तधाभृंगाररसेन स्यात्समीरहा ॥ आ
र्द्रद्रवेर्वा लोह्यखंडं व्योषेण योजितः ॥ महावातान्जयत्याशु नसाध्यानसुसंज्ञकान् ॥ समीरपंनगरसः ॥ गंधकाष्टगुणां
मूलं शुद्धं मदम्निनाक्षरां ॥ पक्वाम्रवनार्थसंचूर्णपितुल्यतुल्याभयायुतं ॥ सप्तरंगज्ञाभिर्निरवादेद्रुध्येचादिनेदिने ॥ गुंजैकै
कप्रमाणेन यावन्स्यादेकविंशति ॥ क्षीराज्यशर्करामिश्रं शाल्यन्नं पथ्यमाचरेत् ॥ कंपवातप्रशांत्यर्थं निर्वातेशेवयेत्
सदा ॥ त्रिगुणाख्यरसो नाम त्रिपक्षात्कंपवातनुत् ॥ त्रिगुणाख्यरसः ॥ प्रक्षिप्यतुल्यं रसतुल्यभागं कलाप्रमाणं च विषं स
मस्तान् ॥ कृशानुतोयेन च भावयित्वा वल्लं ददीतास्य मरुत्प्रशांत्यै ॥ अपस्मृतौ तथोन्मादे सर्वांगव्यथनेपि च ॥ देयोयमक्ष
मात्रं तु सर्ववातनिवृत्तये ॥ पवननाशनरसः ॥ नवाहिफेनंकविलेनवानि मरिचानि च ॥ समभागानि सर्वाणि राजिकाप्रमि
तानि च ॥ देयानि प्रातरेतानि पुनस्तांबुलचर्वणं ॥ कल्केचरवेजवातेच सर्वरोगगदसीगदे ॥ अवबाहोप्रयोक्तव्यः शोफे कंपेप
तानके ॥ विसूच्यां मरुचोदेयामपस्मारविशोषनः ॥ समीरगजकेशरीरसः ॥ रसोगंधबलावह्निगुग्गुलुक्रमवर्द्धितैत्रेकभाग
सूतस्यागंधकस्याद्विगुणास्ततः ॥ त्रिभागपात्रिफलायोज्याचतुर्भागस्तु चित्रकः ॥ गुग्गुलोपंचभागान्मरुद्रुतैलेन मर्दितः ॥
॥ क्षिप्त्वा तत्रादितं चूर्णं तेन तैलेन मर्दयेत् ॥ गुटिकां कर्षमात्रां तु भक्षयेत्प्रातरेव हि ॥ नागरैरंडमूलानां कषायं प्रपिबेत्तु

॥ अभ्यंजैरंडतैलेन स्वेदयेन्मृहृदेशकम् ॥ विरेक परिणामेतु स्निग्धंमृष्टंच भोजनं ॥ वातारिसंज्ञको ह्येष रसो निर्वातसेवितः ॥ मा
सेन मरुतो रोगान्हरेस्तुरनवाजिनः ॥ वातारिरसः ॥ सुवर्णं रजतं ताम्रं कांटरोगं चटंकणं ॥ लोहवंगं नागयुक्तं प्रत्येकं कर्षमानकं
॥ रसगंधविषंचैव ताम्रलोहं समाक्षिकं ॥ यतः सर्वं समं योज्यं विषंच द्विगुणं भवेत् ॥ जैपालं तालकं चैव रसेन सह योजयेत् ॥ चू
र्णंच समं योज्यं सर्वमेकत्र कारयेत् ॥ निर्गुंडिस्वरसाद्रावैर्भानुपत्रद्रवैस्तथा ॥ तर्कारी भृंगीराजस्य तत्तोन्मत्तरसेनच ॥ भावना
खलुदातव्याः सप्तसप्तक्रमात्ततः ॥ द्विगुंजं भक्षयेत्प्रातर्मरिचाज्येन संयुतं ॥ सुवर्ण १ तार १ ताम्र १ कांतलोह १ टंकण १ तिक्ष्णलोहं
१ तद्भावे कांतलोह वंग १ नाग १ रस १ गंध १ विष २ माक्षिक १ जैपाल १ शुद्धताल १ त्रिकटु सर्वसमं खल्वे क्षिप्त्वा मर्दयित्वा भाव
ना ७।७ प्रत्येकं निर्गुंडिरसैः ७ सूरणाद्रवैः ७ अर्कपत्ररसैः ७ अग्निमंथरसैः ७ भृंगराजरसैः ७ धत्तूररसैः ७ सूक्ष्मचूर्णं कृत्वा मात्रा गुंजा
२ अनुपानं तु उक्तमेव ॥ जानुजंघकटीशूलपांगुल्यक्रोष्टुशीर्षकं ॥ मान्यास्तंभ हनुस्तंभ त्रिकपृष्ठं भवग्रहकः ॥ जिह्वास्तंभ वाहुसं
भग्नधूसिवापतानकं ॥ अधोभागेव यैवातास्सर्वांगे विचरंति ते ॥ सर्वावातक्षयेदाशुदैत्यांनारायणो यथा ॥ वातविध्वंसनो रस
॥ पथ्याविश्वौ त्रिपलिकौ पथग्वोषं च पुष्करं ॥ विषंच पलिकं कौतीपत्रैलाभस्मकं तथा ॥ पलार्द्ध केशरं कर्षं सर्वाण्येकत्र चूर्णये
त् ॥ तुलार्द्ध च गुडं कर्षसत्तं दत्वा विमर्दयेत् ॥ वदरास्थिमितान्तस्य वटी भक्ष्या नियच्छति ॥ सर्वान्वातामयान्मोहात्कुष्ठानि च भगंदरा

न्॥ अश्मरिमूत्रकृच्छ्राणि कासश्वासक्षयादिकान्॥ प्लीहगुल्मोदरार्शांसि गलग्रहमरोचकान्॥ अंत्रवृद्धिमपस्मारमुन्मादान्यो
निजानगदान्॥ सर्वलूताविषोद्भूतदोषांश्च विषमज्वरान्॥ पलितं हंति मासेन कुर्यादग्निं द्वितीयके॥ शुक्रवृद्धिं तृतीये तु बलवर्णा
दिशाधयेत्॥ केकीतुल्याभवेद्गतिगृध्रतुल्यो विलोकने॥ नारीषु वाजितुल्यस्याद्रुवरोशूकरोपमः॥ बलेन गजतुल्यस्याद्वायुतुल्योज
वोभवेत्॥ यथेष्टाहारचेष्टोपि नरोजीवतिनिर्गदः॥ विजयादिरितिख्यातोदेवदेवादितोगरुडः॥ ~~विजयादिगरुडः~~॥ गरुडश्चतुर्दशपलः
पुराणपलिकांशिवा॥ चित्रकंपलिकोव्योषं ग्रंथिकं नागकेशरं॥ लोहभ्राब्दाजवीजानी पृथगर्द्धपलानि च॥ त्वगंधविषतालीश
तुंबुरुणि च कट्फलं॥ पारदं पुष्करंभागीपृथकर्षमितानि च॥ एकीकृत्यगरुडःस स्याद्द्वितीयोवीजयादिकं॥ अतेपित्रं सर्वरोगा
न्विनिहंति न संशयः॥ निर्वीजस्यायिनांचैवक्षीरभक्तभुजांनृणां॥ उपदंशानयंहंतितार्क्ष्यसर्पगणानिव॥ द्वितीयगरुडयविजयागरुड
॥ विषमहोषधंमागधिकोषणाद्युमरिरक्तकमार्द्रकमर्दितं॥ क्रमविवर्द्धितमुद्गवलितज्वरहृत्त्रिपुरभैरवएषरसोवरः॥ विष१शुंठी
२ पिप्पली३ मरिच४ ताम्रभस्म५ हिंगुल६ आर्द्रकरसेनमर्दयेत्॥ मात्रारक्तिका१ अनुपानं आनुपानं आर्द्रकरसः॥ ~~त्रिपुरभै~~
~~रव~~रसः॥ अभयाएवधात्रीदंतितिक्तास्नुहित्रिवृत॥ प्रत्येकमेतानिग्राह्याणिपलमात्रया॥ तानिसंक्षुद्यसर्वाणिजलाढक
युगेपचेत्॥ तत्रतोयेष्टमभागंकषायमवशोषयेत्॥ निस्त्वग्जेपालवीजानिनवानिपलमात्रतः॥ वध्वावस्त्रेधतान्येवतस्मिन्क्वाथे शनैः॥

॥ सात्मद ॥
॥ १६२ ॥

पचेत् ॥ ज्वालयेदनलं मंदं यावत्क्वाथोग्नो भवेत् ॥ ततः खल्वे क्षिपेभागानष्टौ जैपालवीजतः ॥ भागास्त्रीन्नागरी द्वौ च मरिचाद्वौ च
पारदात् ॥ गंधकाद्वौ च तानी ह्यावश्याम विमर्दयेत् ॥ रसो नाराचनामायं भक्षितो रक्तिकामितः ॥ जलेन शीतलेनैव रोगानेतांविनाश
येत् ॥ आध्मानं शूलमानाहं ग्रन्थ्याध्मानं तथैव च ॥ उदावर्त्तं तथा गुल्मं मंदाग्निं हरत्यसौ ॥ वगेस्मिन्नेवभुंजीत शर्करासहितं दधि ॥
ततस्तस्मै सैंधवेनापि तक्रोदध्योदनं मनाक् ॥ नाराचरसः ॥ शुंठीगंधोषणाहरभवटंकणं तुल्यमेतज्जैपालं स्याद्द्विगुणितमिदंतं
तु तोयेन मर्द्यं ॥ इच्छाभेदकलिलगुड्यतः स्नावतोयं विरेकात्कष्टं स्वावापिवटिर्वल्लकायावतो ॥ वच्चमावारिच्छाभेदिरसः ॥ ॥
हिंगुलं जयपालं टंकणं विषाणापि त्र्यूर्ध्वभागोत्तरं मर्द्य निंवुरसेन शर्करायुक्तो हिंगुंजप्रमितो देयः ॥ मार्त्तंडोदयधातान्ज्वरादिषु
हन्तः ॥ शोथोदराध्मानकेपांडौ जीर्णज्वरे नणान नवशान्तः पथ्यं च तक्रौदनं ॥ मार्त्तंडोदयरसः ॥ रसगंधाद्द्विगुणाज्जेपालसर्व
तु पिवेत् ॥ सुखमभोघतेनाद्यदस्यवहुंविरेचनं ॥ विरेचनरसः ॥ कर्षमात्रं रसं चैव लोहं हिंगुलयोरपि ॥ भास्वगगनयोश्चा
पि गंधकस्य पलं पलं ॥ निंवुद्रावेन संमर्द्य भावयेत्सप्तधा पृथक् ॥ हेमार्कस्नुक्पयोवासाहयारिविषमुष्टिभिः ॥ पिंडितं वालु
कायंत्रे सेवयेद्दिवसद्वयं ॥ कर्षमात्रं तु पिप्पल्यानिष्कमात्रं विषस्य च ॥ संचूर्णपिशापयेदत्र सर्वेश्वररसायने ॥ गुंजामात्रं ददीतावस्य
र्शवातापतन्नये ॥ सर्वेश्वररसः ॥ तालं रसेनाष्टगुणं जयाव विमर्द्य पत्रागटिकां गुडेन ॥ निवध्य तां सेवय मासयुग्मं दिनोदयस्पर्शवि

रम:
१६२

कान्तलैअह्रग्रा जयारसेन नालकं समर्द्यः ॥ जयात्रविजयामंड्लवातस्य ॥ रसगंधशिलाताले सर्वं कुर्यात्समांसकं ॥ चूर्णयित्वा मनः श्लक्ष्णां सारनालेन दोषयेत् ॥ लेपयित्वाथ कल्केन सूक्ष्मवस्त्रं मनः परं ॥ तैलाक्तं कारयेद्वर्त्तिमूर्ध्वभागं प्रदापयेत् ॥ वर्त्योधस्थापिते पात्रे तैलं पतति शोभनं ॥ रसगंधक· हरिताल· मनःशिला· समभागं संचूर्ण आरनालेन संपिष्य सूक्ष्मवस्त्रखंडका दशांगुलविस्तारे लेपयित्वा वर्त्तिं कृत्वा घर्मे संशोष्य प्रस्थ संमितेतिलतैले स्थापयित्वा अधोमुखं दीपं प्रज्वलयित्वा तदधः पुनः काचपात्रे स्थापयित्वा तत्तैलं श्रवेत् ॥ तद्देपयेत् ॥ लेपयेत्तेन गात्राणि भक्षयेद्वातुरं तथा ॥ नाशयेत्तत्तैलं तद्वातरोगाननेकधा ॥ वा· ॥ वातकंपं शिरःकंपं जंघाकंपं मनःपरं ॥ एकांगं च तथा वातं हंति रोगमनेकधा ॥ वातसात्येन तथा देयं तैलं विजयभैरवं ॥ विजयभैरवतैलं ॥ मृतसूतं मृतं लोहं गंधकं ताम्रमाक्षिकं ॥ पथ्याभ्रं गीविषं व्योषमग्निमंथं च टंकणं ॥ तज्जखले दिनं मर्द्यं कोज्ञिनिर्गुंडिजैर्द्रवैः ॥ वल्लोन्मितं वटिं स्वादेत्सर्ववातोपशांतये ॥ अस्थिसंधिगतं हन्याडुसौ वातगजांकुशः ॥ वातगजांकुशारसः ॥ समताप्यसूतं भस्मं प्रत्येकं विंशतिमानकं ॥ पुग्मात्तं हि चतुर्वीरखंडयित्वा ततश्चरेत् ॥ तत्तुल्यं माक्षिकोपेतं पुटे विंशतिवारकं ॥ गंधकेन पुटे तावत्स्यात्पलमानकं ॥ क्षिपेत्पलमितं तत्र गंधकोपहतं रसं ॥ शाणमात्रहतं वज्रं सर्वमेकत्र मर्दयेत् ॥ इति सिद्धोरसेंद्रोयं मार्तंडेश्वरनामतः ॥ किर्त्तितो लोकनाथेनल्लोकानां हितकाम्यया ॥ शुद्धताम्रपल २० शुद्धमाक्षिकपल २० जंवीरद्रवेणमर्दयित्वा

ताम्रपत्रोपरिलेपयेत् ॥ घर्मेशोषयित्वापात्रेनिधायचतुर्वीरेध्मापयेत् ॥ पुनःनिष्काशयित्वापुनःचूर्णयित्वापुनस्तत्तुल्यंमाक्षिकं
दत्वापुटेत् ॥ विंशतिवारपर्य्यन्तं २० पुनःगंधकेनपलमितेनपुटयित्वागंधकेनमारितंपुनःसूतभस्मपल १ हीरकभस्मटंक
१ मेलयित्वासर्वसंमिश्रमात्रारत्ति १ अनुपानंतुरोगानुरूपं ॥ मरिचंघृतसंयुक्तंसेवितोमंडलार्द्धतः ॥ वातानाशप्रमहारोगान्
श्वासकासगुतंक्षयं ॥ हलीमकंचपांडुंचज्वरानपित्तदुस्तरान् ॥ इत्यादिकान्सर्वरोगान्विनाशयतितत्क्षणात् ॥ करोतिदीपनंती
व्रंदमानलशतोपमं ॥ संनिपातजयत्याशुव्याधार्डकसमन्वितं ॥ वज्रेश्वरोरसः ॥ तीक्ष्णायस्कारगोदंतमाक्षिकेमर्द्दितोर
सः ॥ समासगंधकोपक्वोहंडिकायंत्रमध्यगं ॥ व्योषाग्निमंथंसुरसाहंगंशृंगप्भयाविषे ॥ समेक्षयंच्यहंसुंडिनिर्गुंडिरस
मर्द्दितं ॥ तीक्ष्णलोहसारलोहहरितालसुवर्णमाक्षिक·गंधकंवसर्वसमांसंमर्दयित्वा·वज्रमूषायाक्षिप्त्वामुडांदत्वाहं
डिकायांपक्वावस्वांगशीतमुद्धृत्यत्रिकटुअग्निमंथरास्नावग कर्कटशृंगीहरितकी·शुद्धअमृतसमभागंखल्वेमेलयि
त्वामुंडिरसेनत्रिदिनं ॥ निर्गुंडीरसेनच·मर्दयित्वा·मात्रारत्तिका ३ अनुपानंतुरोगानुरूपं·सेवित·शमयेवातनाम्ना
स्वच्छंदभैरवः ॥ विशेषाद्वातरक्तंचछिवध्रश्लाईकडवैः ॥ त्रिनेत्रस्वच्छंदभैरवरसः ॥ एकोभागोरसस्यास्यशुद्धता
लस्यभागिकां ॥ अष्टौस्तुविजयायाश्चटंकिकांगुडनाकिरेत् ॥ अस्यास्पर्शप्रदोषेणतनक्तसिसापदेशतः ॥ विषलेपंप्रकु

वीतवातारि वीजलेपनं ॥ तालकेश्वररसः ॥ तालसत्वं चतुर्थांशं सूतं कृत्वा तु कज्जली ॥ सोमराजिकषायेन मर्दयित्वा पुनः पचेत् ॥ अधोभूधरगं पाच्यं कावकूप्यां दिनत्रयं ॥ तालेन सदृशं किंचिद्दोषघ्नं कुष्ठरोगिणां ॥ सर्वं वातविकारघ्नं ग्रंथिशोथनिवारणं ॥ सिद्धतालेश्वररसः ॥ रसस्य भागं चत्वारो बंधकस्य दशैव तु ॥ ताम्रस्य वटिकां पंच दत्वा चैतानामधोक्ष रवी ॥ स्वांगशीतं समुद्धृत्य तत्ताम्रं चूर्णयेद्दृढं ॥ भावयित्वार्कदुग्धेन घटिकादशधा पुनः ॥ रसोयं दशनामायं लवणादिविवर्जितः ॥ मासमात्रप्रयोगेन मंडलादिविनाशकः ॥ अर्केश्वररसः ॥ रसस्य गंधं द्विगुणं विमर्द्य ताम्रस्य चक्रेण तु तापितेन ॥ आछादयित्वाथ ततः प्रयत्नात् कोविलेनं च ततः प्रगृह्य ॥ संचूर्णयेद्द्वादशधार्कदुग्धे पुटेन वह्नि त्रिफलाजलैश्च संभावितोर्केश्वरसूत एषो गुंजाद्वयं चास्य फलत्रयेण ॥ ददीत मासत्रितयेन कुष्ठिवातातिहिसक्रोहिमवेडितासि क्षारं सुतीक्ष्णं दधिमाषमांसं हृताक मध्यादिविवर्जनीयं ॥ द्वितीयोर्केश्वरो रसः ॥ सूतकस्य पलपंचपलैकं ताम्रचूर्णकं ॥ जंवीराणांद्रवैर्मर्द्यं ततस्तुल्यं तु गंधकं ॥ नागवल्लिदलैः पिष्टं ताम्रपिष्टिं प्रकल्पयेत् ॥ रुध्वा लघुपुटे पाच्यमभूधरे यामपंचकं ॥ आदाय चूर्णयेत्तुल्यै ऊषणैः सममिश्रितैः ॥ अर्द्धांगकंपवातादीन् भक्षयेद्वल्लमात्रकः ॥ भग्नघाते ॥ मृतं सूतं ते तीक्ष्णं —— मर्दयेत्कन्यकाद्रवैः ॥ चणकाभा वटिः खादेत् सर्वांगकंपवातनुत् ॥ सर्वांगवाते ॥ इति वातव्याधिकारः ॥

॥ साम्यद॥
॥ १६४॥

अथपित्तव्याधि॥ मृतरसगगनार्कमुंडतीक्ष्णांसताप्यंशवल्ली॥ सममिदंस्याद्घृष्टिकावारिघृष्टं॥ तदनुसलिलजातैर्वासकैर्गो
स्तनीभिर्मर्दितमथविदारीवारिणावत्रमेकं॥ घृतमधुसहितोयंनिष्कमात्रावटीति क्षययतिग्रहपित्तँपित्तरोगंक्षयंवा॥ भ्रम
मदमुखशोषांदाहतृष्णासमुत्थाप्रलपनमिहपेयंचानुपानेसखंडं॥ क्षीरसागररस:॥ मृतसूतार्कलोहानांतुल्यांपथ्यांवि
मर्दयेत्॥ माषमात्रंलिहेत्क्षौद्रैरम्लपित्तप्रशांतये॥ अम्लपित्तांतकरस:॥ ससोवल्लीव्योषरवीसरोहं धात्र्यक्षतिरैत्रिदिनंवि
मर्द्य॥ तदल्यप्रष्मंमधुमार्कवेणासंमर्दयेदस्यरसस्यवह्नौ॥ हंत्यम्लपित्तंमधुनावलीढोलीलाविलासोरसराजएष:॥ दुग्धं
सकूष्मांडरसंस्कधात्रीपत्र्काशनैस्तत्तासितंभजेद्वा॥ लीलाविलासरस:॥ गगनाद्विपलंचूर्णंलोहस्यपलमात्रकं॥ लो
हकिट्टपलंचार्द्धंसर्वमेकत्रसंस्थितं॥ मंडूकपर्णीवसिरतालमूलीरसै:पुन:॥ वरीभृंगकेशराजकरणमारिषजैरथत्रि
फलाभद्रमुस्ताभि:स्थालीपाकाविचूर्णितं॥ रसगंधकयो:कर्षंप्रत्येकंग्राह्यमेवच॥ तंमर्दितंशिलाखल्वेयत्नत:कज्जली
कृतं॥ वचाचव्यंयवानीवजीरकेरानभुष्ठिका॥ व्योषमुस्तंविडंगंचग्रंथिकंखरमंजरि॥ त्रिवृताचित्रकोदंतीसूर्यावर्त:सि
नस्तथा॥ भृंगमानककंदश्चखंडकर्णकमेवच॥ दंडोत्पलकेशराज:कालावनगरोपिवा॥ एषामर्द्धपलंग्राह्यंपटघृष्टंसु
चूर्णितं॥ प्रत्येकंत्रिफलायाश्चपलार्द्धपलमेवच॥ एतत्सर्वसमालोड्यलोहपात्रेचभावयेत्॥ आतपेदंडसंघृष्टमार्द्रकस्व

॥ रामः॥
॥ १६४॥

रसैस्त्रिधा ॥ नडसेन शिलापिष्टं गुटिकां कारयेद्भिषक् ॥ वदरास्थिनिभां शुष्कां तु गुप्तं तंनिनिधारयेत् ॥ अभ्रकपल२ लोहभस्म
पल२ लोहकिट्टकर्ष२ संचूर्ण्य लोहपात्रे चूर्ण्यी संस्थाप्य मंदाग्नौव क्षमाराडवैः भावयेत् ॥ ब्राह्मी अपराजिता· मूशली· शा
तावरी· भृंगराज· द्वितीयपीतपुष्पभृंगराजपिप्पलीमारिषशाकविशेष· त्रिफला· भागरपुस्तापारसैश्च चूर्णयित्वापुन
रसकर्ष१ गंधककर्ष१ कज्जलीकृत्वा मेलयित्वा शिलायां खल्वे पुनश्चूर्णं क्षिपेत् ॥ वचा चव्य यवानि जीरक· शतपुष्पा
त्रिकटु· मुस्त· विडंगं· ग्रंथिक· अपामार्ग· त्रिवृता चित्रक दंतीगजपिप्पलि· तथा च निर्घंट· कपिवल्ली· करिकरण· वशी
रकोरवल्ली केति· भृंगराज· मानकंदवृषकर्णीपलासकमल· त्रिफला भृंगराज कालानुसार्य्यतगर· एषां प्रत्येककर्षद्वयं सूक्ष्म
चूर्णीकृत्वा पुनस्त्रिफला प्रत्येकं पलप्रमाणां पुनर्लोहपात्रे आलोड्य आर्द्रकरसेन आतपे त्रिधा विभाव्य वदरास्थिसंमितां व
टिकां कारयेत् ॥ अनुपानं रोगानुरूपं च प्रातर्भोजनकालादौ सेवितं गुटिकां त्रयं ॥ अम्लोदकानुपानं तु हितं मधुरवर्जितं ॥ दु
ग्धं च नारिकेलं च वर्जनीयं विशेषतः ॥ भोज्यं यथेष्टं मिष्टं च वारिनक्राम्लकांजिकं ॥ हंत्यम्लपित्तं विविधं शूलं च परिणामजं ॥ पांडुरो
गं च सर्वं सशोथोदरगुदामयम् ॥ यक्ष्माणं पंचकाशं मंदाग्नित्वमरोचकं ॥ प्लीहानं शोषमानाहमामवातं स्वरामयं गुटिभुक्ष्ववटिं सेव्या
विरव्यानेरोगहारिणी ॥ वशीरश्चैलसूर्य्यावर्त ॥ कलायप्रमाणां वटिकां कृत्वा व्यवहर्तव्यं ॥ भुषावशीरस ॥ विचूर्णगंधाश्मपलं विशु

ऊं रसछिंकर्षगासमं वरवल्ले ॥ रसार्द्धं सौवर्चलं चूर्णीयुक्तं नतत्वह्निनरवह्वशिलासुयत्नान् सूर्य्यावर्त्तककर्णीमोटकरसैरात्मा व्यनत्कऽज्ज्लं लैनेपा
लोद्भवताम्रकं पलमितं ततत्कं टवेध्मायितस्ते नालिप्य वकऽज्जलेनसुविरं जंबीरत्तीले स्थितरवल्वा स्मर्पितमेतदात पथ्यं तं पिंडिकृतं घट्टने
॥ संपिस्यात्सुश्चं भेसुपरीतिनिहितं तरक्तिंत्रयं योजयेत्तत्क्वालोचितवक्रशुद्धिरुचितां चूर्णीविनाप्रत्यहं ॥ हन्त्येततत्सुमन्नपित्तवगदान्
पाडुगिनिमांद्यज्वरान् ॥ रक्तोवर्द्धितमाषयेषनियतोलोहोक्तसर्वोविधिः ॥ सूर्य्यावर्त्तसूर्य्यभक्ताकर्णामोरटःकर्णाशीङइतिप्रसिद्धवक्र
शुद्धितांवूलं ॥ सूर्य्यपाकताम्रभस्म ॥ ॥ अश्वदनाउरुतुमूलरसेनिमग्नकृत्वाभ्रकंवसनवद्धमहानिसप्तं ॥ पिष्ट्वाचकिंचिदप
शोष्य पलंप्रमाणं न्यग्रोधदुग्धपलषुक्तमथोपटेतत् ॥ मापाष्टकं पृथगथत्रिकटोवर्णाः संयोज्यवाज्यमधुनिंवविवरं विमर्द्य ॥ तत्तांडुपा
नमुपयुक्तमिदं निहंति शूलाम्लपित्तवमनानि निहितानि शितोद ॥ अभ्रकप्रयोगः ॥ त्रिकत्रिफलामुस्तंविडंगमथ तथाविंत्रकं ॥ यवानिहसुषा
हिग्वंतुरुलवणात्रयं ॥ भल्लातशतपुष्पावधान्यकजीरकद्वयं ॥ अजमोदावचाश्वंगीरीहिंगं हृहतिद्वयं ॥ वानराह्वयवातारिवारोगा
मुंडितिकाद्वयं ॥ कुठारछित्राकंदौच अक्षपीडांशुभांजनी ॥ सूर्यावर्त्तत्रिवृद्दंतीभंडाक्रटपुनर्नवाः ॥ भार्गीपत्माशमूलंवमेधा
वीडाशनः शठी ॥ तेजोवतिगवाक्षीवलिन्यराथपुंखका ॥ कलिकर्णापलाशश्वगंधुनखः शतावरी ॥ गोधावंध्यथलगूरवोवृह
त्यात्रेकलाहलौ ॥ सर्पदंष्ट्राकरणामूलराजातोभृंगकेशरौ ॥ वृद्धदारुकसंपाकोवलेन्द्रसुरसस्तथा ॥ दंडोत्पलावरुणकंमुदर्शव

॥ रामः ॥
॥ १६५ ॥

रमंजरी॥ तालमूल्यस्थिसंहारः खंडकर्णोरुदंतिका॥ कर्षमात्रंतुसंग्राह्यमेतेषांतुपृथक्पृथक्॥ एकपत्रकृतंकृष्णमभ्रकंचपलाष्टकं
॥ आश्रयजाम्लपानीयेस्थापनीयंदिनत्रयं॥ शुष्कचूर्णीकृतंपश्चात्पुटयेगोमयाग्निना॥ मानास्थिसंदंतिकदानांभृंगार्द्रत्रिफला
रसैः॥ एवंदद्याच्चलोहस्यषट्पलस्ययथाक्रमं॥ पश्चादेकीकृतंसर्वंपुटयेजार्द्रमारणयोः॥ पारदार्द्रपलंशुद्धंगंधकंचपलंतथा॥
सर्वमेकीकृतंश्लक्ष्णंपेषयेदार्द्रकांबुना॥ षण्माषकमितांश्चैववटिकांकारयेद्भिषक्॥ त्रिकटुत्रिफलाभस्ता·विडंग·अम्लताचि
त्रक· यवानीहपुष्पाहिंगुतुंबुरुंलवणात्रयमध्यातकशालपुष्पा· धान्यकंजीरक· कृष्णजीरक· अजमोदावचाभृंगी·रोहिष·बृहती
कंटकारिमर्कटि·एरंडवाराणपुष्पा· मुंडिहयकठारछिन्नासूरणश्वेतावाराहीमूलसोभांजनसूर्यभक्तानकृतदंती — — — —
पुनर्नवाभार्गी·पाषाणभेद· ब्राह्मी·वज्रीशटितेजवटीइन्द्रवारुणिनिलीनिएलासर्षपारक्तैरंडपलाशशिग्रुशतावरिमूश
लिमातुलुंगबृहती· अलंबुषाविष्णुक्रान्तिग्रंथिराजवृक्षत्वक्कंकुमहद्दारुबलाइंद्रयवारास्नापलाशकमलवरुणसुदर्शनअपा
मार्गश्वेतमुशलीअस्थिसंहारखंडकर्णा·रुदंती· सर्वेकांकर्षमात्रांपृथक्चूर्णयित्वावस्त्रपूतंकृत्वावज्राभ्रकंपल ८ भक्तवा
रिचाम्लवारिणात्रिदिनंसंस्थाप्यशुष्कंचूर्णीकृत्यपुनर्गोमयाग्निनापुटेत्पुनः षट्पललोहमिश्रयित्वाभृंगराज· आर्द्रक· त्रिफ
लारसैमर्दयित्वापुनःपुटेत्॥ स्वांगशीतंसचूर्णपुनःपारदकर्ष२गंधकपल१कज्जलीकृत्वासंमिश्यआर्द्रकरसेनसंमर्द्यगुटिका

रक्तिका२६ मितां कुर्यात्॥अनुपानं तु रोगानुरूपं॥गुटिद्वयं भक्षयित्वा अम्लं चानुपनयं पिबेत्॥ नागार्ज्जुनेन मुनिना निर्मिता हितका
रिणी ॥ सर्व्वरोगहरी चैषा गुटिका चामृतोपमा॥अनेन वर्द्धते पुष्टिरग्निवृद्धिश्च जायते ॥ सर्व्वरोगो विनश्यन्ति आमजीर्णज्वराद
यः ॥अम्लपित्तं च गुदजं ग्रहणीं नाशयेदपि॥ कामलां पाण्डुरोगं च वलीपलितनाशनं॥ शकलाः शाल्किनो भक्ष्या मांसं च सकलं
तथा॥ वार्त्ताकं दधिशाकं च तक्रं चापि यथेच्छया॥ सर्व्वाम्लं तिंतिरीवर्ज्जमम्लमाषं च भक्षयेत्॥कांजिकं चाम्लमाषं च मूलकं चैव
भक्षयेत्॥न भक्षयेत् शुष्कपत्रं क्षीरं चैव विवर्ज्जयेत्॥ मधुरं नालिकेरं च वर्ज्जनीयं विशेषतः॥ अस्यार्थ॥रोहिषं रोहितकं· तेजोव
ती चविका पुरुषकं शरपुंखकमूलं कुलाहलो अलंवुषा रुदंतिका· रुदंती· लवणं· सैन्धवं सोवर्चलं· विडानि वानराह्वयं सूक
सिंविमूले वा नारि एरंडुमूले वा रंगोनिलाकिंटि अक्षपीडं श्वेतवह्नामूलं· मेधावी ब्राह्मी· गवाक्षी· गोरक्षकर्क्कटी निलीनी· नी
लकुञ्चा· गोधावती· गोहालिया सर्पदंष्ट्रा वि छाति अन्यतु गोरोर्ज्जियं बृहत्यानीयभक्तगुटिका॥ ॥आमलापिप्पलीचूर्णं तुल्य
या सितया सह॥ रक्तपित्तहरो लोहो योगराड्डितिविश्रुतः॥ वृष्योग्निदीपनो वल्यो महाम्लपित्तनाशिनः॥पित्तोत्थान वातपित्तोत्था
नि हन्ति विविधान् गदान्॥आमलक्याद्यिलोह॥ त्रिकटुत्रिफला मुस्तं विडंगं चित्रकं तथा॥एषां सं चूर्णितानां तु प्रत्येकं तु पलं भ
वेत्॥कर्षद्वयं गंधकस्य तद्दर्द्धं पारदस्य च॥विडालपदमात्रं तु लिह्यात्समधुसर्पिषा॥शीतोदकं चानुपिबेत्क्रमाद्वृद्धं पयस्तथा॥

॥राम:॥
॥१६६॥

अम्लपित्तमग्निमाद्यपरिणामरुजस्तथा ॥ कामलांपांडुरोगंच हन्यादेतद्रसामृतं ॥ रसामृतं ॥ लोहस्यचूर्णत्रिफलोद्भवेनचू
र्णेनतुल्यंमधुशर्कराभ्यां ॥ लीढ्वाजयेन्नुत्वरमम्लपित्तंकृताशनाग्रहणीविकारान् ॥ त्रिफलालोह ॥ पलंतेनपालताम्रस्यतत्र
पत्राणिकारयेत् ॥ कर्षकंशुद्धसूतस्यहिंगुलंशुद्धगंधकं ॥ मर्दयेद्विशिलाखल्वेरसैर्दन्तशठस्यच ॥ तत्कल्कंपंकवत्कृत्वातेनपत्राणि
लेपयेत् ॥ स्थापयेदातपेतीव्रेयामयुग्मेनतद्भवेत् ॥ वांशिविरचनंकृत्वाशुद्धकार्यायथाविधिः ॥ तन्मानेनमधुसर्पिर्भ्यांरक्तिकैकमा
षकादिभिः ॥ लिह्यात्तत्रपिवेत्तक्रधारावाम्लकथमापिवा ॥ जीर्णेसायंसमश्नीयाच्छाल्यन्नंचपुरातनं ॥ सेव्यमानंनिहंत्येतदम्लपित्तं
सुदारुणं ॥ कासंश्वासंक्षयंशोषमर्शांसिग्रहणीमपि ॥ कामलापांडुरोगंचकुष्ठान्यष्टादशैवतु ॥ रक्तपित्तंसरवालिन्यंवातरोगा
न्व्यपोहति ॥ सततंताभ्यांसयोगेनवलीपलितवर्जितः ॥ जीवेद्वर्षशतंसाग्रंदीप्तोयद्वत्पावकः ॥ ताम्रपाकरसः ॥ चत्वारिशा
णकपर्दस्यशंखस्यचतत्र्यमाराणतः ॥ विषटंकणपिप्पल्याभागषराण्माषकंपृथक् ॥ मरिचंकर्षकंवापिरिपिष्टंगुंजासमावटि ॥ श्वास
कासाम्लपित्तेवटीहाध्मानेशूलोदरे ॥ सूतकंखवटीरसः ॥ मृतसूताभ्रकंताराश्मतीक्ष्णमाक्षिकतालकं गंधकंमर्दयेत्तुल्यंय
ष्टिद्राक्षामृतोद्भवैः ॥ जलखंडयिकावासाडवेक्षीरविदारिजैः ॥ दिनैकंमर्दयेत्खल्वेसिताक्षौद्रयुतावपि ॥ निष्कमात्रांनिहंत्याशु
पित्तंपित्तज्वरक्षयं ॥ दाहतृष्णाभ्रमंशोषंहंतिपित्तांतकोरसः ॥ पित्तांतकोरसः ॥ शुद्धंगंधकपारदाभिकलितंत्र्याहतायप्रमान्

नयानाम्रमयीन्नूतेनंरंशशीकलाक्षौद्रान्वितंपथ्यभुक् ॥ कोठोदंदकशीतपित्त्रजरुजोनशंपतिवशंपदिनैरल्पनरस्यर्यातिविलयंकु
ष्ठानि वा ष्टादश: ॥ ताम्रयोग ॥ धात्रीचूर्णस्याष्टौपलानिचत्वारिलोहचूर्णस्ययष्टिमधुनासंयुक्तंभुक्त्वादोमध्यान्तनसंसेव
॥ त्रिनपिवाराएनरवादेपथ्यंभुक्त्वानुदोषवा ॥ भक्तस्यादोषपयातिदोषास्यिन्त्रानिलोत्थितान् ॥ विष्टंभजपतिनृणांदह्यमा
ननान्ते ॥ अन्नपानकृतानभुक्त्वातेशीलितंजयति एवंजीर्यतिचान्नेभूलंनृणांसुकष्टमपिजयति ॥ हरतिवसहसा
युक्तोयोगोयंशाश्वज्जरपित्त्रे धात्रीलोह ॥ सूतगंधविषव्योषलोहमभ्रसमांशकं ॥ मर्दयत्त्रिफलाक्काथे: सिद्धोभवति
नडस: ॥ पिप्पलीमधुसंयुक्तोवल्लमात्रंप्रयोजयेत् ॥ धातुक्षयेपांडुरोगेडराशोविषमज्वरे ॥ प्रमेहेरक्तपित्त्रेचशीतपित्त्रेम्लपि
त्तके: ॥ संनिपातेमहावातेशूलगुल्मादिजंतुषु ॥ अर्शासिग्रहणीदोषान्नाशयेतत्क्षणादपि ॥ कामधेनुरसोनामसर्वरोगेषुयो
जयेत् ॥ कामधेनुरस: ॥ पथ्यकन्दूषणामक्षांशधात्र्यालोहाभ्रवमेलप्रत्येकं ॥ त्रिफलायास्त्वचकर्षद्वयंद्वयमपिक्षिप्यन्त: ॥ प्रसार
णावल्लायाश्चवीजपूरकद्रस्यच ॥ सवीजायालतायाश्चल्लताच्चोत्कटकस्यच ॥ निर्गीडितरसंतेषांपथगष्टपलंपलं ॥ सद्र
लस्यफलान्यत्रचत्वारिचप्रदापयेत् ॥ सर्वान्येकत्रविधिवत्क्काथयित्वाविशोषयेत् ॥ ततोमंडुरमादायश्लक्ष्णचूर्णीकृ
तंतथा ॥ हिंगव्ष्टमासकंव्योषंप्रत्येकंमाषकांचत: ॥ धात्र्यापंचपलान्यत्रानिदध्याचूर्णितानितु ॥ पथ्यकपलानिपंचैवशा

केणमधुनोरपि ॥ पाषाणभेदचूर्णं तु यथालाभेन संहरेत् ॥ धान्यजीरकसिद्धेन सर्पिषा प्राग्विमर्द्दयेत् ॥ नवमंडुर — माक्षीकमधा
हेभोजनस्य च कुर्व्वन्नयोजयेत् पातेन शूली शूलं त्रिदोषजं ॥ परिणामकृतं सर्व्वं हन्यादेव न संशयः ॥ अम्लपित्तविकारेषु परिणामकृ
तेषु च ॥ भूषणाख्यमिति ख्यातं भैषज्यममृतोपमं ॥ उनाटकल्पितयंत्र ॥ वृद्धभूषणाख्यमंडूररसः ॥ त्रिफलाकुंडलिभृंगकेशरा
जांटभूषणं ॥ शतावरी श्रावणी च बलाकुलकपर्पटा ॥ भार्गीकिराततिक्तं च निंवमधुकपर्णिका ॥ कषाये भावयेद्देषां मंडू
रवद्रूवार्षिकं ॥ त्रिफलायारसे पूते पचेद्दृढ्रेण ततः ॥ मंडूरेण समं दद्यात्सिता सर्पिः समाक्षिकं ॥ त्रिकटु त्रिफलामुस्तं विडं
गंजाजीचित्रकं ॥ यवानीमधुकं धान्यं चातुर्जातिकपादिकं ॥ भक्षयेत्तु यथाकालमम्लपित्तप्रशत्तमे ॥ अम्लपित्तेभवाये च रोगास्तेषा
मृतोपमः ॥ त्रिफलाद्यमंडूरः ॥ बलाशतावरीमूलं यवैरंडपलद्वयं ॥ प्रत्येकं च समाहृत्य क्षोदयित्वा क्षिपेत्ततः ॥ पंचाशद्वहरीत
क्याः क्वाथयेद्विमलेभसि ॥ प्रस्थद्वये साधयित्वा पादशेषं च तारिते ॥ पलद्वयं साधयित्वा सर्पिषश्च पलद्वयं ॥ गुडस्य द्विपलं दत्वा
पचेत्साद्रतमागते ॥ जीरकस्य पलं चैव पिप्पल्याश्च पलं तथा ॥ चातुर्जातकचूर्णं तु प्रत्येकं दक्षणं क्षिपेत् ॥ एषा वाशालको नाम
मंडूरं हंति दुस्तरं ॥ अम्लपित्तं गुडवीरं शूलं चानिवनद्भवं ॥ वाशालकमंडूरः ॥ त्रिफलाव्योषजंतुघ्नं दन्तिग्रंथिकामृता ॥ कु
ष्ठनेजोवतीमुस्तानलहृद्रह्वानसुरणं ॥ शल्याहानेत्रबलं वीजं भार्गीवगजपिप्पली ॥ शृंगी द्विजीरकधान्यं वृद्धदारकपत्रयो

ठंकुरुणिभद्रदारुक्षारो वलवणानि च ॥ अजमोदा तालमूली विशाला भूनिंबकं वचा ॥ कोशांतकिंफलं चैव वह्निहस्यपत्रगंधके ॥ या
वैत्यतानि चूर्णानि मंडूरं द्विगुणं मतं ॥ गोमूत्रत्रिफलाक्काथनिषिक्तेश्लेक्ष्णाचूर्णितं ॥ कंदोत्कदंशृंगवेरं श्रावणीकेशराजनैः
॥ रसैसवज्रवल्लीजिवं ध्यानालफलस्य च ॥ भावयित्वाततश्चूर्णं गोमूत्रे सप्त रोपचेत् ॥ वज्र्यरोनत्रिफलाक्काथेनादर्वि
लेपनात् ॥ उपयुंतमतिमान्यथादोषंयथावलं ॥ ये च कुक्षिगतारोगाग्रहणीमाड्वादयः ॥ अर्शांसि चग्रहजानि शूलानि
जठराणि च ॥ मेदोदोषामवातेच कफानिलभवाश्चये ॥ व्याधयस्तान्निहंत्येष भास्करस्तिमिरं यथा ॥ अर्शांसि चग्रहजानि शूला
नि जठराणि च ॥ विद्याद्विद्याधरमनामंडूरंसर्वरोगनुत् ॥ ऊल्कटकंद· वनसूरणा· भूनिकं कनकणं· विद्याधरमंडूरः ॥ गग
नद्विपलंचूर्णलोहस्याष्टपलंतथा ॥ लोहकिट्टपलार्द्धं च सर्वमेकत्रसंस्थितं ॥ मंडूकपर्णीविशिरस्तालमूलीरसैःपुनः ॥ व
ल्लाशृंगकेशराजकणामरिचजैरथ ॥ त्रिफलाभद्रमुस्ताभिस्थालीपाकादिचूर्णितं ॥ रसगंधकयोकर्षंप्रत्येकंग्राह्यमेक
तः ॥ तन्मर्दनंशिलाखल्वेपश्चात्कज्जलीकृतं ॥ वचाचव्याघ्रयवानीवजीरकंशरणपुष्पिका ॥ व्योषमुस्ताविडंगंचग्रंथिकेसरमं
जरी ॥ त्रिवृताचित्रकोदंतिसूर्यावर्त्ताश्मभित्तथा ॥ भृंगमाराणककंदश्चकरिकर्णीजटाभया ॥ दंडोत्पलाकेशराजपाकलीकट
फलोपि च ॥ एषामर्द्धशतंग्राह्यंखल्वेघृष्टंसुचूर्णितं ॥ प्रत्येकंत्रिफलायाश्चपलार्द्धपलमेव च ॥ एतत्सर्वंसमालोड्यलोहपात्रेशुभा

क्षेपेत्॥ आतपे दंडसंघृष्टं आर्द्रकस्वरसे त्रिधा॥ ततस्तेन सिलापिष्टां गुटिकां कारयेद्भिषक्॥ बदरास्थिमितां शुष्कां छत्त्रगुप्तां निधाप
येत्॥ तस्मात्प्रभोजनादौ च सेवितं गुटिकात्रयं॥ अम्लोदकानुपानं च हितं तं मधुरवर्जितं॥ उग्रगंधं च नारिकेलं च वर्जनीयं विशेषतः॥
॥ भोज्यं यथेष्टं मिष्टं च वारि भक्तं आम्लकांजिकं॥ हंत्यम्लपित्तं विविधं शूलं च परिणामजं॥ पांडुरोगं च शोथं च शोषोदरगरामयान्
॥ यक्ष्माणं पंचकासांश्च मंदाग्नित्वमरोचकं॥ प्लीहानं श्वाससमानाहमामवातं स्वरामयान्॥ वशीरश्वेतसर्ज्जावर्त्तदंडोत्पलानाग
केशरमरिषशाकविशेषचौराइमेदः॥ विषाध्रवटिकारसः॥ रसस्य कर्षमादाय शालिंचशुरसेन वै॥ खल्वे घर्षयित्वा च सम्प्राहं दश
धाबादशैव च॥ नेपाली च वरं ताम्रं कृतं पत्रं प्रलेपयेत्॥ गंधकस्य विशुद्धस्य पलार्द्धं संग्रहेद्भिषक्॥ सर्ज्जावर्त्तरसेनापि साधयेत्
सप्तवासरं॥ पीतवाशारकलसे भावयेत्सप्तधा पुनः॥ पश्चाद्धि शोष्य संचूर्ण्य पत्रान्यत्र च तथोपरि॥ चूर्णं दत्वा च संस्थाप्य स्था
ल्यां पाकसमं ततः॥ अहोरात्रे गते पाके तस्यां तमुद्धरेत्सुधीः॥ चूर्णयित्वा ततस्ताम्रं पकृष्ठं हं च कारयेत्॥ उच्चटैरीतुवहूरणा
जामात्र जलदस्य च॥ त्रिकटुणां तथा चूर्णं पलमेकं तु दापयेत्॥ पलं च त्रिफलानां च विडंगं कर्षमेव च॥ गुडूच्याः सप्तकर्षं तु
खंडात्सप्तार्द्धपलद्वयं॥ सर्ज्जावर्त्तगुडूचीभ्यां सुरसे हि शरावकं॥ घृतस्य च पलं दत्वा पाचयेन्मंडवह्निना॥ सम्यक् पाकं तु विज्ञा
य ततस्तमवतारयेत्॥ एलाकर्पूरजातीनां यथालाभे फलानि च॥ चूर्णयित्वा विनिक्षिप्य भक्षयेच्च यथाबलं॥ शूलानि वि

षंहंति चाम्लपित्तं विशेषतः ॥ अन्नद्रवापहं रोगं जलस्थितं सुदारुणं ॥ परिणामसमुत्थं च सद्यो निर्मूलतां नयेत् ॥ ताम्रं हंसायनं ह्येतन्मुनिभिः
परिकीर्त्तितं ॥ खंडखाद्यं चूर्णरसः ॥ किद्दमत्तोदकैः पित्तमम्लकं पत्रसंस्थितं ॥ कंदमानास्थिसंहारे शृंगवेरभवैरथः ॥ दशमूलीकंडि
तिवत्तालमूलीसमुद्भवैः ॥ पुटितं साधु यत्नेन शुद्धिमेवमथो व्रजेत् ॥ वशिरं श्वेतवाध्यारं मधुपर्णी मधुलिका ॥ तंडुलीयं च वभ्रुं च द
त्वा दद्याद्भिमे वच ॥ योज्यं सुजीर्णमंह्रे गोमूत्रेणादिनद्वयं ॥ अंतर्वाष्पसुगंधं च तथास्थाप्यं दिनत्रयं ॥ विचूर्णितं शुद्धिरियं लोहकि
हस्य दर्शितं ॥ जयंत्यावर्द्धमानस्य आर्द्रकस्य रसेन वा ॥ वाकस्य वानुपूर्वेण मर्दनं रसशोधनं ॥ गंधकं नवनीताख्यं कुट्टितं लोह
भाजने ॥ त्रिधावंशातपे शुष्कं भृंगराजरसप्लुतं ॥ ततो वह्नौ द्रवीभूते त्वरितं वस्त्रगालितं ॥ यत्ताभृंगरसैः क्षिप्तं पुनः क्षिप्तं विशुद्ध्यति ॥
------ लोहस्य चूर्णं त्रिफलाभवेन चूर्णेन तुल्यं मधुशर्कराभ्यां ॥ लीढं जयेत्तुल्वणमम्लपित्तं दुंनाशमाद्यं ग्रहणीविकारः ॥
त्रिफलालोहः ॥ ॥ इति पित्ताधिकारः ॥ अथ कफः ॥ कर्षकं गंधकं सुद्धं घृतवोलजलैः पिवेत् ॥ कफहं त्वथवा क्षौद्रं पंचवक्त्रोरस
:खलुः ॥ मृतसूतमृतताम्रं हिंगुपुष्करमूलकं ॥ सैंधवं गंधकं तालं कटुकं चूर्णयेसमं ॥ देवदालीपुनर्नवानिर्गुंडिमेघनादयोः ॥
तिक्तकोशातकीद्रावैर्दिनेकं मर्दयेदिनं ॥ माषमात्रं लिहेत्क्षौद्रे रसो मंथानभैरवं ॥ कफरोगप्रशांत्यर्थं निवक्काथं पिवेदनु ॥ मंथानभैर
वरसः ॥ इति कफरोगाधिकारः ॥ अथ रक्तव्याधिः ॥ शुद्धसूतं चतुर्गंधपलयामं विमर्दयेत् ॥ मृतताम्राभ्रलोहानां दरदं च पलं पलं ॥ सु

वर्णीरजतैश्चैवप्रत्येकंदशनिष्ककं ॥ माषैकंमृतवज्रंचतालसत्वपलद्वयं ॥ जंवीरोमत्तवालाभिः स्नुगर्कविषमुष्टिभिः ॥ मर्द्यंहया
रिजद्रावैः प्रत्येकेनदिनंदिनं ॥ एवंसप्तदिनंमर्द्यंतत्गोलंवस्त्रवेष्टितं ॥ वालुकायंत्रगस्वेतैत्रिदिनंलघुवह्निना ॥ आदायचूर्णयेत्सू
क्ष्मंपलैकंयोजयेद्विषं ॥ द्विपलंपिप्पलीचूर्णंमिश्रंसर्वेश्वरोरसः ॥ द्विगुंजोलिह्यतेक्षौद्रैः सुप्तिमंडलकुष्टनुत् ॥ आज्ञानस्फुटितं
त्वपिवातरक्तमपोहन्ति ॥ वाकुचीदेवकाष्ठंचकर्षमात्रंसुचूर्णितं ॥ लिहेदेरंडतैलाक्तमनुपानंसुखावहं ॥ सर्वेश्वररसः ॥ छि
न्नोद्भवाकषायेनसेव्यंशुद्धशिलाजतु ॥ पंचकर्मविशुद्धेनवातरक्तंव्यपोहति ॥ गुडूचीसारसंयुक्तंत्रिकत्रयसमन्वितं ॥ वातरक्तं
निहंत्याशुसर्वरोगहरोह्ययं ॥ शिलाजत्वादि ॥ तालकस्यतुपत्राणियस्यसंतिपृथक्पृथक् ॥ अभ्रकस्यैवतत्तुल्यंहरितालं
विचक्षणैः ॥ पुनर्नवायास्वरसेनतालकंमर्द्दयेत्ततः ॥ दिनमेकंततस्मिन्यनत्व– गमितेसति ॥ कुर्वीतवर्त्तिकांतांतुशोषयेत्सम्यगा
तपे ॥ पुनर्नवासमस्तांगक्षारैस्थालिंगलावधि ॥ पूरयेक्षारदृढंयेत्पीडयेत्पीडनेनहि ॥ क्षारस्यपलितांसम्यग्दद्यात्तालकवर्त्ति
कां ॥ ततःआच्छादनंदत्वामुद्रांकृत्वाविशोषयेत् ॥ स्थालीचूल्यांनिधायाग्निंमदंज्वालालयेद्विपक् ॥ निरंतरमहोरात्रंपंचकंते
नसिद्ध्यति ॥ स्वांगशीतसमुत्तार्यगृह्णीयाद्रसमुत्तमं ॥ तारकेश्वरनामायंरसोगुंजामितोसितः ॥ गुडूच्यादिकषायेनगदान्येतान्वि
नाशयेत् ॥ सोपद्रवंवातरक्तंकुष्टान्यष्टादशानिच ॥ फिरंगदेशजंलोकेजंतोर्हरतिदुस्तरं ॥ विसर्पमंडलंकुष्टंपामाविस्फोटकंत

था॥ वातरक्तकृतान्रोगानन्यानपिविनाशयेत्॥ एतद्भेषजसेवितुलवणाम्लौविवर्जयेत्॥ तथाकटुरसंवह्निमातपंहरतस्त्यजेत्॥ लवणंचपरित्यक्तुंनशक्नोतिकथंचन॥ सतुसैंधवमश्रियामधुरोहिरसोहिस॥ तालेश्वररसः॥ पलंरसस्यचत्वारिवलेद्वादशमुष्टिभिः॥ ताम्रस्यचक्रिकादेयासस्यार्द्धशरावके॥ दत्वानिरुध्यातद्भांडेपूरयेभस्मनादृढं॥ अग्निप्रज्वालयेद्यामंद्वयंशितंविचूर्णयेत्॥ पुटेद्वादशसूर्यस्यदुग्धेनालोडितंपुनः॥ वरापावकनिर्गुंडीद्रवैस्त्रिस्त्रिविभावयेत्॥ अयमर्केश्वरोवातरक्तमंडलकुष्ठजित्॥ गुंजाद्वंद्वंददीतस्यलवणादिविवर्जयेत्॥ अर्केश्वररसः॥ भूनिंबामरदारुसैंधववचाव्योषभकृष्णाशठीविश्वाग्नित्रिफलाविडंगचविकादार्वीत्रिभंडिविषा॥ अक्षग्रंथिकताप्यधान्यरजनीक्षारद्वयंभोद्भवंकर्षांशेकुडवोपुरस्यतुस्मृतंमुष्टिद्वयंवायसः॥ प्रस्थार्द्धंत्रिशिलाह्वयस्यकुडवमत्स्यंडिकायापलंभृंगेलादलकेशरस्यचपलंवांस्याघृतेनाविते॥ प्राप्रोयंगुटिकाप्रशाद्यशशितांचंद्रप्रभासंज्ञकंहंत्यर्शःक्षयकुष्ठमेहजठरप्लीहाग्निसादज्वरान्॥ मूत्राघातविसूचिकागलशिरकर्णाक्षिरोगाव्रणान्श्वासानाहभगंदरारुचिवमिहृद्दीभ्रमीपांडुता॥ दद्रुकुष्ठहलीमकक्रिमिगदोन्मादामवातादिकान्॥ धात्वंतर्गतवातरोगनिचयान्शुक्रस्यशीघ्रद्रवं॥ वातासृक्पवनार्तिसंगतिमिरानाहाश्मरीपीनसान्मूर्च्छाक्षेपकशोथदाहधमनीस्तृष्णाम्लपित्तारतिः॥ स्थूलंस्थूलतरंकृशंसमतनुंस्थूलंसमंसेविता॥ कुर्याच्चंद्रसमंनरंदृढतनुंजीर्णावलीवालितान्॥ अपरचंद्रप्रभावटिका॥ लांगल्यास्त्वमृतासत्वंकंदकु

ड्व त्यय त्नतः॥ योजयेत्रिफलालौहरजस्त्रिकटुकैः समैः॥ गुग्गुल्वमृतवह्नीभिः द्राक्षालिंगरसादिभिः॥ त्रिफलायारसैर्घृष्टैगुडि
काकोलसम्मिता॥ भक्षयेमधुनालोड्यश्वग्णुकर्वंमियस्फले॥ पादस्फुटवडुर्भग्नजानुप्राप्तं वयद्भवेत्॥ यत्र देहाभवं स्क्रपञ्चा
साध्यं प्रकीर्तितः॥ घृतेनाभक्षमाणस्य प्रवलेवातशोणिते॥ लांगलीगुटिः॥ ॥इति वातरक्ताधिकारः॥ अथामवातः॥ प्रक्षिप्य
गंधं रसतुल्यभागं कलाप्रमाणांच्चविषं समस्तात्॥ कृशानुतोयेन च भावयित्वा वह्न्दंदीनाममरुत्प्रशांत्यै॥ अपस्मृतौ तथोन्मादे स
र्वांगव्यथनेपि च॥ देयोयं वल्लमात्रेण सर्ववातनिवृत्तये॥ पवननाशनरसः॥ एरंडमूलंत्रिफलागोमूत्रंचित्रकंविषं॥ गुंजेकं घृतनसंप्र
क्तां सर्वान्वातान्विनाशयेत्॥ आमवातारि॥ वृद्धदारुनहृद्धंतीकरिकर्णाग्निमानकैः॥ त्रिकत्रकसमायुक्तं मामवातांतकंत्वयं॥ स
र्वान्येषामदाहंतिकेशरिकरिणांयथा॥ वृद्धदार्व्यादिलोहं॥ यासावृद्धदारुवासासेयव्याघ्रीयुग्मलोत्रा॥ पथ्यावरीविदारिश्रेष्ठापंचोप
राश्वरद्धिक्रा॥ घोघाहरेगुप्तिक्राहस्तिकर्णामोदकीमुंडी॥ शम्याकगोक्षुरशठीवेल्लरिवीरानृहृद्धिशारवाश्वा॥ दीप्यहयामयमहा
पंचोग्रिछागगंधाचदंतिजोंगकंभृंगीवीरनहत्वकिराततगजकर्णा॥ जातीपत्रफलैलानागश्रीमंज्ञवेत्याति॥ पार्थाविषाविषाणीक्षि
धुजकैर्दुर्यवानरीकृधिरं॥ मंदारमूलकनकक्षिरीविशालानिशायुशली॥ पौष्करमार्गसमैतैरेतैस्तुल्यारसादिराभाव॥ पक्कः षड
षगाश्वनेत्रिपुरररनेर्गुनसरसैः॥ वल्लिहिंगुलाभ्रमूलैस्संकरणंवंगाहितायलोहेश्वा॥ भुजामृतांगुपातैः क्षिपे – पादोन्मितैरेतैडुस्य

शीमुस्तादेवदारु वासकसहचरकंटकारिबृहती ॥ धान्यकं· वचामार्गी· शतावरि· विदारि· त्रिफला· पिप्पली ग्रंथिचविका· चित्रक· शुंठी गोक्षुर· गुडूची शतपुष्पा हरेणु· कटुका· गजकरणा· जीगिणि· मुंडी· नपद्रुम· गोक्षुर· शटी· भद्रदारु काकोली लवृन्तापुनर्नवा· अश्वगंधा· दीप्यक· अजमोदायवानी च ॥ कुष्ठ· बृहत्पंचमूल अजगंधा· दंती· कृष्णागरु· कर्कटाशृंगी वीरतरु त्वक। किराततिक्त· पलाश· जातीपत्री· जातीफल शुक्ष्मेला· नागकेशर लवंग विडंग मूर्य्य भल्ला· अतिविषा· मेषशृंगी सैन्धव कुटज· मर्कटी· कुंकुम· अर्कमूल स्वर्णक्षीरि इन्द्रिवारुणि हरिद्रा श्वेतमूशली· पौष्करमूल· अपामार्ग एते सर्वे समभागा रास्नादि विधव— स्थ चूर्णं कृत्वा पुनः षड्गुण कषायेन गुग्गुल पल विंशति भावयेत् वस्त्रपूतं कृत्वा गो घृत पले २० मर्दयित्वा पाकं कृत्वा चूर्णं क्षिपेत् पुनर्वलि कर्ष२ लोह कर्ष२ अमृत कर्ष२ मिश्रयित्वा गुटिकां चरेत् ॥ हिंगुल स्थाने· पारद पर्ठति कृत्वा क्षिकां गुटिकासेव्याः सक्षौद्र सर्पिषा तु दिने ॥ धातुप्रविष्टवातान्रूपस्नायुस्थिसंधिस्थान् ॥ जानुरुत्रिककुक्षिस्तोत्रशिर· पृष्ठवंशस्थान् ॥ मंन्या ललाटशंखभ्रूहनुसंस्था प्रमेहाश्च ॥ आधानाश्मपुराणज्वरपांडुप्लीहगुल्मशूलानि ॥ यक्ष्माग्निमांद्यवातश्लेष्मकृतार्त्तीरनेकविधा ॥ जित्वा रसायनगुणा कुर्युर्वर्षोद्यतान्मनामखिलान् ॥ उक्तीतिभिः साधुनिरूपितो ययमाङ्गराशाखंडशीतिसंज्ञा ॥ षडशीतिगुग्गुलु रसगंधकलोहाभ्रकमूर्त्थटंकणांसैन्धवान् समभागे विचूर्णाथ चूर्णद्विगुणगुग्गुलु ॥ गुग्गुलोः पारदं देयं

॥ राम: ॥
॥ १७१ ॥

त्रिफलाचूर्णमुत्तमं ॥ तत्समंचित्रकस्याथघृतेनवटिकांकुरु ॥ खादन्माषद्वयंचैवंत्रिफलाजलयोगतः ॥ आमवातारिवटिका पाचिकाभेदिकाततः ॥ आमवातंनिहंत्याशुगुल्मशूलोदराणिच ॥ यकृत्प्लीहानमष्ठिलाकामलापांडुतांतथा ॥ हलीमकाम्लपित्तंचश्वयथुंप्लीहवृद्धैः ॥ ग्रंथिशूलशिरःशूलःगृध्रसिवातरोगहा ॥ गलगंडगंडमालाकृमिकुष्टविनाशिनी ॥ विड्ग्धगर्दभानाहचोदरव्याधिनाशिनी ॥ आमवातहरीगुटिका ॥ ॥ इत्यामवाताधिकारः ॥ अथशूलः ॥ विडंगमुस्तात्रिफलागुडूचीदंतिनृचित्रकदुनिचैव ॥ प्रत्येकमेषांपिचुभागचूर्णंपलानिचत्वार्ययसोमलस्यात् ॥ गोमूत्रसिद्धस्यपुराणनस्यकिंवास्यदेयानिवराटिकायाः ॥ कृत्वाप्रचूर्णस्यपलेविशुद्धंनिश्चंडकंश्लक्ष्णमतीवसूतान्नृपादेनकर्षस्वरसेनखल्वेशिलाजलेमन्मनोदलस्य ॥ संशोष्यपश्चाददितिशुद्धगंधपाषाणचूर्णेनपिचून्मितेन ॥ युक्त्याततःपूर्वरजांसिदत्वासर्पिर्मधुभ्यांसममर्द्ययंत्रात् ॥ निधापयेत्स्निग्धविशुद्धभांडेततःप्रयोज्यास्यरसायनस्य ॥ प्राग्ग्रासकोद्वावथवात्रयोवाशिशिरंजलंवा ॥ पिवेदनुयोगवरंप्रभूतंकालप्रनष्टानलदीपकेषु ॥ योगोनिहंत्यास्यपरिणामशूलेशूलेतथानद्रवसंज्ञकंच ॥ यक्ष्माम्लपित्तंग्रहणीप्रवृद्धाजीर्णज्वरंलोहितपिप्लकुष्ठंनश्यंतितेयान्ननिहंतिरोगान्योगोत्तमःसम्यगुपास्यमानः ॥ विद्याधराभ्रं ॥ पथ्यलोहरजशुंठीनचूर्णंमधुसर्पिषा ॥ परिणामरुजाहंतिवातपित्तकफान्वितां ॥ पथ्यादिलोह ॥ कृत्वाभयालोहचूर्णंलिह्येन्मधुसर्पिषा ॥ परिणामभवंशू

लं सर्वं हन्ति त्रिदोषजं ॥ आमवातभवं शूलं स्थौल्यं चैवापकर्षति ॥ कृष्णाभ्रलोहं ॥ कृष्णाभ्रलोहमलशुद्धविडंगचूर्णं प्रत्येकमेक
पलिकं विधिवद्विधाय ॥ वंध्यं कटुत्रयफलत्रयकेशराजं दंतीपयोदचपलानलखंडकर्णी ॥ मानोल्वशुल्वशुक्रबृहतीन
हृतामसूर्णवर्णाग्निनर्निविकयासहितेत्नमिषीम् लंप्रतिप्रतिसुशोधितपक्षमेकं चूर्णेन दर्धरसगंधकमेकसंख्यं ॥ कृत्वाड्र
कीरससंवलितं वभूय: संपिष्यतस्य विधिवत्कुटिका कृतामा ॥ हन्त्यम्लपित्तमरुचिग्रहणीमसाध्यां पांडुनीमकामलभगं
दरशोषशोथान् ॥ शूल्यं च पाकजनितं तमसंततं च मदं सद्यः करोत्यपचितं चिरमंतराग्निं कृष्णा निहंति पलितं च वलिं प्रवृ
द्धां श्वासं च काशमपि पांडुगदान्निहन्यात् ॥ वार्यन्नमाषदधिकांजिकमत्स्यतक्रं वृक्षाम्लतैलपरिपक्वभोजोयथेष्टं ॥ शृंगा
टविल्वगुडकं चटनारिकेलं इन्धानि सर्वविदलं कदलीफलं च ॥ व्यायाममैथुनपरिश्रमवह्नितापतप्तान्नपानपनसादि
विवर्जयेत्तु आर्द्रकसकलमन्नपानीयवान्नुपेयं ॥ मध्यपानीयमक्तगुटिका व्योमपारदगंधाश्मजयपालकटंकणात् ॥ व
ह्निवचशसिद्धित्रिभागाज्जंभांभसात्र्यहं ॥ पिष्ट्वाकोलमिता कृत्वात्तु कांजिकेनो वटी ॥ विनतरे दामशूलादौ कृमिशूले
विशेषत: ॥ पथ्यं तक्रोदनं चात्र स्तंभार्थे शीतलां क्रिया ॥ पिडारिरस: ॥ चिंचाक्षारं पलं पटुव्रजपलं निंबुजले कल्कीतं तस्मिन्कंबुरवप
लं प्रतप्तमसकृत्त्रिर्वापशीर्णावधि: ॥ हिंगुव्योषपलं रसामृतवलीन्निक्षिप्यनिष्कांशकात्वन्हाशंखवटी क्षयग्रहणीरुकपंक्ति

शूलादिषु॥ शंखवटीसमं ताम्रदलं लिप्त्वा रसेंद्रेण द्विगंधकं॥ मृद्वस्त्रेन समावेष्ट्य पटुयन्त्रे पुटं ददेत्॥ संचूर्ण्य हेमवातारिवि-
त्रकव्योषजैर्द्वैः षोडशांशं विषं दत्वा चूर्णयित्वास्य वलकं॥ प्रातर्क्रैरनुपानैश्च सद्योगतं च वातजं॥ कफजं पक्तिशूलं च ह
न्याच्छ्रीशिवशासनात्॥ शूलकुंठाररसः॥ रसगंधकयोः कृत्वा कज्जलीभांडमध्यगं॥ तत्रास्य वदनं ताम्रपात्रीसंरोध्यशो
षयेत्॥ पादांगुष्ठप्रमाणेन चूल्यां दाहेन तं दहेत्॥ याममध्यं ततः संस्थं रसपात्रं समाहरेत्॥ संचूर्ण्य गुंजायुगलं त्रितयं
वा विचक्षणा॥ तांबूलीदलयोगेन दद्यात्सर्वज्वरेषु च॥ जीरसैंधवसंलिप्त्वा वक्त्राय ज्वररोगिणे॥ अस्य स्वप्नाहृतत्स्यात्र
यामार्द्धाद्विज्वराकृतिः॥ श्वेतेनोगमो भवत्येव देवि सर्वेषु माप्यसु॥ चतुर्थकादि विषमान्नवमागामिनज्वरं॥ साधारणान्निपातं
जयेवनसंशयः॥ ज्वरशूलहररसः॥ शुद्धसूतविधागंधं यामैकं मर्दयेद्दृढं॥ द्वयोस्तुल्यं शुद्धताम्रं संपुटं तत्तिरोधयेत्॥
उर्द्धाधो गंधकं दत्वा मृद्भांडे धारयेद्भिषक्॥ ततो गजपुटे पक्त्वा स्वांगशीतं समुद्धरेत्॥ संपुटं चूर्णयेत्सूक्ष्मं पर्ण
खंडे द्विगुंजकं॥ भक्षयेत्सर्वशूलार्तो हिंगुशुंठीसुजीरकं॥ वचामरिचजं चूर्णं कषमुष्णजलं पिबेत्॥ असाध्यं साधयेत्
शूलं रसस्यात् शूलकेशरि॥ शूलगजकेशरीरसः॥ अभ्रं ताम्ररसं लोहं प्रत्येकं संस्कृतं पलं॥ सर्वमेतत्समाहृत्य गन्धीया
कुशलो भिषक्॥ आज्येपलद्वादशके दुग्धे वत्सरसंख्यके॥ पक्रान्तत्र क्षिपेच्चूर्णं संपुटं घनतांनुना॥ विडंगत्रिफलावह्नित्रि

कटुतैलं तथैव च ॥ पिष्ट्वा पलोन्मितानेतान्यथा समिश्रितान्यसेत् ॥ ततः पिंडिं शुभं भांडे स्थापयेत्तं विचक्षणः ॥ आत्मनः शोभने वा
ह्निप्रजपित्वारविंशत्यहम् ॥ घृतेन मधुना मद्य भक्षयेन्माषकादिकं ॥ अष्टौ माषा क्रमेणैव वर्द्धयेत्तु समाहितः ॥ अवपानं तु दु
ग्धेन नारिकेलोदकेन वा ॥ जीर्णे लोहित शाल्यन्नं दुग्धमांसरसादयः ॥ रसायनं विरुद्धानि अन्यान्यपि च कारयेत् ॥ हृत्
शूलं पार्श्वशूलं च आमवातं कटिग्रहं ॥ गुल्मशूलं शिरःशूलं यकृत्प्लीहो विशेषतः ॥ अग्निमांद्यं क्षयं कुष्टं कास श्वासं विच
र्चिकां ॥ अश्मरी मूत्रकृच्छ्रं च योगेनानेन नाशयेत् ॥ चतुःसमे लोहः ॥ त्रिकत्रयसमायुक्तं तालमूली शतावरी ॥ योगा
द्विहन्ति शूलानि दारुणान्यरसोरजः ॥ त्रिकत्रयादि लोह ॥ मूत्रांतपोविनाशघ्नं लोहं चूर्णसमन्वितं ॥ सगुडामभयाम
श्नात्सर्वशूलप्रशांतये ॥ लोहाभया ॥ त्रिफलाया त्वथो धात्र्याश्चूर्णं वा कान्तलोहजं ॥ शर्कराचूर्णसंयुक्तं सर्वशूलेषु ले
हयेत् ॥ अस्मिन्प्रयोगे आमलक्या भागद्वयं शर्करा लोह ॥ तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम् ॥ प्रयोज्यं मधुस
र्पिभ्यां सर्वशूलनिवारणं ॥ त्रिफलालोह ॥ पलानि त्रीणि शंबूकं लोहचूर्णपलद्वयं ॥ रसांजनात्पलं चैकं लोहसिंहान
कं पलं ॥ सर्वैः समं शर्करा एवं मधुना च परिप्लुतं ॥ सर्वमेतत्समाहृत्य मोदकान्कारयेद्भिषक् ॥ तान्भक्षयेत्प्रयत्नेन शूलेषु
ल्मेहृद्दामये ॥ विशेषतः पक्तिशूले शोथे पाण्डूदरे भ्रमे ॥ दुर्नाम्निकासकृच्छ्रे च प्रमेहाश्मरिहृद्विषु ॥ अग्निमांद्य स्मृतिभ्रंशे

पीनसोर्द्धवभेदके शंवूकादिवटि ॥ शुद्धसूतं विषं गंधं प्रत्येकं पलमात्रकं ॥ मरिचं पिप्पली शुंठी हिंगुपथ्यकपलद्वयं ॥ पला
र्द्धं पंचलवणांचिंचाक्षारपलाष्टकं ॥ सप्तवारं दग्धसंखं जंवीराम्ले नखेचयेत् ॥ पलाष्टकं च संयोज्यं तत्सर्वं त्रिकडूवैः ॥ दि
नमर्द्यं कोलमात्रं भक्षयेत्सर्वशूलनुत् ॥ शूलदावानलो नाम्ना शूलरोगनिकृंतनं ॥ शूलदावानलप्रतापलंकेश्वररसः ॥
॥ ॥ त्रिफलालोहचूर्णं च यष्टिमधुकमेव च ॥ मधुसर्पिर्युतं लिह्याच्छूलं हंति त्रिदोषजं ॥ त्रिफलाद्यं लोह ॥ अक्षामलक
शिवानां स्वरसे पक्वं लोहजरजः ॥ सगुडं च घृतयुक्तं वती शूलीत्रिदोषजं शूलं ॥ त्रिफलालोहः ॥ धात्रीचूर्णस्याष्टौ प
लानि चत्वारि लोहस्य ॥ यष्टिमधुकरजश्चार्द्धि पलदग्धान्यते घृष्टअमलाक्काथेनैन चूर्णंभाव्यं तु सप्ताहं ॥ वंज्ञातपेसु शुष्का
हं पिष्ठा नवे घटे स्थाप्यं ॥ घृतमधुनासंयुक्तं भक्ष्यादौ मध्यतोन्तश्च ॥ जीर्णेपि वाराखादेपथ्यं दोषाववंधेन ॥ भक्तस्यादौ समयति
दोषान्पित्तानिलोद्भवान् ॥ मध्ये नेविष्टंभं जयति वन्हणां विदह्यते वात्रं ॥ पानान्नकृतान्दोषान्भुक्तान्तेषादिकं जयति ॥ ए
वं जीर्यति चात्रे शूलानि नराणां सुकष्टमपि ॥ हरति च सहसा भुक्तो योगश्चायं जरत्पित्तं चतुष्ठं पक्तिनं तत्रं कफपित्तसमुद्भवान्
रोगान् ॥ प्रासादं दधतीवरक्तंपांडुत्वं च कामलां जयति ॥ धात्रीलोहः ॥ नहनाचित्रकं मुस्तं त्रिफलात्र्यूषणां तथा ॥ एकैकस्य
समोभागस्तदर्द्धसमगंधयोः ॥ लोहाभ्रकविडंगानां भागानद्विगुणो भवेत् ॥ एतत्सकलचूर्णं तु मिश्रयित्वा विचक्षणः ॥

॥ सात्म्यद· ॥
॥ १७४ ॥

त्रिफलापाकषायेणगुठिकांकारयेभिषक् ॥ तद्वैकांभक्षयेत्प्रातर्भक्तंवारिपिवेदनु ॥ पंक्तिशूलात्रिदोषोत्थंमम्लपित्तंवमिज्व
र ॥ हृल्लासंपार्श्वशूलंचवस्तिशूलंगुदेरुजं ॥ कासंश्वासंतथाकुक्षिग्रहणीचविनाशयेत् ॥ यक्तिप्लीहोदरंचैवराजयक्ष्माज्व
रापहं ॥ भक्तवारिगुटिका ॥ समुद्रसैन्धवंक्षारोरुचकंरोमकंविडं ॥ दंतीलोहरजकीट्टंहृत्कूररांकंसमं ॥ दधिगोमूत्रपयसामं
दपावकपाचिते ॥ तद्यथाग्निवलंचूर्णंपिवेदुष्णेनवारिणा ॥ जीर्णेजीर्णान्नभूंजीतमांदिकेनसाधितं ॥ नाभिशूलंयकृच्छूलं
गुल्मप्लीहकृतंचयत् ॥ विड्वंधाष्ठीलजंहंतिकफवातोभवंतथा ॥ अन्नद्रवजरत्पित्तंमजीर्णग्रहणी – दं ॥ शूलानामपि
सर्वेषामौषधनास्त्यनत्परं ॥ परिणामसमुत्थस्यविशेषेणांतकृत्स्मृतं ॥ अत्रदध्यादीनांप्रत्येकंचूर्णचातुर्गुणंदेयं ॥ सा
मुद्राद्यंलोहं ॥ लोहस्यरजसोभागास्त्रिफलायास्त्रयस्तथा ॥ गुडस्याष्टौतथाभागागुडान्मूत्रंचतुर्गुणं ॥ एतत्सर्वंचविप
चेगुडपाकविधानवित् ॥ लिहेत्स्वेनयथाशक्तिशूलेवान्नपरिक्षये ॥ लोहगुटिका ॥ भस्मसूतस्यरोप्यस्यपलमेकंपृथक्
पृथक् ॥ ताम्रभस्मपलेद्वेतुगंधकस्यपलद्वयं ॥ हरितालस्यकर्षार्द्धंविमलोहेममाक्षिकं ॥ पलार्द्धंहरिणीकंदपला
र्द्धंनागवंककौ ॥ चतुःपलंचटकनामेतत्सर्वंविचूर्णयेत् ॥ मृधात्रीस्वरसेनैवभावयेत्सप्तधाभिषक् ॥ तथादंतीरसेने
ववत्त्रमार्दकवारिणा ॥ तेनकोष्ठविशुद्धेतुदधिभक्तंचभोजयेत् ॥ सर्वशूलहरोह्ययस्मादसमशूलांतकोरस ॥ शूलांतको

॥ राम: ॥
॥ १७४ ॥

रसः॥ तालंताप्यंगगनकनटि ताम्रगंधारसंतैस्तुल्यांशैस्तैररुतमधुरंदीप्यकंसर्वतुल्यं॥ एतैःसर्वैस्त्रिकटुकसमंकज्ज
रीकृत्यसर्वंहिंगुभामिस्रनिमि तद्दिनंभावयेत्सप्तकृत्व॥ जयन्याकाकमाचीश्वनिर्गुंड्याश्चार्द्रकस्यच॥ स्वरसैर्भावयेद्वि
ह्वासकृदेवदिनेदिने॥ कर्त्तव्यामरिचस्थूलाछायाशुष्कांचगोलिकां॥ पंचाख्यतानंसुवर्णमाक्षिकअभ्रकं॥ मनःशिलाता
म्र·गंध· कांश्यसूते·प्रत्येकंकर्ष १ तामाद्यसूतपर्यंतसर्वसंचूर्ण्यपुनांश्चित्रकजीवकः यवानिकायांचूर्णकर्ष ८ व्योषचू
र्णंचकर्ष १६ सर्वमेलयित्वाहिंगुजलेनसप्तदिनंभावयित्वा·पुनजयन्याकाकमाच्यानिर्गुंड्याआर्द्रकस्यस्वरसैः प्रत्येकंप्रति
दिनंभावयित्वामरिचाभांगुटिकांछायांशुष्कांकारयेत॥ अनुपानेतुरोगानुरूपं॥ हंत्येषावडवानलाख्यगुटिकासंसेवितोष्णांबुना
सर्वंशूलगदंकृमिंचसकलान्वैषम्यवह्निंक्षुधांमंदाग्निग्रहणीगदस्वस्वयथंहत्यांडुगुल्मांशसावातश्लेष्मनथोदरंवड्रुजंश्वा
संचकासंज्वरं॥ वडवानलोरसः॥ रसगंधकयोःकृत्वाकज्जलीतुल्यभागयोः॥ पादांशममृतंदत्वाताम्रभस्मसमांशकं॥ हं
सपादीरसैःसम्यक्मर्दयित्वादिनत्रयं॥ ततस्तद्गोलकंकृत्वापरिशोष्यखरातपे॥ निरोध्यवालुकायंत्रेक्रमवृद्धेनवह्निना॥
पचेदेकमहोरात्रंततःशीतंविचूर्णितं॥ तुल्यांशंखमृतंदत्वामर्दयेदार्द्रकद्रवैः॥ विलिप्यस्थालीमध्येततोन्यस्थालिको
दरं॥ पलाष्टममृतंभिन्नारसस्थालीचतन्मुखे॥ तुल्यंदत्वादृढंरुध्वाचुल्यामारोप्ययत्नतः॥ यामंप्रज्वालयेदग्निविचूर्ण्य

॥ साम्पद ॥
॥ ७५ ॥

तदनंतरं ॥ करंडके विनिक्षिप्य स्थापयेद् नियतात्मत: ॥ हन्याद त्यग्निमांद्यं ज्वरहरमखिलं वातजातक्षयार्तिशोफाद्यपांडुरोगं
कफजनितगदाप्लीहगुल्माग्रदार्ति: ॥ सर्वाजीर्णं च शूलं जठरभवरुजं षंडत्तापांडुरत्वं सर्वासाध्यांश्च रोगा हरिरिवदुरितं
रक्तगुल्मं वधूनां ॥ अग्निकुमारो रस: ॥ रसेनतताम्रस्यदलानि ताम्रस्य च वातशूले ॥ शूलहरो रस: ॥ सूतं गंधसमं शूल्वं सू
तांशं मृतताम्रकं ॥ सुवर्चलवसूनां च जंबीरे मर्दयेदिने: ॥ मर्दयेदातपे तीव्रे हृधालघुपत्रत्रयं ॥ दत्वादायतु चूर्णं सूतं
शंत्रिकटुं क्षिपेत् ॥ षण्मुखोयं रसोनाम्नात्रिगुंजा सर्वशूलजित् ॥ एरंडतैलषड्भागं लसुनस्य दशांशकं ॥ एकं हिंगुत्रिसिं
धूत्थं सर्वमेकत्र मर्दयेत् ॥ त्रिनिष्कं भक्षयेद्वातआमशूलप्रशांतये ॥ षण्मुखो रस ॥ रसविषगंधककपर्दक्षारोषरासिपि
प्पलीविश्वै: ॥ अहिव – वुनिघृष्टै: शूलहरिमहिंगुंज्ञेयं ॥ शूलगजकेशरिरस ॥ रसवलिगगनार्कवेतसाम्लंविषस्यात्
सममितिपथगेनभावयेत् · घस्रमेतै: ॥ कनकभुजवह्नीकंटकारिजयाद्भि: कमलसरिलवासामुण्डिराशृंगवनीरै: ॥ अ
हृगणसदृशशाकैर्मीत्वात्वावयो ज्यपटुगणरसवत्या भावयेद्वार्द्रकाद्भि: ॥ दहनवदनसंज्ञो वल्लमात्रो निहंति प्रबलप
वनशूलं नाडिकाराश्च सर्वान् ॥ अग्निमुखो रस: ॥ शंखसप्तदिनानि निंबुकरसे निर्वाप्य तत्पूलंहं हंति तिमिरामशमन: पल
मतसार्द्धं च सौवर्चलान् ॥ सिंधुत्थाच पलसमुद्रलवणं कांचनाहिंग्वैकनागयाना त्रिकटोनवहिगुणितात्रा एतद्भियायो

॥ एम: ॥
॥ १७५ ॥

जयेत्॥ अहोरात्रमथगंधयोमिलितयोगद्याणकापारदावत्वारो ३ विषस्यपंचकथिताकोलास्थिमात्रांकृत्वा॥ शंखपल १ निंबुरसेस
प्तवारंतप्तंतप्तंक्षिपेत्॥ चिंचाभस्मपल २ सौवर्चलकर्ष ६ सैन्धवपल १ सामुद्रकर्ष ३ काचलवणकर्ष २ विडकर्ष १ त्रिकटुगद्या
णा १८ हिंगुगद्याणा ८ रसगद्याणा ८ गंधकगद्याणा ८ विषगद्याणा ५ सर्वंसंमर्द्यकोलास्थिमात्रावटीकृत्वाभक्षयेत्॥ एषांसस्ववटी
निहंत्यपवनंशूलानामजीर्णामयंमंदाग्नित्वमरोचकंप्रशमयेन्मूत्रस्यकृच्छ्राण्यपि॥ अपराशंखवटी॥ चिंचाक्षारस्नुहिक्षारअर्क
क्षारपलंपलं॥ द्विपलंशंखभस्मस्याद्रामठंगचपलार्द्धकं॥ गंधकंचपलार्द्धंचत्रिकटोपलमेवच॥ चित्रकंधनदक्षंचद्वयोरे
कपलंस्मृतः॥ अमृतंपारदंचैवप्रत्येकंकर्षमेवच॥ लवणानिचसर्वाणिपलमात्रंप्रयोजयेत्॥ जंबीरैमातुलुंगाद्येएलना
लैर्दिनत्रये॥ भृंगराजंचनिर्गुंडीमुंडीचैवपृथक्पृथक्॥ आर्द्रकस्वरसेनैवप्रत्येकंदिनमर्दितं॥ बदरीबीजमात्रंतुवटिकां
कारयेद्भिषक्॥ एकैकंभक्षयेत्प्रातःपंचगुल्मान्व्यपोहति॥ पांक्तिशूलंनिहन्त्याशुअजीर्णंचविसूचिकान्॥ मंदाग्निंनाशयेत्
शीघ्रंपथ्येनैलंविवर्जयेत्॥ चिंचाशंखवटीनामसर्वरोगहरंपरम्॥ धनदासंडवेर्गसं॥ शंखवटी॥ दंतीबीजमकल्मषंसद
हनंशुंठीलवंगंसमंगंधपारदटंकणंचमरिचंश्रीहृद्रदारंविषं॥ खल्वेदंडयुगंविमर्द्यविधिनादंतिद्रवैर्भावनादेयापंचदशात्रिंव
कजैलैस्तुधात्रिधाचित्रकैः॥ त्रेधाचार्द्रकजैरसैःशुभधियासप्तैवचावेशिनः॥ पश्चात्कुककलायसंमितवटिकार्याभिषक्संमना॥

द्बोधप्रकरी त्रिशूलशमनी जीर्णज्वरध्वंसिनी ॥ काशारोचकपांडुनोदरगरस्तोमामगवाशिनी ॥ वस्त्याटोपहलीमकामयहरी मंदा
ग्निसंदीपनि: ॥ सिद्धेयंतु महोदधी प्रकथिना सर्वामयघ्नी सदा ॥ इति महोदधिरसः ॥ कोलग्रंथिकशृंगवेरचपलाक्षारैः समं
चूर्णितं मंडुरं सुरभीजले ष्टगुणे पक्त्वाथ साद्रीकृतं ॥ ततवांदेदशनादिविमध्यवितैनौ प्रायेन दुग्धान्नभुक् ॥ जेतुं वातकफा
मयान्परिगतौ शूलं हि शूलानिवं कोलादिमंडूरः ॥ शतावरीरसः प्रस्थप्रस्थं च सुरभिजलै ॥ अजायाः पयसः प्रस्थप्रस्थं ध
त्रीरसस्य च ॥ लोहकिट्ट पलान्यष्टौ शर्करायास्तु षोडशः ॥ दत्वाज्यं चैव विपचेन्मृदग्निना शनैः शनैः ॥ सिद्धे शीते घनीभूते चू
र्णानिमानि दापयेत् ॥ विडंगत्रिफलाव्योषयवानीगजपिप्पली ॥ द्विजीरकघनानां च श्लेक्ष्णाणां न्यक्षसमानि च ॥ भक्षेदग्नी
बलापेक्षी भोजनादौ विचक्षणः ॥ निहंति पंक्तिशूलं वापित्तगुल्मं विशेषतः ॥ रक्तपित्तादिदाहं च पांडुरोगं हलीमकं ॥ शर्क
रामंडूरः ॥ विधिवच्छुद्धमंडुरचूर्णप्रस्थसमन्वितं ॥ द्विप्रस्थशर्करायास्तु षट्पलानि घृतात्तथा ॥ वज्रीरसाढमतुलाधा
त्र्यारसेन तुलार्द्धकं ॥ एकीकृत्य पचेद्दैते यावतान्नतुली भवेत् ॥ त्रिफलायाय पक्वचूर्णं कुडवं तत्र निक्षिपेत् ॥ व्योषं त्रिलव
णं कुष्ठं तु बृहन्निवनीपकं ॥ द्विजीरकं विडंगानि चातुर्जातकमेव च ॥ एषां चूर्णीकृतानां च भागं पलमितं पृथक् ॥ पलान्य
ष्टौ शिवाचूर्णान्कुडवं च यवाग्रजात् ॥ पलं पलं कणामूलं चव्यचित्रकमूलतः ॥ उत्तार्य शीतमाक्षिकस्तत्र त्रिपलसंमितं

रवादेदग्निवलाक्षिभोजनेनचविशेषतः ॥ शूलंसर्वाङ्गवंहन्तिपंक्तिशूलंविशेषतः ॥ रक्तपित्तांगदाहंचअम्लपित्तंचनाशयेत् ॥ हृच्छूले
पार्श्वशूलंचकुक्षिशूलंचदारुजं ॥ कासंश्वासंतथाशोषग्रहणीगुल्ममेवच ॥ यकृत्प्लीहोदरंवातंयक्ष्मारोगंचनवज्वरं ॥ वि
ष्टंभश्रमेदोवल्मग्निमाद्यंनियछति ॥ दुर्नामपांडुरोगंचत्रिविधंचहलीमकं ॥ रक्तंविनाशयेत्याशुभास्करंतिमिरंयथा ॥
अपराशर्करामद्दरं ॥ यवक्षारकणाशुंडंकोलग्रंथिकचित्रकान् ॥ पलप्रमाणानादायप्रस्थंचलोहकिट्टजं ॥ शम्यकपचे
दार्विलेपंगोमूत्राष्टगुणेनच ॥ ततोक्षमात्रांवटिकान्योजयेत्सप्तरात्रकान् ॥ भक्षयेभोजनस्याग्रेमध्येभुक्तवतस्तथा ॥
सर्पिक्षीररसोपेतेरसेजीतरजेःश्रमेः ॥ विनिहंत्यम्लपित्तंचशूलंचपरिणामजे ॥ सर्वशूलगदानाशुनाशयेत्येषवि
र्यवान् ॥ सभीमवटकोह्येषयोगराजप्रकीर्तितः ॥ भीममंडुरवटकः ॥ लोहकिट्टंपलान्यष्टौगोमूत्रस्याष्टकेपचेत् ॥ क्षी
रप्रस्थवत्तसिद्धंपंक्तिशूलहरंपलं ॥ श्रीमंडुरः ॥ यामंत्रीसूर्यावर्त्तस्वरसंदशपलमयोमलमग्नितप्तंभूयोभूयः ॥ शो
षतैतैवपचेल्लेहीभूतमधुसर्पिभ्यांप्रयोज्यश्चलवणक्षीरभोजी ॥ जयतिपरिणामरुजंमसाध्यमपिशीतोदकानुपा
नं ॥ सूर्यावर्त्तमंडुरः ॥ संशोध्यचूर्णितंकृत्वामंडुरस्यपलाष्टकं ॥ शतावरीरसस्याष्टौदध्नश्चपयसस्तथा ॥ पलान्यादा
य — — — तथागव्यस्यसर्पिषः ॥ विपंचेत्सर्वमेकत्रयावत्पिंडत्वमागतं ॥ सिद्धंतुभक्षयेन्मध्येभोजनस्याग्रतोपिवा ॥

॥सात्म्यद॰॥
॥ ॥

वातात्मकंपित्तभवंशूलंचपरिणामजं॥निहंत्येवहयोगोयंमंडूरस्यनसंशयः॥दुग्धेनिर्वापणंकार्य्यंयद्वावरुणतारसे॥अथवान्योभयो
रेवलोहकिट्टस्यसप्तधा॥रसोगंधश्चभयाकेवर्णिस्यागारुवर्त्तमान्॥शतावरीमंडूरः॥विडंगचित्रकंचव्यंत्रिफलात्र्यूषणानिच
॥नवभागानिसर्वाणिलोहकिट्टंसमानिच॥गोमूत्रंद्विगुणंदत्वामूत्रार्द्रकगुडान्वितं॥शनैमृद्वग्निनापक्वासुस्निग्धपिंडतांगतं
॥स्निग्धंभांडेविनिक्षिप्यभक्षयेत्कोलमात्रया॥प्रागमध्यांत्तक्रमेणैवभोजनस्यप्रयोजितं॥योगोयंशमयत्याशुपंक्तिशूलंसुदा
रुणं॥कामलांपांडुरोगंचशोथंमंदाग्नितामपि॥अर्शांसिग्रहणीरोगंक्रमिगुल्मोदराणिच॥नाशयेदम्लपित्तंचस्थौल्यंचाप
कर्षति॥वर्जयेत्तुष्कशाकानिविदाह्यम्लकटूनिच॥पंक्तिशूलांतकोह्येषगुडोमंडूरसंज्ञकः॥शूलार्त्तानांक्रियाह्येतोस्तार
यापरिकीर्त्तितः॥तारामंडूरः॥वर्षाभूवरुणामानेलोहकिट्टंमयूरकं॥भार्गीविसमभागानिमूत्रेदशगुणेपचेत्॥अंतर्धूमविपक्वे
नमधुसर्पियुतंतनमः॥वाताधिकंतथापित्तंद्वंद्वजंश्लेष्मजंतथा॥एषत्रिदोषहंतिशूलंहिपरिणामजं॥पुनर्नवामंडूरः॥त्र्यू
षणंत्रिफलाचव्यंविडंगानलजीरकं॥शृंगीमुष्टदेवकाष्ठंकारवीधान्यतुंबुरु॥दंतिजन्हुत्रयोमूलंग्रंथिकंगजपिप्पलिः॥त्वचे
लापत्रकंचूर्णमेषामर्द्धपलंपृथक्॥गृहीयागंधपाषाणांकेशरंचाक्षसंमितं॥मंडूरस्यविशुद्धस्यपलानांपंचविंशतिः॥कृत्वा
चूर्णंततःसूक्ष्मःस्वरसेभावयेत्तुतं॥कंदोत्कटंकेशराजंवध्यतालसमुद्भवैः॥धात्रीफलरसः॥प्रस्थंमूत्रमहिषगुणांतथा॥दत्वा

विपाचयेत्तावद्यावत्पाकंचगच्छति ॥ खादेदग्निमलंवत्वा परिहारविवर्जितः ॥ वातश्लेष्मोद्भवं शूलमम्लपित्तं सुदारुणं ॥ प्लीह
नमुदरंगुल्मग्रहणीपांडुकामला ॥ कृमिनर्शांसिमानाहंशोथंस्थौल्यमरोचकं ॥ येचवातभवा रोगा येचपित्तकफोद्भवा ॥ तान्स
र्वान्नाशयेत्याशुभास्करस्तिमिरंयथा ॥ त्र्यूषणांनामविख्यातंवह्निदीप्तिकरंपरं ॥ बृहत्र्यूषणाद्यंमंडूरंपरं ॥ पथ्याटंकणविश्वाहिं
गुमरिचंवह्निविडंगंधकं तुल्यसैंधवसंयुतंतु कपिलासर्वेसमंमंमते ॥ शूलाध्मानविबंधगुल्मकसनंश्लेष्मामवातानाहाजीर्णा
त्वाग्नुदकरारुचिज्वरहरी शूलघ्नीपथ्यावटी ॥ शूलगजकेशरीवटी ॥ हरित्रिकटिकंकपिलायांगंधहिंगुच ॥ सैंधवंचसमंस
र्वंवटिकुर्यात्सुखांबुना ॥ लघुकोलप्रमाणांतुता भक्षयेत्प्रातरेवहि ॥ एकाएववटीभुक्ताजन्मशूलनिवारिणा ॥ ग्रहण्यामती
सारेसाजीर्णेमंदपावके ॥ उष्णोदकानुपानेनसुखमाप्नोतिनित्यशः ॥ शूलनाशिनीवटि ॥ दशाभ्रकंहेमवतीसमेतंस्वित्रात्तरवोदे
विषतींदुवीजान् ॥ कटुत्रिकंक्षारयुगंत्रिदिव्यक्रिमिघ्नंहिंगुत्रिपटुत्रिविल्वंपथ्युतंभैजलैवटीयमगस्त्यपूर्वाबदरप्रमाणा ॥ शूला
न्यखिलमनिलग्लानिमपिनिगुल्मापित्तमंदवह्निप्लीहानमवातंजयतीप्रसह्य ॥ अगस्त्यवटी ॥ यवानिविश्वानीरोषणागरलवाह्नीकद
हनत्वगकार्ष्यावयुश्वणाकजलिंगामाकावरसेः ॥ यथाभानोर्भासस्तिमिरनिकरं कामिनितथाहरंत्येता ॥ शूलान्यखिलमनिल
ग्लानिमपिच ॥ आदित्यवटी ॥ व्योषंग्रंथिचवाग्निहिंगुजरणाढंदविषंनिवुकजावैराह्नकजैरसेविमदितंतुल्यमरिचोपमा ॥ का

॥ सान्यद· ॥
॥ १७८ ॥

त्र्यावटिका थसादिन भुरेव भुक्त्वा कवोह्माबुना शूलंत्वष्टविधं निहंति समहा सूर्यप्रभानामतः ॥ सूर्यप्रभावटि ॥ गुडामलकपथ्यानां चूर्णं प्रत्येकशः प
रं ॥ त्रिफलं लोहकिट्टस्य तत्सर्वं मधुसर्पिभ्यां समालोड्य समश्रीयादक्षमात्राप्रमाणतः ॥ आदिमध्यावशानेषु भोजनस्य निहंति तत् ॥ अन्य
द्रवजलम्पित्तंमम्लपित्तंसुदारुणं ॥ परिणामसमुत्थंच शूलंसम्वत्सरोत्थितम् ॥ गुडमंडूरं ॥ कलायचूर्णंभागौद्वौ लोहचूर्णस्य चापरः ॥ का
लविहत्र पलाशानां रसेनैव विमर्दयेत् ॥ कर्षमात्रंततः श्चैषां गुटिकां भक्षयेन्नरः ॥ यज्ञानुपाना साहंति जलम्पित्तं सुदुर्जयं ॥ कलायगुटिका ॥
कासीपलषट्कमूषकचतुर्विल्वविचूर्णापीथतन्नूप्यांकात्वभुमिदमीयनलिकाप्रोतानराभित्युभे ॥ विन्यस्यज्वलनेयदुर्ध्वनलिकावक्त्रा
त्सवेत्तस्युटं शंखद्रावइतिख्यातं जलमिदं वस्त्रोन्मितं सर्पिषा: ॥ जिह्वाग्रेरसनांविधाय नलिकां यंत्रेग्रसेनस्य शोदंतैरेनदु दग्धमूल
विविधं ष्ठीहादिकुक्षोदरगुल्मिनां नीयुगोर्द्धवातगुड जाजीर्णानलोपायपुक्स्यादेतस्य निषेवनादचिरतो नैघापुनर्भोजनं ॥ डष
कसारा: ॥ इतिलोके ॥ शंखद्रावं ॥ षट्पलमूषकसहपाक्यासिंहरवङ्कुडवचयंव ॥ म ङ्केडवाङ्कमतोनवसारस्त्वर्द्धविभागइदं दरपिष्ट
पूर्ववदेचविपाक्यंनुयंत्रेवाष्पजलंनुनतोतिपतेद्यत् ॥ शूलमनेकविधं गुरुगुल्महेतिहि वन्हमितं विधिपीतं ॥ डषक ३ यवक्षार २ सैन्धव
२ काशीस १ नवसार ॥ पल ॥ जंमापल ८ द्वि कर्षंच ॥ कूपिकां क्षिपेत् ॥ द्वितीयशंखद्राव ॥ अद्यानां शुद्धताम्रस्यपत्राणांपलविंशतिः ॥ पलानि
पंचमूलस्यमर्दयेन्निबुकद्रवैः ॥ तावत्तंमर्दनं कुर्याद्यावत्तं सगलतेरसः ॥ म न्यावमध्येनिक्षिप्यतस्योर्द्धाद्र्व नुगंधकं ॥ एरये चूर्णयेत्ता

॥ राम: ॥
॥ १७८ ॥

तुसम्यग्दशपलोन्मितं ॥ चुल्लिकादौ पचेत्सम्यग्विरुध्यघटिकात्रयं ॥ स्वांगशीतलमादाय चूर्णयित्वा पुनश्च तत् ॥ त्रिभागं कारयेत्तत्र भागमेकं पुनः पचेत् ॥ गोमूत्रैर्विंशतिर्वारान्सम्भेदि जायते रसः ॥ उदरारिं कृमिं हन्यान्निहरन्मलसंचयः ॥ शाम्ये शीतोपचारेण तस्मादुष्णक्रियां चरेत् ॥ पुनर्द्वितीयभागं तु गोक्षीरेण पचेत्ततः ॥ दशवारं तथा तोये नारिकेलस्य पाचयेत् ॥ अयं गोल्लोरसो नाम सर्वशूलविनाशकं ॥ नाभिकुक्षिभवं शूलं शिरकर्णाक्षिजं तथा ॥ मुखपाकं पांडुरोगं मुखरोगं च दारुणं ॥ वातज्वरं पित्तजं च द्वंद्वजं सन्निपातिकं ॥ क्षयं कासं कृमिं चैव विनिहन्याद्दीपनं परं ॥ पुनस्तृतीयभागं तु कटुवेत्त्रिकारसैः ॥ भावयेविंशतिर्वारं वमनं जायते रसः ॥ शुद्धताम्रपत्राणि सूक्ष्मपल २० शुद्धरसपल ५ निंबुकद्रवे यावत्ताम्रपत्रपारदद्रवेत्तावद्दिनमर्दयेत् ॥ ततः शुद्धगंधकपल १० शरावे गंधकरज· अर्धनिक्षिप्य तदुपरि तच्चूर्णं तदुपरि च गंधकचूर्णं निक्षिप्य पुनः सरावेणारुध्य वालुकायंत्रे संपाच्य याम ४ घटिका ३ ततः स्वांगशीतं संगृह्य भागत्रयं कृत्वा तत्रैकभाग· गोमूत्रे दिन २० पश्चात्सम्भेदिरससंज्ञा जायते १ एवं द्वितीयभाग गोक्षीरेण दिन १० नालिकेलक्षीरेण वा दिन १० पश्चाद्गोल्लोरसज्ञा जायते २ पुनस्तृतीयभागं देवदालीरसे दिन १० पश्चाद्वामनारसो जायते ३ तत्तदनुपानतस्तत्तद्रोगेषु योजयेत् ॥ मात्रा तु वल्लमितं ॥ देयोस्य वल्लमात्रं तु तांबूलीदलसंयुतं ॥ वमने सर्वदोषघ्नं उपचारस्तु पूर्ववत् ॥ विसूचिकाम्लपित्तं च शिरोजाड्यं विनाशयेत् ॥ केपुनवड़तोक्तेन सर्वशूलहरं स्मृतं ॥ यस्मादुद्दीपयेदग्निं तस्मादुदयभास्करः ॥ राजिकात्ले घनेनारि कषायकटुकं त्यजेत् ॥ उदयभास्करो रसः ॥ इति शूलपरि

माराश्शूलाधिकार: ॥ अथानाह ॥ जैपालेनसमेसूतव्योषटंकणगंधकै: ॥ नाराचस्याद्रसोनाम्नामाषसर्पिषिसंयुत: ॥ हंतुदावर्त्तमाना
ह्गुदरानाह्गुल्मक: ॥ नाराचरस: ॥ इत्यानाहमुदावर्त्ताधिकार: ॥ अथगुल्म: ॥ वंगभस्मसूतभस्मपलैकैकंप्रकल्पयेत ॥ गंधकं
मृतताम्रंचप्रत्येकंचचतुस्पलं ॥ अर्कक्षीरेर्दिनंमर्द्यसर्वतगोलकीकृतं ॥ रुध्वांतमूषेरेपाच्यातुटेकेनसमुद्धरेत ॥ एषवंगेश्वरोना
मगुल्मोप्लीहोदरंजयेत ॥ घृतैगुंजाद्वयंलेह्योनिष्कंश्वेतपुनर्नवा: ॥ गवांमूत्रै:पिबेश्चानुरजनीवागवांजलै: ॥ वंगेश्वरोरस: ॥
गंधकंरसतुल्यंतुद्विभागंसैन्धवस्यच ॥ त्रिभागंटंकणंप्रोक्तंचतुर्भागंचतुत्थकं ॥ पंचभागंवरातस्या:षड्भागंशंखमेवच ॥ वह्निमूलं
कषायेणाचिरविल्वभवंरज: ॥ चिरविल्वरसेनैवप्रत्येकंभावनात्रयं ॥ तत्समंमरिचंचूर्णंशाणार्द्धंभक्षयेन्नर: ॥ पंचगुल्मक्षयश्वास
मंदाग्निश्वासनाशयेत ॥ गुल्मांतकोरस: ॥ पारदंटंकणंगंधंत्रिफलाव्योषतारकं ॥ विषंताम्रंचजेपालंभृंगराजरसमर्दितं ॥ गुंजामात्राव
टीकार्याआर्द्रकस्यरसान्वित: ॥ गुल्मेकुठारक:प्रोक्त:सर्वगुल्मनिवारणं ॥ गुल्मकुठाररस: ॥ गंधकंतालकंताप्यंमृतताम्रंमन:
शिला: ॥ शुद्धसूतंचतुल्यांशंमर्दयेभावयेद्दिनं ॥ पिप्पल्यास्तुकषायेणावज्रीक्षीरेणचत्रिश: ॥ निष्कार्द्धंभक्षयेत्क्षौद्रैर्गुल्मप्लीहोदरं
जयेत ॥ रसोविद्याधरोनाम्नागोमूत्रंचपिबेदनु ॥ तिलक्वाथंपिबेदाज्यंव्योषभार्गीगुडान्वितं ॥ पुष्परोधेरक्तगुल्मेत्रिभिर्विद्याधरो
गुरं ॥ विद्याधरोरस: ॥ सूतंगंधंरंगपथ्यातुल्याआरग्वधांवुभि: ॥ मर्दवज्रीदुग्धेनतन्माषंमधुनालिहेत ॥ स्त्रीणांगुल्मोदरंहंतिप

थ्यं शाल्योदनं दधिः ॥ विंवाफलरसं नागुपिवेत्संसीलितेरसः ॥ गुल्मारिरसः ॥ शंखद्रावोजयत्याशुपथ्यासैंधवसंयुतः ॥ दुःसा
ध्यानपिगुल्मांश्चपथ्यलोघद्रवोक्त्यान् ॥ नेयथा ॥ त्रिक्षारं पटुपंकजंत्रिजलजं लोणाम्लरोत्थावसापेन्नेवृह्मगरंसमडलव
णं भारोअपामार्गजं ॥ वज्रक्षारमथैवकक्ककपटुपालाशकुकीमवंसौराष्ट्रिसममाराकुल्यमसितागभीरणानाभावयेत् ॥ शुष्कनारिकोदरा
द्धुभदिनेस्विदनेमध्यवह्नं खड्गावरसायनेगदवनावहेत्रेकमात्रेहृदेन् ॥ यवक्षारः स्वर्जिक्षारं टंकणसैन्धवरुचकविडंगसामुद्ररोम
कं· शंख· मौक्तिकं· वराटा· क्षारलवणा· गंधकपलास· अमत्तपुनः सामुद्रलवणां· अपामार्गक्षार· स्नुही क्षारपलासभेदस्यपला
सस्यअर्कस्यक्षारा· सौराष्ट्रस्य· सर्वसमभागंगृहीत्वाकाचकूप्यां निक्षिप्य· नलिकायंत्रेणावाप्यांगृहीयात्· काचकूप्यां संरक्षाव
धुत्वयासेवयेत् ॥ जिह्वाग्रेहविषाविल्लोड्यविविधैर्देयानदंतास्यशेन् ॥ द्धंखड्गावराकृतमेरोनवंतथालोहान्यपिद्रावयेत् ॥ हृ
त्कंठरोगासमनोडुष्टव्याधिविनाशनः ॥ शूलंत्वाघ्राणमात्रेणसमन्यमेवनसंशयः ॥ कष्टादिरोगासहवामवातात्वष्टिग्रह ॥
णपद्दतथाष्टशूलान् ॥ प्लीहामजीर्णानितथैवगुल्मानर्शादिरोगाद्धमयत्यवश्यं ॥ शंखद्राव ॥ इतिगुल्माधिकारः ॥ अथहृद्रो
गः ॥ रसगंधाभ्रभस्मानिपाथावृक्षंत्वगंवुना ॥ एकविंशतिधाभाव्यघर्मेतानिविभावयेत् ॥ माषमात्रमिदंचूर्णं मधुनासहयो
जयेत् ॥ वातजंपित्तजंश्लेष्मजंसंभूतंधात्रिदोषजं ॥ कृमिजंवापिहृद्रोगंनिहंत्येननत्रसंशयः ॥ चिंतेवोरसः ॥ सूतंगंधोद्भवैधा

॥साम्नद॰॥
॥१८९॥

श्यामर्दयेगोस्तनिद्रवैः॥ घस्रेखर्जूरशरीलेदिनहृद्रोगजिद्रसः॥ धात्रीचूर्णंपिबेवानुसशिनंरोगहाभृशं॥ पंचाननोरसः॥ सूतार्द्धंगं
धकंक्वाथेवरायामर्दयेद्दिनं॥ काक्यामाच्यावटीकृत्वावरामार्णवभक्षयेत्॥ हृदयार्णवनामायंहृद्रोगदलनोरसः॥ हृदयार्णा
वोरसः॥ निष्कत्रयंरसस्यास्यगंधकंतुर्य्यभागिका॥ गंधकेनजयाचूर्णंनिंववीजसमांशकं॥ गुंजावीजेनदद्धस्यात्रदद्धंजयपालकं
॥निवुद्रवेरासंमर्द्यकाकमाच्यादिनात्रकं॥ धतूरकजयंतीभ्यागुटिकांकारयेत्सुधी॥ गुंजागर्भोरसोनाम्नादानव्याघनसंयुतः॥
हिंगुसैन्धवसंयुक्तंमंदपथ्याप्रदापयेत्॥ गुंजागर्भोरसः॥ शुद्धसूतसमोगंधमृतताम्रद्वयोसमं॥ मर्दयेत्कुचीफलद्रावैःकाक
माच्याद्रवैर्दिनं॥ वराकाभावटीखादेद्रसोयंहृदयार्णवः॥ काकमाचीपलंशुष्कंत्रिफलापलसंयुतं॥ द्वात्रिंशतिपलेतोये
क्वाथमष्टावशेषितं॥ अनुपानंपिवेदेतन्हृद्रोगेवेकफोत्थिते॥ हृदयार्णवोरसः॥ ॥इतिहृद्रोगाधिकारः॥ अथमूत्रकृछ्
॥रसस्यभस्मभागैकंवक्रःशुद्धगंधकात्॥ पिष्ठावराटिकापूर्य्यारसपादेनटंकणं॥ क्षीरैःपिष्ठाथरुध्वांस्यंभांडेरुध्वापुटेप
चेत्॥ स्वांगशीतंविचूर्णाथलघुलोकेश्वरोरसः॥ ॥लोहभस्मश्लक्ष्णचूर्णंमधुनासहयोजितं॥ मूत्रकृच्छ्रहरंत्वाशुत्रिमिलेह
नसंशयः॥ मध्वादिलोहं॥ इतिमूत्रकृच्छ्राधिकारः॥ अथमूत्राघातः॥ सशर्करंवसमितंलीढंशुद्धंशिलाजतु॥ निहंतिमूत्र
जठरंमूत्राघातंचदेहिनां॥ पत्रिगोकंटकक्वाथेसशिलाजतुकौशिकः॥ मूत्रक्षयात्मूत्रशुक्रात्मूत्रोत्संगाद्वमुच्यते॥ शिलाजतुयो

॥राम:॥
॥१८९॥

गः ॥ इतिमूत्राघाताधिकारः ॥ अथाश्मरी ॥ पलाशैरंभातिलकारवेल्लीयवाग्निकाशैरवारिकक्षपाराणि ॥ क्षारंसमादायकलांश
मेवरसंवगंधंवरलोहभस्मद्वयोः समंसर्वमिदंविचूर्ण्य संस्थापयेदश्मरिकंदनाख्यः ॥ चूर्णात्तदक्षप्रमितंप्रलिह्यदग्धान्न
पेयंवरुणत्वगंव ॥ प्रद्योतनमर्त्योश्मरिशर्करार्त्तानि संसयंप्रणमरवागतोपि ॥ — — — — — — इक्षुवारुणि — मूलंवसव
वंक्षीरणाविते ॥ पर्पटीरससंयुक्तं सप्ताहादश्मरिंप्रणुत ॥ रसपर्पटी ॥ तिलापमार्गयोःकांडंकारवेल्यायवस्यव ॥ पलासकाष्ट
संयुक्तंतुल्यंसर्वंदहेत्पुटेन ॥ तंनिक्षेकंमज्जामूत्रेवटीवानंदभैरवी ॥ पाययेदश्मरीं हंतिसप्तरात्रान्नसंशयः ॥ आनंदभैरवी
रसः ॥ मृतंसूतंविषागंधश्चैतत्पोतनवद्रवैः ॥ भावनात्रितयंदेयंरुद्धाऽतंभूधरेपुटेत् ॥ पाषाणभेदिरसः ॥ मृतंताम्रमजाक्षीरैः
पाच्यंतुल्यैर्गतेद्रवैः ॥ तत्ताम्रंशुद्धसूतंचगंधकंचसमंसमं ॥ निर्गुंडिस्वरसैर्मर्द्यंदिनंतज्जोल — — येत् ॥ याममेकंवालुकायंत्रेप
क्वायोज्यंहिंगुंजकं ॥ बीजपूरस्यमूलंचसजलंवानुपाययेत् ॥ रसस्त्रिविक्रमोनाम्नामासैकेनाश्मरींप्रणुत् ॥ त्रिविक्रमोरसः
इत्यश्मर्यधिकारः ॥ अथप्रमेहः ॥ रसेनवंगंहिंगुरांप्रगृह्यविडाख्यंतिक्षिप्यसमुद्रजेनतत् ॥ विमर्दयेदम्लजलेनगोलंकृत्वातुसं
वेष्ट्यपुटेवतित्वं ॥ ततःक्षिपेत्तज्जलपात्रमध्येनीरंतुसंत्यज्यगृहाणसूतं ॥ तद्वल्लयुग्मंमधुनासमेतंददीतपथ्यंमधुरंसमुद्गं ॥ वि
ल्वोत्थपीडंचविपाच्यतक्रेतदीनहिंगुदधिवर्जयेच्च ॥ वंगंविनारसमश्मेदंसर्वरोगोपकारकं ॥ लवणाप्ताविंशतिभागाः ॥ ॥

वंगेश्वररसः ॥ एकसूतोविधार्वंगपूर्व्वाद्विगुणगंधकः ॥ कूपीपक्वोमहासेतुर्वंगस्थानेथवाबुधः ॥ महासेतु ॥ गंधेनसूतंद्विगुणांप्रगृह्यविमर्दये
गोक्षुरयुक्तं ॥ शुष्कंचकूप्यावलुतमृत्ताम्रंचक्रंचतस्योपरिविन्यसेच्च ॥ चक्रेविलग्नंवनततःप्रगृह्यमूखोदरेध्मापयटंकरोति ॥ संगृह्य
चक्रेचविधायगोलंत्रिसप्तकान्मेहविमुक्तिमेति ॥ मेहरोगोलकः ॥ वंगभस्मद्विवल्लंवलेहयेन्मधुनासह ॥ ततोगुडसमंगंधंभक्षये
त्कर्षमात्रकं ॥ गुडूचीसत्वमथवाशर्करासहितंतथा ॥ सर्वमेहविनिर्मुक्तोमंडलाजायतेनरः ॥ वंगावलेह ॥ सूतकाभ्रवटक्षीरंमर्द
येत्प्रहरद्वयं ॥ विपाच्यपक्वमूषायांसर्वरोगहरंपरं ॥ विशेषान्मेहरोगेषुत्रिफलामधुसंयुतं ॥ भुंजीतवल्लमेकंतुरसेंद्रस्यास्यवैद्यराट्
॥ अत्रद्विगुणोगंधोपियोज्यः ॥ प्रमेहसेतुः ॥ रसवस्तिविषवह्नित्रैफलाव्योषयुक्तंसमलवमितिसर्वैर्द्विगुणाःस्याद्गुडोथ ॥ जथरगद
समीरश्लेष्ममेहान्सगुल्मान्हरतिफटिटिप्रसांवहत्रमात्रावटीयं ॥ रुजार्दनवटी ॥ मृतसूताभ्रवंगानांमर्दयेमधुनादिनं ॥ तारकेश्वर
नामोयंमासैकंवहुमूत्रजित् ॥ उडुंवरफलंपक्वंचूर्णितंकर्षमात्रकं ॥ संलिहेमधुनासार्द्धमनुपानसुखावहं ॥ तारकेश्वररसः ॥ ॥
वंगभस्ममृतसूतंतुल्यंक्षौद्रविमर्दयेत् ॥ द्विगुंजंलेहयेत्त्रिंशंहंतिमेहविरंतनं ॥ गुंजामूलंपिवेत्क्षौद्रैरनुपानंप्रशस्यते ॥ अपरोवंगे
श्वरः ॥ मृतसूतमृतवंगमर्जुनस्यत्वचंमितं ॥ तुल्यांशंमर्दयेत्खल्वेशाल्मल्यामर्दयेद्द्रवैः ॥ दिनांतेवटिकाकार्यामाषमात्राप्रमेहहा
॥ एषइंद्रवटिसंज्ञोमधुमेहप्रमेहहृत् ॥ इंद्रवटी ॥ रसस्यभस्मनातुल्यंवंगभस्मप्रकल्पयेत् ॥ अस्यमाषद्वयंहंतिमेहान्क्षौद्रसमन्वि

तं ॥ वंगेश्वररसः ॥ सूताभ्रमामलजलैः सप्ताहं भावयेद्रसः ॥ हरिशंकरसंज्ञस्यान्मृक्रपित्तप्रमेहरुग्जित् ॥ हरिशंकररसः ॥ पार
दो लोहचूर्णं च गंधकं वंगभस्म च ॥ क्रमाद्विगुणितं टंकं विषं रससमन्वितं ॥ एवं कुमारिनिर्यासैः पक्षं संमर्द्य चातपे ॥ पारद
१ लोह २ गंध ४ वंग ८ टंकोत्र· मानं· विषं· रसमानं कुमारिकारसैः दिन १ आतपे संमर्द्य वल्लमितां वटिकां मधुसितायुतां भक्षयेत् ॥
भक्षयेद्वल्लं वा दद्यान्मधुसितायुतं ॥ मेहरोगेषु सर्वेषु मूत्ररोगेषु च क्षये ॥ पांडुडनीमानि सार्यहरत्पां स्वानुपानतः ॥ मेहांकुशो रसः
॥ लोहभस्म तथाभ्रं त्वलोहंगगनविद्रुमं ॥ शुद्धगंधसमं कृत्वा गोक्षीरेणावमर्दयेत् ॥ चातुर्जातिकगोक्षुरैर्भावयेच्च पृथक्त्रिशः ॥
वल्लमभ्रप्रदातव्यो सीतांक्षीरेणसंयुतं ॥ लोह २ ताम्र १ गंधक १ अभ्रक १ प्रवाल १ सर्वं गोक्षीरेण दिन ३ संमर्द्य पुनः चातुर्जातरसैर्दि
न ३ गोक्षुररसैः ३ भाव्य त्रिगुंजा वटिका यथानुपानं भक्षयेत् ॥ विंशतिकान्प्रमेहाश्च हंति रोगाननेकशः ॥ कामं वर्द्धयते पुंसां स्त्रीणां वा
त्यंतवल्लभः ॥ रसो लक्ष्मीविलासोयं मुनिभिः परिभाषितः ॥ लोहं तीक्ष्णं कांतलोहं वह्निलक्ष्मीविलासरसः ॥ तालवंगं हेमलोहं गंधकं
नागविद्रुमं ॥ वैक्रांतपारदं शंखं टंकणं गगणं तथा ॥ माक्षिकं रसकं चैव सिंदुरं समभागिकं ॥ समस्तं गव्यदुग्धेन ३ धुवासारसेन च ॥ मूश
ली गंधकीरंभाशाल्मलीगोक्षुरद्रवैः ॥ सप्तधा भावयेदेष कुमुदेशो भवेद्रसः ॥ वल्लमात्रं प्रयुंजीत सिताज्यमधुनासा ॥ वीर्यवृद्धिक
रोत्यर्थरोगाहन्त्यन्यनेकसः ॥ विंशतिप्रमेहाश्चैव पुष्टिं च कुरुते तथा ॥ कुमुदेश्वरनामायं मुनिभिः परिभाषितं ॥ कामं वर्द्धयते पुंसां स्त्रीणां

वातंनवदत्रभः ॥ कामदेश्वररसः ॥ एलासकर्पूरसितासधात्रीजातीफलांसपुरशाल्मलीकां ॥ मृताभ्रवंगामयभस्मवैतसंमर्दयेत्
त्यलवेमहौषि ॥ ततोभवत्येषरसप्रमेहकुठारनामाविदितःप्रभावः ॥ निष्कार्द्धमात्रोमधुनावलीढोनिहंतिमेनानखिलान्दया
न् ॥ प्रमेहकुठाररसः ॥ ताप्यार्ककराहेमताररसकंगंधंपथम्भागिकंताम्रविद्रुमशुक्तिजंशिखरिणांद्विघ्नंतथाभागका ॥ वंगायोहि
रसेन्द्रभूतिगगणांवैकांतकांमंत्रिशस्तान्समर्थ्यविभावयेत्रिदिवसंयष्टित्रिजातांबुभिः ॥ शस्तोशीरवरातृषामषशाटीकंत्यावि
दारिवरिनीरैगोपसेक्षुजैश्चमुशलीगोलंपवैद्यामकं ॥ मंदाग्नौचमृगांकवत्तुनरसोभाव्यस्ततोभावनेद्वेस्तूरीमृगांकयोःस
मकरणाशुक्रोस्यवलोजयेत् ॥ सुवर्णमाक्षिकसोभाग्यक्षारंसुवर्णरौप्यरसकं·गंधप्रत्येकंभाग१ ताम्रप्रवाल·मौक्तिक·गारु
त्मक·प्रत्येकंद्विभाग२ वंग·शीशक·सूतभस्मअभ्रपकः ॥ वैक्रांतभस्मप्रत्येकंत्रिभाग३ तत्रभावनाद्रव्यं ॥ यथा·यष्टिमधुश
मेलात्वचापत्रतत्क्वाथेनत्रिदिनंपुनशुस्ताउशीरत्रिफलाआटरूषगुडूचीकर्चूरघनकंत्याविदारि·शतावरी·त्रिदिनं·पु
नगोदुग्धेन·इक्षुरसेश्च·मूशली·क्वाथैश्चत्रिदिनं३ संपिष्यगोलंकृत्वायाममेकं१ लवणयंत्रेमृगांकवत्पचेत् ॥ स्वांगशीत
मुद्धृत्यपुनरपिपूर्वोक्तद्रवैर्विभाव्यः ॥ द्विविधाकस्तूरितोयेनचभाव्यपुनः पिप्पलीचूर्णमिश्रयित्वारक्तिका६ षट्·रोगानु
रूपभेषजेनसहभक्षयेत् ॥ महार्शोग्रहणीज्वरोदरमरुद्व्याधिंरुजंकामलापांडुकुष्ठभगंदरंज्वरगणान्कृच्छ्रंचयक्ष्मक्षयं ॥ सर्व

श्वरसः ॥ सूतंकांतंगंधकंतीक्ष्णाताप्यंव्योषंफलत्रिकं ॥ शिलाजतुशिलाकोलंवीजंरात्रिकपित्थजं ॥ त्रिसप्तकृत्वाभृंगाह्निभाव
येन्निष्कसंज्ञकः ॥ मधुनामेघनादेयंसर्वमेहान्विनाशयेत् ॥ महानिंवस्यवीजानिपेषयेत्तंडुलांवुना ॥ सघृतान्यविरादुग्धपानान्मे
हाश्चिरोत्थितान् ॥ अत्रगंधकंत्यक्त्वात्रिंशद्वारंविशोध्याथमधुयुक्तंलिहेत्सदा ॥ निष्कमात्रंहरेन्मेहान्मेहवज्रोरसोमहान् ॥
तंत्रांतरे ॥ मेघनादोरसः ॥ शुद्धसूतवमं तस्याहेरजीवद्धामितंलिहेत् ॥ सनिशामलकक्षोडंसर्वमेहप्रशांतये ॥ नागयोगः ॥ शा
ल्मलीत्वग्रसोपेतमक्षोडंरजनीरजः ॥ वंगभस्महरेन्मेहान्पंचाननइवद्विपान् ॥ वंगभस्मोपयोगः ॥ निवंडमभ्रकंभस्मसम
वरजनीरजः ॥ मधुनालीढमचिरात्प्रमेहान्विनिकृंतति ॥ अभ्रकयोगः ॥ रसाभ्रलोहवंगावायुक्तंसमशिलाजतु ॥ तद्दशामधुसं
सेव्यंद्विषंसर्वमेहजित् ------ कज्जलीकृतसुगंधकशंभोस्तुल्यभागिकनकस्यचवीजं ॥ मर्दयेत्कनकतैलयुतंतत्का
मिनीमदविधूननसूतः ॥ अस्यवल्लयुगलंससितंवासेवितंहरतिमेहगणौघं ॥ वीर्यदार्ढ्यकरणंकमनीयंद्रावणंनिधुवनेवनि
तानां ॥ कामिनीमदविधूननोरसः ॥ चंद्रप्रभावचामुस्ताभूनिंवसुदारवः ॥ हरिद्राग्निविषादार्वीपिप्पलीमूलचित्रकं ॥ धान्यकंत्रिफ
लाचव्यंविडंगंगजपिप्पलीसुवर्णमाक्षिकंव्योषंद्वौक्षारौलवणत्रयं ॥ एतानिकर्षमात्राणिसंगृह्णीयात्पृथक्पृथक् ॥ द्विकर्षंहतलो
हस्याच्चतुःकर्षासिताभवेत् ॥ शिलाजित्वष्टकर्षंस्यादष्टौकर्षाश्चगुग्गुलुः ॥ विधानायोजितैरेतैःकर्तव्यागुटिकाशुभा ॥ चंद्रप्रभेति

विख्याता सर्वरोगप्रणाशिनी ॥ निहंति विंशतिर्मेहान्कृच्छ्रमष्टविधं तथा ॥ वतास्तश्चाश्मरीस्तावन्मूत्राघातास्त्रयोदश: ॥ अंडवृद्धिं पांडुरोगं का
मलां च हलीमकं ॥ कासं श्वासं तथा कुष्ठमग्निमांद्यमरोचकं ॥ वातपित्तकफव्याधिन्बल्या वृष्या रसायनी ॥ समाराध्य शिवं यत्नात्प्रयत्ताद्गुटि
कामिमां ॥ प्राप्तवांश्चंद्रमा यस्मात्तस्माच्चंद्रप्रभा मता ॥ चंद्रप्रभा कर्चूरं· चंद्रप्रभागुटिका· त तीयारसवलीविषवहित्रैफलव्योषयुक्तं सल
वमिति — सर्वैर्हि गुणा: स्याकुडेत्र: ॥ जठरगदसमीभि: श्लेष्ममेहान्सगुल्मान्हरति स्फुटिति पुंसां वल्लमात्रावटीयं ॥ स्वच्छंदलनवती ॥
मवसादरसैन्धवपंचविंत्यमिति पृथक् ॥ निधाड मन यंत्रे वह्नि यामचतुष्टयं ॥ प्रज्वालयेदूर्ध्वभांडे लग्नं सत्वसमाहरेत ॥ तत्सत्वं चूर्णितं र
गंसमं गंधतयो: समं ॥ विचूर्णं कत्रकाचोत्थकूपिकायां विनिक्षिपेत ॥ मृल्लिप्तं वालुकायंत्रे स्थितायां दिवसद्वयं ॥ चूल्यामग्निमधो दत्वा
यामाद्द्वादशवा पचेत ॥ कूपी तलस्थं तद्भस्म स्वर्णाभं स्यांगशीतलं ॥ गद्दीयामारि तान्सर्वाणिद्रवेगुणाशतोधिकं ॥ वृष्यमायु:प्रदं सर्वप्र
मेहानां च नाशनं ॥ कामस्य परमे तद्धि मृगांको गुरु गोपित: ॥ प्रमेहोपशमे धातुवर्द्धने निश्चितं हितं ॥ मृगांकरस: ॥ सूतं वंगविमिश्रं त
वसारं पृथक् दशाक्ष: ॥ खल्वे खिलान् गुणाक् पीनि हि तवालुकायंत्रे ॥ स्थापितमनलं दद्यात्षोडशयामं तथाष्टयामं तु दीपनदद्याधि
यामं मध्यमम् र्ध्वे स्तु वंगं व्यवस्थिति: ॥ उत्तार्य्य शीतमेतद्भसिंदूरकूपिकाकंठे लग्नं पृथग्दद्यानलस्यकनकभासभस्मनयाग्राह्यं ॥ धा
तुपुष्टे प्रमेहे वराजवंगेश्वराभिधं ॥ पय:खंडसितागुक्तं मेहं पंचागगोक्षुरे: ॥ पयसा लुलितं पीतं दाहरे घयत्लु युक्तिभि: ॥ विशेषे रससिंदू

रौद्रपाने: सर्वरोगजित् ॥ रसराजस्याद्वितीयमृगांकरस: ॥ पलंकृष्णाभ्रचूर्णस्य तदर्द्धं रसगंधकं ॥ कर्पूरस्य तदर्द्धं तु जातीकोशफलेत
था ॥ वृद्धदारकवीजं च वीजमुन्मत्तकस्य च ॥ त्रैलोक्यविजयावीजं विदारिकंदमेव च ॥ नारायणीतथानागवलाचातिवलातथा ॥ वी
जं गोक्षुरकस्यापि समुद्रफलमेव च ॥ एतेषां कार्षिकं चूर्णं गृह्णीयाद्वारिणापुन: ॥ निष्पीष्य वटिकां कार्या त्रिगुंजाफलमानत: ॥
निहंति संनिपातोत्थान्गदान्घोरोरुदुस्तरान् ॥ वातोत्थान्पैत्तिकान्वापि नास्त्यत्रनियम: क्वचित् ॥ अष्टमष्टादशाख्यं च प्रमेहान्विंश
तिस्तथा ॥ नाडिव्रणं महाघोरं गुदामयभगंदर: ॥ श्लीपदं कफवातोत्थं वीरजं तु गुदामयान् ॥ गुल्मशोफ मंत्रवृद्धिमतिसारं गुदा
ङ्कुरां ॥ काशपीनसपस्मार्शस्थौल्यदौर्वल्यमेव च ॥ आमवातं सर्वरूपं जिह्वास्तंभं गलग्रहं ॥ उदरं कर्णनाशाक्षिमुखवैजाड्यमेव च
॥ सर्वशूलंशिरशूलं स्त्रीरोगं गदविनाशकृत् ॥ अनुपानमिहप्रोक्तं मांससर्पिर्दुग्धपयोदधि: ॥ वारितक्रसुधासिंधुसेवना त्कामरूपध्व
क् ॥ वृद्धोपितरुनस्पर्द्धी न च शुक्रस्य संक्षय: ॥ न च लिंगस्य सैथिल्यं न केशा यांति पक्कतान् ॥ नित्यं शतस्त्रियो गच्छन्मत्तवारणविक्रम:
॥ विलक्षयोजने दृष्टिं जायते पौष्टिकं पर: ॥ प्रोक्तप्रयोगराजोयं नारदेन महात्मना ॥ रसो रश्मिविलासस्तु वासुदेवे जगद्गुरो ॥ अभ्यासा
द्यस्य भगवान्लक्ष्मीरिव वल्लभ: ॥ लक्ष्मीविलासो रस द्वितीय: ॥ ॥ इति प्रमेहाधिकार: ॥ ॥ अथ मेद: ॥ रसभस्मवङ्गमात्रंतीक्ष्ण
मधुनापिवेदनुक्षौद्रं ॥ कोष्णांबुनासमेतं स्थौल्यं मेदःकृतं जयति ॥ रसभस्मयोग: ॥ सूतंगंधंमयोभस्मसमासंमेल्य भावयेत् ॥ निर्गुंडिपत्रतो

येन्मुशलीकंदवारिणा ॥ ततःसिद्धमसुंमाषमात्रंरसमुत्तमं ॥ लीढ्वाक्षौद्रेणवास्त्रीयाचूर्णमिषंपिवेन्निसं ॥ त्रिकंटत्रिफलापंचवल्कणा
वल्लगजस्यमेतत् ॥ मेदशोथाग्निमांद्यामवातश्लेष्मगदप्रणुत् ॥ त्रिमूर्त्तिरसः ॥ सूतंताम्रमयोवालंमर्दयेत्सूर्यवारिणा ॥ तद्वत्ताम्रमधुनाली
स्थापिबेद्वसजलेमधुः ॥ मेदुरत्वंजयन्मासाद्रसोयंवडवानलः ॥ वडवानलरसः ॥ गुग्गुलुस्तालमूलीचत्रिफलाखदिरंवृषः ॥ अलंबु
षामुंडीशुंठीनिर्गुंडीचित्रकंस्तथा ॥ एषांदशपलान्भागान्तोयेपंचाढकेपचेत् ॥ पादशेषंततःकृत्वाकषायमवतारयेत् ॥ पलद्वादश
कंदेयंरसकंलोहस्यचूर्णितं ॥ प्राणसर्पिषप्रस्थशर्कराष्टपलान्वितं ॥ पचेत्ताम्रमयेपात्रेसुशीतेचवतारिते ॥ प्रस्थार्द्धमाक्षिकंदेयंशिला
जतुपलद्वयं ॥ मरिचाजाजिकृष्णैलैद्वेद्वेपलेत्रिफलान्विते ॥ पलद्वयंतुकाशीशंसूक्ष्मचूर्णीकृतंबुधैः ॥ चूर्णंदत्वासुमथितंस्निग्ध
भांडेनिधापयेत् ॥ ततःशुभदिनेहृष्टोभक्षयेदक्षमात्रकं ॥ अनुपानंपिबेत्क्षीरंजांगलानांरसंतथा ॥ कामलापांडुरोगंचस्वपथुंसम
गंदरं ॥ मूर्छामोहविषोन्मादगदानिविविधानिच ॥ स्थूलानांकर्षणंचैवमेदुरेपरमौषधं ॥ कर्षयेद्वन्तिमात्रेणकुक्षिपानालसंनिभं ॥
बल्यंरसायनंमेध्यंवाजीकरणमुत्तमं ॥ श्रीकरंपुत्रजननंवलीपलितनाशनं ॥ नाश्नीयात्कदलीकंदकांजिकंकरमर्दकं ॥ करीर
कालवेल्लंचककारादिनिवर्जयेत् ॥ लोहरसायनं ॥ त्र्यूषणंत्रिफलाचव्यंचित्रकंविडमोद्भिदं ॥ वाकुचीसैंधवंचैवसौवर्चलसम
न्वितं ॥ अयश्चूर्णंसमायुक्तंभक्षयेन्मधुसर्पिषा ॥ स्थौल्यापकर्षकंश्रेष्ठंबलवर्णाग्निवर्द्धनं ॥ मेहघ्नंकुष्ठसमनंसर्वव्याधिहरंपरं ॥ नाहा

रेयंत्रनाकार्य्यानविस्तारेनथैवच ॥ त्र्यूषणाद्यमिदंचूर्णंरसायनमनुत्तमं ॥ त्र्यूषणाद्यंलोहं ॥ सूतस्याभ्रविषंलोहंव्योषंचयवभृंकजं
॥ मर्दयेत्तुरसाबाह्लिकंनातोयेदिनत्रयं ॥ गुंजामात्रंप्रयुंजीतःस्थौल्य------ ------ ॥ सर्वरोगादिंतयुज्ञादथ
वायोगवाहकं ॥ रसंसकटुफलेसूतेस्थौल्यनाशाययुक्तितः ॥ ------ ॥ इतिमेदाधिकारः ॥ अथकार्श्यः ॥ रसभस्म
त्रयोभागाभागैकंहेमभस्मकं ॥ गुडूचिसत्वतुल्यांशंशर्करामधुसर्पिभिः ॥ दिनैकंमर्दितंखल्वेमाषैकंभक्षयेत्सदा ॥ कृशानां
कुरुतेपुष्टिंरसोयममृतार्णवः ॥ अश्वगंधापलार्द्धंतुगवांक्षीरैःपिवेदनुः ॥ अमृतार्णवरसः ॥ अमृतंहेमभस्मंतुशंखाविं
वासुभास्करं ॥ क्रमाद्विगुणितंकृत्वातत्तुल्यंवकटुत्रयं ॥ तुलसीभृंगराजस्यमातुलुंगार्द्रकद्रवैः ॥ भावितंवज्रशाक्षीरैरजोगा
गुटिकापिव ॥ गुंजामात्रांतुसेवेतगुल्मशूलान्विनाशयेत् ॥ मंदाग्निग्रहणीस्पर्शीसर्वाध्मानमरोचकं ॥ इयंक्षावटीनामकृश
देहप्रपुष्टये ॥ क्षारवटी ॥ मृतसूताभ्रलोहानांशिलाजतुविडंगकं ॥ ताप्यक्षौद्रंसर्पितुल्यमेकीकृत्यविमर्दयेत् ॥ पूर्णचंद्ररसो
नाममोषधंभक्षयेत्सदा ॥ शाल्मलीपुष्पचूर्णंतुसक्षौद्रंकर्षलिहेदनु ॥ दुर्वलोवलमायातिमासेकेनयथाशशि ॥ पूर्णचंद्ररसः ॥ रस
भस्मविषांगंधश्चैभोमयोर्गवांजलैः ॥ तेनपीतवराटानिपूरयित्वाथटंकणं ॥ पेषयित्वाम्रखरुध्वानतेनोभांडेनिरोधयेत् ॥ शुष्कंगजपुटे
पाच्यात्स्वांगशीतंसमुद्धरेत् ॥ मरिचैर्द्विगुणोःसार्द्धंश्लक्ष्णंचूर्णवराटकं ॥ निष्कैकंभक्षयेदाज्यैवलपुष्टिविवर्द्धनं ॥ अश्वगंधापलैकंतु

गवांक्षीरैः पिबेदनु ॥ काश्यपीपोटलिख्याता दुर्वलेवलदायिनी ॥ काश्यपीपोटलीरसः ॥ इतिकृशाधिकारः ॥ अथोदरं ॥ रसेंद्रवलिटंक
रौ जयपालवीजैः समैरसः सर्पिर्दत्तो भवेत्खलु विनोदविद्याधरः ॥ पयोगद्रे गुंजोहरेत्सकलरेचनीयामयान् ज्वरंचजठरानलोगदगद्दंस
शूलंनराणां ॥ सम्यग्विरेचाभावे मुद्गक्वाथं पिबेदनु ॥ रेकाधिक्येपिबेत्तक्रं वव्वूलानां त्वचोरसः ॥ विद्याधररसः ॥ रसोश्रुमालीजयपालता
हशिलाहरितावलयः समांसा ॥ व्योषाग्निभृंगार्द्रकनीवुनीरैर्निर्गुंडिकारग्वधमूलकादि ॥ पथ्याग्निमर्थोदलनाशनोयमगास्तिसूत
शशिवग्रजोयं ॥ संपाचनादिक्रमसिद्धदेहे वल्लद्वयं वा क्रमसंयुतं वा ॥ कंपिल्लचूर्णंवसमंवदत्वा जलोदरादीन्जयतिहरोगान् ॥
अगास्तीसूतः ॥ रसकंगंधकंवाभ्रंशिलाजित्वाम्रलोहकं ॥ त्रिकटुश्चित्रकंकुष्टंनिर्गुंडिभृशालीविषं ॥ अजमोदाचसर्वेषां द्वौभागौप्रति
कल्पयेत् ॥ चूर्णीकृत्यततः सर्वं निंवक्वाथेन भावयेत् ॥ एकविंशत्प्रकारेण भृंगराजेन सप्तधा ॥ मधुनागुटिकांश्चकारजन्याती
प्रदापयेत् ॥ वैश्वानराभिधोयोगो जलोदरविनाशनः ॥ वैश्वानररसः ॥ वनुः सूतस्यगंधाष्टौ रजनीत्रिफलाशिवा ॥ प्रत्येकंच
द्विभागं च त्रिभिर्जेपालचित्रकं ॥ प्रत्येकंचत्रिभागं स्यात्त्र्यूषणंदंतिजीरकं ॥ प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ॥ जयंतिस्नु
क्पयोभृंगवह्निवातारितैलकैः ॥ प्रत्येकेनक्रमाद्भाव्यं सप्तसप्तपृथक्पृथक् ॥ महावह्निरसोनाम निष्कमस्मैजलैः पिबेत् ॥ विरे
चनेभवेत्तस्य गंधकस्यचतुष्टयं ॥ अभ्रवह्निविडंगानां गुडूचीसत्वनागयोः ॥ कृष्णजीरकटूनांच लवणाक्षारयोरपि ॥ प्रत्येकभाग

मादाय मर्दयेत्सुरसाद्रवैः ॥ वीजपूररसैर्भूयो मर्दयित्वा विशोषयेत् ॥ त्रैलोक्यडंवरं नाम वातोदरनिकृंतनं ॥ गुंजात्रयं क्रमेणानुद
दीनघृतसंयुतं ॥ भोजयेत्स्निग्धमुद्गान्नं वपायसं — विवर्जयेत् ॥ त्रैलोक्यडंवर रसः ॥ ताम्रवक्के रसं वद्धं तुल्यं गंधविषं क्षिपे
त् ॥ मर्दयेद्वह्निकुठराजिकुहृद्विसुरसाद्रवैः ॥ पिप्पलीजीरतोयैश्च त्रिक्षारं पटुपंचकं ॥ सूततुल्यं पृथग्योज्यं जंभोभिर्मर्दितं
क्षणं ॥ ततो लोहस्य पत्रेऽग्निरसे संस्वेदितः क्षणं ॥ गुंजात्रयं ददीतास्य शुंठ्याज्येनार्द्रकेण वा ॥ वक्रधरो रसः ॥ पारदं शि
खिं तुत्थं च जैपालं पिप्पलीसमं ॥ आरग्वधफलान्मज्जा वज्रीदुग्धेन मर्दयेत् ॥ माषमात्रं वटिं खादेन्नीरांजलोदरं हरेत्
॥ चिंचाफलरसं वानुपथ्यं दध्योदनं हितं ॥ रक्तोदरहरश्चैव कठिनेरेवनेनतु ॥ उदरारि रसः ॥ रोहितकसमायुक्ते त्रिक
त्रयं युतं न्वयेत् ॥ प्लीहानमग्रमांसं च यकृद्गुल्मोदराहरां ॥ लोहितकाद्यलोह ॥ सूतं गंधं च मरिचं टंकणं नागराभये ॥ जैपा
लवीजसंयुक्ते क्रमोत्तरगुणाभवेत् ॥ सर्वतुल्या गुडेदेय इछाभेदिरसस्त्वयं ॥ द्विगुंजावटिकां भुक्त्वा ततस्तोयं पिवेदनु ॥ इ
छाभेदिरसः ॥ दरदं टंकणं शुंठी पिप्पली चैव कार्षिकं ॥ हेमाह्वापलमात्रं स्याद्दंतीवीजं च तत्समं ॥ विचूर्णं कत्रसवारिणा
गोदुग्धेनैव साधयेत् ॥ त्रिगुंजरेचनं दद्याद्विष्टंभाध्मानरोगिषु ॥ द्वितीयइछाभेदीरसः ॥ सूतकं टंकणं तुल्यांशं मरिचं सूत
तुल्यकं ॥ गंधकं पिप्पली शुंठी द्वौ द्वौ भागौ विचूर्णयेत् ॥ सर्वतुल्यं क्षिपेद्दंती । वीजानि निस्तुषाणि च ॥ द्विगुंजं रेचनं सिद्धं ना

राचोयंमहारसः॥ प्लीहगुल्मोदरंहंतिपिवेचोष्णेनवारिणा॥ नाराचरसः॥ पिप्पलीमरिचंताम्रंकांचनीचूर्णसंयुतं॥ स्नुहीक्षीरेदिनं
मर्द्यंतुल्यंजेपालबीजकंनिष्कंभक्षंविरेकार्थसत्यंहितिजलोदरः॥ जलोदरारिरसः॥ शुद्धसूतसमंगंधंमृतताम्रायोशिलाजतु॥ रस
स्यतुल्यंप्रत्येकंरसाद्विगुणितंविषं॥ त्रिकटुचित्रकंकुष्टंनिर्गुंडीमूशलीरजः॥ अजमोदाविषांशेनप्रत्येकंचप्रकल्पयेत्॥ पंचांगनिंब
क्काथेनभावयेदेकविंशतिः॥ भृंगराजरसेसप्तदद्यात्क्षौद्रेणलोलयेत्॥ भक्षयेद्बदरीतुल्यांवटिकांचदिवानिशि॥ श्लेष्मोदरंनि
हंत्याशुयास्याद्वैश्वानरोवटी॥ वैश्वानरीवटी॥ जीमूतलोहरसगंधशिलोलताम्रव्योषाग्निकुष्ठमुशलीविषदिप्यचूर्णं॥ निंबाग्निनीरजलजंतकटिका
कृतंतद्भुक्तंनिशाम्बुमधुनासकलोदरघ्नं ------ अष्टौनिस्तुषदंतीबीजमपिचेत्कुर्यात्त्रयोगंधकाद्द्वौद्वौमरीचस्यटंकणारसंचैके
कभागंपृथक्॥ गुंजामात्रमिदंगुडेनकरंरेकंचरीतांतुनाशोफंगुल्मजलोदरंप्रशमयेच्छ्वासोदरघ्नंपरं॥ ------- लवणा
निचसर्वाणिक्षाराःपंचोषणास्तथा॥ मरिचंवाजमोदावहिंगुभल्लातकानिच॥ चित्रकंतालमूलीचगवाक्षीत्रिवृतामता॥ वर्षाभूसुरणोमारणो
विडंगंदंतिग्रंथिकं॥ पलंमाक्षिकचूर्णस्यकंकुष्टकशिलाजतो॥ गुग्गुलुर्गंधकस्यापिपारदस्यपलंपृथक्॥ शीतेपलाष्टकंक्षौद्रंदत्वामधु
घृतान्वितं॥ लोहघृष्टेनसंघृष्टंलोहपात्रोषितंभिषक्॥ विधियुक्तेनविधिनाहिताहारविहारवान्॥ अन्नपानंयथासात्म्यंकुर्वीतनियंति
रामयं॥ उदरेषुचसर्वेषुशोथेषुविविधेषुच॥ अर्शःसुचविशेषेणपांडुरोगेसकामले॥ विधिनोक्तेनकुर्वाणोनरोरोगान्निवंदति॥ उदरारि

रोह ॥ ॥ पुनर्नवामृतावह्निगवाक्षीमाणशिग्रुकः ॥ सूर्य्यावर्त्तीकमूलंच पृथगष्टपलंजले ॥ पादशेषश्रृतंतद्रोणोगुण्टेवस्त्रगालिते ॥
विधिवन्मारितंसूतंपुटितंपुटटटः क्रमैः ॥ लोहचूर्णाष्टपलकंपचेत्ताम्रादिभाजने ॥ अर्कस्यद्विपलंक्षीरस्नुहिक्षीरंचतुःपलं ॥ पलद्वयंकौ
शिकस्यगंधकस्यपलंतथा ॥ पलार्द्धंपारदंतत्रविधिवच्छोधितंक्षिपेत् ॥ सिद्धेवतारितेचूर्णंवक्ष्यमाणंनिधापयेत् ॥ कंकुष्टवह्निवदंतां
गवाक्ष्यांखंडकर्णीकं ॥ पलासस्यचबीजानांकंचुकीतालमूलिकी ॥ त्रिफलाकृमिरिपोनद्दहंतिभवंतथा ॥ सूर्य्यावर्तगवाक्षोश्चवर्षा
भूवज्रवल्लिजं ॥ एतल्लोहसमानाहमात्राभांडेस्निग्धेसुगोपिते ॥ संस्थापितेततःशुद्धोशुपक्कापादशेषंनीत्वावस्त्रपूतंकृत्वाविधिव
न्मृतपक्कमित्यत्र दरदद्वादशांशः गुरुपुटितलोहचूर्णपल ८ ॥ ताम्रभाजनेक्षिप्त्वा तत्क्वाथेछित्वा·अर्कक्षीरपल २ स्नुहीक्षिरपल
४ गुग्गुलपल २ गंधकपल २ पारदकर्ष २ पुनः कंकुष्टःभल्लातक·विशाला·एरंड·पलासबीजं·शाल्मली·मूशली·त्रिफला·विडंग·त्रि
वृत्·दंतीबीज·सूर्य्यभक्ता·पुनविंशाला·पुनर्नवा·वज्रवल्ली·पृथगष्टपलंक्षिप्त्वापचेत्·पुनस्निग्धभांडेसंस्थाप्य·मात्राशाणमिता
अनुपानंयथायोग्य ॥ येचशोथा·दुर्वाराविरकालानुबंधिनः ॥ तेसर्वेनाशमायांतिप्रयोगादस्यसर्वथा ॥ उदराणिपांडुरोगाकामलास
हलीमकं ॥ अर्शोभगंदरंगुल्मंकृमिकुष्टहरंपरं ॥ येचाप्येवंविधारोगाश्चिरकालानुबंधिनः ॥ तेसर्वेनाशमायांतिमुनिवाक्यप्रसादतः
॥ नातःपरतरःकिंचिच्छोथोदरविनाशनं ॥ शोथोदरारिलोह ॥ इत्युदराधिकारः ॥ अथशोथः ॥ दरदंगरलंगंधशुद्धंव्योषंवरांग

कं॥ जातीकोशं जातिफलं लवंगं च समं समं॥ सर्व्वचूर्णीकृतं भाव्यं निर्गुंडीस्वरसेन तु॥ कलायसदृशीं कुर्याद्वटीमेकां च भावयेत्॥ शोथारिसंज्ञ
को ह्येष सर्वशोथविनाशनं॥ श्वासकासाग्निसरच्छ्रग्रहणी च विशेषतः॥ शोथारीरसः॥ कटुकं त्रूषणं दंतीविडंगं त्रिफला तथा॥ चित्र
कोदेवदारु श्चत्रिवृद्धारणापिप्पली॥ चूर्णान्येतानि तुल्यानि द्विगुणंस्याद्योरजः॥ क्षीरेणापीतमेतत्तु श्रेष्ठं स्वपथुनाशनं॥ कटुकादि
लोहं॥ व्योषत्रिवृच्चित्रककणाहरीतीवसाप्यारजस्का त्रिफलारसेन॥ पीतोकफोत्थशमयेत्तु शोथं गव्येन मूत्रेण हरीतकी च॥ व्योषादिलो
हं त्रिकटुत्रिफलादंतीमार्गीत्रिमदशुंठकैः॥ पुनर्नवासमायुक्तैर्युक्तो हंति सुडर्जयः॥ लोहशोथोदरस्थौल्यमेहो मेदमशंशयः॥ मार्गी
पमं॰ मार्गीमूलं॰ त्रिमदं॰ मुस्ताचित्रक॰ विडंग॰ शुंठकं॰ शुष्कवालकंमूलं॥ त्रिकत्रयाद्यंलोह॥ रसगंधकलोहकणातहन्तामरिचामरदा
रुनिशात्रिफला॥ दलितंमडुगोसलिलेनपिवेद्गुरूपहयथं स्वयथूदरकं॥ स्वयथूयानोरसः॥ गोमूत्रसिद्धमंडूरसुरभिरसभावितं॥
मानकंदरसेनापिभावयेद्दिवसत्रयः॥ त्रिफलाकटुवचानांचूर्णंपाणितलद्वयं॥ क्षिपेत शुद्धपाके पमधुनं च पलद्वयं॥ निहंति सर्वज
शोफं सर्वांगेषु विशेषतः॥ गोमूत्रमंडूरः॥ इति शोथाधिकारः॥ अथ वृद्धिः॥ हिंगुलसंभवं सूतं गंधकं मृतताम्रकं॥ काश्यवंगंहरि
तालंतुत्थं शंखवराटकं॥ त्रिकटुंत्रिफलालोहविडंगंपटुपंचकं॥ चविकापिप्पलीमूलंहवुषावचवातथा॥ शठीपाठादेवदारुएलाच
वृद्धदारुकं॥ एतानि समभागानि चूर्णं वटिकां करु॥ हरितकीरसंदत्वापंचगुंजो मितांशुभां॥ एकैकांखादयेद्रोगीशीतलंपिवेत

श्रीपदंकफवातोत्थंरक्तमामाश्रितंचयत्॥मेदोगतंधातुगतंहंतिवंहणंनसंशयः॥अर्बुदंगंडमालांचअंत्रवृद्धिविरंतनः॥वातवृ
द्धिंश्लेष्मवृद्धिंपित्तवृद्धिंनिहंतिच॥वातपित्तेश्लेष्मवातेद्वंद्वरोगेक्रमात्तथा॥अग्निवृद्धिकरोह्येषवलवर्णंतुसंस्थितं॥श्रीमद्रुद्रन
नाथेननिर्मितोविश्वसंपदे॥नित्यानंदरसोनामश्लीपदव्याधिघातकः॥आनंदयतिलोकेशशीतेवाराणङरंयथा॥तथैवरोगिणां
नित्यंवृध्यवृद्धौचसर्वदा॥रक्तजेपित्तजेवापिपथ्ययोज्यंसदावुधैः॥नित्यानंदरसश्चायंयत्नतःश्रीपदेगदे॥कार्योभिषग्भिर्ज्ञात
द्भिर्यथाशक्तिनसंशयः॥केचिद्धिवाधिनामवतिकेतिवदंतिच॥नित्यानंदरसः॥ ॥प्रख्यातंसर्वरोगघ्नंसूतभस्मचकेवलं॥यो
जयेद्योगवाहंवाश्रीपदस्यनिवृत्तये॥अत्रवृद्धौयोगवाहानसारसांश्चपर्पटिमपि॥योजयेत्परिशुद्धस्यमासमेरंडतैलभाक्॥यो
मवाहः॥ ॥इतिवृद्धिश्रीपदाद्यधिकारः॥अथगलगंडः॥कर्षसूतंशुद्धमस्यगंधकंत्वर्द्धमुत्तमं॥सार्द्धकर्षंताम्रभस्मशस्त्र
कीटंचकर्षकं॥व्योषषट्कर्मतुलितंमक्षार्द्धंसैन्धवसितं॥कांचनारत्वचचूर्णंपलमत्रमितंक्षिपेत्॥पलत्रयगुग्गुलोश्चशु
द्धस्यसप्रपाहरेत्॥एतच्चूर्णात्तुसंमेल्यगुरभिःसर्पिषाहरुं॥गंडमालाकंदनोयंरसोमाषत्रयात्मकं॥भुक्तोनिहंतिगंदानिगं
डमालाचदारुणाः॥गंडमालाकंदनरसः॥गंधकंकर्षमात्रंचशिवास्यात्कर्षपंचकं॥द्विकर्षमाक्षीकंचैवगोघृतंचपलोन्मि
तम्॥एकीकृत्यततःसर्वंकर्षकंचापिवेत्ततः॥गोमूत्रेणैवसंयुक्तंगलरोगविनाशयेत् — — — — — — ॥इतिगल

गंडमालाधिकारः॥ अथार्बुदः॥ शुद्धसूतं समं गंधं मर्दयामचतुष्टयं॥ नागवल्लीदलस्यांतो मेघनादपुनर्नवाः॥ गोमूत्रं पिप्पलीशु
क्तं मर्दयेद्ध्यापुटे द्व्यहं॥ लिहेत्क्षौद्ररसो रौद्रं गुंजामात्रोर्बुदं जयेत्॥ रौद्ररसः॥ इत्यर्बुदाधिकारः॥ अथ विद्रधीः॥ वरुणादिकषा
येणारसगंधककज्जलि॥ शुक्कानि हंति मात्रैकं वाह्यमंत्रश्च विद्रधीः॥ सर्वरोगादितं सर्वयोगवाहं च योजयेत्॥ विद्रधौ व्रणाव
त्सर्वकर्मकुर्याद्भिषग्वरः॥ कज्जलीयोगः॥ इति विद्रध्यधिकारः॥ अथ व्रणाः॥ रसगंधकयोश्चूर्णांतत्समं मृद्दशंखकं॥ स
र्वं तुल्यं तु कंपिल्लं किंचित्तुत्थसमन्वितं॥ सर्वं संमेलयेद्दत्वाघृतं सर्वं चतुर्गुणं॥ पिचुस्तुतं प्रदातव्यं दुष्टव्रणविशोधनं॥ ना
डिव्रणहरं चैव सर्वव्रणनिषूदनं॥ ये व्रणा न प्रशाम्यंति भेषजानां शतैरपि॥ अनेनैव प्रशाम्यंति सर्पिषा स्वल्पकालतः॥ र
सादिमलहरः॥ रसगंधकसिंदूरंगलकंपिल्लमूर्द्रकं॥ तुत्थास्वादिरकं सार्धं सर्वघृतं चतुर्गुणं॥ युक्त्या संमेल्य पिचुना व्रणे दे
यं विजानता॥ सर्वव्रणप्रशमनं घृतमेतन्न संशयः॥ रसादिमलहरः॥ द्वितीयः॥ गंधे शालिफलं तुल्यं स्नुहवीरमर्दितं॥ क
मार्कवनरमूत्रेण चित्रकेन सिंधुना॥ सौवर्चलेन वचया थग्युक्त्या च विविधेक्रमात्॥ व्रणरोगेषु सर्वेषु शस्तो जातेव्रणेषु च॥ लूता
भगंदरे गंडगंडमालासु योजयेत्॥ क्षौद्रेण वा यथायोग्यं त्रिवल्लपुरसंपुतं॥ पथ्यं च शालयो मुद्गा गोधूमाः सघृता हिताः॥ व्रण
रोपणो रसः॥ इति व्रणाधिकारः॥ कर्चूरकरसैस्तैलं सिद्धार्थकभवं भिषक्॥ पचेत्सिंदुरकल्केन नाडिदुष्टव्रणं जयेत्॥ —

------ ॥ इति नाडिव्रणाधिकारः ॥ अथ भगंदरः ॥ रसेंद्रभागद्वितयं म्लेक्षक्षारं चतुर्गुणं ॥ काकजंघारसैर्मर्द्यं खल्वे
दिवसपंचकं ॥ ताम्रसंपुटके रुध्वा सछिद्रे हंडिकांतरे ॥ निवेश्य वालुकादत्वा दद्याग्निप्रहराष्टकं ॥ स्वांगशीतं समुद्धृत्य मधुटंक
णसंयुतं ॥ धमेन्मूषागतं तावद्यावद्द्रवति तारवत् ॥ रूपराजरसो ह्येष भगंदरकुलांतकं ॥ वल्लमात्रमधुंलीढ्वा मधुनासह पथ्यभुक्
॥ त्रिफलायाः पिबेत्क्वाथं पंचात्पथ्यं हितं चयेत् ॥ शुक्र खल्वे रहोमिस्याद्भगंदरमहान्गदान् ॥ रूपराजरसः ॥ भागो रसस्य गंधस्य
द्वौ कन्यो विमिमर्दयेत् ॥ कृत्वा गोलं ताम्रपात्रं तावत्तस्योपरि क्षिपेत् ॥ भस्मनापूर्य तत्रोर्ध्ववह्निं कुर्याद्दिनत्रयं ॥ शीतमुद्धृत्य जंबीरं
वारांत्सप्तधा पुटेत् ॥ गुंजास्य मधुसर्पिर्भ्यां हंति सद्यो भगंदरः ॥ तालमूलीसलशुनं पिबेद्गुसकांजिकं ॥ त्रिनेत्रो रसः ॥ सूतस्य द्वि
गुणेन शुद्धबलिना कन्यापयोभिर्घ्यहं पिष्ट्वा ताम्रमयं समस्तकलितं पात्रं निधायोपरि ॥ स्वेद्यं यामयुगं सभस्मपिठरीनिंबुजलैः सप्तधा
साकं तत्पुटये भगंदरहरो गुंजामितः स्यादिति ॥ रविताण्डवरसः ॥ इति भगंदराधिकारः ॥ अथोपदंशः ॥ पारदं गंधकं तालसिंदू
रं च मनःशिलाः ॥ ताम्रपात्रे तु सघृते ताम्रेणैव विमर्दयेत् ॥ घर्मे दिनैकं मर्दितमेतत् कंडूपदंशजित् ॥ पारदादि ॥ लवंगं पारदं गु
डं मरिचं करहाटकं ॥ जंतुघ्नं मस्तकी चैव प्रत्येकं कर्षसंमितं ॥ चतुःकर्षा जवानी च गुडं तद्विनिक्षिपेत् ॥ भल्लातकानां शुद्धा
नां विंशति छित्ररांणवधः ॥ चूर्णयित्वा तु तत्सर्वं गुटिकां कारयेद्बुधः ॥ कर्षमात्रां ततः खादेदेकां प्रातर्हि नाशनं ॥ नीवूलभक्षयेत्य

॥ सात्म्यद ॥
॥ १८९ ॥

श्चात्पथ्यं दुग्धोदनं हितं ॥ सप्ताहान्मुच्यते जंतुः फिरंगाख्योपदंशतः ॥ संधिशोफास्थिशोफं च शूलं संधिरुजेपि च ॥ उपदंशे भगसिं-
हाख्यो रसोयं शंभुनोदितं ॥ सोपदंशान् व्रणांश्चैव कुष्ठिनां च सुखाय्यवै ॥ उपदंशगजकेशरि रसः ॥ रसआकारकरभोलवंगमरि-
चं तथा ॥ विडंगमस्तकिश्चैव तत्प्रत्येकं त्रिलवं मतं ॥ अरुष्करीणां दातव्या द्विगुणात्वेकविंशतिः ॥ दीप्यस्य द्वादशलवाः गुडस्या-
पि तथा मता ॥ धृत्वा समेत्य गुटिकाः खादेत्कर्षद्वयोन्मिता ॥ पथ्यं दुग्धोदनं रम्यं तांबूलं परिशीलयेत् ॥ घस्राणामेकविंशत्या
मुच्यते नूपदंशतः ॥ उपदंशभकेशरी रसः ॥ पारदं टंकमात्रं स्यात्खदिरं टंकसम्मितं ॥ आकारकरभश्चापि ग्राह्यं टंकद्वयोन्मि-
तं ॥ टंकत्रयमितं क्षौद्रं खल्वे सर्वं विमर्दयेत् ॥ तस्य सम्यग्भिषक्कुर्यात्समामासप्रवटी शुभा ॥ सरोगी भक्षयेत्प्रातरेकैकां मधुना वटि
॥ वर्जयेदम्ललवणौ फिरंगतस्य नस्यति ॥ फिरंगसंज्ञको रोगो रसः ॥ कर्पूरसंज्ञकः ॥ अवश्यं नाशयेदेतद्दुपूर्वचिकित्स-
काः ॥ लिख्यते रसकर्पूरप्राशनेविधिरुत्तमः ॥ अनेन विधिना खादन्मुखशोथं न विंदति ॥ गोधूमचूर्णं संमिश्य विदध्यात्सूक्ष्म-
कूपिकाः ॥ तन्मध्ये निक्षिपेत्सूतं चतुर्गुंजामितं भिषक् ॥ ततस्तु गुटिकां कृत्वा यस्यास्तस्याङ्ग्रासोवहि ॥ सूक्ष्मचूर्णं लवंगस्य तां-
वटीमवधूरयेत् ॥ दंतस्पर्शो यथा न स्यात्तथा तामंभसा गिरेत् ॥ तांबूलं भक्षयेत्पश्चात्क्षाकाम्ललवणं त्यजेत् ॥ श्रममातप-
मध्वानविशेषात्स्त्रीनिषेवणं ॥ तत्र रसकर्पूरविधिः ॥ शुद्धसूतरसं कुर्यात्प्रत्येकं गैरिकं शुधी ॥ इष्टिकां खटिकां तद्वत्स्फटिकां

॥ रामः ॥
॥ १८९ ॥

सिंधुजन्म च॥ वल्मीकक्षारलवणंभांडरंजकमृत्तिका॥ सर्वाण्येकत्र संचूर्ण्य वाससा चापि शोधयेत्॥ एभिश्चूर्णैर्युतं सूतं चतुर्या
मं विमर्दयेत्॥ तच्चूर्णसहितं सूतं स्थालीमध्ये विनिक्षिपेत्॥ तस्यां स्थाल्यां मुखे स्थालीमपरां धारयेत्समाः॥ तच्चूर्णसहितं स्था
लीसवस्त्रस्फुटितं मृदा॥ सवस्त्रकुट्टितमृदां मुद्रयोडभयोर्मुखं॥ संशोष्य मुद्रयो भूयो भूयः संशोष्य मुद्रयेत्॥ सम्यग्विशोष्य मु
द्रां तु स्थाली चुल्ल्यां निधापयेत्॥ अग्निं निरंतरं दद्याद्यावद्दिनचतुष्टयं॥ अंगारोपरि तं यंत्रं रक्षेद्यत्नादहर्निशं॥ शीतं तदुद्घाटये
द्यंत्रमूर्ध्वस्थालीगतं रसं॥ कर्पूरवत्सविमलं गृह्णीयाद्रसमुत्तमं॥ तदेवं कुंकुमचंदनं कस्तुरिकुंकुमैर्युक्तं॥ सूतपल ४॥ गैरिकपक्व
इष्टिकाचूर्ण· खटिका· स्फटिका· सैंधव· वल्मीकमृत्तिकाक्षारलवणभांडरंजकमृत्तिका सर्वं पृथक् चतुःपलं ४।४ सूक्ष्मचूर्णं कृ
त्वा वस्त्रपूतं कृत्वा पुनस्तच्चूर्णं सूतं च मर्दयेत्॥ यामः ४ तत्र मृत्पक्वसुदृढां मृन्मयहंडिकायां संस्थाप्य सप्तभिर्मृत्कपटैर्लिप्तां मु
द्रां च दत्वा विद्याधरयंत्रे चुल्ल्यां निवेश्याग्निं निरंतरं यावद्दिनचतुष्टयं दत्वा पुनरंगारोपरि यंत्रं संस्थाप्य सप्तभिः॥ मृत्कपटैर्लिप्तां मु
द्रां च दत्वा विद्याधरयंत्रे चतुल्ल्यां निवेश्याग्निं निरंतरं यावद्दिनचतुष्टयं दत्वा पुनरंगारोपरि यंत्रं संस्थाप्य यावच्छीतं भवति॥ यंत्रो
परि शीतलवस्त्रादिनाच्छाद्य वनत्वमुक्त्वा यंत्रमुत्थाप्य उपरिस्थं कर्पूरवद्विमलं रसं गृह्णीयात्॥ मुक्त्वा संस्थाप्य च पुनः कर्पूररस
कर्ष १ लवंग· श्रीखंड· कस्तूरि· कुंकुम जातीपत्री च पृथक् पृथक् कर्षः २।१ मेलयित्वा तांबूलपत्ररसेन याममेकं मर्दयित्वा वस्त्रपुगमंगु

टिकांकृत्वादंतपर्शीयथानस्यात्तथैवयुक्त्याखादेत् ॥खादंहरतिफिरंगंव्याधिंसोपद्रवंसपदि ॥विंदतिवंह्नेर्दीप्तिपुष्टिंवीर्यबलंविपुलं ॥रसय
तिरमरणीशतंतंरसकर्पूरस्यासेवकसततरसकर्पूरः ॥ ॥पारदंकर्षमात्रंस्यात्तावत्स्यवहिंगंधकं ॥तंदुलावाक्षमात्रास्युस्तेषांकुर्य्याच्चकज्ज
ली ॥तस्यास्तत्रवटिंकुर्य्यात्ताभिधूमंप्रयोजयेत् ॥दिनसप्तेनतेनस्यात्फिरंगार्त्तोनसंशयः ॥ धूमप्रयोगः ॥पीतपुष्पवलापत्ररसैष्टंक
मितंरसं ॥हस्ताभ्यांमर्दयेत्तावद्यावत्सूतोनदृश्यते ॥ततःसंस्वेदयेत्तुल्लोदेववासरसप्तकं ॥त्यजेल्लवणमम्लंचफिरंगतस्यनस्यति ॥हस्त
मर्दनप्रयोगः ॥अर्द्धकर्षमितंसूतंकुरंटकरसैःसह ॥खल्लेविमर्दयेत्तत्तुपलार्द्धंगुग्गुलुंक्षिपेत् ॥तत्रार्ककरभंकुष्टंत्रिफलांचपृथक्पृ
थक् ॥अर्द्धकर्षमितंसर्वंचूर्णयित्वाविनिक्षिपेत् ॥ततःसर्वंमधुसर्पिर्भ्यांद्विपलाभ्यांपृथक्पृथक् ॥मर्दयेदथतद्वादेदर्द्धकर्षमितंतन
रः ॥व्रणाफिरंगरोगोत्थेस्तस्यावश्यंविनश्यति ॥अन्येपिविरजातेपिप्रशाम्यंतिमहाव्रणाः ॥एतद्भक्षयतोशोथोमुखस्यात्रनजायते॥
॥ वर्जयेदम्ललवणमेकविंशतिवासरान् ------- दरदंकर्षमात्रंचत्रिजवानीत्रिकार्षिकान् ॥आकारकरभंकर्षभल्लातक
कंसंमितं ॥गुडंसर्वसमंदत्वामर्दयेद्यामयुग्मकं ॥कोलास्थिमानावटिकाप्रातःसायंचभक्षयेत् ॥फिरंगोपद्रवासर्वानाशम्येनात्रसंशयः
॥ मृकुकुष्मांडकोमाजेपोत्रिसप्ताहान्नसंशयः ॥ ------- कालाजाजिमृकंकुष्टंटंकत्रयमितंपृथक् ॥उभयोःसार्द्धगुणितं
गुडंजीर्णंविनिक्षिपेत् ॥संचूर्णसर्वमेकत्रगुटिपंचदशांचरेत् ॥प्रातःसायंचभोक्तव्यावटिकासप्तवासरान् ॥गोधूमरोटिकासर्पिर्युता

भक्षात्तुकेवला ॥ फिरंगजनिताः सर्वोपद्रवायांतिसंक्षयं ॥ नास्त्यनेन समायोगोफिरंगजनितेगदे ॥ फिरंगजकेशरीरसः ॥ इत्युपदंशाधिकारः
॥ अथ कुष्ठः ॥ रसलिप्ते ताम्रपात्रे गंधकेन तु मारयेत् ॥ साधयेतालकेनैव रसोविश्वेश्वराभिधः ॥ अयंहि सर्वकुष्ठानि वातरक्तंच नाशयेत् ॥
ताम्रतुर्व्यासरसः ॥ विश्वेश्वराभिरसः ॥ तालंताप्यंशिलासूतं शुद्धसैन्धवटंकणं ॥ समंसंचूर्णयेत्खल्वे सूताद्विगुणगंधकं ॥ गंधतुल्यमृतं ताम्रं
जंवीरैर्दिनपंचके: ॥ मर्द्यषड्भिः पुटैः पाच्यं भूधरे संपुटोदरे ॥ पुटेपुटे द्रवैर्मर्द्यं सर्वमेतत्तु षट्पलं ॥ द्विपलं जारितं ताम्रं लोहभस्म चतुःपलं
॥ जंवीराम्लेन तत्सर्वं दिनं मर्द्य पुटेल्लघु ॥ त्रिंशदंशं विषं चास्य क्षिप्त्वा सर्वं विचूर्णयेत् ॥ माहिषाज्येन संमिश्रं निष्कार्द्धं भक्षयेत्सदा
॥ मध्वाज्यैर्वागुटिम्नंत कर्षमात्रं लिहेदनु ॥ सर्वकुष्ठानि हंत्याशु महातालेश्वरो रसः ॥ महातालेश्वरो रसः ॥ भस्मसूतसमोगंधो मृ-
तायताम्रगुग्गुलुः ॥ त्रिफलाश्च महानिंवचित्रकश्चशिलाजतुः ॥ इत्येतच्चूर्णितं कृत्वा प्रत्येकं शाणषोडशः ॥ चतुःषष्टिकरंजस्य
वीजचूर्णं प्रकल्पयेत् ॥ चतुःषष्टिमिते वाभ्रे मध्वाज्याभ्यां विलोडयेत् ॥ स्निग्धभांडे स्थितं खायेद्विनिष्कं सर्वकुष्ठनुत् ॥ रसकुष्ठकुठा-
रोयंगलत्कुष्ठनिवारणं ॥ कुष्ठकुठारो रसः ॥ गंधकाद्वैपलंशुद्धं पीतंदुग्धेन सप्तकं ॥ दुग्धान्नभोजिनो हंति कंडुपामाविवर्चिताः ॥
क्षीरगंधः ॥ गंधेरसंवाकुचिकोत्थवीजं पालाशवीजं चक्रशाणशुंठी ॥ श्लक्ष्णानि मध्वाज्ययुतानि कृत्वा सेवेत कुष्ठं वहिताशितस्तु
॥ कुष्ठदलनो रसः ॥ तालंतुर्यांशनारोदभृशानि श्वेतंन प्रनामावपीडे: ॥ कृष्णाभ्रटंकणेन भ्रमयन्नपि समदो मूषिकायां दृढायां ॥ ताम्र

क्षोदैः समैर्वा बहिरजनीश्च मौरुत्थमूषाण्डु सिद्धस्त्वमेताम्रेथवा यंनिवसिद हन्ते क्षोदमेतेसहंते ॥ नाम्रवन्मारिनाम्ये नेत्रयः कुष्ठविनाशनः ॥ ना
लकाः सर्वरोगघ्राध्मापिन्नानवृजेन्यपि ॥ कुष्ठहरास्तालयोगास्त्रयः सूतव्योमाग्रयस्तुल्यास्त्रिभागो गंधकस्य च ॥ काकोडुंबरिकाक्षीरैः सर्वमे
कत्र मर्दयेत् ॥ माषमानेन गुटिकां कृत्वा तां प्रयोजयेत् ॥ देहशुद्धिं पुरा कृत्वा सर्वकुष्ठानि नाशयेत् ॥ एष वंङ्गाननो नाम साक्षाच्छ्रीभैरवोदि
तः ॥ हन्ति कुष्ठक्षयश्वासं पांडुरोगहरीमकं ॥ अस्पर्शाजीर्णशूलानि सन्निपातसुदारुणं ॥ वंङ्गाननो रसः ॥ नागभस्मसमस्पशारौकं तोल
कं पारदस्य च ॥ द्विनिष्कं शुद्धतालस्य समसूतं गवांजलेः ॥ विषघ्नेतथोडशगुरोः सनैस्तजीर्णे तेयथा ॥ घर्मेस्त्रिघस्रं जंबीरः कुमारि व
ज्रकंदजैः ॥ रसे भंगस्य वांभोभिर्दत्तं वल्लत्रयं दद्देत् ॥ कुष्ठे वास्थिस्थिते वापि शाखानासाविहृषकैः ॥ स्वरभंगे क्षते किंशोमंडले घ्रमहत्व
पि ॥ औडंबरं हन्ति शिवाभ्यां कृष्णं च कुष्ठं त्रिफलाजनेन ॥ डाईकाभ्यां गजचर्मशिध्माविचर्चिकास्फोटविसर्पकंडू ॥ निहन्ति पांडुविवि
ध्रांविपादिन्सरक्तपि त्र्यंकटुकासिताभ्यां ॥ स्वादे गुडिके रात्रम् ताश्चितेन क्वाथेन पथ्यं सघृतं ससक्तुं ॥ तक्रं च मांसं वलितं वयोज्यं जातेवि
रेके ससितं पयश्च ॥ तालकेश्वररसः ॥ गंधं रसं टंकणताम्रलोहं भस्मकृतं मागधिकासमेतं ॥ पंचांगनिंबेन फलत्रयेण विभाविते राजतरो
स्तथैव ॥ नियोजयेद्रक्तकगुंजमानं कुष्ठेषु सर्वेष्वपि रोगसंघे ॥ कुष्ठकालानलरसः ॥ मृतताम्रलोहानां हिंगुलं च पलं पलं ॥ जंबी
रोमत्तवासाभिस्नुह्यर्कविषमुष्टिभिः ॥ मर्द्यं हयारिजद्रावैः प्रत्येकं च दिनं दिनं ॥ एवं सप्तदिनं मर्द्यं तद्गोलं वस्त्रवेष्टितं ॥ वालुकायंत्रगर्भे

श्वेतंत्रिदिनंलघुवह्निना ॥ आदायचूर्णयेत्सर्वंपलैकंयोजयेद्विषं ॥ विपलीपिप्पलीचूर्णमिश्रंसर्वेश्वरोरसः ॥ छिन्नंजलेहयेत्क्षौद्रैर्विचित्रंमं
डलकुष्ठनुत् ॥ वाकुचिदेवदारुंचकर्षमात्रंविचूर्णितं ॥ लिहेदेरंडतैलेनअनुपानंसुखावहं ॥ सर्वेश्वररसः ॥ गंधकेनमृतंताम्रंदशभागं
समुद्धरेत् ॥ उषणापिचभागस्यादमृतंचद्विभागकं ॥ श्लक्ष्णचूर्णीकृतंसर्वंरक्तिकैकप्रमाणतः ॥ दातव्यंकुष्ठिनेसम्यगनुपानस्ययोगतः
॥ गलितेस्फुटितेचैवविशून्येमंडलेतथा ॥ विचर्चिकादद्रुपामासर्वकुष्ठप्रशांतये ॥ उदयभास्कररसः ॥ ॥ भागैकंमूर्छितंसूतंगंधकंव
ह्निवाकुचिः ॥ चूर्णंतुवह्निजीराणांप्रतिद्वादशभागिकं ॥ त्रिंशद्भागंगुडस्यापिक्षौद्रेणगुटिकाकृता ॥ अयंब्रह्मरसोनाम्नाब्रह्महत्यावि
नाशनः ॥ द्विनिष्कभक्षराणांनिसुप्तिकुष्ठमंडुरं ॥ पातालगरुडीमूलंजलैःपिष्ट्वापिबेदनु ॥ ब्रह्मरसः ॥ मूर्छितंसूतकंगंधंफलानिवस्य
वाहरेत् ॥ तुल्यांशंखदिरक्वाथेदिनसंमर्द्यभक्षयेत् ॥ निष्कैकंदद्रुकुष्ठघ्नंपारिभद्राह्वयोरसः ॥ पारिभद्ररसः ॥ शुद्धसूतंसमंगंधंतु
र्थंवमृतंताम्रकं ॥ मर्दितंवाकुचीक्वाथदिनैकंवटिकांकृता ॥ निष्कमात्रंसखादेवहंतश्वीशशिलेखनी ॥ वाकुचीतैलकर्षैकंसक्षौद्र
मनुपानयेत् ॥ शशिलेखावटी ॥ शुद्धसूतंसमंगंधंत्रिफलाभृंगवाकुचि ॥ भल्लातकंतिलकृष्णंनिंबबीजंसमंसमं ॥ मर्दयेद्भृंगराजद्रा
वैःशोष्यंपेष्यंपुनःपुनः ॥ वायसीत्वग्रसीद्रयाभावनाश्चैकविंशतिः ॥ वाकुचीबीजनिर्यूहैःस्तावतिस्ताप्रकल्पयेत् ॥ इत्थंकर्णात्रिसप्ता
हंरसःश्वेतारिकोभवेत् ॥ मध्वाज्यैर्निष्कमात्रंतुभक्षाश्वेतंविनाशयेत् ॥ श्वेतारिरसः ॥ ऊतासमखसंशुद्धंपरमेकरसस्यवै ॥ पलैलो

हस्यताम्रस्यपलंभल्लातकस्यच ॥ अभ्रकस्यपलंचैकंगंधकस्यचगुग्गुलुः ॥ हरितकाविभीतकयोश्चूर्णाकर्षद्वयंद्वयोः ॥ अष्टामाषाधिकं
नत्रधात्र्यायानितलाभिषक् ॥ घृतंव्यष्टगुणंलोहाद्वात्रिंशत्रिफलाजलं ॥ एकीकृत्यपचेत्पात्रेलोहेचविधिपूर्वकं ॥ पाकमेतस्यजानी
यात्पाकज्ञोलोहपाकजित् ॥ विशुधाप्रातरुत्थायगुरून्देवद्विजार्चकः ॥ रक्तिकादिक्रमेणैवघृतभ्रामरमर्द्दितं ॥ लोहंचलोहदंडेनकु
र्यादेतद्रसायनं ॥ अनुपानंचकुर्वीतनारिकेलोदकंपयः ॥ शुद्ररसः ॥ लोहताम्रभल्लातकअभ्रकगंधक·गुग्गुलु·प्रत्येकपलं१ ह
रितकीकर्ष२ विभीतककर्ष२ धात्रीकर्ष६ ॥ गोघृतपल८ त्रिफलाक्काथपल३२ लोहकटाहेपचेत् ॥ लोहदंडेनचालयेत् ॥ पाकं
ज्ञात्वादेवब्राह्मणांवपूजयित्वास्थापयेत् ॥ मात्रातुरक्तिकादिक्रमेणावर्द्धनंदिन१० पुनस्तथैवापकर्षयेच्च अनुपानंतुमध्वाज्याभ्यामि
त्यादिसर्वकुष्ठहरंश्रेष्ठंवलीपलितनाशनं ॥ अग्निदीप्तिकरंहृद्यंकान्त्यायुर्बलवृद्धिकृत् ॥ सेव्यंरसंजांगरजाविकानांविवर्ज्यशाका
म्लमपिस्त्रियंच ॥ शाल्योदनंषष्टिकमुद्गमाज्यंक्षौद्रंगुडंक्षीरमिहक्रियायां ॥ सात्म्यंवरुणादिवृहत्करंजशिलाजतुक्षौद्रयुतंपय
श्च ॥ सर्पियुतंभक्ष्यतोविडंगमाषर्ध्यमेदुर्वलदेहधातु ॥ अम्लंतांकुरंलोहं ॥ स्नानंधात्रीक्षौमाण्यकेकुष्टंरक्तचंदनं ॥ करणाचैतानितु
ल्यानिमर्दयेल्लिंगवारिणा ॥ यकाहमतिसंशोष्यस्थापयेद्दयत्नतः ॥ रसोनिःशेषकुष्टघ्नोधन्वंतरिनिरूपितः ॥ रसोयंसर्वरोग
घ्नोवल्लमात्रप्रमाणतः ॥ पथ्याघृतयुतोवापिसिंधुविश्वान्वितोथवा ॥ धन्वंतरीरसः ॥ शुद्धसूतपलमितंसैन्धवंचपलोन्मितं ॥

शुद्धतालकमर्षांशंचपलार्द्धंशुक्तिरेजरः॥डोरापुष्पिरसेतालंघस्त्रंसंस्थाप्यचोद्धरेत्॥ततोविमर्द्यतालंचखल्वेकुष्मांडजद्रवैः
॥शुक्तिकांसंपुटेदत्वावस्त्रपालाशभस्मनिः॥संस्थाप्यसंपुटंयत्नात्सूत्रंवद्धंगरुक्षयाः॥सभस्मवस्त्रंवेष्ट्वा————मृद्वरैः
॥पलाशभस्मनिस्थाप्यखल्वंडिगतेतथा॥संशुद्धशुक्तिंविपचेगर्भेगजमितेभिषक्॥स्वांगशीतंसमुद्धृत्यसंपुटंसोषधंदृढं
॥कुष्मांडवारिणाखल्वेसंमर्थ्यकूपिकाचरेत्॥पुनरेवंप्रकारेणापुटद्वंद्वंसमाचरेत्॥महातालेश्वरोरसः॥ ॥शुद्धसूतवलिक
ञ्जलंशुभंवद्धयुग्ममवलिह्यसर्पिषा॥वायशीशशिफलाविभीतकक्षौद्रमितमेषवाञ्छितं॥शीलयेदनुपयःपिवेद्धीमवित्र
मेटिहारिरोरिनोरसः॥श्वित्रेभलिहोरसः॥शुद्धसूतंद्विधागंधंमर्द्दकन्याद्रवैर्दिनं॥तत्कोलपिठरिमध्येताम्रपात्रेणरोधयेत्॥
सूतकाञ्चिगणोनैवशुद्धेनाधोमुखेनच॥पार्श्वेभस्मनिधायाथपात्रार्द्धंगोमयंजलः॥किंचिकिंचित्प्रदातव्यंतुल्यायामद्वयंपचेत्
॥वंडाग्निनातदुद्धृत्यस्वांगशीतंसमुद्धरेत्॥काष्ठोदुंवरिकावह्निःत्रिफलाराजवृक्षकं॥विडंगेवाकुचिवीजंक्राथयेत्तेनभावयेत्॥दि
नैकंउदयादित्योरसोदेयोद्विगुंजकं॥विचर्चिकाददुकुष्ठंवेतकुष्ठंचनाशयेत्॥अनुपानंचकर्त्तव्यंवाकुचिफलचूर्णकं॥खदिरस्य
कषायेणासमेनपरिपाचितं॥त्रिशाणांतनुवांक्षीरैःक्वाथैर्वात्रिफलिपिवेत्॥त्रिदिनांतेभवेत्स्फोटंसमाशाशाकिलासके॥नीलीगुंजा
वकाशीसंधत्तूरंहंसपादिकां॥सूर्य्यावर्त्तोन्ववांगेरिपिष्ट्वातुल्यानिलेपयेत्॥स्फोटस्थानप्रशांत्यर्थंसप्तरात्रंपुनःपुनः॥श्वेतकुष्ठानि

हंत्याशुसाध्यासाध्यनसंशयः ॥ उदयादित्यरसः ॥ पिचुमंदफलंशुंठ्यंत्वकपत्रमूलमेवच ॥ पंचैतानिसुसूक्ष्माणिसमचूर्णानिकारयेत् ॥
अर्द्धभागावशेषंतुखदिराशनवारिणा ॥ भावयित्वातुसंयोज्यंडयामेतानिदापयेत् ॥ चित्रकोथविडंगानिव्याधिघातशशर्करः ॥ भल्ला
तकहरितकोश्चश्यामलकगोक्षुरः ॥ चक्रमर्दकवाकुचीपिप्पलीमरिचंनिशा ॥ लोहचूर्णसमायुक्तंसमभागंप्रमाणतः ॥ भावयेद्भृं
जडावैःपुनःशुष्काणिकारयेत् ॥ निर्वाद्धसर्वमेतेषांमेकीकृत्यनिधापयेत् ॥ विडालपदमात्रंतुसर्पिषापययस्यापिवा ॥ प्रातःप्रातर्निषे
वेतखदिराशनवारिणा ॥ परिहारोनवानास्तिपंचनिंवेदतिष्ठति ॥ मासमात्रप्रयोगेनकुष्ठंहंतिरसायने ॥ त्वग्दोषनीलिकाव्यंगं
तथैवतिलकालकान् ॥ अष्टादशविधंकुष्ठंसप्तचैवमहाक्षयान् ॥ सर्वव्याधिविनिर्मुक्तोजीवेद्वर्षशतंसुखी ॥ पंचनिंबलोहं ॥ त्रैफ
लस्यतुचूर्णस्यपलानिदशपंचच ॥ सप्ताचैवविडंगानांलोहचूर्णपलद्वयं ॥ शतंभल्लातकानांचपलानिदशवाकुची ॥ शिलाजं
तुपलद्वैकंतुद्वेद्वेपलेगुग्गुलुतथा ॥ पलपुष्कलमूलस्यापलार्द्धपलमेवच ॥ सचित्रकंचमरिचंपिप्पलीविश्वभेषजं ॥ त्वकपत्रकंकुमं
मूलंकार्षिकान्संप्रकल्पयेत् ॥ यावंत्येतानिचूर्णानितावत्तंडुप्रदापयेत् ॥ पलिकाम्भोदकान्कृत्वाप्रातरुत्थायनित्यशः ॥ एके
कंभक्षयेत्प्राज्ञयथेष्टंचान्नभोजनं ॥ कुष्ठान्यष्टादशानीहप्लीहगुल्मभगंदरं ॥ अशीतिवातजान्रोगान्चत्वारिंशच्चापिपित्तजान्
॥ विंशतिश्लेष्मिकाश्चैवतथैवसन्निपातजान् ॥ कालत्वगतरोगाश्चशिरोक्षीभ्रूगतांस्तथा ॥ कंठतालुगताश्चैवजिह्वायामुपजिह्वि

कां॥ ऊर्द्ध्वजत्रुगते रोगे भक्तस्योपरि दापयेत्॥ शरीरे दापयेत्सर्व्वमोदर्य्यमध्यभोजने॥ निर्द्दिष्टरोगाक्रमयेत्क्रियमाणां रसस्यतम्॥
त्रिफलामोदकः॥ यः पुराशम्भुनिर्वैरे रुद्राहृतोऽथ्यश्विकिन्नकवरैः समाहृतः॥ यः सकृष्टिपरमोपकारको नागमारणविधिः सलिख्य
ते॥ यथा सुपक्कं स्थालिकामेकामारुकांवुधृतिक्षमा॥ गुडचूर्णकृतैः पङ्कै रागलं लेपयेद्बहिः॥ गंधकं भिषगानीय शरावमितमु
त्तमं॥ चूर्णयित्वा तदर्द्धं तु तस्यां स्थाल्यां प्रसारयेत्॥ शरावार्द्धस्य ताम्रस्य पत्राण्यतितनूनिव॥ स्थाल्यां यत्नगंधकं तस्मिन्नुपर्युप
रि धारयेत्॥ शरावार्द्धस्य शीसस्य पत्राणि वतनूनि च॥ धारयेत्ताम्रपत्राणामुपर्य्येवं तथैव च॥ गंधकस्य शरावार्द्धं पत्राणामंतरं
तरा॥ दत्वा तस्योपरि शृंगं तु सर्व्वेषामुपरि क्षिपेत्॥ ततः पिधानं दत्वा तु विदध्यात्संधिमुद्रणं॥ गुडं चूर्णं च खदिरं मिश्रयेत्तन्मुद्रये
त्॥ मुद्रां संशोष्य तां स्थाली चुल्ल्यामुपरि क्षिपेत्॥ तदधो ज्वालयेदग्निं द्वादशप्रहरावधि॥ स्वांगशीतं समुत्तार्य्य ततो निःकास्य चौ
षधं॥ शिलायां चूर्णयित्वा तु वस्त्रपूतं च कारयेत्॥ त्रिडोराजतलयोगेनु विशालास्यं महाघटं॥ गुडचूर्णकृतैः पंकै रागलं लेपयेद्बहिः॥
सर्पिःषष्ठ्यंगुलायामसार्द्धषष्ठ्यंगुलोपि वा॥ सप्तरिक्तकृतस्वर्णस्याकिं वा गोधूमवर्णवान्॥ वंधं तस्य विधानञ्चो यथा देहो न मियते॥ ता
लकं सदलं यत्नचूर्णयेत्कांडवद्वयं॥ विषंपलमितं चूर्णं दद्यात्त्वांतरांतरे॥ एवं यथोपदेशेन पूरयेभूजगोदरे॥ ततः पलविषंभु
संवाऽजवीप्रस्थसंमितं॥ मद्यानकानां पक्कानां प्रस्थमिंडजवं तथा॥ सर्वाणि सम्यमास्तीर्य्य धारयेत्तन्महाघटे॥ तेषामुपरि सर्पं च

धारयेत्कुंडलीकृतः ॥ सर्पस्योपरि राछ्छाय धार्य्यारोपेतानिपीडितैः ॥ सनालमर्कपत्रं तु शरावयुगले क्षिपेत् ॥ स्नुही दलं सनालं च क्षिपेत्प्रस्थमितं तथा ॥ वटप्ररोहप्रस्थं च कुमारीप्रस्थसंमितं ॥ दत्वापिधानचूर्णेन गुडेन खदिरेण च ॥ मुद्रयेत्सह वस्त्रेण मृदा कुट्टितयापि च ॥ मुद्रां संशोष्य चुल्यां तु धारयेत्तं महाघटं ॥ तदधो ज्वालयेदग्निं याममेकं तथोदने ॥ ततो हषग्नि दातव्यो यावत्स्युः प्रहरा दश ॥ पुनः प्रहरमेकं च वह्निं दद्याद्यथोदने ॥ ततो लोहकटाहे तु शरावत्रितयान्विते ॥ गोघृते प्रक्षिपेत्सर्वमौषधं यत्तु घटे स्थितं ॥ दत्वाग्निं ज्वालयेत्तावद्यावदुत्तिष्ठतेनलः ॥ भेषजं च भवेच्छं ततस्तस्मिन्नुपरि क्षिपेत् ॥ सुभ्रष्टास्फटिकाख्यायाश्च पलं तत्र निक्षिपेत् ॥ भ्रष्टस्यटंकणस्यापि पलयुग्मं च निक्षिपेत् ॥ ततः प्रहरमेकं तु ज्वालयेच्चुल्लिकोपरि ॥ पूर्वसिद्धं ताम्रमेसं संमिश्रयित्वावतारयेत् ॥ रसो नागवधाख्योयं विधिनानेन सिध्यति ॥ आदौ तु जामितं खादेत्तावन्मरिचसंयुतं ॥ क्रमेण वर्द्धयेत्तावद्यावद्गुंजाचतुष्टयं ॥ सुदृढां सुपक्वां मृण्मयपात्रं आढकजलक्षमां बहिस्तु चूर्णमिश्रितंपंकलिप्ता ॥ तदुपरि मृण्मयकर्पटं लेपयित्वातपे शोषयित्वा तत्पात्रे शरावमितं शुद्धं गंधकं चूर्णितं तस्यातल्यां प्रसारयेत् ॥ पुनःकुडवमितं शुद्धं ताम्रपत्रमतिसूक्ष्मं कृत्वा गंधकोपरि धारयेत् ॥ पुनः पुनः पत्राणामंतरांतरं गंधकचूर्णं दत्वोपरि शेषं क्षिपेत् ॥ पुनः शुद्धशीलस्यपत्र· पलचतुष्टयं ४ तदुपरि स्थापयेत् ॥ ततः पिधानेन तदुपरि दत्वा मुद्रयित्वा संशोष्य चुल्यां धारयेत् ततदधोग्निं ज्वालयेत् ॥ पुनर १२ स्वांगशीतमुत्तार्य्य शिलायां पिष्ट्वा वस्त्रपूतं च

कारयित्वा स्थापयेत् ॥ पुनस्तु दृढं त्रिजारणां तु सहां विशालमुखां पूर्ववद्धत्रेपयित्वा संशोष्य वसपषट्यंगल ६० मितासार्द्धषष्टंगलायाम
कृष्णं वा गोधूमवर्णं वा · सर्पवधं कृत्वा यत्नतः ॥ यथा देहो न भिद्येत तत्र तालककुडवद्वयं विषंपलमितं चूर्णयित्वा सर्पोदरे पूरयेत्
॥ ततः विषपल १ वाकुचीपल १६ मत्स्यातकपल १६ इन्द्रयवपल १६ तन्यात्रे सर्वाणि आस्तीर्य तदुपरि कुंडलीकृतं सर्पं स्थापयेत् ॥
सर्पोपरि हरितालेअर्कपत्रापल १६ स्नुहिदलनालेवपल १६ व ८ प्ररोहपल १६ कुमारिपल १६ दत्वा तस्योपरि पिधानं दत्वा मूद्र
यित्वा पूर्ववन्मृद्वस्त्रेणमुद्रां संशोष्य चचूल्यां मारोप्याग्निं दत्वा याम २ पुनर्हठाग्निं याम १० पुनर्याम १ औदनाग्निं दत्वा स्वांगशी
तमुद्धृत्य लोहकटाहे गोघृतपल २८ प्रक्षिप्य घटे स्थितं चौषधं च ॥ प्रक्षिप्य अग्निं दत्वा यावत्प्रज्वलति ततः श्वेतवर्णं च भवति · शुभ
स्फस्फटिकापल २ मत्स्टंकणापल २ तत श्रुहित्रिकोपरिचारयेत् ॥ पुनः पूर्वसिद्धं ताम्रनागौ च संमिश्र्य चालयेत् ॥ ततो उद्धृत्य मात्रा गुंजा १ अनुपानं तु
रोगानुरूपं वर्द्धमानमात्रा वन्तुरूपं च वर्द्धयेत् मरिचं चापि तथैव हि तथा रसः ॥ यवज्ञारेणनिकांमोत्युदग्धावा षष्टिकोदनः ॥ लवणं वर्जयेत्सप्रदिनं लव
णलोलुपः ॥ सैंधवं खादयेत्तेन तत्र स्वसप्रदिनोपरि रसो नान्येन सामयंति कृसूनि सकलान्यपि ॥ संनिपाताश्च नश्यंति राजयक्ष्मादयस्तथा ॥ ना
गवह्निरसः ॥ शुद्धसूतं मृतं चाभ्रं गंधकं मर्दयेत्समं ॥ दिनं निर्गुण्डिकाद्रावे रुध्वा भूधरे पचेत् ॥ वाकुची काकमाची च त्रिफला चूर्णयेत्समं ॥ मध्वा
ज्यैकर्षमात्रं च अनुपानमिदं लिहेत् । कपालविषमं कृष्णं हंति सोमेश्वरो रसः ॥ सोमेश्वररसः ॥ शुद्धसूतसमं गंधं सूतात्तालं च मर्गणा ॥ कुकुटी

॥सान्मदः॥
॥१९५॥

पर्णीनीरेवावाकुच्यावाकषायकैः॥ दिनैकंमर्दयेत्खल्वेतन्मिश्रंतुल्यंमृतायसं॥ अयस्तुल्यंमृतंताम्रंमर्दयेद्दिनपंचकं॥ पूर्वक्वाथद्रवैर्वाथसर्वं
तद्गोलकीकृतं॥ वर्षाभूभूनागपत्रैश्चमूषागर्भंविलेपयेत्॥ तन्मध्येनिक्षिपेद्गोलंलेप्यकल्कैस्तथोपरि॥ रुध्वाधोभूधरेपाच्यासमुद्धृत्यविभा
वयेत्॥ सप्तधाहस्तिगंजैस्तोयेमधुमिश्रैर्निरुध्यव॥ गुंजीचूर्णंतथाक्षौद्रंकपालादिनियच्छति॥ तालकेश्वररसः॥ ॥भस्मसूतंविषंगंधं
वचावह्निफलत्रयं॥ धुस्तूरबीजंविडंगानिशृंगीभस्मत्रालगंधकं॥ शिखित्थंकरामतुल्यंसर्वमेकत्रचूर्णयेत्॥ त्रिफलाक्वाथसंयुक्तंकां
स्यपात्रेस्थितंनिशि॥ कर्षमात्रंलिहेत्प्रातःसर्वकुष्ठनिवृत्तये॥ षण्मासाद्धन्तिकापालरसोयंपिंगलेश्वरः॥ पिंगलेश्वररसः॥ ॥
स्वरसेराजवृक्षस्यतालगंधमनःशिलाः॥ गुंजावाकुचिकाद्रावैर्भाव्यंकणनिभेलके॥ प्रतिज्ञावेद्दिनैकंतद्भक्षयेद्धनिष्कटं॥ कुष्ठमौडुं
वरंहंतित्रिदंडोयंमहारसः॥ मधुवाजीवाकुचिचूर्णंकर्षैकमवलेहयेत्॥ त्रिदंडोरसः॥ मृतताम्राभ्रकंतुल्यंतयोसूतंचतुर्गुणं॥ शुद्धंत
न्मर्दयेत्खल्वेनक्षपिष्टंसगोलकं॥ गोलतुल्यंशुद्धगंधंलोहपात्रगतंदिनं॥ तन्मध्येगोलकंपाच्यंयावज्जीर्यतिगंधकं॥ तावन्मृदग्नि
नापाच्यासमुद्धृत्यविचूर्णयेत्॥ गुग्गुलुनिंबपंचांगत्रिफलावासमृतांविषं॥ पटोलखदिरंसारंव्याधिघातंसमंसमं॥ चूर्णितंमधुनाले
ह्यंनिष्कमौडुंवरापहं॥ रससंकोचगोलोयंप्रानागार्जुनोदितं॥ संकोचगोलोरसः॥ ॥ मारितंतीक्ष्णाकंताम्रसमंगंधकमाक्षिकं॥ ती
क्ष्णास्यद्विगुणंसूतंभस्मीकृत्यनियोजयेत्॥ सर्वेषांदशमांशेनविषंदत्वाविचूर्णयेत्॥ शतमूलीद्रवैःसर्वंदिनैकंमर्दयेद्दृढं॥ मंजिष्ठा

॥रामः॥
॥१९५॥

दिकषायेनसहक्वाथेदिनंदिनं॥पक्वाम्लभागतंरुध्वावालुकायंत्रगंपचेत्॥मर्दयित्वादिनैकंतुरसोयंकुष्टमानिकः॥उडुंबरमहाकु
ष्टंहंतिमासैकसेवनात्॥देवदाल्याश्चपंचांगंछायाशुष्कंतुचूर्णितं॥मध्वाज्यशर्करायुक्तंद्विनिष्कमात्रंपाययेत्॥मंजिष्ठादियथा॥मंजि
ष्ठाषदिरंकुष्टंवाकुचीदेवदारुकं॥पाठापर्प्पटयस्माह्वकटुकाराजवृक्षकं॥सहदेवीनिशानिंबवन्वरम्लीवृषभोमतो॥वचाकरंजकाको
लीमंजिष्ठादिकषायकः॥चंदनंत्रिफलावासात्रायंतियवचिंचिका॥विडंगेंद्रयवामूर्वातिक्तकोशातकीघनं॥दुस्पर्शाचेतितुल्यां
शंज्ञेयंमहाकषायकः॥ कुष्ठमारिणिकरसः॥ ॥शुद्धसूतंविषंगंधंलोहपात्रेक्षणंपचेत्॥शीतलंचूर्णयेत्तत्लेवध्वावस्त्रेचतुर्गु
रो॥आरनालघटीस्थदोलायंत्रेचतुर्दिनं॥पाचयेच्छोषयेत्पश्चाद्दशांशंवत्सनाभकं॥क्षिप्त्वापूर्ववत्पहंभाव्यंजलेवाकुचिसंभवैः॥
कामधेनुरसंखादेन्मासैकंमंडलापहं॥गुग्गुलत्रिफलागंधसममेरंडतैलकं॥द्विनिष्कमात्रपानेस्याद्दद्रुमंडलकुष्ठनुत्॥कामधेनुर
सः॥पलत्रयमृतंनाभ्रंसूतमेकंत्रिगंधकं॥त्रिकटुत्रिफलाचूर्णंप्रत्येकंस्यात्पलेपलं॥निर्गुंड्याद्रकजावैवह्निजावैविमर्दयेत्॥दिनैकं
तंनिरुध्याथतुषाग्नौस्वेदयेद्दिनं॥समुद्धृत्यविचूर्ण्याथवाकुचितैलमर्दितं॥त्रिदिनंभावयेत्तेनचंडकांतोरसोभवेत्॥निष्कैकंभ
क्षणाद्धंतिकुष्ठंकारिणामद्भुतं॥तैलंकरंजवीजोत्थंवह्निगंधकसैंधवं॥चूर्णितंलेहनाद्धंतिवातुपानेनकाकिनि॥जयंतिवाजया
वाथगोमूत्रेणाप्लुतांपिवेत्॥हंत्याशुकाकिणाकुष्ठंतल्लेपनवतद्ध्रुवं॥चंद्रकांतोरसः॥लोहभस्मविषंगंधंकटुकाव्यकटुत्रयं॥तुल्यां

शंचूर्णितंभाव्यंक्वाथेनानेनमर्दितं ॥ पथ्यावह्निवचीजातिखदिरोवत्सकोमृता ॥ जलेनष्टावशेषोयंकषायोभावनेहितः ॥ माषमात्रंहि
लेत्क्षौद्रैःकाकिनिंहंतिसावटि ॥ इंद्रवारुणिकामूलंवाकुचीत्रिफलाग्निना ॥ निंववह्निकशुंठंचमरिचंचूर्णयेत्समं ॥ गोमूत्रैःपाय
येत्कर्षमनुपानेनतंजयेत् ॥ काकिनघ्नीवटी ॥ ॥ विडंगक्रांतादेवदालीसर्पाक्षिगंडुलीभ्रमिः ॥ नीलिन्याघ्रिपलांशंचयथालाभं
द्रवेहरेत् ॥ एतेषांतुद्रवेदत्वासूतकंमर्दयेद्दिनं ॥ सूताच्चतुर्गुणंगंधमेकीकृत्यक्षणंपचेत् ॥ लोहपात्रेद्रुतंयावत्तावत्कृष्णाभ्रके
मृतौ ॥ प्रत्येकंचैवकर्पूरंसूतपादांशकंक्षिपेत् ॥ अग्नौचोत्तारयेच्चूर्णंरसःसूर्यप्रभोमहान् ॥ पुंडरीकंहरेन्निष्कमनुपानेनपूर्व
वत् ॥ सूर्यप्रभारसः ॥ ताप्यंगंधशुद्धसूतंशिलामित्वम्लवेतसे ॥ मृतंताम्राभ्रकंचूर्णंमध्वाज्यगुडमिश्रितं ॥ माषैकंजिह्वकंहंति
सूर्यावर्तोमहारसः ॥ शुंडिपंचांगचूर्णंवावाकुचीफलचूर्णकं ॥ मध्वाज्यसंयुतंकर्षंलेहयेदनुपानये ॥ सूर्यावर्तोरसः ॥ ॥
शुद्धसूतसमंगंधंकांतायससमंतथा ॥ वाकुचित्रिफलाचूर्णंनिंववह्निगुडूचीकादिनंभंगिद्रवैर्मर्द्यवाकुच्याश्चकषायकैः ॥ भ
क्षयेलोहपात्रस्थंकर्षोर्द्धजिह्वकंप्रणुत् ॥ वीरचंद्रोरसोनामघरामासासर्वकुष्ठनुत् ॥ गुंजांमध्वाततैलाभ्यांनिष्कंवाकुचिचूर्णकं
॥ ॥ लेहदनुपानेवैसर्वकुष्ठविनाशनं ॥ वीरचंद्रेश्वरोरसः ॥ ॥ लशुनंराजिकानिंवाभातुचित्रकपल्लवं ॥ समंभल्लातकेचूर्णंपेसि
पेत्तैलचतुर्गुणे ॥ तैलतुल्यंगवाक्षीरैःपाच्यंतैलावशेषितं ॥ पश्चात्पंचांगमत्स्याक्षीभूसिरीषपलाशयोः ॥ शुवत्वगालितंकार्यातुल्यंसं

मूर्छितंरसं ॥ घृतक्षौद्रसमायुक्तंपूर्वंतैलेनपीडितं ॥ इदंनाराचकंभक्षंनिष्कैकंजिह्वकांतकृतम् ॥ पंचांगंदेवदालुस्यंचूर्णंवाकुचिवीजनं ॥
चित्रकंपिप्पलीमूलंपंचांगंनिंवसंयुतं ॥ नरमूत्रैःपिवेत्कर्षंकुष्ठमत्तुपावकः ॥ त्रिकटुवाकुचीतैलंमर्द्येस्याजिहकंप्रणुत् ॥ नाराचकोरसः
॥ रसगंधकताप्यार्कशिलाजित्वम्लवेतसे ॥ अष्टमांसंगुडंसाज्यंमाक्षिकंवसितामधु ॥ हेममाक्षिकगंधाश्मतीक्ष्णंकांताभ्रकंसमं
द्विगुणंहरवीजंचदशमांसंवशंकुकं ॥ मंजिष्ठादिकषायेणवालुकायंत्रपाचितं ॥ कृष्णवर्णमलंकाक्षीमत्तंभस्मैककुष्ठनुत् ॥ ——
——— पलैकंशुद्धसूतस्यकर्षैकंशुद्धगंधकं ॥ गंधतुल्यमृतंताम्रंसूतांशमर्दयेविषं ॥ सर्वतुल्यपुनर्गंधदत्वाकिंचिद्विशो
षयेत् ॥ घृताभ्यक्तंलोहपात्रेपक्वाद्यावद्द्रुतंभवेत् ॥ रंभापत्रेद्रुतेवाथपातयेपर्प्पतियथा ॥ माषैकंचूर्णितंगंधंखंडेगजचर्मनिय
च्छति ॥ निष्कैकंवाकुचीद्रावैलेह्योयंपर्पटीरसः ॥ पर्प्पटीरसः ॥ पारदंगंधकंमुस्तानीलिकृत्स्नातिलाम्लता ॥ मेघनादाश्वगंधाज्यतु
ल्यक्षौद्रैर्विमर्दयेत् ॥ उद्वर्त्तनेनषण्मासात्गजचर्मनियच्छति ॥ उद्वर्त्तनं ॥ शुद्धसूतंविषंगंधंव्योषंमुस्ताफलत्रयं ॥ गुडूचीचूर्णये
तुल्यागुडंचूर्णाचतुर्गुणा ॥ द्विगुंजावटिकांखादेन्मासैकागजचर्मनुत् ॥ पंचाननोरसोनाम्नाअमृतुल्यास्तुद्रवाकुची ॥ पंचाननोरसः
॥ मृतसूताभ्रकंतुल्यंमर्द्यंविल्वरसैर्दिनं ॥ नीलज्योतिरसेनैवमर्द्धपात्रेविमर्दयेत् ॥ कंगुणीनिंवकार्पासतैलेनापिवमर्दयेत् ॥
माषंभक्षंतथालेप्यंचर्मकुष्ठहरंपरं ॥ ज्योतिष्पुंजोरसोनामसर्वकुष्ठकुलांतकृत् ॥ निंवखादिरककोलराजवृक्षसमूलकं ॥ क

॥ सारसं॰ ॥
॥ १९७ ॥

कायपाचये वातवर्मकुष्ठविनाशकृत् ॥ ज्योतिर्पुंजो रसः ॥ ॥ शुद्धसूतं विषगंधं तुल्यं ताप्यं शिलाजतु ॥ शुल्वतीक्ष्णाभ्रकं लोहं सर्वं
मर्द्यं दिनत्रयं ॥ काकमाच्यादेवदाल्याकर्कघाश्वंडवैर्दिनं ॥ रुध्वा हो भूधरे पाच्या त्रिदिनं वातुषाग्निना ॥ नि— ष्कं लेहयेत्क्षौद्रै रसकुष्ठ
निकृंतनं ॥ भल्लातवाकुचीपथ्याविडंगं लांगलितिलान् ॥ जीरकं वदरीमूलं चूर्णं तुल्यं गुडेन च ॥ भक्षयेदनुपानं हि हंति कुष्ठं विचर्चि
का ॥ विचर्चिकानिकृंतनो रसः ॥ विपादिकाग्रे रसगंधटंकणांसताम्रकुष्ठाद यपिप्पलीरजः ॥ विमर्दितं कांचनपत्रवारिणाप्र
तापलंकेश्वरनामको रसः ॥ गंधकं तिलतैलेन नि— मात्रं सदा पिवेत् ॥ क्षीरशाल्यन्नभोजी स्यात्स्यामाकंडुहरः परः ॥ — — — —
— — — — ॥ शुद्धसूताग्निमरिचेस्तुनाद्विगुरागंधकं ॥ काष्ठोडुंबरिकाक्षीरैर्वाकुच्या वाकषायकैः ॥ दिनं मर्द्यं वटीं कुर्याद
क्षमात्रां मधुप्लुतां ॥ लेह्या रुद्रवटी ह्येषा मासं हंति महाद्भुतां ॥ रुद्रवटीरसः ॥ आतपे सूतकं गंधं मर्दयेत्ताम्रपात्रके ॥ स्वहस्ते मर्द
येत्तावद्यावत्स्यान्नवनीतवत् ॥ भृंगराजद्रवं दत्वा दिनं तत्रैव मर्दयेत् ॥ त्रिफलाखदिरं सारं ममतावाकुचीफलं ॥ प्रत्येकं सूततु
ल्यं तच्चूर्णं कृत्वा विमिश्रयेत् ॥ मध्वाज्यं लोहपात्रस्थं कर्षैकं भक्षयेत्सदा ॥ दद्रुकिटिभकुष्ठानि मंडलानि विनाशयेत् ॥ विचर्चिकां
निहंत्याशु राजराजेश्वरो रसः ॥ राजराजेश्वरो रसः ॥ ॥ शुद्धसूतं विषागंधनिर्गुंडिवाकुचीरसैः ॥ दिनैकं मर्दयेत्याच्चयामं
लवणायंत्रके ॥ पलाशखदिरोक्काथो गोमूत्रे लोहभाजने ॥ दिनैकं तं वटिं कुर्यान्निष्कैकां भक्षयेत्सदा ॥ कुष्ठविस्फोटकं हंतिमा

॥ रामः ॥
॥ १९७ ॥

साजीर्णकंटकोरसः ॥ मर्द्दनं भानुतैलेन वातपे कारयेत्सदा ॥ अजीर्णकंटकोरसः ॥ सूतमेकं त्रिधागंधं शुद्धं त्र्यूषणाचित्रकं ॥ प्रत्येकं सूततुल्यं
स्यात्सर्वमेकत्रमर्दयेत् ॥ काकोडुंवरिकाक्षीरैयामेकं तु मधुत्तुते ॥ माषैकं किटिभं हंति रसोयं वह्निचूर्णीके ॥ वाकुचीनिंवपंचांगं
मध्वाज्यैवालिहेदनु ॥ किटिभमखोरसः ॥ शुद्धसूतं मृतं ताम्रं मृतं वाभ्रं समं समं ॥ मर्दयेद्वाकुचीतैलेयामैकं कृतगोलकं ॥ द्विगु
रोः पाचयेद्भांडे सतैले वालोहपाचितं ॥ गंधतैलविजीर्णोथ मथोद्धृत्य मृतायसः ॥ पंचांगनिंवसंयुक्तं मधुना गुटिकीकृतं ॥ नि
ष्कैकं किटिभं हंति वज्रपाणिमहारसः ॥ निशाकरारागारकं चैलाचित्रकताप्यकं ॥ क्रमोत्तरगुणां पिष्टं गोमूत्रेणापिवेदनु ॥
वज्रपाणिरसः ॥ मृतसूतं काकमाचीवह्निमुंडीचवानरी ॥ वाकुचीवीजतुल्यांशं गव्यमूत्रेणापेषयेत् ॥ द्विनिष्कं पाययत्तेन कि
टिभारिरसोह्ययं ॥ वाकुचीमूर्छितं सूतं विडंगं खदिरं मधुः ॥ सघृतं लेहयेत्कर्षं योगोयं किटिभांतकः ॥ किटिभांतकरसः ॥ ॥
सूताभ्रसत्वभस्मानि गंधताप्यंशिलाजतुः ॥ अम्लवेतं विषं तुल्यं त्र्यहं चाम्लेविमर्दयेत् ॥ मध्वाज्याभ्यां वटीकुर्याद्द्विगुंजा भक्षये
त्सदा ॥ कुष्ठंशतारुकं हंति रसोरंकाधिपेश्वरः ॥ त्रिफलानिंवमंजिष्ठावचापाटोलमूलकं ॥ कटुकीरजनीतुल्यं क्वाथोयं चानुपा
ययेत् ॥ सर्वकुष्ठहरोह्येष नात्रकार्याविचारणा ॥ लंकाधिपेश्वररसः ॥ शुद्धतालमृतं सूतं तुल्यं ताभ्यां चतुर्गुणां ॥ भार्ज्जिताविजयायो
ज्या सर्वतुल्यं क्षिपेद्गुडं ॥ सप्तकुष्ठहरोनिष्कं रसोयं विजयेश्वरः ॥ दार्वीखदिरनिंवाणां क्वाथं चैवानुपाचयेत् ॥ विजये

श्वररसः तैलं द्विगुणगोमूत्रेतु त्र्यंशं वा भानुदुग्धकैः ॥ पचेत्तैलावशेषं तद्रसकं शिखितुत्थकः ॥ अभ्यंगं धेडवाहरोपेगंधहयरियोजया
॥ कर्कोटीरक्तकं तुल्यं तैलात्पादं सुचूर्णितं ॥ मिश्रितं लेपनात्कुष्ठं हंति वैश्वानरो रसः ॥ विषं वा लेपयेत्कांति लांगली श्वेतसूरणं ॥ ॥
वैश्वानररसः ॥ दोलायंत्रे सारनाले विषमुष्टिदिनत्रयं ॥ पक्कं विशेषितं सर्वत्र योजयेत् ॥ द्विषट्पलं ब्रह्मवीजं विषमुष्टिद्विषट्पले
॥ पलैकं मर्द्दितं सूतं शुद्धगंधपलद्वयं ॥ चूर्णितं मधुना लेह्यं स्निग्धं भांडे निरोधितं ॥ धान्यराशौ स्थितं मासेन तमुद्धत्याथ भक्षयेत् ॥
असपर्शारिरसो नाम कुष्ठं हंति प्रसुप्तिकं ॥ भूनिंबविववत्रिफलापञ्चकानि विषाकराणः ॥ मूर्वापटोलद्विनिशावचापाठिंडवाहरिणा ॥ नि
म्बकोशातकीब्रह्मत्रिवृद्दंतिसमादतः ॥ मध्वाज्ये चूर्णितं स्वादेत्कर्षकं मनुपानकं ॥ असपर्शारिरसः ॥ तालकं गंधकं शुद्धं पलैके
कं विचूर्णयेत् ॥ पलाष्टं वाकुचीवीजं चूर्णं त्वग्वर्जितं कृतं ॥ मध्वाज्याभ्यां तु तत्सर्वमेकीकृत्य तु भक्षयेत् ॥ कर्षैकं श्वेतकुष्ठार्त्तो योगो
यं मित्रपंचकं ॥ मित्रपंचकरसः ॥ फलरसं हि काशीसे युक्तं पंचगुणान्वितं ॥ मर्द्दयेद्यामपर्य्यंतं मज्जनस्य त्वचो रसैः ॥ शरावसंपुटे रुध्वा
पुटेत् क्रोडपुटेन च ॥ रसकाशीसवज्रोयं मधुना वल्लमात्रतः ॥ शाणं वा कूपिकाचूर्णं सेवितं हन्ति निश्चितं ॥ त्रिभिर्मासैः किलासं
हि दद्रूणपि विशेषतः ॥ काशीसवज्रोरसः ॥ रसाद्विगुणगंधकं त्रिगुणतालमयुक्तं पचेत्र हीनमनुकज्जलिं खदिरवाकुचिभृंगरा
राजैः ॥ रसपुटविपाचितं समलयाकषायं पिबेत्किलासमहराणितं जयति शुद्धतक्राशिनं ॥ किलासविजयो रसः ॥ ॥

रसगंधकताप्यालकांतंतीक्ष्णाभ्रभस्मकं ॥ हिंगुलेमधुकंकुष्टंसर्वसमविभागकं ॥ शतमूलिनिजद्रावैमंजिष्ठादिकषायतः
॥ त्रिदिनंत्रिदिनंसम्यक्परिमर्द्यविशोष्यव ॥ ततस्तुपक्कमूषायांनिरुध्यानिप्रयत्नतः ॥ प्रक्षिप्यवालुकायंत्रेप्रपुटेद्दिवसत्र
यं ॥ मारिकाख्यतिलकोनामरसोनास्त्यकीर्तितः ॥ सर्वकुष्टहरत्याशुसन्मित्रमिवहृद्व्यथा ॥ मारिकाख्यतिलकोरसः ॥ समरसक
नकोत्थव्योमसत्वोत्थपित्रंहिंगुरावलिसमेतंगोलमध्येविपाच्य ॥ त्रिकटुदहनवेल्लैवत्सनाभार्द्रभागैरसमनवशृंगीदा
रुष्ठकैसमस्तैः ॥ अजसमविषपिष्टैर्गुंज्ययातुल्यवोल्लैःकुपितकफसमुत्थंहंतिकुष्टंगरिष्टं ॥ तदपरमथवातश्लेष्मजंत्वग्वि
कारंगुडगदमपिसर्ववह्निमाद्यक्षिणोति ॥ दृष्टेनसंभुनोदिष्टःसोयंकनकसुन्दरः ॥ त्वग्विकारविनाशायकुबेरायमहात्मने
॥ कनकसुंदररसः ॥ गंधकंसूततुल्यंतुपिष्ट्वायामविपाचयेत् ॥ षड्गुणेकटुतैलेतुदवनार्थ्यविलेपयेत् ॥ पामाविचर्चिकाहं
तिगंधतैलप्रलेपयेत् ॥ गंधतैलं ॥ रसटंकणगंधार्कतैलंस्नुक्पयसासह ॥ पिप्पलीर्वदनंकुष्टघ्नैस्तुल्यंविपाचयेत् ॥ लेपोयं
मातुलुंगाम्लेचर्मकुष्टकुलांतकः ॥ रसतैलं ॥ वचाकुष्टंशिलातालंभल्लातकविभीतकं ॥ पेषयेत्कटुतैलेनलेपाच्चित्रहरंपरं
वचादि ॥ अयोरजःकृष्णतिलांजनानिसवल्गुजान्यामलकानिदग्ध्वा ॥ पिष्ट्वानिभृंगस्यसकृद्रसेनहन्यात्किलासंचविघृ
ष्यलेपात् ॥ लोहादि ॥ गंधकंतिलतैलेनपक्कलेपननाशयेत् ॥ पामाविचर्चिकाकुष्टपिडकादद्रुमंडलानि ॥ गंधतैलम् ॥ ७

स्नुक्कांडसर्षपावह्निसज्ञीगन्धंमनःशिला ॥ गोमूत्रेणाप्लुतोलेपःसद्योहंतिविवर्चिकां ॥ मनःशिलादि ॥ गुंजाचित्रकशंखचूर्णौरजनी
भल्लातकंलांगलिस्नुक्कन्यार्कपयःपुनर्नवारसोधूमोद्भवंसूतकं ॥ गोमूत्रेपचितंविडंगमरिचंक्षौद्रंचगंधान्वितंहन्यात्त्वक्किटिभंवि
वर्चिकदद्रुजंकंडूपामहत्त्रेनं ॥ गुंजादि ॥ सूतंगंधशिलातालंकांजिकेमर्दयेत्समं ॥ तत्पिष्टंवस्त्रवर्तिंतुतैलाक्तांज्वालयेदधः ॥ भांडेतै
लंपतेत्तेनलेपस्यात्सर्वकुष्ठजित् ॥ इदंकालानलंतैलंवातकुष्ठंनियच्छति ॥ कालानलतैलं ॥ इतिकुष्ठाधिकारः ॥ अथविसर्पः
॥ सूतकांताभ्रतीक्ष्णानांभस्ममाक्षिकगंधकं ॥ वंध्याककोटिकाद्रावैस्तुल्यंमर्द्यंदिनावधि ॥ वंध्याककोटिकाकंदेक्षिप्त्वालिप्
त्वामृदावह्नि ॥ भूधराख्येपुटेपाच्यादिनैकंतद्विचूर्णयेत् ॥ दशमांसंविषंयोज्यंमाषमात्रंचभक्षयेत् ॥ रसकालाग्निरुद्रोयंदशा
हेनविचूर्णयेत् ॥ पिप्पलीमधुसंयुक्तमनुपानंप्रकल्पयेत् ॥ कालाग्निरुद्ररसः ॥ अथसूतस्यसूतस्यमूर्छितस्यमृतस्यच ॥ ध
वलापिप्पलिधात्रीहृद्राक्षघृतमाक्षिकैः ॥ पापरोगांतकोयोगपृथिव्यामेवदुर्लभः ॥ धवलाश्वेतापराजिता ॥ पापरोगांतको
रसः ॥ ॥ इतिविसर्पमसूरिकाधिकारः ॥ अथक्षुद्ररोगः ॥ रैकर्षंरसकंत्र्यक्षपिष्टागंधपलद्वयं ॥ पलंनागाभ्रयोःसर्वसंचूर्ण्य
सिकताघटे ॥ पक्वमूषागतंयामंपचेद्भूयःक्षिपेद्द्रवं ॥ केतकीकृष्णनिर्गुंडीशिग्रुगंधाग्निचव्यजं ॥ वंध्याहिघ्नभकर्णोत्थंव्याघ्री
लुंगरसोद्भवम् ॥ अश्वगंधाभवंवाराहिशाखिविषसागरात् ॥ षट्समंवस्त्रादिग्धित्रित्रिपुटंभवनक्रमात् ॥ कुमार्यापुटयोप्रोक्तोर्

॥ राम ॥
॥ १९९ ॥

सोहेमाद्रिसंज्ञकः ॥ रसकर्ष१रसक३गंधकपल२ नागकर्ष२अभ्रक२संचूर्ण्यवालुकायंत्रेसंपाच्यपुनःपक्वमूषायांया
मं१पचेत् ॥ केतकीवारिणा२० निर्गुंडिरसेन२शिग्रुवारिणा३ग्रंथि४ चित्रकं६चव्य७ वंध्याककोटी८ एरंड१०.कंटकारि२मा
तुलुंग३अश्वगंधा३४कुमारी१४पुटनंतुभूधरयंत्रेरौवसांगशीतंसंचूर्ण्य·मात्रारक्तिका४अनुपानंतुरोगतत्वयं ॥ युक्तो
माषेनिहंत्याशुसर्वाशीरोवकग्रहान् ॥ शुक्ररोगांश्चविविधान् गलरुक्पन्नगानिव ॥ हेमाद्रिरसः ॥ ॥इतिशुक्ररोगाधिकारः
अथमुखरोगः ॥ रसगंधौसमौताभ्यांद्विगुणांवशिलाजतु ॥ गोमूत्रेणाविमर्द्यार्थसप्तधार्द्रद्रवेणाच ॥ कणामधुयुतोहंतिमुख
पाकंसुदारुणं ॥ गुंजाष्टकमितावक्रेधृताहंतिवटिगदान् ॥ महाराष्याचकल्केनमुखंतुप्रतिसारयेत् ॥ धारणात्सेवनादेव
वटीहंतिमुखामयान् ॥ रसादिवटि ॥ नागस्यत्रिफलाक्वाथेरसेभंगेस्यगोघृते ॥ अजादुग्धेचगोमूत्रेशुंठीक्वाथेमधुन्यपि ढा
लान्सप्तपृथक्दत्वातत्समंसारयेद्रसं ॥ लोहपात्रेद्रावयित्वाप्रक्तातांगुटिकांकिरेत् ॥ सामुखेधारितांहंतिमुखरोगानशेषतः
॥ दृढीकरोतिदशनावद्धमूलानशेषतः ॥ दंतरोपणीगुटिः ॥ ॥इतिमुखरोगाधिकारः ॥ अथनासारोगः ॥ पीनसेतुसदादे
यंनस्यंभस्मेश्वरस्यतु ॥ सःश्वासकुठारश्चतथाकल्पतरोरपि ॥ ॥इतिनासारोगाधिकारः ॥ अथनेत्ररोगः ॥ अयःसयष्टीत्रि
फलाकणानांचूर्णानितुल्याणिपुरेणनित्यं ॥ सर्पिर्मधुभ्यांसहभक्षितानिसर्वाक्षिरोगाक्षयकारिणानिहंतिशीघ्रं ॥ अयोगुगुलुः ॥

शखस्यभागश्चत्वारस्ततोर्द्धेनमनःशिला ॥ मनःशिलार्द्धमरिचंमरिचार्द्धेनसैन्धवं ॥ एतच्चूर्णांजनंश्रेष्ठंशुक्रयोस्तिमिरेषुच ॥ ।पच्यते
मधुनायोज्यमर्बुदेमस्तुनातथा ॥ ॥ चूर्णांजनं ॥ रसेन्द्रभुजगौतुल्यौताभ्यांद्विगुणामंजनं ॥ इषत्कर्पूरसंयुक्तमंजनेनयना
मृतं ॥ नयनामृतं ॥ गंधकेनहतंताम्रंमधुनासायमंजयेत् ॥ पटलादिनिहंत्येतच्छिघ्रमेवनसंशयः ॥ ताम्रांजनं ॥ सूतकंगंध
कोपेतंचांगेरिरसमूर्छितं ॥ अंजनंदृष्टिदंनृणांनेत्रामयविनाशनम् ॥ दृष्टिप्रसादांजनशंखनाभिविभीतस्यमज्जपथ्यामनः
शिला ॥ पिप्पलीमरिचंकुष्ठंवचाचेतिशमांशकं ॥ छागीक्षीरेणसंमर्द्यवर्त्तिकर्याद्यवोन्मिता ॥ हरेणुमात्रासंघृष्यजलैःकुर्या
दथांजनं ॥ तिमिरंमांसवृद्धिंचकाचंचपटलमर्ज्जुनः ॥ रात्र्यंधंवार्षिकंपुष्पंवर्त्तिचंद्रोदयोहरेत् ॥ केचित्तुगवांक्षीरेणसंमर्द्ये
त्यादिना ॥ पाठांतरं ॥ चंद्रोदयवर्त्तिः ॥ केतकीचंदनेलाक्षामरिचंमधुकोत्पलं ॥ तथाक्षामलकीवीजंमनोह्वाख्यमनःशिलाः ॥ वि
डंगोदधिफेनंचशंखनाभिरसांजनं ॥ दृष्टिप्रदायिनीवर्त्तिर्विदेहेनविनिर्मिता ॥ नित्योपयोगात्पटलंतिमिरंशुक्रराजिकाः ॥ शुक्र
शुक्लाक्षिरोगोवविहृद्धिवार्ममेवच ॥ निहंतिरोगानेतांश्चत्रिदोषानपिदुस्तरान् ॥ वैदेहिवर्त्तिः ॥ हरेणुकासैन्धवसंप्रयुक्तश्रोतोंजनयुक्तमाप
पकल्पयाच ॥ पिष्टाजमूत्रेणकृताजवर्त्तिर्नक्तांध्यविध्वंसकलीनराणां ॥ नक्तांध्यकेतु ॥ वरोवेधमुख्यानदीजातपुंगंस्फुटंकासीसं—
—कर्पूरलोध्रं ॥ वचापीतमुक्तास्फलंस्फाटिकाख्याममंखर्परात्केनसंचूर्णपिवात् ॥ दिनंनिंबनीरेणसौवीरघोषैर्विमर्द्दिकृताच्छायया

अथ वर्त्तिः ॥ त्रिफला· कस्तूरि· शेवाल· नागरस्तु स्तास्फटिका· काशीस· कर्पूर· लोध्रवचा· मनःशिलाशुक्तापुत्र· स्फटिका· खर्परसम भागं संचू
र्णपल घुनिंबनीरेण संमर्द्य कांश्यपात्रे सौवीरस्य मर्द्दकं कृत्वा समर्थ्य वर्त्तिं कृत्वा छायायां शोषयित्वा नेत्रे अंजयेत् जलस्रावं नेत्रे मिर्प्यकं दर्बुदादी
जयेत् अंजनादंबुने वा घिषेत्तेन नयनामृतं ॥ त्रिफला भृंग शुंठीनां रसैस्तद्वच्च सर्पिषा ॥ गोमूत्र मध्वजाक्षीरैः सिक्तो नागोऽग्नितापितः ॥ तच्छ
लाका हरत्येव सकलान् नयनामयान् ॥ दृष्टिप्रसादनी शलाका त्रिदिनेनैनिं बुनीरेण स्थापितेनीलमंजनं ॥ अग्निना संप्रतप्तं पश्चान्निषिंचेत् त्रिफ
लाजले ॥ सप्तवारं ततः पश्चात् घर्षयेत्स्मज्तुलाजले ॥ वारंवारं जयेद्द्वाएति क्ष्वक्ष्मां समाचरेत् ॥ ततः शलाकया नेत्रेऽभ्यंजयेन्नाशयेच्च तान्
॥ सौवीरांजनं ॥ रसांजनं सर्जरसो जातिपुष्पं मनःशिला ॥ समुद्रफेनलवणं गैरिकं मरिचं तथा ॥ एतत्समांशं मधुना पिष्टं प्राक्लेनवत्मनि
॥ अंजनं क्लिन्नवर्त्मकं कंडुपक्ष्मशतां च प्ररोहणं ॥ रसांजनाद्यंजनं ॥ अग्नितप्तं तु सौवीरं निषिंचेत् त्रिफलाजले ॥ सप्तवेलं ततस्तन्ये स्त्रीणांस्त्
क्तो विचूर्णितं ॥ अंजयत्येन नयने प्रत्यहं चक्षुषोर्हितं ॥ सर्वान् अक्षिविकारांश्च हन्यादेतन्न संशयः ॥ सौवीरांजनं ॥ शिलायां रसकं पिष्ट्वा
सम्यग्गालाख्यवारिणा ॥ गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतं ॥ अथ शुष्कं च तज्जलं सर्वं पर्पटीसंनिभं भवेत् ॥ विचूर्ण्य भावयेत्सम्य
ह्रीवेलं त्रिफलारसैः ॥ कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ॥ अंजयेत्तेन नयने नेत्राविलगदच्छिदा ॥ रसकाद्यंजनं ॥ दक्षांदत्वद्धिला
कांचशंखत्वंदनसैंधवैः ॥ चूर्णितं मंजनं प्रोक्तं पुष्पार्मातिमिकृंतनं ॥ शिलांजनं ॥ कतकस्य फलं शंख त्र्यूषणं सैंधवं सिता ॥ फेनारसांजन

CC-0. In Public Domain. Digitization by eSangotri. Funding

क्षौद्रंविडंगानिमनःशिला॥कुक्कुटाण्डकपालानिवर्त्तिरेषांव्यपोहति॥तिमिरंपटलंकाचंचर्मशुक्लंतथैवच॥कंठक्लेदेवुदंहंतिमलंचाशुसु
खावटी॥वर्त्याजनं॥अपामार्गस्यपत्राणिमूत्रवायांप्रक्षिपेद्बुधः॥सूक्ष्माणिजसदपत्राणिधारयेचांतरातरे॥शुष्कांकृत्वाततोधीमान्छोष
येदातपेनरः॥स्वछांगारेततःक्षिप्त्वाध्मापयेच्चप्रयत्नतः॥अग्निवर्णानिभंज्ञात्वाततस्तस्मात्समुद्धरेत॥मृतपत्राणिनिकास्यसूक्ष्मचू
र्णानिकारयेत॥तदर्धखर्परंदत्वासम्यक्चूर्णंसमाचरेत्॥अंजनंकारयेत्तेनपक्ष्मसंजननंपरं॥अपामार्गाद्यंजनं॥ ॥शंखाक्षमज्ञा
जेनशिग्रुबीजमनःशिलायष्टिमधार्कदुग्धैः॥चंद्रप्रभेयंपटलार्वुदामराज्यधनेत्राहृणातेमिरघ्नी॥चंद्रप्रभाः॥द्राक्षाचंदनफेनास
थत्रिफलाकर्पूरकश्चांजनंमाक्षिकोमधुयष्टिर्व्योमनगरंसोवर्णगेरशिला॥कांचंताम्ररजःशिलोहरजतंमुक्ताप्रवालंतुदं॥माक्षिसा
वरकंससैंधवमणिनीलोत्पलंकुंकुमं॥वंशंकांशलवंगदार्विक्रिमिहन्मंजिष्ठमायूरजान्शीतंरोहिणिमुस्तमालतित्रुटिरर्कंप
योरामयःछागीक्षीरयुतोथपेषितकृतावर्त्तिर्विशुष्कांजयेत्॥कंदक्लेदसुरामकाचतिमिरपुष्पादिशुक्रव्रणं॥द्राक्षारक्तचंदनं·समु
द्रफेनं·तुत्थत्रिफला·कर्पूररसांजनसुवर्णमाक्षिक·यष्टिमधु·अभ्रक·नगर·सुवर्णगैरिक·मनःशिलाकाच·ताम्रलोह·रौप्य·मु
क्ताप्रवाल·मुस्ताजटामासि·सावरलोध्रं·सैन्धवं·मौक्तिकनीलोत्पलं·केशरं·वंशरोचना·काश्यंलवंगं·दार्वी·विडंग·मंजिष्ठा·
अपामार्गचंदनं·मत्स्यपित्तानागरमुस्ता·सुमनासूक्ष्मेला·अर्कक्षीर·कुष्ठ·समभागपिष्टा·छागीक्षीरेणवर्त्तिकोकृत्वाछायायां

शोषयित्वानेत्रांजयेत् ॥ राज्यंधार्त्तुदनीलशुक्रपटलांसहितान्रागजान्सर्व्वलिंगसकृत्स्न — — पटलास्त्रोदंशिराजालकं ॥ वातपित्त
कफारक्तकृपिकांनेत्रजानगदान् ॥ सर्व्वंहंतिछनिर्माल्यरविदृष्टिसमंभवेत् ॥ वर्त्तिसूर्य्यप्रभानामनृणांदृष्टिप्रसादना ॥ सूर्य्यप्रभा ॥
॥ शिलांसैन्धवकाशीसशंखव्योषरसांजनैः ॥ सक्षौद्रकावशुक्लार्मतिमिरंघ्नीसक्रिया ॥ शिलांजनं ॥ त्रुटिमरिचसमुत्थसैंधवंवा
रिफेनोदधिवफटिकशंखचंदनकुष्टलाक्षारजनीकरकपालकुक्कुटांडकनयाकनकशशिवरांभस्ताक्षशैलंचलोध्रं ॥ अजयप
यसिसपिष्टलोचनानांजनेन कृरिनविवुधवैद्यादृष्टिदंनेत्रपाकं ॥ श्लेष्मलाम्मरिचनुत्थसैंधव·सुगंधवाल·उदधीफेन·फटिक
शंखचंदनकुष्ट· लाक्षाहरिद्रानखी· कुक्कुटाण्डत्वकमनःशिला· कनक· कर्पूर·मौक्तिकरसांजनं ॥ लोध्रं· समभागेअजापयसा· सं
मर्द्यवटिकाकृत्वानेत्रांजयेत् ॥ तिमिरपटलकाचधूमंघ हृष्यान्धकारंसदनमदनकंडुशोफरांगंनिहंति ॥ विषमरुधिरवर्त्मअर्बु
दमांसक्षिप्रकृत्णापकुसुमक्षेदंसिंहरनेत्रपाकं ॥ गरुडसहशदृष्टिनिर्मलंचप्रभावंवसुधरजनहीनानांचाश्विनानिर्मितंव ॥ ॥
गरुडांजनं ॥ सैन्धवत्रिफलाकृष्णाकटुकाशंखनाभयः ॥ सताम्ररजसावर्त्तिपिष्टाशुक्रविनाशिनी ॥ ताम्रवर्त्ति ॥ समुद्रफेनासिंधु
त्थशंखदक्षेडमाक्षिकैः ॥ शिग्रुवीजयुतैवर्त्तिशुक्रघ्नीशिग्रुवारिणा ॥ शंखवर्त्तिकृष्णलोहरजंताम्रंशंखविद्रुमसैंधवैः ॥ समुद्रफेन
सासीसस्रोतोजनानिवर्त्तिभिः ॥ लेखनंवाकृतेतस्यपरंधारणामिष्यते ॥ विद्रुमवर्त्ति ॥ पुष्पाक्षनाथजसितोदधिफेनशंखसिंधूत्थ

गैरिकशिलामरिचैः समांशैः ॥ पिष्टमुमाक्षिकरसेन रसक्रियेयं हन्त्यर्मकाचतिमिरार्जुनवर्त्मरोगान् ॥ माक्षिकवर्त्ति ॥ स्फटिकोषणयष्ट्या
ह्वशंखगोदंतसैंधवैः ॥ सशिलासैन्धवैर्वर्त्तिर्वामघ्नी शिग्रुवारिणा ॥ स्फटिकवर्त्तिः ॥ प्रवालमुक्तावैदुर्य्यशंखस्फटिकचंदनं ॥ सुवर्ण
रजतक्षौद्रमंजनंशुक्तिकापहं ॥ प्रवालाद्यंजनं ॥ इति नेत्ररोगाधिकारः ॥ अथ शिरोरोगः ॥ शृंगवेररसेनैव रसस्वछंदभैरवः ॥ तथा
कल्पतरोनस्यं वातश्लेष्मोद्भवे रुजे ॥ तद्यथा ॥ शुद्धं शंकरशुक्रमक्षतुरितं मारारिनारि रजस्तावत्येव उमापतिस्फुटगलालंकारव
त्सस्मृतः ॥ तावत्येव मनःशिला च विमला तावत्तथा टंकणं शुंठिद्वक्ष्यमिता कराम्वमरिचं दिक्पालसंख्याक्षकं ॥ विषादिवस्तुनि
शिलोपरिष्टाद्विचूर्णयेद्वासशिशोधयेच ॥ ततस्तु खल्वे रसगंधकौ च तुल्यं तथा मयुगं विमर्द्य ॥ कल्पतरुनामधेयो यथार्थनामा
रसः श्रेष्ठः समीरणाश्लेष्मगदाहरत्ने मात्रास्य गुंजैका आर्द्रकेण सममेव भक्षितो हंति वातकफसंभवं ज्वरं ॥ श्वासकाशमुखशो
षशीततावह्निमांद्यविरुचित्वनाशयेत् ॥ नस्येन चैव हंति शिरोर्त्तिकफवातजान् ॥ मोहं महांतमपि च प्रलापं क्षवथुग्रहं ॥ कल्प
तरुरसः ॥ रसः श्वासकुठारोल्पः कर्पूरः कुंकुमं नवं ॥ शिता छागीपयः सर्वं खल्वे समं विमर्दयेत् ॥ नस्यनश्यं भिषग्दद्यात्त्रिजा
यां शिरोरुजे ॥ किं तु मस्तकशूलेषु सर्वेष्वेतद्धितं मतं ॥ नस्ययोगः ॥ ॥ इति शिरोरोगाधिकारः ॥ अथ स्त्रीरोगः ॥ एकं तु चंडात
लवार्द्रिकुंभीकल्लेकभागं क्रमशो विमिश्रं ॥ सूताभ्रगंधोषणलोहशंखवन्योपलाभस्मविषं च पिष्टं ॥ प्रसूतिवाते तिलदंतवंधे हार्द्री

भसावत्समतुषलीरुजा॥वातामयेश्लेष्मगदेशीसिस्याप्रणामतनाडात्रिफलाप्रतोयं॥संशृंगवेरद्रवएषहंतिससन्निपातज्वरमग्ररूपं॥॥
प्रतापलंकेश्वररसः॥ सौभाग्यामृतजीरपंचलवणांव्योषाभयाक्षामलानिश्वंशाभ्रकशुद्धगंधकरसानेकैकभागंक्रमात्॥निर्गुंडियु
गभृंगराजस्वरसापामार्गपत्रोद्भवैः प्रत्येकंस्वरसेनसिद्धवटिकाघ्नंतित्रिदोषंज्वरं॥एषाश्रीनमतीवदेहनखिलंप्रष्ठोंडियंदार्घक्र
न्विज्ञाघोरतरंत्रिदोषशमनंमोहंवंशूलेहितौ·सौभाग्यवटी॥रसगंधकतुत्थंचत्र्यहंगंधकमर्दिनः॥त्रिभाविर्तंत्रिकटुनादेयंगुं
जावत्सृष्यं॥ गर्भिणीपाण्डुलविष्मज्वराजीर्णापिकेवले॥गर्भविलासरसः॥ रसगंधशीसंमतमिमितिसमंतैस्तुरसजंसमानंसर्वं
स्यान्तुल्तितमपिलोध्रवृषरसैः॥ दिनंपिष्ठनाम्नाप्रदररिपुरेषापहरतिछिवल्लक्षौद्रेणप्रदरमपिदुःसाध्यमपिच॥प्रदरारिरसः
॥ वासाकषायसहितेरसभस्मप्रयोजिते॥प्रदरंहंतिनारीणांवातक्षौद्रसमायुतं॥रक्तपित्तेहरंत्स्यर्वप्रदरेसत्प्रयंत्रेविधिः॥रक्ता
तिसारेकथितंसर्वमत्रप्रयोजयेत्॥कासादिरसः॥रसगंधसमौताभ्यांछिगुणांकांतमायसं॥जंवीरतोयेत्रिदिनंमर्दयित्वाथ
भावयेत्॥ मत्स्यपित्तेनसिद्धःस्यात्कांतवद्धोमहारसः॥ततःकार्ष्यामितंपेनछागीदुग्धेनयोजितः॥निहंतिप्रदरंसर्वंसोमंतक्र
प्रतोपिवा॥ कांतवद्धोरसः॥त्रिफलातालमूलीचविदारीवशतावरी॥भार्गीपुष्करमूलंवकंडिडिंनरुहास्तथा॥ वराखदिरसारं
चवृषमूलंसवीजकं॥पृथकपलमितंभागंजलाढकविपाचितं॥चतुर्भागावशेषेणसम्यक्चूर्णमेतविनिक्षिपेत्॥शृंगीविडंग

कृत्वा च शुंठीजीरकयुग्मकं ॥ मरिचं धान्यकं पत्रकेशरं च वरांगकं ॥ शुभाश्मजतुकं चैव लवंगं च फलत्रिकं ॥ पृथक्पलद्वयं चूर्णं दा
पयेद्दत्तारिते ॥ मधुना सह दातव्यं मसाध्ये च रजोग्रहे ॥ सबीजं तं दुग्धजलं मनुपानं प्रदापयेत् ॥ धन्यं पुष्यं तथा पुष्यं बलवर्णाग्नि
वर्द्धनं ॥ मूत्रदोषं रजोदोषं योनिदोषविनाशनं ॥ शूलमकरसंज्ञं च योनिमूले च दुस्तरं ॥ आनाहे मूत्रसंस्रावे दोषत्रयकृते च यः ॥
हृच्छूले पक्तिशूले च अम्लपित्ते वमिं तथा ॥ रक्तपित्तहरं त्याशु रसायनमनुत्तमं ॥ तूनिप्रतूनिकां चैव नाशयेदतिसेवितं ॥ दुष्ट
पुष्पा च या नारी या च गर्भं न विंदति ॥ वातोपहतबीजां च यद्रजपित्तवातिकः ॥ तत्सर्वं समयत्याशु नित्यनाथेन भाषितः ॥ वरांगं
लोहं ॥ शुद्धं शंकरबीजं च जातिरसविमर्दितं ॥ वरांगमध्ये निक्षिप्तं नारी संद्रावयते रते ॥ रसादि ॥ ॥ इति स्त्रीरोगाधिकारः
॥ अथ बालरोगः ॥ रसगंधसमं शुद्धं तयोः कृत्वा तु कज्जली ॥ लोहदर्व्यां घृताक्तायां द्रावयेत्कदलीदले ॥ छादयेदुपरि
न्यस्तं गोमये बदरीधनात् ॥ शिखिना कोमलाद्देव विधेया रसपर्प्पटी ॥ पर्प्पट्याद्विगुणो जीरस्तूर्यांशो रामठस्ततः ॥ दीयते
मधुना श्वेतशिर्शीगुंजाचतुष्टयं ॥ श्लेष्मपित्तानिलश्वासकाशपीनसपांडुता ॥ प्लीहाग्निमांद्यशूलानि हन्यादस्य ज्वरंजवा
न् ॥ पर्पटीरसः ॥ रसलोहादिभैषज्यं महतां यज्ज्वरादिषु ॥ युंज्यात्तदेव बालानां तत्र मात्रा कनीयसी ॥ औषधबालरोग ॥ इति बालरो
गाधिकारः ॥ अथ विषरोगः ॥ रंगं विषं टंकरां मूषरां च तुत्थं समांशं कृत देवदाल्या ॥ रसेन पिष्ट्वाधिवज्रपात्रे रसो भवेत्सर्वविषेक

हंताः ॥ निष्क्वोस्य ससंजीवयति ध्रुवं ज्यात्व सूत्रयोगेन च सर्वथैव ॥ यानि विषेणाकुलितं तथान्यपृष्टविषैर्दुनितमातुरं च ॥ विषवज्रपातरसः ॥ शर्करा चूर्णसंयुक्तं चूर्णं ताप्यसुवर्णयोः ॥ लेहप्रसमपत्युग्रं नानायोगकृतं विषं ॥ ताप्यादि ॥ जयपालभवां मज्जां भावयेन्निंबुकद्रवैः ॥ एकविंशतिवेलन्तु ततो नेत्रेणयांजयेत् ॥ सर्पदष्टविषं जित्वा संजीवयति मानवं ॥ विश्वामित्रपात्रे जयपालवीजं त्वग्हीनं कृत्वा ग्राह्यमेतत् दृष्टफलं विषहरिवर्त्ति ॥ भूनागताम्रघृष्टोदकमपि विषहरे योज्यं ॥ भूनागसत्वसंजातगुडिकां धारयेत्करैः ॥ न तस्य क्रमते शस्त्रं विषं स्थावरजंगमं ॥ तत्पिष्टोदरपानेन विषं सर्वं च नश्यति ॥ भूनागाद्याविल्वपुष्पत्वचंमासिफलिनीनागकेशरं ॥ शिरिषं तगरं कुष्ठं हरितालं मनःशिलाः ॥ एतानि सममागानि पेषयेत्सलिलेन तु ॥ समारभ्य ततो गात्रं सर्पाणां हंति दारुणात् ॥ विषाद्वा भक्षयेद्वर्णान् रोगश्चैव विविधात्मिकाः ॥ कन्यासवरराङ्गच्छिद्गुडूवासुरोपमे ॥ राजद्वारेषु सर्वेषु द्यूते चैवापराजिते ॥ बृहस्पतिरिति प्रोक्तो ब्रह्मणा निर्मितः स्वयं ॥ नाग्निदहति मठेस्म प्रभवंति न राक्षसां ॥ न म्रियंते तथा वाला दंशागोपत्र तिष्ठति ॥ दशांगायगदः ॥ चंदनालसिलाकुष्ठत्वकपत्रैलावसर्षपा ॥ मांसीपद्मकवक्रास्तकुष्ठरसेभास्वरावता ॥ स्पृक्काहिंगं तुलामज्जाशतपुष्पाप्रियंगवः ॥ पिष्ट्वा सर्वविषानान्त्रावेंद्रादयोगदः ॥ वेंद्रोदयगदः ॥ श्यामाभयाटली कृष्णां मंजिष्ठाकिणिही शिला ॥ कोविदारोषरावर्कंनिदध्या‾पराजितः ॥ बृहती मधुकं चैव गोमूत्रेण प्रपेषयेत् ॥ एषसर्पोदयोनामविषर

क्षोनयोगदः ॥ सूर्योदयोगदः ॥ शुद्धंस्वर्णंशुद्धसूतंशुद्धंचहेममाक्षिकं ॥ त्रयाणांगंधकंतुल्यंमर्द्यंकन्याद्रवैर्दिनं ॥ विपक्वंस
ताक्षोद्रंमाषेकंलेहयेत्सदा ॥ वह्नीमूलघृतक्षीरेरक्तस्याङ्कुरनाशनं ॥ स्वर्णगंधरसः ॥ ॥ इतिविषाधिकारः ॥ अथरसायनं
॥ पूर्वेवयसिमध्येवामनुष्यस्यरसायनं ॥ प्रयुंजितभिषक्प्राज्ञस्निग्धशुद्धतनो — — ॥ नाविशुद्धस्यशरीरस्यरसायनोवि
धिः ॥ क्षेत्रीकृतनिजदेहकुरुतेरसायनंमतिमान् ॥ विधिनापथ्यविधानादमरदेहतुल्यंस्यात् ॥ अक्षेत्रीकरणोसूतोप्यमृतो
पिविषंभवेत् ॥ फलसिद्धिकृन्नलस्यसुवीजस्योषरेयथा ॥ नित्यनाथश्च ॥ पंचकर्मपुराकृत्वापश्चाद्योज्यंरसायनं ॥ मृतोभ्रंम
क्षयेन्मासंमेकमादौविचक्षणः ॥ पश्चान्नियोजयेद्देहेक्षेत्रीकरणमिच्छता ॥ इतिशुद्धोज्ञातवलशाल्योदनजंगलादिशुद्ध
रसैः ॥ क्षेत्रीकृतनिजंदेहवीतरसायनंमतिमान् ॥ तद्यथा ॥ भस्मसूतंविधांगंधंक्षरणाकन्याविमर्दयेत् ॥ रुद्ध्वालघुपु
टेपाच्यंसुध्यत्यंमधुसर्पिषा ॥ निष्कंखादेज्जरामृत्युहंतिगंधामृतोरसः ॥ समूलंभृंगराजंचछायाशुष्कंविचूर्णयेत् ॥ तत्समं
त्रिफलाचूर्णंसर्वंतुल्यंसिताभवेत् ॥ पलैकंभक्षयेत्प्रातरब्दान्मृत्युजरापहं ॥ गंधामृतः ॥ वलीप्लुतोनित्वरससमरसोभस्म
सिकताहृययंत्रेकृत्वासमरविकराणंकरणरजत्रिघस्त्रंलुंगाम्भोलववकदलितक्षौद्रहविषाविलीढोमाषैकंद्रवयतिसमस्तं
गदगणं ॥ जरावर्षेणापिक्षपयतिचपुष्टिंवितनुतेतनोतेजःस्फारंरमयतिवधूनामपिशतं ॥ रसःश्रीमान्मृत्युंजयइति ।

गिरिशेनगदितः ॥ प्रभावकोवान्यःकथयितुमपारंप्रभवति ॥ मृत्युंजयरसः ॥ पलंमृदुस्वर्णदलंरसेंद्रपलाष्टकंषोड
शगंधकस्य ॥ शोणोत्पलकर्पासिभवप्रसूनैःसर्वंविमर्द्याथकुमारिकाद्भिः ॥ तस्याचक्रंभोनिहितंसुगाढंमृत्कर्पटैस्तद्दिव
सत्रयंच ॥ पचेक्रमाग्नौसिकताख्ययंत्रेततोरजःपद्मवरागरस्यंनिगृह्यचैतस्यपलंपलानिचत्वारिकर्पूररजस्तथैव ॥
जातीफलंसोषणमिंद्रपुष्पंकस्तूरिकायाइहशाणमेकः ॥ चंद्रोदयोयंकथितोस्यमाषोभुक्त्वाहिवल्लीदलशाणएकः
॥ मेदोन्मदानांप्रमदाशतानांगर्भाधिकंत्वश्लथयत्वकांडे ॥ भृतेघनीभूतमतीवदुग्धंमृदुनिमांसानिसमंडुकानि ॥ माषा
णिपिष्टानिभवंतिपथ्यमानंददायीन्यपराणिचात्र ॥ वलीपलितनाशनस्तनुभृतांवयस्तंभयसमस्तगदखंडनःप्रचु
र्योगपंचाननः ॥ गृहेषुरसराडयंभवतियस्यचंद्रोदयः ॥ सपंचशरदर्शितोमृगदृशांभवेवल्लभं ॥ शास्त्रांतरे ॥ रतिका
लेरतान्तेचपुनःसेव्योरसोत्तमः ॥ अभ्यासात्साधकस्त्रीणांशतंजयतिनित्यशः ॥ मानहानिकरोह्येषप्रमदानांतुनित्यशः ॥
स्थावरंजंगमंचैवकृत्रिमंविषमेवच ॥ नविकारायभवन्तिसेवकेंद्रस्यवत्सरः ॥ मृत्युंजयोयथाभ्यासान्मृत्युंजयतिदेहि
नां ॥ तथायंसाधकेंद्रस्यजरामरणनाशनः ॥ चंद्रोदयरसः ॥ शास्त्रांतरेमकरध्वजरसः ॥ सूतभस्मसमचक्रभागंलोहभस्मत
थाहृमं ॥ मेघभस्मचकृभागःशुद्धभागस्यपंचकं ॥ भावयेत्रिफलाक्वाथैस्तत्समंभृंगजद्रवैः ॥ शिग्रुवह्निकटुक्वाथसमधा

भावयेत्पृथक् ॥ सर्वतुल्याकरणायोज्या गुडैर्मिश्रैः पुरातनैः ॥ निष्कमात्रं सदा खादेज्जरामृत्युनिहंत्यलं ॥ ब्रह्मायुस्स्याच्चतुर्मासेर
सोयममृतारविः ॥ निरकोरं त्रपत्राणि गुडेन भक्षयेदनु ॥ केचिन्मतेनमेघाभरंसंवषड्भागमितिपाठांतरे ॥ अमृतारीवरसः॥
शिलाजं षोडशपलं त्रिस्त्रिरेकत्र भावयेत् ॥ बलायाः दशमूलस्य गुडूच्याः कर्कटस्य च ॥ वरायामधुयष्ट्याह्वरसमध्येव भावयेत्॥
क्षीरे सकृत्तक्रमेणैव सप्तकृत्वस्ततः पुनः ॥ काकोलीयुग्मघनपुष्करवह्निरास्नामेदायुगर्द्धिवविकागजपिप्पलीनां ॥ पाठावि
जीरकनिकुंभविदारियुग्मं वीरावरीमधुवरांशुमतीहयानां ॥ पलिकानामपां द्रोणे सिद्धानां पादशेषिते ॥ क्वाथैर्विभावित
मिथ गिरिजं द्विपले श्चारणि कृतेर्युज्यात्कर्कटशृंगीधात्रियाष्ठेस्तालीसपत्रकुडवेन ॥ चूर्णपलेन विदार्यास्त्वक्षीर्याकर्ष
युग्मेन ॥ द्विपलचातुर्जातेन लघुतक्षौद्रशर्करामिश्र ॥ द्विपलादिद्विगुणादि कर्षगुटिकास्ततोक्षसमाः ॥ कुंभेनवशुष्केन
जातिपुष्पादिवासिते स्थाप्य ॥ तासामेकां खादेत् प्रतिदिनमनुपानपानमात्रं च ॥ क्षीरं रसदाडिमांभः शीतजलमधुरासवा
न्यतमं ॥ जीर्णे नेलघुभोज्यमूषयेयः पिशितनिर्यूहैः ॥ सप्ताहमात्रमेवं सर्वानेनं क्रमाद्भवेत्परितः ॥ भक्तस्यांते प्राग्वा गुटिका
न विरुध्यंते चैषां ॥ निरपायाद्भूरिफलापरिहारसुखाय योजिता जयति ॥ प्रबलमपि वातशोणितमूत्रस्तंभं ज्वरं दीर्घमगमू
त्रशुक्रदोषप्लीहजमपि वातकृद्दोषानव श्वयमि पीनसहिक्काकासारुचिश्वासांश्च ॥ विड्ग्रथिमुदरं कृच्छ्रं चित्तंसाध्यक्षयंमदेम

र्दी ॥ उन्मादापस्मारं शूलामयशिरोगदंतांभान् ॥ आनाहमतिसारं हल्लीमकं कामलाग्रहणीरोगं ॥ ग्रंथ्यर्बुदासपिटीकान्भ
गंदरं गंडमालांव ॥ अतिकार्श्यमतिस्थौल्यं स्वेमतिश्लीपदं तद्देकीलान् ॥ दंष्ट्राविषं समौलेगरप्रयोगान्मुखोत्थश्च अभिचारा
मरातिकृतं दुःस्वप्नंभौतिकं तथा वाधी ॥ अजया लक्ष्मिं चैवतटिकाशिवनाम वृष्यकरी ॥ धन्यं धन्या कीर्तियशः श्रीविवो
धिनीमेध्याकुरुते स्त्रीवल्लभतमं जयं वानरक्षसादिभ्यं जयति ॥ कृमीनपि वलीपलितो नभवति गात्रंन हयशः शारदाह्यप्र
योगाद्वर्षशतं चतुष्टयं जीवेत् ॥ ~~वृहा[illegible]वटिका~~ ॥ गंधलोहं भस्मसमध्वाज्यप्लुतं सेव्यवर्षं वारिणात्रैफलेन ॥ शुभ्रकेशेका
लिमादिव्यदृष्टिः पुष्टिर्वीर्यं जायते दीर्घमायुः ॥ गंधकलोहं ॥ ॥ अयःपलं गुग्गुलुसंप्रयोज्य पलत्रयं व्योषपलानि पंचः ॥ प
लानि चाष्टौ त्रिफला रजश्च कर्षप्रलीयह्यमरत्वमेव ॥ ~~लोहगुग्गुलुः~~ ॥ अश्वावलीगोपयसा विभाव्य तन्तश्चकृजीतगृद्धविकाभि
: ॥ पथ्याक्षधात्रीवषभंगराजैर्वीभार्ग्यो मृष्टवारंयथगाईकेरा ॥ सिद्धसितायोजयतुल्यभागं रसायनं गंधकसंज्ञकं स्यात् ॥ धातु
क्षयं मेहगणाग्निमांद्यं शूलं तथा कोष्ठगतांश्च रोगान् ॥ कुष्ठानि वाह्याद्दशरोसयानि वारयेत्येषहि राजरोगान् ॥ कर्षोमितं सेव
निमेतिमर्त्यो वीर्यं च पुष्टिं वलमग्निदीप्तिं ॥ ~~गंधकरसायनं~~ ॥ रसगंधकताम्राणि सिंहवाररसैर्दिनं ॥ मर्दयेत्तानपेपश्चाद्वालु
कायंत्रमध्यगं ॥ रुध्वामुखागतंयामत्रयंतिचाग्निनापचेत् ॥ तत्कुंज्जा सर्वरोगेषु पर्णखंडिकयासह ॥ दानत्रयेदेहसिद्ध्यर्थंप्रोक्त

वीर्य्यवलायच ॥ त्रिनेत्रोरसः ॥ लक्ष्मीनारायणंवक्ष्येऽहंवैभुवनत्रये ॥ सर्वरोगोप्रशमनंदेहसिद्धिकरंपरं ॥ ज्ञात्वैवंपुरुषोलोके
सुमत्वायःकल्पते ॥ जरामरणनिर्मुक्तोव्याधित्रयविवर्जितः ॥ तेयथा ॥ रसभस्मपलैकंतुगंधकस्तुपलद्वयं ॥ अभ्रलोहसुवर्णा
नांभस्मत्वैकैकशःपलं ॥ वज्रकांतप्रवालानांभस्मचैकपलद्वयं ॥ शिलावराटमुक्तानांपृथक्भस्मपलंपलम् ॥ पलंपलंपृथ
गौप्यंवंगंभुजंगजंरजं ॥ दरदपलमेकंतुविषात्रिपलसंयुतं ॥ एवंभस्मानिसंगृह्यसर्वाण्येकत्रकारयेत् ॥ गंधकंपलमेकंतु
पुनर्दद्यःशुशोधितं ॥ शाकवृक्षस्यनिर्यासैमर्दयित्वादिनत्रयं ॥ पुटंदद्यात्प्रयत्नेनपुटसंख्यैकविंशतिः ॥ चित्रकार्द्रकनिर्गुंडि
सुवर्णाशिग्रुमार्कवैः ॥ किरातकंदाडिम्बकटुत्वकार्द्रैर्भावयेत्त्रिशः ॥ मत्स्यमाहिषमायूरकोलकुक्कुटपित्तकैः ॥ गरलेवार्कपयसाप्र
त्येकंभावयेत्त्रिशः ॥ ततःकच्छपयंत्रेणविषचूर्णमथोन्यसेत् ॥ ऊर्ध्वपात्रप्रयत्नेनरसेनानेनलेपयेत् ॥ संधिलेपप्रकर्तव्योम
दाकर्पटकेनच ॥ ततस्तुपूजयेद्यंत्रंरक्तपुष्पैश्चशोभनैः ॥ गणेशंपूजयेद्वादौदुर्गाविष्णुंचपूजयेत् ॥ कुमारीपूजयेत्पश्चात्ता
यसैर्मधुसर्पिषा ॥ तत्रोयंत्रेसमारोप्यचुल्लिकोपरियत्नतः ॥ दीप्ताग्निंतत्रकर्तव्योयाममेकंविचक्षणाः ॥ स्वांगशीतंसमुद्धरेद्
त्पुनर्यंत्रंतुन्यसेत्पुनः ॥ अनेनविधिनासम्यक्प्रयुक्तोरसकोविधैः ॥ वैद्यानांचनृपाणांचरसज्ञानाकलाविदां ॥ सर्वेषांचमनुष्या
णांचमत्कारोभवेत्क्षणात् ॥ गुंजामात्रमयंदत्तोह्युतपानंविशेषतः ॥ अनेनविधिनासम्यक्कृतेभवतिसिद्धिदः ॥ जलेयोगप्रकर्त

व्योयावत्कंपप्रजायते॥ततःपथ्यप्रदातव्यशर्करादधिभक्तकं॥चंदनेलेपयेदंगेकर्पूरागुरुमिश्रितैः॥तालवृन्तानिलोदेयोयाव
द्भवतिविज्वरः॥उन्मादंदंतवंधंचमोघापस्मारतंद्रिकी॥गात्राणांचतथाशोफंतत्क्षणाच्छमयेद्रसः॥असीतिवातजान्रो
गान्चत्वारिंशपित्तजान्॥विंशतिश्लेष्मजांश्चैवद्वंद्वजांश्चविशेषतः॥अष्टादशैवकुष्ठानितथाकाशक्षयानिच॥स्वासहिक्का
तथाशोफाकामलाश्चैवपांडुता॥प्रमेहाविंशतिश्चापिव्रणानांविंशतिस्तथा॥एवंपंचविधान्दोषान्गुल्मानाहंतथैवच॥ष
ड्विधान्यपिवाशीतिग्रहणीचचतुर्विधं॥अर्बुदगंदमालांचविद्रधीचभगंदरं॥एतेनबहुधारोगान्विनश्यंतिरसेनवै॥लक्ष्मीना
रायणोनामरसोलोकात्तरःस्मृतः॥यथासर्वेषुदेवेषुलक्ष्मीनारायणोमतः॥कृपयापरयादेवीकथितंतवपार्वति॥तवास्य
शक्यतेवक्तुंप्रभावेत्रिदशैरपि॥जानातिचइमंलोकसएवपरमेश्वरः॥येपूजयंतिसततंरसराजमेतंसद्भावभक्तिसहितस्त
थभावयुक्तास्तेषांकदाचिदपिनज्वरदाहपीडावान्यपिकोपिनभवंतिसमस्तदोषाः शाकवृक्षःस्याद्वः॥~~उक्त्रकमगुः~~॥ ॥
लक्ष्मीनारायणोरसः॥ॐकांमंमदनीमुस्तावागुर्जीतफलत्रिकं॥आकारमभ्रकंधान्यंषडिंममरिचंकणा॥यवानित्रितिजीर्कं

॥ सात्म्यद ॥ वह्निंतैलंघनसारकं ॥ तुंबुरुतगरंतोयंलवंगंजातिपत्रिका ॥ समंगापुष्करंइणामापद्मवीजंतृणाशटी ॥ तालिशंचित्रकंमाशीजा
॥ २०७ ॥ तीफलंपशीरकं ॥ वलानागवलामाक्षीकृष्णाग्रंथिकमाषकः ॥ यावदेतानिसर्वाणितावन्मोचरसंददेत् ॥ सर्वतुल्याशितायोज्याकर्षमा
त्रंचभक्षयेत् ॥ प्रभातेचनिशादौचभोजनांतेविशेषतः ॥ संध्याकालेतथाभोज्यंवाजीकरणमुत्तमं ॥ अजीर्णज्वरइत्यादौनष्टाग्नेचापिदी
पनः ॥ अशीतिवातजान्रोगाश्चत्वारिंशत्पित्तिकान् ॥ विंशतिश्लेष्मजान्रोगान्नालस्यंछर्द्यरोचकं ॥ चक्षूरोग्रहणीरोगानतीसारंवि
शेषतः ॥ क्षयमेकादशश्वासकाशंपंचविधस्तथा ॥ उदरव्याधिनाशश्चमूत्रकृच्छ्रगलग्रहं ॥ पुत्रंजनयतेवंध्यासेव्यमानत्विमोषधः ॥
सन्निपातान्तरश्चैवविस्फोटकभगंदरो ॥ नेत्ररोगंशिरोरोगंकर्णामयान्हनुग्रहं ॥ हृद्रोगंकंथरोगंचजानुजंघागतिस्तथा ॥ सर्वरोगविना
शायचरकेणानुभाषितं ॥ ॐक्रमायंचूर्णं ॥ नागार्जुनोमुनीद्रेशशाशयल्लोहशास्त्रमतिग्रहणाम् ॥ तस्यार्थस्यस्मृतयेवयमेतद्विशदाक्ष
रैर्ब्रूमः ॥ मेनेमुनिःस्वतंत्रेभूयःपाकंनपलपंचकादर्वाक् ॥ नचवहुप्रयोगदोषादूर्ध्वश्चनपलत्रयोदशकान् ॥ तत्रायसिपाचनीयेपंचप ॥ रामः ॥
लादौत्रयोदशपलकांते ॥ लोहात्त्रिगुणात्रिफलाग्राह्याषड्भिःपलैरधिकाः ॥ मारणपुटनस्थालीपाकास्त्रिफलैकभागसमाथाः ॥ ॥ २०७ ॥
॥ त्रिफलायाभागद्वितयंग्रहणीयंलोहपाकार्थं ॥ सर्वत्रायःपुटनाद्यर्थैःकांशेशरावसंख्यातम् ॥ प्रतिपलमेवतुगुणंपाथश्चक्काथार्थ
मादेयम् ॥ सप्तपलादौभापंचदशांतेउभमांसरावैश्चत्र्याद्येकादशकांतेरधिकंतद्वारिकर्तव्यं ॥ तत्राष्टमोभागःशेषःक्काथस्यप्रयत्नतःस्थाप्य

ते नहि मारणाध्नस्थालीपाकाभिविर्ष्यन्ति ।। पाकार्थं त्रिफलाभागद्वितये शरावसंख्यानम् ।। प्रतिपलमर्द्धसमं स्यादधिकं द्वाभ्यां शरावाभ्यां ।। त
त्र चतुर्थो भागः शेषो निपुणेनय त्नेनोग्राह्यः ।। अयसां पाकार्थं त्फलैव सर्वस्मात्प्रधानतमः ।। पाकार्थमश्मसारे यं पंचपलादौ त्रयोदशपलैका
ते ।। दुग्धशरावद्वितयं पादैरेकादिकैरधिकम् ।। पंचपलादिमात्रा तदभावे तदनुसारतो ग्राह्यं ।। चक्रादिक्रमेकांशकावधिकं त्रयोद
शकान् ।। त्रिफलात्रिकटुकचित्रककान्तक्रामकविडंगचूर्णानि ।। अन्यान्यपि देयानि पलांशस्यैव वीजानि ।। जातिफलजातिकोषै
लाकंकोलककलवंगानां ।। सितकृष्णजीरकयोरपि चूर्णान्ययसः समानि स्युः ।। त्रिफलात्रिकटुविडंगानि यताअन्यथा प्रकृतिः ।। का
लायसदोषहते जातिफलादेर्लवगान्तस्य ।। क्षेपप्राप्तानुरूपः सर्वस्यानस्यैवकार्यं ।। कान्तक्रामकमेकं निःशेषं दोषमपहरत्यश्मः ।। द्वि
गुणात्रिगुणाचतुर्गुणामात्रया ग्राह्यं यथाप्रकृतिः ।। यदि भेषजमयस्त्वं स्तोकत्वं वापि चूर्णानाम् ।। अयसामार्थसंख्या भूयो न्यत्वे न भूयो न्या
।। एवं धात्वनुसारात्तत्कथितौषधस्य बाधेन ।। सर्वत्रैव विधेयं तत्कथितस्यौषधस्योहः ।। ।। साध्यसाधनपरिमाणविधिः ।। कान्तादि
लोहमारणविधानसर्वस्वमुक्तमेतावत् ।। यस्य कृतेन तल्लोहपक्वं तस्य शुभेदिवसे समदंगालिकगलिततननतत्तभूतौ गौरिशिवं समभ्यर्च्य
।। वैदिकविधिना वह्निं निधाय हुत्वा कृतोत्सवः ।। धर्मात्सिध्यति सर्वश्रेयं तत्कर्मसिद्धये किमपि शक्त्यनुरूपं दद्यात् द्विजाय संतोषि
यो गुणिने संतोष्य कर्मकारं काप्रसादपूगादिदानसम्मानैः आदौ तदस्य सारं निर्मलमेकान्ततः कुर्यात् ।। तदनु कुठारछिन्नत्रिफलागि

रिकर्णिकास्थिसंहारैः ॥ कलिकर्णीछदमूलशतावरीकाकेशराजरविः ॥ शालिश्चमूलकशीमूलप्राहृत्यजभंगराजेश्च ॥ लिप्त्वादग्धवं
तद्दृष्टक्रियलोहकारेण ॥ विरजलभावितनिर्मलशालागारेणपरितआछाद्य ॥ कुशलाध्मापितभस्त्रानवरतः ॥ मृक्रेनपवनेनवह्नेर्वी
ह्य ज्वालावोद्भव्याजातुनैवकुविकया ॥ मृल्लवणसलिलभाजाकिंतुस्वछामुसेछुतया ॥ द्रव्यान्तरसंयोगात्वाशक्तिंभेषजानिमुंच
ति ॥ मलधूलीमत्सर्वं सर्वत्रविवर्जयेत् ॥ संदंशेनगृहीत्वान्तःप्रज्वालिताग्निमध्यमुपनीय ॥ गलतियथायथमग्रेतथैवमुद्रवद्रीये
त्रिपुनः ॥ तलनिहितोर्द्ध्वमुखाङ्कुशलग्नंत्रिफलाजलेविनिक्षिप्य ॥ निर्वापयेदेवंत्रिफलांबुरक्षेव ॥ यल्लोहंनमृतंतत्तत्पुनरपिवत्न
व्यमुक्तमार्गेणयत्रमृतंतथापितत्रत्यक्तव्यमहोलोहमेवततः ॥ तदनुघनलोहपात्रेकालायसेमुद्गरेणसंचूर्ण्य ॥ दत्वावकुशःस
लिलंप्रक्षाल्याङ्गारमुद्धृत्य ॥ तदयकेवलमग्नौशुष्कीकृत्याथवातपेपश्चात् ॥ लोहशिलायापिष्यादमिन्नेऽस्मनिवातदप्राप्तो
इतिमारणाविधिः ॥ ॥अथकृत्वायोभांडेदत्वात्रिफलामुशेषमनयद्वा ॥ प्रथमंस्थालीपाकंदद्याद्द्रवक्षयान्तदनु ॥ गजकर्णीपत्र
मूलशतावरिभृंगकेशराजरसैः ॥ प्राग्वत्स्थालीपाकंकुर्यात्प्रत्येकमेकैकंवा ॥ इतिस्थालीपाकविधिः ॥ हस्तप्रमाणावदत्तश्च
त्रहस्तैकखातसममध्यमं ॥ कृत्वाकटाहसदृशंतत्रकरीषंतुषश्चकाष्ठंच ॥ अंतर्घनतरमद्भुषिरंपरिपूर्य्यदहनमायोज्य ॥ पश्चाद
यसश्चूर्णीश्चभ्यांपंकोपमंकुर्यात् ॥ त्रिफलांबुभृंगकेशरशतावरीकाकन्दमाणासहजरसैः ॥ मत्स्याक्षककरिकर्णीछदमूलपत्रनेवा

स्वरसैः॥ क्षिप्त्वाथ लोहपात्रे मार्द्वे वा लोहमार्दपात्राभ्यां॥ तुल्याभ्यांपचेन्माह्याहर्निशं दहेत्प्राज्ञः॥ एवं नवभिरमीभिषेजराजेः प
चेत्पुटपाकं॥ प्रत्येकमेकमेभिर्मिलितैर्वा त्रिवत्सरान् वारान्॥ प्रतिपुटनेनर्तिष्या स्थालीपाकं विधाय तथैव॥ तादृशि दृशादिनपि
ष्यत्विगलद्रजसानुपञ्जते यत्र तदयश्चूर्णापिष्टं दृष्टं घनसूक्ष्मवाससि श्लक्ष्णां यदि रजसा सदृशं स्यात्केतका स्तर्हितदृष्टं॥ पुट
नेस्थालीपाकेऽधिकृतं प्रत्येषे स्वभावकगधिगमात्॥ कथितममपिहेयमौषधमुचितमुपादेयमन्यदपि॥ इति पुटनविधिः॥ ॥
अभ्यस्तकर्मविधिभिर्वालकशास्त्रीयबुद्धिभिर्लक्ष्यम्॥ लोहस्यपाकमधुना नागार्जुनशिष्टमभिधास्ये॥ लोहारकूटताम्रकटाहे दृ
ढमसृणमये प्रमाणाभ्यधिकम्॥ तदयः पचेदद्वपलकाष्ठैर्धनेन वह्निना मृदुनानिक्षिप्य त्रिफलाजलमुदितं यत्तद्दत्तश्चदुग्धश्च
संचाल्य लोहमय्या दर्व्या लग्नं समुत्पाद्य॥ मृदुमध्यखरभावैः पाकस्त्रिविधोऽत्र वक्ष्यते पुंसा पित्तसमीरणश्लेष्मप्रकृतीनां म
ध्यमस्य सममभ्यक्तदर्विलोहसुखदुःखखलयोगि मृदुमध्यं॥ दुर्जलितदार्वि खरं परिभाषन्ते केचिदाचार्याः॥ अन्ये विही
नदार्वीप्रलेपमीषुत्कराकृतिं ब्रुवते॥ मृदुमध्यमसूक्ष्मचूर्णसिकतापुञ्जोपमं तु खरः॥ त्रिविधोपि पाकउदृशोसर्वेषांगुणाकृदे
वं न तु विफलः॥ प्रकृतिविशेषे सूक्ष्मोगुणा दोषाज्जनयतीत्यल्पं॥ विज्ञाय पाकमेवं डांगवतार्यक्षितौ क्षणात्क्रियतः॥ विश्राम्य
तवलोहे त्रिफलादे प्रक्षिपेच्चूर्णं यदि कर्पूरप्राप्ति भवति॥ ततो विगलितेन तदुग्धस्वल्पचूर्णीकृतमगुरुं प्रक्षिपेत्तवान यदि तल्ला

भ॥ पक्वं तदश्मसारं तु विरुद्धं तस्मिन्प्रभाविरुक्षत्वे ॥ गोदोहनादि भाण्डे लौहभावे सति स्थाप्यं ॥ यदि तु परि तु मिहेतोर्धं नमीक्षितमधिकं
नत्तोन्यस्मिन् ॥ भाण्डे निधाय रक्षेन्नाग्रुपयोगो ह्यनेन ममहान् ॥ अयसि विरुक्षिभूते स्नेहस्तिलाघतेनेन सम्पाद्यः ॥ एतन्नतोगुरोत्तरमि
त्यमुनास्तेहनीयन्तत् ॥ अत्यन्तकफप्रकृतेभक्षणामयसो मुनेवसंसन्तिकेवलमपिदमसितं जनयत्ययसोगुणान्किंयतः ॥ अमृत
सारलौहः ॥ अन्यच्च नानाविधरुक्प्रशान्त्यै पुष्टौ कान्त्यै सीवं सममभ्यर्च्य ॥ श्रीविष्णुं हत्रिपुरायेतदमृतमादाय लौहाख्यं ॥ दशाकृसमा
परिमाणांशक्किवयोभेदमाकलय्यपुनः ॥ इदमधिकं तदधिकतरयमिदद्देवनवमात्मोदकवत् ॥ सममसृणामलपात्रे लौलेनमर्द
यगाढं भूयोभूयः ॥ दत्वामध्वनुरूपतदनुघृतं योजयेदधिकम् ॥ वंधंगुरु शाति यथा मध्यपृथक्त्वेन पङ्कमपि शिर्षत ॥ इदमिहदुष्टो
पकरणमेतदहष्टतुमन्त्रेणास्वाहान्ते नाविमर्दो भवतिफट् उक्तेनवलोहवलरक्षाः ॥ सम्मनस्कारेण वलिभिर्भक्षणामयसाहृत्मन्त्रेन
॥ ॥ ॐ अमृतोद्भवायस्वाहा ॥ ॐ अमृते ह्रीं फट् ॥ ॐ नमश्चण्डवज्रपाणये महायक्षसेनाधिपतये सुरगुरुविद्यामहावलायस्वा
हा ॥ ॐ अमृते ह्रीं॰ ॥ जग्ध्वा तदमृतसारं नीलैर्वा क्षीरमेवानुपिवेत् ॥ कान्तकाममकमलेसवव्यारसपिवेत्तदनुतत् ॥ आचम्य वतांवुलं घन
सारसहितमुपयोज्ययेत् ॥ नानुपविश्यानाप्यति भाषितमातिस्थितमपि ष्ठत ॥ अत्यन्तवातशीतातपयानस्नानवेगरोधादीन् ॥ ज
ह्याद्दिवानिद्रासहितश्चाकालभुक्तञ्च ॥ वातकृतः पित्तकृतसर्वान्कद्मतिक्तकटुकषायान् ॥ तत्क्षणविनाशहेतून्मैथुन

कोपश्रमान्हरे॥अशिवंतद्यपश्चान्यत्तन्नवापाटवंहृद्यप्रथमातनाम्॥अर्तिभवतिनिनवान्त्रंकूजतिमोक्रव्यमध्याज्ञकम्॥प्रथमंपीत्वाउ
ग्धंशल्यत्रंविशदसिद्धमक्लिन्नदम्॥हृत्रसंपदश्रीयामासैवेहगमैप्रायः॥उन्नमभूषरभूवराविष्किरमासंथाज्ञमैणादिकम्॥अन्य
दपिजलचराणांपृथुरोमापेक्षयाज्याय॥मांसालाभेमत्स्याअदोषलास्थूलसंगणागाह्या॥मद्गुररोहितसकुलादग्धास्तुपलला
म्मनाषूनाः॥शृंगाटकफलकशेरुकदलीफलतालनारिकेलादि॥अन्यदपियत्कृष्यंमधुरापनसादिकंज्यायः॥केवुकतादुक
करीरान्वार्त्ताकपटोलफलदलसमठान्॥गुडूमसूलेक्षुरसानुमेशन्नितिरामिष्टतान्॥शार्कप्रहेयमखिलंस्तोकंतद्वयेनवास्तु
कंदद्यात्॥तमगुग्धानुपानंप्रायःसारयतिवद्धकोष्ठस्य॥अनुपीतमम्वुयकोमलफलनारिकेलस्य॥यस्यनततथासरतिसयैव
क्षारजलेपिवेत्कोष्ठं॥कोष्ठंत्रिफलाक्वाथसनाथंक्षारंततोव्याधिकं॥त्रीनिदिनानिसमंस्याद्क्रिवत्तथैनुवर्द्धयेत्तक्रमशः
॥यावद्वाष्टममाषंनवर्द्धयेत्॥प्रतरितोव्यधिकम्॥आदौरक्तिकात्रितयंद्वितीयहृद्देत्नुरक्तिकात्रितयं॥रक्तिपंचकपंचकमतंउर्द्धव
र्द्धयेन्नियतं॥वात्सरिककल्पपक्षेदिनानियावन्तिवर्द्धितंप्रथमं॥तावन्तिवर्षशेषेप्रतिलोमंह्रासयेत्तदयः॥तेष्वष्टमाषकेषुप्राप्तमर्माष
कत्रयतश्रीयात्॥सायश्चतावद्होमध्यमाषद्वयंशेषम्॥एवंतदमृतमनश्चकांतिलभतेचिरस्थिरंदेहं॥सप्ताहत्रयमात्रात्सर्वा
रुजोनिहंतिकिंबहुना॥आर्याभिरिहनवत्यासप्तविधिनांयथावदाख्यातम्॥अमतिविपर्ययशासशून्यमनुष्ठानेउपनीतं॥मु

निरवितशास्त्रनारंगत्वासारं ततः समुद्धृत्य ॥ निवबन्धवान्धवानामुपकृतये कोपि षट्कर्मा : ॥ इति मस्राविधिः ॥ यत्रतत्रोद्भवं
लोहं निःशेषं मारितं यदि ॥ त्रिफलाक्वाथसंयुक्तं भक्षयेद्वलिनाशनं ॥ सामान्याद्द्विगुणं श्रौडं कलिंगोष्टगुणस्ततः ॥ तस्माच्छ
तगुणं भद्र भद्रावज्रं सहस्रधा ॥ वज्रात्षष्ठिगुणं पाण्डि निरविदशभिर्गुणो: ॥ ततः कोटिसहस्रं वा अयस्कान्तं महागुणं ॥ इति अमृ
तसालंलोहं ॥ रसतस्ताम्रद्विगुणं ताम्रात्कृसभ्रकं द्विगुणं ॥ पृथगेवेषां शुद्धिस्ताम्रशुद्धिस्ततो द्विविधा ॥ पत्रीकृतस्य गंधकयोगात्
वा मारणं तथा लवणेः ॥ आर्के क्ष्मापितं ताम्रं निर्गुण्डिकल्ककांजिकमध्ये ॥ यत्वा तन्निगेरिकाभं तत्पिष्टामर्द्दं गंधकं तदनु ॥ पुटपाके
न विशुद्धं शुद्धं स्यादम्रकं नु पुनः ॥ हिलमोचिमूलपिरोडक्षिप्तं तदनुमार्द्द संपुटे लिप्ता ॥ तीक्ष्णां दग्धं पिष्टमम्लमंमसा साधनं चेन्द्रकावि
रहितं ॥ ~~रेचितताम्रे~~शरसः ॥ खल्वशिलायां घृष्टः पिरिष्टिकार्य्या ॥ उत्खेयगद्रसलिलेन निर्गुण्डीकल्केन सकृत्कृत्वो ॥ एतत्सिक्त्रि
तयं चूर्णितताम्राङ्घ्रिकेः पृथक्युक्तं ॥ पिप्पलीविडंगमरिचैः श्लक्ष्णं द्वित्रिमाषिकं भक्ष्यम् ॥ शूलाम्लपित्तश्वयथुग्रहणीयक्ष्मा
दिकुक्षिरोगेषु ॥ रसायनं सहृद्दे तत्परिहारो नियमलोनात्र ॥ ताम्रयोगः ॥ अन्यच्च ॥ ततुपत्रीकृतताम्रं नेपालं गंधकं समं ॥ दत्वाचो
र्द्धमधोमध्ये स्थालिकामध्ये संस्थितं ॥ कृत्वास्यत्यपिधानेन स्थालिमध्येपि धायच ॥ शर्कराभक्तलेपेन लिप्त्वा संधितद्दृढं ततः ॥ वालु
कापूरितस्यात्स्यां पिहितायां पुनस्तथा ॥ उलिप्तायाश्चयामेकमधो ज्वालां प्रदापयेत् ॥ ततआकृष्य ताम्रस्य मतस्य त्रिहयोज

जेना ॥ अथ कर्षगंधकस्य वह्निस्थलोहपाकाम् ॥ शिलापुत्रेणामर्द्य तु तेघृष्टं पुनः पुनः ॥ रसोम्लमथितः शुद्धस्तावन्मात्रः प्रदी
यते ॥ ततस्तथैव संमर्द्य पुनरायं प्रदापयेत् ॥ अष्टौ विडकमात्रञ्च मर्दयेन्मूर्च्छितं तथा ॥ सर्वस्मात्तत्र आकृष्य शिलापुत्रादिकं दृ
ढं ॥ संहृत्यालेवुषरसेनैव गुञ्जकं संप्रकल्पयेत् ॥ तत्पिंडं वस्त्रविस्तीर्णं पिंडे त्रिकटुजे पुनः ॥ वसनान्तरितं गत्वा पोटली का
रयेद्बुधः ॥ नभस्तांपोत्तरिमाज्यमग्नां कृत्वा विधारितं ॥ सूत्रेणादंडसंलग्ना पाचयेत्कुशलो भिषक् ॥ यदा निस्नेहता वा यापो
टिना बद्धखा भवेत् ॥ यदा पक्कं तमाकृष्य पंचगुंजातुलाधृतं ॥ त्रिकटुत्रिफलाचूर्णं तुल्यं प्रातः प्रयोजयेत् ॥ तक्रस्यांदनुपा
नेन अम्लपित्तोद्भवे पुनः ॥ त्रिफलैव समा देया कोष्णं वारि पिवेदनु ॥ सप्तमे दिवसे रक्तिहृद्धिस्तावत्तु माषकं ॥ यावत्प्रयोग
श्च तथैवापः कर्षपुनर्भवेत् ॥ योगोयं ग्रहणीयक्ष्मपित्तशूलाम्लपित्तहा ॥ रसायनं चैतदिष्टं गुदकीलादिनाशनम् ॥ न चात्र प
रिहारोस्ति विहाराहारकर्मणि ॥ ताम्रयोगः ॥ अथवा वक्ष्यविधिसंस्कृतं कृष्णाभ्रकचूर्णमादाय लोहचतुर्द्धार्थसमछित्रि
वृतः पंचगुणाभागम् ॥ प्रक्षिप्याऽयप्राग्वत्पचेद्भाग्यं भवेद्योयावत् ॥ तावन्मात्रानुसारतः स्यात्त्रिफलादिद्रव्यपरिमाणम्
॥ इदमप्यापिकमिदमतिपित्तनुदिदमेव कान्तिबलजननं ॥ सांभाणितष्टभ्यो परमधिकमात्रयायुक्तं ॥ इति पाकविधि
॥ कृष्णाभ्रकमभेकवपुवज्राख्यं श्वैकपत्रकं कृत्वा काष्ठमयोलूखलके चूर्णं सुखलेन कुर्वीतः ॥ भूयो दृशादिवपिष्टं वासः सू

क्ष्मावकासतलगलितम् ॥ मंडूकपर्णिकायाः प्रचुररसे स्थापयेत्रिदिनं ॥ उद्धृत्य तत्तु सादथपिंष्याद्धे मत्रिकधान्यभक्तस्य अक्षोक्षाद
त्यक्त्वाम्लस्वच्छजलेन प्रयत्नेन मंडुकपर्णिकार्यां पूर्वस्वरसेना लोडुनेकुर्यात् ॥ स्थालिपाकं पुटनं वाद्ध्येरपि भंगराजाद्यैः ॥ नादादिपत्रम
ध्ये कृत्वा पिंडं निधाय भस्माग्नौ ॥ तावद्दहेन यावद्वह्निर्नेगिनहृस्यते सुचिरं ॥ निर्वापयेद्यडुग्धे नदुग्धं प्रक्षाल्य वारिणा तदनु ॥ पख्याप
ख्यावशेषचूर्णानि श्वंडिकेकुर्यात् ॥ इत्यमृतकविधिः ॥ हेमाद्याः सूर्यतनुतास्रवति गिरिधातवः ॥ जत्वाभं मृदुमृत्स्नाछ्छयन्मलत्त
च्छिलाजंतु अनम्लश्चाकषयश्च कटुपाकि शिलाजतु ॥ नात्युष्णशीतं धातुभ्यश्चतुर्भ्यस्तस्य संभवः ॥ हेम्नोथरजतात्ताम्रात् वरं
कृष्णायसादपि ॥ मधुरश्च सतिक्तश्च जवापुष्पनिभश्च यत् ॥ विपाके कटु तिक्तश्च तत्सुवर्णस्य निस्रवत् ॥ राजतं कटुकं श्वेतं स्वा
दु शीतं विपच्यते ॥ ताम्राद्बर्हिकठाभं तीक्ष्णोष्णं पच्यते कटुः ॥ यत्तु गुग्गुलुसंकाशं तिक्तकं लवणान्वितं ॥ विपाके कटु शीतं च स
र्वश्रेष्ठं तदायसं ॥ गोमूत्रगंधः सर्वेषां सर्वकर्मसु योगिकः ॥ रसायनप्रयोगेषु पश्चिमं तु विशिष्यते ॥ यथाक्रमे वातपित्ते श्लेष्मपित्ते
कफे त्रिषु ॥ विशेषेण प्रशस्यन्ते मला हेमादिधातुजाः ॥ लौहकिट्टायते वह्नौ विधूमं दह्यतेऽम्भसि ॥ तृणाग्न्यग्रे कृतं सर्वमधोग
लति तन्तुवत् ॥ मलिनं पङ्कवेनच्च क्षालयेत्केवलाम्भसा ॥ लौहपात्रेषु विधिना उद्दीमृतं च संहरेत् ॥ वातपित्तकफघ्नेषु निर्यूहे
स्तलुभावितं ॥ वीर्योत्कर्षपरं याति सर्वैरेकैकशोपि वा ॥ प्रक्षिप्योद्धृतमप्यादौ पुनस्तत्प्रक्षिपेद्रसे ॥ कोष्ठसप्ताहमेतेन विधिना ते

॥रत्न॰॥
॥२११॥

स्यभावनात्तुल्यं गिरिजेन जलेवत्तद्रोगाभावनौषधं क्वाथ्यं ॥ तेन क्वाथेयादंशे पूतो हिमप्रक्षिपेगिरिजम् ॥ तत्समं रसनायासंसंसृ
ष्टं प्रक्षिपेद्रसे भूयः ॥ पूर्वोक्तेन विधानेन लौहेश्चूर्णीकृतैः सह ॥ तत्पीतं पयसा दद्याद्दीर्घमायुः सुखान्वितम् ॥ जराव्याधि
प्रशमनं देहदार्ढ्यकरं परं ॥ मेधास्मृतिकरं धन्यं क्षीराशी तत्प्रयोजयेत् ॥ प्रयोगसप्तसप्ताहास्त्रयश्चैकश्च सप्तकः ॥ निर्दिष्टस्त्रि
विधस्तस्य परो मध्योऽवरस्तथा ॥ मात्रापलं त्वर्द्धपलं स्यात्कर्षं तु कनीयसी ॥ शिलाजतुप्रयोगेषु विदाहीनि गुरूणि च ॥ वर्ज्ज
येत्सर्वकालं च कुलत्थान्परिवर्जयेत् ॥ पयांसि तक्राणि रसाः सयूषास्तोयं समूत्रं विविधाः कषायाः ॥ आलोडनार्थे गिरिजस्य
शस्तास्ते ते प्रयोज्याः प्रसमीक्ष्य कार्य्यं ॥ इति चरकोक्तशिलाजतुविधानं सोपस्कारमेतत् ॥ सूतं गंधसमं विमर्द्य सुचिरं कृष्णा
तास्येन्मृत्पटैर्लिप्तायां स्वरसैर्मितैस्तालविलेयं त्रेपचेच्छार्करैः ॥ यामान्द्वादश मंदमध्यखरज्वालाग्निभिरूर्ध्वस्थितं तं सिंदूराह
गामाददीत भसितं सोतं सुशीतं भिषक् ॥ तद्यक्ष्मकाशश्वसनाग्निमांद्यप्रमेहजीर्णज्वररक्तदुष्टिः ॥ निहंत्यपुष्टिं तनुते प्रयुक्ति
सुक्तौषधैर्ज्ञातृपरंपराया ॥ उड्डीशरसभस्माख्यसिंदूरः रसेंद्रचिंतामणोक्त ॥ नागार्जुनेति विख्याताऽम्बिकाक्षितिमंडले ॥ त
या विमर्दितं सूतं दिनमेकं निरंतरं ॥ काकमाचीरसैः कार्य्यं मर्दनं दोषनाशनम् ॥ पारदं दशटंकं स्यात् दशटंकं च गंधकं ॥ नव
सादरं च पादं स्यात्त्रयमेकत्र मर्दयेत् ॥ काचस्य कूपिके कृत्वा मुखं तस्या निरोधयेत् ॥ अष्टयामावधियावत्तावत्सूतः प्रपच्यते

एवंनिस्यघनेसाक्षात्तरुणादित्यसन्निभः ॥ अरुणो भस्मसूताख्यः सर्वकार्य्यार्थसाधकः ॥ प्रवालकोमलछायोन्रणोमस्येन
वह्निभः ॥ भक्ष्येद्रक्तिकापंचमरिचेनसमंरसं ॥ दोषंकारकषायःसद्यकामाग्निदीपनः ॥ ज्वरादिकामयंदोषान्संयोगान्नाशय
त्यपि ॥ येषुयेषुप्रयोगेषुरसोरोगेषुसत्वरं ॥ नावतान्नाशयेश्रेष्ठसमर्थोरिसपार्थिवः ॥ सिंहररसः ॥ रसटंकत्रयशुद्धंकृ
ष्णधत्तूरबीजके ॥ तैलेपलद्वयेखल्वेमर्दितंदिनसप्तवः ॥ तावद्यावद्भवेत्तस्यजलौकारूपमुत्तमं ॥ माषान्नपिष्टकेनादौ
दृढसूत्रेणवेष्टयेत् ॥ सूत्रेणवेष्टयेत्काष्ठं शोषयेद्रविणाचतं ॥ दुग्धेनपूर्य्यतेर्कं भस्मत्रनिवेशयेत् ॥ विशोष्यशकलंदु
नं नागकेशरं अकर्कलारव्य · धान्य · प्रत्येक शाण १ पुनः कोलमज्जा कृष्णधत्तुरवीजं · पाटली कयवानि · प्रत्येकं शाण २ त्रि
फला · उश्वरा · विदारी · पत्रकं प्रत्येकं द्विशाणं · कस्तूरी जटामासी सुवर्णभस्मं प्रत्येकं द्विशाणं ॥ रससिंदूराख्यताम्रप्रत्येकं

॥ राम: ॥
॥ २१ ॥

॥ त्रिशाणांविजयापलत्रयं ३ मात्राकर्ष १ अथवाग्निसमीक्ष देयं ॥ शर्करासहितंगोक्षीरंवानुपेयं ॥ शर्करादुग्धंसंमिश्रंनित्यंनि
शिपिबेन्नरः ॥ लवंगंतिलमिश्राशिभक्षयेच्चदिनेदिने ॥ वीर्यस्तंभेहेकृतंबन्धमूत्रंचनाशयेत् ॥ प्रमेहाविंशतिंबलान्नाशयेच्च
दिनेदिने ॥ वीर्यवृद्धिंचवर्णंचबलंचकुरुतेभृशं ॥ हरेत्कुष्ठियेवकाठिन्यंवंशरीरगतथैवच ॥ इतिजातीफलीमोदकः ॥ शतंचविरियाग्राह्यंपारि
पादशिरन्त्यजेत् ॥ तन्मासंशुक्ष्मरवल्वेतुपेषयित्वाप्रयोजयेत् ॥ आरुकंक्षीरगव्यंतुशनैर्मृद्वग्निनापचेत् ॥ प्रस्थगोघृतकंदद्यात्तदर्द्धमाक्षि
कंतथा ॥ खंडंचेद्रसमंशुभ्रंतुलामात्रंप्रयोजयेत् ॥ चातुर्जातंलवंगंचद्विजातीचयवानिका ॥ त्रिफलातिविषावह्निर्यष्टिमुस्ताजमोदकं ॥ ना
लमूलमश्वगंधाचजातीपत्रककोलकं ॥ पुष्करामूलग्रंथिश्चकपिकच्छुअकर्कले ॥ अभ्रकंचंदनंचैवकुंकुमंचंद्रकस्तुरी ॥ त्रिकटुस्वर्णिकारं
वशुक्ष्मेलाकट्फलंवला ॥ निलिकाशतपुष्पंचपुरासानियवानिका ॥ मानकंदंचखर्जूरंमज्जाश्रीफलंचकार्षिकं ॥ स्निग्धभांडेनिधापार्थं
दातव्यंकर्षमानतः ॥ वटकशतं १०० यक्षपाडेन्तुडंवर्जयित्वासूक्ष्मपिष्ट्वागोघृतेपलं १६ भर्जयित्वागोदुग्धंचतुःषष्टिपलं ६४ दत्वाशनैर्मृ
द्वग्निनापाचयित्वासितापलशतंदत्वापचेत् ॥ ततश्चूर्णानिशुक्ष्मेलात्वच· पत्रक· नागकेशर· लवंग· जीरकं· कृष्णजीरकं· यवानिका· त्रिफ
ला· अतिविषा· चित्रक· मधुयष्टि· मुस्ता· अजमोदक· मुशली· अश्वगंधा· जातीपत्रंकोलकंपुष्करमूल· पिप्पलीमूलवानरीबीज
·अकर्कला· अभ्रकं· चंदनं· कुंकुमं· कर्पूरकस्तुरि· शुंठी· पिप्पली· मरिचानि· स्वर्णिकार· पुनः शुक्ष्मेला· कट्फलंवलानिलीका· मिसि

॥ सा·ले·उ· ॥
॥ २२ ॥

पारसीकयवानी· मानकंदोत्रविरालीकंउ· खर्ज्जूरंवादाम· पेस्ता· चिरौंजिइतिख्याता ॥ प्रत्येककर्षमात्रंचूर्णंक्षिपेत्· मात्राकर्ष· अत्रपानंगो
दुग्धंअत्रगोक्षीरं· द्विगुणंदेयमितिवदंति· तस्मात्तुपानंगोक्षीरंभक्षयेन्मानवसःसुधी ॥ धातुक्षीणोवलक्षीणोहीनवीर्य्यस्तथानले ॥ श्वास
कासमहाग्निघ्नेग्रहणीविषमज्वरे ॥ एकजेद्वंद्वजेवापिसन्निपातेसुदारुणे ॥ षंढोपिभजतेनारीशतैकंनात्रसंशयः ॥ अंगपुष्टीकरंस
म्यकमनोज्ञकांतिवर्द्धनं ॥ चिरियापाकमाख्यातंवलहीनंवलप्रदं ॥ एतद्धिर्यकरंपुंसांनास्तितस्यौषधैःपरं ॥ इतिवृहच्चिरियापाक
ः ॥ पूगस्याष्टपलग्राह्यंभंगाप्रस्थेमितेततः ॥ घृतप्रस्थद्वयमितंगोदुग्धेद्रोणतः ॥ तेनतुल्याश्चसिताग्राह्याशनैर्मंदाग्निनापचेत् ॥ घनी
भूतेसमालोक्यचूर्णानिमानिदापयेत् ॥ चोषवराजलमुस्यलवारिवतकसिरसित्रधान्ययुताभिः ॥ जीरकयुग्मःयवानिकयुग्मंवांसिसर्वे
विल्वप्रमाणं ॥ पत्रमेलावाल्हीकनागःयष्टीकगोक्षुरव्याधियुताभिः ॥ नागवलातिवलाश्चिफलाचआटरूसाभिः पलद्वयसर्वैमालति
काफलतस्यत्वचाभिः मंडेलाभिर्मुंडियुताभिः ॥ दारुसिताऽश्रीस्तालिसपत्रंमृंगीपुष्करनालमूलिभिः ॥ एतानिसर्वसूक्ष्माणिसूक्ष्मचू
र्णानिकारयेत ॥ पूगपल८ विजयापल १६ घृतप्रस्थद्वयंगोदुग्धंपल२५६ सितापल२०० ॥ अथचूर्णानि ॥ त्रिकटुस्त्रिफलावालकम
ल· उशीर· पिप्पलीमूलचंदनधनिका· जीरकं· कृष्णजीरकयवानिकाअजमोदावंशरोचना· प्रत्येकंपल· पत्रकं· सूक्ष्मैला· केशरं
नागकेशरं· यष्टीमधुकगोक्षुरकृष्णनागवला· अतिवला· समुद्रशोष· वासा· प्रत्येकंद्विपल· प्रमाणं· जातीफल· जातीपत्री· एलासु

॥ राम: ॥
॥ २२ ॥

डि· त्वच· लवंग· तालीसपत्र· कर्कटशृंगी पुष्करमूल· मुशलीकं ३· प्रत्येकं पलं चूर्णयित्वा क्षिपेत् ॥ मात्राद्विकार्षीकाकार्षिकावा· अनु
पानंसितायुतंगोक्षीरं ॥ जीवेद्वर्षशतंसाग्रंवलीपलितवर्जितः ॥ वल्यंवीर्यकरोहृद्यः भीमतुल्यपराक्रमः ॥ बृहस्पतीसमोधीमान्बु
शिसूर्यसमद्युतिः ॥ मासमात्रप्रयोगेनरससेतेरमणीशतं ॥ हर्षिताश्वसमोज्ञेयोकिन्नरैःसहगीयते ॥ अप्रजानांचनारीणांहितोत्यन्त
सुपुत्रदः ॥ अशितिर्वातआरोगानाशयेन्निःसंशयः ॥ एतेनराणानसंदेहःपार्वतीवचनंयथा ॥ इतिहरीतकीपाकः ॥ अथज्वरे ॥ प्र
स्थंतुपिप्पलीचूर्णंक्षीरेपलशतद्वये ॥ पचेन्मंदाग्निनाधीमान्घृतप्रस्थेनसंयुतं ॥ घनीभूतेसुगंधीनिविनिक्षिपेत्खंडप्रस्थत्रयंत
सिंम्नप्रस्थार्द्धमधुमेवच ॥ सुनिष्पन्नेवलेहेतुद्रव्याणीमानिदापयेत् ॥ चातुर्जातंपंचकोलंमरिचंनागरंतथा ॥ जातीफलंजातिपत्रीदे
वपुष्पंकुबेरकं ॥ अकल्लकाथिशोषंचगरुडजीरकद्वयं ॥ शतपुष्पाशटीधान्यंविडंगंताम्रमेवच ॥ सुवर्णमाक्षिकंलोहंतुप्रत्येकंपलार्द्ध
कं ॥ तुगाकर्पूरयोः शुक्तिश्चूर्णमेषांविनिक्षिपेत् ॥ सुनिष्पन्नोवलेहस्तुस्थाप्योवैसुभभाजने ॥ पिप्पलीचूर्णपल १९ गोदुग्धपल
२०० गोघृतपल १९ मधुपल ८ सितापल ४८ ॥ अथचूर्णानि ॥ चातुर्जातंपिप्पली· पिप्पलीमूलंचव्य· चित्रक· नागर· मरिच· तग
रं· जातीफलजातीपत्रीलवंग· ग्रंथिपर्णं· अकल्लकं· समुद्रशोष· कृष्णागरु जीरक· कृष्णजीरकंशतपुष्पाशठीधान्य· विडंग· ता
म्र· सुवर्ण· माक्षिक लोहंप्रत्येकं· पलप्रमाणं· तुगाकर्पूरवर्ष २ क्षिप्त्वापचेत् ॥ मात्राकर्ष २५ यथाग्निसदासेव्योनरैः स्त्रिषआयु

॥ सा·ले·उ ॥
॥ २३ ॥

र्मेधामिकांक्षिभिः शुक्रवृद्धिकरोत्याशु वाजीकरणमुत्तमं ॥ वलिपलितनिर्मुक्तः पूर्णधातुः प्रजायते ॥ अनेनसेव्यमानेन स्त्रीशतं रमते न
रः ॥ सर्वरोगविनिर्मुक्तो हृष्टकायो महाबलिः ॥ तेजोवृद्धिकरोआशु कंदर्पस्यं निरूपकः ॥ यथावलं नरैः सेव्यः स्त्रीपुंसिर्वालवृद्ध
कैः ॥ असीतिश्लेष्मजान्रोगान्नाशयेहं तिवेगतः ॥ तथाष्टादशकुष्ठानि विंशमेहमरोचकं ॥ गुल्मप्लीहं तथा श्वासं कासं च तमकादिकं
॥ जीर्णज्वरं मूत्रकृच्छ्रं वृद्धिप्रदरपांडुतां ॥ वातपित्तं रक्तपित्तं तथा कुष्ठान्तदशानि च ॥ मदव्याधिमपस्मारमुन्मादं नाशयत्यसौ ॥ गु
णाननन्तावअक्तव्यड्रोगानीकं विनाशयेत् ॥ नराणाममृतं ह्येषो देवानां च यथा सुधा ॥ इति वृहत्पिप्पलीपाकः ॥ इति ज्वराधिकारः ॥
विजयां वारिसंशुद्धां तुलामात्रं प्रदापयेत् ॥ क्षीरं गव्यं तुलाद्वे तु शनैर्मृद्वग्निना पचेत् ॥ धनीभूतं तु उत्तार्य खंडायाः पलविंशतिः ॥ चातु
र्जातलवंगं च व्योषमाकल्कं तथा ॥ जातीफलं जातिपत्री ह्यश्वगंधा पुनर्नवा ॥ शतावरी श्वगन्धानां सबलानां पलार्द्धके ॥ सर्वचूर्णं सं
मिश्रपलार्द्धं तु गुटिका भवेत् ॥ विजयाशुद्धस्तु लाजलेन तुलार्द्धं गोदुग्धं तुलार्द्धं पक्वाद्यनिमूतं दृष्ट्वा अवतार्य वस्त्रनिष्पीडाः ॥ खंडस्य
चत्वारिंसपलं दत्वा पुनः पक्वा · चूर्णानि दत्वा चातुर्जातं · लवंग · त्रिकटुआकर्कलारव्यं जातीफलं · जातीकोशं · अश्वगंधा · पुनर्नवा · शताव
री · कपिकच्छुवलावीज · द्विकर्षं पृथक्तावेसं चूर्णक्षिपे · मात्रा पलार्द्धं तदर्द्धं वः प्रातः सामप्रभुक्ता हि धातुः पुष्टिवलप्रदा ॥ प्रमेहव्या
धिशमनी सर्वातीसारनाशिनी ॥ विजयापाकः ॥ इत्यर्शोधिकारः ॥ अहिफेनपलं कुर्यात् दुग्धं त्वाढकं — यं ॥ मृद्वग्निना पचेत्सर्व

सं
॥ रामः ॥
॥ २३ ॥

ग्राह्यं खंडं च तत्समं ॥ चातुर्जातं त्रिकटुकं लवंगं जातिपत्रिका ॥ जातीफलं च कंकोलं माकल्लमुशलीद्वयं ॥ कोकिलाक्ष्यस्य वीजानि के
शरं चव्यचित्रकं ॥ कर्षार्द्धं च पृथक्कुर्याच्छीतिमूलेन तु क्षिपेत् ॥ वल्लद्वयं ततः खादेद्बलकालाद्यवेक्षया ॥ अहिफेनपलं १ गोदुग्धप
ल १२८ सिता १२० पक्वान्नत्र चूर्णानि चातुर्जातं ॥ त्रिकटुकं लवंगं जातीपत्री जातीफलमुशलीकंद· श्वेतं कृष्णं च· कोकिलाक्ष्यः
केशरं· चव्य· चित्रकं· कर्षार्द्ध· पृथक् चूर्णयित्वा क्षिप्य· मात्रापलेन तदर्द्ध तदर्द्धार्द्धं च· प्रमेहं मधुमेहं च पांडुरोगं हलीमकं· कास
श्वासक्षयं पुंसां बलवर्णाभिवर्द्धनं ॥ अर्शांसि ग्रहणीं हंति वाजीकरणमुत्तमं इत्याहिफेनपाकः ॥ द्राक्षाप्रस्थं क्षालयित्वा जले
न छायाशुष्कां प्रक्षिपेद्भांडमध्ये ॥ गोक्षीरेण त्वाचयेदष्टगुणेन दर्व्यालोड्यास्थापयेत्त्यादशेषं तस्मिन्पाके प्रक्षिपेदौषधानि चू
र्णीकृत्वा वस्त्रपूतानि त्रिजातानि पथ्यातिविषापूर्वीपटोलं घनवालुकं ॥ हरीतक्यास्तथा चूर्णं समशार्करया घृतं ॥ तेन क्षीरेण
मयोज्य विदार्याकंदमेव च ॥ घृतेन नवनीतेन पिंडीकृत्वा तु भक्षयेत् गोस्तनी· द्राक्षाप्रस्थं क्षालयित्वा छायाशुष्कां कृत्वा अष्टगु
णक्षीरेणात्वाचयेत् दर्व्या आलोड्य· पादशेषं कृत्वा· वस्त्रपूतानि चूर्णानि दद्यात् ॥ पर्पट· अतिविषा· मूर्वा· पटोलं मुस्ता वालकं·
हरीतकी· कर्षप्रमाणं पृथक् विदारिकंदपलं· घृतपलं· नवनीतपलं च सर्वं क्षिपेत् ॥ मात्रापलेन तदर्द्धं भक्षयेत् ॥ पित्तमग्रहणी पां
डुकामलानि हलीमकं ॥ भ्रमो मूर्च्छा तृषा हिक्का तमको न्माद चाश्मरी ॥ मेहपित्तास्रकृच्छ्रं च नाशयत्याशु निश्चितं ॥ इति द्राक्षापाकः

॥सा·ले·उ॥
॥२८॥

॥ इतिग्रहण्यधिकारः ॥ कदलीनांफलेपक्वंसंख्यायापंचविंशतिः ॥ क्षीरस्यतुतुलार्द्धंचघृतमर्द्धाढिप्रस्थयोः ॥ चातुर्जातंलवंगंच
जीरकंकृष्णजीरकं ॥ शुंठीमरिचपिप्पल्यस्तथैववंशलोचनं ॥ अगरुंतगरंचैवतीषूरंजातिपत्रिकं ॥ सिद्धपाकेविनिक्षिप्यऔषधंभि
षगुत्तमं ॥ पक्वकदलीफले २५ गोदुग्धतुलार्द्धपल ५० घृतप्रस्थपल १६ शर्करापल ३२ पत्रका चातुर्जात· लवंग· जीरकं· कृष्णा
जीरकंत्रिकटुवासिं·तगरंकृष्णागरुतीषुराभेषंजातीपत्रीकंचूर्णयित्वाक्षिपेत् ॥ पत्रका· मात्रापलेतदर्द्धंच·रक्तपित्तप्रमेहांश्च
कामलांपांडुरोगकं ॥ सर्वांश्चनेत्ररोगांश्चवाजीकरणमुत्तमं ॥ इतिकदलीपाकः ॥ इतिरक्तपित्ताधिकारः ॥ पिप्पलीप्रस्थमा
दायपचे।त्क्षीरेचतुर्गुणे ॥ अर्द्धाढकंघृतंगव्यंशुभ्रंखंडाढकंतथा ॥ लेहंपचेछनैतावद्यावत्कंसुपाचितं ॥ ततोऽव्यानिचै
तानिसूक्ष्मक्षराणिनिप्रयोजयेत् ॥ नागरंपिप्पलीमुस्ताश्रीखंडमरिचंनतं ॥ कटुत्रिकंजातिपत्रीकुंकुमंमधुकंतिला ॥ एला
त्वक्नागपुष्पंचलवंगंनलदंतथा ॥ प्रत्येकंचाक्षमात्राणिरसभस्मयुतानिच ॥ सर्वैसमांसंतच्चूर्णंलेहवत्साधुमाधयेत् ॥ मधु
नः कुडवंदत्वाखादेदग्निबलंयथा ॥ पिप्पलीचूर्णप्रस्थ १ गव्यघृतपल ३२ सितापल ६८ गोक्षीरपल ८० ॥ अथचूर्णानि ॥
शुंठीपिप्पली· मुस्ता· श्रीखंड· मरिच· तगरं· पुनत· त्रिकटु· जातीपत्री· केशरं· यष्टिमधु· कृष्ण· तिला· शुक्ष्मेला· त्वचा· नाग
केशरं· लवंगजटामासी· रसभस्मं· प्रत्येकंकर्षमात्रंसंचूर्ण्यसंमिश्र्य· मात्राद्विकर्षअथावाग्निबलंदृष्ट्वाखादेत् ॥ वृष्यंपुष्टिं

॥रामः॥
॥२४॥

करं हृद्यं चक्षुस्यमग्निवर्द्धनं ॥ बोधने चेन्द्रियाणां वै प्रमेहान्हन्ति विंशतिः ॥ दोषत्रयप्रशमनं क्षयरोगविनाशनं ॥ वीर्यस्तंभ
करं चैव तथा वाजीकरं परं ॥ वातांतकरं हृद्यं पिप्पलीपाकसंज्ञितं ॥ इति पिप्पलीपाकः ॥ पिप्पली नीरजः प्रस्थं क्षीरं दद्याच्चतु
र्गुणं ॥ खंडं चतुर्गुणं दद्याद्दारुके गोघृतेन पचेत् ॥ चातुर्जातं लवंगं च केशरं वंशरोचनं ॥ एतानि सम भागानि पलार्द्धानि प्रयोज
येत् ॥ पिप्पली रज प्रस्थ· गोदुग्धपल ६४ शर्करापल १६ गोघृतपल ८ चातुर्जात· लवंग· केशरं· वंशरोचन· प्रत्येकं द्विक
र्ष चूर्णयित्वा क्षिपेत् ॥ तस्य मात्रा कर्ष २ क्षीरानुपानं ॥ लोहिभृते पचेत्पात्रे यावद्दर्वालुका भवेत् ॥ अवतार्य्य ततः शीघ्रं स्निग्धे
भांडे निधापयेत् ॥ सेवयेत्सततं यावत्प्रातः प्रातर्यथावलं ॥ नष्टशुक्रक्षतक्षीणाः निर्वलाः वातव्याधिको ॥ स्त्रीप्रसक्ताः सदा
वृद्धाः स्वरहीना भजंति च ॥ इति लघुपिप्पलीपाकः ॥ वनेवरीबीजक्षिपेद्धि प्रस्थमुष्णोदके यामचतुष्टयं च ॥ विघर्षयेद्धस्तं
दृढं च गाढं यावद्भवेन्निस्तुषनिर्मलं च ॥ छायाविशुष्कं च तदेव चूर्णं क्षीरे पचेद्द्रोणमशेषपादं ॥ दद्यात्घृतं प्रस्थयुगं च तस्मि
न्विपाचयेन्मंदहुताशनेन ॥ चूर्णं क्षिपेच्चागरुजातिपत्रीजातीफलं नागरदेवपुष्पं ॥ आकल्लकं जीरकपिप्पली च त्रिजातकं
केशरहस्तिसंज्ञो कर्पूरकंकोलसमुद्रशोषं ॥ मत्स्याननकेशरकं समाकं ॥ विषं कुवेरं छुरशानिजातं चवीनीकवाचेक्षुरकं च वी
जं ॥ सर्वां क्षिपेच्चैष पलार्द्धमानं पलार्द्धमानेन च नागवंगौ ॥ दद्यात्तथा मोशलकं च कंदं ज्ञेयं कुवेरं च तथाहिफेनं ॥ पलप्रमा

॥ सा · ले · ३ ॥
॥ २५ ॥

राणि विनिक्षिप्येञ्चप्रस्थद्वयंतत्रसितांवदयात् ॥ शीतेचतत्रामधुनोप्रयोज्यंयद्वार्द्रपाकेकुडवंद्वयंच ॥ स्थितंशुभेभांडेचसुधूपिते
चखादेत्ततोवह्निबलानुसारं ॥ वनेचरीवीजपल ३२ उष्णोदकेनिक्षिप्य यामचतुष्टयंवस्त्रेगाढंनिवद्ध्य · गाढंविमर्द्दयन्निस्तु
षंनिर्मलंकृत्वा ॥ अथवा ॥ खरघर्मेसंशोष्यतुतानिस्तुषीकृत्यश्लक्ष्णचूर्णंवस्त्रपूतं ॥ कृत्वा · गोघृतप्रस्थयुगेविपाच्य ·
मंदकृशानेनतस्मिन्गोक्षीरपल २५६ दत्वापुनःशुष्कचूर्णानि ॥ केचित्तु · घर्मेसंशोषयंते · संपिष्यनिस्तुषंकृत्वाचूर्णी
कृत्यघृतेभर्जयंति ॥ कृष्णागुरु जातीपत्री · जातीफल · शुंठी · लवंग · आकल्लकं जीरकंपिप्पली · त्रिजातं · नागकेशर · क
र्पूर · कंकोल · समुद्रशोषभल्लातक · अपक्वत्वेनचंदनकेशरःपद्मकेडुकवेराक्षंपारशीकयवानीरेणुका · नीलमखाराग
रवंगोक्षुरंचसर्वंप्रत्येकंकर्षद्वयमितं · नाग · वंगौचकर्ष २ मूशरीकंद · लोहं · विजया · अहिफेनंच · प · थक्पलमानं १ सिता
पल ६४ मधुपल ८ पक्वागुटिकांकृत्वामात्राकर्ष १।१ वह्निवलोद्यपेक्षया ॥ द्राक्षाफलंवाकदलीफलंवाप्रियालमज्जाप्यथश
र्करावा ॥ घृतेनतक्रंचतिलाश्चभक्ष्याविवर्जयेदम्लरसांसदैव ॥ वश्यंचरामांकुरुतेसकामामेध्यकरंपुष्टिकरंनितांतं ॥ अने
नसाम्यंतिचसर्वरोगाश्वासश्चयोद्ग्रामयराजयक्ष्मा · कासश्चहिक्काश्वयथुश्चमेदःसर्वेप्रशाम्यंतिचवायुरोगाः ॥ दिनेदि
नेकामसमानरूपोजयेन्नरःकामिनिकामयूथं ॥ याक्षीणवीर्याअपिनष्टशुक्रायेवापिखंजावद्धवायुयुक्ता ॥ तेषांवि

॥ रामः ॥
॥ २५ ॥

कारः प्रसमं प्रयाति नरो भवेद्भीमपराक्रमश्च ॥ इति बृहत्कायिकटुपाकः ॥ तुलामादाय वासाया पचेदष्टगुणे जले ॥ तेन पा
दावशेषेण विपचेदाढकं भिषक् ॥ हरीतकीनां चूर्णस्य खडाभ्रस्यत्तथाशतं ॥ शीतिभूते क्षिपेत्तत्र क्षौद्रस्याष्टपलानि च ॥
वंशोद्भवायाश्चत्वारि पिप्पल्याष्टपलं तथा ॥ चातुर्जातं पलं चैकं लेहोयं सप्रणाशयेत् ॥ वासकपल १०० जलपल ८०० शे
षपल २०० हरीतक्याचूर्णपल ८ सितापल १०० मधुपल ८ वंशरोचना ४ पिप्पली ८ चातुर्जात १ मात्रा कर्ष १ ॥ रक्तपित्त
क्षयकासं श्वासमग्नेश्च मंदतां ॥ इति वासापाकः ॥ प्रस्थार्द्धं देवकुसुमं गव्यदुग्धं तथाढकं ॥ घृतप्रस्थार्द्धसंयुक्तं शर्करा
प्रस्थमेव च ॥ शनैर्मृदाग्निना पाच्यं चूर्णानिमानि दापयेत् ॥ नीलोत्पलं त्वगेला च चंदनं च पलार्द्धकं ॥ कर्षार्द्धं रसकर्पूरं म
रुत्तगरु समं ॥ एतैश्चूर्णैः प्रदातव्यं पंचामृतसमायुतं ॥ लवंगपल ८ गव्यदुग्धपल ६४ गोघृतपल ८ शर्करापल ३२ पक्व
त्वा नीलोत्पल· पत्रका· नीलोत्पल· त्वक्सूक्ष्मैला चंदनं· पृथक्· कर्ष २ रसकर्पूर· कृष्णागरु तगर· पृथक् कर्ष २ रसकर्पूर
कृष्णागरु· चूर्णं क्षिपेत् ॥ मात्रा कर्षमात्रं अथवाग्निवलं· रोगानां समनं त्वेतज्जर्जरीकृतवर्म्मना ॥ राजयक्ष्मा महाश्वासं का
सं पंचविधं तथा ॥ वलिपलितमन्यच्च रोगजालं व्यपाहति ॥ इति लवंगपाकः ॥ इति कासाधिकारः ॥ जातीफलानां शतमे
कं पंचद्रोणेन दुग्धेन विपाच्य सम्यक् ॥ सितातुला चाज्यघृतं तुलांशं शुद्धातुगायाः कुडवैकमेव ॥ कर्पूरकं कोललवंगत्व

र्ंत्रिजातकंमोचरसेपृथकपृथक्जातीफल१००गोदुग्धः द्रोणांपंचनस्यपल१०६०सिताचपल१००घृतपल२५तुगापल४कर्पूर·कंकोलल
वंगत्रिजातकंमोचरस·पृथक्पलेचूर्णंदत्वा·विपाच्यमात्राकर्ष१अथवास्तिवलंदृष्ट्वाभक्षेककर्षंशकलाममघ्रेसश्वासकासंग्रहणीप्रमेहं॥
दुर्नामकंक्षौरापमतिक्षयंचविनिहत्यकुर्याद्वलवीर्यपुष्टिं॥ इतिजातीफलपाकः॥ अथयमपिकासाधिकारः॥ क्षीरद्रोणाघृतेत्वसालकुडवंमंदाः
ग्निनापाचितंयावद्धाकामृयागतेपरिसहितंप्रस्थंगुडेनिक्षिपेत्॥ चातुर्जातलवंगजातिफलयोर्मुस्तातुगाधान्यकंशुंठीमागधिकोषराश्चम
भयालोहेश्चमिश्रीकृतं॥ अशालीचंद्रमुरकुडव१गोक्षीरपल२५६गुडप्रस्थ२ चातुर्जातलवंगजातीफल·मुस्ता·तुगा·धान्यकं·शुंठी
पिप्पली·मरिच हरीतकी· कृष्णागरु·पृथक्पलंचूर्णंक्षिपेत्· मात्राकर्ष२।१अत्रपाठांतरे· शालिमतिश्चेतिप्रख्यातायापल४गोक्षी
रपल२५६ शर्करापल३२चूर्णंतुपूर्ववज्ज्ञेयंसर्वहृद्रोगक्षयकाशमारुतगदाहिक्कामसृक्शोषकाविंशत्प्रमेहशिरोविकारसमनोरोगान्
शेषांजयेत्॥ इतिशालीपाकः॥ इतिहिक्काधिकारः॥ निस्तुषवीजमेरंडपयस्युद्धृत्यापचेत्॥ तस्मिन्पयसिशोषेवतद्वीजंपरिशोषयेत्
॥ पश्चाद्घृतेसमपुक्तंसपचेत्मृदुवह्निना॥ कटुत्रिकंलवंगंत्वएलात्वक्पत्रकेशरं॥ अश्वगंधाशिफारास्नाषडंथारेणुकावरी॥ लोहं
पुनर्नवाहपामाढुशीरंजातिपत्रकं॥ जातीफलंमतांत्रंचश्लक्ष्णचूर्णंचकारयेत्॥ यदाघनतामुपेति· तदातद्वीजमुद्धृत्य·घर्मेशोषयि
त्वापुनःपिष्ट्वापुनःपचेत्·सितात्रपल४० तत्रकटुकंत्रिकलवंगंश्लक्ष्णेला·त्वक्पत्रकेशर·अश्वगंधामूलं·रास्ना·वचारेणुका·शता

वरीलोहं पुनर्नवा · त्रिवृत · उशीरं · जातीपत्री · जातिफलं · अभ्रभस्म · पृथक्कर्ष २ सर्वं श्लक्ष्णचूर्णं कृत्वा मिश्रयेत् ॥ मात्रा कर्ष २ ॥ मा
त्रापलार्द्धकं तस्य प्रातरुत्थाय भक्षयेत् ॥ अशीतिं वातजान्रोगांश्चत्वारिंशच्च पैत्तिकान् ॥ उदराणि तथा चाष्टौ ह्यन्त्रवृद्धिं निहन्ति च
॥ विंशतिं मेहजान्रोगान्नामवातं सुदारुणं ॥ हृत्पृष्ठदशाङ्क क्षतिक्षयरोगांश्च श्वासं च ॥ पंचैव पांडुरोगांश्च पंच कासान्प्रणाशयेत् ॥
चत्वारो ग्रहणीरोगान्हृद्रोगं गलग्रहं ॥ इत्यैरंडपाकः ॥ इति कासाधिकारः ॥ खर्जूरप्रस्थैकं हृत्वा सघनं स्विन्नो कटूस्नेहोदके ॥ प
श्चान्निर्नुकवारिणा सलवणोर्द्धकं तु घृतोवधी ॥ एलाभृंगसपत्रकेशरयुतं मांसीविडंगं त्वचा कृष्णाग्रंथिमिरन्वपूरकघनाजाती
पटुनासमं ॥ चूर्णं श्लक्ष्णमिदं विधाय सुधिया संयोजयेत्त्रिगुणं पक्वं खर्जूरिकासमं विधिरयं पाकस्य संसेवनात् ॥ खर्जूर १०० उष्णो
दके स्वेदयित्वा पुनर्निंबूकं वारिणा · लवण · सहितेन · स्थापयेत् · घर्मे अतिशोष्य ॥ तच्चूर्णानि ॥ सूक्ष्मेला · त्वक् · पत्रक · केशर · जटा
मासि · विडंग · वालक · पिप्पली · तन्मूल बीजपूरकं · पंचलवण · प्रत्येकं द्विकर्ष श्लक्ष्णचूर्णं कृत्वा मेलयित्वा निम्बूकचक्रेण मेलयित्वा
तद्बीजगर्भे पूरयित्वा · मात्रा १ पित्तस्याश्रुविनाशनं कफहरं दृष्टिप्रदं पुष्टिदं वातक्षयहरं रसायनकरं कान्तिप्रदं वाग्निदं ॥ गुल्मारोच
कनाशनं कृमिहरं तृष्णापहं बृंहणं पाकं मौलकिना विनिर्मितवरं वैद्यायसञ्जूषणं ॥ इति खर्जूरपाकः ॥ इत्यरोचकाधिकारः ॥ अश्वगंधा
प्रस्थमेकं क्षीरद्रोणद्वयेन पचेत् ॥ घृतप्रस्थमिदं चैव खंडस्य प्रस्थत्रयं तथा ॥ प्रस्थार्द्धं च तिलामाषा विपचेन्मृदुवह्निना ॥ व्योषत्रिजा

तहपुषाशताह्वाचशतावरी॥ दीप्यकोपौष्करंजाजिशटीगोक्षुरकंबला॥ यवानीगोक्षुरंलोहंनागंशुल्वपलंपलं॥ प्रक्षिपेदत्तार्योथखादेद
ग्निबलंयथा॥ अश्वगंधापल १६ गोक्षीर ५०१२ पल घृतप्रस्थ १ सितापल ८६ तिलपल ८ माषचूर्णपल ८ तत्रचूर्णं· त्रिकटु जातं· हपुषा
शतपुष्पा· शतावरी· यवानी· पौष्करं· जीरकं· शटि· गोक्षुर २ बलाबीजं अजमोदा लोहं· नागं शुल्वं· ए थकालं· संचूर्णानि निक्षिपेत्॥ मा
त्रातु कर्ष २।१ बलाग्निदृष्ट्वा· सर्वान्वातामयान्हंति कटिपृष्टिगउस्थितान्॥ अस्थिभंगं तथाशोफं सधिवातं सुदारुणं॥ वध्महृद्रोगप्ली
हानं श्वासकासंप्रमेहकं॥ अश्वभानोहितंयेन कांतिदं पुष्टिदं वरं॥ इत्यश्वगंधापाकः॥ इति वातरोगाधिकारः॥ अपक्कभल्लातफ
लानि ग्राह्य द्विधा विदार्य गुरुकसंमितानि विपाच्य तोयेन चतुर्गुणेन घृतं तोशपुक्केन यथा घनं स्यात्॥ शितोपला षोडशभिः पलैश्च
विमर्द्य संस्थाप्य दिनानि सप्त अपक्कभल्लातकफलद्विधा खंडं कृत्वा पल १६ चतुर्गुणतोये विपाच्य वस्त्रपूतं कृत्वा चतुर्थांश घृतं दत्वा
घनं पक्का॥ द्वात्रिंशत्पलैः सितोपला विमिश्र· संसाध्य· स्निग्धभांडे स्थापयित्वा मात्रा कर्ष २।१ यथाबल· ततः प्रयुज्याग्निबलेन
मात्रां जीर्णान्विकारानखिलान्गदघ्नान् कवान्तुनीलानघकांचिताभान् सुवर्णहृष्टिं वशतां क कांतिः॥ जवं हयानां बलमुत्तमं च
स्वरं मयूरस्य जनाशदीप्तिं॥ स्त्रीवल्लभत्वं विविधांप्रभांचनिरोगिताद्वित्रिशतायुषं च॥ न चान्नपाने परिहार्यमस्ति न वातपे नाध्वनि
मैथुने न च॥ प्रयोगकाले सकलामयानां राजायं सर्वरसायनानां॥ इति भल्लातकपाकः॥ भल्लातकानोपरिपक्कजातानारुष्कुतानाचत

थारुकं स्यात् ॥ घृष्टेष्टिकाचूर्णकरोर्जलेन प्रक्षाल्य संशोष्य च मारुतेन ॥ शुष्काणि तानि विफलीकृतानी विपाचयेद्दुग्धचतुर्गुणेषु ॥ या
दावशेषं पुनरेव शीते क्षीरे रागान्तुल्येन विपाचयेत्तत् ॥ तदर्धया शर्करया विमिश्रं साज्येन वा स्थापमथितं विधाय ॥ सत्रैफलं त्र्यूषणं चंद्र
मांसी त्रिजात वांसीरखदिरामृतानां ॥ सचंदनाकत्वकचीरजीवीसदेवपुष्पं प्रशलीद्वयं च ॥ कंकोलमेवाद्वयदीप्यमनंतं समानं गण
नाविदारी ॥ जातीफलं मुस्तकं जातीपत्री · कुबेरजीरागरुशाल्मीशोषं ॥ मेदाद्वयं लोहरसेन्द्रवंगं तथार्द्रकं क्रमकं च कर्कतस्स
प्रराज्ञादधिजातवीर्यं सुधारसादप्यधिकं वदंति भल्लातकशुद्धपक्वफलपल ६८ चतुर्गुणोजले विपचेत्पादशेषं वस्त्रपूतं · पुनरेव क्षीरे
रागतुल्येन संमिश्र्य विपाचयेत्तुनगोघृतपल १६ संमिश्र्य सितायल ६८ दत्वा साध्य ॥ तत्र चूर्णं · त्रिफला त्रिकटु कर्पूर · जटामांसी · त्रिजा
तवंशलोचनखदिर · गुडूची चंदन आकत्वक जीवक लवंग · प्रशलीद्वयं · कंकोल · शाल्मलीद्वयं · यवानी अजमोदा च · गजपिप्पली
विदारीकंद · जातीफलं · मुस्त · जातीपत्री · कुबेर · जीरक · कृष्णागरु · सप्तक्षशोष · मेदा · महामेदा · लोह · रसेन्द्र · वंगकेशर ॥ पृथक्क
र्षं संचूर्ण्य क्षिपेत् ॥ सप्तरात्रस्थित्वा · मात्रा कर्षद्वयेन दद्याच्च ॥ प्रातः प्रबोधे कृतदेवकार्यमात्रां भजेत्सा न तस्य शारीरयोग्यं · न चान्नपानेन
परिहार्यमस्ति न चातपेनाध्वनि मैथुनेन च ॥ यथेष्टचेष्टाविचरत्प्रयोगान्नरो भवेत्कांचनगात्रगोरः ॥ अनल्पमेधा नरसिंहवीर्यो रुजा
विहीनः सबलः सुरूपः ॥ दंतान्विसीर्णान्दृढतां प्रयाती विशीर्णकर्णान्गलितान्नासिकोपि ॥ कृमार्दितोमिंनगलोपितुष्टिगलहस्तानि सयो

नवषिश्मयं च॥ अर्द्धं दुमाद्रुहरतांग्निशाखा सर्षपप्रमं संकुरुते तिमक्त्या॥ प्रहृष्टनारीं जयति स्मरे रसायनस्यास्य नरः प्रभावात्॥ बृहस्पतेर
प्यधिकं च बुध्या ग्रंथं विशालं विपुलं करोति॥ यावंतनगे वर्षशतं सुरवीचरणज्ञाहृये सर्वरसायनानां॥ इति अमृतनामरसोनकपाकः॥ इति वा
तरक्ताधिकारः॥ निस्तुषं लशुनं प्रस्थं क्षीरं कुंभे पचेत्सुधीः॥ घनमात्यासमे तं च पचेत्तम्मृदुवह्निना॥ सुनिष्पन्ने मधुनि मेखंडं प्रस्थाद्वयं
क्षिपेत्॥ अषणं सचव्यजीतं ग्रंथिकं वह्निचित्रकं॥ विडंगं रजनीयुग्मं हपुषा हृद्ददारुकं॥ पौष्करं दिप्यकं कुष्ठं सुरसा स्तपुनर्नवा॥ श्व
दंष्ट्रातिवलारास्नाशतपुष्पासटीवटी॥ अश्वगंधात्मगुप्तावड्यानि पितुमात्रपा॥ लसुननिस्तुषः प्रस्थ १ घृतपल ८ शार्करापल
६४ त्र्यूषणं· चव्यजीतग्रथिकंचित्रकं· विडंगहरिद्रायुगंवृक्षि हृद्ददारुकं पुष्करं यवानी· अजमोदं च· देवदारु कुष्ठं पुनर्नवा· गोक्षुर
अतिवला· रास्ना· शतपुष्पा· शटी· वरी· अश्वगंधा· कपिकच्छु· प्रत्येकं पितुमात्रकं चूर्णं कृत्वा संमिश्र्य: मात्राकर्ष १॥ भक्षयथाबलसे
वं रसोनाख्यरसायनं॥ सर्वान्वातामयान् शूलान् अपस्मारज्वरक्षतं॥ गुल्मोदरं वमि प्लीहं तु धमनहृद्रिवमीन् जयत्॥ विबंधानाहशो
फांश्च वह्निमांद्य बलक्षयं॥ हिध्माश्वासांश्च कासांश्च अपतंत्रकमेव च॥ धनुर्वातं तथामं च पक्षाघातापतानकं॥ अर्दितांक्षेपकक
ज्जं हनुग्रहशिरोग्रहं॥ विश्वाचीगृध्रसीखंजीपंगुत्वंवेसंधिकं॥ बाधिर्यसंधिशूलं च नाशयेदतिवेगतः॥ वातव्याधिगजश्चैव केश
रीकल्पितः शुभे:॥ कफजव्याधिशमनो बलपुष्टिकरं परं॥ इति लशुनपाकः॥ शतावरीमूलकल्कं कल्का क्षीरं चतुर्गुणं॥ क्षीरतुल्यं

घृतं गव्यं सितं तया कल्कतुल्यया ॥ घृतशेषं पचेत्तत्तु पलार्द्धं लेहयेत्सदा शतावरीकल्कपल ८ गोक्षीरपल ३२ गोघृतपल ३२ सितापल १६ पक्त्वा मात्रा कर्ष २ रक्तपित्तं ह्यम्लपित्तं क्षयश्वासं च नाशयेत् ॥ इति शतावरीपाकः ॥ मेथिकाया पलान्यष्टौ शुंठी चाष्टपलानि च ॥ तयोश्चूर्णं पटे पूतं दुग्धे मृद्वग्निना पचेत् ॥ दुग्धाढकं पुंगं गव्यं घृतप्रस्थमितं क्षिपेत् ॥ तत्तावत्तु पचेद्यावद्भवेदति घनं पयः ॥ पुनः पचेद्घृतैस्तत्र दत्वाढकमितां सितां ॥ ततः पाके सुविज्ञाते ज्वलनादवतारयेत् ॥ मरिचं पिप्पली शुंठी कणामूलं सचित्रकं ॥ यवानी जीरकौ धान्यं कारवी शतपुष्पिका ॥ जातीफलं शठी त्वक्पत्रकं भद्रमुस्तकं ॥ गृह्णीयात्पलमेतेषां सर्वेषां च पृथक्पृथक् ॥ षडक्षं नागरं तत्र मरिचं च षडक्षकं ॥ एषां चूर्णं परिक्षिप्य सम्यक् विमिश्र्य रक्षयेत् ॥ मेथिकापल ८ नागरपल ८ गोदुग्धपल १२८ गोघृत १६ सितापल १२८ तत्र चूर्णानि मरिच पिप्पली शुंठी· ग्रंथिकं· चित्रक· यवानी· धान्यं जीरक· कारवी· शतपुष्पा· जातीफलं शटी त्वक्पत्रक· नागर· मुस्ता· सर्वेषां पृथक् पल १ पुनः नागर· कर्ष ६ मरिच ६ चूर्णीकृत्य क्षिपेत् ॥ मात्रापल १ एतद्भेषजं प्रोक्तं मेथिकापाकसंज्ञितं ॥ भक्षयेत्पलमात्रेण यथा चाग्निबलं यथा ॥ आमवातं निहंत्येतत् सर्वांश्च पवनामयान् ॥ ज्वरांश्च विषमां हंति पांडुरोगं सकामलं ॥ हंत्युन्मादमयस्मारप्रमेहांश्चार्शशोणितं ॥ अम्लपित्तं सितपित्तं शिरपीडां दृगामयान् ॥ प्रदरं सूतिकारोगं हन्यादेतन्न संशयः ॥ वपुषः पुष्टिकृद्बल्यं वीर्यवृद्धिकरं परं ॥ इति मेथिपाकः ॥ निस्तुषं लशुनं कृत्वा रात्रौ तक्रे विनिक्षिपेत् ॥

॥सा·द·ले·ऊ॥
॥२९॥

नडुयांगंधनाशायपानतोर्ह्यंजलप्लुतः॥ प्रस्थमात्रंतुतत्पिष्टाक्षीरप्रस्थचतुष्टये॥ विपाच्यंसाडीभूतेस्मिंसर्पिषःकुडवंक्षिपेत्॥ रास्ना
शतावरीछिन्नाशटीविश्वामुरद्रुमः॥ वृद्धदारुकदीप्याग्निःशताह्वसपुनर्नवाः॥ फलत्रयंपिप्पलीचक्रमिघ्नकर्षसंमितं॥ विद्र
र्पंशीतेकुडवंमधुस्तत्रप्रयोजयेत॥ सितायाभक्षयेन्मात्रंपिष्टास्तवगोक्षीर·आढकंदत्वाविपाच्य·सर्पिषकुडवंक्षिपेत॥ त
तश्चूर्णानिरास्ना·शतावरी·छिन्ना·शटीविश्वादेवदारु·वृद्धदारु·यवानिचित्रक·शतपुष्पा·पुनर्नवा·त्रिफला·पिप्पली·वि
डंगंपथक्कर्षसंमितचूर्णंक्षिपेत॥ तत्रमधुकुडवमितंक्षिपेत॥ मात्राकर्षमितं॥ आक्षेपकादिमंगेषुकघुहस्तभङ्गःसहे॥ सर्वा
गसधीभग्नेचप्रबलेमारुतेहितंलसुनस्योक्तपाकोयंवरायुःपुष्टिकारकः॥ इतिलसुनपाकः॥ विश्वौषधपलान्यष्टौसर्पिष
पलविंशतिः॥ प्रस्थद्वयंचगोक्षीरंशर्करार्द्धतुलांतथा॥ त्रिकटुत्रिसुगंधींचप्रत्येकंचपलंपलं॥ शुंठीपल ८ गोसर्पिपल ८ गोदु
ग्धपल ३२ सितापल॥ सूक्ष्मंचूर्णंकृत्वानिक्षिपेत॥ मात्राकर्ष २।१ साधयेद्वैहविधिनासम्यक्शुंठीरसायनं॥ नाम्नासौभाग्य
शुंठीयंचपुंसौभाग्यदानी॥ आमवातेहरेदाशुत्वचिकांतिंप्रयच्छति॥ धातुवृद्धिंबलंपुष्टिमायुश्चकुरुतेचिरं॥ वलीपलितनाशंच
कुर्याद्वंध्यात्वनाशनं॥ इतिसौभाग्यशुंठी॥ वातारिवीजंप्रस्थंतुतुषपक्वनिस्तुषीकृतं॥ क्षीरद्रोणार्द्धसंयुक्तं। भिषगमंदाग्निना
पचेत॥ घनमस्यार्द्धपक्वपक्केखंडप्रस्थद्वयंक्षिपेत॥ त्र्यूषणंसचतुर्जातंग्रंथिकंवह्निचव्यको॥ छिन्नामिसीसटीविल्वदीप्य

॥रामः॥
॥२९॥

जीरेनिशायुतं॥अश्वगंधावलापाठाहपुषावेत्रपुष्करं॥श्वदंष्ट्रातालकंदाववृद्धदारुशतावरी॥एतानिपित्तुमात्राणिचूर्णिता
निविनिक्षिपेत्॥एरंडनिस्तूषवीजपल१६गोक्षीरपल२५६गोघृतपल८सितापल६४ततस्त्रिकटु·चातुर्जात·पिप्पलीमूल·चि
त्रकं·चव्य·छिन्नामिश्रेयाकश्चूरं·विल्वयवानी·अजमोदा·जीरक·कृष्णजीरक·हरिद्रा·दारुहरिद्रा·अश्वगंधावलावीज·पाठा
हपुषाविडंगपुष्करमूल·गोक्षुर·मुशली·वृद्धदारु·शतावरी·सर्वपृथक्कर्षमात्रंचूर्णीकृत्वानिक्षिपेत्॥मात्राकर्ष२।१भक्ष
येच्चयथासात्म्यंप्रभातेनित्यमादरात्॥वातव्याधिमवंशूलंशोफंवृद्धिंतथोदरं॥आनाहंचाश्मरीगुल्मंआमवातंकनिग्रहं॥शी
नहिध्माश्वासकासवातव्याधिगलामयान्॥अर्दितंछिपविश्वाचीगृध्रसीचापतंत्रकं॥पक्षाघातंपंगुवातंभगंदुंदापतानकं
॥कन्यास्तंभंहनुस्तंभंनाशयेदधिवेगतः॥आमवातगजेन्द्रेषुकेशरीकथितंशुभं॥वलकृत्बृंहणोवृष्यापुष्टिदोधातुसात्म्यकृ
॥~~इतिवृहदेरंडपाकः॥इत्यामवाताधिकारः~~॥शतंचनिम्बसरसंप्रयुक्तंक्षाराष्टकंषोडशविल्वकानि॥पलंचहिंगुद्विपलंचशुं
ठीमेकीकृतंतद्विधिवद्विपाच्यं॥फलत्रिकेमागधिकोषणानांमिशिजटाचव्यविडंगचित्रकं॥सग्रंथिकंपुष्करंकेलवंगंनिशाद्वयं
चाजमकंसमेतं॥कल्कीकृतंसाष्टपलंसमेतंप्रक्षिप्यचूर्णमवलेहमध्यं॥निंवशतं१००पंचलवणांत्रिक्षारंविल्व१६हिंगुपलं
१शुंठीपलं२त्रिफला·पिप्पली·मरिचमिशि·पिप्पलीमूलंचव्य·विडंगंजटामांसि·चित्रकं·पुष्करमूलं·लवंगं·हरिद्रा·दारु

॥ सा.द.ले.उ ॥
॥ ३० ॥

हरिद्रा अजमोदाय थक्कर्ष २ सर्वसंमिश्र्य · मात्राटंकं · सद्य · शूलं वगुल्मं च प्रतिहंति सुदारुणां · मंदानले दीप्तिकरं ग्रहणीमामजं जये
त ॥ इति निंवपाकः ॥ कुवेरप्रस्थमानीय क्षिप्त्वा राज्ञौ चतुर्गुणे ॥ क्षीरेणानतय चेत्सम्यक् घनार्थप्रस्थसंयुतं ॥ खंडवर्णीकृतं कृत्वा सुगं
धशुद्धपाविनम् ॥ शीतीकृत्वा सुनिष्पन्नं मधुप्रस्थं विनिक्षिपेत् ॥ कर्पूरवासिते पात्रे मृत्मयेऽगुरुधूपिते ॥ तस्मिन्संकुघचूर्णा
नि दापयेद्भिषगुत्तमः ॥ जातुर्जातं त्रिकटुकं जातीपत्रीफलं तथा ॥ देवपुष्पं विडंगं च मिशि जीरद्वयान्वितं ॥ निशाद्वयं तथ
लोहं शुल्वं वंगं पलार्द्धकं ॥ प्रत्येकं चूर्णितं क्षिप्त्वा भक्षयेच्च पलं बुधः ॥ निस्तुष · कुवेराक्षप्रस्थ · गोक्षीरपल ६४ गोघृतप
ल ८ मधुपल १६ सम्यक् पक्त्वा तत्र चूर्णानि ॥ चातुर्जातं जातीपत्री · जातीफलं · लवंग · विडंग मिशी जीरकं · कृष्णजीरकं नि
शाद्वयं लोहभस्म · ताम्रभस्म · वंग · प्रत्येकं पलार्द्ध सम्यक् चूर्णीकृत्य क्षिप्त्वा · पलं तदर्द्धं वा · सर्वान्गतान्मयान् शूलाग्नि
मंदं बलक्षयं ॥ प्रमेहं मूत्रकृच्छ्रं च अश्मरीगुल्मपांडुतां ॥ पीनसंग्रहणीदोषमतीसारं मरोचकं ॥ मधुपक्वं कुवेरं यो भक्षये
त्तितरां नरः ॥ कामवृद्धिं भवेत्तस्य धातुवृद्धिश्च जायते ॥ कांतिपुष्टिंकरो बल्यः कुवेराक्षीरसोत्तमः ॥ इति मधुपक्वकुवेरपाकः
॥ इति शूलाधिकारः ॥ प्रस्थं गोक्षुरचूर्णानां पमितं कुडवे पाचितं धेनुदुग्धेन ज्जातीनीक्षाधात्र्योनलद शशिकरागावह्निविश्वा
धिशोथं ॥ जातीपत्राहिफेनोत्सुरकुसुमवरक्षपाके सराशिस्वर्णवीजं रसेंद्रं मृतगगनमयो वंगमक्षप्रमाणां ॥ सम्यक्पक्वे सुखंडे

॥ रामः ॥
॥ ३० ॥

सकलपरिमितेचावयेशर्करार्धांभृंगीप्रस्थार्द्धमात्रासुरभिभवघृतं सिद्धववंसुपाकः॥ गोक्षुरचूर्णपल १६ गोक्षीरपल ६४ तत्र चूर्णा
नि· जातीफल·मरिच· आमलकी· जटामांसि· पिप्पली· आकल्लकं· शुंठी· अश्विशोषं जातीपत्री· अहिफेन लवंग· मुंडी· के
शर· हरिद्रा· कनकवीज· रसेंद्र· अभ्रकं लोहवंगं· सर्वसमपृथक् कर्षमितं चूर्णीकृतं संमिश्रभृंगापल ८ गोघृतप्रस्थं· सिता
त्रपल ६४ सम्यक्पक्वा· मात्रा· पलार्द्ध· बलाग्निदृष्ट्वा॥ धात्नो वृद्धिंवपुःपुष्टिं जनयतिसुतरांहंतिदर्पमृगाक्ष्याकामिः नावाजिरं
हो नयतिवसुरते संततेसेव्यमाना॥ इतिगोक्षुरपाकः॥ प्रस्थंगोक्षुरसूक्ष्मचूर्णमृदितं दुग्धाढके पाचितं॥ जातीपत्रीलवंगं
लोहमरिचं कर्पूरमाकल्लकं॥ अश्विशोषंसुवर्णावीजरजनीधात्रीकरणाकेशरं वातजीत्मथाहिफेनकशठीमुंडिकुवेराक्ष
कं॥ तुल्यं शर्करयातवर्धविजयाप्रस्थार्द्धकंगोघृतं तत्पक्वा वैद्यवरेणनिर्मितमिदं मन्दाग्निनापाचितं॥ गोक्षुरप्रस्थ १ गोदुग्ध
पल ६४ सिता ६४ विजयापल ८ तत्रचूर्णानि · जातीपत्री· लवंग · कृष्णागरु· मरिच· कर्पूर· आकल्लकं समुद्रशोष· कनकवी
ज· रजनी· धात्री· करणा· केशर· वातजीत· अहिफेन शठीमुराडी· कुवेराक्षक· सर्वसंचूर्णमिश्रयेत्॥ तत्रमात्राद्विकर्षमेक
र्षवा॥ प्रातः सेव्यमिदंमहोषधवरंरोगौघविध्वंसनं हर्षोघ्नं सकलप्रमेहशमनं प्रोक्तंमगनाडावरणं॥ वीर्यस्तंभनतुष्टिपुष्टि
करणंवाजीकरकामिनां॥ मुद्गर्गजतिकामिनिमृगरिपुर्वीतार्तिहृद्योषधं॥ इतिगोक्षुरपाकः॥ हेमाभोरुद्वंदनं त्रिकटुकधा

त्रिपियालाकुङ्कुमजातिस्त्रिसुगंधिजीरजलजंशृंगाटकंवंशजा ॥ जातीकोशलवंगधान्यकयुतंप्रत्येककर्षद्वयं ॥ एतस्याष्टपलंवि
चूर्णीपयसयःप्रस्थत्रयेसर्पिषि ॥ दद्याज्जोर्कङ्वंसितार्द्धकंतुलांधात्रीवराश्रंजलिंमंदाग्नौविपचेद्भिषग्शुभदिनेसुस्निग्धभांडेक्षि
पेत् ॥ एगपल ८ क्षीरपल १६ गोघृतपल ८ सिता १६ अथचूर्णानि ॥ नागकेशर·कमलंचंदनात्रिकटुकंधात्रीचिरोंजिरति
रव्यानंवदरिफलमज्जाशुक्ष्मैला· त्वक्·पत्रजीरकं· चारकं·शृंगाटकंवंशजाजातीकोशलवंगधान्यककेशरंचप्रत्येकमत्कर्षद्वय
रविचूर्णंक्षिप्त्वाचपुनःधात्रीफल ४ त्रिफलाप्रत्येकंकर्ष ५ मात्रात्रकर्षसमितंद्विकर्षोवा ॥ खादेदनिशंप्रभातसमयेमेहांश्चजी
र्णज्वरंपीनसाम्लमसृक्स्रुतिगदहृच्छोषंक्षयंनाशयेच्च ॥ मंदाग्निंचविजित्यपुष्टिमतुलांकुर्याच्चशुक्रप्रदंवंध्यागर्भकरंयदं
गदहरंस्त्रीणामसृग्दोषजित् ॥ इतिछिनीयपूगपाकः ॥ निस्तुषंवानरीवीजंकृत्वात्रिंशत्पलानिच ॥ त्रिंशत्पलंसितांदत्वाघृतं
दत्वापलाष्टकं ॥ दुग्धमाढकसंयुक्तंमृदुनावह्निनापचेत् ॥ यावद्दर्वीप्रलेपस्यात्तन्मध्येचूर्णितंक्षिपेत् ॥ जातीफलंत्रिकटुकंत्रि
गंधदेवपुष्पकं ॥ अकल्लकजातिपत्रीकोकिलावीजकेसरे ॥ पुनर्नवेत्यावद्दर्वीप्रलेपस्यात्तन्मध्येचूर्णितंक्षिपेत् ॥ जातीफ
लंत्रिकटुकंत्रिगंधदेवपुष्पकं ॥ अकल्लकंजातिपत्रीकोकिलावीजकेसरे ॥ पुनर्नवावलेहेचमुशल्यासहफेनकं ॥ पारदंलोहं
चूर्णंचअभ्रकंचपलार्द्धकं ॥ चंदनागरुकस्तूरीकर्पूरंशाणमात्रकं ॥ पलार्द्धंभक्षयेदेनंक्रमाद्वीर्यबलप्रदं ॥ निस्त्रावमर्कटीवी

त्वपल ३० सिताद्विगुणा गोघृतपल ८ गोक्षीरपल १६ तत्र चूर्णानि · जातीफलं · त्रिकटुकं · त्रिसुगंधं · लवंगं · अकल्लकं · जा
तीपत्री · तालमखानाख्यं केशर · पुनर्नवा · वलावीजं नागवलावीजं मुशलीकंद अहिफेनकं रससिंदूराख्यं लोहभस्म · अभ्र
क · प्रत्येकं पलार्द्धकं चंदनकृष्णागुरुकस्तूरी · कर्पूरं प्रत्येकं शाणमात्रकं पश्चाद्गुटिकां मात्राकर्षश।१॥ निहंति सर्वमेहांश्च
कानदशाश्चतुर्गुणां ॥ तथापि क्षीणदेहस्य वलपुष्टिविवर्द्धनं ॥ इति कपिकच्छुपाकः ॥ श्वेतपुष्पसहस्रं तु घृतप्रस्थे विपाच
येत् ॥ घृतपक्वीकृते पश्चान्मध्ये क्षिप्यानितोषधां ॥ सिताप्रस्थं चतुष्कं तु चातुर्जातपलं पलं ॥ द्विषट्पले च मृद्वीका माक्षिकं प
लमेव च ॥ धात्रीसत्वपलान्यष्टौ पक्वा स्थाप्यं मृद्भंभके ॥ सेवतिपुष्प १००० घृतप्रस्थ १ सितापल २५६ चातुर्जातपल ४ मृ
द्वीका १२ माक्षिकपल १६ धात्रीसत्वपल ८ मात्रापल १ तदर्द्धं वा ॥ जीर्णज्वरे क्षये कासे शोषे वह्निमांद्ये प्रमेहजे ॥ प्रदरे रक्तदोषे च कृ
च्छ्रार्शःसु प्रशस्यते ॥ नेत्ररोगे षडङ्ले च मुखरोगेषु पूजितः ॥ इति सेवतपत्रीपाकः ॥ खारिक द्वयसेरं च गोदुग्धं चतुराढके ॥ कुडव
गोघृतं चैव शर्करा समभागिका ॥ जीरके द्वे विडंगानि चातुर्जातसकेशरं ॥ सूतं वंगं मृतं ताम्रं कर्पूरं कनकाभ्रकं ॥ पलमासंप्र
दातव्यं मुशीरं लोहशारकं ॥ सत्वं गुडूच्याः सैलेयसूक्ष्मचूर्णं विमिश्रयेत् ॥ खारिपल ३८ गोदुग्धपल २५६ गोघृतपल ४ सि
तापल १२२ तत्र चूर्णानि ॥ जीरकं कृष्णजीरकं विडंगं · चातुर्जातकेशर · रससिंदूरं · वंगं · ताम्रं · कर्पूरं · सुवर्णअभ्रकं · उशीरं

सारलोहं · धारासत्वशिला · कुंकुमं प्रत्येकं पलप्रमाणं संचूर्ण्यक्षिपेत् ॥ मात्राकर्ष १ द्विकर्षं वा ॥ वातपित्ते रक्तपित्ते हेंत दाहे विशे
षतः ॥ धातुक्षये चमेदाग्नौ सर्वव्याधौ सुदुस्तरे ॥ इति खाटिपाकः ॥ वङ्वा संप्रस्थमेकं क्षीरद्रोणे विपाचयेत् ॥ घृतप्रस्थद्व
यं चैव स्निग्धभांडे विनिक्षिपेत् ॥ घनीभूते क्षिपेत्तत्र चूर्णानीमानि यत्नतः ॥ चातुर्जातं लवंगानि पिप्पली पुनर्नवाः
नागार्जुनि स्वयंगुप्ता गोक्षुरं पिचुमात्रकं ॥ मंजिष्ठा चाश्वगंधा च ह्यधामात्रं पृथक् पृथक् ॥ आकल्लकं तथा कर्षं गुड
शुद्रं पलाष्टकं ॥ निर्गुंडीकं त्रुकं मूलं पलमात्रं प्रयोजयेत् ॥ नागवलासमेनत्रवंगाभ्रकसमे तथा ॥ लोहं शुल्वसमं चै
व विचूर्ण्य शाणकद्वयं ॥ धारासत्वं तुगाक्षीरी पलार्द्धं च प्रकल्पयेत् ॥ वालकं चंदनं मांसि कर्पूरं वंशलोचनं ॥ जाती
फलं जातिपत्री केशरं रक्तचंदनं ॥ पलमात्रं च दातव्यं भक्षयेन्मात्रया नरः ॥ पटवासोत्र गोरीकंद · गोक्षीर · पल २५६
गोघृत पल ३२ सितापलं १०० तच्चूर्णानि शुक्ष्मेला त्वग्पत्र नागकेशर · लवंग · पिप्पली पुनर्नवा दुग्धिका · व्रततिक
पिकच्छु गोक्षुर · मंजिष्ठा अश्वगंधा · आकल्लकं · प्रत्येकं कर्ष · गुडुपलाष्टकं निर्गुंडि पलं केमुकंदफल ॥ नागवला
वीजपलं · नागवंग · अभ्रकं · लोह · शुल्वं पृथक्कोलप्रमाणं · गुडूचीसत्व वंशरोचना पृथक्कालार्द्धं वालकं चंदनं जटा
मांसि कर्पूरं · वंशरोचना · जातिफलं · जातिपत्री · केशरं · रक्तचंदनं पृथक् पलमात्रं सर्वचूर्णीकृत्य दापयेत् ॥ नस

मात्रापलं तदर्द्धं तदर्द्धं वा ॥ श्वासकासं तथा पांडुप्रमेहं च विनाशयेत ॥ योनिदोषहरं जो दोषं प्रदरं पंचधा तथा ॥ वङ्गमूत्रं भ
वेद्यस्य प्ररागस्यति न संशयः ॥ स्त्रीणां च कुरुते पुष्टीं बालानां बांगवर्द्धनं ॥ बलवीर्यकरं पुंसां पद्मवाससदोत्तमं ॥ इति प
द्मासपाकः ॥ नागरं खंडशः कृत्वा प्रस्थमात्रं भिषग्वरः ॥ अजादुग्धाढके द्वे द्वे निपचेन्मंदवह्निना ॥ घनीभूते तु पयसि
शुंठीं तस्मात्समुद्धरेत ॥ अविसूक्ष्मं च तिः पेष्या शोषयेदातपे दिनं ॥ घृतमानी समा वाप्य तदुग्धं तु पुनः पचेत ॥ यावत
पीडत्वमायाति ततस्तानि विमिश्रयेत ॥ चातुर्जातं तुगां चैव द्वे धान्यकं जीरकद्वयं ॥ मिसिकुष्ठं कुसुरु कृष्णलवंगं च शतावरी ॥ तालमूलीत्रिकटुकं कपिक
च्छुं चषट्कटुं ॥ जातीफलं जातिकोशं शृंगाटं वृद्धदारकं ॥ त्रिवृतं पद्मवीजं च त्रिफलां चवलात्रयं ॥ जलं सैंधवं वाजिगंधां चंदनागरु कारवी कं
कोलमज्जं धात्र द्राक्षामक्षोटचोरकं ॥ अजमोदा च वादाम नारिकेरगरं तथा ॥ कर्पूरं समभ्रकं लोहं वंगं ताम्रं शिलाजतु ॥ स्वर्णमाक्षिकमप्यत्र प्र
त्येकं कर्षसंमितं ॥ चूर्णीकृत्य क्षिपेत्तत्र पाणिभ्यां मर्दयेद्दृढं ततः खंड तुलां पश्चात्तन्यात तत्क्रियां चरेत ॥ नागरः खंड कृत्वा पल १६ अजा
दुग्धे गोदुग्धे वा क्षीरपल १२८ पक्त्वा विशोष्य पुनस्ततः खंडं पिष्ट्वा· गोघृतपल ३२ भर्जयित्वा पुनस्तदुग्धे पचेत ॥ ततः सितापल १०० द
त्वा पचेत्तत्र चूर्णानि ॥ चातुर्जात· तुगा विडंगं· धान्यकं· जीरक· कृष्णजीरक· मिसि· पुन· धान्यकं· कुष्ठं· लवंगं· शतावरी। तालमूली· त्रि
कटुकं· कपिकच्छू· पिप्पली· गजमूलं चव्यं· चित्रकं· । मरिचं· जातीफलं· जातीकोशं· शृंगाटं· वृद्धदारकं· त्रिवृता· पद्मवीज· त्रिफला·

वलावीजं·नागवला·वीजं वृहद्वलावीजंवाले उशीरःअश्वगंधा·चंदनं·कृष्णागरुः·कारवि·कंकालं·अश्वगंधा द्राक्षा·अंक्षोट·चारम
ज्जा·अजमोदा· वाममज्जा·नारिकेल·गरं·कर्पूरं·अभ्रकं·लोहं·वंगताम्रं·शिलाजतु·सुवर्णमाक्षिकं·सेचूर्णं·क्षिपेत्·पृथक्कर्ष
१॥ रंवर्डगनारकं·नामभैषज्यमिदमुत्तमं·यथावलमिदंखादेत्यातर्नक्रेचभेषजं॥ स्त्रीणांमतिहितंनात्रयथ्यायथ्याविचारणा
:॥ क्षयेपांडौज्वरेकासेश्वासेमंदानलेतथा॥ संग्राहिणपरक्ते गुल्मेप्रदरेसोमरोगकं॥ रक्तपित्तेचाम्लपित्तेसर्वेनामयेषुच
धातुशोषेप्रमेहेचरक्तदोषेस्वरक्षये॥ दुग्धक्षयेमूत्ररोगेकामलायांजलग्रहे॥ सूतिकापवनव्याधौसस्तमेतत्रसंशयः॥ अग्नि
न्यांपूर्वमुदितः सस्तोयोगोयमुत्तमः॥ एषासौभाग्यदाशुंठीस्त्रीणांपुत्रप्रदोत्तमाः॥ सौभाग्यशुंठी॥ कशेरुकुंडवंचैवघनेग्राह्य
चतत्समं॥ गोक्षीरभाजनेदेयंपचेत्सम्यग्भिषग्वरः॥ उत्तार्यप्रक्षिपेत्तत्रगुडंकोलद्वयंशुभं॥ खंडं प्रस्थद्वयंचैवपाकेकृत्वाक्षिपेत्
पुनः॥ पाषाणभेदंत्रिकटुलोध्रंजातीशतावरी॥ मंजिष्ठाधातकीमाजूविल्वमोचरसंतथा॥ एतेषांशुद्धिमात्रंचतुःकर्षचमोदकं
॥ स्त्रीप्रदरेनिहंत्याशुयोनिदोषंशमनयेत्॥ माजू·माजूपल॥ इतिकसेरुपाकः॥ ॥ लवंगंप्रस्थमेकंतुपचेत्क्षीरेचतुर्गुणे॥
घृतेचकुडवंदद्यात्सितायाप्रस्थंतथैवच॥ कटुत्रयंचतुर्जातंजातीपत्रीचकेशरैः॥ कर्पूरक्षरवीजातिजातीफलत्रिजातकं॥ वत्सना
भंचनागंचकंकोलंचरशाणकं॥ कवावंजलधीशोफमहिफेनंचचंदनं॥ अभ्रकंलोहचूर्णंचप्रत्येकंचपलार्द्धकं॥ विजयाकुडवं

दद्यात्सर्वमेकत्र कारयेत् ॥ लवंगपल १६ गोदुग्ध ६४ गोघृत ४ सितापल ६४ त्रिकटु · जीरं · जातीपत्री · केशर कर्पूर · क्षुरवीज जातीफलत्रि
जातक · वत्सनाभं · नागकेशर · कंकोलखुराशाणी · एवानी · रेणु, कासमर्दशोषवीजअहिक्षीरं · चंदनं · अभ्रकंलोह प्रत्येक · कर्ष २ विजे
यापल ४ मात्रा कर्ष १ ॥ अपक्वाम्रफलान्यस्थिरहितानि विखंडयेत् ॥ डोराणानि घृतप्रस्थेण पाचयेन्मधुसंनिभं ॥ खंडप्रस्थद्वयं दुग्धप्रस्था
र्द्धेन विमिश्रयेत् क्षिपेज्ज्ञानि च शुंठी च पलाष्टकमितं तथा ॥ पिपलीद्विपलोन्मानं मरिचं तु चतुष्पलं ॥ त्रिजातवेल्लजीरकमुस्ताकेतकके
शरं नागकेशरकर्पूरमृगनाभिलवंगकं ॥ वंगाभ्रलोहलं तत्तु कार्षिकं च पृथक् पृथक् ॥ घनीभूते सिते चास्मिन् मधुनः कुडवद्वयं ॥
पलार्द्धपलमेकं वा भक्षयेन्मानवः सदा ॥ अपक्वान्न डोराणि त्वचास्थिरहितं खंडशः कृत्वा ॥ गोघृतप्रस्थेन भर्जयित्वा तस्मिन् गोक्षीर
पल २५८ दत्वा पचेत् ततः शुंठीपल — पिप्पलीद्विपलं मरिचपला ४ त्रिजात · विडंगजीरक · मुस्ताकेतकंकेशरं नागकेशरं · कर्पू
रं · मृगनाभिं · लवंगं · वंगं · अभ्रं लोह पृथक् कर्ष सितापल २५६ मधुपल ८ दत्वावतार्य मात्रा पलमर्द्धं च हृद्रोगी चाम्लपित्ती च र
क्तरोगी क्षतक्षयी ॥ कासिश्वासिपांडुरोगीकामली चाल्पवीर्यवान् ॥ मुखरोगी कोपमूलीग्रहणीदोषवान् तथा ॥ इत्यपक्वाम्रपा
कः ॥ ॥ इति श्रीविश्वनाथकृते सानादर्पणे पाकावलिकथनाध्यायः सप्तमः ॥ ॥ अथ पथ्यापथ्यविचारः ॥ भिषक्सर्वेषु
रोगेषु निर्दिष्टानि यथायथं ॥ निदानौषधपथ्यानि त्रिभिर्यत्नेन चिंतयेत् ॥ रुक्षु सर्वास्वपथ्यानि यथास्वं परिवर्जयेत् ॥ नाल्पप

पथ्यैर्विधैर्द्वैर्नेदोहदेरिवदीरुधः॥ दोषान्दूष्यान्देशकालौ सात्म्यसत्त्वबलंवयः॥ प्रकृतिंभेषजंवह्निमाहारमुदकंतथा॥ निरीक्ष्यमतिमान्वै
द्यश्चिकित्सांकर्तुमर्हतः॥ पथ्यानियोजयेन्नित्यंयथास्वंसर्वरोगिषु॥ ॥अथज्वरसंनिपातयोः॥ वमनंलंघनंकार्यंयवागूःस्वेदना
नि च॥ कटुतिक्तरसेश्चैवपाचनंनरहराज्वरं॥ संनिपातेत्रिविदंसर्वंकुर्यादामकफापहं॥ अवलेहांजनेनस्यंगंडूषाश्चरसक्रिया॥ पाद
योर्हस्तयोर्मूलेकंटकूपेचगंडयोः॥ स्वेदेप्रष्टकुलत्थानांचूर्णांघर्षणमाचरेत्॥ स्नानंविरेकःसुरतंकषायंव्यायाममभ्यंजनमाक्लिनि
द्रां॥ दुग्धंघृतंवैदलमामिषंचतक्रंसुरांस्वादुगुरूद्रवंच॥ अन्नंप्रयातेभ्रमरांचक्रोधंत्यजेत्प्रयत्नात्तरुणज्वरार्त्तः॥ पुरातनाःषष्टि
कशालयश्चवानीकशोभांजनकारवेल्लं॥ वेत्राग्रमाषारुफ्लंपटोलंकर्कोटिकंमूलकयोनिकेति॥ मुद्गैर्मसूरैश्चणकैःकुलत्थै
र्मकुष्टकैर्वाविहितश्चयूषः॥ पाठामृतावास्तुकतंडुलीयजीवंतिशाकानिचकाकमाचि॥ द्राक्षाकपित्थानिचदाडिमानिचैकंकता
न्येवयचेलिमानि॥ लघूनिमान्यानिचभेषजानिपथ्यानिमध्यज्वरिणाममूनि॥ विरेचनंछर्दनमंजनानिनस्यंचधूमोप्यनुवा
सनंच॥ संशोधनंसंशमनंव्यवायोभ्यंगोवगाहःशिशिरोपचारः एणःकुलिंगोहरिणोमयूरोलावःशशस्तित्तिरकुक्कुटौच॥ कौं
चःकुरंगःपृषतश्चकोरःकपिंजलोवार्त्तिककालपुच्छो॥ गवामजायाश्चपयोघृतंचहरीतकीपर्पतनिर्भराभः॥ एरराडतैलंसि
तचंदनंचड्याणिसर्वाणिपुरेरितानि॥ ज्योत्स्नाप्रियालिंगनमप्ययंस्याद्गपुराणज्वरिणांसुखाय॥ अभिघातसमुत्थानेपाना

भ्यंगौचसर्पिषः ॥ क्षतजेव्रणजेवापिक्षतव्रणचिकित्सितं ॥राकानिशाकरंयश्रेण दर्शनेमेषप्रसर्पदृक् ॥आनीतोथायथायोगमक्षिसं
ज्वरशांतये ॥औषधीगंधजेकर्मकुर्यात्पित्तप्रसादनं ॥आभिचाराभिशापोत्थेजपहोमादिभेषजं ॥उत्पातग्रहपीडोत्थेदानस्व
स्त्ययनादयः ॥क्रोधोत्थितेपित्तहरः कामजेप्रियमेवच ॥ कामशोकभयोद्भूतेसर्वावातहरिक्रिया ॥आश्वासनंचेष्टलाभोहर्ष
दायीनियानिच ॥विशेषतः पुनश्चात्रकामक्रोधसमुत्थिते ॥भयशोकसमुद्भूतेकामक्रोधौक्रमौषधं ॥भूताभिषंगजेभूतबंधावे
शनताडितं ॥मनःक्षोभसमुत्पन्नेमनसःसान्त्वनानिच ॥इत्यागन्तुज्वरेपूर्वैभिषग्भिःपथ्यमिष्यते ॥विष्णोर्नामसहस्रस्यपठनंश्र
वणंश्रुतेः ॥ देवानांब्राह्मणानांचगुरूणामपिपूजनं ॥ब्रह्मचर्यंतपोहोमःप्रदानंनियमोजयः ॥साधूनांदर्शनंनित्यंरत्नौषधि
निधारणं ॥ मंगलाचरणंचेतिवर्गःसर्वज्वरान्जयेत् ॥बलंदलनस्सेवाहोममंत्रहितेनद्विजगुरुजसेवाविष्णुनाम्नासहस्रं ॥
मणिधृतिरपिदानान्याशिषस्तापसानांसकलमिदमरिष्टंयुक्तमष्टज्वराणां ॥वमिवेगदंतकाष्ठमसात्म्यमतिभोजनं ॥विरुद्धा
न्यन्नपानानिविदाहीनिगुरूणिच ॥दुष्टांबुक्षारमम्लानिपत्रशाकंविरूढकं ॥रक्तवस्त्रंचतांबूलंकलिंगंलकुचफलं ॥नोडिम
स्यंचपिण्याकंनवान्नंपिष्टवैकृतं ॥अभिस्पंदीनिचैतानिज्वरिणःपरिवर्जयेत् ॥ज्वरमुक्तेपथ्यादि ॥ व्यायामंचव्यवायंचस्नानं
चंक्रमणानिच ॥ज्वरमुक्तोनसेवेतयावन्नबलवान्भवेत् ॥ इतिज्वरसंनिपातरोगपथ्यापथ्यविधिः ॥ ॥अथातीसारस्य ॥

वमनंलंघनंनिद्रापुराणाःशालिषष्टिकाः॥विलेपीलाजमंडश्चमसूरतुवरीरसः॥सशैणलावंहरिणकपिंजलभवारसाः॥सर्वक्षुद्र
झषाःशृंगीगिडिङ्गिशौमद्गुनालिका॥तैलंछागघृतंक्षीरंदधितक्रंगवामपि॥दधिजंवापयोजंवाजनवनीतंगवाजयोः॥नवरंभापुष्प
फलंक्षौद्रंजंवूफलानिच॥भव्यंमहार्द्रकंविश्वंशालूकंचविकंकतं॥कपित्थंवदरंविल्वंतिंदुकंदाडिमद्वयं॥तालकंकठफ
लंवापिचांगेरीविजयारुणा॥जातीफलमफेनंचजीरकंगिरिमल्लिका॥कुरुंवुरुमहानिंवकषायःसकलोरसः॥अ
न्नपानानिसर्वाणिदीपनानिलघूनिच॥नाभेर्द्व्यंगुलतोधस्ताद्वृत्तंशरार्द्धेंदुवद्दहेत्॥तथावंशास्थिमूलेपिपथ्यव
र्गोतिसारिणां॥स्वेदोंजनंरुधिरस्रोक्षरामद्यपानंस्नानंव्यवायमपिजागरधूमनस्यं॥अभ्यंजनंसकलवेगविधारणंचरुक्षा
न्नसात्म्यमशनंचविरुद्धमन्नं॥गोधूममाषयववास्तुककाकमाचीनिष्पावकंदमधुशिग्रुरसालपूगंकूष्मांडतुंविवदरंगुरुः
चान्नपानंतांवूलमिक्षुगुडमद्यमुपोदिकाच॥द्राक्षाम्लवेतसफलंलसुनंचधात्रीद्राक्षांवुमस्तुगुरुहवारिचनारिकेलं॥संस्नेहन
मृगमदोखिलपत्रशाकंक्षीरसराणिसकलानिपुनर्नवाच॥सर्वोरुकंलवणमम्लमपिप्रकोपिवर्ज्यातिसारगदपीडितमा
नवेषु॥इत्यतीसाररोगपथ्यापथ्यविधिः॥अथग्रहणीरोगस्य॥ ॥निद्राछर्द्दनलंघनंचिरभवायेशालयःष
ष्टिकामंडोलाजयवागूमसूरतुवरीमुद्गप्रभूतारसाः॥निःशेषोद्धृतसारमेवदधियत्तक्रंक्षीरजातंगवांछाग्यावानवनीतमेव

विमलं नवनीयः संभवेच्छागल्याज्यपयोदधीनि तिलजं तैलं सुरा माक्षिकं ॥ शालूकं वकुलं च दाडिमयुगं नव्यानि भव्यानि च ॥ रंभायाः कुसुमं फलं च वनरुहाणि बिल्वं च शृंगाटकं चांगेरी विजया कपित्थकटजाजानीकशेरूणि च ॥ न्यग्रोधस्य फलं च वनकुममलं जातीफलं जांववं ॥ धान्याकानि च तिंदुकानि च महानिंबो हरोणिफेनवत् ॥ कव्यानां च शशैणतित्तिररसाः क्षुद्राझषाः सर्वशो दंडीशो मधु नालिकाखिलभवः सर्वः कषायो रसः ॥ नाभेर्द्व्यंगुलिकादधोऽर्द्धशशिवद्दंशास्थिमूलेन तथा दाहः प्रज्वलितेनोपमान्य च कथितेपथ्यंग्रहणातुरे ॥ रक्तस्रुतिजागरमद्यपानं स्नानं स्त्रियं वेगविनिग्रहं च ॥ नस्यांजनं स्वेदनधूमपानं श्रमं विरुद्धाशनमातपं च ॥ गोधूमनिष्पावककलायमाषयवार्द्रककटुत्रकराजमाषान् ॥ उपोदकीवास्तुककाकमाचीकुष्मांडतुंबीमधुशिग्रुकंदान् ॥ तांबूलमिक्षुबदरं रसालमेर्वारुकं पूगफलं रसोनं ॥ धान्याम्लसौवीरतुषोदकानि दुष्टोदं मस्तु च नारिकेलं ॥ पुनर्नवावार्हतवैरावाराणीस्वारिशाकानि सपत्रवंति ॥ दुष्टांबुगोवारि करंगनाभिक्षीरं समस्तानि सरांसि चापि ॥ द्राक्षामथाम्लं लवणारसं च गुर्वन्नपानं सकलं च पूगं ॥ वैद्यश्चिकित्से ग्रहणीविकारं विवर्जयेत्संततमप्रमत्तः ॥ यानेनापथ्यमथ्यमभ्यस्तं पादपादेन वा त्यजेत् ॥ निषेवेत नाहिमं नह्वदे कदाचित्त्रं नरोहितं ॥ ॥ इति ग्रहणीरोगपथ्यापथ्यविधिः ॥ अथार्शोरोगस्य ॥ ॥ विरेचनं लंघनमस्त्रमोक्षः क्षारोग्निशस्त्राचरितं च कर्मः ॥ पुराणनालोहितशालयश्च

सषष्ठिकाश्चापियवाकुलित्थाः॥गोधाखुलोमाजखरोष्ट्रलोमाश्वाविट्कलिंगादथधौतकीसान्॥तरक्षुवाषश्वश्वगालकाकाये
न्यैल्यमांसाप्रसहाश्चतेपि॥पटोलपत्त्रूररसोनवह्निपुनर्नवाशूरणवास्तुकानि॥जीवंतिकादंतशठामुराचत्रुटिर्वयस्थानव
नीततक्रं॥कंकोलधात्रीरुचकंकपित्थमोप्लारामृत्राजपयांसिचापि॥भल्लातकंसर्षपजंचतैलंगोमूत्रसौवीरतुषोदकानि
॥वातापहंयच्चयदग्निकारीतदन्नपानंहितमर्शसेभ्यः॥आनूपमामिषमात्स्यपिण्याकंदधिपिष्टकम्माषान्करीरंनिष्पा
वंबिल्वंतुंबिञ्चपोदकीं॥पक्वाम्लंसालुकंसर्वंविरूढंभिन्निगुरूणिच॥आतपंजलपानानिवमनंवस्तिकर्मच प्राग्वातंत्यपरं
सोस्थुनदीनांसलिलानिच॥विरुद्धानिचसर्वाणिमारुतंपूर्वदिग्भवं॥वेगरोधंस्त्रियंपृष्ठयानमुत्कटुकासनं यथास्वं
दोषलंचान्नमर्शसः परिवर्जयेत्॥तत्पथ्यंयदपथ्यंचवक्ष्यतेरक्तपित्तिनां॥रक्तार्शरोगिणांतत्तदपिविज्ञायविशेषतः
पानयानंदिवास्वप्नंगर्वंचमतिभोजनं॥ व्यायामंकाहलंचैवतीक्ष्णाक्षारविधिंत्यजेत्॥यदुक्तमर्शसामादौभेषजंपथ्यमे
वच॥तदेवचर्मकीलानांकार्यंदोषादिभेदतः॥इत्यर्शरोगेपथ्यापथ्यविधिः॥अथाग्निमांद्याजीर्णालसकविसूचिकारो
गेपथ्यापथ्यविधिः॥ ॥श्लेष्मिकेवमनंपूर्वंपैत्तिकेमृदुरेचनं॥वातिकेस्वेदनंचाथयथावस्थंहितंचयत्॥नानाप्रकारो
व्यायामोदीपनानीलघूनिच॥वहुकालसमुत्पन्नामुद्गलोहितशालयः॥विलेपिलाजमंडश्चमसूरमुद्गरसस्तथा॥रसोव

हि: शशोलावश्चुडमत्स्याश्च सर्वशः ॥ शाकञ्च शाकवेत्राग्रवास्तुकं बालमूलकं ॥ लशुनं वृद्धकुष्माण्डं नवीनं कदलीफलं ॥ सौ
भांजनं पटोलञ्च वार्त्ताकं नलदं ध्वजं ॥ कर्कोटकं कारवेल्लं वार्हन्तञ्च महार्द्रकं ॥ प्रसारिणी च चांगेरी तथैव वस्तुनिषस्मकं ॥ धात्री
फलं च नारंगं दाडिमं यवपर्पटाः ॥ अम्लवेतसजंबीरमातुलुंगानि माक्षिकं ॥ नवनीतं घृतं तक्रं सौवीरं च तुषोदकं ॥ धान्या
म्लं कटुतैलं च रामठं लवणार्द्रकं ॥ यवानीमरिचं मेथी धान्याकं जीरकं दधि ॥ तांबूलं तप्तसलिलं कटूनि क्षारसावपि ॥ मंदा
नलेप्यजीर्णे च पथ्यमेतन्नृणां भवेत् ॥ विरेचनानि विण्मूत्रवायुवेगविधारणं ॥ अतिरिक्तं चाध्यसनं जागरं विषमाशनं ॥
रक्तस्रुतिं शिराविद्धां न्यमत्स्यमांसमपोदकां ॥ जलयानं पिष्टहं च जांबवं सर्वशालुकं ॥ कर्कटिकामोरटं क्षीरकिलाटं च प्रपा
नकं ॥ तालास्थि सर्षपं तैलं स्नेहनं दुष्टवारि च ॥ विरुद्धासात्म्यपानान्नविष्टंभीनि गुरूणि च ॥ अग्निमांद्येप्यजीर्णे च स
र्वाणि परिवर्जयेत् ॥ फलवर्त्तिं वमिं स्वेदं लंघनं वापतर्पणं ॥ विशेषादलसे कुर्यात् विसूच्यामतिसारवत् ॥ पार्ष्णिदाहोऽति
वृद्धायां सम्यक् दीपनपाचनं ॥ ॥ इत्यजीर्णालसकविसूचीरोगपथ्यापथ्यविधिः ॥ अथ कृमिरोगपथ्यं ॥ ॥ अस्थापनं
कायशिरोविरेचनं धूमः कफघ्नानि शरीरशोधनं ॥ चिरंतना वै रावरक्तशालयः पटोलवेत्राग्ररसोनवास्तुकं ॥ कुनाश
नं दारदलानि सर्षपान्वीमोचं बृहतीफलान्यपि ॥ तिक्तानि नालीवदलानि मोषिकं मांसं विडंगं पिचुमंदपल्लवं ॥ पथ्या

चतैलं तिलसर्षपोद्भवं सौवीरस्तक्रं च तुषोदकं मद्यः ॥ पचेलिमंतीलमरुष्करं गवां मूत्रं च तांबूलसुराम्लगासउं जंऔष्ट्रिणि मूत्राज्यपर्यासि
रामठं क्षारो जमोदा खदिरश्च वत्सकः ॥ जंवीरनीरं सुरवीर्यवानिका— सांभुराह्वागुरुसिंशिपोद्भवाः ॥ तिक्तः कषायः कटुकोर
सोयायं वर्गो नराणां क्रिमिरोगिणां सुखं ॥ छर्दिश्च तद्वेगविधारणां च विरुद्धपानाशनमह्निनिद्राः ॥ द्रवं च पिष्टान्नमजीर्णभो
जनं घृतानि माषान् दधि पत्रशाकं ॥ मांसं पयोम्लं मधुरं रसं च क्रिमीन् जिघांसुः परिवर्जयेत् ॥ ॥ इति क्रिमिरोगपथ्याप
थ्यः ॥ अथ पाण्डुरोगस्य ॥ छर्दिविरेचनं जीर्णयवगोधूमशालयः ॥ मुद्गाढकीमसूराणां यूषा जांगलजा रसाः ॥ पटोलं वृ
द्धकूष्मांडं तरुणं कदलीफलं ॥ जीवंतिमत्स्याक्षीगुडूचीतंडुलीयकं ॥ पुनर्नवाद्रोणपुष्पीवार्ताकं लशुनद्वये ॥ पं
क्वाम्रमभयाविंवि शृंगिमत्स्यो गवां जलं ॥ धात्री तक्रं घृतं तैलं सौवीरकं तुषोदके ॥ नवनीतं गंधसारो हरिद्रा नागकेशरं
॥ यवक्षारो लोहभस्म कषायाणि च कुंकुमे ॥ दाहवरणायोः संधौ नाभेर्द्व्यंगुलिकादधः ॥ मस्तके हस्तयोर्मूले मध्ये च स्तन
कक्षयोः ॥ स्वेदनं मैथुनं शिंवीयत्रसाकानि रामठं ॥ माषीवृषाणां पिण्याकं तांबूलं सर्षपाः सुराः ॥ मृद्भक्षणं दिवास्वाप
तीक्ष्णानि लवणानि च ॥ सर्वाण्यम्लानि दुष्टांबु विरुद्धाध्यशनानि च ॥ गुर्वन्नं च विदाहीनि पांडुरोगवतां विषं ॥ ॥
इति पांडुरोगपथ्यापथ्यविधिः ॥ गोधूमशालिषष्टिकयवमुद्गाढकीपयः ॥ जांगलं नवत्रशणमाकं पित्तघ्नं कामले हि

तं॥ ॥~~कामलायांपथ्यापथ्य~~॥ अथरक्तपित्तस्य ॥ अधोगतेछर्दनमूर्द्धगामिविरेचनंस्याडुभयत्रलंघनं ॥ पुरातनाःषष्टि
कशालिकोड्रवाःप्रियंगुनीवारयवप्रसाधिकाः॥ मुद्गामसूराश्चणकाःकुलुवर्यामकुष्टकश्चिगदवर्मिमताः ॥ शशाःकपोतो
हरिरोमसिलावशरारिपारावर्तकाश्च ॥ वकाडुरभ्राश्चसकालपुच्छाःकपिंजलाश्चापिकषायवर्गः॥ गवामजायाश्चपयो
घृतंचघृतंमहिष्याःपनसंप्रियालं॥ रंभाफलंकेवटतेंडुलीयपटोलवेत्राग्रसहार्द्रकानि ॥ पुराणकूष्माण्डफलंचपक्वं
तालानितद्वीजदलानिवासाः॥ स्वादूनिवानिचदाडिमानिखर्जूरधात्रीमिसिनारिकेलं॥ कसेरुशृंगाटकपोष्करा
णिकपित्थशालूकपरूषकानि ॥ भूनिंबशाकंपिचुमंदपत्रंवीकलिंगानिचलाजसक्तु॥ द्राक्षासितामाक्षिकमिक्षव
श्चशीतोदकंचोद्भिदवारिचापिसेकोवगाहःशतधौतसर्पिरभ्यंगयोगःशिशिरप्रदेहः॥ हिमानिलश्चंदनमिंदुपादाः
कथाविचित्राश्चमनोनुकूलाः॥ धारागृहंभूमिगृहंसुशीलंवैडूर्यमुक्तामणिधारणंचरंभोत्पलांभोरुहपत्रशय्याक्षौमोव
रचोपवनंसुशीतं॥ प्रियंगुकाचंदनभूषितानामालिंगनंचापिवरांगनानां॥ पद्माकराणांसरितांह्रदानांचंड्रोदयानांहि
मशीकराणां॥ सुशीतलानांगिरिनिर्झराणांश्रुतेःप्रशस्तानिचकीर्त्तनानि॥ प्रतीरनीरंहिमवालुकाचपथ्यानिनृणांशो
णितपित्तरोगे॥ व्यायामाध्वनिषेवनंरविकरस्त्रीक्ष्णानिकर्माणिचक्षोभोवेगविधारणंचपलताहस्त्यश्वयानानिच॥ स्वे

दास्वछनि धूमपानस्तुतक्रोधः कुलत्थोगंडीवाताकीतिलमाषसर्षपदधिक्षाराश्चकौपंचम ॥ तांवूलंनदलंघ्नुमद्यलशुनेशिवीविरुद्धाश
नं ॥ कटूम्लंलवणंविदाहिचाग्रणांस्याज्ज्योऽस्रपित्तेनराणां ॥ ॥इतिरक्तपित्तरोगेपथ्यापथ्यविधिः ॥ ॥अथराजयक्ष्मक्षतशीतास्य
दोषाधिकस्यवलिनोमृदुशुद्धिरेगोधूमषष्टिकचणकारुणशालयश्च ॥ छागादिमांसनवनीतपयोघृतानिक्रव्यादमांसमपिजांग
लकारणांश्च ॥ मार्त्तण्डचण्डकिरणैःपरिशोधितानिलेह्यानिपक्ववदाणिसुचूर्णितानि ॥ रागाःसकांवलिकखांडववेसवाराभ
क्षाशशांकुकिरणामधुरीरसश्च ॥ पक्वानिमोचपनसाम्रफलानिधात्रीखर्जूरपौष्करपरूषकनारिकेलं ॥ सौभांजनंवकुलकंन
वतालसस्पडाक्षाफलानिमिशयापिचमारणमंथं ॥ सिंहास्यपत्रमपिगोमहिषीघृतंचछागाश्वमंश्रुहितंदनकमृत्वलेपः ॥ म
त्स्यंडिकाशिखरिणीमदिरारसालाकर्पूरकंमृगमदासितचंदनंच ॥ अभ्यंजनानिसुरभीण्यनुलेपनानिस्थानानिवेश्मरचनान्यव
गाहनानि ॥ हर्म्यस्रजःस्मरकथामृदुगंधवाहःशीतानिलाज्यमपिवस्त्ररुजोविपंची ॥ संदर्शनंमृगदृशामपिहेमवर्णगुक्ताम
णिप्रवरभूषणधारणांच ॥ होमप्रदानममरद्विजपूजनादिदिव्यान्नपानमपिपथ्यगणांक्षयार्त्ते ॥ विरेचनंवेगविधारणानि
श्रमस्त्रियंस्वेदनमंजनंच ॥ प्रजागरंसाहसकर्मसेवारूक्षान्नपानंविषमाशनंच ॥ तांवूलकालिंगकलक्षमाषरसोनवंशांकुर
रामठानि ॥ आम्लानितिक्तानिकषायकानिकटूनिसर्वाणिचपत्रशाकं ॥ क्षाराण्विरुद्धान्यशनानिशिंवीकर्कोटिकंचापिविदाहि

सर्वं ॥ कटित्वक्कंकोलमपि क्षयेषु विवर्जयेत्संततमप्रमत्तः ॥ इतिक्षयरोग[illegible]रोगपथ्यापथ्यविधिः ॥ ॥ स्वेदो विरेचनं छर्दिर्धूमपा
नं समोषिताः ॥ शालीषष्टिकगोधूमस्यामाकयवकोद्रवा ॥ आत्मगुप्तामाषमुद्गकुलत्थानां रसाः पृथक् ॥ ग्राम्योदकानूपधन्वमां
सानि विविधानि च ॥ सुरापुराननसर्पिश्छागं चापि पयो घृतं ॥ वास्तुकं वायशीशाकं वार्त्ताकं बालमूलकं ॥ कंठकारिकाशमर्दो जीव
नीसुनिषस्मकं ॥ द्राक्षाविंविमातुलुंगं पौष्करं वासकं त्रुटि ॥ गोमूत्रं लशुनं पथ्या वोषमुष्णोदकं मधु ॥ लाजादिवसनिद्रा च ल
घ्वन्नानि यानि च ॥ पथ्यमेतद्यथादोषमुक्तं कासगदातुरे ॥ वस्तिनस्यमसृङ्मोक्षव्यायामं दंतघर्षणं ॥ आत्मपंडुष्टयवनं रजो
मार्गनिषेवनं ॥ विरूंमिनि विदाहीनि रूक्षाणि विविधानि च ॥ शकृन्मूत्रोद्गारवमिकासवेगविधारणं ॥ मत्स्यः कंदसर्षपं च
तुंवीफलमुपोदिका ॥ दुष्टं च वान्नपानं च विरुद्धाध्यशनानि च ॥ गुरुशीतं च वान्नपानं कासरोगिपरित्यजेत् ॥ ॥ इति कासरो
गपथ्यापथ्यानि ॥ स्वेदनं वमनं नस्यं धूमपानं विरेचनं ॥ निद्रा स्निग्धानि चान्नानि मृदूनि लवणानि च ॥ जीर्णाः कुलत्थगोधू
माः शालयः षष्टिकायवाः ॥ एतैस्तित्तिरलावाद्या जांगलामृगपक्षिणः ॥ पक्वं कपित्थं लशुनं पटोलं बालमूलकं ॥ पौष्करं क्रु
स्मनुलसी मदिरा नालदं तु च ॥ उष्णोदकं मातुलुंगं माक्षिकं सुरभी जलं ॥ अन्नपानानि सर्वाणि वातश्लेष्महराणि च ॥ शीतांबु
सेकः सहसा त्रासो विस्मापनं भयं ॥ क्रोधो हर्षः प्रियोद्वेगः प्राणायामनिषेवनं ॥ दग्धतिक्रमदाग्रारागकुर्यीद्राराजलार्पणं ॥ नाभ्य

ष्ठीवनं दाहो दीपदग्धहरिद्रया ॥ पादयोर्ज्जुगलान्त्राभेरूर्द्ध्ववस्ताग्निहिक्किनां ॥ वातमूत्रोद्गारकासशकृद्वेगविधारणं ॥ रजोनिलात
पायासान्विरुद्धान्यशनानि च ॥ विष्टंभीनि विदाहीनि रूक्षाणि कफदानि च ॥ निष्पावमाषपिण्याकवारिजानूपमामिष ॥ अविद
ग्धं दंतकाष्ठं वस्तिं मत्स्यांश्च सर्षपान् ॥ अम्लं तुंवीफलं कंदं तैलभ्रष्टमपूपादिकान् ॥ गुरुशीतान्नपानं वहिक्कारोगी विवर्जयेत् ॥
इति हिक्कायां पथ्यापथ्यानि ॥ ॥ विरेचनं स्वेदनधूमपानं प्रच्छर्दनानि स्वपनं दिवा च ॥ पुरातनाः षष्ठिकरक्तशालिकुल
त्थगोधूमयवाः प्रशस्ताः शशाहिभुक्तिनिरलावदक्षाशुक्कादयो धन्वमृगाद्विजाश्च ॥ पुरातनं सर्पिरजप्रसूतं पयो घृतं वा
पि सुरा मधूनि ॥ निदिग्धिका वास्तुकतंडुलीयजीवंतिकामूलकपोदिकाश्च ॥ पटोलवार्ताकरसोनपथ्याजंवीरविंवीफल
मातुलुंगं ॥ द्राक्षा त्रुटिः पौष्करमूलवारि कटुत्रयं गोजनितं च मूत्रं ॥ अन्नानि पानानि च भेषजानि श्लेष्मानिलघ्नानि च यानि ता
नि ॥ वक्षःप्रदेशावपि पार्श्वयुग्मे करस्थयोर्मध्यमयोर्द्वयोश्च ॥ प्रदीप्तलोहेन वराटकूपे दाहोपि च श्वासिनि पथ्यवर्गः ॥ मूत्रो
द्गारछर्दितृट्कासरोगान्नस्यं वस्तिर्दंतकाष्ठं श्रमं च ॥ अध्वाभारोरौरवः सूर्यपादा विष्टंभीनि ग्राम्यधर्मो विदाही ॥ आनूपानामि
षतैलभृष्टं निष्पावाश्च श्लेष्मकारि शिमाषा ॥ रक्तस्रावः पूर्ववातोऽनुपानं मेषीसर्पिर्दुग्धमंभोऽपि दुष्टं ॥ मत्स्याः कंदाः सा
र्षपाश्चान्नपाने रूक्षं शीतं सर्वेपि श्वासिवर्ज्यं ॥ इति श्वासे पथ्यापथ्यानि ॥ ॥ स्वेदो वान्तिर्धूमपानं विरेक कवलग्रहः ॥ न

स्यंभालसिरोवेधोयवालोहितशालयः॥ हंसारुकीताम्रचूडकेकिमांसरसाःसुराः॥ गोकंठकंकाकमाचिजीवंतीवालमूलकं
॥ द्राक्षापथ्यामातुलुंगंलशुनंलवणार्द्रकं॥ तांवूलंमरिचंसर्पिःपथ्यानिस्वरभेदिनां॥ आम्रंकपित्थंवकुलंशालूकंजांव
वानिच॥ तिंदुकानिकषायाणिवमिस्वप्नप्रजल्पनं॥ अन्नपानंविरुद्धंचस्वरभेदीविवर्जयेत्॥ ॥इतिस्वरभेदेपथ्यापथ्य
विधिः॥ ॥विस्तिविरेकोवमनंयथामलंधूमोपसेवाकवलग्रहस्तथा॥ तिक्तानिकाष्ठानिचदंतघर्षणोविचित्रान्नपानानि
वंनेकृतान्यपि॥ गोधूममुद्गारुणशालिषष्टिकामांसवराहाजशशैणसंभवाः॥ चेंगोरुषाराउंमधुनारिकेलिसप्रोष्ठीखले
शःकवयीचरोहितः॥ कर्कारुवेत्राग्रनवीनमूलकंवार्ताकसोभांजनमोचदाडिमं॥ भव्यंपटोलंरुचकंघृतंपयोवालानिलाता
निरसोनसूरणं॥ द्राक्षारसालेननलदंडुकांजिकंमद्यरसालादधितक्रमार्द्रकं॥ कंकोलखर्जूरपियालतिंदुकंपक्वंकपित्थंव
दरंविकंकतं॥ तालास्थिमज्जाहिमवालुकासितापथ्यायवानीमरिचानिरामठं॥ स्वादम्लातिक्तानिवदेहमार्जनंवर्गीयमु
क्तोरुचिरोगिणांहितं॥ नरुत्सोद्गारःक्षुधानेत्रावारिवेगविधारणं॥ अहृद्यान्नमसृग्राशंक्रोधलोभंभयंशुचं॥ दुर्गंधान्नू
पसेवीश्चनकुर्यादरुचौनरः॥ इत्यरुचौपथ्यापथ्यानि॥ ॥विरेचनंछर्दनलंघनानिस्नानंजयालाजकृताश्चमंडः
॥पुरातनाषष्टिकशालिमुद्गाकलायगोधूमयवामधूनि॥ शशाहिभुक्तित्तिरलावकाद्यामृगद्विजाजांगलसंज्ञिताश्च॥ म

नोज्ञनानारसरूपगंधारसाश्चयूषाअपिखांडवांश्च॥ रागाःखवल्लीकाचल्लिकाम्रुराचवेत्राग्रकस्तुंवुरुनारिकेलं॥ जंवीरधात्रीसहकारको
लद्राक्षाकपित्थानिपल्वेलिमानि॥ हरीतकीदाडिमवीजपूरजातीफलंवालकनिंववासासितनाशताह्वाकरिकेशराशिमक्ष्यामनःप्रीति
करांहिताश्च॥ भक्तस्यवक्रेशिशिरांवुसेककस्तूरिकाकांचनमिंदुपादः॥ मनोज्ञगंधाल्यनुलेपनानितथैवपथ्याशिफलानिचापि॥
रूपाणिशब्दाश्चरसाश्चगंधाःस्पर्शाश्चयेयस्यमनोनुकूला॥ दाहश्चनाभेर्हृदयोपरिष्टाद्दिदंहिपथ्यंवमनातुरस्य॥ नस्यंवस्तिःस्वे
दनंस्नेहपानरक्तस्रावंदंतकाष्ठंद्रवान्नं॥ वीभत्स्येक्षांभीतिमुद्वेगमुग्रंस्निग्धांसात्म्यंहृद्यवैरोचकान्नं॥ लुंगाविंवीकोशवत्यामधू
कंविद्रासेकांसर्षपादेवदालीव्यायामंवासात्म्यदुष्टान्नपानंछर्द्यांसत्यांवर्जयेदप्रमत्तः॥ ॥इतिछर्दिरोगपथ्यापथ्यानि॥ ॥
शोधनंवमनंनिद्रास्नानंकवलधारणं॥ कोद्रवाशालयःपेयाविलेपीलाजसक्तवः॥ अन्नमंडोधन्वरसाशर्करारागखांडवैः॥ मुद्गै
र्मसूरैर्वाचणकैःसंस्कृतोरसः॥ रंभापथ्यंतैलफलेद्राक्षापर्पटपत्रकं॥ कपित्थंकोलमम्लीकाकषांडकमयोदिका॥ खर्जूर
दाडिमंधात्रीकर्कटीनलदंवुच॥ जंवीरकरमर्दंचवीजपूरगवांपयः॥ मधूकपथ्यकुंदीवरतिक्तानिमधुराणिच॥ वालनालावुशी
तांवुपयःपेटीप्रपानकं॥ माक्षिकंसरसीतोयंशताह्वानागकेशरं॥ सलाजीफलपथ्याकुस्तुंवुरुवचंदनं॥ घनसारोगंधसारकोश्र
दीशिशिरोनिलः॥ नंदनाईप्रियाश्लेषोरक्ताभरणधारणः॥ हिमाबुलेपनेचस्यात्पथ्यमेतत्तृषातुरे॥ स्वेदांजनंस्नेहनधूमपानं

व्यायामनस्नानपदंतकाष्ठः॥ गुर्वन्नामम्लं लवणं कषायं कटुत्रयं दुष्टजलानि तीक्ष्णं॥ एतानि सर्वाणि हिताभिलाषी नखान्तरोगे न भजेत्कदाचित्॥
इतिन[illegible]स्यां पथ्यापथ्यानि॥ ॥सेकावगाहो मणयः सहाराः सीतप्रदेहा व्यजनानिलाश्च॥ शीतानि पानानि च कांधवन्ति धारागृहं शीतमरीचि
रोचि॥ धूमांजनं नावनमम्बुमोक्षा दाहश्रमस्त्रीपरितोदनानि॥ रोमाकत्वानामपिलुंचनानि खांतपीडादशतोपदंशः॥ नासाम्ररवाहारमरु
न्निरोधो विरेचनं छर्दनलंघनानि॥ क्रोधो भयं दुःखकरी च शय्या कथा विचित्रा मनोहराश्च॥ छायानभोम्भःशतधौतसर्पिर्मृदूनि क्षी
राणि च लाजमंडः॥ जीर्णायवा लोहितशालयश्च कौमं हविर्मुद्गसतीनयूषः॥ धन्वोद्भवानां सरसाः सरागाः खाडवागव्यपयःसिता च॥ पु
राणकूष्मांडपटोलमोचहरीतकीदाडिमनारिकेलं॥ मधूकपुष्पाणि च तंदुलीयम्प्रयोदिकान्नानि लघूनि चापि॥ प्रतीरनीरंसितचंदनानि
कर्पूरनीरं हिमवालुका च॥ अम्बुस्वशब्दोद्भुतदर्शनानि गीतानि वाद्यान्यपि चोत्कटानि॥ श्रमं श्रांतिचिंतनमात्मबोधो धैर्यं च मूर्छावति पथ्यवर्ग
:॥ तांबूलपत्रशाकानि दंतघर्षणमातपं॥ विरुद्धान्यन्नपानानि व्यवायं स्वेदनं कटु॥ विण्मूत्रयोर्वेगरोधं तक्रं मूर्छामयि त्यजेत्॥ ॥
इतिमूर्छायां पथ्यापथ्यानि॥ संशोधनं संशमनं स्वपनं लघनं श्रमः॥ संवत्सरं समुत्पन्नाः शालयः षष्टिका यवाः॥ मुद्गाश्चमाषगोधूमासती
नारांगखांडवौ॥ एणातित्तिरलावाज दक्षबर्हिशशामिषं॥ वेसवारो विचित्रान्नं हृद्यमद्यं पयः सिता॥ तंदुलीयपटोलं च मातुलुंगपरूषकं
॥ खर्जूरं डाडिमं धात्री नारिकेरं च गोस्तनी॥ सर्पिः पुराणं कर्पूरं प्रतीरं शिशिरोनिलः॥ धारागृहं चंद्रपादा मणयो मित्रसंगमः॥ क्षौमांबर

॥ सा·प·अउ ॥
॥ ४१ ॥

प्रियाश्लेषोगीतवादित्रसुकथा ॥ शीतंचंदनंस्नानंपथ्यमेतन्मदात्यये ॥ स्वेदांजनंधूमपानंनावनंदंतघर्षणं ॥ ॥ इतिमदात्ययेपथ्यापथ्यानि ॥ ॥
शाल्यःषष्ठिकामुद्गामसूराश्चणकायवाः ॥ धन्वमांसरसालाजमंडस्तुशर्कराःसिता ॥ शतधौतघृतंदुग्धंनवनीतंपयोभवं ॥ कुष्मांडंकर्कटीमोचं
पनसंस्वादुदाडिमं ॥ पटोलंपर्पटीद्राक्षाधात्रीफलपरूषकं ॥ बिंबीतुंबीपयःपेटीखर्जूरंधान्यकंमिशी ॥ बालतालंप्रियालंचशृंगाटककसेरुकं ॥ म
धूकपुष्पंकदलीवेरंपथ्यानिक्तानिसर्वशः ॥ शीताःप्रदेहाभूवेश्मसेकाभ्यंगावगाहनं ॥ पद्मोत्पलदलक्षौमशय्याशीतलकाननं ॥ कथाविचित्रागी
तानिशिशवोमंजुभाषिताः ॥ उशीरचंदनालेपःशीतांशुशिशिरानिलः ॥ धारागृहप्रियास्पर्शप्रतीरंहिमवालुकां ॥ सुधांशुरश्मयःध्यानं
मरार्योमधुरोरसः ॥ यानियानिचरोक्तानिपित्तहारीणियानिच ॥ इतिदाहवतांनृणांपथ्यवर्गउदाहृतः ॥ विरुद्धान्यन्नपानानिक्रोधोवेगविधा
रणं ॥ गजाश्वयानमध्वानंक्षारपित्तकराणिच ॥ व्यायाममातपंतक्रंतांवूलंमधुरामठं ॥ व्यवायंकटुतिक्ताम्लंदाहवान्परिवर्जयेत् ॥ इतिदा
हेपथ्यापथ्यानि ॥ ॥ स्वेदोविरेकोवमनंचपूर्वकमात्मरुत्पित्तकफोत्तरेषुतनःपरंवस्तिविधिश्चनस्यंसेतर्जनंताडनमंजनंच ॥ आ
श्वासनंत्रासनवंधनानिभयानिदीनानिचघर्षणानि ॥ धूमोवधोविस्मरणाप्रदेहःशिराव्यधःसंशमनंचसेकः ॥ आश्चर्यकर्माणिच
धूमपानंधीधैर्यसत्वात्मनिवेदनानि ॥ अभ्यंजनंस्नापनमासनंचनिद्राशुशीतान्यनुलेपनानि ॥ गोधूममुद्गारुणशाल्यश्चधारोष्ण
दुग्धंशतधौतसर्पिः ॥ घृतंनवीनंचपुराणतनंचकूर्मामिषंधन्वरसारसाला ॥ पुराणकुष्मांडफलंपटोलंवास्तीदलंवास्तुकतंडुलीयं ॥ खरा

॥ रामः ॥
॥ ४१ ॥

श्वमूत्रंगगनंतुपथ्यासुवर्णरत्नानिचनारिकेलं ॥ द्राक्षाकपित्थमनसंचवैद्यैर्विधेयमुन्मादगदेसुपथ्यं ॥ कामशोकभयक्रोधहर्षव्या
मोहसंभवान् ॥ परस्परप्रतिद्वंद्वैरेभिरेवशमंनयेत् ॥ इष्टद्रव्यविनाशात्तुमनोयस्योपहन्यते ॥ तस्यतत्सदृशलाभेनशांतिव्याधिश्च जाय
ते ॥ देवर्षिपितृगंधर्वैरुन्मत्तस्यचबुद्धिमान् ॥ त्यजेच्चस्यांजनादीनितीक्ष्णानिक्रूरकर्मच ॥ पूजाबल्युपहारशांतिविषयोहोमेष्टमंत्रक्रि
यादानंस्वस्त्ययनंप्रणतादिनियमःसत्यंजपोमंगलं ॥ प्रायश्चित्तविधानमंजलिवधीरत्नौषधीधारणं ॥ देवब्राह्मणपूजनंशमयेदुन्मादमागं
तुकं ॥ भूतानामधिपस्यविश्वरूपतेर्गौरीपतेःपूजनेयेचस्युर्भुविग्रहकाश्चप्रमथास्तेषांसमाराधने ॥ मद्यंविरुद्धासनमुष्णभोजनं
निद्राक्षुधातृट्कृतवेगधारणं ॥ व्यायाममाषारुपटोलकंठिल्लकंशाकानिपत्रप्रभवानिसर्वशः ॥ तिक्तानितीक्ष्णानिमिषवस्तमा
दिशेदुन्मादरोगापहंतेषुगर्हितं ॥ इत्युन्मादेपथ्यापथ्यानि ॥ ॥ वस्तिर्वातात्तोऽन्नवपूर्वपैत्तिकेचविरेचनं ॥ वमनंश्लेष्मिके
चापिपरंधूपनमंजनं ॥ नस्यंशिराव्यधोदानंत्रासनंवधनंभयं ॥ तर्जनंताडनंहर्षोधूमपानंचविस्मयः ॥ धीधैर्यात्मादिविज्ञा
नेस्नानंमभ्यंजनानिच ॥ लोहितशालयोमुद्गागोधूमाप्रसन्नंहरिः ॥ कूर्मामिषंमुचरसादुग्धंब्राह्मीदलवचा ॥ पटोलंहृत्कूष्मांड
वास्तूकंस्वादुदाडिमं ॥ शोभांजनंपयस्त्येटीद्राक्षाधात्रीपरूपकं ॥ तैलंखराश्वगोमूत्रंगगनंतुहरीतकी ॥ अपस्मारगदेनृणांप
थ्यमेतदुदीरितं ॥ चिंताशोकभयंक्रोधमशुचीन्यरुणानिच ॥ मद्यंमत्स्यंविरुद्धान्नंतीक्ष्णोष्णंगुरुभोजनं ॥ अतिव्यवायमायासं

पूज्याव्यतिक्रमं ॥ पत्रशाकानि सर्वाणि विंवीमाषाढकंफलं ॥ तह्मानि द्राक्षा धावेमानपश्मारी नरस्त्यजेत् ॥ ~~इत्यपस्मारे पथ्यापथ्यानि~~ ॥
अभ्यंगोन्मर्दनं वस्तिस्नेहस्वेदावव्याहनं ॥ संवाहनं संशमनं प्राग्प्रवातविसर्जनं ॥ अग्निकर्मोपनाहश्च मृशय्यास्नानमासनं ॥ तैलद्रोणी
शिरोवस्तिः शमनं नस्यमातपं ॥ संतर्पणान्नं हर्णाचकिल्लाट दधिकूर्चिक ॥ सर्पिस्तैलवसामज्जा स्वाद्वम्ललवणा रसाः ॥ नवीनास्तिलगो
धूमामाषाः संवत्सरोषिताः ॥ शालयः षष्टिकाश्चापि कुलत्थानां रसाः सुराः ॥ ग्राम्यागोश्वतरोष्ट्राश्वरासभाछागलादयः ॥ आनूपाः कोल
महिषन्यंकुखड्गिजादयः ॥ औदकाहंसकादंवाचक्रमर्दवकादयः ॥ विलेशयाभेकगोधानकुलाश्वाविदादयः ॥ वटकेकुक्कुटोवर्हिति
त्तिरश्चेति जांगलाः ॥ शिधीभ्रःपर्वतोनक्रोगर्गरकवपिह्निशः ॥ एरराडश्चलुकीकूर्मशिशुमारस्तिमिंगिलः ॥ रोहितोमद्गुरः श्रृंगोव
र्सीवस्तुंडिशोफषः ॥ पटोलशिग्रुवार्त्ताकलशुनदाडिमद्वयं ॥ पक्कतालरसालम्बनलदत्रपरूषकं ॥ जंवीरं वदरं द्राक्षा नारंगोमधु
कजे ॥ प्रसारिणीगोक्षुरकः शुक्लाक्षीपारिभद्रकः ॥ पर्यासिवपयःपेटीफकुतैलंगवांजलं ॥ मत्स्यंडिकाचतांवूलं धान्याम्लानितिंतिडीफ
लं ॥ स्निग्धोष्णानि च भोज्यानि स्निग्धोष्णं चानुलेपनं ॥ विशेषाद्वमनं कार्यमाशयसमुपागमे ॥ पक्वाशयस्थे मांसस्थे तथा स्निग्धविरेचनं ॥
प्रत्याध्मानसंज्ञेषतिलेघनदीपनं ॥ अस्थिलावंतस्त्वविधिशुक्रस्थेक्षयजित्क्रिया ॥ त्वग्मांसासृक्शिराप्राप्ते हितं शोणितमोक्षणं ॥ य
थाश्रमं यथावस्थं यथावरणमेव च ॥ वातव्याधौ समुत्पन्ने पथ्यमेतन्नृणां भवेत् ॥ चिंताप्रजागरणवेगविधारणानि छर्दिश्रमानश

नवाश्चरक्ताः कलाया॥ नीवारकंगुश्यरवैणवकोरदूषश्यामाकतंतुकरविंदमुखानि यानि॥ धान्यानि तानि तृणजानि वराजमाषामुद्गा
मुद्गास्तडागगतटिनीसलिलं करीरं॥ जंबूकसेरुनलककमुकं मृणालं निष्पावबीजमपि तालफलास्थिमज्जा॥ शालूकतिंदुककटत्व
कं बालतालशिंबीवयस्त्वत्वमवशोकमुडुंबरं च॥ शीतांबुरासभययोपि विरुद्धमन्नं क्षारोपि शुष्कपललं क्षतजक्षतिश्च॥ क्षौद्रकषायक
टुतिक्तरसाव्यवायो हस्तिश्वयानमपि चंक्रमणं च वषहूा॥ आध्मानिलोर्दितवतोपि पूर्वविशेषान् स्नानं प्रदुष्टसलिलं द्विजघर्षणं च॥ नि:
शेषितश्च परिकीर्तित एव वर्गो नराणां समीरणामदेषुमुदं वदंते॥ इति वातरोगे पथ्यापथ्यानि॥ द्राक्षया त्रिफलया त्रिवृतादस्रंसनेन
रुधिरश्रुतिमिश्र॥ सर्पिषा च पथ्यासामितया च स्वादुना भवति पित्तनिहंति:॥ ऊर्ध्वगे वमनं पूर्वमधोगे तु विरेचनं॥ सर्वत्रा वासनेप
श्चान्निरूहश्चापि शालयः॥ यवगोधूममुद्गाश्च पुराणा जांगला रसा॥ जलानि तप्तशीतानि शर्करामधुसक्तवः॥ कर्कोटकंकारव
ल्लपटोलहिलमोचिका॥ वेत्राग्रबृहत्कूष्मांडं रंभापुष्पं च वास्तुकं॥ कापित्थं दाडिमं धात्री तिक्तानि सकलान्यपि॥ पानान्नानि सम
स्तानि कफपित्तहराणि च॥ अम्लपित्तामये नित्यं सेवितव्यानि मानवैः॥ वमिवेगं तिलान्माषाकुलत्थान्नैलभक्षणं॥ आविदुग्धं क्षुधा
न्याम्लं लवणाम्लकटूनि च॥ गुर्वन्नं दधिमद्यं च वर्जयेदम्लपित्तवान्॥ इत्यम्लपित्ते पथ्यापथ्यानि॥ ॥ छर्दिविरेचनं लेपो रुङ्
मोक्षो जीर्णशालयः॥ जांगलैरामिषैर्मुद्गैः कुलत्थैर्वा कृतो रसः॥ कर्कोटकं कारवेल्लं शिग्रुमूलं पटोलादिकाः॥ शालीवराकवेत्राग्र

दाडिमंत्रिफलामधुः॥कटुतैलंतप्तनीरंपित्तश्लेष्महराणिच॥कटुतिक्तकषायाणिसर्वाणितिगणाःसखाः॥ शीतपित्तोदर्दकोठरोगीणांस्या
द्यथामले॥क्षीरेक्षुनानाविधविकारमत्स्यौदकानूपभवाविषाणि॥नवीनमद्यंवमिवेगरोधप्राग्दक्षिणाशापवनोऽह्निनिद्रा स्ना
नविरुद्धाशनमातपश्चस्निग्धंतथाम्लंमधुरंव्यवाय॥गुर्वन्नपानानिचशीतपित्तकोठाययोदर्दवतांविषाणि॥ इतिशीतपित्तेपथ्यापथ्या
नि॥ ॥लंघनेनवमनेनयवान्नप्राशनेनशिशिरेश्चविरेकैः॥कटुफलानिकवलैःसहितानिरन्तरोमिशममेतिकफश्च॥इतिकफरो
गेपथ्यापथ्यानि॥ उत्तानेऽभ्यंजनेसेकःसोपनाहःप्रलेपनं॥ गंभीरस्नेहपानेचस्थापनंचविरेचनं॥सर्ववासृक्मोक्षंचजलौकःशृंगालांबुभिः
॥शतधौतघृताभ्यंगोमेषीदुग्धावसेचनं॥ यवषष्टीकनीवारकलमारुणशालयः॥गोधूमश्चणकाढक्यस्तुवर्यापिमकुष्टकाः॥
अजाजामहिषीणांचगवामपिपयांसिच॥ लावतित्तिरिवर्त्तीरताम्रचूडनिकंकटाः॥प्रतुदाणकदात्यूहकपोतवटकादयः॥पत्रेरो
कूष्माण्डसर्पिःश्यामाकपल्लवं॥पटोलंरुबुतैलंचमृद्वीकाश्वेतशर्कराः॥ नवनीतंसोमवल्लीकस्तूरीतिलचंदनं॥शिंशपागु
रुदेवाह्वासरलस्नेहमर्दनं॥तिक्तंचपथ्यमुद्दिष्टंवातरक्तगदेनृणां॥ दिवास्वप्नाग्निसंतापव्यायामातपमैथुनं॥माषाकुलत्था
निष्पावाःकलायाःक्षारसेवनं॥अंबुजानूपमांसानिविरूढानिदधीनिच॥ इक्षवोमूलकेमद्यंपिण्याकाम्लानिकांजिकं॥क
टूष्णगुर्वभिष्यंदिलवणानिचशाकवः॥एतानिवातरक्तेषुनप्रयुञ्ज्याद्भिषग्वरः॥ ॥इतिवातरक्तेपथ्यापथ्यानि॥ ॥

रूक्षः सर्वविधिः स्वेदः कोड्रवारक्तशालयः ॥ यवाः कुलत्थाः श्यामाकउद्दालश्चपुरातनः ॥ शोभांजनं कारवेल्लं पटोलं लशुनं दध्यं ॥
॥ सुनिषस्तं काकमाची वेत्राग्रानि वपट्टवं ॥ पत्तूरो वास्तूकं पथ्या वार्ताकं तप्तवारि च ॥ शंपाकशाकं पिहणकं तक्रारिष्टमधूनि च
॥ कटुतिक्तकषायाणि क्षारसेवा गवां जलं ॥ व्यायामश्च यथाशक्ति स्नानं चंक्रमणानि च ॥ स्वछंदे संतरणं प्रतिस्रोतो नदीषु
च ॥ श्लेष्मापहरणायच्च नवमारुतकोपनं ॥ एतत्पथ्यं समुद्दिष्टं मूरुस्तंभविकारिणां ॥ ॥ इत्यूरुस्तंभे पथ्यापथ्यानि ॥ ॥
रूक्षं स्वेदो लंघनं स्नेहपानं बस्तिर्लेपो रेचनं पाचवर्त्तिः ॥ अब्दोत्पन्ना शालयो यवकुलत्था जीर्णमद्यं जागराणां रसाश्च ॥ वातश्ले-
ष्मघ्नानि सर्वाणि तक्रं वर्षाभूश्चैरंडतैलं रसोनं ॥ पटोलं घनूरक कारवेल्लं वार्ताकं शिग्रूणि च तप्तनीरं ॥ मंदारगोकंटकवृद्धदा-
रु भल्लातकं गोजलमार्द्रकं च ॥ कटूनि तिक्तानि च दीपनानि स्युरामवातामयिनां हिताय ॥ दधिमत्स्यगुडक्षीरोपोदिकामाषपि-
ष्टकं ॥ दुष्टनीरं पूर्ववातं विरुद्धाध्यशनानि च ॥ असात्म्यं वेगरोधं च जागरं विषमाशनं ॥ वर्जयेदामवातार्त्तो गुर्वभिष्यंदिकानि
च ॥ ॥ इत्यामवाते पथ्यापथ्यानि ॥ ॥ छर्दि स्वेदो लंघनं पाचवर्त्ती वस्तिर्निद्रा रेचनं पाचनं च ॥ अब्दोत्पन्नाः शालयो वा-
र्यमंडस्तप्तक्षीरं जांगलानां रसाश्च पटोलं शोभांजनकारवेल्लं वार्ताकमाम्राणि पचेलिमानि ॥ द्राक्षाकपित्थं रुचकं पियालं
शालिश्च पत्राणि च वास्तुकानि ॥ सामुद्रसौवर्चलहिंगुविश्वविडं रसनाह्वा लशुनं लवंगं ॥ एरंडतैलं सुरभीजलं च नवनीतजं

वीररसेपिङ्कहं ॥ लघूनिवक्षाररजांसिचैनिवर्गोहितेशूलगदार्दितेभ्यः ॥ विरुद्धान्यन्नपानानिजागरंविषमाशनं ॥ रूक्षतिक्तकषायानिशी
तलानितरूणिच ॥ व्यायामंमैथुनंमद्यंवैदलंलवनंकटु ॥ वेगरोधंश्रुवंक्रोधंवर्जयेच्छूलवान्नरः ॥ ॥ ~~इतिशूलेपथ्यापथ्यानि~~ ॥
स्वेदस्नेहंविरेकाश्चवर्त्तयफलवर्त्तयः ॥ अभ्यंगाश्चयवाःसर्वेसुहृविराममन्नमारुतः ॥ शृंगवेरंमातुलुंगंयवक्षारोहरीतकी ॥ लवंग
रामठंद्राक्षागोमूत्रंलवणानिच ॥ अधोवातसमुत्थेनुस्नेहास्वेदोश्चवर्त्तयः ॥ बस्तयोन्नानपानानिसमीरणहराणिच ॥ पुनरीष
जेतथावस्तिःस्वेदोभ्यंगोवगाहनं ॥ फलवर्त्तिश्चपानानिविड्भेदीन्यशनानिच ॥ मूत्रवेगसमुत्थेत्रिविधिधंवस्तिकर्मच ॥ स्वेदोभ्यंगोव
गाहश्चसर्पिषाश्चावपीडनं ॥ आहारोत्थेतुहिक्काघ्नःकासजेकासजिद्विधिः ॥ क्षवजेस्वेदनंधूमोघृतंचोत्तरभक्तिकं ॥ क्षवप्रवर्त्त
नंनस्यमभ्यंगश्चोर्द्ध्वजत्रुके ॥ शीतान्नपानंतृष्णोत्थेभ्रमभंगेवातजिक्रिया ॥ निद्रावेगोत्थितेक्षीरस्वप्नसंवाहनानिच ॥ जृम्भोत्थे
स्निग्धमुष्णमल्पंलघुंचभोजनं ॥ वाष्पजेवाष्पसंमोक्षःस्वप्नोमद्यप्रियंकथा ॥ श्रमश्वाससमुत्थेत्रेविश्रामोवातहारिच ॥ शुक्रो
त्थेवस्तिरभ्यंगोवगाहश्चरराणयुधः ॥ शाल्योमदिराक्षीरंप्रियायौवनान्विता ॥ क्षुदुत्थेलघुनंधर्मोमुक्तप्रदुर्द्दनश्रमः ॥ रू
क्षाचवान्नपानानिविरेकोरक्तमोक्षणं ॥ इतिपथ्यमुदावर्त्तिनःप्रोक्तंमहर्षिभिः ॥ वमनंवेगरोधंचशिंबीधान्यानिकोद्रवाः
॥ नालीशाकंवशालूकंजांववंकर्कटीफलं ॥ पिण्याकमालकंसर्वंकरीरंपिष्टवैकृतं ॥ विष्टंभीनिविरुद्धानिकषायानित

रुगिव ॥ उदावर्त्तीप्रयत्नेनवर्जयेत्सततंनरः ॥ उदावर्त्तिहितंसर्व्वंपाचनंविषवैत्तथा ॥ आनाहेतुयथायोगंवर्जयेन्मतिमान्न
रः ॥ अपथ्यानिप्रदिष्टानियान्युदावर्त्तिनांपुरा ॥ आनाहार्त्तपरिहरेत्तानिसर्व्वाणियत्नतः ॥ इत्युदावर्त्तानाहरोगेः पथ्यापथ्यानि
॥ ॥ स्नेहस्वेदौविरेकश्चवस्तिवाहुशिराव्यधः ॥ लंघनंवर्त्तिरभ्यंगास्नेहःपक्वेतुपाटनं ॥ संवत्सरसमुत्पन्नाः कलमारक्त
शालयः ॥ खलकुलत्थयूषाश्चधन्वमांसरसःसुराः ॥ गवामजायाश्चपयोमधूलीकासपरूषकं ॥ खर्जूरंदाडिमंधात्रीनाग
रंचाम्लवेतसं ॥ नक्तमेरंडतैलंवलशुनंबालमूलकं ॥ धत्तूरोप्यालुकंशिग्रुयवक्षारोहरीतकी ॥ रामठंमातुलुंगंनत्रूषरासुर
भीजलं ॥ यदन्नंस्निग्धमुष्णंचवृंहरांलघुदीपनं ॥ वातानुलोमनंचैवतत्पथ्यंगुल्मिनांभवेत् माषादयःशिंविधान्येष्वकधान्येय
वादयः ॥ वातकारीणिसर्व्वाणिविरुद्धान्यशनानिच ॥ वल्लूरंमूलकंमत्स्यंमधुराणिफलानिच ॥ शुष्कंशाकंशिंविधान्यंवि
ष्टंभीनित्यरुगिव ॥ अधोवायुशकृन्मूत्रश्रमश्वासाश्रुधारणं ॥ वमनंजलपानंचगुल्मरोगीपरित्यजेत् ॥ ॥ इतिगुल्मरोगे
पथ्यापथ्यानि ॥ ॥ स्वेदोविरेकोवमनंचलंघनंवस्तिर्विलेपीचिररक्तशालयः ॥ मृगाद्विजांगलसंज्ञयान्वितायूषारसामु
द्गकुलत्थसंभवः ॥ रागाःखलाःकांवलिकाश्चखंडाभव्यंपटोलंकदलीफलान्यपि ॥ पुराणकूष्मांडरसालदाडिमंसपाकशा
कंनवमूलकान्यपि ॥ एरंडतैलंगगनांवुसैंधवंद्राक्षावनर्कंचपुरातनोगुडः ॥ शुंठीयवानीलशुनंहरीतकीकुष्ठंवकम्बुवरुह

स्समाईकं ॥ सौवीरसत्कं मधुवारुणीरसः कस्तूरिकाचंदनकं प्रपानः ॥ तांबूलमप्येषगुणाः संरवा भवेन्मर्त्यस्य हृद्रोगनिपीडितात्मनः ॥
तृट् छर्दिमूत्रानिलशुक्रकासोद्गारश्रमश्वासविजृम्भवेगान् ॥ सस्याड्रिविंध्याड्रिनदीजलानि मेषीयपोदुष्टजलं कषायं ॥ क्षारं मधू
कानिवदं न काष्ठरक्तं श्रुतिं हृद्गदवांस्त्यजेत् ॥ ॥ इति हृद्रोगे पथ्यापथ्यानि ॥ ॥ वातोद्भवेभ्यंगनिरूहवस्तिस्नेहावगाहोत्तरवस्ति
रेकाः ॥ पैत्तेवगाहः शिशिरः प्रदेहाः श्लेष्मादिभिर्वस्तिविधिर्विरेकः ॥ श्लेष्मोद्भवे स्वेदविरेकवांति क्षारायवान्नानि चतीक्ष्णमु
ष्णं ॥ त्रिदोषजेभ्यंगपुरःसराणि सर्वाण्यमूनि त्रिमलोदितानि ॥ शल्यघातोत्थिते मूत्रकृच्छ्रे वातकृच्छ्रहरी क्रिया ॥ लेहः शुक्रविवं
धोत्थे शिलाजतु समाक्षिकं ॥ स्वेदचूर्णक्रियाभ्यंजवस्तयः सुपुरीषजे ॥ अथो यथादोषमयं गणोपि पुराणनालोहितशालयश्च
तक्रं पयोदध्यपि गोप्रसूतं धन्वामिषं मुद्गरसं सिता च ॥ पुराणकूष्माण्डफलं पटोलं महाईकं गोक्षुरकः कुमारी गुर्वाकखर्जूरकनारि
केलेक्षुमाराणांच शिरांसि पथ्या ॥ तालास्थिमज्जा त्रपुसत्रुटिश्च शीतानि पानान्यशनानि चैव ॥ प्रनीरनीरं हिमवालुका च मित्रं नराणा
स्यामतिमूत्रकृच्छ्रे मद्यं श्रमं निधुवनं गजवाजियानं सर्वं विरुद्धमशनं विषमासनं च ॥ तांबूलमत्स्यलवणार्द्रकतैलभृष्टपिण्याक
हिंगुतिलसर्षपमूत्रवेगान् ॥ माषान्करीरमतितीक्ष्णविदाहिरूक्षमम्लप्रमेचनुजनः सतिमूत्रकृच्छ्रे ॥ ॥ इति मूत्रकृच्छ्रे पथ्या
पथ्यानि ॥ अभ्यंजनस्नेहविरेकवस्तिस्वेदावगाहोत्तरवस्तयश्च ॥ पुराणनालोहितशालयश्च मांसानि धन्वप्रभवानि मद्यं ॥ तक्रं

पयोदध्यपि माषयूषः पुराणकूष्मांडफलं पटोलं महार्द्रकं तालफलास्थिमज्जा हरीतकी कोमलनारिकेरं ॥ गुवाकखर्जूरकनारिके
लं तालकुमाराणामपि मस्तकानि ॥ यथामलं सर्वमिदं च मूत्राघातातुराणां हितमादिशंति ॥ विरुद्धान्नानि सर्वाणि व्यायाममार्गेशील
नं ॥ रूक्षं विदाहि विष्टंभि च वार्यं वेगधारणं ॥ करीरवमनं चापि मूत्राघाती विवर्जयेत् ॥ ॥ इति मूत्राघाते पथ्यापथ्यानि ॥ ॥
वस्तिर्विरेको वमनं च लंघनं स्वेदावगाहो पि च वारिसेवनं ॥ यवाः कुलत्थाश्च पुराणशालयो मद्यानि धन्वोद्भज संभवा रसाः ॥ पुराण
कूष्मांडफलानि तंडुलीगोकंटको वारुणशाकमार्द्रकं ॥ पाषाणभेदो यवशूकवैणवः स्थित्वा समाकर्षणमश्मनापि ॥ एतानि सर्वा
णि भवंति सर्वदाश्मरीरोगनिपीडितात्मनां ॥ मूत्रस्य शुक्रस्य च वेगमम्लं विष्टंभि रूक्षं गुरु चान्नपानं ॥ विरुद्धपानाशनमश्मरीवा
न्विवर्जयेत्संततमप्रमत्तः ॥ ॥ इत्यश्मर्यां पथ्यापथ्यानि ॥ ॥ प्राग्लंघनानि वमनानि विरेचनानि प्रोद्वर्त्तनानि शमनानि च दीपना
नि ॥ नीवारकं गुयववेणवकोरदूषश्यामाकतर्णकुलत्थविंदमकुष्टकाश्च ॥ गोधूमशालिकलयाश्चिरजाः कुलत्थाः मुद्गाटकीचणकपू
षरसास्तिलाश्च लाजापुरातनसुरामधुवाघमंडस्तकं च रासभजलं महिषीजलं च ॥ लाजाकपोतशशतित्तिरलाववर्हिकाश्चैण
वर्तकशुकादिकजांगलानि ॥ शोभांजनानि कुलकानि कटिल्लकानि कर्कोटकानि कटकानिववार्हतानि ॥ औदुंबराणि लशुनानि
नवीनमोचपत्तूरगोक्षुरकमूषकपर्णिशाके ॥ मंदारपत्रममृतात्रिफला कपित्थं जंबूकसेरुकमलोत्पलकंदवीजं खर्जूरलांगल

कतालनरुत्तमांगंव्योषंचतिंदुकफलंखदिरःकलिंगं ॥ तिक्तानिचापिसकलानिकषायकानिहस्त्यश्ववाहनमतिभ्रमणारविविध्
व्यायामहत्यपिगणोभवतिप्रकामंमित्रंप्रमेहगदपीडितमानवानां ॥ मूत्रवेगंधूमपानंस्वेदंशोणितमोक्षणं ॥ सुखासनंदिव
निद्रांनवान्नानिदधीनिच ॥ आनूपमांसनिष्पावंपिष्टान्नानिचमैथुनं ॥ सौवीरकंसुराशुक्तंतैलंक्षीरंगुडंघृतं ॥ तुंबीतालास्थि
मज्जान्नंविरुद्धान्यशनानिच ॥ कूष्मांडमिक्षुदंडंतुस्वाद्वम्ललवणानिच ॥ अभिष्यंदिचयत्तेनप्रमेहिपरिवर्जयेत् ॥ दधिमधु
घृतमद्यक्षीरमम्लंचहिंगुलवणालशुननिद्रासंगमंमद्यमांसं ॥ तिलसर्षपशुंठीनालिकेलोदकंचदहतिफलजकंदमेहिनां
शत्रुवर्गः ॥ ॥ इतिप्रमेहपथ्यापथ्यानि ॥ ॥ चिंताश्रमौजागरणंव्यवायःपोद्वर्त्तनंलंघनमातपश्च ॥ हस्त्यश्वयानंभ्रमणंवि
रेकंप्रछर्दनंवाप्यतर्पणंच ॥ पुराननीवैरावकोरदूषश्यामाकनीवारप्रियंगुजूर्णाः ॥ यवांकुलत्थाश्चणकामसूराम्मुद्गास्तुव
र्यस्तुमधूनिलाजाः ॥ कटूनितिक्तानिकषायकाणितक्रंसुराविगतमस्तुराच ॥ दग्धानिवार्त्ताकफलानि चापिफलत्रयंगु
ग्गुलरामठंच ॥ कटुत्रयंसर्षपतैलमेलारूक्षाणिसर्वाणिचसुरव्यतैलं ॥ पत्रोत्थशाकागुरुलेपनानिप्रतप्तनीराणिशिला
जतूनि ॥ एतानिवर्गाणिनिषेवितानिमेदोगदंसत्वरमाक्षिपंति ॥ स्नानंरसायनंशालिगोधूमान्सुनृपचितेविशेषाद्वमनं
क्रिया ॥ स्वभावस्थत्वमविछुमेदस्वीपरिवर्जयेत् ॥ ॥ इतिमेदसिपथ्यापथ्यानि ॥ ॥ विरेचनंलंघनमद्यसंभवांकुलत्थ

पुराणाः शालयो यवाः ॥ मृगद्विजा जांगलसंज्ञया विनाः पेयासुरा माक्षिक सिंधु माधवस्तक्रं रसोनो हरणात्रैलमार्द्रकं शालिवशा
कं कूलकं कटिल्लकं ॥ पुनर्नवा शिग्रुफलं हरीतकी तांबूलमेला यवशूकमायसं ॥ अजागवोष्ट्रीमहिषीपयोजलं लघूनि ती
व्राणि च दीपनानि ॥ वस्त्रेण संवेष्टनमग्निकर्म नाविषप्रयोगो त्रहितो यथायथं ॥ विशेषतः प्लीहसमुद्भवे पुनर्नवामेव वाहौ धम
निव्यधः परं ॥ वद्धाह्वये वोदकजे क्षतोत्थिते नाभेरधः शस्त्रविधिर्यथाविधिः ॥ समीरणोत्थे घृतपानमादितः साभ्यंजनं वाप्यनु
वासनं तथा ॥ यथामलं पथ्यगणो यमाश्रितः सर्वानराणां स्यादुदरामये सति ॥ स्नेहनं धूमपानं जलपानं शिराव्यधं ॥ छर्दियानं
दिवास्वप्नं व्यायाममपि पिष्टकैः कृतं ॥ औदकानूपमांसानि पत्रशाकानि तिलानपि ॥ उष्णानि च विदाहीनि लवणाम्लरसानि च ॥ म
हेन्द्रगिरिजातानां सरितां सलिलं च ॥ शिंबिधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च ॥ विष्टंभीनि विशेषाच्च स्वेदं विष्टंभसंभवे ॥ वर्जयेदु
दरव्याधौ वैद्यो रक्षंनिजं यशः ॥ ॥ इत्युदरे पथ्यापथ्यानि ॥ ॥ संशोधनं लेपनमस्रमोक्षस्वेदः प्रलेपः परिषेचनं च पुरातनाः शा
लियवाः कुलत्था मुद्गाः सगोधापि च शल्यकोपि ॥ भुजंगभुक्तित्तिरताम्रचूडलावादयो जांगलविहंगमाश्च ॥ कूर्मोपि मद्यं गोप्रपुराणस
र्पिस्तक्रं सुरा माक्षिकमासवं च ॥ निष्पावकारिल्लककरंकशिग्रुरसोनकर्कोटकबालमूलं ॥ सौवर्चलं गंजनकः पटोलं वेत्राग्रधात्रीफ
लमूलकानि ॥ पुनर्नवा चित्रकपारिभद्रश्रीपर्णिनिंबेक्षुरपल्लवानि ॥ एरंडतैलं कटुका हरिहरीतकी क्षारनिषेवनं च ॥ मद्यान्न

॥ सा॰प॰अ॰उ॥
॥ ८७॥

कंगुग्गुलुपायसंचकटूनितिक्तानिचदीपनानि ॥ मूत्राणिगोजामहिषीभवानिकस्तूरिकाचापिशिलाजतूनि ॥ पत्यांडुरोगेष्वपिवद्धि
कर्मप्रशस्तप्रदिष्टंचतदेवचात्र ॥ यथामलंपथ्यमिदंनिरुक्तंशोथामयसत्वरभक्तितन्नि ॥ ग्राम्यानूपंपिशितंलवणंशुष्कशाकंनवा
न्नंगौडंपिष्टंदधिसकृशरंनिर्जरंमद्यमम्लं ॥ धानावल्लूरमनशनमथोगुर्वसात्म्यंविदाही ॥ स्वप्नंरात्रौश्वथुगदवान्वर्जयेन्मैथुनं
वा ॥ ॥ इतिशोथेपथ्यापथ्यानि ॥ ॥ संशोधनंवस्तिसृग्विमोक्षःस्वेदःप्रलेपोरुणशालयश्च ॥ एरंडतैलंसुरभीजलंचवध
न्नामिषंशिग्रुफलंपटोलं ॥ पुनर्नवागोक्षुरकोग्निमन्थस्ताम्बूलपथ्यारसनारसोनं ॥ ताडीगतांगंजनकंमम्भनिकौमधूतैत
प्तजलंचतक्रम् ॥ यदामवातापहमग्निकारितदन्नपानेचसूराणरारां ॥ अर्द्धंतुवृद्धंक्षरणयोश्चदाहोवात्रासतोवाड्शिरा
वाधश्च ॥ यथाश्रुतेशस्त्रविधिश्चवर्गस्याद्वर्ष्मवृद्धामयिनांसुखाय ॥ आनूपमांसानिदधीनिमाषापिष्टान्नदुष्टान्नम
पोदकाच ॥ गुरूणिशुक्रोत्थितवेगरोधासर्वेधाहृद्धामयिनाममित्रा ॥ ॥ इतिवृद्धिरोगेपथ्यापथ्यानि ॥ ॥
छर्दिर्विरेचनंस्वेदोनस्यंधूमःशिराव्यधः ॥ अग्निकर्मक्षारयोगप्रलेपोलंघनानिच ॥ पुराणाघृतपानंचजीर्णालोहितशालयः
॥ यवामुद्गाःपटोलंचरक्तशिग्रुःकटिल्लकं ॥ शालिंचशाकंवेत्राग्रंरुक्षाणिचकटूनिच ॥ प्रदीपनानिसर्वाणिगुग्गुलुश्च
शिलाजतुः ॥ विशेषाद्गलगंडेषुच्छिद्याजिह्वातलेशिरे ॥ कर्यीदामनिबंधोर्द्धरेखातिस्रोगलांतराः ॥ गलगंडमालायाप

॥ रामः ॥
॥ ८७ ॥

ग्रंथ्यर्वुदरुजे ॥ यथादोषं यथावस्था पथ्यमेतत्प्रकीर्त्तितं ॥ दुग्धेक्षुविकृतिस्सर्वा मांसं चानूपसंभवं ॥ मिष्टान्नमम्लमधुरं गुर्वभिष्यंदकारि च ॥ गलगंडे गंडमालापचीग्रंथ्यर्वुदामयान् ॥ चिकित्सानगदंकारो यशोर्थी परिवर्जयेत् ॥ ॥ इति गलगंडगंडमालापचीग्रंथ्यर्वुदरोगे पथ्यापथ्यानि ॥ प्रछर्दनं लंघनमस्रमोक्षः स्वेदो विरेकः परिलेपनं च ॥ पुरातना षष्टिकशालयश्च यवाः कुलत्था लशुनं पटोलं ॥ वार्ताकभोजनकारवल्लशिग्रुनवं वा मूलकपोतिकिन एरंडतैलं सुरभीजलं च कटूनि तिक्तानि च दीपनानि ॥ गुल्फोपरिष्टाच्चतुरंगुले च नोत्तरे गुल्फतले च पित्ते ॥ अंगुष्ठमूले कफजे विशेषाच्छिराव्यधश्चापि यथाविधानं ॥ एतानि पथ्यानि भवंति पुंसां रोगे सति श्लीपदनामधेये ॥ पिष्टान्नदुग्धविकृतिं गुडमानूपमामिषं ॥ स्वादुरसं पारिपात्रसिंधुविंध्यनदीजले पिच्छिलं गुर्वभिष्यंदि श्लीपदी परिवर्जयेत् ॥ ॥ इति श्लीपदरोगे पथ्यापथ्यानि ॥ ॥ आमावस्थे रेचनं वलेपः स्वेदो स्रमोक्षणं ॥ जीर्णाः श्यामाककलमाः कुलत्था लशुनानि च ॥ रक्तशिग्रुश्च तिक्ताश्च कारवेल्लशिग्रुनन्नवाः ॥ श्रीपर्णी चित्रकं क्षौद्रं शोथोघ्नानि च सर्वशः ॥ पक्वावस्थे शस्त्रकर्म पुराणा रक्तशालयः ॥ घृतं तैलं जांगलरसो विलेपी धान्यनागरमाः ॥ शालीव शाकं कदलीपटोलं हिमवालुकाः ॥ चंदनं तप्रशीतां तु सर्वं चापि व्रणोदिता ॥ नराणां विद्रधिव्याधौ यथावस्थं यथामलं ॥ पथ्यान्येतानि सर्वाणि निर्दिष्टानि महर्षिभिः ॥ शोथिनां यान्यपथ्यानि व्रणिनामहितानि च ॥ चक्रमादामेव पथ्येव विद्रधौ वर्जयेन्नरः ॥ ॥

इति विद्रधिरोगे पथ्यापथ्यानि ॥ ॥ विम्लापनं रक्तमुक्तिरुपनाहो विपाटनं ॥ शोधनं रोपणं षट्कं पुराणा रक्तशालयः ॥ यवषष्टि-
कगो धूम्रा जांगला मृगपक्षिणः ॥ विलेपी जाजमेदुश्च कटुतैलं घृतं मधुः ॥ तैलमसूरतुवरीमुद्गयूषाश्च शार्कराः ॥ आषा-
ढफलवार्ताककर्कोटकपटोलकं ॥ निंबपत्रकारवेल्लं वेत्राग्रं बालमूलकं ॥ मुनिषसाकशालिंचतंडुलीयकवास्तुकं ॥ त्रि-
फलापनसं मोचं दाडिमं कटकाफलं ॥ जीवंती सैंधवं द्राक्षा स्वादुतिक्तकषायकाः ॥ समस्तमेतदन्नंच स्निग्धमुष्णं सद्वोत्तरं ॥
उशीरवालव्यजनं चंदनं तिललेपनं ॥ तत्र शीतांबु कर्पूरं विकृतापहृदिपरः ॥ एतत्पथ्यं नवे शोथे यथावस्थं यथाम-
लं ॥ व्रणोशोथो व्रणोसद्योव्रणो नाडीव्रणोपि च ॥ नवानि धान्यानि तिलाः कलाया मा— स्तथा कृशरान्नवांभः ॥ क्षीरेक्षु-
जातान्विविधान्विकारान्नम्लानि शाकानि च पत्रवंति ॥ आजांगलं मांसमसात्म्यमन्नं विदाहि विष्टंभि गुरूणि चापि ॥ क-
ट्वम्लशीतं सवराव्यवायमायासमुच्चैःपरिभाषणंच ॥ प्रियासमालोकनमह्नि निद्राप्रजागरं चंक्रमणं नितांतं ॥ यथास्थिति-
प्राम पुरोपरोपणंच नस्यानि तांबूलतुषोदकानि ॥ प्रचंडवातातपधूमवृष्टिरजोभयंक्रोधववि प्रहर्षान् ॥ शोकाविरुद्धाशनमं-
बुपानं तीक्ष्णोष्णरूक्षाणि विघट्टनंच ॥ कंडूयनं दंतनखादि नादं निरन्नभावं विषमोपचारं ॥ वैद्यंचिकित्सान्व्रणशो-
थरोगं व्रणंच सद्योव्रणमामयंच नाडीव्रणंचापि यशोभिलाषी विवर्जयेत्संततमप्रमत्तः ॥ इति शोथव्रणसद्योव्रणाम

पथ्यापथ्यानि ॥ ॥ शीतं तु वंदनं पंकं प्रदेहो वेधनक्रिया ॥ सालिप्रियंगुगोधूमामुद्गयूषमसूरयोः ॥ नवनीतं घृतं क्षौद्रं तै
लं मांसरसा मधुः ॥ पटोलं लशुनं शिग्रुपत्तूरो वालमूलकं ॥ द्राक्षाधात्रीवज्रवल्लीलाक्षा यच्चापि बृंहणं ॥ न सर्वे भिषजा नि
त्यं देयं भग्नाय जानता ॥ लवणं कटुकं क्षारमम्लं मैथुनमातपं ॥ व्यायामं च न सेवेत भग्नो रूक्षान्नमेव च ॥ इति भग्ने पथ्यापथ्या
नि ॥ ॥ आमे संशोधनं लेपो लंघनं रक्तमोक्षणं ॥ पक्वेछनः शस्त्रवह्निसारकर्म यथाविधि ॥ सर्वत्र शालयो मुद्गा विलेपी जां
गलो रसः ॥ पटोलं शिग्रु वेत्राग्रं पत्तूरो वालमूलकः ॥ तिलसर्षपयोस्तैलं तिक्तवर्गो घृतं मधुः ॥ एतत्पथ्यं नरैः सेव्यं य
थादोषं भगंदरः ॥ व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च ॥ संवत्सरं परिहरेदपि रूढव्रणो नरः ॥ ॥ इति भगंदरे पथ्या
पथ्यानि ॥ ॥ छर्दिर्विरेको ध्वजमध्यनाडिर्विधो जलोकयारिपातनं च ॥ सेको प्रलेपो यवशालयश्च धन्वामिषं तक्रर
सो घृतानि ॥ कटित्वकं शिग्रुफलं पटोलं शालिंव शाकं नवमूलकं च ॥ तिक्तं कषायं मधु कूपवारि तैलं च हन्यादुपदंशरोगं
॥ दिवानिद्रां मूत्रवेगं गुर्वन्नं मैथुनं गुडं ॥ व्यायाममम्लतक्रं च वर्जयेदुपदंशवान् ॥ इत्युपदंशे पथ्यापथ्यानि ॥ ॥
लेपो विरेकोसृङ्मोक्षो सर्पिःपानं च शालयः ॥ यवजांगलमांसानि मुद्गयूषकटित्वकं ॥ पटोलशिग्रुकर्कोटपत्तूरं वालमू
लकं ॥ वेत्राग्रमाषकफलं दाडिमं सैन्धवं वरा ॥ कूपोदकं गंधसारं कस्तूरि हिमवालुकं ॥ तिक्तकषायं तैलं च स्यात्पथ्यं शूक

॥सा·प·भ·उ॥
॥४९॥

दोषितां ॥ मद्यं देवं दिवानिद्रां व्यायामं मैथुनं गुडं ॥ विदाहितरुतक्रं च शुष्कं दोषामयी त्यजेत् ॥ ॥ इति मदरोगपथ्यापथ्यानि ॥
पक्षान्नपक्षाद्धं ई नानिमासा सान्ना साष्ठिरेवनं ॥ नस्यं च्यहान्हानामिषेके षष्टे स्नमोक्षणं ॥ सर्पिर्लेपश्शिरोभ्यङ्गयवगोधूमशालयः ॥
मुद्गाढकीमसूराश्च माक्षिके जांगलामिषे ॥ आषाढफलं वेत्राग्रपटोलं बृहतीफलं ॥ काकमाचीविंबपत्रं लशुनं हिलमोचिकाः ॥
पुनर्नवा मेषशृंगी वकमर्ददलानि च ॥ भल्लातकं पक्कतालखदिरश्चित्रकोवरः ॥ जातीफलं नगपुष्पं कुंकुमं पन्नतं हविः ॥
कोशातकी करंजी मातिलसर्षपनिवजं ॥ तैलमिंगुदजातं च लघून्यन्नानि यानि च ॥ स्नेहाः सारलादेवाह्वशिंशपागुरुसंभवाः
॥ मूत्राणि गोखरोष्ट्राणां महिषीजानि तानि च ॥ कस्तूरिगंधसारश्चेति कान्नि क्षारकर्म च ॥ यथादोषं समस्तानि पथ्यानेतानि कु-
ष्ठिना ॥ स्वेदं च वातवमिवेगमिक्षुं व्यायाममम्लं च तिलान्समाषान् ॥ नूपमांसदधिदुग्धमद्यगुडं च कुष्ठामयिनस्त्यजेयुः ॥ ॥
इति कुष्ठरोगपथ्यापथ्यानि ॥ विरेकोवमनं लेपोलंघनं रक्तमोक्षणं ॥ पुराणा यवगोधूमकंगुषष्टिकशालयः ॥ मुद्गामसू-
राश्चणा ॥ मुद्गामसूराश्चणा — वर्या जांगलोरसः ॥ नवनीतं घृतं द्राक्षा दाडिमं कारवेल्लकं ॥ वेत्राग्रं मूलकं धात्री खदिरो नागके-
शरं ॥ द्राक्षाशिरीषकर्पूरचंदनैर्निजलेपनं ॥ यथादोषं यथामिदं सेवितं वीन्नि सर्पिभिः ॥ व्यायाममहिशयनं मरं नप्रवातं क्रोधशु-
चं वमनं वेगविधारणं च ॥ गुर्वन्नपानमखिलं लशुनं कुलत्था माषाक्तिलानल्पकत्वमांसमजांगलं च ॥ स्वेदं विदाहि लवणानि क

॥रामः॥
॥४९॥

ह्निमयंनार्कप्रभामपिविसर्पगदीभजेत ॥ ॥ इतिविसर्परोगेपथ्यापथ्यानि ॥ विरेचनंछर्दनलेपलेपनंपुरातनाःषष्टिकशालयो
यवाः ॥ मुद्गामसूराश्चणकाकुलत्थाधन्वामिषंगव्यघृतंकटिल्लकं ॥ वेत्राग्रमाषारुफलंपटोलंकंज्योतिष्मतीनिंबदलंचचंदनं
॥ तैलंसिताभ्रस्तिलतलेपनंघृतंवालंचविस्फोटगदंविनाशयेत् ॥ स्वेदंव्यवायंव्यायामंक्रोधगुर्वन्नमातपं ॥ वमिवेगंपत्रशाकंप्रवातं
स्वपनंदिवा ॥ ग्राम्योदकानूपमांसंविरुद्धान्यशनानिच ॥ तिलान्माषान्कुलत्थांश्चलवणाम्लकटूनिच ॥ विदाहिरूक्षमुष्णंचविस्फो
टीपरिवर्जयेत् ॥ ॥ इतिविस्फोटेपथ्यापथ्यानि ॥ ॥ पूर्वंलंघनवांतिरेचनशिरोवेधाःशशांकोज्ज्वलाजीर्णाःषष्टिकशालयो
पिवणकाद्गन्नमसूरादयः ॥ सर्वेपित्तहराःकपोतवटकायेप्रदाम्लरुकाजीवंजीवकादयोपिकुलकंकाटिल्लकंवालुकं ॥ क
र्कोटकदलंचशिग्रुवरुकंद्राक्षाफलंदाडिमंमध्वेक्षुरसामत्रपानमखिलंकोलानिमाषोरसः ॥ अक्ष्णोःसेकविधौगवेधुमधुकोद्भूतं
चशीतोदकंशंखकोदरकोषनीरमपिवाकर्पूरस्वरागामिच ॥ पक्केभ्रजरसोपिजांगलरसःशालिंचशाकंघृतंधूमोगोमयभस्मगुंड
नमथोशेषव्रणोक्ताक्रिया ॥ इत्थंसर्वदशाविभागनिहितंपथ्यंयथादोषतःसंयुक्तेषुदमातनोतिनितरांनॄणांमसूरीगदे वां
तंस्वेदंश्रमंतैलंगुर्वन्नंक्रोधमातपं ॥ कट्वम्लवेगरोधंचमसूरगदवांस्त्यजेत् ॥ इतिमसूरीरोगेपथ्यापथ्यानि ॥ ॥ क्षुद्ररोगेषु
सर्वेषुनानारोगापकारिषु । दोषान्दृष्ट्वामसाध्यांश्चनिरीक्ष्यमतिमान्भिषक् ॥ तस्यतस्यचरोगस्यपथ्यापथ्यानिसर्वशः ॥ य

थावस्थं च यथादोषं यथा हृष्टं च कल्पयेत् ॥ ॥ इति शुक्ररोगे पथ्यापथ्यानि ॥ ॥ यत्पथ्यं यदपथ्यं च रक्तपित्तेषु कीर्त्तितः ॥ प्रदरेपि यथादोषेन तन्नारी भजेत्त्यजेत् ॥ वातव्याधिमतां पथ्यमपथ्यं च यदीरितं ॥ योनिव्यापत्सु सर्वासु तत्तद्दीजाद्यथामलं ॥ शालयः षष्टिका मुद्गा गोधूमा लाजसक्तवः ॥ नवनीतं घृतं क्षीरं रसाला मधुशर्कराः ॥ पनसं कदली धात्री द्राक्षाम्लं स्वादु शीतलं ॥ चन्द्रिका स्नानमभ्यंगो मृदुशय्या हिमानिलः ॥ संतर्पणं प्रिया वाचो विहाराश्च मनोरमाः ॥ प्रियंकरं चान्नपानं गर्भिणीनां सदा हितं ॥ स्वेदनं वमनं क्षारं कलहं विषनाशनं ॥ असात्म्यं नक्तसंचारं वीर्यमप्रियदर्शनं ॥ अतिव्यवायमायासं भारं प्रावरणं गुरुः ॥ अकालजागरं स्वप्नं कटिमात्यशनानि च ॥ शाकक्रोधभयोद्वेगवेगश्रद्धाविधारणं ॥ उपवासाध्वतीक्ष्णोष्णगुरुविष्टंभिभोजनं ॥ रक्तं निवसनं श्वभ्रं वस्तिमामासतोष्टमान् ॥ एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा ॥ त्यजेत्त्रिदोषं वतिक्ताम्लपटूषणकषायकं ॥ वातले श्चभवेद्गर्भः कुब्जान्धजडवामनः ॥ पित्तलैः खलतिः पिंगः श्वित्रपंडुः कफात्मकः ॥ अपथ्यमिदमादिष्टं गर्भिणीनां महर्षिभिः ॥ सूतिकायाश्च रोगेषु वातश्लेष्मोद्भवेषु च ॥ तत्ररोगे तत्कृते तत्पथ्यापथ्यानि दर्शयेत् ॥ ॥ इति स्त्रीरोगे पथ्यापथ्यानि ॥ ॥ यत्पथ्यं यदपथ्यं च नृणामुक्तं ज्वरादिषु ॥ तत्तद्विधेयामौचित्याद्बालानां तेषु जानता ॥ पूर्वं पथ्यमपथ्यं च मदाग्नो यत्प्रकीर्त्तितः ॥ औवत्यात्रि भवेयातां बालानां यदि गर्भिकं ॥ आगंतून्मादिनां पथ्यमपथ्यं च यदीरितं ॥ ओचित्याद्योजयेत्तत्र बालेषु ग्रहरोगिषु ॥ ॥ इति बालरोगे पथ्यापथ्यानि ॥ ॥

ग्रहग्रहदिनेवस्नानपिवहोमपूजाविधिंभिषक्तुविदधीतयच्चपललाज्यवादीप्सितं तदीयमखिलंसमर्प्यचिराद्विमोमोचयेदथप्रम
थभूतनाथपरिचर्ययाशेषतः॥ ॥इतिबालग्रहेपथ्यापथ्यानि॥ ॥स्वेदोविरेकोवमनंगण्डूषप्रतिसारणं॥ कवलोसृक्स्रुतिर्नस्यं
धूमशस्त्राग्निकर्मणां॥ तृणधान्ययवामुद्गाः कुलत्थाजांगलोरसः॥ वृहत्यौष्ट्रीकारवेल्लंपटोलबालमूलकं॥ कर्पूरनीरंताम्बूलं
तप्तांबुखदिरोघृतं॥ कटुतिक्तश्चवर्गोयंहितस्यान्मुखरोगिणां॥ दंतकाष्ठंस्नानमम्लंमत्स्यमानूपयामिषं॥ दधिक्षीरंगुडंमाषंरू
क्षान्नंकठिनाशनं॥ अधोमुखेनशयनंगुर्वभिष्यंदिकारिच॥ मुखरोगेषुसर्वेषुदिवानिद्रांचवर्जयेत्॥ ॥इतिमुखरोगेपथ्याप
थ्यानि॥ स्वेदोविरेकोवमनंनस्यंधूमंशिराव्यधः॥ गोधूमशालयोमुद्गायवाश्चप्रतनंहविः॥ लावोमयूरोहरिणस्तित्तिरिर्वनकुक्कुटः
॥पटोलंशिग्रुवार्त्ताकुनिम्बस्सकठिल्लकं॥ रसायनंचसकर्मब्रह्मचर्यमभाषणं॥ उपकुक्ष्यथादोषमिदंकर्णामयेहितं॥ दंतकाष्ठ
शिरस्नानंव्यायामंश्लेष्मलंतगुरु॥ कंडूयनंतुषारंचकर्णरोगीपरित्यजेत्॥ ॥इतिकर्णरोगेपथ्यापथ्यानि॥ स्थितिर्निर्वातनि
लयेकोमलोष्णीषधारणं॥ गंडूषोलंघनंनस्यंधूमंछर्दिःशिराव्यधः॥ स्वेदःस्नेहस्तथाभ्यंगःपुराणायवशालयः॥ कुलत्थमुद्गयोर्यू
षग्राम्यजांगलजारसाः॥ वार्ताककुलकंशिग्रुकर्कोटंबालमूलकं॥ लशुनंदधितप्तांबुवारुणीचकटुत्रयं॥ कट्वम्ललवणंस्निग्ध
मुष्णंचकटुभोजनं॥ नासारोगेपीनसादौसेव्यमेतद्यथामलं॥ स्नानंक्रोधंशकृन्मूत्रवाष्पवेगान्शुचंद्रवं॥ भूशय्यांवर्जयेत्तेननासा

॥सा॰प॰अउ॥
॥५१॥

रोगेपरित्यजेत् ॥ ॥इतिनासारोगेपथ्यापथ्यानि ॥ ॥आश्चोतनंलंघनमंजनंचस्वेदोविरेकप्रतिसारणंच ॥प्रपूरणंनस्यमसृग्विमोक्षःशि
राक्रियालेपनभोज्यपानं ॥ सेकोमनोनिर्वृतिरंघ्रिपूजांमुद्गायवालोहितशाल्यश्च ॥ कोमहविर्वन्यकुलत्थयूषःपेयाविलेपीलशुनंपटो
लं ॥ वार्ताककर्कोटककारवेल्लंनवीनमोचंनवमूलकंच ॥पुनर्नवामार्कवकाकमाचीपत्तूरशाकानिकुमारिकाच ॥द्राक्षाथकुस्तुंबुरु
मासिमंथलोध्रंवाक्षौद्रमुपानेहौच ॥नारीपयश्चंदनमिक्षुखंडंतिक्तानिसर्वाणिलघूनिचापि ॥विजानतापथ्यमिदंप्रयुक्तंयथाम
लंवाक्षिगदान्निहंति ॥क्रोधंशुचंमैथुनमश्रुवाष्पविरामूत्रनिद्रावमिवेगरोधान् ॥सूक्ष्मेक्षणादंतविघर्षणंचस्त्रानंनिशाभोजनमातपं
च ॥प्रजल्पनंछर्दनमंबुपानंमधूकपिण्याकदधिपत्रशाकं ॥कालिंगपिरापाकविरूढकानिमत्स्यान्सुरामांसमजांगलंच ॥तांबूलमम्लंलव
णंविदाहीतीक्ष्णंकटूष्णंगुरुचान्नपानं ॥नरोनसेवेतहिताभिलाषीसर्वेषुरोगेषुदृगामयेषु ॥ ॥इतिनेत्ररोगेपथ्यापथ्यानि ॥ ॥
स्वेदोनस्यंधूमपानंविरेकोलेपश्छर्दिलंघनंशीर्षवस्ति ॥रक्तमोक्षोग्निकर्मोपनाहोजीर्णसर्पिःशालयःषष्टिकाच ॥यूषोदुग्धंधया
संपटोलंशिग्रुद्राक्षावास्तुकंकारवेल्लं ॥आम्रंधात्रीदाडिमंमातुलुंगंतैलंतक्रंकांजिकंनारिकेलं ॥पथ्यंकुष्टंभृंगराजंकुमारीमुस्ता
शीरंचंद्रिकागंधसारं ॥कर्पूरंचख्यातमानेषवर्गःसेव्योमर्त्यैःशीर्षरोगेयथास्वं ॥क्षवजृंभामूत्रवाष्पनिद्राविड्वेगमंजनं ॥दुष्टनीरंविरुद्धान्नं
विरुद्धजलमंजनं ॥दंतकाष्ठंदिवानिद्राशिरोरोगीपरित्यजेत् ॥ ॥इतिशिरोरोगेपथ्यापथ्यानि ॥ ॥अरिष्टवधनंमंत्रक्रियाछर्दि

॥राम॥
॥५१॥

विरेचनं ॥ जागरःशोणितस्रुतिःपरिसेकोवगाहनं ॥ हृदयावरणंनस्यमंजनप्रतिसारणं ॥ उद्वर्त्तनंप्रधमनंलेपोवह्निककर्मच ॥ उपधा
नंप्रतिविषंधूपःसंज्ञाप्रबोधनं ॥ शालयःषष्ठिकाश्चापिकोरदूषाःप्रियंगवाः ॥ मुद्गाहरेणवस्तैलसर्पिश्चापिनवंक्वचित् ॥ शिखितित्ति
रलावेणगोधाखुश्वाविदामिषं ॥ वार्त्ताककुलकंधात्रीनिष्पावतंडुलीयकं ॥ मंडूकपर्णीजीवंतिसुनिषण्णकमुपोदिका ॥ कालशाकं
सलशुनंदाडिमंचविकंकतं ॥ प्राचीनामलकंपथ्याकपित्थंनागकेशरं ॥ गोछागनरमूत्राणिनक्तंशीतांबुशर्कराः ॥ अविदाहिनि
चान्नानिसेन्धवंमधुकुंकुमं ॥ पश्चिमोत्तरवाताश्चहरिद्रासितचंदनं ॥ मुस्तोशीरककस्तूरीतिक्तानिमधुराणिच ॥ हेमचूर्णानिच
गीयंयथावस्थंयथाविधिः ॥ विषरोगेषुसर्वेषुप्रयोक्तव्याविजानता ॥ क्रोधंविरुद्धाशनंचव्यवायंतांबूलमायासमपिप्रवातं ॥ अम्ल
चसर्वलवणंसर्वंस्वेदंचनानाविधमातपानि ॥ निद्राभयंधूमकटुप्रधानंविषातुरोनैवलभेतकदाचित् ॥ ॥ इतिविषरोगेपथ्याप
थ्यानि ॥ ॥ यज्जराव्याधिविध्वंसिवयसःस्तंभकृद्यथा ॥ चक्षुष्यंबृंहणंवृष्यमन्नपानादिकंहितं ॥ ॥ इतिरसायनेपथ्यापथ्या
नि ॥ ॥ भोजनानिविचित्राणिपानानिविविधानिच ॥ वाचश्श्रोत्राभिरामाश्चत्वक्स्पर्शसुखास्तथा ॥ यामिनीसेंदुतिलकाकामिनीन
वयौवना ॥ गीतंश्रोत्रमनोहारितांबूलंमधुरस्रजः ॥ गंधामनोज्ञारूपाणिचित्राण्युपवनानिच ॥ मनसःप्रीतिदानाद्यावाजीकुर्वंतिमा
नवं ॥ ॥ इतिवाजीकरणेपथ्यापथ्यानि ॥ ॥ इतिश्रीविश्वनाथकृतेसात्मदर्पणेपथ्यापथ्यविधिःकथनाध्यायःअष्टमः ॥ ॥

अथघृततैलविधिः ॥ कल्काच्चतुर्ग्गुणीकृत्यघृतंवातैलमेववा ॥ चतुर्ग्गुणेद्रवेसाध्यंतस्यमात्रापलोन्मिता ॥ निक्षिप्यक्वाथयेत्तोयंक्वा
थ्यद्रव्याच्चतुर्ग्गुणं ॥ पादशिष्टंगृहीत्वाचस्नेहंतेनैवसाधयेत् ॥ चतुर्ग्गुणोमृदुद्रव्येकटिनेष्टगुणंजलं ॥ तथाचमध्यमद्रव्येदद्यादष्ट
गुणंपयः ॥ अत्यंतकथिनेद्रव्येनीरंरसैर्यत्रपृथक्स्नेहस्यसाधनं ॥ कल्कस्यांशंतत्रदद्याच्चतुर्थषष्टमष्टमं ॥ दुग्धेदधिरसेतक्रेक
ल्कोदेयोष्टमांशिकः ॥ कल्कस्यसम्यक्पाकार्थंतोयमत्रचतुर्ग्गुणं ॥ द्रव्याणियत्रस्नेहेषुपंचादीनिभवंतिहि ॥ तत्रस्नेहसमान्या
हुयथापूर्वंचतुर्ग्गुणं ॥ द्रवेणकेवलेनैवस्नेहपाकोभवेद्यदि ॥ तत्राम्बुपिष्टःकल्कस्याजलवात्रचतुर्ग्गुणं ॥ क्वाथेनकेवलेनैवपा
कोयत्रेरितिक्वचित् ॥ क्वाथ्यद्रव्यस्यकल्कोपितत्रस्नेहंप्रयोजयेत् ॥ कल्कहीनस्तुयस्नेहोनसाध्यकेवलेद्रवेपुष्पकल्कस्तुयःस्ने
हस्तत्रतोयंचतुर्ग्गुणं ॥ स्नेहात्स्नेहाष्टमांशश्चपुष्पकल्कप्रयुज्यते ॥ अकल्कयोगंद्रव्याणांकथितानांविचारतः ॥ क्वाथंविधा
यतेन्येषांकल्कस्वभिषग्मतः ॥ तत्राविविधिः ॥ आदौसंचारयेत्क्वाथंपश्चात्कल्कंततःपयः ॥ ततोन्यःसुरभिद्रव्यैर्वासयेत्स्नेहविधौ
क्रमात् ॥ क्षीरंस्नेहसमंदद्यात्तक्रेस्नेहसंविधौ ॥ शुक्तद्रवंसारसंसृक्तंसौवीरकादिकं ॥ स्नेहादष्टगुणंदेयंजलंवद्विगुणंभवेत्
॥अर्द्धावशिष्टःकर्त्तव्यःपाकोगंधांबुनामतः ॥ चंद्रकस्तूरिकादीनांसहस्रांशंप्रयोजयेत् ॥ पुष्पाणांगंधनिर्यासःसिद्धशीते
ऽवतारिते ॥ द्रव्याणियत्रस्नेहेषुपंचादीनिभवंतिहि ॥ तत्रस्नेहसमान्याहुयथापूर्वंचतुर्ग्गुणं ॥ वर्त्तिवत्स्नेहकल्कःस्याद्यदांगु

त्याविवर्जितः॥ शब्दहीनोग्निनिक्षिप्तः स्नेहः सिद्धो भवेत्तदा॥ यदाफेनोक्रमस्तेलेफेनशांतिश्च सर्पिषि॥ वर्णगंधरसोत्पत्तिः स्नेहसि
द्धिस्तदाभवेत्॥ ॥अथ घृततैलपाकविधिः॥ कल्कपल १ स्नेहपल ४ द्रवपलपट्सामान्या।१॥ क्वाथद्रव्यपल १६ जलपल ६४ शेष
पल १६ कल्कपल ४॥ मृदुद्रव्यपल १६ जलपल ६४ शेषपल १६॥ मध्यद्रव्यपल १६ जलपल ९६ शेषपल १६ कठिनेद्रव्यपल १६ जल १
२८ शेषपल १६ अत्यंतकठिनेद्रव्यपल १६ जलपल ४५ शेषपल १६॥ पुनःप्रकारांतरमाह॥ द्रव्यपल ३ जलपल २४ शेष ३। द्रव्यकुड
व १ जलपल ३२ शेष ४। द्रव्यप्रस्थ १ जल ४ शेष १ मानभेदः॥ ॥अथ कल्कभेदः॥ यत्रस्नेहे क्वाथः रसः तत्र कल्के स्नेहस्य षष्ठांशः
यत्रस्नेह क्वाथ रस· क्षीर· दधि· रक्ति तत्र· कल्क अष्ट· मांस सएव पृथ्य कल्कश्च यत्रस्नेहे रसादिनी पंच भवंति तत्रस्नेहसमानि
देयानि तत्रापि कल्काष्टमांसा तत्रविधिः॥ आदौ क्वाथं पुनः कल्कं ततः पयोदध्यादिभिः॥ ततः सुगंधद्रव्याणि तु स्नेहे कर्पूरशतां
शः कस्तूरिसहस्रांशं योजयेत्॥ सिद्धिलक्षणं तु कल्कः कठिनता कल्क· स्यावर्तित्वं कल्कमग्नौ क्षिप्तशब्दराहित्यं वर्णगंधरसो
त्पत्तित्व घृते फेननाशस्तैले फेनोक्रमं च॥ स्नेहपाकस्त्रिधाप्रोक्तो मृदुर्मध्यः खरस्तथा॥ ईषत्सरकल्कस्तु स्नेहपाको मृदुर्भवेत्॥
मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले॥ ईषत्कठिनकल्कश्च स्नेहपाको भवेत्खरः॥ तदूर्ध्वं दग्धपाकस्याद्दाहकृन्निःप्रयो
जनः॥ आमपाकश्च निर्वीर्यो वह्निमांद्यकरो गुरुः॥ स्नेहपाकस्त्रिधा मृदुःपाकः १ मध्यपाकः २ खरपाकः ३॥ तत्पाकलक्षणानि॥ ईषत्स

रककल्क १ मृदुपाकः॥ नीरसकल्कःकोमलश्च २ मध्यमा॥ दृषत्कठिनकल्कश्च खरपाक ३। दग्धपाकःआमपाकश्चनहितः॥ नस्यार्थेस्
स्यान्मृदुःपाकोमध्यमःसर्वकर्मसु॥ अभ्यंगार्थेखरःप्रोक्तोयुंज्यादेवंयथोचितः॥ घृततैलगुडादिंश्चसाधयेन्नैकवासरे॥ प्रकु
र्वन्त्युषितास्तेतेविशेषाद्गुणासंचयं॥ ज्वराःकषायैर्वमनैर्लंघनैर्लघुभोजनैः॥ रूक्षस्यपेयनशाम्यंतिसर्पिस्तेषांभिषग्मतं॥ तद्यथा
॥ कोलाग्निमंथत्रिफलाक्काथेदध्नाम्लंतंघृतंमित्वकावापयेत्तद्वि षमज्वरनाशनः॥ तिल्वकघृतं॥ पटोलपिचुमंदौ
वत्रायमाणानिदिग्धिका॥ कणावृत्तापर्पटकंत्रिफलाकटुरोहिणीकुटजंपिप्पलीमलगडूचीसशतावरी॥ द्विपलांशंजले
द्रोणेसाधयेत्पादशेषितः॥ पिप्पल्यामधुकंद्राक्षाजीवकर्षभकौभौ॥ नीलोत्पलंचामलकंपद्मकंपद्मकेशरं॥ अनेनगर्भेणा
भिषक्कषायेसाधयेद्घृतं॥ महातिक्तमितिख्यातंसर्पिरेतज्ज्वरापहं॥ विषमज्वरपांडुशीविसर्पार्शांसिनाशनं॥ ॥
महातिक्तकंघृतं॥ चंदनेनचित्रकंसिंहीकुसकंमुस्तनागरैः॥ कटुकात्रायमाणाचधात्रीस्पृक्क्षिसारिवे॥ द्व्यांशिपलमा
णिसोम्यवारेषुसंहरेत्॥ क्षीराढकसमायुक्तोसर्पिषोर्द्धनल्वापचेत्॥ चातुर्थकंहरेत्सर्वान्नानाविषमज्वरान्॥ आह्निकंश्वास
कासौचसर्वापस्मारभेषजे॥ चंदनाद्यंघृतं॥ विडंगमुस्तात्रिफलामंजिष्ठादाडिमोत्पलैः॥ शणमैत्वबालुकैलाभिश्चंदनामर
दारुभिः॥ बर्हिष्ठकुष्ठरजनीपर्णिनीसारिवाद्वयैः॥ हरेणुत्रिवृतादंतीवचातालीसपत्रकैः॥ त्रिवृद्विशालाबृहतीमालतीप

हिमपर्णिभिः॥ एतैश्चकार्षिकैःकल्कैःकल्कैर्घृतप्रस्थविपाचयेत्॥ जलंचतुर्गुणंदद्यात्मालतीकुसुमैःसह॥ जलेकल्याणकोना
मसर्पिर्दृष्टंत्रिदोषनुत्॥ अपस्मारेज्वरेकासेशोषेमंदानलेक्षये॥ वातरक्तेप्रतिश्यायेतृतीयकचतुर्थके॥ छर्द्यर्शोमूत्रकृच्छ्रेच
विसर्पोपहतेषुच॥ कंड्वांपांड्वामयोन्मादेविषमेहगरेषुच॥ भूतोपहतचित्तानांगद्गदानामचेतसां॥ शस्तंस्त्रीणांचवंध्यानांधन्य
मायुर्बलप्रदं॥ अलक्ष्मीपापरक्षोघ्नंसर्वग्रहनिवारणं॥ पानीयकल्याणकंघृतं॥ ॥ पानीयकल्याणघृतंद्रव्यसहितंजीव
नीयगणसहितंचपुनःदशमूलक्वाथसहितश्चजीवनीयगणसहितश्चजीवनीयगणसहितःपुनर्दशजीवपसहितश्च॥
।॥ पुनःकंकोल्यादिगणसहितश्च॥७॥ द्विजलेसचतुःक्षीरंतस्मात्कल्याणकेत्विदं॥ ॥क्षीरकल्याणं॥ अष्टवर्ग
सयष्टीकेजीवंतीमुद्गपर्णिका॥ माषपर्णीगणोयंतुजीवनीयगणस्मृतः॥ जीवकर्षभकौमेदकाकोल्यौचप्रयोजितः॥ स
र्पपर्णीचजीवनीमधुकेचेत्ययंगणः॥ एतदेवहविःपक्वंजीवनीयोपसंभृतं॥ द्विपंचमूलक्वाथेनशत्तवर्णरसेनच॥ चतु
र्गुणेनपयसाद्विगुणेनजलेनच॥ महाकल्याणकंनामसर्पिरुक्तंत्रिदोषजित्॥ अपस्मारज्वरान्शोषंक्लैब्यकार्श्यमवीर्यतां
॥ घृतमेतन्निहन्त्याशुयेचापिविषमज्वराः॥ जीवनीयगणत्वेनकाकोल्यादिगणग्रहः॥ महाकल्याणकेकार्योघृतेतुद
शवार्गिकः॥ काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमेदामहाछिन्नरुहाकर्कटशृंगीतुगाक्षीरीपद्मकप्रपौंडरीकऋ

॥ सा·घ·उ· ॥
॥ ५४ ॥

ऋद्धी काजीवत्यामधुकं चेति ॥ काकोल्यादिरयं गणो विख्यात ॥ सर्वसंमिश्य पक्वाघृतं च ॥ महाकल्याणकं घृतं ॥ ॥ शुंठीकणाचि
त्रकं चव्यं ग्रंथिकमेव च ॥ कर्षांश्च पलं भागान् एकैकस्य तु बुद्धिमान् ॥ जलद्रोणे विपक्तव्यं यावत्पादावशेषितं ॥ एतैस्तु पा
लिकैः कल्कैः सैंधवेन समन्वितैः ॥ षट्पलं नाम विख्यातं विषमज्वरनाशनं ॥ कासश्वासाग्निदौर्बल्यप्रतिश्यायत्वमेव च ॥ लीहो
द्वातश्च पथ्यं पांडुरोगांश्च नाशयेत् ॥ षट्पलं घृतं ॥ नागरं चविकाक्षारपिप्पलीमूलचित्रकैः ॥ कर्षांश्च पलिकान् भागान् घृत
प्रस्थं विपाचयेत् ॥ शृंगवेररसप्रस्थमस्तुप्रस्थं तथैव च ॥ अम्लतप्राक षट्पलनाम घृतंममतं ॥ एकाहिकं द्याहिकं च त्र्या
हिकं च चतुर्थकं ॥ एतान्सर्वान् ज्वरान् हन्ति स्थूलं चक्रकृतं भृशं ॥ उदरीम श्वासकासप्रबलबलाग्निवर्द्धनं ॥ अम्लतषट्पलं
घृतं ॥ पृतिकाग्निकपंचकोलरुचकैः साजाजीः सुगमोद्भिदैः सक्षारैः सविडैः सहितउद्रक्षासिंधूद्भवैः कल्कितैः ॥ शुक्तैर्नाडि
कसंभवेन च रसैनैतन्महाषट्पलं सर्पिः पक्वमरीचकाग्निसदनं प्लीहज्वरश्वासजित् पूतीककरंजः ॥ ॥ इति महाषट्पलं घृ
तं ॥ पृतिकाग्निकपंचकोलरुचकैः साजाजीः सुगमोद्भिदैः सक्षारैः सविडैः सहितउद्रक्षासिंधूद्भवैः कल्कितैः ॥ शुक्तैर्नाडिकसंभ
वेन च रसैनैतन्महाषट्पलं सर्पिः पक्वमरीचकाग्निसदनं प्लीहज्वरश्वासजित् ॥ पूतीककरंजः ॥ इति महाषट्पलं घृतं ॥ पिप्पली
चंदनमुस्तमुशीरकटुरोहिणी ॥ कलिंगमुस्तामरिचं सारिवानिविषास्थिरः ॥ द्राक्षामलकबिल्वानि त्रायमाणानि दिग्धिकाः

॥ राम: ॥
॥ ५४ ॥

सिद्धमेतन् घृतं पीतं ज्वरं जीर्णं व्यपोहति ॥ क्षयकासशिरःशूलः पार्श्वशूलहलीमकं ॥ अंगाभितापमग्निं च विषमं च नियच्छति
॥ पिप्पल्यादिघृतं ॥ गुडूचीमरिचानां च स्वरसे साधितं घृतं ॥ कल्कै नसारिवाशुंठीलोध्रं चंदनदाडिमं ॥ गुडूच्यादिघृतं नाम वि
षमज्वरनाशनं ॥ ज्वराणां चापि सर्वेषां मेतदेकमृतोपमं ॥ गुडूच्यादिनाम घृतं ॥ ॥ कुक्कुटं नखरां सद्यः शिरपादान्त्रवर्जितं ॥ न
स्य मांसस्य कुडवीत्र शृंतं पलशतं भिषक् ॥ बृहतीकंटकारी च शृंगी कर्कटकस्य च ॥ बदराणि कुलत्थाश्च भांडीमामलकी तथा ॥ शा
ठी पुष्करमूलं च पंचमूलं महत्तथा ॥ एतत् पलांशसंगृह्य द्विद्रोणे त्वंभसः पचेत् ॥ पादशेषं परिश्राव्य कषायं ग्राहयेभिषक् ॥ ष
डुरां क्षीरमाहृत्य विपचेच्च घृताढकं ॥ तत्र कल्किकृतं दद्याअस्वल्पं पंचमूलकं ॥ तत्साधुसिद्धं विश्राव्य शुभे भांडे निधापयेत् ॥
तस्य काले पिबेन्मात्रां बलदोषाद्यवेक्ष्य च ॥ जीर्णे तस्मिंस्तु भुंजीत रक्तशाल्योदनं तथा ॥ जीर्णज्वरोपसृष्टानां क्षयतां श्वास
कासिनां ॥ प्रयोज्यं कौक्कुटं सर्पिर्यक्ष्मिणां विषमज्वरे ॥ लेखमं बृंहणीयं च बलवर्णाग्निवर्द्धने ॥ अस्वल्पं बृहत्यं च मूस्तभांडी शिरी
षः ॥ कौक्कुटं घृतं ॥ वासागुडूचीत्रिफलां त्रायमाणां दुरालभां ॥ पक्त्वा तेन कषायेन पयसा द्विगुणेन च ॥ पिप्पलीमुस्तमृद्वीका
चंदनोत्पलनागरैः ॥ कल्कीकृतैश्च विपचेत् घृतं जीर्णज्वरापहं ॥ वासाघृतं ॥ अत्रैवाहृतरोगेष्वेये: क्वथितक्वाथद्रव्ययोः ॥
॥ प्रत्येकद्विगुणांभागं भिषक् सर्पिषि निक्षिपेत् ॥ कल्काचतुर्गुणात्तेह स्नेहात्क्वाथं चतुर्गुणं ॥ क्वाथाचतुर्गुणं वारि क्वाथः क्वाथ

समोमतः ॥ मदो वतुर्णरांदं यं कटिने स्नुगणांन्तथा ॥ करीराकटिनं यष्ट्वनत्रषोत्तष्ठिकं जलं ॥ मद्यादिकाथ्यसंघातेमानाङ्केश्चिकित्स
कैः ॥ मध्यासोमनयभागित्वादिष्ठं त्वष्ट्रगणांजलं ॥ पलेषोङ्शभिः प्रस्थं शुष्काणांनवहिदेविदुः ॥ द्विगुणांस्वरसोद्राणांतैलक्षीरघृ
तांभसी ॥ पिप्पलीवेदनंमुस्तांमुशीरंकटुरोहिणी ॥ कलिंगकस्तामलकीसारिवाग्निविषेस्थिरा ॥ द्राक्षामलकविल्वानित्रायं
माणानिदिग्धिकाः ॥ सिद्धमेतेघृतंसयो ज्वरंजीर्णंव्यपोहति ॥ क्षयंकासशिरःशूलंपार्श्वशूलमरोचकं ॥ अंगाभितापमग्निंचवि
षमंसंनियच्छति ॥ जलस्नेहौषधानांतुप्रमाणंयत्रनेरितं ॥ तत्रस्यादौषधात्स्नेहःस्नेहात्तोयंचतुर्गुणां ॥ पिप्पल्याद्यमिदंख्यापि
तंत्रेक्षीरापच्यते ॥ तत्राधिकरणोनोक्तिर्गणास्तेहस्यसंविधौ ॥ तंत्रैवकल्कनिर्यूहाविष्येतेहवेदिना ॥ पिप्पल्याद्यघृतं ॥ ॥ कृष्णामा
मलकीचैवचंदनंसारिवातथा ॥ त्रायंतीकटुकाविल्वमुशीरंचाभिदिग्धिकाः ॥ धात्रीकुटजवीजानिमद्धीकानिविषास्थिराः ॥ पचेत्क
षेसमानंदत्वासर्पिप्रस्थंप्रयोवितं ॥ क्षयकासशिरःशूलजीर्णज्वरविनाशनं ॥ तामलकी ॥ मृ धात्री · क्षीरपिप्पल्याद्यघृतं ॥ ॥
अभयारोचनाकुष्ठंमर्कपुष्पंतथोत्पलं ॥ वलेवतसमस्त्वानिगरलंकुरसातथा ॥ सकालिंगासमंजिष्ठामनंतावशतावरी ॥ श्वंगाटकंस
मंगावपद्मकेशरमित्यपि ॥ कल्कीकृत्यपचेत्सर्पिःपयोदशाचतुर्गुणां ॥ मव्यक्रमात्कावतीर्णंवशीतेतस्मिन्विनिक्षिपेत् ॥ सर्पितुल्यमि
षवक्षौद्रंकृत्वारक्षंनिधापयेत् ॥ विषाणिहंतिदुर्गाणिगरदोषकृतानिच ॥ सर्वशार्ङ्गमिविषंसर्वंगरेत्पहतेत्वचं ॥ संयोगजंतमंकंदु

मांसरसादविसंज्ञतो ॥ नाशयत्यंजनाभ्यंगपानपरिषेकभोजनं ॥ सर्पकीटाखुभूतानि हस्त्यन्तोविषहत्परं ॥ रोचना ॥ कांपिल्यमत्स्यपाशाह्वदिघृ
तं ॥ ॥ गडूच्यारसकल्काभ्यांत्रिफलायावृषस्यच ॥ मृद्वीकायावलायाश्चसिद्धाःस्नेहाज्वरच्छिदः ॥ गडूच्याद्यघृतं ॥ द्राक्षासिद्धंपिबेत्सर्पि
र्बलयामधुकेनवा ॥ फलत्रयेवासव्याघ्रगडूच्यावाज्वरापहं ॥ द्राक्षादिघृतं ॥ ॥ पंचकोलैःससिंधूत्थैःपलिकैःपयसासमं ॥ सर्पिप्र
स्थंशृतंप्लीहविषमज्वरनाशनं ॥ अत्रद्रव्यांतरात्क्वाथक्षीरमेवचतुर्गुणं ॥ द्रव्यांतरेणासंयोगेहिक्षीरंस्नेहसमंभवेत् ॥ क्षीरषट्पलकंघृ
तं ॥ ॥ दशमूलीरसेसर्पिःसक्षीरंपंचकोलकैः ॥ सक्षारैर्हंतितत्पीतंज्वरकासाग्निमंदता ॥ वातपित्तकफव्याधीन्प्लीहानंचापिपांडु
तां ॥ दशमूलीक्षीरषट्पलकंघृतं ॥ ॥ चतुःषष्ठिपलंक्वाथ्यंशरावद्व्यष्टमाजलात् ॥ पादशेषःकषायोचक्षीरंस्नेहसमंजगुः ॥ ब
लाश्वदंष्ट्राबृहतीकलशीधावनिस्थिरा ॥ निंबपर्पटकंमुस्तंत्रायमाणादुरालभा ॥ कृष्णाकषायकल्कार्थंदद्यात्तामलकीशठी ॥ द्रा
क्षापुष्करमूलंचमेदामामलकानिच ॥ घृतंपयश्चतत्सिद्धंसर्पिर्ज्वरहरंपरं ॥ क्षयकासप्रशमनंशिरःपार्श्वरुजापहं ॥ अत्राप्यष्टगुणो
त्तोयैः क्वथितक्वाथदुग्धयोः ॥ प्रत्येकंद्विगुणोभागःकर्त्तव्योभिषजाघृते ॥ क्वाथ्यद्रव्यपल ६४ जल २५६ शेषजल ६४ घृतपल
६४ क्षीर ६४ अत्रकल्कद्रव्यपल ८ केचित्तुः ॥ क्वाथ्यद्रव्यपल ६४ जल २५६ शेष ६४ घृत ३२ क्षीरपल ६४ कल्कपल ३ इतिवदं
ती ॥ ॥ बलाद्यंघृतंवासामृतारिष्टभार्ङीपंचमूलफलत्रिकैः ॥ सयासमधुकाद्राक्षाकाश्मर्यैरक्षसम्मितैः ॥ घृतप्रस्थंविपक्तव्यंमे

भिर्मात्रामतःपिवेत्॥ बृहत्यदासाद्यघृतं प्रोक्तमेतत्सर्वरुजापहं॥ भांडी·शिरीष·॥ बृहत्यदासाद्यघृतं॥ ॥ मंजिष्ठातिविषापथ्यावचानागरोहिणी
देवदारुहरिद्राचद्रोणांजलिकानपचेत्॥ क्वाथेस्मिन्साधयेत्सिद्धेघृतंप्रस्थंपिचुन्मितैः॥ शृंगवेरकणाहिंगुद्विक्षारपटुपंचकैः॥ नृत्कफा
हृतसर्वैकज्वरिणाममृतोपमं॥ ब्रध्माहिध्मारुचिश्वासःपांडुरोगविकारिणां॥ गलग्रहप्रमेहार्शःप्लीहापस्मारशोषिणां॥ उदावर्तपरीता
नांमंदाग्निकृमिकुष्ठिनां॥ अंजली·कुडवं·॥ मंजिष्ठाद्यघृतं॥ ॥ कुलत्थकोलत्रिफलादशमूलवलान्पचेत्॥ द्विपलांसलिलद्रो
णाघृतेपिष्टाक्षकान्क्षिपेत्॥ पंचकोलकसप्ताह्ववयस्थाहिंगुतेवरु॥ शटीपुष्करमूलार्कमूलप्रतिविषावचा॥ किराततिक्तकंमुस्तक
र्कटाख्यादुरालभा॥ नक्तमालशुकतरुकटुकाशिग्रुतेजनिः॥ सोमवल्कंद्विरजनिकंठकीकंठकारिका॥ पटोलनिंबगोजिह्वाकंवुका
मदनस्वटा॥ लवणानिपलांशानिक्षाराणर्द्धपलान्वितां॥ प्रस्थंवाज्यस्यतत्सिद्धंदीपनंकफवातनुत्॥ गृध्रसीग्रहणीगुल्मश्वास
काशार्शसांहितं॥ जीर्णज्वराभिभूतानांज्वराणाममृतोपमं॥ तेजनी॥ तेजवत्यलाइति कुलत्थाद्यंघृतं॥ इति ज्वराधिकारः॥ ॥
कुटजत्वक्फलंग्राह्यंकृत्स्नादार्वीमहौषधं॥ कटुकाचेतितत्सिद्धंघृतंसर्वातिसारजित्॥ कुटजाद्यघृतं॥ क्षारनागरचांगेरीकोल
दध्यम्लसाधितं॥ सर्पिरच्छंपिबेत्तद्धिशूलातीसारनाशनं॥ शुंठीक्षारावचाकल्कैर्विशिष्टंद्रवमिष्यते॥ चांगेरीघृतं॥ ॥
क्षीरद्रुमाभीरुरसेविपक्वंतज्जैश्चकल्कैःपयसाचसर्पिः॥ सितोपलार्द्धमधुपादयुक्तंरक्तातिसारंशमयत्युदीर्णं॥ न्यग्रोधओडुंवरअश्व

स्थिपिप्पलभेदेन्नसशतावरी॥ श्रीस्तृषाद्यंघृतं॥ इत्यग्निसादअधिकारः॥ ॥द्विपंचमूलंसरलंदेवदारुसनागरं॥पिप्पलीपिप्पलीमू
लंचित्रकंहस्तिपिप्पली॥ सणबीजयवान्कोलान्कुलत्थंसुरभींतथा॥पाचयेत्सलिलेनदध्नासौवीरकेणवा॥ चतुर्भागावशेषेणप
चेत्तेनघृताढकं॥स्वर्जिकायावशूकाख्यौक्षारौदत्वाचप्रयुक्तितः॥ सैंधवोद्भिदसामुद्रविडाणांरोमकस्यच॥ससौवर्चलपाक्यानांभा
गान्द्विपलिकान्पृथक्॥ विनीयचूर्णितान्सोक्ष्मान्पाययेत्सततंबुधः॥ करोत्यग्निबलंवर्णवातघ्नंश्लेष्मपाचनं॥अत्रशुष्कद्र
व्यमानेनद्विपंचमूलानांषट्पंचाशत्पलाधिकपलशतद्वयमारनालादीनामन्यतमस्यचतुर्भिर्द्रोणैः क्वाथंद्रोणावशेषंगृह्यते॥
सुरभिरत्ररास्नाक्षारयोरपिद्विपलिकत्वं॥ द्विपंचमूलाद्यंघृतं॥ ॥पंचमूलाभयाव्योषपिप्पलीमूलसैंधवैः॥रास्नाक्षारद्वयाजाजी
विडंगसठिभिर्घृतं॥ शुक्तेनमातुलुंगस्यस्वरसेनार्द्रकस्यच॥ शुष्कमूलककोलांबुचुक्रिकादाडिमस्यच॥ तक्रमस्तुसुरामंडसौवी
रकतुषोदकैः॥ कांजिकेनचतत्पक्वंपानमग्निबलप्रदं॥ शूलगुल्मोदरानाहकासानिलगदापहं॥ पंचमूलकमिष्टमत्रशुक्तोऽभावेद्वि
गुणंकांजिकंदेयं॥ पंचमूलाद्यघृतं॥ ॥चव्यचित्रकपाठानांतेजोवत्यास्तथैवच॥ पिप्पलीपंचमूलानांभागान्दत्वाचतुःपलान्
॥ पलानिक्वाथ्योमुस्तायाःसनखामृतपत्रिमे॥आस्फोतायाःप्रवालानांमालतीकरवीरयोः॥ सप्तपर्णीकरंजार्कनींबशाकोटकस्यच
॥ एतान्संकुट्यविपचेन्जलद्रोणचतुष्टये॥ चतुर्भागावशेषंतुकुर्यान्मंदेनवह्निना॥ कटुकातिविषाश्यामाप्रत्येकंत्रिपलोन्मितं॥ पिप्प

लीनां च कुडवं विडंगानां घनस्य च ॥ तथा वत्सकबीजानां कल्कार्थं संप्रदापयेत् ॥ क्षारस्य यावशूकस्य स्वर्जिकायास्तथैव च ॥ विडसैन्धवयो
श्चैव दद्याद्द्वे द्वे पले शुभे ॥ ततस्तेन कषायेन कल्कैरभिश्च श्वेयपित्तेः ॥ दधिमण्डप्रयुक्तैश्च पचेद्वैद्यो घृताढकं ॥ अस्य कल्कं पिवे कर्षं वि
दृंभे द्विगुणां पिवेत् ॥ उष्णोदकानुपानं च कुर्याज्जीर्णे च भोजनं ॥ अनेन ग्रहणीदोषाः सर्वे नश्यन्ति देहिनां ॥ कफवातामयाश्चैव गुल्मा
श्चैव चतुर्विधः ॥ अर्शांसि नाशयेच्चैव प्लीहानं शमयत्यपि ॥ महदग्निघृतं ह्येतन्नन्दियज्ञः परिचक्षते ॥ स्निग्धं भुंजीत चाप्यन्नं मां
सं खादेच्च मेदुरं ॥ अस्याग्निनाशनार्थाय भक्षयेन्मधुना सह ॥ आस्फोटा अपराजिता : शाकोठ · अंकोलः ॥ महदग्निघृतं ॥ ॥ नागरं
पिप्पलीमूलं चित्रको हस्तिपिप्पली ॥ श्वदंष्ट्रा पिप्पली धान्यं विल्वं पाठा यवानिका ॥ चांगेरीस्वरसे सर्पिः कल्कैरेतैर्विपाचयेत् ॥ च
तुर्गुणेन दध्ना च तद्घृतं कफवातनुत् ॥ अर्शांसि ग्रहणीदोषं मूत्रकृच्छ्रं प्रवाहिकां ॥ गुदभ्रंशार्तिमानाहमेतत्सर्पिर्व्यपोहति ॥
चांगेरिरसोऽत्र चतुर्गुणाः ॥ हृद्‌चांगेरीघृतं ॥ ॥ दरुनकषायचतुर्गुणात् कल्कविपाचितं घृतं नूनं ॥ शमयति शूलशोषं ग्रह
णीदोषं च दुर्निवारं ॥ प्लीहोदरगुल्मार्शः कफवातभवं निहन्त्याशु ॥ अग्निं करोति सहसा शोथघ्नं जगति विख्यातं ॥ चित्रकघृ
तं ॥ मोचरसिंधुस्थलवोष लज्जाविल्वांवुधातकी ॥ सिद्धमाज्यमतः क्षीरि चांगेरि रसवर्द्धितोः ॥ हन्याद्ग्रहण्यतीसारौ यथापथ्या
शिनादृतं ॥ ग्रंथांतरे कपित्थोपि क्षिप्यतेत्र घृते पुनः ॥ घृततुल्यपयोग्राह्यं स्वरसस्त्रिगुणो घृतात् ॥ घृतेवदति शास्त्रज्ञा वाल

॥राम॥
॥५८॥

चांगेरिसंज्ञके· उत्पलं· नीलोत्पलं· लज्जा· लज्जावती॥ बालचांगेरीघृतं॥ ॥घृतं नागरकल्केन सिद्धं वातानुलोमनं। ग्रहणी
पांडुगुल्मप्लीहकामज्वरापहं॥ विश्वौषधस्य गर्भेण दशमूलजलेश्रृतं॥ घृतन्निहच्छ्वयथुं ग्रहणीसामतामयं ॥शुंठीघृतं॥
॥ ॥चंदनं पद्मकोशीरं पाठां मूर्वां कुटंनटं॥ षड्ग्रंथासारिवास्फोटासप्तपर्णाटरूषं॥ पटोलोदुंबराश्वत्थवटमक्षं कपीतका
न्॥ कटुकां रोहिणीं मुस्तां निंबं च द्विपलांशकं॥ द्रोणेऽपां साधयेत्पादशेषेः प्रस्थं घृतं पचेत्॥ किराततिक्तेन्द्रयवावीरामागधिको
त्पलं॥ कल्कैरक्षसमैः पेयं तन्निहन्ति ग्रहणीगदं॥ कुटंनटं· श्योणाकं॥ चंदनाद्यंघृतं॥ ॥मसूरस्य कषायेन विल्वगर्भं पचेद्घृतं
॥ हंति कुक्ष्यामयान्सर्वान्ग्रहणीपांडुकामलां॥ मसूराद्यंघृतं॥ ॥मसूराणां पशतं जलद्रोणे विपाचयेत्॥ पादशेषरसेन त
स्मिन्दद्याद्विल्वपलाष्टकं॥ घृतप्रस्थं पचेद्धीमान् शास्त्रविन्मृदुनाग्निना॥ प्रवाहिकामतीसारं ग्रहणीदोषमेव च॥ हन्यात्स्नि
ग्धमसंदेहं कृत्स्नात्रेयस्य शासनात्॥ भिन्नविट्के प्रशंसंति मसूरघृतमुत्तमं॥ मसूराद्यंघृतं॥ ॥द्राक्षामृतांशकपटोलपत्रैः
सौवीरधात्रीयवधन्वयैश्च॥ त्रायंतिकापद्मकिराततधान्यैः कल्कैः पचेत्सर्पिरुपेतमेभिः॥ भुंजीत मात्रां सह भोजनेन सर्वर्तुपानेन विभि
षक्प्रदद्यात्॥ बलासपित्तग्रहणीप्रवृद्धां कामाग्निमांद्यज्वरमम्लपित्तं॥ सर्वं निहंत्याशु घृतमेतदाशु सम्यक्प्रयुक्तं कृशत्वमन्नाप
मंदः॥ द्राक्षाद्यंघृतं॥ ॥कलिंगफलकल्केन घृतप्रस्थं प्रसाधितं॥ कफपित्तसमुत्थं तं ग्रहणीं हंत्यसंशयः॥ कलिंगाद्यंघृतं

॥ सा.घृ.उ ॥
॥ ५८ ॥

बृहतीचित्रकक्षारःसप्तकृत्वःपरिस्रुतः ॥ छित्रोनघृतंपक्कंवर्द्धयत्याशुपावकं ॥ बृहच्चित्रकक्षारघृतं ॥ ॥ सर्वजायांग्रहण्यांतुमामा
न्याविधिरिष्यते ॥ दीपनान्यन्नपानानिचूर्णारिष्टाघृतानिच प्रविभज्ययथावस्थंसर्वजेवस्तिकर्मच ॥ शतावरीचन्दपद्मकोत्पलंप्रि
यंगुपावामगधास्थिराभिः ॥ बिल्वाजमोदानिविषासमंगाजीवंतिवह्नीन्द्रयवैःसुपिष्टैः ॥ घृतंकषायेनतुकलिंगकानांपक्कंनिह
न्याग्रहणींत्रिदोषां ॥ पित्रातिसारंरुधिरप्रवाहंतथार्शसादोषसमुद्भवंच ॥ शतावरीघृतं ॥ ॥ अरुष्करंसिंगुकरामस
यष्टीभृनीकशुंठीमरिचंगजाह्वा ॥ अजाजीचव्याह्वचकेसवाह्निविडंविडंगसहदीप्यकं ॥ सक्षारसिंधुत्रिकटुग्रगंधायला
र्द्धभागेर्विपचेद्विधिज्ञः ॥ अजाजीधान्यचगौरीदशमूलीसमैपृथक ॥ प्रस्थंतिहन्याग्रहणींसर्वजांनृणां ॥ विष्टभमा
मआनरोगान्क्रिमिजांचकुक्षिजांस्तथा ॥ मंदानलभवान्सर्वान्भस्यानिक्वारिदं ॥ अरुष्करघृतं ॥ ॥ मयूरयूषःकल्को
नागरःविल्वजःश्रृतं ॥ संग्रहग्रहणींहंतितक्रेणाबृहतीतथा ॥ विश्वाजाजीविल्वपेशीकल्कसिद्धघृतेहरेत ॥ मसूरस्यक
षायेणासंग्रहणीगदं ॥ मयूरघृतं ॥ ॥ सौवर्चलंपंचकोलंसैंधवंहपुषाविडं ॥ अजमोदायवक्षारंहिंगुजीरकमौद्भिदं ॥ कृ
ष्णाजाजीसपूतीकंकरणीकृत्यपलार्द्धकं ॥ आर्द्रकस्वरसंयुक्तंक्षीरंमस्त्वम्लकोत्रिकं ॥ दशमूलीकषायेणघृतप्रस्थंविपा
चयेत ॥ भक्तेनसहपानंचानिभक्तेवाविचक्षणैः ॥ क्रिमिघ्नीहोदराजीर्णज्वरकष्टप्रवाहिकां ॥ वातरोगान्कफरोगान्हन्या

॥ राम: ॥
॥ ५८ ॥

न्छूलमरोचकं ॥ पांडुरोगानक्षयंश्वासंदौर्वल्यंग्रहणीगदं ॥ महाषट्पलकंन्यायघृतंमात्रयानिर्मितं ॥ महाषट्पलकंघृतं ॥
॥ त्र्यूषणांत्रिफलाकल्केविल्वमात्रेगुडात्पले ॥ सर्पिषोष्टपलान्पक्त्वायात्रांमंदानलःपिबेत् ॥ अष्टपलकंघृतं ॥ ॥
कलिंगफलकल्केनघृतप्रस्थंविपाचयेत् ॥ कफपित्तसमुद्भूतांग्रहणींहन्त्यसंशयं ॥ विल्वाग्निचव्यार्द्रकशृंगवेरक्वाथेन
कल्केनचसिद्धमाज्यं ॥ सछागदुग्धंग्रहणीगयेथशोथासादारुचिन्दरिष्टं ॥ विल्वाद्यघृतं ॥ ॥ चांगेरीस्वरसेदध्या
घृतप्रस्थंचतुर्गुणं ॥ अजाक्षीरस्यचप्रस्थंपचेत्सर्पिरिहौषधैः ॥ व्योषविल्वदधित्थानिसमंगाधातकीघृतं ॥ अजाज्यति
विषामोचधान्यकोत्पलवालकं ॥ वलायवानिकाग्निश्चपाठाग्रंथिकदाडिमैः ॥ अक्षप्रमाणैरेतैस्तुसर्पिःसिद्धंमहागुणं
॥ ग्रहणार्शोविकारघ्नंशूलगुल्मज्वरापहं ॥ कफवातारुचिहरंवलवर्णाग्निवर्धनं ॥ कृमिशोषगुदभ्रंशयकृत्प्लीहामया
पहं ॥ चांगेरीघृतं ॥ ॥ पिप्पलीनागरंपाठाश्वादंष्ट्राचपृथक्पृथक् ॥ भागान्त्रिपलिकान्कृत्वाकषायमुपयेत् ॥ गं
डीरपिप्पलीमूलंव्योषंचित्रकचव्यकं ॥ पिष्ट्वाकषायेविपचेत्तैर्द्विपलिकान्भिषक् ॥ पलानिसर्पिषश्चात्रचत्वारिंशत्प्रद
पयेत् ॥ चांगेरीस्वरसंतुल्यंसर्पिषोदधिषड्गुणं ॥ मृद्वग्निनासाधयेत्तत्सर्पिःसिद्धंप्रदापयेत् ॥ तदाहारेमिश्रितंवाप्रानेप्रायो
गिकेविधौ ॥ ग्रहणार्शोविकारघ्नंगुल्महृद्रोगनाशनं ॥ शोथःप्लीहोदरानाहमूत्रकृच्छ्रज्वरापहं ॥ कासहिक्कारुचिश्वासश्व

॥ सा·घृ·उ ॥
॥ ५९ ॥

मपांड्वामशूलनुत् ॥ वलपुष्टिकरंवल्यमग्निसंदीपनंपरं ॥ अत्रवराहक्रांतागंडीरमंजिष्ठा ॥ अतीसारहत्वान् ॥ वृहत्चांगेरीघृतं ॥
मसूरस्यतुलाक्कोथेघृतप्रस्थंविपाचयेत् ॥ पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरैः ॥ नालिकाद्विगुणंक्षीरंग्रहणीघ्नंत्रिदोषनुत्
॥ दुर्नामानिलविष्टंभजयेच्चैवप्रवाहिकां ॥ वलवर्णकरंहृद्यंमग्निसंदीपनंपरं ॥ वृहत्मसूराद्यंघृतं ॥ ग्रहण्याधिकारः ॥ ॥
नागरंग्रंथिकंचव्यंपिप्पलीक्षारचित्रकः ॥ एतैश्चपलिकैःसर्वैघृतप्रस्थंविपाचयेत् ॥ उदकस्यत्रयोभागाःक्षीरस्यैकंतदे
कतः ॥ दुर्नामश्वासकासघ्नंप्लीहपांड्वामयापहं ॥ विषमज्वरशांत्यर्थंहृत्पारोचकनाशनं ॥ एतत्षट्पलकंनामवलवर्णाग्नि
वर्द्धनं ॥ उदकःषट्पलकंघृतं ॥ ॥ व्योषंगर्भंपलाशस्यत्रिगुणोभस्मवारिणि ॥ साधितंपिवतःसर्पिःपतंत्यर्शास्यसंशयं
॥ पलाशक्षारघृतं ॥ ॥ चव्यंत्रिकटुकंपाठांक्षारंकुस्तुंवरूणिच ॥ यवानीपिप्पलीमूलमुभेचविडसैंधवे ॥ चित्रकंविल्व
ममयांपिष्ट्वासर्पिर्विपाचयेत् ॥ शकृद्वातानुलोमार्थंजादध्निचतुर्गुणे ॥ प्रवाहिकांगुदभ्रंशंमूत्रकृच्छ्रंपरिस्रवं ॥ गुदवंक्ष
णशूलंचघृतमेतद्व्यपोहति ॥ चव्याद्यंघृतं ॥ ॥ ह्रीवेरमुत्पलंलोध्रंसमंगाचव्यचित्रकं ॥ पाठामातिविषाविल्वंधातकी
देवदारुच ॥ दार्वीत्वाग्नागरेमांसीशुंठीक्षारोयवाग्रजः ॥ चित्रकश्चेतिपेष्याणिचांगेरीस्वरसंघृतं ॥ एकमध्यंसाधयेत्सर्वंत
त्सर्पिःपरमौषधं ॥ अर्शोतिसारग्रहणीपांडुरोगज्वरेरुचौ ॥ मूत्रकृच्छ्रेगुदभ्रंशेवस्त्यानाहप्रवाहणे ॥ पिच्छास्रावेर्शसांशूलेये

॥ राम: ॥
॥ ५८ ॥

ज्यमेतत्रिदोषजत्॥ ह्रीवेराद्यंघृतं॥ ॥भल्लातकसहस्रार्द्धंजलद्रोणेविपाचयेत्॥ अष्टभागावशिष्टंतुकषायमवतारयेत्॥
घृतप्रस्थंसमावाप्यकल्कानीमानिदापयेत्॥ त्र्यूषणंपिप्पलीमूलंचित्रकंहस्तिपिप्पली॥ हिंगुचव्याजमोदाचपंचैवलवणानि
च॥ द्वौक्षारौहपुषाचैवदशार्द्धपलोन्मितान्॥ दधिकांजिकसूक्तानिस्नेहमात्रासमानिच॥ आर्द्रकस्वरसंचैवसौभांजनरसंतथा
॥सत्सर्वमेकतःकृत्वाशनैर्मृद्वग्निनापचेत्॥ एतद्दन्तिघृतंनाममंदाग्नीनांप्रशस्यते॥ अर्शोनाशनंश्रेष्ठंमूत्रवातानुलोमनं॥
कफवातभवेगुल्मेप्लीहोदरदकोदरे॥ शोथेपांड्वामयेकासेग्रहणीश्वासमेवच॥ एतानिनाशयत्याशुसूर्यस्तमइवोदितं॥ ॥
कुटजाद्यंघृतं॥ अवाक्पुष्पीवलादार्वीपृश्निपर्णीत्रिकंटकं॥ न्यग्रोधोडुंवराश्वत्थशुंठीश्चद्विपलोन्मितान्॥ कषायएषांये
ष्मास्तुजीवंतीकटुरोहिणी॥ पिप्पलीपिप्पलीमूलंमरिचंदेवदारुच॥ कलिंगःशाल्मलीपुष्पंवीराचंदनकुंकुमं॥ कट्फलंचंद
नंमुस्तंप्रियंग्वतिविषास्थिरा॥ पद्मोत्पलानांकिंजल्कंसमंगासनिदिग्धिका॥ विल्वमोचरसःपाठाभागास्युःकार्षिकाःपृथक्॥ च
तुःप्रस्थेःशृतेप्रस्थंकषायमुपकल्पयेत्॥ त्रिंशत्पलानितुप्रस्थोविज्ञेयोद्विपलाधिकः॥ सुनिषण्णकचांगेर्याःप्रस्थौद्वौस्वरस
स्यच॥ सर्वैरेतैर्यथादिष्टैःघृतप्रस्थंविपाचयेत्॥ एतदर्शस्वतीसारेत्रिदोषरुधिरस्रुते॥ प्रवाहणेगुदभ्रंशेपिच्छासुविविधासुच
उत्थानेचातिवहुशःशोथशूलेगुदाश्रये॥ मूत्रग्रहेमूढवातेमंदानावरुचावपि॥ प्रयोज्यंविधिवत्सर्पि॥ र्बलवर्णाग्निवर्द्धनं

विविधैश्चान्नपानैश्च केवलं वा निरत्ययं॥ ड्वान्यहाविहावाप्यजलेपो उशके कथेत्॥ निःक्वाथ्य प्रस्थशेषं तु गृह्णीयात् गालितं भिष
क् अवाक्पुष्पी शतपुष्पा॥ अवाक्पुष्पीघृतं॥ ॥न्यग्रोधोडुंवराश्वत्थवदरीप्लक्षवेतसां॥ एभ्यः प्रवालान् तरुणान् त्रिफलां
शां समाहरेत्॥ अवाक्पुष्पाः पलान्यष्टौ भद्रदार्व्यास्तथैव च॥ शालपर्ण्याः पले द्वे च द्वे पले कालशाकतः॥ संकुद्येकत्रसंयुक्ते
सर्वमेतत्समावपेत्॥ द्विद्रोणे सलिले साध्यमष्टभागावशेषितं॥ घृतस्याढकं साध्यं कल्कश्चायं सुखाग्निना॥ उचांगेर्यश्चि
काम्भांच स्वरसः स्नेहसम्मितः॥ देवदारु च मुस्तं च चित्रको विल्वपेशिका॥ कट्फलं शृंगवेरं च पिप्पलीचंदनं तथा॥ सौवीर
मंजनं मूलं पिप्पली कटुरोहिणी॥ गंधप्रियंगु पुष्पं च शाल्मलेर्मोचकाह्वया॥ वत्सकस्य च वीजानि तथा चातिविषाभया॥ एषा
मक्षसमान् भागान् पृथक्दत्वा विपाचयेत्॥ एतद्यथावलं पीतं रक्तार्शांसि विनाशयेत्॥ पित्तगुल्ममतीसारं शूलं ज्वरमरोचकं
॥स्त्रीरोगामसृग्दरं सर्वं रक्तपित्तं प्रवाहिकं॥ पांडुरोगं तथा काशं कृमिदोषांश्च नाशयेत्॥ छर्दिमाक्षिकसंयुक्तं शमयेद्दीपरंपरं
॥गर्भाधानं च वध्यानां शोथार्शसन्निवारणं॥ चांगेरीघृतमित्युक्तं ख्यातमर्शोनिवारणं॥ वलमांसकरं चैव रक्तगुल्महरं त
था॥ अर्शांसि पित्तजातानां हि तेन ऽक्तजेष्वपि॥ संनिपातसमुत्थेषु सर्वभिषजकर्मः॥ सुहच्चांगेरीघृतं॥ ॥स्वरसात्तु कपि
त्थाम्लदाडिमामलकोद्भवात्॥ प्रस्थे द्वे सर्पिषः प्रस्थं पचेत्क्षाराग्निरुग्घरं॥ कपित्थाद्यं घृतं॥ अर्शोविकारः॥ ॥शृंगवेर

रसप्रस्थंघृतंप्रस्थंचतत्समं॥ उत्कृपस्यनसंयोज्यंतथाकांजिकमस्तुना:॥ पिप्पलीमरिचंहिंगुमाजमोदंसजीरकं॥ हपुषाजातिफलस्याचसैन्धव
वंविडमोद्भिदं॥ सौवर्चलंयवक्षारंचित्रकोहस्तिपिप्पली॥ चविकापिप्पलीमूलंयवानीधान्यनागरं॥ एतैःकर्षसमैर्भागैर्विपचेन्मृदुनाग्नि
ना॥ कफजान्हंतिरोगांश्चवातजान्क्रिमिसंभवान्॥ अजीर्णाजरयत्याशुनराणांवलवर्द्धनं॥ गुल्मप्लीहोदरंशोथंज्वरंहिक्कांप्रसीलकं॥
महाषट्पलमित्येतज्वलनंवायुवह्निवत्॥ क्षिप्रमेवतथारोगान्नाशयत्यशनिर्यथा॥ महाषट्पलकघृतं॥ ॥मरिचंपिप्पलीमूलंनाग
रपिप्पलीतथा॥ भल्लातकयवानीचविडंगंहस्तिपिप्पलिः॥ हिंगुसौवर्चलंचैवविडंसैन्धवचव्यकं॥ सामुद्रसयवक्षारंचित्रकोवचयास
ह॥ एतैरर्द्धपलैर्भागैर्घृतप्रस्थंविपाचयेत्॥ दशमूलरसेसिद्धंपयसाद्विगुणेनच॥ मंदाग्निनांहितंसिद्धंग्रहदोषविनाशनं॥ विष्ट
भमाममेदोर्वत्यप्लीहानमपकर्षति॥ कासंश्वासंक्षयंचापिदुर्नामान्सभगंदरान्॥ कफजांहंतिरोगांश्चवातजान्क्रिमिसंभवान्॥ तान्
सर्वान्नाशयत्याशुशुष्कंदावनलोयथा॥ मरिचाद्यघृतं॥ ॥धान्यजीरकसंसिद्धंघृतमग्निविवर्द्धनं॥ रोचनंदोषशमनंछर्दिदाह
विनाशनं॥ धान्यजीरकघृतं॥ ॥धान्यजीरकसंसिद्धंघृतमग्निविवर्द्धनं॥ रोचनंदोषशमनंछर्दिदाहविनाशनं॥ ॥धान्यजीर
कघृतं॥ धान्यकंनिस्तुषंकृत्वाजलेचाष्टगुणेपचेत्॥ तेनपादावशेषेणतत्कल्कैर्विपचेद्घृतं॥ वातरोगेषुसर्वेषुयोनिकेषुचशस्यते
॥कफजेषुचसर्वेषुसर्पिरेतद्यथामृतं॥ धान्यघृतं॥ ॥धान्यकस्यतुप्रस्थद्वस्यचतुःषष्ठिपलानिच॥ जलद्रोणविपक्तव्यायावत्या

दावशेषितं ॥ घृतप्रस्थं पचेत्तेन शनैर्मृद्वग्निना भिषक् ॥ जीरकस्य पलान्यष्टौ कल्कीकृत्य विनिक्षिपेत् ॥ अग्निसंदीपनं हृद्यं विपचेत् श्लेष्मनि
वर्हणं ॥ आमशूलं गुदे शूलं शूलं वंक्षणयोनिजं ॥ आमवातमुदावर्त्तं अर्शोरोगांश्च नाशयेत् ॥ धान्यकघृतं ॥ ॥ जीरके चित्रकं चव्यय
वानी नागरं तथा ॥ पलिकानि च सर्वाणि पंचैव लवणानि च ॥ आरनालाढकं दत्वा घृतप्रस्थं विपाचयेत् ॥ एतदग्निविवृद्ध्यर्थमर्शसां
नाशनं परं ॥ जीरकाद्यघृतं ॥ ॥ पिप्पलीपिप्पलीमूलं चित्रको हस्तिपिप्पली ॥ हिंगु चव्याजमोदा च पंचैव लवणानि च ॥ द्वौ क्षारौ ह
पुषा चैव दद्याद्द्विपलोन्मितान् ॥ दधिकांजिकशुक्तानि घृतमात्रासमानि च ॥ आर्द्रकस्य रसप्रस्थे घृतप्रस्थं विपाचयेत् ॥ एतदग्निघृ
तं नाम मंदाग्नीनां प्रशस्यते ॥ अर्शसां नाशनं श्रेष्ठं तथा गुल्मोदरापहं ॥ ग्रंथ्यर्वुदापचीकासकफमेदोनिलापहं ॥ नाशयेद्ग्रहणी
दोषं श्वयथुं सभगंदरं ॥ ये च वस्तिगता रोगा ये च कुक्षिसमाश्रिताः ॥ सर्वांस्तान्नाशयत्याशु सूर्यस्तम इवोदितः ॥ अग्निघृतं ॥ ॥
चित्रकक्वाथकल्काभ्यां घृतं सिद्धं पिबेन्नरः ॥ पंचकोलेन वा चैतन्मंदाग्निकफशूलवान् ॥ चित्रकघृतं ॥ ॥ पंचमूलाभयाव्योषपिप्प
लीमूलसैंधवैः ॥ रास्नाक्षारद्वयाजाजीविडंगशठिभिर्घृतं ॥ शुक्तेन मातुलुंगस्य स्वरसेनार्द्रकस्य च ॥ शुष्कमूलककोलाम्लचुक्रिका
दाडिमस्य च ॥ तक्रमस्तुसुरामंडसौवीरकतुषोदकैः ॥ कांजिकेन च तत्पक्वं गीनमग्निकरं परं ॥ शूलगुल्मोदरश्वासकासानि
लगदापहं ॥ पंचमूलाद्यघृतं ॥ ॥ भल्लातकानि सिंधूत्थमथ पिष्टं महौषधं ॥ अम्लेन पयसा वापि घृतेन विपाचयेत् ॥ एतेनोद्धर्त्तितं

कार्यंप्रदेहश्चैवशस्यते ॥ अग्निप्रदग्धोरवल्लीनु न्मेक्षराग्देवनाशयेत् ॥ मन्त्रानकादिघृतं ॥ इत्याग्निविकाराधिकारः ॥ ॥फलत्रय
वचादन्तीनिवृत्कंपिल्लकैः समैः ॥ सिद्धिंसर्पिर्गवांमूत्रेपीतंचकृमिनाशनं ॥ त्रिफलाद्यंघृतं ॥ ॥त्रिफलायास्त्रयः प्रस्थाः विडंगं
प्रस्थमेवच ॥ दीयन्दशमूलंवलाभनः सप्तपाहरेत् ॥ पादशेषेजलद्रोणेपूतेसर्पिर्विपाचयेत् ॥ प्रस्थोन्मितंसिंधुयुतंतत्पिवंकृमिनाश
नं ॥ विडंगंघृतमित्येतल्लेह्यंशर्करयासह ॥ सर्वान्कृमीन्प्रणुदतिवज्रमुक्तमिवासुरान् ॥ विडंगघृतं ॥ कृम्यधिकारः ॥ मूर्वानि
क्वानिशायासकृष्णाचंदनपर्पटैः ॥ त्रायंतीवत्समूलनिंवपटोलातुददारुभिः ॥ अक्षमात्रैर्घृतप्रस्थंसिद्धंक्षीरचतुर्गुणं ॥ पांडुताज्व
रविस्फोटशोथार्शोरक्तपित्तनुत् ॥ मूर्वाद्यंघृतं ॥ ॥ कटुकारोहिणीमुस्ताहरिद्रावत्सकत्वलं ॥ पटोलंचंदनंमूर्वात्रायमाणाद्रु
रालभा ॥ सपिप्पलीकर्कटकंभूनिंबंदेवदारु च ॥ पिष्ट्वाक्षमात्रैस्तैः सर्पिः प्रस्थंक्षीराढकेपचेत् ॥ रक्तपित्तंज्वरदाहंश्वयथुंसभगं
दरं ॥ अर्शांस्यसृग्दरंचैवहन्त्याविस्फोटकांस्तथा ॥ कटुकाद्यंघृतं ॥ ॥ घोषाविल्वहरिद्रेद्वेत्रिफलाद्विपुनर्नवाः ॥ मुस्तान्ययोर
जः पाठाविडंगंदेवदारु च ॥ वृश्चिकाचीचभार्गीचसक्षीरैस्तैःसृतंघृतं ॥ सर्वान्प्रशमयत्याशुविकारान्मूत्रकोद्भवान् ॥ ॥
घोषाद्यंघृतं ॥ देवदुत्रिफलाघोषवृश्चिकाल्पयसोरजः हरिद्राचित्रकंभार्ङ्गीपाठेदेवपुनर्नवं ॥ विडंगपिप्पलीलोध्रंपचेन्मूत्रेच
तुर्गुणं ॥ घृतंतत्पांडुहृद्रोगग्रहणीगददोषनुत् ॥ देवदार्वाद्यंघृतं ॥ ॥ रजनीक्वाथकल्काभ्यांघृतंपांड्वामयापहं ॥ त्रिफलाकल

॥सा·घृ·उ॥
॥६२॥

कगोमूत्रसिद्धं वा माहिषं घृतं ॥ रजनीत्रिफलाद्यं घृतं ॥ ॥ दंत्याश्चतुःपलरसे पिष्टैर्दंतिशलाटुभिः ॥ तद्वत्प्रस्थो घृतं गुल्मप्लीहहृद्रोगपांडुनुत् ॥ दंतीकुडवो यत्राष्टपलिकः षोडशभिः सलिलकुडवैर्निःक्वाथ्य पादावशेषः कर्त्तव्यः ॥ दंतीघृतं ॥ ॥ दाडिमात्कुडवं धान्यात्कुडवार्द्धं पले पलं ॥ चित्रकाच्छृंगवेराच्च पिप्पल्याष्टमिकां तथा ॥ तैः कल्कैर्विंशतिपलं घृतस्य सलिलाढके ॥ सिद्धं हृत्पांडुगुल्मार्शःप्लीहवातकफार्त्तिनुत् ॥ दीपनं श्वासकासघ्नं मूढवातेवशास्यते ॥ दुःखप्रसविनीनां च वंध्यानां चैव गर्भदा ॥ दाडिमाद्यं घृतं ॥ ॥ पथ्यामलकरसे पक्वात्रिवृतार्द्धांशकल्कवत् ॥ प्रस्थसिद्धाद्घृतात्पेयः सपांड्वामयगुल्मनुत् ॥ पथ्याशतं वारिद्रोणेनिःक्वाथ्यः पादशेषः कर्त्तव्यः ॥ पथ्याघृतं ॥ ॥ हरिद्रात्रिफलानिंववलामधुकसाधितं ॥ सक्षीरं माहिषं सर्पिः कामलहरमुत्तमं ॥ हरिद्राद्यं घृतं ॥ ॥ पिष्टैर्वा चाकराणिं वा त्रिफलामधुकैः समैः ॥ सक्षीरं माहिषं सर्पिः कामलाहरमुत्तमं ॥ ववाद्यघृतं ॥ ॥ ॥ पिष्ट्वा गोस्तनिकायाश्च पलानि दशपंच च ॥ पुराणसर्पिषः प्रस्थं पचेत्क्षीरचतुर्गुणं ॥ कामलापांडुहृद्रोगक्षयकाशानिनाशनं ॥ गोस्तनादिघृतं ॥ ॥ गुडूचीरसकल्काभ्यां सिद्धं क्षीरचतुर्गुणं ॥ माहिषं घृतमेवाथ कामलाहरमुत्तमं ॥ गुडूचीघृतं ॥ ॥ इति कामलाधिकारः ॥ श्यामाश्वयोरष्टानंताशर्कराभिः शृतं घृतं ॥ सर्वदोषहरं हृद्यं नसानासागतेसृजि ॥ अश्व अश्वगंधा·मोरटा मूर्वा ॥ श्यामाघृतं ॥ ॥ दूर्वामुत्पलकिंजल्कं मंजिष्ठाशैलवालुकं ॥ सिताशीतउशीरं चमुस्तं चंदनपद्मकं ॥ विपचेत्कार्षिकैरेतैः स

॥राम॥
॥६२॥

पिराजं सुरवाग्निनां ॥ नेदुलां वृत्तजा क्षीरदद्याद्वैव चतुर्गुणां ॥ तस्यानवसनेत्र रक्तं नावनं नासिकागदे ॥ कर्णाभ्यां यस्य गच्छेत् तस्य कर्णौ प्रपूरयेत् ॥ चक्षुर्भ्यां विसिरक्ते च पूरयेत्तेन चक्षुषी ॥ मेढ्रपायुप्रवृत्ते च वस्तिकर्म तु तद्विदं ॥ रोमकूपप्रवृत्ते च तद् भ्यंगे प्रयोजयेत् ॥ सिताशर्करा शीतेश्वेतन चंदनं ॥ शैलकं मलइस्मितृगंधिद्रव्यं ॥ दूर्वाद्यंघृतं ॥ ॥ दुर्वासेदीवरं पद्मं मंजिष्ठा शैलवालुकं ॥ रास्नाम्रस्नात थोशीरं चंदनं मधुकाह्वयं ॥ पद्मकं लोध्रकृष्णंच चंदनरजनीद्वयं ॥ काकोल्यौसारिवाचैटि कल्कैरेभिश्च कार्षिकैः ॥ घृतप्रस्थमजाक्षीरं तंडुलोदकसंयुते ॥ दूर्वायाः स्वरसेनापि साधितं मृदुनाग्निना ॥ तस्यानं वमतोरक्तं नावनं नासिकागदे ॥ कर्णाभ्यां यस्य गच्छेत्तु तस्य कर्णौ प्रपूरयेत् ॥ रक्तस्राविशिराचार्शीसिलेपयेत्तेन सर्पिषा ॥ मिढुपायुवृत्ते च तद् भ्यंगे प्रयोजयेत् ॥ पित्तजेषु विकारेषु स्फोटादिषु वृद्धिमान् ॥ विशेषु कीटदोषेषु विसर्पेषु प्रयोजयेत् ॥ महादूर्वाद्यघृतं ॥ ॥ न्यग्रोधोदुंबराश्वत्थप्लक्षगान्नापोथ्यवासयेत् ॥ अहोरात्रे जलेतस्मिन् घृतं तेनाम्भसापचेत् ॥ तदर्द्धशर्करायुक्तं लेहयेत्क्षौद्रपादिकं अधोवायदि वाप्यूर्द्ध रक्तं यस्य प्रवर्त्तते ॥ सुखं भवति तस्याशु अग्निवेशवचोयथा ॥ अष्टांगघृतं ॥ ॥ शतावरी दाडिमतित्तिडीकं काकोलिमेदे मधुकं विदारी ॥ पिष्टा च मूलं फलपूरकस्य घृतं पचेत् क्षीरचतुर्गुणं तु ॥ कासज्वरानाहविबंधशूलं तद्रक्तपित्तं च घृतं निहंति ॥ शतावरीघृतं ॥ ॥ शतावर्यास्तु मूलानां रसेप्रस्थद्वयंमतं ॥ तत्समं च भवेत्क्षीरं घृतप्रस्थं विपाचयेत् ॥ जीवकर्षभकौमेदामहामेदा तथैव च ॥ काकोलीक्षीरकाकोलीमद्वीका

मधुकंतथा ॥ मुद्गपर्णीमाषपर्णीविदारीरक्तचंदनं ॥ शर्करामधुसंयुक्तं सिद्धंविश्रावयेघृतं ॥ रक्तपित्तविकारेषुपानरक्तगदेषु च ॥ क्षीणशु
क्लेप्रदातव्यं वाजीकरणमुत्तमं ॥ अंगदाहंशिरोदाहंज्वरंपित्तसमुद्भवं ॥ योनिशूलंचदाहंचमूत्रकृछ्रंचपैत्तिकं ॥ एतान्रोगान्निहन्त्याशु
छिन्नाभ्रमिवमारुतः ॥ शतावरीसर्पिरिदंबलवर्णाग्निवर्द्धनं ॥ शतावर्यादिकेवाज्येशर्करामधुपादिकं ॥ मंथेचपादिकंदेयंवासासर्पिषि
संमतं ॥ वृहच्छतावरीघृतं ॥ ॥ वृषस्यपत्राङ्कुरपुष्पशाखाकषायकल्केनघृतंविपक्वं ॥ समाक्षिकंक्षीणकफप्रयुक्तंतद्रक्तपित्तंशम
यत्युदीर्णं ॥ वासाघृतं ॥ वासांसशाखांसफलांसमूलांकृत्वाकषायंकुसुमानिवासाः ॥ प्रदायकल्कैर्विपचेत्घृतंचसक्षौद्रमाश्वेवनिस
क्तं ॥ शणस्यकोविदारस्यवृषस्यककुभस्यच ॥ कल्कान्कृत्वाप्रशूंसंनिपुष्यकल्कंचतुःपलंवासाघृतं ॥ समूलपत्रशाखस्यवृषस्यधौतंसकु
दितं ॥ स्वरसंतस्यनिःक्वाथंकषायंवाजलेशृतं ॥ चतुर्गुणेजलेतस्मिन्घृतप्रस्थंविपाचयेत् ॥ पिबेत्कासेक्षयेश्वासेरक्तपित्तेहलीमके
॥ स्वरोपघातेतिमिरेतथासत्रेचपाठके ॥ तत्तुल्यंनास्तिभेषजंविशेषारक्तपित्तिनां ॥ वासाघृतं ॥ ॥ वासकस्यरसेसर्पिःपयसासह
पाचयेत् ॥ कल्कैर्निम्बकुटजमुस्तयष्ट्याह्वचन्दनैः ॥ उशीरमधुकानंतासारिवाशीरपद्मकैः ॥ त्रायंत्युत्पलमृद्वीभिर्मदयन्त्याश्चपल्लवैः
॥ सिताक्षौद्रयुतंहन्याद्रक्तपित्तंसुदारुणं ॥ पैत्तिकंवातगुल्मंचस्वरभेदंहलीमकं ॥ येचान्येकीर्तितारोगारक्तपित्तकफात्मकाः ॥ तान्सर्वान्ना
शयत्येतत्पीयमानंहितासिना ॥ महावासाघृतं ॥ ॥ अश्वगंधापलशतंतदर्द्धंगोक्षुरस्यच ॥ शतावरीविदारीचशालिपर्णीबलामृता

॥ राम: ॥
॥ ६३ ॥

॥ अश्वत्थस्यचशुंगानिपद्मवीजंपुनर्नवा ॥ काश्मर्यस्यफलंचैवमाषवीजंतथैवच ॥ पृथक्दशपलान्भागान्चतुर्द्रोणेंभसःपचेत् ॥ द्रोणशेषरसेतस्मिन्तुशीतेप्रदापयेत् ॥ मृद्वीकापद्मकंकुष्ठंपिप्पलीरक्तचंदनं ॥ पत्रकंनागपुष्पंचआत्मगुप्ताफलंतथा ॥ नीलोत्पलंसारिवेद्वेजीवनीयानशेषतः ॥ पृथक्कर्षसमाभागाःशर्करायाःपलद्वयं ॥ रसस्यपौंड्रकेक्षूणांआढकंतत्रदापयेत् ॥ चतुर्गुणेनपयसाघृतप्रस्थंविपाचयेत् ॥ रक्तपित्तंक्षतक्षीणांकामलावातशोणितं ॥ हलीमकंपांडुरोगंवर्णभेदंस्वरक्षयं ॥ मूत्रकृच्छ्रमुरोदाहंपार्श्वशूलंचनाशयेत् ॥ एतदाज्यंप्रदातव्यंवहूनःप्रवारिणां ॥ स्त्रीणांचैवप्रजातानांदुर्वलानांचदेहिनां ॥ श्रेष्ठंवलकरेधन्यंहृद्यंवृष्यंरसायनं ॥ ओजस्तेजकरंस्वर्य्यंआयुष्यंप्राणवर्द्धनं ॥ सवृंहयतिशुक्रंचपुरुषंदुर्वलेन्द्रियं ॥ सर्वरोगविनिर्मुक्तःतोयसिक्तोयथाद्रुमः ॥ कामदेवइतिख्यातंसर्पिरुक्तंमहाघृतं ॥ कामदेवघृतं ॥ ॥ दाडिमंतिन्तिडीकंचनागपुष्पंशतावरिः ॥ काकोलीक्षीरकाकोलीविदारीयक्षहस्तकं ॥ वीजपूरकमूलंचराजवृक्षात्मगुप्तयोः ॥ कुष्ठंचेतिसमैःकल्कैःघृतप्रस्थंविपाचयेत् ॥ चतुर्गुणेनपयसाजलेनाष्टगुणेनच ॥ एतत्सर्पिःपिवेत्सिद्धंकासश्वासश्चशाम्यति ॥ हृद्रोगंरक्तपित्तंचनचिराद्यान्तिसंशयः ॥ दाडिमाद्यंघृतं ॥ ॥ उडुंवरस्यलाटूनांतुलांतोयार्मणेपचेत् ॥ पादशेषेरसेतस्मिन्घृतप्रस्थंपयःसमः ॥ चंदनोशीरमंजिष्ठामधुकैःशैलवालुकैः ॥ पालिकैर्विपचेत्सम्यक्वस्तभंजननावनैः ॥ प्रयोज्यंरक्तपित्तघ्नंक्षयघ्नंपरमंहितं ॥ उडुंवरघृतं ॥ ॥ पलाशस्यशिरीषस्यत्वचःसंगृह्यकुट्टयेत् ॥ पृथक्दश

पलान्भागान्जलद्रोणे विपाचयेत् ॥ तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ॥ तस्यैव द्विपलं भागं कल्करूपं तु कारयेत् ॥ लिहेदेनं तु
मधुना रक्तपित्तनिवारणं ॥ पलाशघृतं ॥ ॥ बलामधुकपालाशं करंज वटतंडुला ॥ त्रिफलोत्पलशालूककवित्थंसगजपिप्प
ली ॥ दशपंचसमैः प्रस्थं सर्पिषः कल्कपेषितैः ॥ अजाक्षीरं दशचकं सिद्धं पानानुवासनैः ॥ अर्शोघ्नं रक्तपित्तघ्नं सहसासृग्ज्व
रापहं ॥ बलाद्यं घृतं ॥ ॥ तंडुलीयकमूलानि दाडिमं पथ्यमेव च ॥ वासकस्य च वीजानि जीवनीयगणास्तथा ॥ एतैः क
ल्ककषाये श्चपक्वं स्यान्माहिषं घृतं ॥ काशश्वासप्रशमनं रक्तपित्तनिवारणं ॥ तंडुलीयकाद्यं घृतं ॥ ॥ चंदनसारक
षायविपक्वं सारिवामधुरगणेन च सर्पिः ॥ शर्करया मधुना च विमिश्रं शोणितपित्तमपोहति सद्यः ॥ चंदनाद्यं घृतं ॥
॥ ॥ जीवनीयौषधैश्चापि सद्यः क्षीरघृतं पचेत् ॥ चतुर्गुणेन पयसा हितं लोहितपित्तिनः ॥ जीवनीयाद्यं घृतं ॥ ॥
अनंतासारिवापद्मसलोध्रंनीलमुत्पलं ॥ कल्कैरेतैः पचेत्सर्पिः सक्षीरनावनेपरं ॥ रक्तपित्तप्रशमये नारीणां प्रदरं तथा
॥ अनंताद्यं घृतं ॥ रक्तपित्ताधिकारः ॥ ॥ प्रपौण्डरीकं मधुकं पिप्पली बृहती बला ॥ साधितः क्षीरसर्पिश्च तत्स्वयंनावनं
घृतं ॥ शिरःपार्श्वांसशूलघ्नं श्वासकासनिवारणं ॥ प्रयुज्यमानं वहुशो घृतं चोत्तरभक्तिकं ॥ प्रपौण्डरीकाद्यं घृतं ॥ ॥
हतमाज्यस्यमांसस्य दशमूलाढकं यवाः ॥ कुलत्थं माषकोलानि मेषशृंगी प्रसारिणी ॥ प्रास्थिकानि जले द्रोणे चतुर्भागा

वशेषितं ॥ चतुर्गुणेनपयसाघृतप्रस्थंविपाचयेत् ॥ कल्कीकृतानिचैतानिश्लक्ष्णापिष्टानिदापयेत् ॥ पाठाजातीत्रिकटुकंयवानीहिं
गुचित्रकं ॥ त्वगेलापत्रखर्जूरंकार्षिकंचपृथक्पृथक् ॥ सकलेक्षुरसप्रस्थंशतावर्यास्तथैवच ॥ विदारीणांरसप्रस्थंशतावर्यास्त
थैवच ॥ विदारीणांरसप्रस्थंअश्वगंधारसंतथा ॥ निर्यूहेनसमायोज्यशनैर्मृद्वग्निनापचेत् ॥ अवतार्यप्रतिस्रावास्थिनातःप्रति
धापयेत् ॥ स्वादेनष्टडसंसर्पिःकाशायक्ष्मज्वरापहं ॥ गृध्रसीकंपनंशोथंकरीपृष्ठग्रहेषुच ॥ वंध्याव्यापन्नयोनिश्चनयस्यास्त्वा
त्रवंतथा ॥ क्षीरोन्द्रियानसूमेधावमंतशायकानतान् ॥ कृशानांमांसजननंमेधास्मृतिकरंपरं ॥ बलवर्णकरंचैवश्रेष्ठंका
याग्निवर्द्धनं ॥ षट्पलघृतं ॥ ॥ छागसकृद्रसमूत्रैर्दधापिसाधितंसर्पिः ॥ सक्षारंयक्ष्महरतिकासश्वासोपशांतयेपरं ॥ ॥
अजापंचकघृतं ॥ सक्षोडपाराश्वगंजाद्यजानांक्काथेशिराश्चैवतथैवभागाः ॥ मूर्वाहरिद्राखदिरद्रुमाणांक्षीरस्यभागास्त्रप
रोघृतस्य ॥ भागान्त्रैवेतान्विपचेद्विधिज्ञोदत्वात्रिवर्गामधुरकृत्तं ॥ कटुत्रिकंचैवसमंभद्रदारुघृतोत्तमंयक्ष्मनिवारणंहित्रिवर्गा
त्रिफलाघृतं ॥ ॥ पंचमूलमयाहस्वंगुडूचीमधुकंबला ॥ विपाचयेज्जलद्रोणेचतुर्भागावशेषितं ॥ कषायस्याढकंनीयाघृ
तप्रस्थंविपाचयेत् ॥ चतुर्गुणेनपयसाजीवनीयैःपलोन्मितैः ॥ विदार्यामलकानांचतेष्वेवेक्षुरसस्यच ॥ दत्वाघृतसमामात्रां
नत्पचेन्मृदुनाग्निना ॥ रसायनकमित्येतत्ख्यातंसर्पिःक्षयापहं ॥ हृद्रोगक्षयकासानांज्वराणांचनिवारणं ॥ रसायनघृतं ॥ ॥

॥सा·द·घ·उ॥
॥६५॥

वलाश्वदंष्ट्राकलशीवृहतीधावनीस्थिराः॥ निंवपर्पटकंमुस्तंत्रायमाणांदुरालभां॥ कृत्वाकषायंपेषणार्थंदत्वातामलकींशठीं॥
द्राक्षापुष्करमूलंचमेदामामलकानिच॥ घृतंपयश्चतत्सिद्धंज्ञेयंज्वरहरंपरं॥ क्षयकासप्रशमनंशिरःपार्श्वरुजापहम्॥ वलाद्यं
घृतं॥ ॥गुडूचीसारिवाकृष्णापंचमूलीवलावृषं॥ समूलपत्रशाखंतुपृथक्दशपलांशिकं॥ जलद्रोणेविपक्तव्यंयावत्पादाव
शेषितं॥ पिप्पलीचंदनंलोध्रंह्रीवेरोशीरपर्पटं॥ पाठाभूनिंवयष्ट्याह्वत्रायंतीनीलमुत्पलं॥ मुस्तकेन्द्रयवाशुंठीकटुकंसदु
रालभं॥ त्वक्पत्रंवृषमूलंचकल्कैरर्द्धपलोर्मिषक्॥ अजाक्षीरेणतत्तुल्यंघृतप्रस्थंविपाचयेत्॥ हंतियक्ष्माणमत्युग्रंर
क्तपित्तंत्रिदोषजं॥ श्वासकासक्षतक्षीणादाहशोफरुजापहं॥ अमृताद्यंघृतं॥ ॥पादशेषंजलद्रोणेपचेन्नागवलातु
लां॥ तेनक्वाथेनतुल्यांशंघृतंक्षीरंचसाधयेत्॥ पलार्द्धकाश्चत्रिफलावलायष्टीपुनर्नवाः॥ प्रपौंडरीककाश्मर्यप्रियालकपि
कच्छुभिः॥ अश्वगंधासिताभीरुमेदायुग्मत्रिकंटकैः॥ काकोलीक्षीरकाकोलीक्षीरशुक्लाद्विजीरकैः॥ मृणालेक्षुशरखर्जूरशृं
गाटककसेरुकैः॥ एतन्नागवलासर्पिःपित्तरक्तक्षतक्षयं॥ जयेत्तृड्भ्रमदाहास्रवलपुष्टिकरंपरं॥ वर्णमोजस्यमायुष्यंवली
पलितनाशनं॥ उपयुज्यचतुर्मासान्वृद्धोपितरुणायते॥ नागवलाद्यंघृतं॥ ॥वासामृतारिष्टनिर्दिग्धिकानांरसेश्वगंधे
भवलार्जुनानां॥ सिद्धंसर्पिर्वासाशर्कराणांकल्कैर्घृतंछागपयःसशोषे॥ वासाद्यंघृतं॥ ॥वलाविदारिगंधाभ्यांविदार्याम

॥राम॥
॥६५॥

लकेन च। सिद्धं सलवणं सर्पिः तस्य पेयमनुत्तमं ॥ बलाद्यं घृतं ॥ ॥ घृतं खर्जूरमृद्वीकामधुकैः सपरूषकैः ॥ सपिप्पलीकं वैस्व
र्यकासश्वासज्वरापहं ॥ खर्जूराद्यं घृतं ॥ ॥ एलाजमोदामलकाभयाक्षगायत्रिनिंबासनसालसारान् ॥ विडंगभल्लातकचि
त्रकं श्च कटुत्रिकं भोजनराष्ट्रिकाश्च ॥ पक्त्वा जलेतेन पचेत्तु सर्पिः तस्मिन्सुसिद्धे त्ववतारिते च ॥ त्रिंशत्पलान्यत्राशितोपलाया
दद्यात्तुगाक्षीरिपलानि षट् च ॥ प्रस्थे घृतस्य द्विगुणं च दद्यात्क्षौद्रं ततो मंथकृतिं विदद्यात् ॥ पलं पलं प्रातरतो लिहेत्तु पश्चा
त्पिवेत्क्षीरमतंद्रितस्तु ॥ एतद्धि मेध्यं परमं पवित्रं चक्षुष्यमायुष्यतमं तथैव ॥ यक्ष्मारगासाक्ष्यपहं मितूनं पांड्डामयं चैव भगंदरं
च ॥ न चात्र किंचित्परिवर्जनीयं रसायनं चैतदुपास्यमाने ॥ एलामंथघृतं ॥ ॥ अत्र चतुर्गुणक्वाथेन कल्पमिदं पाद्यं ॥ दशमू
लीश्रृतात्क्षीरात्सर्पिर्यदुदियान्नवं ॥ सपिप्पलीकं सक्षौद्रं तत्परं स्वरबोधनं ॥ शिरःपार्श्वांगशूलघ्नं कासश्वासज्वरापहं ॥ सिद्धं
जगति विख्यातं शोषीणां परमौषधं ॥ दशमूलीश्रृतक्षीरं घृतं ॥ ॥ पिप्पलीपिप्पलीमूलं चव्यचित्रकनागरैः ॥ सयावशूकैः
संक्षीरैः श्रोतसां शोधनं परं ॥ कल्कोत्र पादिकः कार्यः क्षीरं चांबु चतुर्गुणं ॥ षडंगघृतं ॥ ॥ जीवंतिमधुकं द्राक्षाफलानि कु
टजस्य च ॥ शठी पुष्करमूलं च व्याघ्री गोक्षुरकं बला ॥ नीलोत्पलं तामलकी त्रायमाणां दुरालभां ॥ पिप्पली च समं पिष्ट्वा घृतं वै
द्यो विपाचयेत् ॥ एतद्व्याधिसमूहस्य रोगेशस्य समुत्थितं ॥ रूपमेकादशविधं सर्पिरग्र्यं व्यपोहति ॥ जीवंतिघृतं ॥ ॥ पिप्पलीग

॥सा॰द॰घृ॰उ॥
॥६६॥

उसंयुक्तं छागक्षीरशृतं घृतं ॥ एतदग्निविवृद्ध्यर्थं सर्पिश्च क्षयकासिनां ॥ पिप्पलीघृतं ॥ ॥ यष्टीबलागुडूच्यल्पपंचमूलतुलां पचे
त् ॥ सूर्पेषां षष्ठभागस्थं तत्र पात्रं पचेघृतं ॥ धात्रीविदारीक्षुरसन्निपात्रे पयसामेरो ॥ सुपिष्टैर्जीवनीयैश्च पराशरमिदं घृतं ॥ स
सेव्यं राजयक्ष्माणमुन्मूलयति शीलितं ॥ पाराशरघृतं ॥ ॥ श्वदंष्ट्रासदुरालंभा चतस्रः पर्णिनीबला ॥ भागान् पलोन्मि
तान्कृत्वा पलं पर्पटकस्य च ॥ पचेदष्टगुणे तोये दशभागावशेषितं ॥ रसे तस्मिन्पूते द्रव्याणामेषां कल्कं समाचरेत् ॥ शठीपुष्कर
मूलानि पिप्पली त्रायमाणयोः ॥ तामलक्याकिरातानातिक्तस्य कुटजस्य च ॥ फलानि च सरवायांश्च सुपिष्टानक्षसम्मि
तान् ॥ तैः साधयेत् घृतप्रस्थं क्षीरद्विगुणितं भिषक् ॥ ज्वरं दाहं भ्रमं शोषंमेसपार्श्वशिरोरुजं ॥ तृष्णां छर्दिमतीसारमेत
त्सर्पिर्व्यपोहति ॥ पचेद्दशगुणेन्यत्र घृतादयं विकित्सकैः ॥ श्वदंष्ट्रायं घृतं ॥ ॥ तोये द्रोणे विपक्वेये मांसं छागस्य पल
शतं पत्का ॥ जलमष्टांशशेषं कृतं तस्मिन्विपचेद्बुधघृतं प्रस्थः ॥ कल्केन जीवनीयानां कटुकेनतु मांससर्पिरिदं ॥ पित्तानिल
निहत्यातज्जात पिरसकयोजितं पीतं ॥ श्वासकासस्वरग्रोयक्ष्माणां पार्श्वरुजां घोरान् ॥ अर्धव्यवायशोषं शमयति चैवा
परं किंचित् ॥ छागलाद्यघृतं ॥ ॥ छागमांसं तुलां गृह्य साधयेत्रल्वणोम्भसि ॥ पादशेषेण तेनैव सर्पिः प्रस्थं विपाचये
त् ॥ अजिवृद्धिश्च मेदेव तथाऋषभजीवको ॥ काकोलीक्षीरकाकोलीकल्कैः पृथक्पलान्वितैः ॥ सम्यक्सिद्धं चावनीय

॥रामः॥
॥६६॥

रीते तस्मिन् प्रदापयेत् ॥ शर्करायाः पलान्यष्टौ मधुनः कुडवं क्षिपेत् ॥ पलं पलं लिहेत्प्रातर्यक्ष्माणं हंति दुस्तरं क्षतक्षयं च कासं च
पार्श्वशूलमरोचकं ॥ स्वरक्षयमुरोरोगं श्वासं हन्यात्सुदुस्तरं ॥ वलमांसकरं वृष्यमग्निसंदीपनं परं ॥ स्त्रियश्चतुष्पदे श्रेष्ठा प्रमां
से विहगे मता ॥ छागलाद्यं घृतं ॥ ॥ छागसकृद्रसं मूत्रं क्षीरे दध्ना च साधितं सर्पिः ॥ सक्षारं यक्ष्महरं कासश्वासोपशांतये प
रमं ॥ अजापंचकं घृतं ॥ द्विपंचमूलस्य पचेत्कषाये प्रस्थद्वये मांसरसस्य चैके ॥ कल्कं वलायास्तु नियोज्य गर्भे सिद्धं पयः प्रस्थ
युतं घृतं च ॥ सर्वाभिघातोत्थितयक्ष्मशूले क्षतक्षयो कासहरं प्रदिष्टं ॥ वलागर्भघृतं ॥ ॥ यष्ट्याह्वनागवलयोः क्वाथे क्षी
रसमे घृतं ॥ हृद्रोगशूलक्षतरक्तपित्तकासानिलांसे शमयत्यदीर्णान् ॥ वलाघृतं ॥ ॥ श्वदंष्ट्रोशीरमंजिष्ठा वलाकाश्मर्य
कर्तृणं ॥ दर्भमूलं पृथक्पर्णी विलासर्वपकस्थिरां ॥ पलिकानि साधयेत्तेषां रसे क्षीरचतुर्गुणे ॥ कल्कैः स्वगुप्तर्षभकमेदाजीव
न्तिजीवकैः शतावर्यृद्धिमृद्वीकाशर्कराश्रावणीवृतैः ॥ प्रस्थः सिद्धो घृताद्वातपित्तहृद्रोगशूलनुत् ॥ मूत्रकृच्छ्रप्रमेहार्शःका
शशोषक्षयापहः ॥ धनुःस्त्रीमद्यभाराध्वखिन्नानां वलमांसदः ॥ श्वदंष्ट्राद्यं घृतं ॥ ॥ द्राक्षायाः संमितं प्रस्थं मधुकस्य पला
ष्टकं ॥ पचेत्तोयाढके शुद्धे पादशेषेण तेन तु ॥ पलिके मधुकद्राक्षे पिष्ट्वा कृष्णापलद्वयं ॥ प्रदेयं सर्पिषः प्रस्थं पचेत्क्षीरचतुर्गुणे
॥ सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत् ॥ एतद्द्राक्षाघृतं नाम क्षतक्षीणसुखावहं ॥ वातपित्तज्वरश्वासविस्फोटकहलीम

॥ सा॰द॰घृ॰ ॥
॥ ६७ ॥

कान् ॥ प्रदरंरक्तपित्तंचहन्यान्मांसबलप्रदं ॥ द्राक्षाद्यंघृतं ॥ ॥ धात्रीफलविदारीक्षुजीवनीयरसाघृतान् ॥ अजागोर्यपयसश्चैवप्र
स्थान्पचेद्भिषक् ॥ सिद्धशीतेसितक्षौद्रद्विप्रस्थंविपचेत्तुतः ॥ यस्मापस्मारपित्तासृक्कासमेहक्षयापहं ॥ वयस्थापनमायुष्यंमांस
शुक्रबलप्रदं ॥ सप्तप्रस्थंघृतं ॥ ॥ अश्वत्थोडंवरोवंशोवदरीप्लक्षवेतसौ ॥ एषांशृंगरसैःकल्कैःघृतंक्षीरेणसाधयेत्
॥ सद्योजयत्यतःस्रावंसहशर्करयासमं ॥ क्षतक्षीणाभिभूतस्यदद्यान्मानादिकंमहत् ॥ शृंगघृतं ॥ ॥ शतावरीमूलतुला
द्विद्रोणेमांविपाचयेत् ॥ अष्टभागावशेषेणघृतप्रस्थंविपाचयेत् ॥ जीवनीयानिसर्वाणिरास्नागोक्षुरकंतथा ॥ शतपुष्पाव
वाकृष्मंसरलसपुनर्नवाः ॥ चंदनंनगरंमांसीपद्मकंरक्तचंदनं ॥ सरसंनागरंकृष्णाविडंगंनीलमुत्पलं ॥ एतैरक्षसमैर्भागैः
क्षीरंदत्वाचतुर्गुणं ॥ बृंहणंवातपित्तघ्नंसर्वशोषज्वरापहं ॥ पंगूनांपीठसर्पाणांमर्दितानांप्रशस्यते ॥ पुष्पोपघातिनांचैववंध्या
नांचापियोषितां ॥ वर्णपवलकरंह्येनलक्ष्मीकांतिविवर्द्धनं ॥ शतावरीघृतमिदंमश्विभ्यांपरिकीर्तितं ॥ शतावरीघृतं ॥ क्षयरोगा
धिकारः ॥ ॥ दशमूलीकषायेनभार्गीकल्कंघृतंपचेत् ॥ दक्षतित्रिरिनिर्यहेतज्वरंवातकासनुत् ॥ दशमूलाद्यंघृतं ॥ ॥
भार्गीकल्कघृतंवाथपचेदग्निचतुर्गुणे ॥ व्याघ्रीरसद्विगुणितेवातकासहरंपरं ॥ कंटकारिकाघृतं ॥ ॥ द्रोणेपांसाधयेद्राक्षांद
शमूलीशतावरी ॥ पालिकान्मानिकांशालिन्कुलत्थान्वदरान्यवान् ॥ तुलार्द्धंवाजमांसस्यपादशेषेणतेनतु ॥ घृताढकं

॥ रामः ॥
॥ ६७ ॥

समक्षीरं जीवनीयैः पलोन्मितैः ॥ सिद्धं तद्दशभिः कल्कैर्नस्यपानानुवासनैः ॥ समीक्ष्य वातरोगेषु यथावस्थं प्रयोजयेत् ॥ पंचकासान् शि
रःकंपं शूलवंक्षणायोनिजं ॥ सर्वांगिकांगरोगांश्च सप्लीहोर्द्ध्वानिलान् जयेत् ॥ जीवकर्षभकौमेदे काकोलीमधुके सहे ॥ जीवंती जीव
नीयोयं मधुरो जीवनो गणः ॥ जीवनीयो गणः ॥ ॥ सूर्य्यपर्ण्यौ विना केचिद्दशवर्गमिमं विदुः ॥ ऋड्डिवृड्डिपुत्रं वान्ये जीवंतीमधु
कं विना ॥ पलाशं घृतं ॥ ॥ महिष्याजाविगोक्षीरधात्रीफलरसैः समैः ॥ सर्पिः प्रस्थं पचेद्युक्त्या पित्तकासनिवर्हणं ॥ षट्प्रस्थं घृ
तं ॥ ॥ अपोथ्य क्षीरिणां शृंगान् पचेत् क्षीरिवर्ग्गेणतो ॥ द्राक्षाकल्के घृतं सिद्धं लिह्यात्रत्पित्तकासतत् ॥ क्षीरघृतं ॥ ॥ क्षीरवृक्षां
कुरक्काथपक्वं क्षीरसमं घृतं ॥ पाययेत्पित्तकासघ्नं मधुना वावलेहयेत् ॥ क्षीरघृतं ॥ ॥ सप्तच्छदपत्रशाखायाः कंटकार्या रसा
ष्टके ॥ घृतप्रस्थं बलाव्योषविडंगशठिचित्रकैः ॥ सौवर्चलं यवक्षारविल्वामलकपोष्करं ॥ वृश्चीवबृहतीपथ्यायवानीदाडिम
र्डिभिः ॥ द्राक्षापुनर्नवाचव्यडुरालभाम्लवेतसैः ॥ शृंगीतामलकीभार्गीरास्नागोक्षुरकैः पचेत् ॥ कल्कैस्तत्सर्वकासेषु हिक्काश्वा
सेव शस्यते ॥ कंटकारिघृतं सिद्धं कफव्याधिनिसूदनं ॥ वृहत्कंटकारीघृतं ॥ ॥ व्योषाजमोदचित्रकजीरषड्ग्रंथवङ्कल्कि
तं सर्पिः ॥ कफकासश्वासहरं वासकरसाधितं समधु ॥ व्योषाद्यं घृतं ॥ ॥ निर्गुंडीपत्रस्वरसेन सिद्धं सर्पिकयोथां विनिहंति का
सं ॥ निर्गुंडीघृतं ॥ कासाधिकारः ॥ ॥ दशमूलाढके प्रस्थं घृतं स्यात्क्षसमैः पचेत् ॥ पुष्कराह्वशठीविल्वसुरसव्योषहिंगुभिः ॥

॥ सा॰द॰घृ॰उ॰ ॥
॥ ६८ ॥

पेयातुपानेनतत्थ्यंकासेवातकफात्मके ॥ श्वासरोगेषुसर्वेषुकफवातात्मकेषुच ॥ दशमूलाद्यंघृतं ॥ ॥ दशमूलीरसप्रस्थेचतुःप
स्थोन्मितंहविः ॥ सक्षारैःपंचकोलैस्तुकल्कैस्तत्साधुसाधितं ॥ कासहृत्पार्श्वशूलघ्नंहिक्काश्वासनिवारणं ॥ कल्कंषट्पलमेवा
त्रग्राहयंतिभिषग्वराः ॥ दशमूलषट्पलंघृतं ॥ ॥ पिप्पलिगुडसंसिद्धंछागक्षीरयुतंघृतं ॥ एतदग्निविवृद्ध्यर्थंसर्पिश्चक्षयका
सिनां ॥ पिप्पल्याद्यघृतं ॥ ॥ कुलीरशृंग्यांचटकैरालाबैर्निःक्वाथ्यवर्गैर्मधुरैस्तथान्यैः ॥ पचेत्घृतंतत्तुनिशेवमाणाहन्यात्
क्षयोत्थंक्षतजंचकासं ॥ कुलीराद्यंघृतं ॥ ॥ द्विपंचमूलत्रिफलाचिविविकाभार्गिचित्रकैः ॥ कुलत्थपिप्पलीमूलपाठाकोलभ
वैर्जले ॥ शृतेनागरदुःस्पर्शाशठीपिप्पलिपौष्करैः ॥ कल्कैःकर्कटशृंग्याचसमैःसर्पिर्विपाचयेत् ॥ सिद्धेस्मिंश्चूर्णितौक्षारौद्वौ
पंचलवणानिच ॥ दत्वायुक्त्यापिबेन्मात्रांक्षयकासनिपीडितः ॥ द्विपंचमूलाद्यंघृतं ॥ ॥ शुभदिग्देशोद्धृतंमूलशतंतत्सम्यगश्वगं
धायाः ॥ खुरोपहतिसंक्षुण्णांविपचेद्द्रोणेंभसिचविधानात् ॥ सात्वाष्टभागशिष्टंगृह्णीयात्तद्रसंसुपरिपूतं ॥ द्वेचैवात्रपलशतेदद्याच्छा
गस्यशुद्धमांसस्यसर्पिःप्रस्थंमथैकंगव्यंपयश्चतुर्गुणंदत्वा ॥ कल्कानक्षसमांस्तानूर्द्ध्वमतःसंप्रवक्ष्यामि ॥ काकोलीद्वयमृद्धीका
मेदेजीवकस्वयंगुप्ता ॥ ऋषभकमेलांमधुकंमृद्वीद्वेसूर्यपर्णीच ॥ जीवंतीउपकुल्यांवराविदारीशतावरीचात्र ॥ दत्वासम्यग्विप
चेत्सर्पिरथोधृत्वपूत्वा ॥ मधुसर्करयोःकुडवंदत्वाभांडेस्थितंमृदिते ॥ लीढ्वातत्याग्निबलंयथेष्टमाहारमश्नीयात् ॥ क्षीणक्षत

॥ रामः ॥
॥ ६८ ॥

शिशुवृद्धान्क्षीणेंद्रियहीनवलवर्णमांसांश्च॥ प्राश्यप्राकृर्षमयः पुष्टिवलारोग्यंतेजांसि॥ उपयुज्यसर्पिरेतत्सप्ततिवर्षोपिवेवभूत्वा
वहुशस्त्रियोधिगच्छति नचात्रपुत्रक्षयंलभते॥ पुत्रार्थिनीश्चनारीलभतेपुत्रंवयस्यतीतेपि॥ वंध्याचलभतेपुत्रंप्राश्येदमश्वगं
धाद्यं॥ उपयुक्तेयःपुरुषस्त्रीन्मासानर्द्धमासंवा॥ नारीशतंसगच्छेन्नैवभजेच्छोषितांतृप्तिं॥ खालित्यवलीपलितैर्नवास्यदेहोभिभू
यतेक्षिप्रं॥ वातव्याधिभिरार्त्तास्तथैववहुवस्तिरोगार्त्ता॥ नविंशादपिभुंजानाःसर्पिररोगाभवंतीह॥ एवंजगद्धितार्थंसर्पिरिदंवाजि
गंधाख्यः॥ श्रेष्ठंवाजीकरणंनिर्दिष्टंपूर्वमश्विभ्यां॥ अश्वगंधाद्यंघृतं॥ ॥ कंटकारीगुडूचीभ्यांपृथक्त्रिंशत्पलाद्रसे॥ प्रस्थसि
द्धंघृतंवातकासनुद्वह्निदीपनं॥ कंटकारीघृतं॥ सर्पिर्गुडूचीवृषकंटकारीक्वाथेनकल्केनचवासिद्धमेतत्॥ पेयंनराणांज्वरकासशू
लश्वासाग्निमांद्यग्रहणीगदेषु॥ सिंह्यमृतघृतं॥ ॥ घृतंरास्नाबलापथ्यास्वदंष्ट्राकल्कपाचितं॥ कंटकारीरसेपानात्पंचकासनिसू
दनं॥ कंटकारीघृतं॥ ॥ समूलपत्रशाखायाःकंटकार्यास्तुलांशुभां॥ धुसंपचेज्जलेद्रोणेचतुर्भागावशेषिते॥ तिसृतेनक
षायेस्मिन्घृतप्रस्थंविपाचयेत्॥ कल्कैर्विल्वप्रमाणैश्चत्रेमानिप्रदापयेत्॥ पिप्पलीपिप्पलीमूलंचित्रकोहस्तिपिप्पली॥ सौ
वर्चलंयवक्षारोरास्नात्रिकटुकंवचा॥ एतत्सर्पिःप्रसंशंतिपंचकासनिवारणं॥ श्वासंकासंप्रतिश्यायंश्लेष्मकंचविनाशयेत्॥ निदि
ग्धिकाघृतमिदंनव्याधिरतिवर्त्तते॥ जातशूलोपिसंवृद्धोदेवसेनानिवासुरा॥ कंटकारीघृतं॥ समूलपत्रशाखायांकंटकार्या

रसाटकं ॥ घृतप्रस्थं बलाव्योषविडंगकं घातिचित्रकं ॥ सौवर्चलं यवक्षारं बिल्वामलकपुष्करैः ॥ वृश्चीवबृहतीपथ्यायवानिदा
डिमादिभिः ॥ द्राक्षापुनर्नवाचव्यदुरालभाश्चवेतसौ ॥ शृंगीतामलकीभार्गीरास्नागोक्षुरकैः पचेत् ॥ कल्कैस्तत्सर्वकासेषु हिक्का
श्वासेषु शस्यते ॥ कंटकारीघृतं सिद्धं कफव्याधिविनाशनं ॥ बृहत्कंटकारीघृतं ॥ ॥ कंटकार्यासमूलांशुसं कृत्वा द्रोणेंभसाप
चेत् ॥ तेनाष्टकेन क्काथेन घृतप्रस्थं पिचून्मितैः ॥ रास्नादुःस्पर्शीषड्कुथापिप्पलीहयचित्रकैः ॥ सौवर्चलयवक्षारकृष्णामू
लैश्चतज्जयेत् ॥ कासश्वासकफष्ठीवहिध्मारोचकपीनसान् ॥ कंटकारिघृतं ॥ ॥ समूलपत्रशाखंतु श्लक्ष्णां कृत्वाटरूषकं
॥ तस्यकृयाम्बलशतं द्रोणप्रस्थोपंचमूलयोः ॥ हरीतकीविभीतक्योर्वल्कलात्कुडवद्वयं ॥ दद्यादामलकानां च कुडवं चमिभाव
शः ॥ निःक्वाथ्यसलिले द्रोणे चतुर्भागावशेषितं ॥ भेषजानितुपिष्टानि तत्रेमानि प्रदापयेत् ॥ द्वेमेदे द्वेहरिद्रेवजीवकर्षभका
वुभौ ॥ काकोलीक्षीरकाकोलीचंदनंमधुकंतथा ॥ मुद्गपर्णीमाषपर्णीप्रियस्यावाथपिप्पली ॥ मरिचंचव्यगंधाचशृंगीकाका
कनाशिका ॥ सूक्ष्मेलाशतपुष्पाचमृद्वीकाचशतावरी ॥ एतैसर्वैविपक्कंयद्गवांक्षीरेचतुर्गुणे ॥ सर्वकासापहंसर्पीसीक्षी
णक्षतसुखावहं ॥ हिक्काश्वासहरंचैवस्वरवर्णप्रसादनं ॥ बृहद्वासादिघृतं ॥ कासाधिकारः ॥ ॥ नारीक्षीरेणवासिद्धंस
र्पिर्मधुरकैरपि ॥ नस्तोनिषिक्तंपीतंवासयोहिक्कानियच्छति ॥ नारीक्षीरघृतं ॥ दशमूलीरसेसर्पिर्दधिमंडेनसाधयेत् ॥ कृ

ह्मासौवर्चलक्षारवयस्थाहिंगुचोरकैः॥ कायस्थायाचतत्यानाडिकाः श्वासौ नियच्छति॥ दशमूलाद्यं॥ ॥ शृंगीमधूलिकाभांर्ङी
शुंठीगुडमांशिवांबुदैः॥ सहरिद्रासयष्ट्याह्वैः समैरावाप्ययोगतः॥ घृतप्रस्थं पचेद्धीमान् शीततोये चतुर्गुणे॥ श्वासकासौ न
थाहिध्मां सर्पिरेतन्नियच्छति॥ शृंग्यादि॥ हिक्काधिकारः॥ ॥ हिंस्राविडंगपूतीकत्रिफलाव्योषचित्रकैः॥ द्विक्षारसर्पि
षः प्रस्थं चतुर्गुणजले शृते॥ कर्षमात्रैः पचेद्धि स्वश्वासकासौ व्यपोहति॥ अर्शांस्यरोचकं गुल्मशकृद्भेदं क्षयं तथा॥ हिंस्रा·मां
सी·पूतीक·करंज·हिंस्राद्यं·सौवर्चलयवक्षारकटुकाव्योषचित्रकैः॥ घृतं वचाविडंगैश्च साधितं श्वासहांनये॥ कुलत्थर
ससंयुक्तं पंचकोलसमं घृतं॥ दीपनं श्वासकासघ्नं कफव्याधिहरं परं॥ कुलत्थाद्यं॥ ॥ तिलासौवर्चलक्षारपथ्यात्रिकटुहिं
गुभिः॥ समालूरैर्घृतैः सिद्धं सक्षीरं श्वासकासहृत्॥ गुल्मानाहं च शमयेत्प्लीहजान्गुदजानपि॥ मालूर· विल्वनिक्वाथंकुलत्थं
दशमूलं च तथा ब्राह्मरायष्टिका॥ प्रस्थं प्रस्थं च संगृह्य वारिद्रोणेन साधयेत्॥ पादशेषे रसेनास्मिन्घृतप्रस्थं विपाचयेत्॥
क्षीरं च द्विगुणं कृत्वा कल्कैः पंचकोलकैः॥ सक्षारैः पालिकैः सर्वैः शनैर्मृद्वग्निना पचेत्॥ कासश्वासहरं चैव हिक्कांसवि
षमज्वरान्॥ हन्यात्तथार्शोग्रहणीहृद्रोगारुचिपीनसान्॥ गुल्मप्लीहामयान्हन्याद्बलवर्णाग्निवर्द्धनं॥ अग्निसंदीपनं चै
वकौलत्थं घृतं पचेत्॥ ब्राह्मरायष्टिकाभार्गीकुलत्थाद्यघृ‾ घृते॥ तेजोवत्यभयाकुष्टंपिप्पलीकटुरोहिणी॥ भूनिंब

पिप्पलीभूतपालाशंचित्रकंशठी॥ सौवर्चलंतामलकीसैंधवंविल्वपेशिका॥ तालीसपत्रंजीवंतिववाथैरक्षसंमितैः॥ हिंगुपा
दैर्घृतप्रस्थंपचेत्तोयेचतुर्गुणे॥ एतद्यथावलंपीत्वाहिक्काश्वासौजयेन्नरः॥ कासानिलार्शोग्रहणीहृत्पार्श्वंज्वरएवच
॥तेजोवत्याद्यं॥ त्रिविधंत्रिविधंचैवकुलत्थस्यशतंतथा॥ जलद्रोणेविपक्तव्ययावत्पादावशेषितं॥ पचेत्तेनकषायेनघृत
प्रस्थंसुखाग्निना॥ पंचकोलकतालीशंस्वर्जिकायावशूकजाः॥ सौवर्चलंसैंधवंचखरमंजरिकंतथा॥ सामुद्रौच्चकंवा
पिसर्वमेकत्रसाधयेत॥ एतद्घृतंकासहरंहिक्काश्वासगदापहं॥ ज्वरघ्नमस्तन्यदोषघ्नंप्रमेहेचोदरेहितः॥ वृहत्कुलत्थ
नामेदंघृतंदीपनमुत्तमं॥ वलवर्णकरंहृद्यंकफवातप्रणाशनं॥ वृहत्कुलत्थाद्यं॥ ॥सुवहांकलिकांभार्गींश्रुका
ख्यांनेत्रलफलं॥ काकादनीशृंगवेरंवर्षाभूवृहतीद्वयं॥ कोलमात्रैर्घृतप्रस्थंपाचयेत्तैर्जलाढके॥ रास्ना·अक्षफलभा
र्गी·शिरीषक·वेतसफल·गुंजा·आर्द्रक·पुनर्नवा·वृहतीद्वयं·पृथक्पलमितंजलाढक१शेषपल१६गोघृतपल१७
पुनःरास्नादिकल्ककर्षपदत्वापचेत॥ कटुकंपीतमेतद्धिश्वासामयविनाशनं॥ सुवहाद्यं॥ इतिश्वासाधिकारः॥ ॥
कासमर्दकवार्ताकमार्कवस्वरसैःपचेत॥ पीतघृतंहंत्यनिलजंसिद्धंवार्ताकजेरसे॥ यवक्षाराजमोदाभ्यांचित्रकायल
केषुच॥ देवदार्वादिकाभ्यांवासिद्धमाज्यसमाक्षिकं॥ कासमर्दघृतचतुष्टयं॥ घृतंरसेर्वाशिखितित्तिरीणांद्विपंच

म्लीस्वरसैर्विपक्कं॥ निदिग्धिकापुष्करवालविल्वकल्कं पिवेन्नस्वरभेदहंत्री॥ मायूराद्यं॥ ॥ शृंगास्त्वचक्षीरवतांद्रुमा
णांसंकुट्यदुग्धं विपचेत्तु तोये॥ कल्केन यष्टीमधुकस्य सर्पिः सिद्धं पिवेत्तं मधुशर्कराक्तं॥ भार्ग्याद्यं॥ ॥ ब्राह्मीस्वरसविपक्कं
रास्नावाट्यालगोक्षुरव्योषैः॥ सर्पिस्वरोपघातं हन्यात्कासं च पंचविधं॥ कंटकारि॥ भृंगराजामृतावल्लीवासकदशमूलका
समर्दरसैः॥ सर्पिसपिप्पलीकं सिद्धं स्वरभेदकासजिन्मधुना भृंगराजाद्यं॥ स्वरभेदाधिकारः॥ ॥ सिद्धं तथा धान्यकनाग
राभ्यां दद्याच्च तोयेन च दाडिमस्य व्योषैरायुक्त्या लवणैस्त्रिभिश्च घृतस्य मात्रामथवा प्रदापयेत्॥ नागराद्यं॥ ॥ पद्मका
मृतनिम्बानां धान्यचंदनयोरपि॥ कल्केक्वाथे च हविषः प्रस्थछर्दिनिवारणं॥ तृष्णारुचिप्रशमनं दाहज्वरहरं परं॥ पद्म
काद्यं॥ छर्द्यधिकारः॥ ॥ शतावरीरसेश्चैव यष्टिकल्केर्घृतं शृतं॥ पयःशृतेनैवा क्वाथः यष्टिक्वाथप्रसाधितं॥ घृतं पुष्टि
करं पानान्नस्यपानहतौजसः॥ शतावरीपुनर्नवाद्यं॥ पानात्ययाधिकारः॥ ॥ उत्पलादिशालपर्णीभिजीवकाद्येन साधि
तं॥ तैलं घृतं च दाहघ्नं वातपित्तविनाशनं॥ उत्पलाद्यमयं॥ दाहाधिकारः॥ ॥ हिंगुसौवर्चलं व्योषैर्द्विपलांशैर्घृताढकं
॥ चतुर्गुणे गवांमूत्रे सिद्धमुन्मादनाशनं॥ हिंग्वाद्यं॥ त्रिकटुकदलंकुष्ठग्रंथिकक्षारसिंधुदारुसिद्धार्थयुग्मार्थशक्राह्वैः॥ सित
लशुनफलत्रिकोशीरनिक्राववाकुलत्थयष्टीवल्ला॥ लोहितैलाशिलापद्मकैः॥ दधिनगरमधूकसारप्रियालक्षाग्निविश्वामालिविषानार्ष

शैसन्वयामयेः ॥ व्योष·पत्रक·केशर·ग्रंथिक·जवाक्षार·सिंधुज·देवदारु·सिद्धार्थयुग्मइंद्रयव·वंदन·लशुन·अग्निविषा·रसां
जन·हृंडु·त्रिफला·उशीर·कटुका·ववा·कुलत्थ·यष्टी·मधु·वला·रक्तवंदन·सूक्ष्मैला·मनःशिला·पद्मक·कपित्थ·तगर
मधु·प्रियंगु·विभीतक·शुंठी·वच्य·कुष्ठ·सर्वैप थकर्षमितैः·गोघृतपल ८० जलपल १४० मंदेग्नौ पक्वाच ॥ कल्कितैर्घृतम
नवंशेषतुक्रिसंसिद्धघृतमिह महाभूतराह्वयमुन्माद नाशनंपरमं ॥ महाभूतराह्वं ॥ जटिलापूतनाकेशिचारटीमर्कटीववा ॥ त्रा
यमाराजयावीराचोरकंकटुरोहिणी ॥ कायस्थासुकरीछत्रासातिछत्रापलंकषा ॥ महापुरुषदंताववयस्थानाकुलीद्वयं ॥ कटं
भराह्वश्चिकालीसंस्थिराभिश्चैतैर्घृतं ॥ मांसी·हरीतकी·निर्गुंडी·कमल·कपिकच्छु·ववा·त्रायंतीअग्निमंथः काकोली·ग्रंथि
पर्णी·कटुका·पथ्या·पुष्टि·यवानीशतपुष्पा। लाक्षा·शतावरी·तुटूवी·नाकुलीद्विविधा·गंधप्रसारिणीमेषशृंगी·शालप
र्णी·पृथक्कर्ष १।१ घृतपल ३२ जलपल १२८ सुसिद्धंघृतं ॥ सिद्धं चतुर्थकोन्मादग्रहापस्मारनाशनं ॥ महापैशाचिकंनाम
घृतमेतद्यथामृतं ॥ मेधाबुद्धिस्मृतिकरं बालानांचाग्निवर्द्धनं ॥ महापैशाचिकं ॥ ॥ सर्षपारिष्टकुष्ठानिवचापत्रप्रियंगवः
॥ त्रिफलाकटुकावर्गोदशाङ्गागाम्लोम्लिनाम् ॥ घृतस्यकुडवाः सप्तगोमूत्रस्यैकविंशतिः ॥ एवंमानेनदातव्यं तुलार्द्धं लशु
नाद्रसात् ॥ एतन्माहेश्वरंनाममृत्युजयत्रोपदिश्यतेग्रहैः ॥ संभग्नदेहानांवक्षस्तोनहतास्तथा ॥ उन्मादे चाप्यपस्मारेतुल्मेभ्र

॥ रामः ॥
॥ ७१ ॥

लेनथैवच॥ वातिकांपैतिकाश्चैवश्लेष्मिकासान्निपातिकाः॥ शुक्त्यांन्यासपरात्रेतुघृतपानभयार्दिता॥ माहे~~श्व~~रारंभ॥ ॥
त्रिफला सारिवानंतालक्ष्मणासारिवावचा॥ ब्राह्मीपाठाद्विवृहतीद्विस्थिराद्विःपुनर्नवाः॥ सहदेवासूर्यवल्लीवयस्थागिरि
कर्णिका॥ तोयकुंभेपचेदेतज्जलपादावशेषितं॥ नतंकौन्तीवचाकुष्ठंकृष्णासैंधवसर्षपान्॥ नीलवत्सवर्णावन्मायाःसमिडं
पयसावगाः॥ प्राश्यपयोगेघृतंप्रस्थंसहेमकलशस्थितं॥ पानाभ्यंजनतोमेधास्मृत्यायुर्बलवर्द्धनं॥ रक्षोघ्नंवविषघ्नंवसार
स्वतमिदंघृतं॥ सूर्यवल्ली == मुद्गपर्णीसारस्वते॥ ॥ शणामामपुरसारास्नादशमूलीशतावरी॥ श्वदंष्ट्राशरणामूलंवचैर्ये
न्याक्काथकल्कितैः॥ साधितंचैतसंनामघृतंचेतोविकारनुत॥ उन्मादमदमूर्छायज्वरापस्मारभेषजं॥ चैतसं॥ ॥पंचमूल्या
थकाश्मर्यैरास्नैरंडत्रिवृद्भिः॥ मूर्वाशतावरीचेभिःक्काथेद्विपलिकैरिमैः॥ कल्याणकस्यचांगेनचैतसंनामतद्घृतं॥ सर्वचेतो
विकाराणांशमनंपरमुच्यते॥ कार्यकषायोद्विगुणाष्टतोयेःपानीयकल्याणककल्कपादः॥ चैतसं॥ ॥निशायुक्तंफलश्या
मावचासिद्धार्थहिंगुभिः॥ शिरीषकटभीश्वेतामंजिष्ठाव्योषदारुभिः॥ समैःकल्कैर्घृतंमूत्रेसिद्धमुन्मादनाशनं॥ निशाद्यं
लशुनस्यविनष्टस्यतुलार्द्धंनिस्तुलीकृतं॥ तदर्द्धंदशमूलस्यसम्यग्भांडेविपाचयेत्॥ पादशेषेघृतप्रस्थंलशुनस्यरसंतथा॥
कोलमूलकवृथाम्लमातुलुंगार्द्रकैरसैः॥ दाडिमाम्लसुरायुक्तंकांजिकाम्लैस्तदर्थकं॥ साधयेत्त्रिफलादारुलवणव्योषदीप्य

कैः ॥ यवानीवच्चहिंग्वम्लवतसैश्च पलांडकैः ॥ सिद्धमेतन्निषेवेत्कूलगुल्मार्शोजठरापहं ॥ गुल्मपांडामयप्लीहयोनिदोषकृमीज्व
रान् ॥ वातश्लेष्मामयांश्चान्यानुन्मादं चापकर्षति ॥ लशुनाद्यं ॥ उन्मादाधिकारः ॥ ॥ त्रिफलाव्योषकं पिप्पल्यवक्षारं फणिज्ज
कैः ॥ उपामापामार्गकारंजैर्गजमूत्रैश्च वस्तजैः ॥ तैलंध्मानमपस्मारनाशनंमावनेमतः ॥ त्रिफलाद्यंतैलघृतंच ॥ ॥ शंखपुष्पी
वचाकुष्ठैः सिद्धं ब्राह्मीरसं घृतं ॥ चतुर्गव्यं च प्रस्थं च घृतप्रस्थं तथैव च ॥ एतत्सर्वं समालोड्य विपचेत् हंत्यावशान्वितं ॥ पीतं सर्पिर
पस्मारउन्मादं चापि नाशयेत् ॥ ब्राह्मीघृतं ॥ ब्राह्मीरसवचाकुष्ठशंखपुष्पीभिरेव च ॥ पुराणं मेध्यमुन्मादग्रहापस्मारनाशनं
ऊषांडकंघृतं ॥ ॥ गोसकृद्रसदध्यम्लक्षीरमूत्रैः समैः घृतं ॥ सिद्धं चतुर्थकोन्मादमपस्मारविनाशनं ॥ स्वल्पपंचगव्यघृतं ॥
द्विपंचमूल्योत्रिफलारजन्योकुटजत्वच ॥ सप्तपर्णमपामार्गनीलिनीकटुरोहिणी ॥ शंपाकफल्गुमूलं च पुष्करं सदुरालभां ॥ द्वि
पलानि जलद्रोणे पक्त्वा पादे रसे स्थिते ॥ भांङीपाठात्रिकटुकं त्रिवृन्नालिनिकुलानि च ॥ श्रेयसीमारुकीमूर्वादंतीभूनिंबचित्रकौ ॥ द्वे
सारिवे रोहिषं च पूतीकं मदयंतिकं ॥ क्षिपेत्पिष्टा समाभागानि तैः प्रस्थं सर्पिषः पचेत् ॥ गोशकृद्रसदध्यम्लक्षीरमूत्रैश्च तत्समैः ॥
पंचगव्यमिति ख्यातं महत्तदमृतोपमं ॥ अपस्मारे तथोन्मादे श्वयथावुदरेष्वपि ॥ गुल्मार्शःपांडुरोगेषु कामलायां हलीमके ॥ अ
लक्ष्मीग्रहरक्षोघ्नं चतुर्थकनिवारणं ॥ फल्गुमूलोडुंवरीमूलं· भांङीशिरीसा· मदयंती· मल्लिकापुष्पं ॥ महापंचगव्यघृतं ॥ ॥

शरास्त्नहृत्तथैरंडशमूलेशतावरे ॥ रास्नामागधिकाशिग्रुक्वाथेहिंङ्गुपलेपथक ॥ विदारीमधुकैर्मेदे काकोल्योन्तथासिता ॥ ख
र्ज्जूराभीरुमृद्वीकामूर्वातिगोक्षुरंतथा ॥ चैतसस्यघृतस्यांगेपत्रवांसर्पिरुत्तमा ॥ महाचैतससंज्ञंतु ज्वरापस्मारनाशनं ॥ द्रव्य
मापोत्थितेक्काथांदत्वाषोडसिकेजले ॥ पादशेषंवकर्तव्यंमेषक्काथविधिः स्मृतः ॥ महाचैतसघृतं ॥ ॥ वचाशम्याक
कैडर्यवयस्याहिंगुचोरकैः ॥ सिद्धपलंकषायुक्तैर्वातश्लेष्माधिकेघृतं ॥ वचाद्यंघृतं ॥ ॥ मधूकद्विपलेकल्केद्रोणे
चामलकीरसान् ॥ तावत्सिद्धोघृतप्रस्थः पित्तापङ्गं वै क्षिप्रमपस्मारंनियच्छति ॥ कसेघृतं ॥ इत्यपस्माराधिकारः ॥ ॥
त्रिफलाशंखिनीदंतीविडिंगत्रिवृतागुधा ॥ कार्षिकानिपचेत्तानिविल्वकस्यफलेनच ॥ दधीनित्रिफलाक्वाथेघृतप्र
स्थंचतुर्गुणं ॥ विल्वकाद्यंघृतंतस्माद्धिरेकेवातरोगिणां ॥ विल्वघृतं ॥ ॥ रास्नापुष्करविल्वानिशिग्रुसैंधवगोक्षु
रान् ॥ कल्कानिपिष्ट्वापचेत्सर्पिस्तु रास्नावातार्तिनाशनं ॥ रास्नाद्यघृतं ॥ ॥ अश्वगंधकषायेनकल्केक्षीरचतुर्गुणं ॥ घृतंप
क्वंतुवातघ्नंपुष्ट्यमांसविवर्द्धनं ॥ अश्वगंधाद्यघृतं ॥ ॥ द्रोणेंभसः पचेद्भागान्दशमूल्यान्चतुःपलान् ॥ यवकोलकु
लत्थानांभागैः प्रस्थोन्मितैस्सह ॥ पादशेषरसेतस्मिन्जीवनीयैः सशर्करैः ॥ तथाखर्जूरकाश्मर्यद्राक्षावदरफल्गु
भिः ॥ सक्षीरैः सर्पिषः प्रस्थंकेवल्यंवातनाशनं ॥ निरत्ययप्रयोक्तव्यः पानाभ्यंजनवस्तिषु ॥ दशमूलाद्यंघृतं ॥ ॥

आजेचर्मविनिर्मुक्तंत्यक्त्वशृंगखुरादिकौ ॥ पंचमूलीद्वयंचैवजलद्रोणेविपाचयेत् । तेनपादावशेषेणघृतप्रस्थंविपाचयेत् ॥ जीवनी
यैःसमस्त्याहैःक्षीरेचैवशतावरी ॥ छागलाद्यमिदंनाम्नासर्ववातविकारजित् ॥ अर्दितेकर्णशूलेचबाधिर्यमूकमिन्मिने ॥ ज
डगद्गदयंगूनांखंजेगृध्रसिकुब्जयोः ॥ अपतानेपतंत्रेचसर्पिरेतप्रशस्यते ॥ छागलाद्यघृतं ॥ ॥ द्वात्रिंशत्त्वपलान्येवदे
यानिदशमूलतः ॥ मांसानामपितावंतिपरिपेष्यपलानिच ॥ शतावरीरसंक्षीरंमाज्यंतुल्यंप्रदापयेत् ॥ दशमूलपलांडवज
लद्रोणाढ्येपचेत् ॥ तेनपादावशेषेणघृतप्रस्थंविपाचयेत् ॥ जीवनीयंचयस्याह्वंकल्कंदेयानुपादिकं ॥ द्वितीयमेते ॥
घृतेतैलेचयोगेचयद्वंधुनरुच्यते ॥ नस्यातथ्यामिहार्येणभागतोद्विगुणांभवेत् ॥ छागलाद्यघृतं ॥ चित्रकनागरंरास्नापौष्करं
पिप्पलीशठी ॥ पिष्ट्वाविपाचयेत्सर्पिर्वातरोगापहंपरं ॥ चित्रकघृतं ॥ ॥ पलाष्टकंविल्वकतोवचायाःप्रस्थंपलाशंतद्वयंचमू
लं ॥ सैरंजसिंहीत्रिहतंघटेयावत्काथयेत्पादघृतेनतेन ॥ दध्नःपात्रेयावश्चकांश्चविल्वैःसर्पिःप्रस्थंहंतितत्सेव्यमानं ॥ उष्मा
वातानेकसर्वांगसंस्थानयोनिव्यापदुधमसत्मोदरंच ॥ विल्वकघृतं ॥ ॥ कुष्ठसैंधवयोःकल्कंचुक्रतैलसमन्वितः ॥ सुखो
ष्णोमर्दनेयोज्यंखल्वीशूलनिवारणं ॥ भल्लातकाग्निसिंधूत्थमधुकंदेवनाशयेत् ॥ भल्लातकाद्यघृतं ॥ ॥ धत्तूरस्वरसंप्र
स्थंगोदुग्धंप्रस्थसंमितं ॥ सिंहकरस्यचरसंगोघृतंप्रस्थसंमितं ॥ त्रिकटुग्रंथिकंचैवकुष्ठंजाज्याहिफेनकं ॥ जातीकोशंफलंचैव

राम: ॥
॥ ७३ ॥

वकालाजाजीपिप्पल्यन्वितं ॥ क्वाथैः कल्कैः शृतं सर्पिः वातश्लेष्मविनाशनं ॥ आमवाते च शोथे च पक्षाघातादिनाशने ॥
धन्वन्तरादिसर्पिः ॥ प्रस्थं घृतस्य पलिकैः शिग्रुवचाधातकीलोध्रलवणैः ॥ आज्ये पयसि सपाठैः सिद्धं सारस्वतं नाम्ना ॥
विविधउपयुज्यमानं जडगद्गदमूकतां क्षरागात् जित्वा ॥ स्मृतिमतिमेधाप्रतिभासंपन्नो भीष्टवाग्भवति ॥ सारस्वतं घृ
तं ॥ ॥ कृमिशत्रुवचापाठाशिग्रुसैंधवचित्रकैः ॥ पथ्यापराथ्यसहव्योषब्राह्मीभार्गीवृषैः समैः ॥ सर्पिः सिद्धमजाक्षी
रेजडगद्गदनाशनं ॥ अपस्मारग्रहोन्मादमूकत्वं हंति पानतः ॥ एतत्सारस्वतं नाम स्वयं देव्याः प्रकीर्तितं ॥ वर्द्धनं स्मृति
मेधानां वातुर्थकविनाशनं ॥ सारस्वतघृतं ॥ ॥ रास्नापुष्करविल्वाग्निसिग्रुसैंधवगोक्षुरैः ॥ कल्कापिष्टैः पचेत्सर्पिः कृ
ष्मवातार्तिनाशनं ॥ रास्नादि ॥ अष्टवर्गीसयष्टीकं शताहाकुष्टसैंधवैः ॥ रास्नाबलात्मगुप्ता च वानारि मदनस्तथा ॥ अ
पामार्गसमंजिष्ठासमभागानि कारयेत् ॥ घृततैलसमं कृत्वा क्षीरेण सह पाचयेत् ॥ मन्यास्तंभार्दिते रोगे अर्द्धवायुम
यार्दिते ॥ अभिघाते व्रणे घोरे रक्तेपित्ते समन्विते ॥ परिषेकं ततः कुर्यादवगाहे विशेषतः ॥ नस्यपानांजने चैव वस्तेह
युग्मे प्रयोजयेत् ॥ युग्मकं ॥ ॥ लशुनानां पलशतं घृताढकविपाचितं ॥ कल्कं चव्याग्निकुष्ठानां पलीकैर्विश्वहिंगुभिः
॥ लवणांपंचसंयुक्तं तदर्द्धं चाम्लवेतसं ॥ गृध्रसीवातगुल्मं च पक्षाघातं च नश्यति ॥ लशुनाद्यं ॥ पचेद्घृताढकं का

थैलस्तु न स्याहतो भवेत् ॥ कर्षैव व्याग्निकृष्णानां पालिके विश्वाहिंगुभिः ॥ लवणानां पृथकपिष्टा पलार्द्धं वाम्लवेतसं ॥ गृध्र
सीवातहृद्गुल्मपक्षाघातनिवारणं ॥ द्वितीयलशुनाद्यं ॥ ॥ इति वातव्याध्याधिकारः ॥ ॥ पिप्पलीक्वाथकल्काभ्यां घृ
तसिद्धं मधुसंयुतं ॥ पिबेत्प्रातरुत्थाय अम्लपित्तनिहृत्तये ॥ पिप्पलीघृतं ॥ ॥ शतावरीमूलकल्के घृतप्रस्थं पयः समं ॥
पचेन्मृद्वग्निना सम्यग् क्षीरं दत्वा च शर्करां ॥ नाशयेदम्लपित्तं च वातपित्तोत्थितान् गदान् ॥ रक्तपित्तं तृषां दाहमूर्छां श्वा
सं प्रणाशयेत् ॥ पयोत्र शतावरीमूलरसः शतावरी ॥ ॥ विदारिकुष्मदोशीरजीवंतीशतमूलिका ॥ कलोमलकधा
न्याकः तृणाह्वक्वाथयुक्तितः ॥ घृतसिद्धं कणाद्राक्षानुगाखर्जूरचंदनैः ॥ मधुकमधुकैलाभिः कल्कितैः श्वरानेरिसे
॥ क्षीरं च शर्करां दत्वा पित्तव्याधिनिहृत्तये ॥ पातव्यमत्र जैर्नित्यं मधुशर्करयान्वितं ॥ अम्लपित्तं च वातं च शूलं च परिणा
मजं ॥ निहन्याद्दाथ कुरुते बलं कामविवर्द्धनं वह्निमंच वर्द्धनं चैव भिषग्भिः संप्रकीर्तितं ॥ कामदेवमिति ख्यातं कृ
ष्णात्रेयेण पूजितं ॥ कामदेव ॥ ॥ पटोलशुंठीकल्काभ्यां केवलं कलकेनवा ॥ घृतप्रस्थं विपक्तव्यं कफपित्तहरं परं
॥ शुंठीपटोला ॥ ॥ पटोलस्य कषायेन घृतप्रस्थं विपाचयेत् ॥ नागरगर्भसंयुक्तं दीपनं बलिशोधनं ॥ कफपित्ता
रुचिहरं मंदानलवमिं जयेत् ॥ जीरकाद्यं ॥ इत्यम्लपित्ताधिकारः ॥ ॥ त्रायंतिकाचामलकीद्विकाकोलीशतावरी ॥

कसेरुककषायेण कल्कैरेभिः पचेत् घृतं ॥ उभे परुषके द्राक्षाकाश्मर्य्यस्वरसान् हृमान् ॥ पृथग्विदार्याः स्वरसं तथा क्षीर
चतुर्गुणं ॥ एतदे योजितं सर्प्पिः परुषकमिति स्मृतं ॥ वातरक्तं क्षते क्षीणो विसर्प्पे पैत्तिकः ज्वरे ॥ पारूषकघृतं ॥ बलाम
तिबलामेदामासपर्णाशतावरी ॥ काकोलीक्षीरकाकोलीरास्नामृद्धी च पेषयेत् ॥ घृतं चतुर्गुणक्षीरैः तैः सिद्धं वातरक्त
जित् ॥ बलाद्यं घृतं ॥ ॥ शतावरीकल्कगर्भं सेन स्याश्चतुर्गुणं ॥ क्षीरतुल्यं घृतं सिद्धं वातशोणितनाशनं ॥ ॥
शतावरीघृतं ॥ श्रावणी क्षीरकाकोली काकोली जीवकैः समैः ॥ सिद्धमृषभकं सर्पिः सक्षीरं वातरक्तजित् ॥ ऋषभकाद्यं
घृतं ॥ ॥ गुडूचीक्वाथकल्काभ्यां सपयस्कं घृतं शृतं ॥ हन्ति वातं तथा रक्तं कुष्ठं जयति दुस्तरं ॥ गुडूचीघृतं ॥ ॥
अमृतायाः कषायेण कल्केन च महौषधात् ॥ मृद्वग्नि घृतं सिद्धं वातरक्तहरं परं ॥ आमवाताढ्यवातादीन् कृमि
दुष्टव्रणानपि ॥ अर्शांसि गुल्मांश्च तथा नाशयेदाशु योजितं ॥ गुडूचीघृतं ॥ ॥ अमृतास्वरसविपक्वं सर्पिस्तत्कल्क
साधितं पीतं ॥ अपहरति वातरक्तं सन्नातं वावगाढकं ॥ गुडूचीघृतं ॥ ॥ अमृतायाः पलापाण्डुरोगघ्नं प्लीहकाश
ज्वरापहं ॥ गुडूचीघृतं ॥ ॥ अमृतायाः शतं प्राप्य जलद्रोणे विपाचयेत् ॥ चतुर्भागावशिष्टं च घृतप्रस्थं विपाच
येत् ॥ क्षीरं चतुर्गुणं तत्र दापयेत् मतिमान् भिषक् ॥ कल्कं चात्र प्रवक्ष्यामि यथावदनुपूर्वशः ॥ काकोलीक्षीरकाको

लीजीवकर्षभकौचयंत॥शतावरीपयस्यांचमधुकोनीलमुत्पलं॥अश्वगंधस्यमूलानिस्थिरांकटुकरोहिणी॥ऋद्धिवृद्धित
थामेदेश्वदंष्ट्राबृहतीद्वयं॥गुडूचीफलिनीरास्नावासकंचापिसंहरेत्॥तदेकस्थंसमैर्भागैः पाचयेन्मृदुनाग्निना॥
पानाभ्यंजनवस्तिषुपरिषेकेचदापयेत्॥वातरक्तंसशोषाद्यंसदाहंक्रोष्टुशीर्षकं॥खंजेरुस्तंभवातेचरक्तपित्तेच
दारुणं॥वकुपिधंवातरक्तंगृध्रसीवातकंटकः॥नाशयेद्योजितंसर्पिर्धन्वन्तरिवचोयथा॥महागुडूचीघृतं॥ ॥
गुडूचीस्वरसेसर्पिर्जीवनीयैश्चसाधितं॥कल्कैश्चतुर्गुणैःक्षीरैःसिद्धंवातास्रवातनुत्॥गुडूचीघृतं॥इति वातर
क्ताधिकारः॥ ॥पचेतघृतंनागरकंक्वाथेश्चतस्माद्धितोभवेत्॥कर्षेचव्याग्निकृत्स्नानांपलिकंविश्वाहिंगुनि॥लवणा
नांपृथक्पिष्टापलाईद्रवाम्लवेतसः॥गृध्रसीवातरुक्गुल्मपक्षघातानिवारणं॥लशुनघृतं॥ ॥शुष्कार्थपयसा
साध्यंदध्याविरम्लत्रसंग्रहे॥दीपनार्थमतिमतामसृनाचप्रकीर्तितं॥सर्पिर्नागरकल्केनसौवीरकचतुर्गुणं॥सि
द्धमग्निकरंश्रेष्ठमामवातहरंपरं॥शुंठीघृतेनागरंक्वाथकल्काभ्यांघृतप्रस्थंविपाचयेत्॥चतुर्गुणेनतेनाथ
केवलेनजलेनवा॥वातश्लेष्मप्रशमनंअग्निसंदीपनंपरं॥नागरंघृतमित्युक्तंकटीशूलामनाशनं॥शुंठीघृतं॥ ॥
हिंगुत्रिकटुकचव्यमरिमंथंतथैवच॥कल्कान्कृत्वामतिमतान्घृतप्रस्थंविपाचयेत्॥आरनालाढकंदत्वालस

र्पिजठरापहं ॥ शूलं विबंधमानाहं आमवातं कटीग्रहं ॥ नाशयेद्ग्रहणी दोषं मंदाग्निर्दीपनं परं ॥ कांजिकषट्पलघृतं
॥ ॥ शृंगवेरयवक्षारपिप्पलीमूलपिप्पली ॥ चव्यं च चित्रकं हिंगुमारिमं थतथैव च ॥ कल्कान्कृत्वा मतिमतान्घृ
तप्रस्थं विपाचयेत् ॥ आरनालाढकं दत्वा तत्सर्पिजठरापहं ॥ शूलं विबंधमानाहमामवातं कटीग्रहं ॥ नाशयेद्ग्रहणी
दोषमग्निसंदीपनं परं ॥ शृंगवेराद्यघृतं ॥ ॥ अलंवुषागोक्षुरकं वारुणीसपुनर्नवा ॥ एरंडमूलं तमुस्तं च काकि
लाक्षसहाचरं ॥ एषां दशपलान्भागान्जलद्रोणे विपाचयेत् ॥ तेन पादावशेषेणाघृतप्रस्थं विपाचयेत् ॥ गर्भे
दत्वा त्रिकटुकं रास्नागोक्षुरकं वली ॥ चित्रकं ग्रंथिकमुस्तं सैंधवं सयवाग्रजं ॥ भल्लातक हरीतक्यौ देवदारुपुनर्नवाः
॥ भूनीका त्रिविषाजाजी दप्यकं विल्वपेशिका ॥ एषामक्षसमैर्भागैः शुक्तकांजिकमस्तुभिः ॥ सर्पिस्तुल्यं च दातव्यं श
नैर्मृद्वग्निना पचेत् ॥ आमवातं निहंत्याशु सशोथं वातशोणितं ॥ गृध्रसी कामला हन्यात्पाण्डुतां विषमज्वरान् ॥ प्ली
पदं क्रोष्टुशीर्षं च हंत्यपस्मारमुद्धतं ॥ प्लीहानं यकृतं हन्यात्गुल्मं हंत्युपसेवितं ॥ बलवर्णकरं हृद्यं अग्निदीप्तिकरं
परं ॥ अलंवुषाद्यमित्येतत्कृतं काशीश्वरेण च अलंवुषाद्यघृतं ॥ ॥ शुंठीनां षट्पलं पिष्टं धान्यकं द्विपलं तथा
चतुर्गुणं जले दत्वा घृतप्रस्थं विपाचयेत् ॥ वातश्लेष्मामयान्दोषान्हन्यादग्निकरं परं ॥ उर्नामश्वासकाशघ्नं बलव

॥सा॰द॰घृ॰उ॥
॥७६॥

राग्निवर्द्धनं ॥शुंठीधान्यघृतं॥ ॥वासागुडूचीसहपंचमूलंकुरंटकारग्वधकोकिलाक्षः॥गंधर्वमूलंननगोक्षुराद्यैरेभिः॥
कषायैःकृतंकृत्स्नकल्कं॥घृतंविपक्वंत्वथवापितैलंक्रमेणयोज्यंननुपानवस्तौ॥जंघारुपार्श्वत्रिकवक्षरोगुदाहृद्वशो
थंशमयत्सुशूलं॥वासाद्यंघृतं॥इत्यामवाताधिकारः॥ ॥एरंडमूलंबृहतीश्वदंष्ट्रापुनर्नवाभिःक्षुरकस्यमूलं॥शता
वरीहंसपदीतुलांतुमहासहाक्षुद्रसहाविडारी॥बिल्वस्यमूलंसशृगालवित्रानिदिग्धिकाजीवकर्षभकोच॥कशेरु
सारासहदेवदेवपचेत्कषायंजलदाहशेषात्॥क्वाथेनकल्केनपचेत्तुधीमान्रसेनतुल्यंफलपूरकस्य॥उरुहृद्दोषा
यस्यस्याग्रस्यशूलेनशाम्यति॥तस्यसर्पिरिदंदद्यात्सहविनिवारणं॥सर्वथानगतंशूलमेतद्धंतिचतुर्विधं॥एरंडा
द्यमिदंसर्पिःकृष्णात्रेयेणपूरितं॥देवादंडोत्पलागोरक्षतंडुलानागवल्लेतियावत्॥एरंडाद्यंघृतं॥ ॥घृतावतुर्ग
रोदेयामातुलुंगरसोदधिः॥शुष्कमूलककोलाम्लकषायोदाडिमोरसः॥विडंगलवणाक्षारंपंचकोलंयवानिभिः
॥पाठामूलंककल्कैश्चसिद्धंशूलिघृतंमतं॥हन्यात्पार्श्वशूलंवैश्वासकासंहिक्कांतथैवच॥व्रध्नगुल्मप्रमेहार्शोवात
व्याधिश्चनाशयेत्॥शूलीघृतं॥इतिशूलाधिकारः॥ ॥वीरपूरकमेरंडरास्नागोक्षुरकंबला॥पृथक्पंचपलान्भा
गान्यवप्रस्थसमायुतान्॥वारिद्रोणेनसाध्यस्याद्यावत्पादावशोषितं॥घृतप्रस्थंपचेत्तेनकल्कंदद्यात्क्षसंमितं

॥राम॥
॥७६॥

तुंवुरूणाभयाहिंगुव्योषसौवर्चलं विदुः ॥ सैन्धवं यावशूकं च स्वर्जिकां साम्लवेतसं ॥ मस्तुप्रस्थद्वयं दध्ना सिद्धं मृद्वग्निना
भिषक् ॥ पानमेतत्प्रशंसन्ति शूलं हन्ति त्रिदोषजं ॥ वातशूलं यकृच्छूलं गुल्मप्लीहापहं परं ॥ हृच्छूलं पार्श्वशूलं च ग्रन्थिशू-
लं च पङ्गवेत् ॥ वलवर्णकरं हृद्यं अग्निसंदीपनं परं ॥ याज्ञवल्केन मुनिना भाषितं तत्त्वदर्शिना ॥ बीजपूराद्यं घृतं ॥ ॥
सपिप्पलीकं तु सर्पिः पचेत्क्षीरे चतुर्गुणे ॥ दधिगोमूत्रपयसां मिलितानां चतुर्गुणे ॥ भागाः समस्तचूर्णेभ्यः पाकश्चूर्ण-
क्रियाक्रमः ॥ विनिहन्त्यम्लपित्तं च शूलं च परिणामजं ॥ पिप्पलीघृतं ॥ ॥ पिप्पलीक्वाथकल्काभ्यां सर्पिः क्षीरं समं प-
चेत् ॥ सिद्धं क्षीरघृतं पानेन हन्ति शूलं चतुर्विधं ॥ पिप्पलीघृतं ॥ ॥ क्वाथेन कल्केन च पिप्पलीनां सिद्धं घृतं माक्षिक-
संप्रयुक्तं ॥ क्षीरानुयस्ताविनिहन्ति वह्निशूलं प्रवृद्धं परिणामसंज्ञं ॥ पिप्पलीघृतं ॥ परिणामशूलाधिकारः ॥ ॥
मूलकं शुष्कमार्द्रं च वर्षाभूमूलपंचकं ॥ आरेवतफलं वाप्यपक्वातेन घृतं पचेत् ॥ तन्नीयमानं शमयेदुदावर्त्तं वि-
शेषतः ॥ शुष्कमूलाद्यं घृतं ॥ ॥ स्थिरादिवर्गस्य पुनर्नवायाः सम्पाकपूतीककरंजयोश्च ॥ सिद्धः कषायो हि पलांशि-
कानां प्रस्थे घृतान् शाम्यति वद्धपाने ॥ स्थिराद्यं घृतं ॥ इत्यानाहाधिकारः ॥ त्र्यूषणा त्रिफला धान्यविडंगं चव्य-
चित्रकैः ॥ कल्कीकृतैर्घृतं सिद्धं सक्षीरं वातगुल्मनुत् ॥ त्र्यूषणाद्यं घृतं ॥ ॥ एतएवाहि कल्कास्तुः कषायः पांचमौ

लिकः ॥ द्विपंचमौलिकोवाथघृतंतत्कल्पतत्पले ॥ पंचमूलाद्यंघृतं ॥ ॥ चित्रकंशंखिनीपथ्याकंपिल्लात्रिवृतानागरं ॥ बृहद्दारश्च
शंपाकोदंतीदंतीफलंतथा ॥ कोशातकीदेवदालीनीलिनीगिरिकर्णिकाः ॥ सातलापिप्पलीमूलंविडंगंकटुकीतथा ॥ हेम
क्षीरीचविपचेत्कल्कैरेभिःपिचुसंमितैः ॥ घृतप्रस्थंस्नुहीक्षीरैःषट्पलेनपलद्वये ॥ अर्कक्षीरस्यमतिमान्सिद्धंगुल्मकु
ष्ठहृत् ॥ हंतिशूलंमुदावर्त्तंशोथाध्मानंभगंदरं ॥ नाशयत्युदरान्यष्टौनिपीतंविंदुसंख्यया ॥ गोदुग्धेनोष्णदुग्धेनको
लेनशैत्येनसलेनवा ॥ उष्णोदकेनवापीत्वाविंदुवेगैर्विरिच्यते ॥ एतद्बिंदुघृतंनामनाभिलेपाद्विरिच्यते ॥ विंदुघृतं ॥
॥ ॥ हपुषाव्योषपृथ्वीकाचव्यचित्रकसैंधवैः ॥ साजाजीपिप्पलीमूलदीप्यकैर्विपचेत्घृतं ॥ सकोलमूलक
रसंसक्षीरंदधिदाडिमं ॥ तत्परंवातगुल्मघ्नंशूलानाहविमोक्षणं ॥ योन्यर्शोग्रहणीदोषश्वासकासारुचिज्वरा
न् ॥ पार्श्वहृद्वस्तिशूलंचघृतमेतद्व्यपोहति ॥ पंचप्रसृतियत्रस्युर्द्रव्याणिस्नेहसंविधौ ॥ तत्रस्नेहसमान्याहुरर्वा
क्स्यात्तच्चतुर्गुणं ॥ हपुषाद्यंघृतं ॥ चित्रकव्योषसिंधूत्थपृथ्वीकाचव्यदाडिमैः ॥ दीप्यकंग्रंथिकाजाजीहपु
षाधान्यकैःसमैः ॥ दध्यारनालबदरमूलककल्करसैर्घृतं ॥ तत्पिबेद्वातगुल्मार्त्तिदौर्बल्याटोपशूलनुत् ॥ ॥
चित्रकाद्यंघृतं ॥ हिंगुसौवर्चलव्योषविडदाडिमदीप्यकैः ॥ पुष्कराजाजिधान्याम्लवेतसक्षारचित्रकैः ॥ शटीव

वाजगंधैलासुरसैश्चविपाचितं ॥ शूलानाहहरं सर्पिर्दध्नावानिलगुल्मिनां ॥ हिंग्वाद्यंघृतं ॥ ॥ जलेदशगुणेसो-
शाध्यत्रायमानश्चतुःपलं ॥ पंचभागास्थितेपूतेकल्कैःसंयोज्यकार्षिकैः ॥ रोहिणीकटुकामुस्तात्रायमाणादुराल-
भा ॥ द्राक्षामलकीवीराजीवंतीचंदनोत्पलैः ॥ रसस्यामलकानोचक्षीरस्यऽघृतस्यच ॥ पलानिपृथगष्टाष्टौदत्वा
सम्यग्विपाचयेत् ॥ पित्तगुल्मंरक्तगुल्मंविसर्पंपैत्तिकंज्वरं ॥ हृद्रोगकामलाकुष्ठंहन्यादेतद्घृतोत्तमं ॥ त्रायमाणा
॥ ॥ द्राक्षामधुकखर्जूरंविदारीसशतावरी ॥ परूषकाणित्रिफलांसाधयेत्पलसंमितं ॥ जलाढकेपादशेषेरसमा-
मलकस्यच ॥ घृतमिक्षुरसंक्षीरमभयाकल्कपादिकं ॥ प्रयोगात्पित्तशूलघ्नंसर्वपित्तविकारनुत् ॥ द्राक्षाद्यंघृतं ॥
पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरैः ॥ पालिकैःसयवक्षारैर्घृतप्रस्थंविपाचयेत् ॥ क्षीरप्रस्थेनतत्सर्पिःहं-
न्तिगुल्मंकफात्मकं ॥ क्षीरषट्पलघृतं ॥ ॥ सव्योषक्षारलवणंदशमूलंसृतंघृतं ॥ कफगुल्मंजयंत्याशुसहिंगुविड-
दाडिमं ॥ व्योषाद्यंघृतं ॥ ॥ भल्लातकानांद्विपलंपंचमूलंपयोन्मितं ॥ साध्यंविदारीगंधाख्यंमापथ्यसलिलाढके
॥ पादावशेषेपूतेचपिप्पलीनागरंवचा ॥ विडंगसैंधवंहिंगुयावशूकंविडंशठी ॥ चित्रकंमधुकंरास्नापिष्टाकर्ष-
समान्भिषक् ॥ प्रस्थंचपयसोदत्वाघृतंप्रस्थंविपाचयेत् ॥ एतद्भल्लातकघृतंकफगुल्महरंपरं ॥ प्लीहपांडामयश्वास

॥ सा द घ उ ॥ ग्रहणीकासरोगघ्नन् ॥ भल्लातकघृतं ॥ ॥ सौवर्चलपंचकोलसैन्धवहपुषाविडं ॥ अजमोदायवक्षारं हिंगुजीरकमोडिदं ॥ कृष्णमजा
॥ ७८ ॥ जीपूतीकं कल्कीकृत्यपलाहृकं ॥ शृंगवेररसेतुकं घृतप्रस्थं समीकृतं ॥ कृमिप्लीहोदराजीर्णज्वरगुल्मप्रमेहघ्नन् ॥ वातरोगन्तथाशोषं
दौर्वल्यं चाग्निसंक्षयं ॥ महाषट्पलकं नाम भिनत्त्यशनिवक्रिरीन् ॥ महाषट्पलं ॥ ॥ धात्रीफलानां स्वरसे षट्पले त्रिपचेत्घृतं ॥ श
र्करासैन्धवोपेतं तद्धितं सर्वगुल्मिनां ॥ धात्रीषट्पलकघृतं ॥ ॥ षड्भिः पलैर्मागधजाफलमूलचव्यविश्वौषधज्वलनयावककल्
कपक्के ॥ प्रस्थं घृतस्य दशमूलरसेष्टक भार्गीक्वाथन चापयसिदधिचषट्पलाख्यं ॥ गुल्मोदरारुचिभगंदरवह्निसादसाज्वरक्षयशि
रोग्रहणीविकारान् ॥ सद्यः समं नयति येन कफानिलोत्थान् नानाङ्गनाशयति दुर्जेयमग्निमाद्यं ॥ भार्गीषट्पलकघृतं ॥ ॥
दंत्याश्चतुःपलरसे पिष्टैर्दंतीशलाटुभिः ॥ तद्वत्प्रस्थो घृतात् गुल्मप्लीहपाद्वात्रिंशोथघ्नन् ॥ दंतीघृतं ॥ ॥ निकुंभकुंभकटुवक्का
थप्रस्थतक्रकल्कसंयुते सर्पिप्रस्थं पचेत्प्लीहकामलापाण्डुरोगघ्नन् ॥ निकुंभघृतं ॥ ॥ तत्वस्नुहीक्षीरधान्याम्लकंपिल्लारेवधः पला
शिकैः सैन्धवहिंगुपलोपेतैर्हविः कुडवंमभमि ॥ पक्कमस्मात्पिवेत्कर्षमुहंवीर्यन्नुपानकं ॥ सर्वगुल्मोदरप्लीहसिसंसनविडसंज्ञकं ॥ राम: ॥
॥ विडघृतं ॥ ॥ विडदाडिमसिंधूत्थं ऊनभृष्योषजीरकैः ॥ हिंगुसौवर्चलक्षारवृक्षाम्लवेतसैः ॥ बीजपूररसोपेतैः स ॥ ७८ ॥
पिर्दधिचतुर्गुणं ॥ साधितं नाम गुल्महप्लीहघ्नन्घृतं ॥ दाधिकघृतं ॥ ॥ नीलिनीत्रिफलारास्नावलाकटुकरोहिणी ॥ पचे

डङ्गं व्याघ्री चपलिकातिजलाढकैः ॥ मतः पादावशेषेणा घृतं प्रस्थं विपाचयेत् ॥ दध्नः प्रस्थेन संयोज्यं धात्रीफलरसेन च ॥ ततो
घृतपलं दद्याघवागर्भे उमिश्रितं ॥ जीर्णे सम्यग्विरिक्ते च भोजयेत्रसं भोजनं गुल्मकुष्ठोदरव्यंगशोथपाण्ड्वामयज्वरान् ॥ श्वित्रं
प्लीहानमानाहं घृतमेतद्व्यपोहति ॥ नलीघृतं ॥ कल्हारमुत्पलं पद्मं कुमुदं मधुयष्टिका ॥ पत्रकांवुनाथतत्काथं जीवनीयोथक-
ल्कितं ॥ घृतपकं नवनीतं रक्तपित्तासृग्गुल्मजित् ॥ दाहतृष्णाज्वरछर्दियोनिदोषहरं परं ॥ कल्हाराद्यघृतं ॥ ॥ पलासक्षारतोये
नसर्पिः सिद्धं पिवेच्च सा ॥ हरीतकीनागरमुस्तकराहेयवैर्वयस्यालवरोश्चकल्कैः ॥ सहिंगुभिः साधितमग्रसर्पिर्गुल्मार्शोहन्या
र्श्वगलेनिलोत्थे ॥ हरीतक्याद्यं घृतं ॥ कुशादिमूलपंचाज्यक्षीरमर्द्धोदकेश्रृतं ॥ रक्तपित्तप्रशमनं वेदानां चोपशाम्यति कु-
शादिमूलाद्यणायं च कल्कासपीवरीकामलकोत्तुसाधितं ॥ घृतं पयस्युत्वरापित्तश्रूलजित् सितामधुकाहृणावल्कसाधितं ॥
कुशाद्यं घृतं ॥ अथरात्रिफलाधान्याविडुंगं वव्याचित्रकैः ॥ कल्कीकृतैर्घृतं सिद्धं सक्षीरं वातगुल्मजित् ॥ अथराद्यं घृतं
॥ जले दशगुणे साध्यं त्रायमाणाश्चतुष्पलं ॥ पंचभागस्थितं पूतं कल्कैः संयोज्य कार्षिकैः ॥ रोहिणी कटुका मुस्तं त्रायमा-
णादुरालभाः ॥ द्राक्षामलकी वीरा जीवंती चंदनोत्पले ॥ रसश्चामलकानां च क्षीरस्य च घृतस्य च ॥ पलानि पृथगष्टाष्टौ
दत्वा सम्यग्विपाचयेत् ॥ पित्तगुल्मं रक्तगुल्मं विसर्पं पैत्तिकं ज्वरं ॥ हृद्रोगं कामलां कुष्ठं हन्यादेतद्घृतोत्तमं ॥ ॥

त्रायमाणाद्यंघृतं ॥ पिप्पलीपिप्पलीमूलंचव्यंचित्रकनागरैः ॥ पालिकेः सयवक्षारैर्घृतप्रस्थंविपाचयेत् ॥ क्षीरप्रस्थेनतत्स
र्पिर्हन्तिगुल्मंकफात्मकं ॥ क्षीरषट्पलकंघृतं ॥ सौवर्च्चलंपंचकोलंसैंधवंहपुषाविडं ॥ अजमोदांयवक्षारंहिङ्गुजीरकमौद्
भिदं ॥ कुस्मामज्जाजीपूतीकेकल्कीकृत्यपलाष्टकं ॥ शृंगवेररसंचक्रंघृतप्रस्थंसमीकृतं ॥ कृमिप्लीहोदराजीर्णज्वरगुल्म
प्रमेहनुत् ॥ वातरोगंतथाशोषंदौर्बल्यंवाग्निसंक्षयं ॥ महाषट्पलमातेकानृमिनन्त्यशानिवह्निरीन् ॥ महाषट्पलकंघृतं
॥ विशेषपरमंचास्याःश्व गुरक्तप्रभेदने ॥ पलाशक्षारतोयेनसर्पिःसिद्धंपिवेत्तुसा ॥ यस्मिन्नवसरेक्षारतोयंसाध्यंघृ
तादिषु ॥ फेनोद्गमस्यनिष्पत्तिनहृदुग्धसमाकृते ॥ सएवतस्यपाकस्यकालोनेतरलक्षणः ॥ पलाशक्षारघृतं ॥ इतिगुल्मा
धिकारः ॥ कसेरुकासेवलशृंगवेरप्रपौण्डरीकंमधुकंविशंच ॥ ग्रंथिश्चसर्पिःपयसापचेत्तैः क्षौद्रान्वितंपित्तहृदामय
घ्नं ॥ कसेरुकाद्यंघृतं ॥ श्रेयसीशर्कराद्राक्षाजीवकर्षभकोत्पलैः ॥ वलाखर्ज्जूरकाकोलीमेदायुग्मैश्चसाधितं ॥ सक्षीरंमाहिषं
सर्पिपित्तहृद्रोगनाशनं ॥ श्रेयसीहरीतकी ॥ श्रेयस्याद्यघृतं ॥ स्थिरादिकल्कवत्सर्पीः क्षीरेणेक्षुरसेपिवा ॥ द्राक्षारसे
नवापक्वंपित्तहृद्रोगनाशनं ॥ स्थिराद्यंघृतं ॥ त्र्यूषणंशतार्द्धवहरीतकीनांसौवर्चलास्यापिपलद्वयंच ॥ सिद्धंघृतंवक्ष
कंहिनाम्नाहृत्वासगुल्मोदरमारुतघ्नं ॥ वक्षकंघृतं ॥ शतार्द्धमभयानांतुसौवर्चलपलद्वयं ॥ पिबेत्कल्कैर्घृतप्र

॥राम १॥
॥७९॥

स्थंदत्वा क्षीरं चतुर्गुणं ॥ क्षीरवल्लभकं सर्पिस्तत्स्मात् हृद्रोगनाशनं ॥ घृतं वल्लभकं नाम श्रेष्ठं स्याद्दपतं त्वके ॥ क्षीरवल्लभकं घृतं
॥ ॥ पार्थस्य कल्कस्वरसेन सिद्धं शस्तं घृतं सर्वहृदामयेषु ॥ अर्जुनघृतं ॥ घृतं नागवलार्जुनांबु सिद्धं सयष्टीमधुकल्कपादं
॥ हृद्रोगशूलक्षतरक्तपित्तकासानिलासृक्शमयत्युदीर्णः ॥ वलाद्यंघृतं ॥ इति हृद्रोगाधिकारः ॥ पुनर्नवैरंडशतावरी
भिः पत्तूरवृश्चीववलांडुमाड्रिः ॥ द्विपंचमूलेन कुलत्थकेन यवैश्च तोयान्कथिते कषाये ॥ तैलं वराहर्क्षवसा घृतं च तैरेव क
ल्कैर्नवरोगश्च सिद्धं ॥ तन्मात्रयात्रप्रतिहं निपीतं शूलान्वितं मारुतमूत्रकृच्छं ॥ पुनर्नवाद्यमिश्रकः ॥ शतावरीकाशकुशाश्व
दंष्ट्राविदारकेक्षामलकेषु सिद्धं सर्पिः पयो वा सितया विमिश्रं कृच्छ्रेषु पित्तप्रभवेषु योज्यं ॥ शतावरीघृतं ॥ त्रिकंटकैरंडकु
शाश्मभीरुतर्कारिकेक्षुस्वरसेषु सिद्धं ॥ सर्पिर्गुडार्धांशयुतं प्रयोज्यं कृच्छ्राश्मरीमूत्रविघातदोषे ॥ अयं विशेषेण पुनर्विधे
यो सर्वाश्मरीणां प्रवरः प्रयोगः ॥ त्रिकंटकाद्यं ॥ इति मूत्रकृच्छ्राधिकारः ॥ ॥ धान्यगोक्षुरकं क्वाथकल्कपक्वं घृतं हितं ॥
मूत्राघाते मूत्रदोषे शुक्रदोषे च दाहरोग ॥ धान्यगोक्षुरकं घृतं ॥ चित्रकं सारिवा चैव वला कालानुसारिवा ॥ द्राक्षा विशा
ला पिप्पल्यस्तथा चित्रफला भवेत् ॥ तथैव मधुकं दद्याद्दद्यादामलकानि च ॥ घृताढकं पचेदेतैः कल्कैरक्षसमन्वितैः
॥ क्षीरद्रोणे जलद्रोणे तत्सिद्धं समवतारयेत् ॥ शीतं परिस्रुतं चैव शर्कराप्रस्थसंयुतं ॥ तुगाक्षीर्याश्च तत्सर्वं मतिमान्प्र

॥सा॰द॰घृ॰उ॥
॥ ८० ॥

तिमिश्रयेत् ॥ ततोमात्रांपिवेत्कालेयथादोषंयथावलं ॥ वातरेताःपित्तरेताश्लेष्मरेताश्चयोभवेत् ॥ रक्तरेताग्रथिरेताःपिवेदि
च्छन्नरोगनाः ॥ जीवनीयंवृंहणंचसर्पिरेतन्महावलम् ॥ प्रजाहितंचधन्यंचसर्वरोगापहंशिवं ॥ एतत्सम्यक्प्रयुञ्जानाःस्त्रीग
र्भंलभतेचिरात् ॥ असृग्दोषान्पिवेद्यापियोनिदोषसंहतान् ॥ मूत्रदोषेषुसर्वेषुकुर्यादेतच्चिकित्सितं ॥ चिवकाद्यंघृतं
॥ ॥विदारीवृषकोपृथ्वीमातुलुंगंचभल्लातं ॥ पाषाणभेदकस्तूरीवसुकोवशिरोनतः ॥ पुनर्नवावचाराह्नावलाचा
तिवलातथा ॥ कसेरुविशशृंगाटतामलक्यःस्थिरादयः ॥ शरेक्षुदर्भमूलंचकुशकाशौस्तथैवच ॥ पलद्वयंचसंहत्य
जलद्रोणेविपाचयेत् ॥ पादशेषेरसेतस्मिन्घृतप्रस्थंविपाचयेत् ॥ शतावरीस्तथाधात्र्याःस्वरसोघृतसम्मितः ॥ षट्
पलंशर्करायाश्चकार्षिकाण्यपराणिच ॥ यष्ट्याह्वपिप्पलीद्राक्षाकाश्मर्यंसपरूषकं ॥ एलादुरालभाकौंतीकुंकुमंनाग
केशरं ॥ जीवनीयानिश्चाष्टौचदत्वाचद्विगुणंपयः ॥ एतत्सर्पिर्विपक्वंशनैर्मृद्वग्निनाभिषक् ॥ मूत्राघातेषुसर्वेषुविशे
षात्पित्तजेषुच ॥ शर्कराश्मरिशूलेषुशोणितास्रभवेषुच ॥ हृद्रोगेपित्तगुल्मेचवातासृक्पित्तजेषुच ॥ कासश्वासक्षतोर
स्कधनुस्त्राभारकर्षितैः ॥ नस्याच्छर्दिमनवंपशोणितच्छर्दनेतथा ॥ रक्तेयक्ष्मण्यपस्मारेतथोन्मादेशिरोग्रहे ॥ योनिदो
षरजोदोषेशुक्रदोषेस्वरामये ॥ एतत्स्मृतिकरंवृष्यंवाजीकरणमुत्तमं ॥ पुत्रदंवलवर्णाढ्यंविदोषावातनाशनं ॥ पान

॥ राम: ॥
॥ ८० ॥

भोजनन्तस्य पुनक्कश्चिच्छक्तिर्न हन्यते ॥ विदारीघृतमित्युक्तं रसायनमनुत्तमं ॥ वसुकशिवमल्लिका ॥ वशिर् अपामार्ग ॥ ॥
विदारीघृतं ॥ औडार्द्धभागाः कर्त्तव्या भागः स्यात् क्षीरसर्पिषः ॥ शर्करायाश्च चूर्णं वडाक्षाचूर्णेन त्समं ॥ स्वयंगुप्ताफलं
चैव तथैव गोक्षुरकस्य च ॥ पिप्पलीनां तथा चूर्णं समभागं प्रदापयेत् ॥ तदैक– समानीयं खल्वे नातिविमथ्य च ॥ तस्यापा
णितलं चूर्णं लिहेत् क्षीरं ततः पिबेत् ॥ एतत्सर्पिः प्रयुञ्जानो शुद्धदेहो नरः सदा ॥ जरादोषान् जयेत्सर्वान् जयेच्चापि नमसडुजे
यान् ॥ जयेच्छोणितदोषांश्च वंध्यागर्भं लभेत च ॥ सर्पिरेतत्प्रयुंजानो योनिदोषात्प्रमुच्यते ॥ औडार्द्धभागघृतं ॥ इति मू
त्राघाताधिकारः ॥ पाषाणभेदो वसुको वशिरा क्षुरकस्तथा ॥ शतावरी श्वदंष्ट्रा च बृहती कंटकारिकाः ॥ कपोतवंकाम
लकी वंदनोशीरगुंठुकाः ॥ वृक्षादनी भल्लुकश्च वरुणाः शाकजं फलं ॥ यवाः कुलत्थाः कोलानि कतकस्य फलानि च ॥ ऊ
षकादिप्रतिवापमेषां क्वाथेश्वतं घृतं ॥ भिनत्ति वातसंभूतामश्मरीं क्षिप्रमेव तु ॥ कपोतवंका ॥ ब्राह्मी शाकं जं फलं जीव
यीशाकफलं ॥ ऊषकादिप्रतिवाप ॥ तद्यथा ॥ ऊषकसैंधवशिलजतुकाशिसद्वयहिंगुलितुत्थकं चेतिसृश्चते ॥ पाषाण
भेदाद्यंघृतं ॥ ॥ कुशः काशः शरोगुंडउत्कटो मोरटोमभित् ॥ दर्भो विदारी वाराही शालिमूलं त्रिकंटकः ॥ भल्लूकः पा
टला पाठा पत्तूरोथ कुरुंटिका ॥ पुनर्नवे शिरीषश्च क्वथितास्तेषु साधितं ॥ घृतं शिलाह्वमधुकैर्बीजैरिंदीवरस्य च ॥ त्रपुसै

वीरुकादीनांवीजैश्चावापितंशुभं ॥ कुशकाशसरतेंडानजस्योनाकपाषाणभित् ॥ द्वितीयकुश · विदारकंद · वाराही · शालिधा
न्यमूल · गोक्षुर · कुरंटक · पाटलापाठा · वकमस्योनाक · पुनर्नवाशिरीष · प्रत्येकमूर्वा प्रत्येकंपल १ जलपल ६४ शेषपल १६
गोघृतपल १६ ॥ अथकल्क ॥ शुद्धशिलाजतु: ज्येष्ठीमधुक · इंदीवर · त्रपुसिवीजं ॥ सर्वारुवीजप्रत्येकंकर्ष १।१ दत्वापचे
त् भिनत्तिपित्तसंभूतामश्मरींक्षिप्रमेवच ॥ वीजपीत · मानरोविजयसारोत्कुवीजवा: ॥ कुशाद्यंघृतं ॥ गरोवरणकाद्दो
त्पल्वेलाहरेणभि: ॥ कुष्ठभंडादिमरिचचित्रकैः समुराहयै: ॥ वरुणाग्निगल: शिग्रुमधुशिग्रुतर्कारीमेषशृंगीपूतीक
नक्तमालमोरटाग्निमंथसैरियकद्वयाविम्वीवसुकंवसिर · चित्रशतावरीविल्वाजशृंगीदर्भोवृहतीद्वयंचेति सुश्रुते · गु
ग्गुलु · एला · राजपुत्री · कुष्ठकाश्मरी · मरिचचित्रक · देवदारु · एतैः सिद्धं ॥ एतैः सिद्धमजासर्पिरूषकादिगणेनवा ॥ भिन
त्तिकफसमश्मरींक्षिप्रमेवच ॥ भंडादि · सेनचात्रेक्षोगणः स्यामादिकोवुधैः ॥ वरुणाद्यघृतं ॥ पंचमूल्यास्तृणाख्याया
स्तथागोक्षुरकस्यच ॥ पृथक्दशपलान्भागान् जलद्रोणेविपाचयेत् ॥ चतुर्भागावशिष्टेनघृतप्रस्थंविपाचयेत् ॥
गुडंगोक्षुरवीजंचकल्केनतत्रप्रदापयेत् ॥ तत्सिद्धंमूत्रदोषघ्नंशर्कराश्चाश्मरीघ्नंच ॥ स्नेहनेभोजनेचैवप्रयोज्यंसर्पिरु
त्तमं ॥ शालीक्षुकुशकासाह्वशायकेक्षुरणापंचकमिति ॥ तृणपंचमूलाद्यघृतं ॥ कुलत्थसिंधुत्थविडंगसारसशर्क

॥ राम: ॥
॥ ८१ ॥

रं शीतलियावथ्यकं ॥ वीजानि कूष्मांडकगोक्षुराभ्यां घृतं पचेत्तद्गहरत्यासनेतोये ॥ दुःसाध्यसर्वाश्मरिमूत्रकृच्छ्रमूत्राभिघातं च समूत्र
वंधं ॥ एतानि वाश्मलनिहंति शीघ्रं प्ररूढवृक्षानिव वज्रपातः ॥ कुलत्थाद्यं घृतं ॥ शरादिपंचमूल्याः क्वाथेन पचेत् घृ
तं ॥ प्रस्थं गोक्षुरकल्केन सिद्धं दद्यात्सशर्करं ॥ अश्मरीमूत्रकृच्छ्रघ्नं रेतोरोगरुजापहं ॥ शरोक्षुजकुशकाशनलश्चमूलपं
चकरिति ॥ शरादिपंचमूलाद्यं घृतं ॥ वरुणस्य तुलां क्षुण्णां जलद्रोणे विपाचयेत् ॥ पादशेषं परिश्राव्य घृतप्रस्थं विपा
चयेत् ॥ वरुणं कदली विल्वं तृणजं पंचमूलकं ॥ अमृतां चाश्मभेदं च वीजं च त्रपुसस्य च ॥ शतपर्वीतिलक्षारं पलाशक्षार
मेव च ॥ यूथिकायाश्च मूलानि कार्षिकानि समाचरेत् ॥ अस्य मात्रां पिवेज्जंतुर्देशकालाद्यपेक्षया ॥ जीर्णे वास्मिन् पिवेत्पू
र्वेणु जीर्णे तु मस्तुना ॥ अश्मरी शर्करां चैव मूत्रकृच्छ्रं च नाशयेत् ॥ वरुणाद्यं घृतं ॥ इत्यश्मर्यधिकारः ॥ दाडिमस्य च
वीजानि कृमिघ्नस्य च तंदुलाः ॥ रजनी चविका जाजी नागरं त्रिफला करणा ॥ त्रिकंटकस्य च फलं यवानी धान्यकं तथा ॥ वृ
क्षाम्लं च विकालोधा सिंधुद्भवसमाहितैः ॥ कल्कैरक्षसमैरेभिः घृतं प्रस्थं विपाचयेत् ॥ भोज्ये पाने प्रदातव्यं सर्वकृच्छ्रे च
मात्रया ॥ प्रमेहान् विंशतिं चैव मूत्राघातं तथाश्मरीः ॥ कृच्छ्रं सुदारुणं चैव वहन्या दत्तं न संशयः ॥ विवंधानाहशूलघ्नं
कामलाज्वरनाशनं दाडिमाद्यं घृतं नाम अश्विभ्यां परिकीर्तितं ॥ दाडिमाद्यं घृतं ॥ कंटकार्यास्तु रूप्याश्च संहरेच्च शत

॥ सा॰ट॰प॰उ ॥
॥ ८२ ॥

तं शतं ॥ संकुट्टोलूखले विप्रा वकृड्डीरां भमेः पचेत् ॥ तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ॥ त्रिकटु त्रिफला रास्ना विडङ्गान्यथ चित्रकं ॥
काश्मर्यो राणां च मूलानि पूतिकस्य त्वगेव च ॥ कलिङ्गा इति सर्वाणि सूक्ष्मविषानि कारयेत् ॥ अक्षमात्रं पिबेत् प्राज्ञः शालिभिः पयसा हितैः ॥
प्रमेहं मधुमेहं च मूत्रकृच्छ्रं ॥ भगन्दरं ॥ आलसं वात्रकूड्डिं च कुष्टरोगविशेषतः ॥ क्षयं चैव निहन्त्येतन्नाम्ना सिंहामृतं घृतं ॥ सिंहामृतं घृ-
तं ॥ दशमूलकरञ्जौ द्वौ देवदारु हरीतकी ॥ वर्षाभूर्वरुणो दन्ती चित्रकं सपुनर्नवाः ॥ सुधानिंवकदंवाश्च विल्वं भल्लातकानि च ॥ शटी
पुष्करमूलं च पिप्पलीमूलमेव च ॥ पृथग्दशपलान् भागान् एतान्तोयार्मणे पचेत् ॥ यवकोलकुलत्थानां प्रस्थं प्रस्थं विपाचयेत् ॥ तेन
पादावशेषेण घृतप्रस्थं विपाचयेत् ॥ निचुलं त्रिफला भार्गी रोहिषं गजपिप्पली ॥ शृङ्गवेरं विडङ्गानि वचा कंपिल्लकं तथा ॥ गर्भेणा-
नेन तत्सिद्धं पाययेत्तु यथाबलं ॥ एतद्धान्वन्तरं नाम विख्यातं सर्पिरुत्तमं ॥ कुष्ठं प्रमेहं गुल्मांश्च श्वयथुं वातशोणितं ॥ प्लीहोदराणि
वांशांसि विद्रधिं पिटकाश्च या ॥ अपस्मारं तथोन्मादं सर्पिरेतन्नियच्छति ॥ पृथक्तोयार्मणे त्वत्र पचेद् ध्यार्द्धं तं शतं ॥ शतत्रयाधि-
केनोपेष्युत्सर्गक्रमतो भवेत् ॥ धान्वन्तरं घृतं ॥ अर्जुनपटोलनिंवैः सवचादीप्यकसमंजिष्ठैः ॥ भल्लातकागरुपत्रैः सगदानलचन्द-
नोशीरैः ॥ गोक्षुरकं सामवल्कैर्निंवपटोलैर्हरिद्रयावर्या ॥ असनककार्ज्जुनाम्बुदीप्यकशुक्रैनवैकलो― रा ॥ मंजिष्ठातिविषाभ्यां
कल्ककषायैः पचेत्तैलं कफवातोत्थमेहे पित्तकृते साधयेत्सर्पिः ॥ अर्जुनाद्यं घृतं तैलं ॥ इति प्रमेहाधिकारः ॥ ॥ दशमूलतुलार्द्ध

॥ रामः ॥
॥ ८२ ॥

तैस क्षारैः पंचकोलिकैः सिद्धं घृतं नाड्डपात्रं हिमसृणभदरगुल्मप्रम ॥ दशमूलषट्पलकं घृतं ॥ चतुर्गुणो जले मूत्रे द्विगुणो चित्रकोस्य
ले ॥ कल्के सिद्धं मघृतं सक्षारं जठरी पिबेत् ॥ चित्रकं घृतं ॥ स्नुक्क्षीरदंतीत्रिफलाविडंगसिंहीत्रिवृच्चित्रककर्षकल्कं ॥ घृतं विप
क्वं कुडवप्रमाणं तोयेन तस्याक्षमथाड्डकर्षं ॥ पीतोह्लमं भोजपिवेविरक्ते पेयारसं वा विनरेहि धिज्ञः ॥ नाराचमेतज्जठरामयानामुक्तो
पयुक्तं शमनं प्रदिष्टं ॥ नाराचघृतं ॥ त्रिफलाचित्रकोदंतीत्रिवृहन्तीकंठकारिका ॥ स्नुहीसार्कविडंगानि घृतमस्य कुडवं पचेत् ॥ नस्य
कुदग्निनासिद्धं कर्षाड्डपाययन्नरः ॥ शोथगुल्मोदरानाहप्लीहोदकदकोदरान् ॥ नाशयत्युल्वणानेतान् सर्पिर्नाराचसंज्ञितं ॥ ना
राचकं घृतं ॥ पयस्याष्टगुणोसर्पिः प्रस्थं स्नुक्पयसः पले ॥ त्रिवृता पलषट्केण सिद्धं जठरगुल्मजित् ॥ स्नुह्नाद्यं घृतं ॥ अर्कक्षी
रपले हे स्नुहीक्षीरपलानि षट् ॥ पथ्याकंपिल्लकं श्यामाशम्याकागिरिकर्णिका ॥ नीलनीत्रिवृतादंतीशंखिनीचित्रकं तथा ॥ ए
तेषां पलिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥ अथास्य मलिने कोष्ठे बिंदुमात्रं प्रदापयेत् ॥ यावंतोस्य पिबेद्बिंदुं तावद्वेगान्विरिच्यते ॥
स्नुह्यर्कपयसोरत्रपाकार्थोनुपपन्नितः ॥ चतुर्गुणं जले देयं सनंतो बिंदुसर्पिषि ॥ कुष्ठं गुल्ममुदावर्त्तं श्वयथुं सभगंदरं ॥ शमयत्युद
रान्स्वेत्तोवृक्षमिंद्राशनिर्यथा ॥ एतद्बिंदुघृतं नाम येनाभ्यक्तो विरिच्यते ॥ बिंदुघृतं ॥ पिप्पलीपिप्पलीमूलचव्यचित्रकशृंगवेर
सैंधवानां परिभागाः ॥ घृतप्रस्थं तदेकस्थं तुल्यक्षीरं विपाचयेत् ॥ एतत्षट्पलकं नाम प्लीहाग्निसादगुल्मोदावर्त्तश्वयथुपांडुरोग

॥ सा॰द॰घृ॰ ॥
॥ ८३ ॥

श्वासकासप्रतिस्याय्योर्द्ध्ववातविषमज्वरानपहंति ॥ षट्पलकं घृतं ॥ चिरविल्वत्वचक्काथः मार्ड्कस्वरसं घृतं ॥ मस्तुभल्लातकं क्काथ
मुक्तं चैवाम्लकांजिके ॥ एतैस्तुल्यघृतं कृत्वा कल्कैरेभिश्च पादिकैः ॥ ग्रंथिकाव्योषहपुषाहिंग्वजाजीहयं तथा ॥ चव्याजमोदसक्षारे
तथा लवणपंचकं ॥ श्रेयसीचेतिमृदुनानस्साध्यमनलेनवा ॥ वह्निषट्प्रस्थमेतत्तु जठरानलदीपनं ॥ प्लीहोदराध्मानहरं वा
तोदरदकोदरं ॥ कफवातकृतेचैव शूले तीव्रप्रशस्यते ॥ अर्शांसि नाशयत्याशुकृमिजानि विशेषतः ॥ सुपांडुरोगिणां कुष्ठानि दद्रुकु
ष्ठानि यानि च ॥ अन्यानपि च कुष्ठानि कोष्ठस्थानलवद्दहेत् ॥ वह्निषट्प्रस्थघृतं ॥ चित्रकस्य तुलाक्काथे घृतप्रस्थं विपाचयेत्
॥ आरनालं तु द्विगुणं दधिमंडं चतुर्गुणं ॥ पंचकोलकतालीसंक्षारौ लवणसंयुतैः ॥ द्विजीरकनिशायुग्मैर्मरिचं तत्र दापयेत्
॥ प्लीहगुल्मोदराध्मानपांडुरोगारुचिज्वरान् ॥ वस्तिहृत्पार्श्वकट्यूरुशूलोदावर्त्तपीनसान् ॥ हन्यात्पीतन्नर्शांसि शोथं प्रदीपनं प
रं ॥ बलवर्णकरं चापि भस्मकं च नियच्छति ॥ चित्रकघृतं ॥ शिलाह्वयेनागरकालशाकं काकादनीमूलनिदिग्धिकां च ॥ पंचैव वद
यालवणानि हिंगु कृत्वा च तैरक्षसमैः पृथक्पृथक् ॥ प्रस्थं घृतस्याथ पचेच्च वस्यचतुर्गुणं मूत्रमतः प्रदापयेत् ॥ पयश्च दत्वा द्वि
गुणं विपक्वं तदुलत्तुप्रवदंति सर्पिः प्लीहोदरं हृष्यमथोदरं च अभ्यस्यमानं जठरं निहंति ॥ ब्रह्मघृतं ॥ हरीतकीत्वचश्चैषां पला
नां पंचविंशतिः ॥ कोलं द्विप्रस्थसंयुक्तं कषायमुपकल्पयेत् ॥ पलिकैः पंचकोलैस्तु तत्तुल्यं चापि सात्वया ॥ रोहीतकत्वचाकृष्टे

॥ राम: ॥
॥ ८३ ॥

घृतप्रस्थं विपाचयेत् ॥ प्लीहाभिवृद्धिं समयेदेतदाशुप्रयोजितं ॥ अत्र क्षुण्णरोजले निःक्वाथाचतुर्भागावशेषकर्त्तव्यः ॥ ॥
रोहितकं घृतं ॥ रोहितकात्पलशतं संक्षुण्णं वदराढकं ॥ साधयित्वा जलद्रोणे चतुर्भागावशेषितं ॥ घृतप्रस्थं समामागच्छा
गक्षीरं चतुर्गुणं ॥ सस्मिन्नस्वीशिटद्याशिप्रदद्यात्कार्षिकानि च ॥ व्योषं फलत्रिकं हिंगु यवानी तुंबुरुं विडं ॥ अजाजी कृष्णलव
णं दाडिमं देवदारु पुनर्नवा विशालं च यवक्षारं सपौष्करं ॥ विडंगं चित्रकं चैव हपुषा कारवी वचा ॥ एतैर्घृतं विपक्वं तु विद
ध्याच्छाजनेनवै ॥ पाययेत्रिफलामात्रां व्याधिर्बलमवेक्ष्य च ॥ रसकेनाथ यूषेण पयसा वा घृतं पिवेत् ॥ प्रयुक्तं तु घृतं तेषां व्याधि
न्हन्यादिमान्बहून् ॥ यकृत्प्लीहोदरं चैव प्लीहशूलं तथैव च ॥ हृच्छूलं कुक्षिशूलं च पार्श्वशूलमरोचकं ॥ विवंधशूलं शमये
त्पांडुरोगं सकामलं ॥ छर्द्दनीरशूलघ्नं तंद्रीज्वरनिवारणं ॥ रोहितकं घृतं हेतत्प्लीहघ्नं श्रेष्ठमौषधं ॥ महारोहितकं घृतं ॥
पिप्पलीचित्रकामूलीपिष्ट्वा सर्पिर्विपाचयेत् ॥ घृतं चतुर्गुणं क्षीरं यकृत्प्लीहोदरापहं ॥ पिप्पलीघृतं ॥ पिप्पलीकल्कसंयुक्तं घृ
तक्षीरं चतुर्गुणं ॥ पिवेत्प्लीहाग्निसादादियकृद्रोगहरं परं ॥ पिप्पलीघृतं ॥ बिल्वाग्निचव्यार्द्रकंसिंगवेरक्वाथेन कल्केन च
सिद्धमाज्यं ॥ सच्छागदुग्धं ग्रहणीगदोत्थशोथाग्निसादारुचिरिहृद्दहं ॥ बिल्वघृतं ॥ इत्युदराधिकारः ॥ पुनर्नवापत्रसनाल
मूलसंक्षुण्णतोयार्मनसेषसिद्धं ॥ चतुर्थभागेन घृतं विपक्वं प्रस्थं तु तत्कल्कपलाष्टकेन ॥ संसेवितं वा भवते सरोगान् सर्वांश्च

शोथानपिदुस्तरांश्च ॥ गुल्मोदरप्लीहगदोद्भवानिनिहंतिवह्निंकुरुतेहिपुंसां ॥ पुनर्नवाद्यंघृतं ॥ पुनर्नवाचित्रकदेवदारुपंचोष
णक्षारहरीतकीनां ॥ कल्केनपक्वंदशमूलतोयेघृतोत्तमंशोथनिवारणंच ॥ पुनर्नवाद्यंघृतं ॥ सचित्रकाधान्ययवानिपाठसदी
प्यकात्र्यूषणचेतसाम्लाः ॥ बिल्वात्फलेदाडिमयावशूकंसपिप्पलीमूलमथापिचव्यं ॥ पिष्ट्वाक्षमात्राणिजलाढकेवपक्त्वाघृतप्र
स्थमथोपयुंज्यात् ॥ अर्शांसिगुल्मंश्वयथुंचकृच्छ्रंनिहंतिवह्निंकुरुतेचदीप्तं ॥ चित्रकाद्यंघृतं ॥ क्षीरेघृतंचित्रककल्कलिप्ते
दध्यागतंसाधुविमथ्यतेन ॥ तज्जंघृतंचित्रकमूलगर्भंतक्रेणसिद्धंश्वयथुघ्नमग्र्यं ॥ अर्शोतिसारानिलगुल्ममेहान्स्तद्धंतिसंव
र्द्धयतेचवह्निः ॥ चित्रकाद्यंघृतं ॥ माणकक्वाथकल्काभ्यांघृतप्रस्थंविपाचयेत् ॥ एकजंद्वंद्वजंशोथंत्रिदोषंचव्यपोहति ॥
माणकघृतं ॥ स्थलपद्मपलान्यष्टौत्र्यूषणस्यचतुःपलं ॥ घृतप्रस्थंपचेदेतैर्दत्वाक्षीरंचतुर्गुणं ॥ पंचकासान्हरेक्षीप्रंशो
थंचैवसुदुस्तरं ॥ स्थलपद्मकंघृतं ॥ रसेनविपचेत्सर्पिःपंचकोलकुलत्थयोः ॥ पुनर्नवायाःकल्केनतत्परंशोथनाशनं ॥ ॥
पंचकोलघृतं ॥ इतिशोथाधिकारः ॥ शतपुष्पामृतादारुचंदनंरजनीद्वयं ॥ जीरकैलैवचानागत्रिफलागुग्गुलुत्वचं ॥ मांसी
कुष्ठंपत्रकैलारास्नामृतंगीवचित्रकं ॥ कृमिघ्नमश्वगंधाचशैलेयंकटुरोहिणी ॥ सैं[illegible]वंनगरंचैवकुटजातिविषे:समै ॥ ए
तैश्चकार्षिकैःकल्कैर्घृतप्रस्थंविपाचयेत् ॥ वृषपिंडितकैरंडनिवपत्रभवोरसः ॥ कठकार्यास्तथाक्षीरंप्रस्थंप्रस्थंविनिक्षि

येन ॥ सिद्धमेनेन घृतेन पीतेन मंत्रवृद्धिपित्तवृद्धिंमेदोवृद्धिमथापिवा ॥ मूत्रवृद्धिं श्लीपदं च यकृत्प्लीहानमेव च ॥ शतपुष्पाघृतं चै
नद्धन्यादेव न संशयः ॥ शतपुष्पाद्यघृतं ॥ इति वृध्याधिकारः ॥ वचाशठीहरिद्रे द्वे देवदारुमहौषधं ॥ हरीतकीमतिविषामु
स्तकं इन्द्रयवान्समान् ॥ एतान् दशपलान्भागान् चतुर्द्रोणेम्भसि पचेत् ॥ चतुर्भागावशेषेण द्रवैरेतैः पलोन्मितैः ॥ सुश्लक्ष्णा
पिष्टैर्मतिमान् घृतप्रस्थं विपाचयेत् ॥ क्षौडं वह्निगतां देयं अपराणि पलानि षट् ॥ यथाबलं पिबेत्कामं यथेष्टाहारमेव च ॥ गं
डमालां निहन्त्याशु च दुर्वर्षसमुद्भवां ॥ कासश्वासान्निहन्त्याशु प्रतिश्यायं सकामलं ॥ वचाद्यघृतं ॥ इति गंडमालाधिकारः ॥
सुरसा देवकाष्ठं च त्रिफला त्रिकटुं गजाः ॥ लवणानि च सर्वाणि विडंगान्यथ चित्रकं ॥ चविकापिप्पलीमूलं गुग्गुलु हपुषा च
वः ॥ यवाग्रजः सपाठा च ग्रंथिलेहद्रुदारुकं ॥ कल्कैश्च कार्षिकैरेतैर्घृतप्रस्थं विपाचयेत् ॥ दशमूलीकषायेण धान्ययूषद्रवेण च
॥ दधिमंडसमायुक्तं प्रस्थं प्रस्थं पृथक्पृथक् ॥ पक्वं तद्घृतं कल्कां पिबेत्कर्षत्रयं हविः ॥ श्लीपदं कफवातोत्थं मांसरक्ताश्रितं
च यत् ॥ मेदस्थितमभिघातोत्थं हन्यादेव न संशयं ॥ अपचीं गंडमालां च अंत्रवृद्धिं तथार्बुदं ॥ नाशयेद्ग्रहणीदोषं श्वयथुं गु
दजान्यपि ॥ परमग्निकरं हृद्यं कोष्ठक्रिमिविनाशनं ॥ घृतं सौरेश्वरं नाम श्लीपदं हन्ति दारुणं ॥ जीरकेण घृते हेयन्तद्रोगारली
कविनाशनं ॥ सौरेश्वरं घृतं ॥ दंतीमूलं फलं दयात्त्रिवृन्मूलफलं तथा ॥ त्रिफलातिविषाचित्रविडंगाद्यं पलोन्मितं ॥ स्नुही

क्षीरसमात्रकंघृतस्यकुडवंपचेत् ॥ विंडुमात्रोपयोगेनवेगःसम्प्रपजायते ॥ डुर्वारान्श्लीपदांस्तेनहंतिदार्वेशनिर्यथा ॥ दंतीघृतं
॥ छिपलंकुडदारस्यतदर्द्धंचमहौषधं ॥ पिप्पलीत्रिफलादार्वीचित्रकंसपुनर्नवं ॥ एतैरर्द्धपलैर्भागैघृतप्रस्थंविपाचयेत्
॥ श्लीपदंनाशयत्याशुगण्डस्योपरमौषधं ॥ आमकत्तेकटीशूलेशोथेपाण्डुमयेषुच ॥ अग्निंचदीपयेत्याशुबलवर्णाग्निव
र्द्धनं ॥ कृष्णादानकघृतं ॥ इतिश्लीपदाधिकारः ॥ सिद्धंवरुणादिगणेनविधिनाततक्काथकाल्केनसर्पिः ॥ सिद्धतेरणास्नामि
तंभिषजासद्योग्निदायकं ॥ शिरसंस्थूलमशेषंविद्राधिमंतस्थंगुल्ममपहरति ॥ पंचविधिविद्रध्यगदंशमयतिवारिद्रुकैर्वरु
णाकघृतं ॥ इतिविद्रध्यधिकारः ॥ नक्तमालस्यपत्राणिवरुणानिफलानिच ॥ सुमनायाश्चपत्रीणिपटोलारिष्टयोस्तथा
॥ देहरिद्रेमधूच्छिष्टंमधूकंतिक्तरोहिणी ॥ प्रियंगुकुशमूलंचनिचुलस्यत्वगेवच ॥ एतेषांकार्षिकैर्भागैघृतप्रस्थंविपाचये
त् ॥ दुष्टव्रणप्रशमनंतथानाडीविशोधनं ॥ सद्यछिन्नव्रणानांतुकरंजाद्यमिदंशुभं ॥ करंजाद्यंघृतं ॥ गौराहरिद्रामंजि
ष्ठामांसीमधुकमेवच ॥ प्रपौंडरीकंह्रीवेरंभद्रमुस्तंसचंदनं ॥ जातीनिंबपटोलंचकरंजंकटुरोहिणी ॥ मधूच्छिष्टंमधूकंच
महामेदास्तथैवच ॥ पंचवल्कलतोयेनघृतप्रस्थंविपाचयेत् ॥ एषगौरोमहावीर्यःसर्वव्रणविशोधनं ॥ आगंतुसह
जाश्चैवसुचिरोत्थौचयेव्रणाः ॥ विशातिमपिनाडीचशोधयेत्क्षिप्रमेवच ॥ गौरंहरिजालंकेविंतुप्रियंगुदारुहरिद्राच ॥

गौराद्यं घृतं ॥ न्यग्रोधोडुंवराश्वत्थवदरीप्लक्षदाडिमैः ॥ पृथक् त्रिपलिकैर्भागैर्मूलवल्कलपल्लवैः ॥ जलद्रोणे विपक्तव्यं यावड्
वावशेषितं ॥ पलार्द्धकल्कैरेतैश्च घृतप्रस्थं विपाचयेत् ॥ द्वे हरिद्रे मधुच्छिष्टं मधुकं कटुरोहिणी ॥ करंजवीजपत्राणि मंजिष्ठा
मयसारिवे ॥ सुमनापुष्पमूलानि पटोलारिष्टचंदनं ॥ एतेष्वेव घृतं पानेशस्त्रपानावरोहणे ॥ असाध्यामर्मलग्नाश्च नाड्यश्चास्त्वं
स्रवंति ये ॥ घृतप्रयोगमासाद्य असाध्यामपि रोहयेत् ॥ सस्थूलास्यास्यगंभीरं नाडीदुष्टव्रणापहं ॥ सर्वव्रणचिकित्सायां न्यग्रो
धाद्यं प्रशस्यते ॥ न्यग्रोधाद्यं घृतं ॥ जातीनिंवपटोलपत्रकटुकादार्वीनिशासारिवा ॥ मंजिष्ठाभयसिक्थतुत्थमधुकैर्नक्ता
ह्ववीजैः समैः ॥ सर्पिःसिद्धमनेन सूक्ष्मवदनामर्माश्रिताश्रावरा गंभीरासरुजोव्रणासगतिकाशुध्यंति रोहंति च ॥ वृद्धवैद्योप
देशेन पारंपर्योपदेशतः ॥ सिद्धे जातिघृते क्षेपः कर्त्तव्यः सिक्थस्य हि ॥ जातिकाद्यं घृतं ॥ तिक्तासिक्थनिशायष्टिनक्ता
ह्वफलपल्लवैः ॥ पटोलमालतीनिंवपत्रैर्व्रणप्रशस्तं घृतं ॥ तिक्ताद्यं घृतं ॥ नक्तमालस्य पत्राणि तरुणानि फलानि च ॥ सुम
नायाश्च पत्राणि पटोलारिष्टयोस्तथा ॥ द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी ॥ मंजिष्ठाचंदनोशीरमुत्पलं सारिवे त्रिवृत् ॥ ए
तेषां कर्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥ दुष्टव्रणप्रशमनं तथा नाडीप्रशोधनं ॥ सद्यछिन्नव्रणानां च करंजाद्यमिदं घृतं ॥
करंजाद्यघृतं ॥ उभे हरिद्रे मंजिष्ठा मधुकं लोध्रकट्फलं ॥ कंपिल्लकछभेदे लांगलीमूलमेव च ॥ पिप्पली त्रिफला चैव निंवपत्र

॥सा.द.घ.उ॥
॥८६॥

श्वकार्षिकैः॥कल्कैपेष्टैघृतप्रस्थंपचेत्तद्विगुणंपयः॥पलद्वयंचसिक्थस्यसिद्धेपूतेप्रदापयेत्॥लांगलीकंघृतंनामव्रणानां
रोपणपरं॥अग्निदग्धेविसर्पेचकीटलूताव्रणेषुच॥विरोथेषुचदुष्टेषुनाडीमर्मास्थितेषुच॥लांगलीघृतं॥प्रपौण्ड
रीकंमंजिष्ठामधुकोशीरपद्मकैः॥सरिद्रैःपचेत्सर्पिसक्षीरंव्रणरोपणं॥प्रपौण्डरीकाद्यंघृतं॥इतिव्रणाधिकारः॥
श्यामात्रिभंडीत्रिफलासुसिद्धंहरिद्रयोस्तिल्वकहृक्ष्यकेन॥घृतंसदग्धव्रणानर्परोहन्वाफटंकोष्णानापियास्यात्॥
॥श्यामाघृतं॥दग्धव्रणाधिकाकरंजनिंबाशनशालजंबूवटादिभिकल्कसिद्धं॥सर्पिर्निहन्यादुपदंशदोषंसदा
हयाकश्रुतिरागपक्कं॥करंजाद्यंघृतं॥भूनिंबनिंबत्रिफलापटोलकरंजधात्रीखदिराशनानां॥सतोयकल्कैघृत
मासुपक्वंसर्वोपदंशापहरंप्रदिष्टं॥भूनिंबाद्यं॥घृतानियानिवक्षानिकुष्ठेनाशंव्रणोत्वणे॥उपदंशेप्रयोज्यानिसेका
भ्यंजभोजनैः॥इत्युपदंशाधिकारः॥श्रीवासकंसर्जरसंलोध्रकंपित्वकंतथामनशिलांयवानीचगंधपाषाणमेवच
॥पलिकैश्चरितैरेतैघृतप्रस्थंविपाचयेत्॥सर्पीसपक्कमभ्यंगाद्घोरंकंडूव्यपोहति॥श्रीवासाद्यं॥निंबपटोलदा
र्वीत्रिरालभातिक्करोहिणीत्रिफला॥कुर्याद्द्विपलांशपलंपर्पटंत्रायमाणांच॥वृसंवत्सकबीजंकल्की[illegible]द्रकार्षि
कान्भागान्॥नवसर्पिषश्चषट्पलमेतत्सिद्धंघृतंपथ्यं॥कुष्ठंज्वरगुल्म——ग्रहणीपांड्वामयंचपठु॥पामाविसर्पपि

॥राम:॥
॥८६॥

टिकाकं हृत्कंडनुत्सिद्धं ॥ तिक्तषट्पलं ॥ निंबपटोलं व्याघ्रिं वगुडूचीं वासकैं तथा ॥ कुर्याद्दशपलान्भागानेकैकस्य सुकुट्टितान्
जलद्रोणे विपक्तव्यं यावत्पादावशेषितं ॥ घृतप्रस्थं पचेत्तेन त्रिफलागर्भसंयुतं ॥ पंचतिक्तमिदं सर्पिख्यातं कुष्टविनाशनं ॥ पंचतिक्त
कं ॥ निंबामृतावृषपटोलनिदिग्धिकानां पक्कं घृतं कथितकल्कयुतं यथावत् ॥ ख्यातं यथोक्तममृतं भवि पंचतिक्तं हन्याद्विसर्प
विषमज्वरपांडुकुष्टं ॥ द्वितीयपंचतिक्तं ॥ त्रिफलाद्विनिसावासापर्पटं च सकुलकान् ॥ त्रायंती कटुकानिंवप्रत्येकं द्विपलोन्मि
तान् ॥ क्वाथयित्वा जलद्रोणे पादशेषेण तेन तु ॥ घृतप्रस्थं पचेद्ध्यक्षैः पिप्पलीघनचंदनैः ॥ त्रायंतीन्द्रजभूनिंबवत्सत्वचीतं
तिक्तकं घृतं ॥ हंति कुष्टज्वरार्शांसि श्वयथुं ग्रहणीगदान् ॥ पांडुरोगं विसर्पं च क्लीवानामपि शस्यते ॥ तिक्तकं ॥ सप्तछदं प्रति
विषां संपाकं तिक्तरोहिणीं च ॥ पाठामुस्तमुशीरं त्रिफलापटोलपिचुमंदपर्पटकं धवयवासकचंदमुपकुल्यो पद्मकं रजन्यौ
॥ षड्ग्रंथा सविशालो शतावरी सारिवे चोभे ॥ वत्सकबीजं वासामूर्वाममृताकिराततिक्तकं च ॥ कल्कान्कुर्यान्मतिमान्यष्ट्याह्वत्रा
यमाणां च ॥ कल्कस्य चतुर्थांशो जलमष्टगुणं रसोमृताफलानां ॥ द्विगुणो घृतात्प्रदेयस्तत्सर्पिपाययेत्सिद्धं ॥ कुष्टानि रक्त
पित्तप्रबलान्यर्शांसि रक्तवाहिनी ॥ सविसर्परक्तपित्तं वातासृक् पांडुरोगं च विस्फोटकान्सपामानुन्मादं कामलां ज्वरं कंडूं
॥ हृद्रोगं गुल्मपिटकामसृग्दरं गंडमालां च ॥ हन्यादेतत्सद्यः पीतं कालेय शपलां भागा जलद्रोणे विपाचयेत् ॥ तेन

पादावशेषेणघृतप्रस्थंविपाचयेत् ॥ त्र्यूषणंत्रिफलाकुष्ठंरजनीद्वयचित्रकं ॥ दारुपाठाजजहाचपिप्पलीमूलवत्सकं ॥ भल्लातकं
यवक्षारोमंजिष्ठात्रिविषास्थिराः ॥ वचाज्योतिष्मतीकुष्ठंसारिवाद्वयरोहिणी ॥ विडंगगरलजिकाक्षारोशतपुष्पाचकार्षिकाः ॥ भाग
न्सममावाप्यपंचगुग्गुलुपंचभिःपलैः ॥ सम्यक्सिद्धंपाययेतएतकुग्गुलुतिक्तकं ॥ विधिनाहंतिनचिरात्दोषानतिदुस्तरान् ॥ वि
र्गांस्त्वाप्रसकोवक्रेदंवतिस्थिराणिच ॥ पित्तश्लेष्मसमुत्थानिवातानासृग्भवानिच ॥ गंडमालार्बुदंव्यंगनाडूष्टभगंडरान् ॥
विषमज्वररुड्रोगगरदूषिविषक्रमात् ॥ प्रमेहासृग्दरोन्मादशोथगुल्मोदराणिचकामलापांडुरोगांश्चक्षिप्रमेवव्यपोहति ॥
गुग्गुलुपंचतिक्तकं ॥ पटोलवासकारिष्टनक्तमालाःसहाना ॥ निःक्वाथ्यसलिलेद्रोणेपलैर्विशतिभागिकैः ॥ पादशेषेर
सेतस्मिन्घृतःप्रस्थंविपाचयेत् ॥ कल्कैरक्षसमैरेभिस्त्रिफलात्र्यूषणादिभिः ॥ पृथ्वीकात्रिविषापाठाचवेंड्रयवदीप्यकैः
दुर्वीतरदराजीववचाकृमिहरैर्युतैः ॥ कटुकासप्तपर्णीभ्यांपुरस्याष्टपलेनतु ॥ कुष्ठानिरक्तपित्तंचविसर्पंहूतिकोष्णतां ॥ व्रणा
प्रणाशयत्येतत्कुग्गुलोपंचतिक्तकं ॥ वासागुडूचीत्रिफलापटोलकरंजविंबाशनकृष्णवेत्रं ॥ तत्क्वाथकल्केनघृतंविपक्वंतद्व
ज्रकंकुष्ठहरंप्रदिष्टं ॥ विशीर्णकर्णांगुलिहस्तपादकृम्यर्दितानासिन्नगलोपिमर्त्यैः ॥ पौराणिकीकांतिमुदस्यजीवेदव्याहतोव
र्षशतंवकुष्ठी ॥ वज्रकं ॥ वासागुडूचीत्रिफलापटोलनिदिग्धिकानिंवकरंजतोयैः ॥ वासादिकल्केनतुसिद्धमेतद्घृतंमहावज्रक

मादिशंति ॥ तस्मात्समात्रंचवनिपीयमानः हिनाशिनो नातिचिरेण कुष्ठः ॥ विशीर्णकर्णांगुलिनासिकोपि भवेत्समंपूर्णतनुः शरीरः
॥ उदीर्णवेगां न पि चप्रमेहां चिरप्रवृत्तां विषमज्वरांश्च ॥ तदेवसर्पिः सततंप्रयुक्तं विजित्य कुष्ठं बलमादधाति ॥ महावज्रकं ॥ ॥
खदिरारग्वधव्योषत्रिवृद्दन्तीसचित्रकं ॥ पतलत्रिफलारिष्टहरिद्रावाकुचीफलं ॥ कटुकातिविषापाठात्रायन्तीधन्वयासकं ॥ कु
ष्टकं जवी जातिसारिवे द्वे सवत्सके ॥ भल्लातकविडंगानि गुग्गुलोकल्कसंयुतं ॥ पंचतिक्तकषायेण पचेत्सर्पिर्विचक्षणः ॥ वि
षविस्फोटवीसर्पकण्डूकुष्ठव्रणानि च ॥ दद्रुकीटभकुष्ठानि गलगंडं विचर्चिकां ॥ पानतः शमयत्याशु वृक्षमिंद्राशनिर्यथा ॥
खदिराद्यं ॥ खदिरस्य तुलां पंचशिंशपाशनयोस्तुले ॥ चतुर्द्धा सर्व एवैते करंजारिष्टवेतसां ॥ पर्पटंकुलकं चैव वृषं कृमिहरं त
था ॥ हरिद्रे कृतमालं च गुडूचीत्रिफलात्रिवृत् ॥ सप्तपर्णं च संक्षुद्य चतुर्थांशेन वारिणा ॥ पक्त्वा कषायं संगृह्य चतुर्भागावशे
षितं ॥ धात्रीरसं तुलांशं च सर्पिषश्चाढकं पचेत् ॥ कल्कीकृतैर्महातिक्तकद्रव्यैरर्द्धपलोन्मितैः ॥ महाखदिरमेतत्तु कुष्ठनाशनमुत्त
मं घृतं ॥ अष्टादशाभिधं कुष्ठं पानादेव व्यपोहति ॥ महाखदिरकं ॥ त्रिफलामदनं कुष्ठं शाकेस्याद्रजनीद्वयं ॥ काकादनीका
कनासा चप्रसातिविषा वचा ॥ पाठाकोशातकीमूर्वा तिक्ता काकादनी घृतं ॥ कुष्ठातुरं करोत्येतन्मृजन्मपि निर्गदं ॥ [illegible]ला
द्यं ॥ मेषशृंगपमत्ना काकजंघागोक्षुरसाधितं ॥ पानाभ्यंगे वातकुष्ठे तैलं वा ज्योहितं मतं ॥ धवाश्वकर्णककुभमसमंगालोध्रपर्प

॥ सा॰ द॰ घृ॰ ॥
॥ ५८ ॥

टैः ॥ पलाशनिंबमधुकैः ससिद्धं पिष्टकुष्टिनां प्रियालोग्नंतावचाकुष्टैः सालसप्ताह्वचित्रकैः ॥ सारग्वधोषरौः सिद्धं घृतं वकपत्कुष्टिनां
॥ पथ्याविडंगभल्लातसिद्धं वा सर्वकुष्टिनां ॥ खदिरस्य पलान्यष्टौ सोमराज्यापलद्वयं ॥ जलाढकद्वयं साध्यं यावत्पादावशेषितं ॥
क्वाथमानेवमन्दग्नौ घृतप्रस्थं विपाचयेत् ॥ वकुः पलं सोमराज्याः खदिरस्य पलं भिषक् ॥ कल्काथ कटुकाचाथ कार्षिकान्
श्लक्षाञ्चूर्णितान् ॥ पलद्वयं कौशिकस्य शुद्धस्यात्र प्रदापयेत् ॥ सिद्धसर्पिर्नाशयति श्वित्रमंभमिवानलं ॥ अष्टादशानां कुष्टा-
नां परमं भेषजं मतं ॥ आमवातापतंत्राणां पांडुप्रदरस्पेषिणां ॥ किलासमेहकंडूघ्नं दीपनं पावनं तथा ॥ सोमराजीघृतं नाम नि-
र्मितं ब्रह्मणा पुरा ॥ सोमराजी ॥ त्रिफलाढकं प्रस्थौ शवयोरसनौमतौ ॥ वायसी काकमाचीभ्यां द्वे तुले शंखिनी तुला ॥ छि-
डोरोणापचेदेतस्पैव भागावशेषितं ॥ घृतप्रस्थं तु विपचेत्कर्मैश्चैव समाचयेत् ॥ वरुणेन्द्रयवव्योषमार्कवोदारु वाकुची ॥ नि-
दिग्धिकाभृंगराजपाठावत्सपदीशमी ॥ नीलीकं नाम विख्यातं घृतं कुष्ठविनाशनं ॥ चित्राणि रंजयेच्चैतत्त्वानाम्यंजनपूजितं ॥
पामाविचर्चिकासिध्माकिटिभानि च नाशयेत् ॥ खल्वमिलि ॥ आरग्वधं वायसीव सुरसा मदयंतिका ॥ एकैकस्य तुलां पात्रे प-
लं वाढकत्रयं ॥ दंतीदारुहरिद्रा च कुटजं वरुणात्वचं ॥ चित्रकं चार्कमूलानि वाकुची सनिदिग्धिका ॥ एषां दशपला भागाश्च-
तुर्द्रोणेंभसः पचेत् ॥ अष्टभागावशिष्टं तु पूतं पुनरधिश्रयेत् ॥ दधिसर्पिश्च दुग्धं च गोमूत्रं च शकृद्रसः ॥ आढकाढकमेते

॥ राम: ॥
॥ ५८ ॥

षांगर्भे चैनं समावपेत् ॥ अवल्गुजं त्रिकटुकं नक्तमालफलानि च ॥ किराततिक्तकं श्यामा नीलिनी नीलमुत्पलं ॥ एतैः सिद्धं परि
स्राव्यं पाययेचित्ररोगिणः ॥ महानीलमिति ख्यातमेतत् श्वित्रापहं परं ॥ भगंदरं तथार्शांसि कृमीनपि विनाशयेत् ॥ अष्टा
दशानि कुष्ठानां सर्पिरेतच्चिकित्सितं ॥ अथर्वहितोदीप्ताव्रह्मदंडुश्चवाहितः ॥ विशेषतश्च चित्राणि तं जयंति भिनत्ति च ॥
प्रयोगतः सेव्यमानः पानमाभ्यंजनेन च ॥ महानीलीघृतं ॥ मधूसिक्थकसैंधवघृतगुडमहिषाक्षशालनिर्यासैः ॥ गैरिक
कनकक्षीरैः पादस्फुटनापहो लेपः ॥ अत्रं सर्वसमो घृतं ॥ इति कुष्ठाधिकारः ॥ वृषषदिरपटोलनिंबत्वगमृतामलकीक
षायकल्कैः ॥ घृतमभिनवमेतद्दशपक्वं जयति विसर्पमहास्रकुष्ठगुल्मान् ॥ वृषाद्यं ॥ द्वेहरिद्रे स्थिरा मूर्वा सारिवा चंद
नद्वयं ॥ मधुकं मधुपर्णी च पद्मकं पद्मकेशरं ॥ उशीरमुस्तं मेदा त्रिफलापंचवल्कलैः ॥ कल्कैरक्षसमैरेभिर्घृतप्रस्थं वि
पाचयेत् ॥ विस्फोटविषविसर्पकुष्ठकृच्छ्राणां गुणापह ॥ गौराद्यमिति विख्यातं सर्पिश्रेष्ठमुत्तमं ॥ गौराद्यं ॥ इति विसर्पाधि
कारः ॥ पद्मकं मधुकं लोध्रं नागपुष्पं च केशरं ॥ द्वेहरिद्रे विडंगानि सूक्ष्मैलातगरं तथा ॥ कुष्ठं लाक्षापत्रकं च शिक्थकं तुत्
थमेव च ॥ वकुवारशिरीषं च दधित्थफलमेव च ॥ तोयेनालोड्यतत्सर्वैघृतप्रस्थं विपाचयेत् ॥ पार्श्वरोगान्निहंत्याशु तं वि
वोधमहाम्भे ॥ सर्पकीटाः खुदंष्ट्रेषु नालमूत्रकृतेषु च ॥ विविधेषु च विस्फोटे तथा दुष्टविसर्पिषु ॥ नाडीव्रणगंडमाला

नुप्रभिन्नास्तु विशेषतः ॥ आम्लीकाभिहितं पथ्यं पद्मकं तु घृतं मतं ॥ पद्मकं घृतं ॥ पयेलनिंवहृद निंववासां फलत्रिकां ॥ छिन्नरु
हाविपक्वं ॥ नस्यं च तिक्तं शमयत्यु दीर्णं त्रिदोषविस्फोटविसर्पकंडूः ॥ निंवोत्र पूनिंवः ॥ पंचतिक्तकं ॥ इति विस्फोटाधिकारः ॥
कृत्वा दार्वीकषायं च कल्कैरेभिः पचेद् घृतं ॥ दशमूली बलां पथ्यां कुष्ठं रास्नां विभीतकीं ॥ दावीत्वग्नक्तमालेश्च समंजिष्ठेस्तु पेषि
तैः ॥ अपक्वां पाचयत्याशु पक्वां चैव विशोधयेत् ॥ शुद्धानां शमं यांति सेकादेव मसूरिकाः ॥ दार्वीघृतं ॥ मसूरीषु प्रयुंजीत
गोराद्यं पद्मकं तथा ॥ निंवशिरीषकं वापि भिषक्तत्र च कर्मसु ॥ इति मसूरिकाधिकारः ॥ भृंगराजरसे पक्वां शिखिपित्तेन
कल्कितं ॥ घृतं नस्येन पलितं हत्वा स्नाहयोगतः ॥ भृंगराजः ॥ पटोलपत्रत्रिफलारसांजनं विपाचितं ॥ पीतं घृतं नाशय
ति कुष्ठमप्याहि पूतनं ॥ पटोलाद्यं घृतं ॥ इति क्षुद्ररोगाधिकारः ॥ क्षीरमेषां जले क्वाथ्य जांगलैर्मृगपक्षिभिः ॥ पृथक्चैर्विमि
श्रैर्जलजै वातघ्नैरोषधैरपि ॥ हिमे क्षीरावशिष्टेन घृतमुत्पादयत्ततः ॥ अश्वगंधासितानंतामधुकं चंदनं तथा ॥ अवा
च्यविपचेद्भूयो दशक्षीरं च तं घृतं ॥ नस्यप्रयुक्तमुदकान्याति श्यायानयोहति ॥ गोजावीमहिषीरांतु मृगेकशफशांत
था ॥ वडवाहस्तिनीचोष्ट्री नार्याश्च दशमस्मृतः ॥ एषां क्षीरजले क्वाथ्य पुनः मृगपक्षिभिः ॥ मांसरसैश्च संमिश्य पुनर्जल
जैः पृथक्क्वाथैश्च ॥ पुनः वातघ्नैरोषक्वाथैश्च संमिश्य पक्वा घृतमुत्पादयत्तेन च पुनः ॥ अश्वगंधा चंदनः सारिवा यष्टिमधु

कं रक्तचंदनकल्कं दत्वा पुनर्विपचेत् ॥ तद्घृतं नस्यार्थदेयं ॥ दूर्वाक्षीरघृतं ॥ इति नासारोगाधिकारः ॥ पटोलं कटुकां दार्वी
निंबवासा— फलत्रिकं ॥ दुरालभां पर्पटकं त्रायंतीं च पलोन्मितं ॥ प्रस्थमामलकानां च क्वाथयेन्नल्वनेंभसि ॥ तेन पादावसेषेण
घृतप्रस्थं विपाचयेत् ॥ कल्कैर्भूनिंबकुटजमुस्तयष्ट्याह्वचंदनैः ॥ सपिप्पलिकैस्तत्सिद्धं चक्षुष्यं शुक्रयोर्हितं ॥ घ्राणक
र्णाक्षिवर्त्मत्वङ्मुखरोगव्रणापहं ॥ कामलाज्वरवीसर्पगंडमालापहं परः ॥ पटोलाद्यं ॥ द्राक्षाचंदनमंजिष्ठाकाकोली
द्वयजीरकैः ॥ सिताः शतावरीमेदाभद्राक्षमधुकोत्पलैः ॥ पचेज्जीर्णघृतप्रस्थं समं क्षीरं पिचून्मितैः ॥ हंति नक्तं कतिमि
रं रक्तराजीशिरोरुजं ॥ द्राक्षाद्यं ॥ शशकस्य शिरः कल्के शेषांगं क्वथिते जले ॥ साधयेत्कुडवं सर्पिः पूरणाच्चाजकापहं ॥
शशाकं ॥ शशकस्य कषायेण घृतप्रस्थं विपाचयेत् ॥ कल्कं दद्यात् सुक्षीरं यथोक्तान् कर्षसंमितान् ॥ सारिवा मधुकं लाक्षा
चंदनं नीलमुत्पलं ॥ बलाचातिबलाचैव मृणालं पत्रकं तथा ॥ कार्षिकं सविषालोध्रं जीवनीयगणान्वितं ॥ घृतमेतत्प्रयो
क्तव्यं पाने नस्ये च पूरणे ॥ अजकामर्जुनं च पटलं शुक्रमेव च ॥ तथाक्षिरोगान्सकलानपि तान्नरो जयेत् ॥ बृहच्छशकाद्यं ॥
त्रिफलाक्वाथकल्काभ्यां सपयस्कं घृतं शृतं ॥ तिमिराण्यचिराद्धन्यात्पीतं तद्वि निशामुखे ॥ त्रिफलाद्यं ॥ १ ॥ त्रिफलाव्यो
षसिन्धूत्थे घृतं सिद्धं पिबेन्नरः ॥ चक्षुष्यं भेदनं हृद्यं दीपनं कफनाशनं ॥ त्रिफलाद्यं ॥ २ ॥ फलत्रिकाभीरुकषायसिद्धं क

ल्कंनयष्टीमधुकांनयष्टीमधुकांशयुक्तं ॥ सर्पिसमं क्षौद्रचतुर्थभागं हन्यात्त्रिदोषंतिमिरंछुडुस्तरं ॥ त्रिफलाद्यं ॥ ३ ॥ त्रिफला
त्रूषणंद्राक्षामधुकंकटुरोहिणी ॥ प्रपौंडरीकंसूक्ष्मेलाविडंगंनागकेशरं ॥ नीलोत्पलंसारिवेद्वेचंदनंरजनीद्वयं ॥ कार्षिकैः
पयसाचतुर्गुणंत्रिगुणंत्रिफलारसं ॥ घृतप्रस्थंपचेदेतत्सर्वनेत्ररुजापहं ॥ तिमिदोषसास्रावंकामलांकाचमर्वुदं ॥ विसर्पपट
लंकंडुरक्तंचश्वयथुंतथा ॥ खालित्यंपलितंचैवकेशानांपतनंतथा ॥ विषमज्वरमर्शांशुक्रंचाशुव्यपोहति ॥ अन्येचवह
वोरोगानेत्रजावर्त्मजाश्चये ॥ तान्सर्वान्नाशयत्याशुभास्करस्तिमिरंयथा ॥ नचैवास्मात्परंकिंचिद्भेषजंकाश्यपादिभिः ॥ दृ
ष्टिप्रसादनंदृष्टंयथास्यात्त्रैफलंघृतं ॥ मध्यमत्रिफलाद्यं ॥ ४ ॥ त्रिफलायारसप्रस्थंप्रस्थंभृंगरसस्यच ॥ वृषस्यचरसं
प्रस्थंशतावर्याश्चतत्समं ॥ अजाक्षीरंगुडूच्याश्चआमलक्यारसस्तथा ॥ प्रस्थंप्रस्थंसमाहृत्यसर्वैरेभिर्घृतंपचेत् ॥ कल्कै
कणासिताद्राक्षात्रिफलानीलमुत्पलं ॥ मधुकंक्षीरकाकोलीमपर्णीनिदिग्धिकाः ॥ तत्साधुसिद्धंविज्ञायशुभेभांडेनिधाप
येत् ॥ ऊर्ध्वपानमधपानंमध्येपानंचशस्यते ॥ यावंतोनेत्रजारोगास्तान्पानादपकर्षति ॥ अरक्तेरक्तदुष्टेचरक्तेचातिश्रुतेपि
च ॥ नक्तांध्येतिमिरेकाचेनीलिपटलार्वुदे ॥ अभिष्यंदेधिमंथेचपक्ष्मकोपेचदारुणे ॥ नेत्ररोगेषुसर्वेषुवातपित्तकफेषु
च ॥ अदृष्टिमंददृष्टिंचकफवातप्रदूषिकान् ॥ स्रवंतोवातपित्ताभ्यांसकंडारसन्नदूरदृक् ॥ गृध्रदृष्टिकरंसद्योवलव

र्णाग्निवर्द्धनं ॥ सर्वनेत्रामयान्हन्यात्त्रिफलाद्यंमहाघृतं ॥ महात्रिफलाद्यं ॥ ५ ॥ शतमर्कहरीतक्याद्विगुणंचविभीतकं ॥ धात्री
फलानांचत्वारिद्वृषभंगकयोःसमं ॥ चतुर्गुणोदकंदत्वाशनैर्मृद्वग्निनापचेत् ॥ चतुर्भागास्थितंज्ञात्वातदेवमंवतारयेत् ॥
शर्करामधुकंद्राक्षामधुयष्टिनिदिग्धिकाः ॥ काकोलीक्षीरकाकोलीत्रिफलानागकेशरं ॥ पिप्पल्यंवंदनंभस्तत्रायमा
णोत्पलैःसह ॥ घृतप्रस्थंसमंक्षीरंकल्कैरेतैर्विपाचयेत् ॥ हन्यात्क्षतिमिरंकाचं — क्ताध्यंशुक्रमेवच ॥ नासास्रावंच
कण्डूंचस्वपथुंचकषायतां ॥ कलुषत्वंचनेत्रस्यविद्धर्मपटलात्मकं ॥ यस्यचोपहतादृष्टिःसूर्याग्निभ्यांप्रपश्यति ॥ तस्येत
द्भेषजंप्रोक्तंमूर्द्धजत्रगदापहं ॥ यथादर्शीमलेनीतैर्निर्मलत्वंप्रपद्यति ॥ तद्वदेतेनपीतेनदृष्टिर्निर्मलतांव्रजेत् ॥ दारि
द्रौराद्वयंचैववृषभंगकयोस्तुते ॥ ६ ॥ कृष्णमसशर्कराद्राक्षाचतुर्थमधुयष्टिकां ॥ एकद्वित्रिचतुर्थांशाभागास्सर्वेषुकल्पि
ताः ॥ द्विगुणाचशतावर्यात्रिफलापीतसारयोः ॥ रसेनप्रस्थंसंयोज्यंद्विरजाक्षीरसंयुतं ॥ मृद्वग्निनापचेद्धीमादर्व्वी
संघट्टयन्बुधः ॥ भास्कराद्यासिर्दसर्पिर्ब्रह्मणानिर्मितंपुरा ॥ तिमिरंशुक्तिकांहन्तिपिच्छान्माधुषितानिच ॥ अदृष्टिंम
ददृष्टिंचदिवानक्तांध्यमेवच ॥ विपरीतंचयःपश्येद्दूरमासन्नमेवच ॥ अस्योपयोगादत्यंतंसंहारानतिवर्त्तयेत् ॥ व
यस्तंभनमायुष्यंवलीपलितनाशनं ॥ प्रदरंचक्षयंश्वासंशुक्रंमूत्रमलान्नितग् ॥ पीतसारवीजपसारं ॥ भास्करं ॥

पटोलं कटुका दार्वी निंववासाफलत्रिकं ॥ दुरालभं पर्पटकं त्रायंती घनचंदनं ॥ किराततिक्तयष्ट्याकं पिप्पलीकौटजं फलं ॥
लामजकं मृणालं चोत्पलं च समं भवेत् ॥ एतैस्तु कार्षिकैः कल्कैर्विपचेत्सर्पिरुत्तमं ॥ आमलक्यारसो देयः शतावर्या सम
न्वितः ॥ सुरदारुवराणां च भृंगराजरसस्तथा ॥ प्रस्थं प्रस्थं च गृह्णीयाद्विप्रस्थं सर्पिषः पचेत् ॥ पाने च भोजने देयात्सर्वमूर्द्धाम
यापहं ॥ विशेषादक्षिरोगघ्नं तिमिरं च त्रिदोषजं ॥ पटलं रक्तराजीं च व्रणाशुक्रहरं तथा ॥ कावार्मनक्तमाध्यं च कंडूपित्ताम
यापहे ॥ वर्त्मशोथहरं चैव दृष्टिपुष्टिविवर्द्धनं ॥ घृतं महापटोलाद्यं रव्यातं वैदेहनिर्मितं ॥ महापटोलाद्यं ॥ रास्नापलत्र
यं क्वाथे दशमूले च तत्कृते ॥ कल्केन जीवनीयानां घृतं तिमिरनाशनं ॥ रास्नाद्यं ॥ विभीतकाभयाधात्रीपटोलारिष्टवा
सकैः ॥ पक्वमेभिघृतं सर्वान्नक्षिरोगान्व्यपोहति ॥ षडंगः ॥ आजे घृतं क्षीरपात्रं मधुकं चोत्पलानि च ॥ जीवकर्षभकौ चैव
पिष्ट्वा सर्पिर्विपाचयेत् ॥ सर्वनेत्राभिघातेषु सर्पिरेतत्प्रशस्यते ॥ आजं घृतं ॥ इति नेत्ररोगाधिकारः ॥ यष्टिमधुबलारा
स्नासमूलं क्वाथलेहे ॥ मधुरैश्च घृतं सर्वमूर्द्धजत्रुगदां जयेत् ॥ यष्ट्याद्यं घृतं ॥ दशमूलवरारास्नामधुकैस्त्रिफलैः
सह ॥ मयूरपक्षपित्तांत्रयकृन्न्यास्यवर्जितः ॥ जलेपक्वा घृतप्रस्थं तस्मिन् क्षीरसमापचेत् ॥ मधुरैः कार्षिकैः कल्कैः
:शिरोरोगार्दितापहं ॥ कर्णनासाक्षिजिह्वास्यगलरोगविनाशनं ॥ मायूरमिति विख्यातं मूर्द्धजत्रुगदापहं ॥ मायूराद्यं ॥

आखुभिः कुक्कुटैर्हंसैः शशैश्चापि चबुद्धिमान् ॥ कल्केमानेन विपचेत्सर्पिर्हृद्ग्रहरां विदुः ॥ एतेनैव कषायेन घृतप्रस्थं
विपाचयेत् ॥ चतुर्गुणेन पयसा कल्कैरेभिश्च कार्षिकैः ॥ जीवंतित्रिफलामेदामृद्विकार्द्धिपरूषकैः ॥ समंगाचविकाभा
र्गीकाश्मरीकुक्कुटाह्वयैः ॥ आत्मगुप्तामहामेदातालखर्जूरमस्तकैः ॥ रास्नास्थिराचामलकीसूक्ष्मैलाशटिपौष्करैः ॥
पुनर्नवातुगाक्षीरीकाकोलीधन्वयासकैः ॥ मधुकाक्षोटवातामगुंजानाभिषुकैरपि ॥ द्रव्यैरेतैर्यथालाभं पूर्वकल्केन
साधितं ॥ पानेनस्येन तथाभ्यंगे वस्तौ चैव प्रयोजयेत् ॥ शिरोरोगेषु सर्वेषु कासे श्वासे सुदारुणे ॥ मन्यापृष्ठग्रहे शोषे स्व
रभेदे तथार्दिते ॥ योन्यसृक्शुक्रदोषेषु शस्तं वंध्यासुतप्रदं ॥ महामायूरमित्येतद् घृतमात्रेयपूजितं ॥ महामायूरघृतं
॥ बलाबिल्वशृते क्षीरे घृतप्रस्थं विपाचयेत् ॥ तस्य शुक्तीप्रकुंचं वा नस्यं शीर्षगतेनिले ॥ बलाद्यं ॥ मधुकमधुक
विडंगैः सभृंगराजैर्नागरैः घृतं सिद्धं ॥ षड्बिंदुनस्यदानेन नतच्छीर्षामयरुग्न्यात् ॥ पततां शिरोरुहाणां दंतानां भ्रंस्यतां
दृढीकरणं ॥ नागसुपर्णप्रतिमं करोति दृष्टिं बलं चापि ॥ षड्बिंदुः ॥ इति शिरोरोगाधिकारः ॥ काश्मर्यवटशुंगा
निपथगंद्यात्तथैव च ॥ घृतसिद्धं पिबेच्छ्रेष्ठं शोणितप्रदरापहं ॥ काश्मर्यादिघृतत्रयं ॥ अशोकवल्कलप्रस्थं
तोयाढकविपाचितं ॥ चतुर्भागावशिष्टं तु कषायमवतारयेत् ॥ तंडुलांबु तथाजाक्षीरं घृतं तुल्यं प्रदापयेत् ॥ जीव

॥ रा·द·घ·उ
॥ ९२ ॥

कस्वरसश्चापिकेशराजभवस्तथा ॥ जीवनीयैःप्रियालैश्चपरूषैःसरसांजनैः ॥ यष्ट्याह्वाशोकमूलंवामृद्वीकाचशतावरी ॥ तं
डुलीयकमूलंवकल्कैरेभिःपलार्द्धकैः ॥ शर्करायाःपलान्यष्टौगर्भंदत्वातुमूर्छितं ॥ पुष्पयोगेनतत्सर्पिशनैर्मृद्वग्निनापचेत् ॥
पीतमेतद्घृतंहन्यात्सर्वदोषसमुद्भवं ॥ श्वेतंनीलंतथाकृष्णंप्रदरंहन्तिदुस्तरं ॥ कुक्षिशूलंकटीशूलंयोनिशूलंचसर्वगं ॥ मं
दाग्निमरुचिंपांडुकृशानांश्वासकासिनां ॥ आयुःपुष्टिकरंधन्यंबलवर्णप्रसादनं ॥ देयमेतद्वरंसर्पिर्विष्णुनापरिकीर्तितं
॥ अशोकघृतं ॥ कुमुदपद्मकोशीरंगोधूमारक्तशालयः ॥ मुद्गपर्णीपयस्याचकाश्मरीमधुयष्टिका ॥ बलातिबल
योर्मूलमुत्पलंतालमस्तकं ॥ विदारीशतपुष्पीचशालपर्णीसजीवका ॥ फलत्रप्रसवीजानिअपक्वंकदलीफलं ॥ एषां
मर्द्धपलान्भागान्गवीक्षीरंचतुर्गुणं ॥ पानीयंद्विगुणंदत्वाघृतप्रस्थंविपाचयेत् ॥ प्रदरेरक्तगुल्मेचरक्तपित्तेहलीमके ॥
बहुरूपंचयःशीतंकामलांवातशोणितं ॥ अरोचकेज्वरेजीर्णेपांडुरोगेमदेभ्रमे ॥ नह्राणांवाल्पपुष्पायायोचगर्भंन
विंदति ॥ अहन्यहनिचस्त्रीणांभवतिप्रीतिवर्द्धनं ॥ शीतकल्याणकंनामपरमुक्तंरसायनं ॥ फलचिफला ॥ शीतकल्याणकं
॥ शतावरीरसप्रस्थेक्षोदयित्वाचपीडयेत् ॥ घृतप्रस्थंसमायुक्तंक्षीरद्विगुणितंतथा ॥ अथकल्कानिमान्दद्यात्कार्षि
काश्लक्ष्णापेषितान् ॥ जीवयानियान्यष्टौयष्टीचंदनपद्मकैः ॥ स्वदंष्ट्रावात्मगुप्ताचबलानागबलातथा ॥ शालपर्णीपृ

॥ राम: ॥
॥ ९२ ॥

पर्णीविदारीसारिवाह्वयं॥शर्कराचसमादेयाकाश्मर्याचफलानिच॥सम्यक्सिद्धंतुविज्ञायशीतेनतदवतारयेत्॥रक्तपित्तवि
कारेषुवातपित्तकृतेषुच॥वातरक्तंक्षयंश्वासंहिक्काकासंचदुर्जयं॥अंगदाहंशिरोदाहंरक्तपित्तसमुद्भवं॥असृग्दरंसर्वभवं
मूत्रकृच्छ्रंचदारुणं॥एतान्रोगाञ्छमयतिभास्करस्तिमिरंयथा॥शतावरीघृतं॥मुद्गमाषस्यनिर्यूहेरास्नाचित्रकनागरैः
:॥सिद्धंचपिप्पलीबिल्वैःसर्पिश्रेष्ठमसृग्दरे॥नागरोत्रमुस्ता॥मुद्ग॥शाल्मलीपुष्पनिर्यासप्रछिपरोतिथैवच॥का
श्मर्यचंदनंचैवकल्केनस्वरसेनच॥एभिःपचेद्घृतप्रस्थंमवतीर्यसुसीतलं॥पिबेत्सर्पिरिदंनारीसर्वप्रदरशान्तये॥
शाल्मली॥काश्मरीवरीचटशृंगाम्बुगुडूचीमधुकंघृतं॥आजेनपयसासिद्धमेतत्घृतमसृग्दरं॥काश्मरी॥इतिप्रदरः
॥तृस्वीत्रिफलाभीरुपृथकनाशांहयेः॥श्रीपर्णीमज्जकेनाक्षासमर्दकविल्वकैः॥पहृषकांचितेरक्षाःसमेप्रस्थोघृता
न्विते॥योगीवातविकारघ्नोगर्भदःपरमोभवेत्॥गर्भ॥लक्ष्मणाचंदनेलोध्रंउशीरंपद्मकंशटी॥देहरिद्रेवचाकुष्टं
पद्मकेशरमूलकं॥सादिवेहेविडंगानिसुमनाकुसुमानिच॥मांसिदारुस्वडंष्ट्राचरेणुकंचोत्पलंतथा॥मधुकशतपुष्पा
चमात्रैषाकार्षिकीभवेत्॥एभिर्गव्यघृतप्रस्थंक्षीरंदत्वाचतुर्गुणं॥तत्कषायंदशगुणंस्नेहपाकविधिंपचेत्॥तत्पानात्सम्प्र
वक्ष्यामिघृतस्यास्यमहात्मनः॥गर्भिणीनांचनारीणांचपानाभ्यंजभोजनैः॥बालानांग्रहदुष्टानांघृतमेतत्प्रशाम्यते॥

वंध्यापुत्रप्रदंश्रेष्ठंमपुत्राणांचपुत्रकं ॥ श्रेष्ठंवयोगिरोगेस्यादसृग्दरविनाशनं ॥ ब्रह्मणानिर्मितंह्येतल्लक्ष्मणाद्यंघृतंमहत्
॥ लक्ष्मणाद्यं ॥ सहाचरेद्वेत्रिफलागुडूचीसपुनर्नवा ॥ शुकनाशाहरिद्रेद्वेरास्नामेदासतावरी ॥ कल्कीकृत्यघृतप्र
स्थंपचेत्क्षीरंचतुर्गुणं ॥ तत्सिद्धंपाययन्नारीयोनिशूलनिपीडितां ॥ पीडितानिसृताश्चैववलिताविवृताचया ॥ पि
त्तयोनिश्चविभ्रांतावड्ढयोनिश्चयास्मृता ॥ प्रपद्यंतेनतःस्थानंगर्भंगृह्णातियासकृत् ॥ एतत्फलघृतंनामयोनिदो
षहरंपरं ॥ फलघृतं ॥ मंजिष्ठंकुष्ठंहरिद्रेद्वेपिप्पलीकटुरोहिणी ॥ काकोलीक्षीरकाकोलीविडुंगंत्रिफलावचा ॥ मेदा
रास्नाश्वगंधाचविशालाचप्रियंगुका ॥ द्वेशारिवेशताह्वाचदंतीमधुकमुत्पलं ॥ अजमोदामहामेदाचंदनंरक्तचंदनं
जातीपुष्पंतुगाक्षीरंशर्कराहिंगुकटुफलं ॥ एतैरक्षसमैर्भागैर्घृतप्रस्थंविपाचयेत् ॥ चतुर्गुणेनपयसाविपचेत्कोमलाग्निना ॥ न
क्षत्रेणचसंपन्नेभांडेताम्रमयेदृढे ॥ कलशेवापिकल्याणेकृतकौतुकमंगले ॥ सर्पिरेतन्नरःपीत्वास्त्रीषुनित्यंवृषायते ॥ ए
तद्वंध्यापिवेन्नारीयाचकन्याप्रजायिनी ॥ याचैवास्थिरगर्भास्याद्यचसूत्वापुनःस्थिता ॥ अनायुषंवाजनयेद्यावाजनयेत्मृ
तं ॥ नादृशंजनयेत्पुत्रंवेदवेदांगपारगं ॥ रूपलावण्यसंपन्नंमदार्शतायुषं ॥ नाम्नाफलघृतंह्येतद्भारद्वाजेनभाषि
तं ॥ अनुक्तंलक्ष्मणामूलंक्षिपंत्यत्रचिकित्सकाः ॥ जीवद्वत्सैकवर्णायाघृतमत्रगृह्यते ॥ अरण्यगोमयेनात्रवह्नि

ज्यात्तविधिस्मृतः ॥ फलघृतं ॥ मंजिष्टामधुकंकुष्टंत्रिफलाशर्करावला ॥ मेदापयस्याकाकोलीमूलंचैवास्वगंधकं
अजमोदाहरिद्रेद्वेहिंगुकटुकरोहिणी ॥ उत्पलंकुमुदंद्राक्षाकाकोल्यौचंदनद्वयं ॥ एतेषांकार्षिकेभागेघृतप्रस्थंविपाच
येत् ॥ शतावरीरसंक्षीरंघृताद्देयंचतुर्गुणं ॥ सर्पिरेतंनारःपीत्वास्त्रीषुनित्यंवृषायते ॥ पुत्रांजनयतेनारीमेध्यंचप्रियदर्शी
ना ॥ याचैवास्थिरगर्भास्यायावाजनयतेमृतं ॥ अल्पायुषंवाजनयेयावाकन्यांप्रसूयते ॥ योनिदोषेरजोदोषेपरिस्रावेच
शस्यते ॥ प्रजावर्द्धनमायुष्यंसर्वग्रहनिवारणं ॥ नाम्नाफलघृतंचैतदश्विभ्यांपरिकीर्तितं ॥ अत्रक्कलक्षणामूलंक्षि
पंत्यत्रचिकित्सकाः ॥ फलघृतं ॥ शतावर्याविदार्याश्चतथामाषात्मगुप्तयोः ॥ स्वदंद्राक्षायाश्चनिक्वाथेनत्वरसोश्चपृथक्
पृथक् ॥ साधयित्वाघृतप्रस्थंपयश्चैवचतुर्गुणे ॥ शर्करामधुसंयुक्तंमिलितंवाज्यप्रयोजयेत् ॥ शतावरी ॥ वृद्धदारकमूले
नघृतंपक्कपयोवितं ॥ एतद्वृष्यतमंसर्पिः सर्पिपुत्रकापिवेन्नरः ॥ वृद्धदारु ॥ पिप्पलीपिप्पलीमूलंचित्रकोहस्तिपिप्पली
॥ वचांचरजनीदेयाभद्रमुस्तावचाभया ॥ धान्यकंचाजमोदाचसपंचलवणानिच ॥ भद्रदार्वजमोदाचभार्गीकुटजंतंदु
ला ॥ कंटकार्यश्वमूलंचवृहतीविल्वपेशिका ॥ यवकोलकलत्थाश्चविडंगमरिचानिच ॥ दधिप्रस्थंपयप्रस्थंकषायेसाधये
न्घृतं ॥ विंशतियोनिरोगाश्चसूतिकोपद्रवाजयेत् ॥ वातिकान्यैत्रिकांश्चापिश्लेष्मिकान्संनिपातिकान् ॥ सूतिकोपद्रवान्सर्वान

॥ सा·द·घ·उ ॥
॥ ९४ ॥

भंगादेवनाशयेत् ॥ यवकुलत्थानानिमूल्हत्तुचतुर्गुणे ॥ डवालेरणाशेषेणाकल्कैर्नेश्चकराादिभिः ॥ पिप्पल्यादिघृतं ॥ समूलपत्र
शाखंतशतंभंडीकटस्यच ॥ गरिडीरोनसार्धप्रस्थात्स्याप्यपादावशेषितं ॥ घृतप्रस्थंविपक्कंव्यंगर्भदत्वाचकार्षिकाः ॥ सद्योषेपि
प्पलीमूलंचित्रकोजीरकंतथा ॥ पंचमूलकनिक्वाथंतुरास्नैरंडसमायुतं ॥ बलासिंधुयवक्षारस्वर्जिकाकृष्णजीरकं ॥ सिद्धमेतद्घृतं
सद्योनिहन्यात्सूतिकागदान् ॥ ग्रहणीपांडुरोगंचशोथंचजठरंतथा ॥ अग्निंचकुरुतेदीप्तिंस्त्रीणांनष्टविशोधनं ॥ मंडोकट
शिग्रुजंपत्रमूलंच ॥ शतपलं ॥ भंडोकटाद्य ॥ इतिस्त्रीरोगाधिकारः ॥ पादकल्केस्वगंधायाःक्षीरंदशगुणंपचेत् ॥ घृतंपेयं
कुमाराणांपुष्टिकृद्बलवर्द्धनं ॥ अश्वगंधा ॥ रास्नास्वगंधाकाकोलीपयस्यामद्रुपर्णिभिः ॥ विडंगजीरधान्यैश्चघृतंअश्वमे
साच ॥ शशोन्नमांगनिर्गूढसिद्धंपुष्टिविवर्द्धनं ॥ बालशार्क ॥ गौरीयष्टीवचालोध्रंपर्णीराजादनंसिताः ॥ चंदनंपद्मकं
लाक्षासपद्मकमुद्रोपलं ॥ जीवकर्षभकौमेदाकाकोलीसारिवाहये ॥ पंचवल्कदशमूलांवुक्षीरप्रस्थंतथाघृतं ॥ जयेचपित्र
विसर्पंचमुखपाकेग्रहार्त्तिषु ॥ शस्तंगौर्य्यादिकंनामबालानांसर्वरोगनुत् ॥ गौर्य्याद्यं ॥ पाठामतिविषाकुष्ठंसरलंदेवदारुच ॥
द्वेपिप्पल्यौतेजवनीचित्रकंविश्वभेषजं ॥ उभेहरिद्रेसरलेफलानिवदरस्यच ॥ गंडीरमजमोदाचविडंगकटुरोहिणी ॥ व
वासर्पगंधाचश्रेयसीमरिचानिच ॥ मातुलुंगस्यमूलानिदाडिमस्यत्वचंतथा ॥ श्लक्ष्णापिष्टंतुसंयोज्यक्षीरेसर्पिर्विपाच

॥ राम· ॥
॥ ९४ ॥

येत् ॥ भक्षितिर्यत्कुमारस्या क्रमिकोष्टश्चयोभवेत् ॥ अरोचकं गृहीतश्च तथाप्यग्नि सार्यते ॥ एतत्सर्पिप्रयोगत्वं कुमारोवलवा
त्भवेत् ॥ पांडुरोगाश्च यक्ष्मा च तथाश्वयथुसंचयात् ॥ क्षरामावाच्च दैन्याच्च स्वरभेदात्तथैव च ॥ प्रज्वालाहर्शोभेदाच्च क्षिप्रमेव प्र
मुच्यते ॥ सर्पगंधा नागजिह्वा · गेडीरो · वराहक्रांता पाठाग्यं ॥ सिद्धार्थकवचाब्राह्मीशंखपुष्पीपुनर्नवाः ॥ पयस्यामधुयष्ट्या
कं कटुकैलाफलत्रयं ॥ सारिवे रजनी पाठा भृंगराजसुवर्चला ॥ मंजिष्टा त्रिफला श्यामा हृषपुष्पी सगैरिकं ॥ मिषकाकाघृतप्र
स्य सम्यग्घृताभिमंत्रितः ॥ प्रसूताबाङ्भिरणी नारी षण्मासान्संप्रयोजयेत् ॥ सर्वथाजनयेत्पुत्रं सर्वामयविवर्जितं ॥ अस्य प्रयो
गात्कुक्षीस्थास्सुरवाग्व्याहरत्यपि ॥ योनिदुष्टाश्च या नार्यो रेतोदुष्टाश्च ये नराः ॥ वंध्यापि लभते पुत्रं शूरं पंडितमानितं ॥ जतुग
र्भस्य कल्कं पानीदेवापकर्षति ॥ सप्तरात्रप्रयोगेन नरः श्रुतिधरो भवेत् ॥ नाग्निर्दहति तद्देश्मन वज्रमयहंति च ॥ न तत्र म्रियते वा
लो यं त्रास्ते सोमसंज्ञितं ॥ फलघृतय ॥ द्राक्षाकाश्मर्यपरूषकाणि ॥ सोमघृतं ॥ वचाकुष्टं तथाब्राह्मी सिद्धार्थकमथापि च ॥ सा
रिवासैंधवं चैव पिप्पली घृतमष्टमं ॥ मेध्यं घृतमिदं सिद्धं पातव्यं मासमेव च ॥ दृष्टश्रुतिः क्षिप्रमेधा कुमारो बुद्धिमान् भवेत्
॥ न पिशाचा न रक्षांसि न भूता न च मातरः ॥ बाधंते च कुमाराणां पिवतामष्टमंगलं ॥ अष्टमंगलं ॥ शंखपुष्पी वचा ब्राह्मी कुष्टं
त्रिफलया सह ॥ द्राक्षा सशर्करा शुंठी जीवंती जीवकं बला ॥ शठी दुरालभा बिल्वं दाडिमं सुरसस्तथा ॥ मुस्तपुष्करमूलं च सूक्ष्म

लागजपिप्पली॥ एषांकर्षसमैभागैघृतप्रस्थंविपाचयेत्॥ कषायेकंटकार्याश्च क्षीरंतस्त्यचतुर्गुणं॥ एतत्कुमारंकल्याणंघृतंर
त्नंसुखप्रदं॥ वलवर्णाकरंधन्यमायुग्निरतिवर्द्धनं॥ छायांसर्वग्रहालक्ष्मीक्रिमिदंतनजापहं॥ सर्वबालामयंहरं दंतोद्भेदेवि
शेषवसामज्ञाथवातैलंमेभिरेवापिपाचितं॥ पूर्वाथक यथासाम्यदेशकालोयथादिकं॥ कुमारकल्याणकं खादिराद्येनता
लीसकुष्ठसंपंदनजेरजे॥ सक्षीरंसाधितंसर्पिवमधुवनियछति॥ खादिराद्यं॥ क्षीराहारस्यसिद्धार्थकवचापयस्यावृहत्याप
पामार्गशतावरीसारिवापिप्पलीकुष्ठसैन्धवसिद्धसर्पिपातुप्रयछति॥ सिद्धार्थकाद्यं॥ क्षीरानादस्यमधुकवचात्रिफलया
सिद्धं॥ मधुकाद्यं॥ अनंतदस्य॥ द्विपंचमूलीक्षीरतगरमधुकभद्रदारुविडंगमरिचद्राक्षयासिद्धं॥ तेनवालस्यारोग्यवल
मेधायूंषिभवंति॥ द्विपंचमूलाद्यं॥ श्यामाजयातिमुक्तानागपुष्पारणांह्राधसाधितं॥ यष्टिगर्भघृतंपीत्वाकासंश्वासंजयेद्धि
थ॥ रक्तपित्तंपिपासांचमूर्च्छांवांतिविशेषतः॥ श्यामाद्यं॥ पुनर्नवाकाकमाचीत्रिवृंदत्याःप्रवालिकाः॥ नारंगुवहाभार्गीनि
कुलानिवहाफलानिच॥ कल्कैरक्षसमैरेतैःप्रस्थार्द्धंसर्पिषःपचेत्॥ द्विगुणेनजलेनैवजीर्णाहारपिवेन्नरः॥ घृतमेतं
निहंत्याशुकासश्वासापतंत्रकान्॥ नागाद्यं॥ क्षीरद्रयंदेवदारुविल्वाजातीसदीप्यकं॥ ग्रंथिकंपिप्पलीतिक्ताषड्भिरेतैः
समैर्घृतं॥ सोवीरदधिमस्तुश्चकल्कैरेतैःपचेद्भिषक्॥ प्रयुक्तंहंतितत्कालंशिशोपरिभवानपि॥ क्षीरद्रयाद्यं॥ इतिबाल

रोगाधिकारः ॥ अपामार्गस्य बीजानि शिरीषस्य तथैव च ॥ श्वेते द्वे काचमाची च गवां मूत्रेण पेषयेत् ॥ सर्पिरेतेन संसिद्धं विषसं
शमनं परं ॥ अमृतं नाम विख्यातं मपि संजीवयेन्मृतं ॥ अमृतं ॥ नागदन्तीत्रिवृद्दन्तीस्नुक्क्वाथैः सर्पिसाधितं ॥ सगोमूत्राढकं सिद्धं हितं पेसावि
षार्त्तिनः ॥ सर्वकीटविषार्त्तानां गरार्त्तानां च शस्यते ॥ नागदन्त्याद्यं ॥ तण्डुलीयकमूलेन गृहधूमेन चैनत्क्षीरेण सघृतं सिद्धं समस्तविष
रोगनुत् ॥ तण्डुलीयकं ॥ मधुकं तगरं कुष्ठं भद्रदारु हरेणवः ॥ मंजिष्ठैलेलवालूनि नागपुष्पोत्पले शिता ॥ विडङ्गं चन्दनं पत्रं प्रियंगुं ध्या
मकं तथा ॥ हरिद्रे द्वे बृहत्यौ च सारिवांशुमती बला ॥ कल्कैरेषां घृतं सिद्धमजयमिति विश्रुतं ॥ विषाणि हन्ति सर्वाणि शीघ्रमेवाजि
तं चनत् ॥ अजयं ॥ हरिद्रानाकुलीजातीयथकिष्ठाविषान्वयेत् ॥ घृतत्रयं गराघ्नीनामेतदारोग्यदं परं ॥ हरिद्राघृतत्रयं ॥ इति व्याधि
कारः ॥ सप्तपत्रमूलात्यत्रालीपक्षाल्यवारिणा ॥ उज्ज्वलाक्षोदयित्वास्य वस्त्रेण गालयेत् ॥ रसे चतुर्गुणे तस्मिन्घृतप्रस्थं विपाच
येत् ॥ भेषजानि च पेष्याणि तत्रैमानि प्रदापयेत् ॥ हरिद्रामालतीकुन्दहृताम सहरीतकी ॥ एषां च पलिकान्भागान्शेषाणां कार्षिका मता ॥
पिप्पल्योऽथ विडङ्गानि सैंधवं शर्करा च वा ॥ सर्वमेतत्समालोड्य शनैर्मृद्वग्निना पचेत् ॥ ततः पक्वं विजानीयात्क्षिप्रं तद्वनारये
त् ॥ एतन्मासितमात्रेण वाग्विशुद्धिप्रजायते ॥ सप्तरात्रप्रयोगेन किन्नरैः सह गीयते ॥ अर्द्धमासप्रयोगेन सोमराजीवपुर्भवेत् ॥ मा
समात्रप्रयोगेन श्रुतमात्रं तु धारयेत् ॥ हन्त्यष्टादश कुष्ठानि षड्विध्यान्यर्शसानपि ॥ पंचगुल्मान्प्रमेहांश्च कासांसं पंचविधं जयेत् ॥

वंध्यानामपिनारीणांनराणामल्परेतसां ॥ घृतंसारस्वतंनामबलवर्णाग्निवर्द्धनं ॥ सारस्वतघृतं ॥ यत्कंदनालनालदलकेशर
वदिहपंकजनीलोत्पलस्यतदपिप्रथितंहिद्वितीयं ॥ सर्पिषश्चतुःकुवलयंसहिरण्यपात्रेमेध्यंगवामपि ॥ भवेत्किमुमानुषाणांचतुः
कुवलयं ॥ गुडूच्यपामार्गविडंगपिप्पलीवचाशतावर्यभयामहौषधैः ॥ घृतंपिपक्कंपिवतांयवहूः करंचवत्तुनैषांविलवेत्तिज
नतां ॥ गुडूच्याद्यं ॥ मंडूकीसवचासशंखकुष्ठमांसक्षारसौवर्चलां ॥ श्वेतांवाकुचिकांशतावरीपुनर्नवांब्राह्मींगुडूचींतथा वृद्धां
शैपल्लिकेरिमानिविधिवद्भ्यागिणायप्यावंतं ॥ सर्पिःप्रस्थमथाढकेनपयसायुक्तंपचेद्युक्तिना ॥ नाम्नासांगमिदंविधीहभविय
तव्यांतंपिवेद्यघृतमाद्यंग्रंथसहस्रमेवसेनैवारिवलंधारयेत् ॥ अर्शांसिराजप्रतीहीनवाचीप्रचुरस्यग्रामिधायिसदालोकेशक
तृहस्पतीसमतुजपूज्यस्तुनित्यंसदा ॥ अष्टांगः ॥ पिप्पलीक्षीरसंसिद्धंसर्वरोगहरंघृतं ॥ कालीयकहरिद्राभ्यांकामलामे
हुजत्परं ॥ गुडूचीरसकल्काभ्यांकुष्ठकासज्वरापहं ॥ गुडूचीक्वाथकल्काभ्यांवातरक्तविकारजित् ॥ खदिराष्टकसंसिद्धंश्वि
त्रकुष्ठविकारजित् ॥ मृद्वीकारसकल्काभ्यांरक्तपित्तज्वरान्तकृत् ॥ पिप्पल्यादिघृताष्टकं ॥ इतिरसायनाधिकारः ॥
शुभेनिदेशभूतमूलेशुतंगाश्वगंधायाः ॥ पुष्पेहनीसशुक्लंविपडोरोगाभक्षिबविघात् ॥ शातावाश्चभागशेषंगलूरीयालूपरि
पुतं ॥ द्विवैवात्रपलशतेदद्याच्छागस्यशुद्धमांसस्य ॥ सर्पिःप्रस्थमथैकंगव्यपयश्चतुर्गुणंदद्यात् ॥ कल्कानक्षसमांसादद्विमनस

दाघ्रायतांबूलशीलयेद्वरं ॥ निवातस्थोनवेगांश्च धारयेन्नस्वपेत्तथा ॥ शीतांबुनस्पृशेत्क्वापिकोष्णं नीरं पिबेन्मुहुः ॥ बला
सौषधिपित्तानि वायुर्वातेयथाव्रजेत् ॥ रेकात्तथामलंपित्तं भेषजं च कफोव्रजेत् ॥ दुर्विरिक्तस्यनाभेस्तुस्तब्धत्वं कुक्षिमूल
ता ॥ पुरीषवातसंगश्च कंडूमंडलगौरवाः ॥ विदाहोह्विराध्मानं भ्रमश्छर्दिश्च जायते ॥ तं पुनः पाचनैः स्नेहैः पक्त्वासंस्नेह्य रे
चयेत् ॥ जिनास्योपद्रवायांति दीप्ताग्निर्लघुताभवेत् ॥ विरेकस्यातियोगेन मूर्छाभ्रंशोगुदस्य च ॥ शूलंकफातियोगः स्यान्मां
सधावनसंनिभं ॥ मेदोनिभं जलाभासं रक्तं वारि च्यवते ॥ तस्य शीतांबुभिः सिक्त्वा शरीरं तंदुलांबुना ॥ मधुमिश्रैस्तस्य शी
तैः कारयेद्वमनं मृदुः ॥ सहकारत्वचं कल्कं दध्ना सौवीरकेन वा ॥ पिष्टानाभिप्रलेपात्तु हंत्यतीसारमुल्वणं ॥ अजाक्षीररसं
वापिवेच्छिरंहारिणंतथा ॥ शालिभिः षष्टिकैः स्वल्पैर्मसूरैर्वापिभोजयेत् ॥ शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् ॥ ला
घवे मनसस्तुष्टावनुलोमंगतेनिले ॥ सुविरिक्तमनं ज्ञात्वा पाचनं पाययेन्निशि ॥ इंद्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तिता ॥
॥ धातुस्थैर्यं बलस्थैर्यं भवेद्रेचनसेवनात् ॥ प्रवातसेवा शीतांबु स्नेहाभ्यंगमजीर्णता ॥ व्यायामं मैथुनं चैव न सेवेत वि

॥ सा·द·घ·उ ॥
॥ १७४ ॥

न्तः॥ शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्ततो॥ जंघालाविष्किराणां वा रसैः शाल्योदनं हितं॥ इति विरेचनाधिकारः॥ ॥
अथ वस्ति॥ वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः॥ यस्नेहैर्दीयते स स्यादनुवासननामकः॥ कषायक्षीरतैलैर्यो निरूहः स
निगद्यते॥ वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः॥ तत्रानुवासनाख्योयं वस्तिर्यश्चोत्र कथ्यते॥ एवमेवस्ततो वस्तिर्निरू
हाख्यो भविष्यति॥ निरूहादुत्तरश्चैव वस्तिस्यादुत्तराभिधः॥ अनुवासनभेदश्च मात्रावस्तिरुदीरितः॥ पलद्वयं तस्य मात्रा
तस्मादर्द्धापि वा भवेत्॥ अनुवास्यस्तु रूक्षस्यात्तीक्ष्णाग्निः केवलानिली॥ नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी॥
नास्थाप्या नानुवास्यास्युरजीर्णोन्मादतृष्णिता॥ शोकमूर्च्छारुचिभयश्वासकासक्षयातुराः॥ नेत्रं कार्यं सुवर्णादिधातुभिर्वृक्षवे
णुभिः॥ नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते॥ एकवर्षात्तु षड्वर्षं यावन्मानं षडंगुलं॥ ततो द्वादशकं यावन्मानं स्याद
ष्टसंमितं॥ ततः परं द्वादशभिरंगुलैर्नेत्रदीर्घता॥ मुद्गछिद्रं कलायाभं छिद्रं कोलास्थिरध्रकं॥ यथासंख्यं भवेन्नेत्रे श्लक्ष्णांगो
पुच्छसंनिभं॥ आतुरांगुष्ठमानेन मूलं स्थूलं विधीयते॥ कनिष्ठीकापरिणाहामग्रे च गुटिकामुखं॥ तन्मूले कर्णिके द्वे च कार्ये
भागाच्चतुर्थकं॥ योजयेत्तत्र वस्तिं च बन्धद्वयविधानम॥ मृगालघ्नकरगवां महिषस्यापि वा भवेत्॥ मूत्रकोशस्य वस्तिस्तु त
दलाभे तु चर्मजः॥ कषायरक्तः समृदुर्वस्तिः स्निग्धो दृढो हितः॥ व्रणवस्तेस्तु नेत्रं स्यात् श्लक्ष्णामं मुद्गपाशिता॥ दिवाशी

॥ रामः ॥
॥ १७४ ॥

तेवसंतेवस्नेहवस्तिप्रदीयते॥ ग्रीष्मवर्षाशरत्कालेरात्रौस्यादनुवासनं॥ नचातिस्निग्धवशमन्नभोजयित्वानुवासयेत्॥ म
दंशुद्धेवजनयेद्धित्वास्नेहप्रयोजितः॥ हीनमात्रावुभौवस्ति नातिकार्यकरौस्मृतौ॥ अतिमात्रौतथानाहक्लमातीसार
कारकौ॥ उत्तमस्यपलैःषड्भिर्मध्यमस्यपलैस्त्रिभिः॥ पलार्द्धहिनस्यप्रोक्तामात्रानुवासने॥ शताह्वासैंधवाभ्यांचदयास्नेहेतुचूर्ण
कं॥ तन्मात्रोत्तममध्यान्याषट्कत्र्येकयमाषकैः॥ विवरेत्त्वसप्तरात्रेगतेजातवलायव॥ भुक्तात्रायानुवास्यायवस्तिर्देयानुवास
नः॥ अथानुवास्यस्वभ्यक्तमुष्णांवुस्वेदितंशनैः॥ भोजयित्वायथाशास्त्रंकृतंचक्रमणंतथा॥ उत्सृष्टानिलविण्मूत्रयोजये
त्स्नेहवस्तिना॥ सुप्तस्यवामपार्श्वेनवामजंघाप्रसारिता॥ कुंचितापरजंघस्यनेत्रंस्निग्धेगुदेन्यसेत्॥ वंध्वावस्तिमुखवस्
त्रैर्वामहस्तेनधारयेत्॥ पीडयेद्दक्षिणेनेवमध्यवेगेनधीरधी॥ जंभाकासक्षवादीश्चवस्तिकालेनकारयेत्॥ त्रिंशन्मात्रा
मिताकालःप्रोक्तोवस्तेस्तुपीडने॥ ततःप्रणिहितेस्नेहेउत्तानोवाक्छतंभवेत्॥ प्रसारितैःसर्वगात्रैयथावीर्यंविसर्पति
॥ ताडयेत्तलयोरेनंत्रीन्त्रीन्वाराछनैःशनैः॥ फिचोश्चैवततःश्रोणींशय्यांचैवोक्षिपेत्ततः॥ जातेविधानेतुततःकुर्यान्निद्रां
यथासुखं॥ सानिलेसपुरीषश्चस्नेहःप्रत्येतियस्यतु॥ उपद्रवंविनाचैवससम्यगनुवासितः॥ जीर्णान्नमथसायाह्ने
स्नेहप्रत्यागतेपुनः॥ लघ्वन्नंभोजयेत्कामंदीप्ताग्निस्तुनरोयदि॥ अनुवासितायदाउयमितरेह्निसुखोदकं॥ धान्यशुंठी

कषायंवास्नेहव्यापत्तिनाशने॥ अनेनविधिनाषड्वासप्तवाष्टौनवापिवा॥ विधेयावस्तयस्तेषांमन्तरात्रिनिरूहणं॥ अथवायस्यय
त्कालंस्नेहोनिर्यातिकेवलं॥ तस्यान्योल्पतरोदेयोनहिस्निह्यतितिष्ठति॥ अशुद्धस्यमलोन्मिश्रस्नेहोनैतियदापुनः॥ तदांगशै
थिल्याध्मानंशूलंश्वासश्चजायते॥ पक्वाशयगुरुत्वंचतत्रदद्यान्निरूहणं॥ तीक्ष्णंतीक्ष्णौषधैर्युक्तंफलवर्तिर्हितातथा
॥ यथानुलोमनंवायुर्मलस्नेहश्चजायते॥ तथाविरेचनंदद्यात्तीक्ष्णंनविधीयते॥ यस्यनोपद्रवंकुर्यात्स्नेहंवस्तिरनिःसृतः
॥ सर्वोल्पोनावृतोरौक्ष्यादुपेक्ष्यःसविजानता॥ अनायान्तमहोरात्रेस्नेहंसंशोधनैर्हरेत्॥ स्नेहवस्तावनायातेनान्यस्नेहोविधी
यते॥ गुडूचीरंडपूतीकभार्गीवृषकहिता॥ शतावरीसहचरकाकनासापलोन्मिता॥ यवमाषातसीकोलकुलत्थानांप्रसृ
तोन्मितान्॥ चतुर्द्रोणेंभसःपक्त्वाद्रोणशेषेणतेनच॥ पचेत्तैलाढकंपेष्यैर्जीवनीयैःपलोन्मितैः॥ अनुवासनमेतद्धि
सर्ववातविकारनुत्॥ षट्सप्ततिव्यापदश्चजायतेवस्तिकर्मणा॥ दूषितानसमुदायेनजाश्चिकित्स्याश्चसुश्रुतात्॥ पा
नाहारविहारश्चपरिहारश्चकृत्स्नशः॥ स्नेहपानसमाकार्यानात्रकार्याविचारणा॥ इतिस्नेहवस्तिविधिः॥ अथनिरू
हणवस्तिः॥ निरूहवस्तिर्बहुधाभिद्यतेकारणान्तरैः॥ तैरेवतस्यनामानिकृतानिमुनिपुंगवैः॥ निरूहपरंनामप्रोक्तं
मास्थापनंबुधैः॥ स्वस्थानास्थापनाद्दोषधातूनांस्थापनेमतं॥ निरूहस्यप्रमाणंचप्रस्थपादोत्तरंपरं॥ मध्यमःप्र

स्थमुहिक्षहीनंवडवेत्रयं ॥ अनास्थाप्यानाह ॥ अतिस्निग्धोत्क्लिष्टदोषा क्षतोरस्का कृशास्तथा ॥ आध्मानछर्दिहिक्कार्श
ःकाशस्वासप्रपीडितः ॥ गुदशोफातिसार्त्तो विसूचीकुष्टसंयुतः ॥ गर्भिणीमधुशोही च नास्थाप्याश्च जलोदरी ॥ ॥
नयोग्यानाह ॥ वातव्याध्यावुदावर्त्तो वातासृग्विषमज्वरे ॥ मूर्छातृष्णोदरानाहमूत्रकृछ्राश्मरीषु च ॥ वृद्ध्यसृग्दरसं
दाग्नियमेहेष्वनिरूहणं ॥ श्लेष्मपित्तहृद्रोगेषु ज्ञेयो हि विधिवन्नरः ॥ नृत्रविधिविडत्सृष्टानिलविराभूत्रस्निग्धंस्विन्नं मर्जितं
॥ मध्याह्ने गृहमध्ये वा यथायोगं निरूहयेत् ॥ स्नेहवस्तिविधानेन बुध्यं कुर्यान्निरूहणं ॥ जाते निरूहे च ततो भवेड्न्कृदुका
सनः ॥ निष्टेत्पस्कन्ने मात्रं तु निरूहाद्दमनेछया ॥ अनायातेमुहूर्त्तात्तु निरूहं शोधनैर्हरेत् ॥ निरूहैरेवनतिमान्क्षारमूत्राम्ल
सैंधवैः ॥ यस्यक्रमेणागच्छेत्तिविड्ढिन्नकफवायवः ॥ लाघवं चोपजायेत तं निरूढं समादिशेत् ॥ यस्यस्याद्वस्तिरल्पाल्पवेगोही
नमलानिल ॥ मूत्रार्त्तिजाड्यारुचिमान्दुर्निरूढं तमादिशेत् ॥ यस्यस्याद्वस्तिरल्पाल्पवेगोहीनमलानिल ॥ मूर्च्छार्त्तिजाड्यारुचि
मान्दुर्निरूहं तमादिशेत् ॥ विविक्ततामनस्तुष्टिस्निग्धतावाधिनिग्रहः ॥ आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणं ॥ अने
नविधिनायुञ्ज्यान्निरूहं वस्तिदानवित् ॥ द्वितीयं वा चतुर्थं वा योदितं सस्नेह एक पवने पित्ते द्वौ पयसा सह ॥ कषायकटुमू
त्राद्याः कफे चोष्णास्त्रयो मताः ॥ पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ॥ निरूहं भोजयित्वा च ततस्तदनुवासयेत् ॥ सु

कुमारस्य वृद्धस्य बालस्य च मृदुर्हितः ॥ वस्तिस्तीक्ष्णोऽप्रयुक्तश्च तेषां हन्याद्बलायुषी ॥ दद्यादुत्क्लेशनः पूर्वं मध्ये दोषहरं ततः ॥ प
श्चात्संशमनीयं च दद्याद्वस्तिं विचक्षणः ॥ एरंडबीजं मधुकं पिप्पलीसैंधवं वचा ॥ हपुषाफलकल्कस्तु वस्तिरुत्क्लेशनः स्मृत
: ॥ उत्क्लेशनवस्ति ॥ शताह्वा मधुकं बिल्वकौटजफलमेव च ॥ सकांजिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः ॥ दोषहर ॥ प्रियंगु
मधुकं मुस्ता तथैव च रसांजनं ॥ सक्षीरः सस्यते वस्तिर्दोषाणां शमनः स्मृतः ॥ दोषशमनः ॥ बृंहणद्रव्याणि : क्वाथकल्के
र्मधुरकैर्युतः ॥ सर्पिर्मांसवसोपेता वस्तयो बृंहणाः स्मृता ॥ बृंहणा त्रिफलाक्वाथगोमूत्रोग्रक्षारसमायुता ॥ ऊषकादिप्रती
वापा वस्तयो लेखनाः स्मृता ॥ लेखनशोधनद्रव्याणि ॥ क्वाथेनन त्कल्कैः स्नेहसंभवैर्युक्ता स्वजेन मथिता वस्तयः शोधनः
स्मृता शोधनः ॥ बदर्यैरावतीशिग्रुशाल्मलीरयुक्तानाम्नापिलवस्तयः ॥ अजोरभ्रेणहृधिरैर्युक्तादेयाविचक्षणैः ॥ मा
त्रापिच्छिलवस्तिभ्यां पलेद्वादशभिर्मिता ॥ पिच्छिल ॥ दद्याद्दौ सैंधवस्याथ मधुनः प्रसृतिद्वय ॥ विनिर्मथ्य ततो दद्यात्स्नेह
स्य प्रसृतित्रयं ॥ एकीभूततनतः स्नेहो कल्कस्य प्रसृतिं क्षिपेत् ॥ संमूर्छिते कषायं तु चतुःप्रसृतिसंमितं ॥ क्षिप्त्वा विदध्याद्दद्या
द्वनिरूहं कुशलो भिषक् ॥ वाते चतुःपलं क्षौद्रं क्षिपेत्स्नेहस्य षट्पलं ॥ पित्ते चतुःपलं क्षौद्रं स्नेहं दद्यात्पलत्रयं ॥ कफे वष
ट्पलं क्षौद्रं क्षिपेत्स्नेहं चतुःपलं ॥ निरूहणमात्रा ॥ एरंडक्वाथतुल्यांशं मधुतैलपलाष्टकं ॥ शतपुष्पापलार्द्धेन सैंधवार्द्ध

संपते ॥ मधुतैलिकसंज्ञायवस्तिर्विलोडितः ॥ मेढ्रगुल्मकृमिप्लीहमलोदावर्त्तनाशनं ॥ वलवर्णकरंश्चैववृष्योदीपरांगह
हरा ॥ मधुकतैल ॥ क्षौद्राज्यक्षीरतैलानांप्रमृतंप्रसृतिंक्षिपेत् ॥ हवुषासैंधवंश्चारोवस्तिस्थाप्यावनपरपावनं ॥ एरंडमू
लनिःक्वाथोमधुतैलंससैंधवं ॥ एषयुक्तरथोवस्तिःसवचापिप्पलीफलः ॥ युक्तरथ ॥ पंचमूलस्यनिःक्वाथस्तैलमाग
धिकामधुससैंधवः ॥ समधुकःसिद्धवस्तिरितिस्मृतः ॥ सिद्धवस्तिस्नानमुष्णोदकैःकुर्यादिवास्वप्नमजीर्णतां ॥ व
र्जयेपट्टपरंसर्वमाचरेत्स्नेहवस्तिवत् ॥ इतिनिरूहनवस्तिविधिः अथोत्तरवस्ति ॥ ॥ अतःपरंप्रवक्ष्यामिवस्तिमु
त्तरसंज्ञकं ॥ द्वादशांगुलकंनेत्रंमध्येचकृतकर्णिकं ॥ मालतीपुष्पवृंताभछिद्रंसर्षपनिर्गमः ॥ पंचविंशतिवर्षा
णांमध्यमात्राद्विकर्षिकी ॥ तदूर्ध्वंपलमात्रावस्नेहस्योक्ताभिषग्वरैः ॥ अथास्थापनशुद्धस्यतृप्तस्यस्नातभोजिनः ॥
॥ स्थितस्यजानुमात्रेत्रपीठेविप्पशलाकया ॥ स्निग्धयामेढ्रमार्गंचततोनेत्रंनियोजयेत् ॥ शनैःशनैःघृताभ्यक्तंमेढ्र
रंध्रात्लानिषट् ॥ ततोवपीडयेद्वस्तिंशनैर्नेत्रंचनिर्हरेत् ॥ ततःप्रत्यागतेस्नेहेस्नेहवस्तिक्रमोहितः ॥ स्त्रीणांकनिष्ठी
कास्थूलंनेत्रंकुर्याद्दशांगुलं ॥ मुक्तप्रवेशयोज्यंतश्चतुरंगुलं ॥ द्व्यंगुलंमूत्रमात्रेवसूक्ष्मनेत्रंनियोजयेत् ॥ मूत्रकृछ्रविका
रेषुवालानांत्वेकमंगुलं ॥ शनैर्निष्कंपमाधायसूक्ष्मनेत्रंविचक्षणः ॥ योनिमार्गेषुनारीणांस्नेहमात्राद्विमालिका ॥ म

त्रमार्गपलोन्मानंवालानांचढिकर्षिकी ॥ उत्तानायैस्त्रियंदद्यादर्ज्जजान्वैविचक्षणैः ॥ अप्रत्यागछतिभिषग्वस्तावुत्तरसंज्ञितेः
॥ भूयोवस्तिंविदध्यात्त्वसंयुक्तंशोधनैर्गणैः ॥ फलवर्त्तिविदध्याद्वायोनिमार्गेदृढंभिषक् ॥ सूत्रेविनिर्मितांस्निग्धांशोधन
द्रव्यसंयुतां ॥ दह्यमानेतथावस्तौदद्याद्वस्तिविशारदः ॥ क्षीरवृक्षकषायेणपयसाशीतलेनवा ॥ वस्तेरुत्तरसंज्ञस्यसा
स्त्रीणामात्रैवदारुजा ॥ हन्याद्रुत्तरवस्तिस्तुनोचितोमेहिनांक्वचित् ॥ सम्यग्दत्तस्यलिंगानिव्यापदःक्रमएवच ॥ वस्तरुत्त
रसंज्ञस्यसमानस्नेहवस्तिमा ॥ घृताभ्यकेणदेर्घ्येष्यश्लश्णास्वांगुष्ठसंनिभा ॥ मलप्रवर्त्तिनिवर्त्तिफलवर्त्तिश्चसासमृता ॥
फलवर्त्ति ॥ इत्युत्तरवस्तिविधिः ॥ अथनस्यविधिः ॥ नस्यंतत्कथ्यतेधीरैर्नासाग्राह्यंयदौषधं ॥ नावनंतस्यकर्मेतित
स्यनामद्वयंमतं ॥ तस्यभेदोद्विधाज्ञेयारेचनंस्नेहनंतथा ॥ रेचनंकर्षणंप्रोक्तंस्नेहनंबृंहणंमतं ॥ कफपित्तानिलाध्वंसेपू
र्वमध्यपराह्णके ॥ दिनस्यगृह्यतेनस्यंरात्रावप्युत्कटेगदे ॥ नस्यंत्यजेद्भोजनान्तेदुर्दिनेचापतर्पिते ॥ तथानवप्रतिश्यायीग
र्भिणीगरदेषितः ॥ अतितीर्णोदत्तवस्तिश्चपीतस्नेहोदकासवा ॥ क्रुद्धःशोकाभिभूतश्चतृष्णार्त्तोवृद्धवालकैः ॥ वेगावरोधी
स्नातश्चस्नातुकामश्चवर्जयेत् ॥ अस्तवर्गस्यवालस्यनस्यकर्मसमाचरेत् ॥ अशीतिवर्षादूर्द्ध्वंचनावनंनैवदीयते ॥ अथ
वैरेचनंनस्यग्राह्यतेःकृतीक्ष्णकैः ॥ तीक्ष्णभेषजसिद्धैर्वातैलैर्हेकाथैरसैस्तथा ॥ नासिकारंध्रयोर्द्देयोषद्वात्वाश्चविंद

व॥ प्रत्येकरेचनेयोज्येमुख्यामध्याल्पमात्रया ॥ नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णमौषधं ॥ हिंगुस्याद्यवमात्रं तु माषैकं सैंधवं
मतः॥ क्षीरं वै वाष्टशाणं स्यात्यानीपवत्रिकार्षिकं ॥ कार्षिकं मधुरं द्रव्यं नास्यकर्मणि योजयेत् ॥ अवपीडप्रधमनं द्वौ भे
दावपरौ स्मृतौ ॥ शिरोविरेचनस्यात्रतौ तु देयं यथावथं ॥ कल्किकृतादोषधाद्यपीड्यते निःसृतो रसः ॥ सोवपीडः समु
दिष्टस्तीक्ष्णाद्रव्यसमुद्भवः ॥ षडंगुलानिक्रायानाडी चूर्णं तथा ध्मयेत् ॥ तीक्ष्णाकोलमितावक्त्रवातैः प्रधमनं हितं ॥ ऊर्द्ध
जत्रुमतेरोगे कफतेस्वरसंक्षयः ॥ अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥ शोफापस्मारकोटेषु नस्यं वैरेचनं हितं ॥ भी
रुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते ॥ गलरोगे संनिपाते नियासविषिज्वरे ॥ मनोविकारे कृमिषु युज्यते चावपीडनं ॥
अत्यन्तकृतदोषेषु विसंज्ञेषु च दीयते ॥ चूर्णप्रधमनं धीरैः स्तद्धि तीक्ष्णतरं यतः ॥ नस्यं वैरेचनं यथा ॥ नशंस्यात्कुडुं
ठीभ्यां पिप्पल्या सैंधवेन वा ॥ जलपिष्टेन तेनाक्षिकर्णनासाशिरोगदाः ॥ ऊन्याडतुमलोह्नतानस्योतिभुजपदृजा ॥
मधुकसारकृष्णाभ्यां वचामारेचसैंधवैः ॥ नस्यकोष्णेनापिष्टं दद्यात्संज्ञाप्रबोधनं ॥ अपस्मारे तथोन्मादे संनिपाता
पतंत्रकैः ॥ सैंधवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ॥ वस्तमूत्रेण संपिष्टा नस्यं तंद्रानिवारणं ॥ मधूकसारसिंधूत्थवचो
षणकणासमा ॥ श्लेष्मापिष्टांभसा नस्यं दद्यात्संज्ञाप्रबोधनं ॥ रोहितमत्स्यपित्तेन भावितं मरिचं तथा ॥ कट्फलं

॥सा·द·घ·उ॥
॥१७८॥

वेतितच्चूर्णंदेयंप्रधमनंबुधैः ॥ अथस्नेहनानस्यकल्पनांकथ्यतेऽधुना ॥ मर्शश्चप्रतिमर्शश्चद्वौभेदौस्नेहनेमतौ ॥ मर्शस्तर्पणीमात्रा
मुख्यांशाणोसम्मिताबुधैः ॥ मध्यमाचचतुःशाणौहीनाशाणमितास्मृता ॥ नस्यस्यस्नेहकस्यादौदेयापादशबिंदवः ॥ प्रतिमर्शश्चपा
णिशुक्तिश्चमात्रास्त्रिःप्रकीर्त्तिता ॥ एकैकस्मिंस्तुमात्रेयदेयानासापुटेबुधैः ॥ मर्शस्यद्वित्रिवेलंवावीक्ष्यदोषाबलाबलं ॥ ए
कांतरंद्व्यंतरंवानस्यंदद्याद्विचक्षणः ॥ त्र्यहंपंचाहमथवासप्ताहंवासुयंत्रितः ॥ मर्शेशिरोविरेकेचव्यापादोविविधास्मृता
॥ दोषोत्क्लेशात्क्षयाच्चैवविज्ञेयास्तायथाक्रमं ॥ दोषोत्क्लेशनिमित्तासुकुर्याद्वमनशोधनं ॥ अथक्षयनिमित्तासुयथास्वंबृं
हणंहितं ॥ शिरोनासाक्षिरोगेषुसूर्यावर्तार्द्धभेदके ॥ दंतरोगेबलेहीनेमन्याबाहुशजेगदे ॥ मुखशोकेकर्णनादेवावातपित्त
गदेतथा ॥ अकालपलितेचैवकेशश्मश्रुप्रपातने ॥ सुदृढंतेबृंहणंनस्यस्नेहैर्वामधुरद्रवैः ॥ बृंहणंनस्यंतथा ॥ सशर्करं
पयःपिष्टंभृष्टमाज्येनकुंकुमं ॥ नस्यप्रयोगतोहन्याद्वातरक्तभवारुजा ॥ भ्रूशंखाक्षिशिरःकर्णसूर्यावर्तार्द्धभेदकान् ॥ नस्यं
स्यादणुतैलेनतथानारायणेनवा ॥ माषादिनावासर्पिर्भिस्तद्भेषजसाधितैः ॥ तैलंकफेस्याद्वातेचकेवलेपवनेवसा ॥ दद्या
न्नस्यप्रयोगेनपक्षाघातसकंपके ॥ जयेदर्दितवातंचमन्यास्तंभावबाहुके ॥ प्रतिमर्शस्यमात्रातुद्वित्रिबिंदुविजानता ॥ प्रत्ये
कशोनासिकयोःस्नेहेनेतिविनिश्चितं ॥ स्नेहंग्रंथिद्वयेयावन्निमग्नांगोष्ठतानतः ॥ तर्जनीयंश्चवेद्बिंदुस्यमात्राबिंदुसं

॥रामः॥
॥१७८॥

ञ्चिवा ॥ एवंविधौ विंदुसंज्ञैरष्टभिशानउच्यते ॥ सदेयोमर्शतस्यतु प्रतिमर्शे हि विंदकः ॥ समयात्प्रतिमर्दस्य बुधैः प्रोक्ताश्चतुर्दश
॥ प्रभाते दंतकाष्ठांतगृहान्निर्गमनेतथा ॥ व्यायामाधव्यपाते विराम्मूत्रांतेजनेकृते ॥ कवलांते भोजनांते दिवास्वप्नोत्थितेत
था ॥ वमनांतेतथासायंप्रतिमर्शः प्रयुज्यते ॥ इषदछिक्नमानात्स्नेहो यदा वक्रं प्रपद्यते ॥ नस्येप्रिषिक्तं विद्यात्प्रतिमर्शप्रमाण
तः ॥ उछिस्तपिवेच्चैतत्रिष्ठीवेत्सुखमागतः ॥ क्षीरोतृष्णास्यशोषार्त्तौ वालवृद्धेच युज्यते ॥ प्रतिमर्शेन शाम्यंति रोगाश्चैवोर्द्धज
त्रुजाः ॥ वलीपलितनाशश्च वलमिंद्रियजं लभेत् ॥ विभीतनिंबगंभारिशिवाशेलुश्च काकिणी ॥ एकैकतैलस्य न पलितं नश्य
ति ध्रुवं ॥ अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे ॥ देशे वा वातरजोमुक्ते कृतं दंतविघर्षणं ॥ विशुद्धधूमपानेन स्विन्नभा
लगलं तथा ॥ उत्तानशायिनं किंचित्प्रलंबशिरसं नरं ॥ आनीयहस्तपादं च वस्त्राच्छादितलोचनं ॥ समुन्नामितनासाग्रं वैद्यो
नस्येन योजयेत् ॥ कोष्णमद्भिर्द्विवारं वहेमतारादिशुक्तिभिः ॥ शुक्त्या वा यत्र शुक्त्या वा प्रोक्ते वा नस्यमाचरेत् ॥ नस्ये प्रासिंच्य
माने तु शिरसो नैव कंपयेत् ॥ न क्रुध्येन्न प्रभाषेत नाक्षिपेन्न हसेत्तथा ॥ एतेहि विहितस्नेहो नो वातं संप्रपद्यते ॥ ततः कासप्र
तिश्यायशिरोक्षिगदसंभवः ॥ शृंगाटकमभिप्लाव्य स्थापयेन्न गिलेद्रवं ॥ पंचसप्तदशैवस्तु मात्रा नस्यस्य धारणे ॥ उपवि
श्याथ निष्ठीवेन्नासावक्त्रागतं द्रवं ॥ वामदक्षिणपार्श्वाभ्यां निष्ठीवेत्समुखे न हि ॥ नीते न शेषमनस्तापं रजस्को धंवर्श

त्यजेत् ॥ शर्पीनतिद्राक्षावप्रोक्तानेवाकशान्तेवरः ॥ न धावैरीवनस्यांते भूमौ वाव लोहितः ॥ नस्यत्रीरपपरिस्फुटानि लक्षणा
नि प्रयोगतः ॥ शुद्धिहीनातियोगानि विशेषाद्धात्मवित्तको ॥ लांघवश्चमनशुद्धिः श्रोतसां व्याधिसंक्षयः ॥ चित्तेन्द्रियप्रसाद
श्च शिरसः शुद्धिलक्षणं ॥ कंडूपदेहो गुरुता स्रोतसां कफसंभव ॥ मूर्द्धि हीनविशुद्धे तु लक्षणं परिकीर्तितं ॥ मस्तकलुं
गागमो वातवृद्धिरिन्द्रियविभ्रमः ॥ शून्यता शिरसश्चापि मूर्द्धि गाढं विरेचिते ॥ हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत्
॥ सम्यग्विशुद्धे शिरसि सर्पिनस्यो विषेवयेत ॥ कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः ॥ लक्षणं तदतिस्निग्धे तत्र रुक्षं
प्रदापयेत् ॥ भोजयेच्चानभिष्यंदि नास्याचारिकमादिशेत् ॥ वमनं रेचनं नस्यं निरुहश्चानुवासनं ॥ सेनातिपंचकर्माणि
कथितानि मुनीश्वरैः ॥ इति नस्यविधिः ॥ इति पंचकर्मविधिः ॥ अथ धूमपानविधिः ॥ धूमस्तु षड्विधः प्रोक्तः शमनो
बृंहणस्तथा ॥ रेचनः कासहा चैव वामनो व्रणधूपनं ॥ शमनस्यानुपर्यायो मध्यः प्रायोगिकस्तथा ॥ बृंहणस्याभिपर्या
यो स्नेहनो मृदुरेव च ॥ रेचनस्यापि पर्यायो यनस्तीक्ष्णः स एव च ॥ न धूमार्हाश्च रक्ते च न तस्यातो भीरुश्च दुःखि
तः ॥ दत्तवस्तिविरिक्तश्च रात्रौ जागरितस्तथा ॥ पिपासितश्च दाहार्तः ताल्वशोषी तथोदरि ॥ शिरोभितापीति
मिरी छर्द्याध्मानप्रपीडितः ॥ क्षतोरस्कः प्रमेहार्त्तः पांडुरोगी च गर्भिणी ॥ रूक्षक्षीणो ह्यपाहितक्षीरक्षौद्रघृताशवः ॥ मृ

क्षोत्र दधिमत्स्यश्च बालो वृद्धः कृशस्तथा ॥ अकाले वातपित्तश्च धूमकुर्याडपडवान् ॥ तत्रेष्टं सर्पिषः पानं नावनांजनतर्प
णं ॥ सर्पिरिक्षुरसं द्राक्षां पयो वा शर्करांबु वा ॥ मधुराम्लो रसौ वापि वमनाय प्रदापयेत् ॥ धूमो द्वादशकाद्वर्षाद्गृह्यते शीति
कान्नव ॥ कासश्वासप्रतिस्यायान्मन्याहनुशिरोरुज ॥ वातश्लेष्मविकारांश्च हन्याधूमस्तु योजितं ॥ धूमप्रयोगात्पुरुषः स
र्वेंद्रियवाग्भवेत् ॥ दृढकेशद्विजश्मश्रुः सुगंधिविशदो भवेत् ॥ धूमनाडी भवेत्तत्र विषडावत्रिपर्विका ॥ कनिष्ठिकापरिणा
हाराजमाषागमान्तरा ॥ धूमनाडी भवेद्दीर्घा समिता रोगिणांगुलैः ॥ चत्वारिंशद्विशन्मितैस्तद्द्वात्रिंशद्भिमद्दोमतः ॥
तीक्ष्णाश्च त्र्यर्विंशतिभिः कालघ्नैर्षोडशोन्मितैः ॥ दद्यादंगुलैर्वामनीयैस्तथास्याद्व्रणनाडिकाः ॥ कलायमंडुलः स्थूला
कुलत्थागमरंध्रिका ॥ अथैषिकां प्रलेपेन च सूक्ष्मक्षौमद्वादशांगुलाम् ॥ धूमद्रव्यस्य कल्केन लेपश्चाष्टांगुले स्मृता ॥ कल्क
कर्षमितं विलिप्याच्छायां शुष्कं तु कारयेत् ॥ इषीकामपनीयाथ स्नेहाक्तां वर्तिमादरात् ॥ अंगारे दीपितं कृत्वाथ तां नेत्रस्य
रंध्रके ॥ वदनेन पिबेद्धूमं वदनेनैव संत्यजेत् ॥ नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधी ॥ शतावरीपुटे क्षिप्त्वा कल्क
मंगारदीपितं ॥ छिद्रे नेत्रं निवेश्याथ व्रणेनैव धूपयेत् ॥ एलापिकल्कं शमनं स्निग्धं सर्जरसं मदै ॥ रेचने कल्कवश्वासरा
घ्रेक्षाडिकोरण ॥ वामेन हृष्ट्वाप्युवर्मीयद्दद्याद्धूमस्य पानकं ॥ व्रणे नैव च नास्त्यत्र धूमपानं प्रशस्यते ॥ अन्यपि धूमरोगेहेषु कर्त्त

ज्वरोगशांतये ॥ सर्षपानिंबपत्राणि(?) सयथामयूरपिछ्छनिंबस्यपत्राणिबृहतीफलं ॥ मरिचंहिंगुमांसीचवीजकार्पाससंभव ॥ छागरोमाणिनिर्मोको
विष्टावैडालकीतथा ॥ गजदंतश्चचूर्णंकिंचिद्घृतविमिश्रितं ॥ गेहेषुधूपनंदत्तंसर्वबालग्रहांजयेत् ॥ पिशाचराक्षसान्
जित्वासर्वज्वरहरंभवेत् ॥ अपराजितोधूपः ॥ परिहारस्कधूमेषुकार्योरेचननस्यवत् ॥ नमस्तापरजक्रोधाधूमपानेविव
र्जयेत् ॥ नेत्राणिधातुजावाहनलवंशादिनान्यपि ॥ इतिधूमपानविधिः ॥ चतुर्विधास्याद्गंडूपस्नेहकसंमनस्तथा ॥ शोध
नोरोपणश्चैवकवलश्चापितद्विधा ॥ स्निग्धोष्णैःस्नेहिकोवातेस्वादुशीतैःप्रसादनः ॥ पित्तेकट्वम्ललवणरूक्षोष्णैःसशो
धनैःकफे ॥ कषातिक्तमधुरोरोपणोव्रणो ॥ चतुःप्रकारैःगंडूषकवलश्चापिप्रकीर्तितः ॥ असंचारिमुखेपूर्णंगंडूषकव
लश्चसः ॥ तत्रद्रवेणगंडूषःकल्केनकवलस्मृतः ॥ दद्याद्रोगेषुगंडूषेकालमात्रकं ॥ कर्षप्रमाणकल्कश्चकवलोगीय
तेबुधैः ॥ धार्यीतेपंचमार्षोमंदूषाकवलादयः ॥ गंडूषात्सुस्थितान्कुर्यान्निःश्वासात्मालगलादिकं ॥ मनुष्यस्त्रीन्तथापंच
सप्तवादोषनाशनः ॥ कफपूर्णास्यतायावत्स्रवघ्राणाक्षितातथा ॥ नेत्रघ्राणश्रुतियावत्तावद्गंडूषधारणं ॥ तद्यथा ॥ तिलक
ल्कोदकंक्षीरंस्नेहोवास्नेहिकेहितं ॥ तिलानीलोत्पलंसर्पिःशर्कराक्षीरमेवच ॥ सक्षौद्रेहनुवक्रस्थोगंडूषोदाह्यनाश
नं ॥ वैशद्यंजनयत्यास्येसंदधातिमुखव्रणान् ॥ दाहतृष्णाप्रशमनंमधुगंडूषधारणं ॥ विषक्षाराग्निदाहेचसर्पिर्धार्यंप

योयथा ॥ तैलेसैन्धवगंडूषोदन्तचालोप्रशस्यते ॥ शोखमुखस्यगंडूषकफपित्तविनाशनः ॥ दार्वीगुडूचीत्रिफलाद्राक्षाजात्य
स्यपल्लवान् ॥ यवासश्चेतियत्क्वाथषष्ठांशंक्षौद्रसंयुतः ॥ शीतोमुखेधृतोहन्यान्मुखपाकंत्रिदोषजित् ॥ यस्योषधस्यगंडू
षस्तस्येवप्रतिसारणं ॥ कवलश्चापितस्येवज्ञेयावक्रुलेनरैः ॥ कवलोयथा ॥ केशरंमातुलुंगस्यसैंधवोषधसंयुतं ॥ हन्या
त्कवलतोजाघमरुचिंकफवातजान् ॥ शार्करादाडिमाभ्यांचद्राक्षादाडिमयोस्तथा ॥ कल्कंविधारयेदास्येशोषवैरस्य
नाशनं ॥ द्राक्षामलकयोकल्कः संघृतंवदनेक्षिपेत् ॥ तेनघृष्ट्वामुखस्यांतकुर्वीतप्रतिसारणं ॥ द्राक्षामलककल्केन
कवलोपेतिकेगदे ॥ पक्कदाडिमवीजैर्वाध्मनाकल्केनवक्रुचित् ॥ सिंधुत्रिकटुराजीभिरार्द्रकेनकफेहितः ॥ आर्द्रकस्व
रसोपेतसैंधवंकटुकत्रयं ॥ आकंठधारयेदास्येनिष्ठिवेच्चपुनःपुनः ॥ एतद्धीपरमंप्राहुर्मेवजंसंनिपातिना ॥ कल्कोवा
लेहयेच्चूर्णंत्रिविधप्रतिसारणं ॥ अंगुल्याग्रप्रणीतंचयथास्वमुखरोगिणां ॥ प्रतिसारणंयथा ॥ कुष्टदार्विसमंगाचपा
ठातिक्ताचपीटिका ॥ तेजनीमुस्तलोध्रंचचूर्णंस्यात्प्रतिसारणं ॥ रक्तश्रुतिदंतपीडांशोषदाहश्चनाशयेत् ॥ हीनयोश्चेत्क
फोत्क्लेशोनासाज्ञानारुचिस्तथा ॥ अतियोगान्मुखेपाकशोषतृष्णाक्लमोभवेत् ॥ व्याधेरपचयस्तुष्टिर्वैशद्यंवक्त्रलाघवं
॥ इंद्रियाणांप्रसादश्चगंडूषैःशुद्धिलक्षणं ॥ ॥ इतिगंडूषकवलप्रतिसारणविधिः ॥ अभ्यंगपरिषेकश्चापिचुर्वस्ति

॥सा॰द॰घ॰उ॥
॥१८१॥

रितिक्रमात् ॥ मूर्द्धतैलचतुर्धास्यात्फलवच्चयथोत्तरं ॥ त्रयोभ्यंगादयः पूर्वंप्रसिद्धासर्वतःस्मृता ॥ शिरोवस्तिविधिश्चात्रप्रोच्यतेयुक्तसं
मतः ॥ शिरोवस्तिश्चर्मणांस्याद्विरोवादशांगुलः ॥ शिरप्रमाणांस्तंवध्वामस्तकेमाषपिष्टकैः ॥ संधिरोधंविधायाथस्नेहैःकोष्णैःप्रपू
रयेत् ॥ तावद्धार्यस्तुयावस्यान्नाशाकर्णमुखश्रुतिः ॥ वेदनोपशमोवापिमात्राणांवाकसहस्रकः ॥ विनाभोजनमेवात्रशिरोवस्ति
प्रशस्यते ॥ प्रयोज्यस्तुशिरोवस्तिःपंचसप्ताहमेववा ॥ विमुच्यशिरसोवस्तिमर्दयेचसमंततः ॥ उष्णकायंततःकोष्णनीरैःस्नानंचका
रयेत् ॥ अनेनदुर्जनपारोगावातजायांतिसंक्षयं ॥ शिरकंपादयस्तेनसर्वकारेषुयुज्यते ॥ इतिमूर्द्धतैलविधिः ॥ स्वेदयेत्कर्णदे
शंतुकिंचिडक्वार्थसाधितं ॥ मूत्रैःस्नेहैःरसैःकोष्णैस्ततःश्रोत्रंप्रपूजयेत् ॥ कर्णेचपूरितंरक्षेच्छतंपंचशतानिच ॥ सहस्रंवा
पिमात्राणांश्रोत्रकंठशिरोगदे ॥ स्वजानुनःकरावर्त्तंकुर्याच्छोटिकयायुतं ॥ एषामात्राभवेदेषांसर्वत्रैवैषनिश्चयं ॥ रसाद्यैः
पूरणंकर्णेभोजनात्प्राकप्रशस्यते ॥ तैलाद्यैःपूरणंकर्णेभास्करेस्तमुपागते ॥ तद्यथा ॥ पीतार्कपत्रमाज्येनलिप्तंवह्नौप्रताप
येत् ॥ तद्रसश्रवणेक्षिप्तंकर्णशूलहरःपरः ॥ कर्णशूलातुलकोष्णछागमूत्रससैंधवं ॥ निक्षिपेत्तेनसाम्यंतिशूलणकादि
कारुजः ॥ श्रृंगवेरंचमधुचसैंधवंतैलमेवच ॥ कटुष्णंकर्णयोर्देयमेतद्वावेदनापहं ॥ कपित्थमातुलुंगाम्लश्रृंगवेररसैःस
मः ॥ सुखोष्णंपूरयेत्कर्णकर्णशूलोपशांतये ॥ अर्काकुरानलपिष्टांतैलाक्तांलवणांविदा ॥ सन्निदध्यात्नुहीकांडेकोरिते

॥राम॰॥
॥१८१॥

जहुदात्तृते ॥ पुटपाकक्रमं कृत्वा रसैस्तस्य प्रपूरयेत् ॥ सुखेस्नेनप्रशाम्यंतिकर्णवीडासदारुजा ॥ महत्पंचमूलस्यकाष्ठान्यष्टा
गुलानि च ॥ क्षौमेनावेष्ट्यसंसिच्यतैलेनादीपयेत्ततयत्तैलंच्यवेत्तस्यसुरवोष्णंतेनपूरयेत् ॥ ज्ञेयंतद्दीपितंतैलंसद्योगृह्णाति
वेदनां ॥ एवंस्याद्दीपिकातैलंकुष्ठदेवतरोस्तथा ॥ तैलस्योनाकमूलेनमंदेग्नौपरिपाचितः ॥ हरेदाशुत्रिदोषोत्थंकर्णशूलंप्रपू
रणात् ॥ कल्कक्काथेनपक्वाद्धिकाकोलीमाषधान्यकैः ॥ शूकरस्यवसापक्वाकर्णनानार्तिनाशिनी ॥ चूर्णपंचकषायानक
पित्थरसमेवच ॥ कर्णश्रावेप्रसंसंतिपूरणंमधुनासह ॥ तिंदुकात्वभयालोध्रसमंगावामलकापि ॥ ज्ञेयपंचकषायस्तुक
र्मरापस्मिन्भिषग्वरैः ॥ स्वर्जिकाचूर्णसंपक्ववीजपूररसंक्षिपेत् ॥ कर्णश्रावरुजोदाहाःप्रशाम्यंतिनसंशयः ॥ आम्रजंवू
प्रवालानिमधूकस्यवरस्यच ॥ एभिःसंसाधितंतैलंकर्णकीटहरंपरं ॥ पूरणंहंतितालेनगवांमूत्रयुजेनच ॥ अथवासा
र्षपंतैलंकर्णकीटहरंपरं ॥ स्वरसंशिग्रमूलस्यसूर्यवर्तरसंतथा ॥ सूषणंचूर्णितंचैवकपिकच्छूजटारसं ॥ कृत्वैकत्र
क्षिपेत्कर्णेकर्णकीटहरंपरं ॥ इतिकर्णपूरणविधिः ॥ शोथआश्चोततःपिंडीवीडालस्तर्पणंतथा ॥ पुटव्याकौजनंचै
भिकल्कैर्नेत्ररुपाचरेत् ॥ तत्रादोशेकःसेकस्तुक्ष्मधाराभीसर्वस्मिन्नयनेहितः ॥ मीलितात्तस्यमर्त्यस्यप्रदेयश्चतुरं
गुलान् ॥ सेकोहिस्नेहनोवातेरक्तेचरोपणालेखनश्चकफेवक्षस्तेजोवृद्धिकरःपरः ॥ षड्वाकशतैःस्नेहनेषुचतुर्भिरोप

रो॥ वाकृशनैश्चत्रिभिः कार्यसेकेत्लेखनकर्मणि॥ कार्यस्तादिवसेसेकोणवत्यंनकेगदे सपथा॥ एरंडपत्रमूलत्वक्सेनमाज
पयोहितः॥ सुखोष्णसेचनंनेत्रेवाताभिष्यंदनाशनं॥ शावरंमधुकंतुल्यंघृतमृष्टंसुचूर्णितं॥ छागक्षीरेण्सतंसेकात्पित्तर
क्ताभिघातजित्॥ त्रिफलालोध्रयष्टिभिः शर्कराभद्रमुस्तकैः॥ पिष्टैस्सशीतांबुनासेकोरक्ताभिष्यंदनाशनः॥ सैंधवंलोध्रघृतभ
ष्टचूर्णितंपटविसृतं॥ उष्णांबुनाविसृदितंसेकाच्छूलप्रशमः॥ अथाश्च्योतनं॥ आश्च्योतनंनैवकार्यंनिशायांसिद्धिमिछ
ति॥ उन्मीलितेहिनयनेविद्व्यंगुलोद्भवैः॥ विंदवोष्टौलेखनेवहनेदशविंदवः॥ रोपणेद्वादशप्रोक्ताः शीतेकोष्णासदाहितां
॥ उष्णेचशीतरूपास्युः सर्वत्रैवेषतिश्चवातेतिक्तंतथा॥ स्निग्धंपित्तेमधुरशीतलंतिक्तोष्णरुक्षंचकफेक्रमाद्दाश्च्योतनंहितं॥
निमेषोन्मेषणाणंसांमंगुल्याश्छोटिकान्तथा॥ गर्वक्षरोच्चरणंवामात्रैषाश्च्योतनेमिता॥ विल्वादिपंचमूलेनवृहत्येरंडशिग्रु
भिः॥ क्वाथआश्च्योतनेकोष्णोवाताभिष्यंदनाशनः॥ त्रिफलाश्च्योतनंनेत्रेसर्वाभिष्यंदनाशनं॥ स्तन्यस्तथान्याश्च्योतनंनेत्रेर
क्तपित्तानिलार्तिला॥ अथपीडिंकाललिनाप्राक्तोप्ध्मवस्त्रपटकैः॥ नेत्राभिष्यंदयोगंपासात्रुरोष्वपिविगद्यते॥ अभि
ष्यंदेषुसर्वेषुवध्रीयापिंडिकाबुधैः॥ एरंडरंडपत्रमूलत्वङ्गिमितांवातनाशिनी॥ निंबपत्रकृतापिंडीश्लेष्मपित्तहरामता
॥ अथवात्रिफलापिंडिश्लेष्मपित्तविनाशिनी॥ पिष्टाकांजिकतोयेनघृतभृष्टाचपिंडिका॥ लोध्रस्यहरतिक्षिप्रमभिष्यंद

॥राम॥
॥१८२॥

मसृणंभवं॥ शुंठीनिंबदलपिंडिकासुखोष्णास्वल्पसैंधवाः॥ पिधायचक्षुःसंयोगाच्छोफकंडूव्यथापहा पिंडालएवमुक्तं॥
अथतर्पणं॥ यद्रूक्षंपरिशुष्कंचनेत्रंकुटिलमाविलं॥ तिमिरार्जुनशुक्रैश्चअभिष्यंदाधिमंथकैः॥ युक्तंतत्तर्पणेयोज्यंनेत्ररोग
विशारदैः॥ अनभ्रशीतवर्षोष्णविनायासंप्रमेध्रुव॥ अशांतोवकृतेवाक्षितर्पणंनप्रयोजयेत्॥ शालिपाशतधौतेनमस्वे
स्नेनजलेनवा॥ निमग्नान्यक्षिपक्ष्माणियावत्स्युस्तावदेववा॥ पूरयेन्निमीलितेनेत्रेततउन्मीलयेच्छनैः॥ यावद्रोगप्र
शांतिस्यात्तावदेवतुधारयेत्॥ मात्राणांनियमोनास्तिशतंवाथसहस्रकं॥ अथपुटपाकः॥ शतऊर्द्धंप्रवक्ष्यामिपुट
पाकप्रसादनः॥ द्वौविल्वमात्रौमांसस्यपिंडौस्निपिंडौस्निग्धस्यपेषितैद्रव्याणांविल्वमात्रंतुद्रव्याणांकुडवोमितं॥ तदेक
त्रसमालोड्यपत्रैःसपरिवेष्टितं॥ पुटपाकेचयत्नात्गर्तायांत्रडसंबुधः॥ तर्पणोक्तविधानेनयथावदवधारयेत्॥
दृष्टिमध्येनिषेक्तव्यंनित्यमुत्तानशायिनः॥ स्नेहनोलेखनीयश्चरोपणश्चैवसत्रिधः॥ हितस्निग्धोनिरूक्षस्यस्निग्ध
स्यापिहिलेखनः॥ अथांजनं॥ अथसंपक्वदोषस्यप्राप्तमंजनमाचरेत्॥ हेमंतशिशिरेचैवमध्याह्नेजनइष्यते॥ पूर्वाह्ने
वापराह्णेशरदिष्यते॥ वर्षास्वनभ्रेनात्युष्णेवसंतेचसदैवहि॥ लेखनंरोपणंमतं॥ मधुरस्नेहसंपन्नमंजनंतुप्रसादनं॥ गु
टिकारसचूर्णानित्रिविधान्यंजनानितु॥ कुर्याच्छलाकयांगुल्यांहीनातीचयथोत्तरं॥ श्रांतेप्ररुदितेभीतेपीतमद्येनव

॥ सा·द·घ·ड ॥ ज्वरे ॥ अजीर्णे विगघाते च नांजनं संप्रशस्यते ॥ हरेणुमात्रां कुर्वीत वर्तिं तीक्ष्णांजने भिषक् ॥ प्रमाणं मध्यमं मध्ये द्विगुणां मदौ भवेत्
॥ १८३ ॥ ॥ अयोरजश्चैन लोध्रमंजनं मरिचं तथा ॥ गोपित्तेन समायुक्तं नडानाशनमुत्तमं ॥ लोहचूर्णांजनं ॥ अंजनं सपगारथ मधुशि
लोषरौः ॥ मोहडो हिमवत्तीति भाषितं तमिषजां वरैः ॥ शिरीषबीजगोमूत्रे कृष्णामरिचसैंधवैः ॥ अंजनस्थाप्यवो धाय सरसोन
शिलावचैः ॥ इत्यंजन अंजनादौ उपूर्वमुक्तविस्तरभयान्नुनर्नोक्तं ॥ श इति नेत्रकर्णाधिकारः ॥ अथ शोणितस्रावविधिः ॥
शोणितं श्रावयेज्जंतोरामयं प्रसमीक्ष्य च ॥ प्रस्थकं वापि प्रस्थार्द्धं प्रस्थार्द्धार्द्धमथापि वा ॥ शरत्काले स्वभावेन कुर्याद्रक्तश्रुतिं
नरः ॥ त्वग्दोषग्रंथिशोथाद्यानस्तुरक्तश्रुतेपज्ञः ॥ मधुरं वर्णितो रक्तं मम्लितोस्मन्तथागुरुः ॥ शोणितं स्निग्धविस्रं स्याद्विय
हश्चास्य पित्तवत् ॥ विश्वनाडवनारागश्चलनं विलयथा ॥ भूम्यादिपंचभूतानां नामेते रक्तगुणाः स्मृताः ॥ रक्ते दुष्टे देवना
स्पास्यात्को दाहश्च मायते ॥ रक्तमंडलजा कंडूः शोथश्च पिटकोद्गमः ॥ तृड्डे रक्तांगनेत्रत्वक्शिराणां पूरणं तथा ॥ गात्राणां
गौरवं निद्रा मदो दाहश्च जायते ॥ क्षीरोग्लमधुराकांक्षाम् र्छायस्त्वम्बिरुक् भ्रमा ॥ शैथिल्यं च शिराणां ह्वाताडुत्वमार्गगामि ॥ राम ॥
मं ॥ अरुणं फेनिलं रूक्षं परुषं तनु शीघ्रगं ॥ आस्कंदी कृष्णविस्रोदी रक्तं स्याद्वातदूषितं ॥ पित्तेन हरितं नीनश्यावं च वि ॥ १८३ ॥
श्रकअ — स्कगुरुसमक्षिकाणां पिप्पल्यानामनीष्टकं ॥ शीतलं बहलं स्निग्धं गैरिकोदकसन्निभं ॥ मांसपेशीप्रभं स्वं

दिग्धंद्रोंकफदूषितं॥ द्विदोषदुष्टंसंसृष्टंत्रिदुष्टंपूतिगंधकं॥ सर्वलक्षणसंयुक्तंकांजिकाभंचजायते॥ विषदुष्टंधनेछामंना
सिकोन्मार्गंतथा॥ विश्वकांतिकसंकासंसर्वकुष्टकरंतथा॥ कुष्टंसपीडेदुर्जेयेनिले॥ यानिरोगेश्लीपदेचविषदुष्टेचरोगिणा
ते॥ ग्रंथ्यर्बुदध्ययविंस्फुडरोगरक्ताधिमथिषुः॥ विदारिस्तनरोगेषुगात्राणांसादगौरवेः॥ रक्ताभिष्यंदतंद्रायांपूतीघ्राणास्य
हेनवे॥ यकृत्प्लीहविसर्पैचविद्रधौपीडयेक्रमे॥ कर्णशूघ्राणवक्त्राणांकोदाहेशिरोरुजि॥ उपदंशेरक्तपित्तेरक्तस्त्रा
वप्रशस्यते॥ एषुरोगेषुशृंगैर्वाजलौकालाबुकैरपि॥ अथवापिशिरोमोक्षैःकारयेद्रक्तपातनं॥ तत्कुर्वीतशिरात्याक्षकृश
स्यातिव्यवापिन॥ क्लीवस्यभीरोगर्भिण्याःसूतिकायांदुरोगिणां॥ पंचकर्मविशुद्धस्यापीजस्नेहस्यावार्शसा॥ सर्वांगशोथयु
क्तानांमुदरीश्वासकासिनां॥ छर्दितीसारयुक्तानांकुंदरिश्वासकासिनां॥ छर्दितीसारयुक्तानांमतिस्विन्नतनोरपि॥ ऊनषो
डशवर्षस्यगतस्यच॥ आघातश्चतरक्तस्यशिरामोक्षोनसश्यते॥ एषांचात्यंतिकयोगेजलौकाभिस्तुनिर्हरेत॥ तथापि
विषसंयुक्तंशिरामोक्षोपिशस्यते॥ गोशृंगेनजलौकाभिरलाबुभिरपित्रिधा॥ वातपित्तकफेर्जष्टंशोणितंस्रावयेद्बुधः
॥ द्विदोषाभ्यांतुसंदुष्टंत्रिदोषैरपिदूषितं॥ शोणितंस्रावयेद्युक्त्याशिरामोक्षैःपरैस्तथा॥ गृह्णातिशोणितंशृंगंदशां
गुलमितंबलात्॥ जलौकाहस्तमात्रंतुविकाराद्दशांगुलं॥ पदमंगुलमात्रंतुशिरासर्वांगशोधिनी॥ शीतेरंतेमर्छति

॥सा·द·घ·उ॥ निद्रामीलितमदश्रमैः ॥ मुर्च्छानां न श्रवेद्रक्तं तथा विण्मूत्रसंज्ञिना ॥ अप्रवर्त्तिते रक्ते च कुष्ठत्रिकटसैंधवैः ॥ मर्द्दयेद्व्रणवक्त्रं तेन सम्य-
॥१८४॥ क्प्रवर्त्तते ॥ तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते ॥ पीत्वा यवागूं न प्रास्य श्रावयेच्छोणितं तु बुधैः ॥ अतिश्विन्नस्योष्णकाले
न थैवापि शिराव्यधात् ॥ अतिप्रवर्त्तते रक्तं न त्वक्र्या स्थितिक्रिया ॥ अतिप्रवृत्ते रक्ते च लोध्रसर्जरसांजनैः ॥ यवगोधूमचूर्णैर्व
ववासैंधवगैरिकैः ॥ सर्पनिर्मोकचूर्णैकभस्मना चूर्णावस्त्रयोः ॥ मुखं व्रणस्य बध्नाच्छीतैश्चोपचरेद्भृशं ॥ विद्धद्वर्द्धशिरां ताव
दहेत्क्षारेण वाग्निना ॥ व्रणं कषायैसंवर्द्ध रक्तं स्कंदयते हिमं ॥ व्रणं संपाचयेत्तु वामागं क्षुशिरिं दहेत् ॥ शिरादाहप्रभावेन
मुष्कशोथो प्रशाम्यति ॥ विसूच्यां पार्ष्णिदाहेन जायते जाठ्रे तेजोप्रदीपनं संकुर्वति यतस्तेन रसश्लेष्मापहा शिरा ॥ यदा हृड्य
कृष्मी हि शिरो संजायते सृजः ॥ तदा तत्स्थानदाहेन संकुचत्यसृजः शिरा ॥ रक्ते दुष्टेऽवशिष्टेपि व्याधिर्नैव प्रकुप्यति ॥ अ
त श्राव्यं स्यावशेषं रक्ते नातिक्रमो हितः ॥ अंधामापकस्तृष्णा तिमिरं शिरशोरुजं ॥ पक्षाघातस्वासकासौ हिक्कादाहं च पांडु ॥रामः॥
ता ॥ कुरुतेतिश्रुतं रक्तं मरणं वा करोति हि ॥ देहस्योत्पत्तिरसृजा देहस्तेनैव धार्यते ॥ विना तेन व्रजेज्जीवो रक्षेद्रक्तमयतो ॥१८४॥
बुधः ॥ शीतोपचारैः कुपिते श्रुतरक्तस्य मारुते ॥ कोष्णेन सर्पिषा पथ्यसत्वथं परिषेचयेत् ॥ क्षीरेणास्येन शशोरभ्रहरिणा
छागमांसजः ॥ रसः सम्यग्वित्तःपाते क्षीरं वा षष्टिका हितं ॥ पीडाशांतौ लघुत्वं च व्याधेस्तद्वेगसंक्षयः ॥ मनः स्वास्थ्यं भवेविक्रं

सम्यग्विश्रावितेसति ॥ व्यायामंमैथुनंक्रोधशीतस्नानंप्रवातकान् ॥ एकासनंदिवानिद्रांक्षाराम्लकटुभोजनं ॥ शोकंवादमजीर्णंचत्यजेदाबलदर्शनात् ॥ इतिश्रोणितश्रावविधिः ॥ यवोद्वादशभिर्गौरसर्षपैःप्रोच्यतेबुधैः ॥ यवद्वेनगुञ्जास्यात्त्रिगुञ्जोवल्लउच्यते ॥ माषोगुञ्जाभिरष्टाभिःसप्तभिर्वाभवेत्क्वचित् ॥ स्याच्चतुर्माषकैःशाणस्सनिष्कटंकएवच ॥ गद्याणोमाषकैःषड्भिःकर्षस्याद्दशमाषिकं ॥ अथपिचुपिचुपाणितलंविडालपदकंतथा ॥ सुवर्णाहंसपदकंपर्यायैकर्षउच्यते ॥ कर्षाभ्यांशुक्तिरादिष्टाशुक्तिभ्यांपलमुच्यते ॥ पलाभ्यांप्रसृतिर्ज्ञेयाप्रसृतिभ्यांतथाञ्जलि ॥ अञ्जलीभ्यांशरास्यात्कुडवोर्द्धशरावकः ॥ शरावाभ्यांभवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकं ॥ भाजनंकंसपात्रंचचतुःषष्टिपलंचसचतुर्भिराढकैर्द्रोणकलशोनल्वणोमणाः ॥ घटोराशिश्चपर्यायाइत्येतेद्रोणवाचकाः ॥ द्रोणाभ्यांसूर्पकुंभौचसूर्पाभ्यांद्रोणिकामता ॥ द्रोणिवहगोणीखारीकथिताकोविदोत्तमैः ॥ पलानांद्विसहस्रंतुभारएकःप्रकीर्तितः ॥ तुलापलसहस्रंतुसर्वत्रैवैषनिश्चयः ॥ माषटंकाक्षबिल्वानिकुडवःप्रस्थमाढकं ॥ राशिर्द्रोणीखारिकेतियथोत्तरचतुर्गुणाः ॥ इतिकालिंकपरिभाषा ॥ ॥ इतिश्रीविश्वनाथकृतौसामान्यदर्पणेलेपादिस्नेहपानपंचकर्मधूमपानादिशिरामोक्षणमानपरिभाषाकथनोध्यायएकादशः ॥ ॥ अथासवाधिकारः ॥ द्रव्येषुचिरकालस्थंद्रवंयत्सन्धितंभवेत् ॥ आसवारिष्टभेदैस्तत्प्रोच्यतेभेषजोचितं ॥ यदपक्वौषधाम्बुभ्यांसिद्धमद्यं

॥सा॰द॰घ॰उ सजासवः॥ अरिष्टक्वाथसिद्धस्यात्तयोर्मानपलोन्मितं॥ अनुक्तमानारिष्टेषुद्रवद्रोणेगुडात्तुलां क्षौद्रंक्षिपेद्गुडादर्द्धंप्रक्षेपदशमा
॥१८५॥ शिकं॥ ज्ञेयंशीतरससिंधुरपक्वमधुरद्रवैः॥ सिद्धपक्वरसःसीधूसंपक्वमधुरद्रवैः॥ परिपक्वान्नसंधानसमुत्पन्नासुरांजगुः॥
॥ सुरामंडंप्रसन्नास्यात्तथाकादंवरीघना॥ तदधोजगलोज्ञेयोमेदकोजगलाशयः॥ बक्कसोहृतसारस्यात्सुरावीजंचकिण्वकं॥
॥ यत्तालखर्जूररसैःसंहितासाहिवारुणी॥ कंदमूलफलादीनिसस्नेहलवणानिच॥ यत्रद्रव्येभिषूयंतेतच्छुक्तमभिधीयते॥ वि
नष्टमम्लतांजातंमद्यंवामधुरद्रवैः॥ विनष्टसंधितोयस्तुतच्चुक्रमभिधीयते॥ विनष्टमम्लतांयातंगुडशुक्तंप्रचक्षते॥ ए
वमेवेक्षुशुक्तंस्यान्मृद्वीकासंभवंतथा॥ तुषांबुसंधितंज्ञेयंमाषैविदलितैयवैः॥ यवैस्तुनिस्तुषैःपक्वैःसौवीरंसंधितंभ
वेत्॥ कुल्माधान्यमंडादिसंधिताकांजिकंविदुः॥ संडाकीसंधिताज्ञेयामूलकैःसर्षपादिभिः॥ गुडांवुनासतैलेनकंदाशाक
फलैस्तथा॥ संधितंवाम्लतांयातंगुडशुक्तंप्रचक्षते॥ अथासवा॥ उशीरवालकंपद्मकारीनीलमुत्पलाः॥ प्रियंगुपद्मकं ॥रामः॥
लोध्रंमंजिष्ठाधन्वयासकं॥ पाठाकिराततिक्तंचन्यग्रोधोदुंवरंशठी॥ पर्पटपुंडरीकंचपटोलकांचनारकः॥ जंवूशाल्मली ॥१८५॥
नियासंप्रत्येकंपलसंमितान्॥ भागान्संचूर्णितान्कृत्वाद्राक्षायापलविंशतिः॥ धातकीषोडशपलाजलद्रोणेक्षिपेत्॥ शर्क
रायास्तुलांदत्वाक्षौद्रस्यैकतुलांतथा॥ मासंसंस्थापयेद्भांडेमांसीमरिचधूपिते॥ उशीरासवइत्येषरक्तपित्तनिवारणः॥ पांडु

कुष्ठप्रमेहार्शकृमिशोषहृत्तथा ॥ उसीरासवः ॥ ॥ पिप्पलीमरिचंचव्यंहरिद्राचित्रकोघनः ॥ विडंगक्रमुकोलोध्रपाठात्वेलवालकं ॥ उशीरचंदनंकुष्ठंलवंगंजगरंतथा ॥ मासीत्वगेलापत्रंचप्रियंगुर्नागकेशरं ॥ एषामलाभागान्सूक्ष्मचूर्णीकृतान्शुभान् ॥ जलद्रोणद्वयेक्षिप्त्वाद्राक्षाकुडवतुलात्रयः ॥ पलानिदशधातक्याद्राक्षावक्षिपलान्क्षिपेत् ॥ एतान्येकत्रसंयोज्यमृद्भांडेतंविनिक्षिपेत् ॥ ज्ञात्वागतरसंसर्वंपाययेदग्न्यपेक्षया ॥ क्षयंगुल्मौकार्श्यग्रहणीपांडुतांतथा ॥ अर्शांसिनाशयेच्छीघ्रंपिप्पल्याद्यासवस्त्वयं ॥ पिप्पल्यासवलोहचूर्णपांडुतांतथा ॥ अर्शांसिनाशयेच्छीघ्रंपिप्पल्याद्यसमस्त्वयं ॥ पिप्पल्याद्यासवलोहचूर्णत्रिकटुकंत्रिफलाचयवानिका ॥ विडंगमुस्तकंचित्रंचतुःसंख्यापलंपृथक् ॥ चूर्णीकृत्यततःक्षौद्रंचतुःषष्टिपलंक्षिपेत् ॥ दद्याकुडवतुलांतत्रजलद्रोणद्वयंतथा ॥ घृतभांडेविनिक्षिप्यनिदध्यान्मासमात्रकं ॥ लोहासमवस्रुमर्त्यपिबेद्वह्निकरंपरं ॥ पांडुश्वयथुगुल्मानिजठराण्यर्शसांरुजं ॥ कुष्ठंप्लीहामयंकंडूंकासंश्वासंभगंदरं ॥ अरोचकंचग्रहणीहृद्रोगंचविनाशयेत् ॥ लोहासवजंबीरस्यरसपात्रेरात्रिकाकुडवोन्मिता ॥ सैन्धवंकुडवोन्मानंतदर्धजरणस्मृतं ॥ त्रिकटुत्रिफलेयोज्यंकर्षैकंरामटंसठं ॥ चूर्णयित्वाघटेक्षिप्त्वामुद्रयित्वाभविस्थितः ॥ पामानिघास्यपृतत्तेवामुजीतपलक्षिपेत् ॥ ततोस्यपात्रयापीतुंसर्वाजीर्णविनाशनं ॥ शूलंगुल्मंतथाप्लीहमानाहमुदरंजयेत् ॥ जंबीरासव ॥ अथारिष्टं ॥ तु

लांकुटजमलस्यमृद्वीकार्द्धतुलांतथा ॥ मधूकपुष्पकाश्मर्यभागान्दशपलान्मितान् ॥ चतुर्द्रोणांभसःपक्वाथेद्रोणावशेषिते
॥ धातकींविंशतिपलंगुडस्यचतुलांक्षिपेत् ॥ मासमात्रस्थितेभांडेकुटजारिष्टसंज्ञकः ॥ ज्वरान्प्रशमयेत्सर्वान्कुर्यात्तीक्ष्णा
धनंजयः ॥ कुटजारिष्ट ॥ नितुगंग्रंथिकंरास्नाकुटजत्वक्फलानिच ॥ पाठैलावालकंधात्रीभागान्पंचपलान्पृथक्
अष्टद्रोणेंभसंपक्त्वाकुर्याद्द्रोणावशेषितं ॥ पूतेशीतेक्षिपेत्तत्रक्षौद्रपलशतत्रयं ॥ धातकीविंशतिपलंत्रिजातंतथा
॥ प्रियंगुकांचनारारांसलोध्रापलंपले ॥ व्योषस्यचपलान्यष्टौचूर्णीकृत्यप्रदापयेत् ॥ घृतभांडेविनिक्षिप्यमा
समेकंविधारयेत् ॥ ततःपिवेद्यथाह्निजयद्विद्रधिमुत्थितं ॥ उरुस्तंभाश्मरीन्मेहाप्रत्यष्ठीलाभगंदरः ॥ गंडमालांह
नुस्तंभंविडंगारिष्टसंज्ञकः ॥ विडंगारिष्ट ॥ तुलार्द्धंदेवदारुस्याद्वासाचपलविंशतिः ॥ मंजिष्ठेंद्रयवादंतितगरंरज
निद्वयं ॥ रास्नाकृमिघ्नमुस्तंचशिरीषंखदिरार्ज्जुनौ ॥ भागान्दशपलान्दद्याद्यवान्यावत्सकस्यच ॥ चंदनस्यगुडू
च्याश्चरोहिण्याश्चित्रकस्यच ॥ भागान्यष्टपलान्येतानष्टद्रोणेंभसापचेत् ॥ द्रोणशेषेकषायेचपूतेशीतेप्रदापये
त् ॥ धातक्याषोडशपलमाक्षिकस्यपलत्रयं ॥ व्योषस्यद्विपलंदद्यात्त्रिजातस्यचतुःपलं ॥ चतुःपलंप्रियंग्वाश्चद्विपलं
नागकेशरं ॥ सर्वाण्येतानिसंचूर्ण्यघृतभांडेविधारयेत् ॥ मासादूर्द्ध्वंपिवेदेनप्रमेहंहंतिदुर्जयः ॥ वातरोगाग्रहणप

शोमत्रकृच्छ्राश्मानाशयेत् ॥ देवदार्व्यादिकारिष्टो दद्रुकुष्ठविनाशनः ॥ देवदार्व्यारिष्टं ॥ ॥ खदिरस्य तुलार्द्धन्तु देव
दारुं च — समं ॥ वाकुची द्वादशपला दार्व्यास्यात्पल विंशतिः ॥ त्रिफला विंशति पलान्यष्टद्रोणेम्भसा पचेत् ॥ कषायेद्रो
णशेषे च पूते शीते विनि— — ॥ तुलाद्वयं माक्षिकस्य तुलेका शर्करा मता ॥ धातक्या विंशतिपलकं कोलं नागकेशरं ॥
जातीफलवलैलात्वक्पत्राणां पृथक् पृथक् ॥ पलोन्मितानि कृष्णायाद्यात्पलचतुष्टयं ॥ घृतभांडे विनिक्षिप्य मासा
दूर्ध्वं पिबेन्नरः ॥ महाकुष्ठानि हृद्रोगं पांडुरोगार्बुदं तथा ॥ गुल्मग्रंथिकृमीन्कासान् तथाप्लीहोदरं जयेत् ॥ एषां वै वारि
वारिष्टं सर्वकुष्ठनिवारणः ॥ खदिरारिष्टं ॥ तुलाद्वयं बब्बूलस्य चतुर्द्रोणे जले पचेत् ॥ द्रोणमेषे रसे शीते गुडस्य त्रितुलां
क्षिपेत् ॥ धातकी षोडशपलां कृष्णा च द्विपलाशिकं ॥ जातीफलानि कंकोलमेलात्वक्पत्रकेशरं ॥ लवंगं मरिचं चैव प
लिकानुपकल्पयेत् ॥ मासं भांडे स्थितं त्वेष बब्बूलारिष्टको जयेत् ॥ क्षयं कुष्ठमतिसारं प्रमेहश्वासकासकान् ॥ बब्बूला
रिष्टं ॥ ॥ द्राक्षा तुलार्द्धं द्विद्रोणे जलस्याविपचेत् सुधीः ॥ पादशेषे कषाये च पूते शीते विनिक्षिपेत् ॥ गुडस्य द्वितु
लां तत्र त्वगेलापत्रकेशरं ॥ प्रियंगु मरिचं कृष्णा विडंगं चेति चूर्णयेत् ॥ पृथक्पलोन्मितैर्भागैर्घृतभांडे निधापयेत्
॥ समंतो घटयित्वा पिबेऽजातरसं ततः ॥ उरःक्षतं क्षयं हंति कासश्वासं गलामयात् ॥ द्राक्षारिष्टाह्वयप्रोक्तो बलकृन्म

लशोधनं ॥ द्राक्षारिष्टारोहितकटुलामेकांचतुर्द्रोणाम्भसपचेत् ॥ पंचकोलेत्रिजातंचत्रिफलांचविनिक्षिपेत् ॥ चूर्णयि
त्वापलाशेनघृतभांडेनिधापयेत् ॥ मासार्द्धंचपिबेत्तद्वज्जायांतिसंक्षयः ॥ ग्रहणीपांडुहृद्रोगप्लीहगुल्मोदराणिच ॥
कुष्ठशोफोरुविड्रोहिणारिष्टसंज्ञितं ॥ रोहितकारिष्टं ॥ पार्णीबृहत्यौगोकंटविल्वोग्नीमथनोरलु ॥ पाटलाकाश्मवे
तिदशमूलमिहोच्यते ॥ दशमूलानिकुर्वीतभागैःपलपलैःपृथक् ॥ पंचविंशत्पलंकुर्याच्चिवपोष्करं ॥ कुर्याद्वि
शत्पललोध्रगुडूचीतत्समाभवेत् ॥ पलैःषोडशभिर्धात्रीरविसंज्ञेदुरालभा ॥ खदीरेबीजसारस्यात्पथ्याचति
पृथक्पलैः ॥ अष्टभिर्गणितानाकुष्ठमंजिष्ठादेवदारुच ॥ विडंगमधुकंभार्गीकपित्थोक्षःपुनर्नवाः ॥ चव्यमांसी
प्रियंगुश्चसारिवाकृष्णजीरकं ॥ त्रिवृतारेणुकारास्नापिप्पलीक्रमुकःशटी ॥ हरिद्राशतपुष्पाचपद्मकंनागके
शरः ॥ मुस्तमिंद्रयवश्रृंगीजीवकर्षभकौतथा ॥ मेदाचान्यामहामेदाकाकोल्यौऋद्धिवृद्धिकैः ॥ कुर्यात्पृथग्द्वि
पलिकान्पचेदष्टगुणोजलः ॥ चतुर्थांशावशेषेणाभांडेसंनिधापयेत् ॥ ततःषष्टीपलंद्राक्षापचेन्नीरेचतुर्गुणे
॥ त्रिपादशेषशीतंचपूर्वक्वाथेशृतंक्षिपेत् ॥ पिप्पलीचेतिसंचूर्णभागैर्हिपलिकैःपृथक् ॥ शाणमात्रंचक
स्तूरीसर्वमेकत्रनिक्षिपेत् ॥ भूमौनिखातयेद्भांडेततोजातरसंपिबेत् ॥ कतकस्यफलंक्षिप्वारसंनिर्मलतानयेत्

॥ग्रहणीमरुद्विशूलंश्वासकासभगंदरान्॥ वातव्याधिक्षयंछर्दिंपांडुरोगंचकामलं॥ कुष्टान्यर्शांसिहाश्चमंदाग्निमुदरा
णिच॥ शर्करश्मरीमूत्रकृच्छ्रमेहधातुक्षयंजयेत्॥ कृशानांपुष्टिजननोवध्यानांपुत्रदःपरं॥ अरिष्टोदशमूलाख्योस्तेज
शुक्रवलप्रदः॥ दशमूलारिष्ट॥ पिप्पलीशृंगवेरंचदेवदारुसचित्रकं॥ चविकाविल्वपेशीचस्कजनोदाहरीत
की॥ महौषधंयवानीचधान्यकंमरिचंतथा॥ साहिंगुजीरकंचापिकांजिकंसाधयेद्भिषक्॥ एषशार्ङ्गरकंनामकांजि
कोग्नीवलप्रदा॥ सिद्धार्थतैलसंभृष्टोदशरोगान्प्रणाशयेत्॥ श्वासंकाशंमतीसारपांडुरोगान्सकामलान्॥ आम
वशूलंगुल्मंचवातशूलंसवेदनं॥ अर्शोशिश्वयथुंचैवशूलंपीतंचसात्मना॥ क्षीरपाकविधानेनकांजिकस्यापिसा
धयेत्॥ नईलकांजिकं॥ ॥ अष्टादशशिग्रुफलानिदशमरिचानिविंशतिश्चपिप्पल्याः॥ आर्द्रकपलगुउपलप्रस्थ
त्रयपारणालस्य॥ वलविडलवणासहितेस्वताहंजंबुरमिगंधाख्यं॥ तांतनस्यपानिझंयकलहंसकंनामकलहंय
कांतिक्॥ सिद्धार्थकखलीप्रस्थंधौतंनिस्तुखंजले॥ मंडप्रस्थेविनिक्षिप्यस्थापयेद्दिवसत्रयं॥ धान्यराशौततोद
द्यात्संचूर्ण्यपलिकानितु॥ अलंवशागोक्षुरकंशतपुष्पापुनर्नवाः॥ प्रसारणीवरुणकशुंठीमदनमेवच॥ सम्यक्
पाकंतुविज्ञायसिद्धातंडहमिश्रिता॥ भृष्टासर्षपतैलेनहिंगुजीरकसंयुता॥ भक्षितालवणोपेताजयेदामंमहारु

जा ॥ एकजं द्वंद्वजं वाप्य सान्निपातिकमेव च ॥ कट्यूरुवातमानाहं जानु ह्यत्रिकजान्यपृष्ठत्रिकं मारुतं ॥ उदावर्त्तं हरीयाद्वलव
र्णाग्निवर्द्धना ॥ इतिपादाकी ॥ धात्रीफलसहस्रे द्वे पीडयित्वार संभिषक् ॥ क्षौद्राष्टभागं पिप्पल्याश्चूर्णाकुडवान्वितं ॥ शर्करा
र्द्धतुलोन्मिश्रपक्वं स्निग्धघटे स्थितः ॥ प्रपिबेन्मात्रयाकाले जीर्णेहितमिताशिनः ॥ कामलापांडुहृद्रोगवातासृग्विषम
ज्वरान् ॥ कासहिक्काऽरुचिश्वासमरिष्टश्चप्रणाशयेत् ॥ धात्र्यारिष्टः यवान्यामलकंपथ्यामरिचंत्रिपलांशिकं ॥ लवणा
निपलांशानि पञ्चयेकत्र चूर्णयेत् ॥ तक्रमासं घटस्थानुं तक्रारिष्टं पिबेन्नरः ॥ दीपनं शोथगुल्मार्शः क्रिमिमेहोदरापहं
॥ तक्रारिष्टं ॥ प्रस्थं तंडुलयेन स्मषजलाप्रस्थत्रयं वाम्लतः ॥ प्रस्थार्द्धं दधितोम्लमूलकपलान्यहिङ्गडान्यानि के ॥ मा
न्यो शोषीतश्रृंगवेरसकलान्येसिंधुजाज्योपले द्वे क्रमेण षणायोनिशापलयुगं निक्षिप्य भांडे दृढे ॥ स्निग्धे धान्ययवादि
राशिनिहितेत्रिचासरान्स्थापयेत् ॥ ग्रीष्मेनोपधूरात्ययेच्चतुरोवर्षास्तुघ्यागमे ॥ षट्शिते हृदिनान्यतः ॥ परमिदं विश्राव्य
संचूर्णयेत वालयलेनसंहितमिदं शुक्कं च चुक्रं च तत् ॥ दान्याद्वातकफामदोषजनितानानाविधाड्जना ॥ दुर्नामानिलगु
ल्मशूलजराहत्वानलं दीपयेत् ॥ वृहच्छुक्रसधानं ॥ वायस्यदद्याद्यवशक्तुकानां पृथक्पृथक्काढकसंमितंश्च मध्य
माराणानि च मूलकानि दद्याच्चतुःषष्टिसुकल्पितानि ॥ द्रोणाम्भसःस्नाप्यघटेसुधौते दद्यादिदं भेषजजातयुक्तं ॥ क्षारद्वयं

गुडूवस्तगं धाधनीयकं स्याद्धिडसैंधवं च ॥ सौवर्चलं हिंगु शिवा टिकांश्च वचां च दद्याद्धि पलप्रमाणं ॥ इमानि वान्यानि
पलोन्मितानि विजर्जरीकृत्य घटे क्षिपेच्च ॥ कृष्णामजाजीमुपकुञ्चिकाच तथा खुरीकार विचित्रकं च ॥ पक्षास्थितोयं
बलवर्णदेहवयः करोति च बलप्रदं च कांजीवयामीति यतः प्रवृत्तं तस्मात्कांजिकेति प्रवदंति तज्ज्ञा आयामकालाज्जयते च मु
क्तमायामकेति प्रवदंति चैतत् ॥ दकोदरं गुल्ममथ प्रसुप्तीहानं हृद्रोगमानाहमरोचकं च ॥ मंदाग्नितां कोष्टगं च शूलमर्शो
विकारान्सभगंदरांश्च ॥ वातामयानाशु हंति सर्वान् ममैवमात विविधान्त्रराणां ॥ आयाम कांजिक ॥ जंबीराणां फल
रसं प्रस्थैकं कुडवोन्मितं ॥ माक्षिकं तं ॥ माक्षिकं तत्र दातव्यं पलैकं पिप्पली स्मृता ॥ एतदेकीकृतं सर्वं मधुभांडे निधाप
येत् ॥ धान्यराशौ स्थितं मासं मधुशुक्तमुदाहृतः ॥ मधुशुक्तं ॥ यस्मादिक्षुर्वा भांडे सक्षौद्रं गुडवांजिकं ॥ धान्यराशौ त्रिरा
त्रस्थं शुक्तं चक्रं तदुच्यते ॥ शुक्तं ॥ गुडांभो ज्वारनालाभे समस्तुनीयथोत्तरं ॥ शस्तं निक्षिप्य राणां भागान्समष्टशुक्तस्य सिद्धये ॥
॥ गुडकधान्यं ॥ प्रसारणीपाउककाथे प्रस्थाद्गुडरसोत्ततः ॥ पञ्चपंचोषणारजः पाद स्याद्दामवातहा ॥ प्रसारणी सधान
॥ वहन्नायासु रायासु सुपक्वाभ्यां शतं घटे ॥ ततो हैत रसोनं तु संशुद्धं द्विगुणं क्षिपेत् ॥ पिप्पली पिप्पलीमूलं मजा
जीकहविचित्रकं ॥ नागरं मरिचं चव्यं चूर्णितं वा क्षमं मितं ॥ सप्ताहात्परतस्ये यावातरोगान्नाशिनी ॥ क्रिमिकुष्टक्षयान

हृद्गुल्मार्शःप्लीहमेहज्वरान् ॥ अग्निसंदीपनी चैव पांडुरोगविनाशिनी ॥ रसोनगुटा ॥ सिद्धार्थकखलीप्रस्थं सुधौतं निस्तुषं जले
॥ मंडप्रस्थं विनिक्षिप्य स्थापयेद्दिवसत्रयं ॥ धान्यराशौ ततो दद्यात्तस्मिंश्चूर्णपलिकानि च ॥ अलंबुषा गोक्षुरकं शतपुष्पी पुन
र्नवा ॥ प्रसारणी वरुणाच्च शुंठी मदनमेव च ॥ सम्यक्पाकं तु विज्ञाय सिद्धां तण्डुलमिश्रितं ॥ भक्ष्या सर्षपतैलेन हिंगुसैंधव
संयुता ॥ भक्षितां लवणोपेतां जयेदाममहाज्वरं ॥ एकजं द्वंद्वजं साध्यं सान्निपातिकमेव च ॥ कट्यूरुवातमानाह
जानुजं त्रिकमागतः ॥ उदावर्त्तं हरीपिया बलवर्णाग्निकारिणी ॥ शिराडाकी ॥ त्वगादिहीनां संशुष्कां प्रस्थयुग्मं सकु
ल्लादयः ॥ लक्ष्मीचूर्णीकृतं तेषां शीतं पलशतत्रयं ॥ शमेन कटुतैलेन व्योषरामथधान्यकैः ॥ क्रिमिघ्नदीप्यकानि
श्याचविकाग्रंथिकार्द्रकैः ॥ जीरकद्वयतुक्षीरं वञ्जुरसाजेशिग्रकैः ॥ दशमूलाम्बुगाभ्यां मार्कवेलरसैस्त्रिभिः ॥ च
तुर्भिः पलिकैः सार्द्धमारणालपरिप्लुतैः ॥ विन्यसेत्स्नेहपात्रे च धान्यराशौ पुनर्न्यसेत् ॥ सप्तरात्रात्समुद्धृत्य पानभक्ष
णभोजनैः ॥ सिध्मलेपप्रयोक्तव्या सा मेवाते विशेषतः ॥ मग्नहृद्याभ्युपहतां कंपितपिठसर्पिणां ॥ गृध्रसीमग्निसादं च
शूलगुल्मोदराणि च ॥ वलीपलितखाल्यहन्त्यासुरमलेह्लीलसिध्मला ॥ तुक्षीरवस्त्वकं च वर्षोहृद्दहनीहयं ॥
॥ चित्रकं च जलद्रोणे पचेत्पादावशेषितः ॥ मागधीचित्रकं क्षोद्रं लिप्तकुंभे निधापयेत् ॥ मधुनप्रस्थनाकप्यथा

चूर्णार्द्धसंयुतं ॥ पुपोषितं दशाहं च जीर्णाभक्तः पिबेन्नरः ॥ अरिष्टोयं जयेत्कुष्ठमविपाकं सुदुस्तरं ॥ त्र्यूषणाद्यरिष्ट ॥ दशमूलीक
ल्काथ ॥ पिप्पलीपिप्पलीमूलंचव्यंशुंठीचवानिका ॥ जीवके द्वे हरिद्रे द्वे विडसौवर्चलं तथा ॥ एतैरेवौषधैः पिष्टैरम्लशालं वि
पाचितं ॥ आमवातहरं हृद्यं कफघ्नं वह्निदीपनं ॥ कांजिकं वज्रकं नाम स्त्रीणामग्निविवर्द्धनं ॥ मकल्लशूलशमनं परं क्षीरा
भिमर्द्दनं ॥ क्षारपाकविधानेन कांजिकस्यापि साधनम् ॥ वज्रकांजिकं ॥ द्राक्षामलकमृणालदायजलजोरोवकृश्चये ॥ पद्मकाच
तुर्थशेषं तु कषायमुपाहरेत् ॥ दत्वागुग्गुलुं तत्र धातकीप्रस्थमेव च ॥ निखापस्थापयेद्भूमौ यावत्पाशोवरोभवेत् ॥ त
तस्तमादाय वारुणीपत्रतः शनैः ॥ पुनस्तं वारुणीयंत्रे समारोप्य ततो हरेत् ॥ एवं तु दशधा शाणं पौनप्रत्येन संहरेत् ॥
ततस्तस्मिंश्चतुर्जातंजातीकोशलवंगकं ॥ कर्पूरं कुंकुमं वापि यथालाभं नियोजयेत् ॥ तं यथाग्निबलं मर्त्यः पिबेत्सर्वक्ष
यापहं ॥ मासेन सह चान्नेन स्निग्धेन मधुरेण च ॥ नरो नवतिवर्षीयोप्यनेन दशकामिनी ॥ प्रत्यहं रमयत्येव युवेव न च
हीयते ॥ पंचसायक ॥ ॥ इति श्रीविश्वनाथकृते सात्म्यदर्पणे आसवारिष्टाध्यायो द्वादशः ॥ १२ ॥
सरसक्काथकल्कासुचूर्णवगुटिकारसा ॥ अवलेहादिपाकश्च पथ्यापथ्यादिकीर्तनं ॥ घृततैलप्रलेहाद्यासवा इ
तिप्रकीर्तिताः ॥ इति संक्षेपतः प्रोक्तसात्म्यदर्पणसंग्रहः ॥ शिष्याणां सुखबोधाय विश्वनाथेन धीमता ॥ ॥

॥सा·द·घ·उ॥ इतिसाहित्यदर्पणसमाप्तम्॥ ॥शुभंभूयात्॥ ॥नेपालसंवत् १०३२ चैत्रशुक्ल ३ वार ५ थ्वबुकुठुकवाहाल
याधर्मराजनंचोयाव सिधयकाजुल· शुभं